प्राप्तसन्त्यागरूपपूर्वपक्षन्यायव्याख्यानम्	५००
अमानत्वरूपसिद्धान्तन्यायव्याख्यानम्	५००
॥ अथ विद्याधिकरणम् ॥ २९ ॥	५०१
सूत्रभाष्यम्	५०१
तत्त्वप्रकाशिका	५०१
सङ्गत्यादि	५०१
पूर्वपक्षः	५०१
सिद्धान्तः	५०२
विद्यायाः मोक्षसाधनत्वे माऽस्तु तर्हि ध्यानमित्याशङ्कापरिहारः	५०२
शेषतात्पर्यचन्द्रिका	५०३
एतदधिकरणप्रतिपाद्यवर्णनम्	५०३
एतदधिकरणस्य अनुबन्धाद्यधिकरणानन्तर्यशङ्का	५०४
तन्निरासः	५०५
सूत्रार्थः	५०५
टीकाक्षरार्थः	५०५
पूर्वपक्षीयकारणानिर्णयन्यायस्य व्याख्यानम्	५०६
श्रुतिस्मृत्योः संशयबीजत्वसमर्थनम्	५०६
सिद्धान्तीयप्राधान्यन्यायस्य व्याख्यानम्	५०६
॥ अथ अबाधाधिकरणम् (श्रुत्यधिकरणम्) ॥ ३० ॥	५०८

विषयः	पृ.सं.
सूत्रभाष्यम्	५०८
तत्त्वप्रकाशिका	५०८
सङ्गत्यादि	५०८
पूर्वपक्षः	५०९
सिद्धान्तः	५०९
शेषतात्पर्यचन्द्रिका	५१०
पूर्वाधिकरणत एतदधिकरणीयपूर्वपक्षे सिद्धान्ते च विशेषः	५१०
एतदधिकरणस्य साधनाध्यायासङ्गतिः गतार्थता चेति शङ्का	५११
तत्परिहारः	५११
पेटिकासङ्गतिः	५१४
अत्राधिकरणे श्रुतेः स्मृत्या बाधनिरासो न विषयः	५१४
सूत्रार्थः	५१४
टीकाक्षरार्थः	५१४
टीकायां पूर्वपक्षीयभ्रमन्यायस्य व्याख्यानम्	५१५
सिद्धान्तीयप्रीतिन्यायस्य व्याख्यानम्	५१५
श्रुत्यादिसूत्रस्य न पूर्वाधिकरणशेषत्वम्	५१५
॥ अथ अनुबन्धाद्यधिकरणम् ॥ ३१ ॥	५१७
सूत्रभाष्यम्	५१७
तत्त्वप्रकाशिका	५१७
सङ्गत्यादि	५१७
पूर्वपक्षः	५१८
सिद्धान्तः	५१८

विषयः	पृ.सं.
शेषतात्पर्यचन्द्रिका	५१९
पेटिकासङ्गतिः	५१९
अस्याधिकरणस्य श्रुत्यधिकरणानन्तर्यसमर्थनम्	५१९
विषयः चिन्ताक्रमश्च	५२०
पूर्वपक्षः	५२१
सिद्धान्तः	५२२
टीकाक्षरार्थः	५२२
पूर्वपक्षीयविशेषदर्शितान्यायस्य व्याख्यानम्	५२२
सिद्धान्तीयागमन्यायस्य व्याख्यानम्	५२२
॥ अथ दर्शनभेदाधिकरणम् (प्रज्ञान्तराधिकरणम्) ॥ ३२ ॥	५२४
सूत्रभाष्यम्	५२४
तत्त्वप्रकाशिका	५२४
सङ्गत्यादि	५२४
पूर्वपक्षः	५२५
सिद्धान्तः	५२५
शेषतात्पर्यचन्द्रिका	५२६
सङ्गतिः	५२६
पूर्वपक्षः	५२७
सिद्धान्तः	५२७
सूत्रार्थः	५२८
टीकायां पूर्वपक्षीयालापन्यायस्य विवरणम्	५२९
सिद्धान्तीयसुस्थिरत्वन्यायस्य व्याख्यानम्	५३०

विषयः	पृ.सं.
॥ अथ नसामान्याधिकरणम् ॥ ३३ ॥	५३२
सूत्रभाष्यम्	५३२
तत्त्वप्रकाशिका	५३२
सङ्गत्यादि	५३२
पूर्वपक्षः	५३३
सिद्धान्तः	५३३
शेषतात्पर्यचन्द्रिका	५३४
प्रतिपाद्यम् अनन्तरसङ्गतिश्च	५३४
विषयसंशयौ	५३४
पूर्वपक्षः	५३४
सिद्धान्तः	५३५
सूत्रार्थः	५३५
टीकायां पूर्वपक्षीयगुणसामान्यन्यायस्य व्याख्यानम्	५३७
टीकायां सिद्धान्तीकृतप्राप्तिन्यायस्य व्याख्यानम्	५३७
॥ अथ ताद्विद्याधिकरणम् ॥ ३४ ॥	५३९
सूत्रभाष्यम्	५३९
तत्त्वप्रकाशिका	५३९
सङ्गत्यादि	५३९
पूर्वपक्षः	५४०
सिद्धान्तः	५४०
शेषतात्पर्यचन्द्रिका	५४१
पेटिकासङ्गतिः, अनन्तरसङ्गतिश्च	५४१

विषयः	पृ.सं.
चिन्ताक्रमः, अधिकरणारम्भस्य सार्थक्यं च	५४१
पूर्वपक्षः	५४२
सिद्धान्तः	५४२
सूत्रार्थः	५४३
लिङ्गभूयस्त्वादित्यारभ्य परेण चेत्यन्तं नवसूत्री एकमधिकरणमिति मतानुवादः	५४४
तन्निरासः	५४६
लिङ्गभूयस्त्वादिति सूत्रस्य अद्वैत्यभिमतार्थनिरासः	५४६
अस्यैव सूत्रस्य विशिष्टाद्वैतमतरीत्या शैवमतरीत्या च व्याख्या तन्निरासश्च	५४७
पूर्वविकल्पेति सूत्रस्य पराभिमतार्थनिरासः	५४८
पूर्वविकल्पेति सूत्रस्य रामानुजाभिमतार्थनिरासः	५४९
'अतिदेशाच्च' इति सूत्रस्य पराभिमतार्थनिरासः	५५०
'विद्यैव तु निर्धारणात्' 'दर्शनाच्च' इति सूत्रयोः परोक्तार्थः	५५०
'श्रुत्यादिबलीयस्त्वाच्च न बाधः' इति सूत्रस्य परोक्तार्थः	५५०
'अनुबन्धादिभ्यः' इति सूत्रस्य परोक्तार्थः	५५१
न सामान्यादिति सूत्रस्य परोक्तार्थः	५५२
परेण च शब्दस्येति सूत्रस्य परोक्तार्थः	५५२
तन्निरासः	५५३
टीकायां पूर्वपक्षीयपृथग्दृष्टिन्यायस्य व्याख्यानम्	५५४
टीकायां सिद्धान्तीयानादिगुणविस्तरन्यायस्य व्याख्यानम्	५५५
॥ अथ एकाधिकरणम् ॥ ३५ ॥	५५६
सूत्रभाष्यम्	५५६

विषयः	पृ.सं.
तत्त्वप्रकाशिका	५५६
सङ्गत्यादि	५५६
पूर्वपक्षः	५५७
सिद्धान्तः	५५७
शेषतात्पर्यचन्द्रिका	५५८
सङ्गतिश्चिन्ताक्रमश्च	५५८
पूर्वपक्षः	५५९
सिद्धान्तः	५५९
सूत्रार्थः	५५९
परमतीयाधिकरणानुवादः	५५९
तन्निरासः	५६०
शैवमतानुवादः	५६२
तन्निरासः	५६२
टीकायां पूर्वपक्षीयागम्यवर्त्मन्यायस्य व्याख्यानम्	५६३
सिद्धान्तीयसाधनोत्तमतान्यायस्य व्याख्यानम्	५६३
॥ अथाङ्गावबद्धाधिकरणम् ॥ ३६ ॥	५६४
सूत्रभाष्यम्	५६४
तत्त्वप्रकाशिका	५६४
सङ्गत्यादि	५६४
पूर्वपक्षः	५६५
सिद्धान्तः	५६५
एकत्र प्रतीतानां गुणानामन्यत्रोपसंहारेऽविरोधसमर्पणम्	५६६

विषयः	पृ.सं.
शेषतात्पर्यचन्द्रिका	५६७
एतदधिकरणविषयः सङ्गतिश्च	५६७
पूर्वपक्षः	५६८
सिद्धान्तः	५६८
एतदधिकरणाभिमतावपरौ पूर्वपक्षसिद्धान्तौ	५६८
सूत्रार्थः	५७०
अद्वैत्यभ्युपगतमङ्गावबद्धाधिकरणशरीरम्	५७०
तन्निरासः	५७२
अङ्गावबद्धास्त्विति सूत्रस्य पराभिमतार्थनिरासः	५७२
'मन्त्रादिवद् वाऽविरोधः' इति द्वितीयसूत्रस्य पराभिमतार्थनिरासः	५७३
टीकायां पूर्वपक्षीयसन्धानन्यायस्य व्याख्यानम्	५७३
सिद्धान्तीयश्रुतिदृष्टिन्यायस्य व्याख्यानम्	५७४
॥ अथ भूमाधिकरणम् ॥ ३७ ॥	५७६
सूत्रभाष्यम्	५७६
तत्त्वप्रकाशिका	५७६
सङ्गत्यादि	५७६
पूर्वपक्षः	५७६
सिद्धान्तः	५७७
शेषतात्पर्यचन्द्रिका	५७७
प्रतिपाद्यविषयः सङ्गतिश्च	५७७
संशयः	५७८
पूर्वपक्षः	५७८

विषयः	पृ.सं.
सिद्धान्तः	५७९
सूत्रार्थः	५८०
परमतरीत्या एतदधिकरणशरीरम्	५८०
तन्निरासः	५८१
एतत्सूत्रस्य परोक्तार्थनिरासः	५८३
टीकायां पूर्वपक्षीयेष्टफलन्यायस्य व्याख्यानम्	५८३
टीकायां सिद्धान्तीयशिष्टिन्यायस्य व्याख्यानम्	५८४
॥ अथ नानाधिकरणम् ॥ ३८ ॥	५८६
सूत्रभाष्यम्	५८६
तत्त्वप्रकाशिका	५८६
सङ्गत्यादि	५८६
पूर्वपक्षः	५८६
सिद्धान्तः	५८७
शेषतात्पर्यचन्द्रिका	५८७
सङ्गतिः चिन्ताक्रमश्च	५८७
पूर्वपक्षः	५८७
सिद्धान्तः	५८८
सूत्रार्थः	५८९
पराभ्युपगतमधिकरणम्	५८९
तन्निरासः	५९०
एतत्सूत्रस्य परोक्तार्थनिरासः	५९२
टीकाक्षरार्थः	५९२

विषयः	पृ.सं.
पूर्वपक्षीयाकल्पनान्यायस्य व्याख्यानम्	५९२
सिद्धान्तीयानूनतान्यायस्य व्याख्यानम्	५९२
॥ अथ विकल्पाधिकरणम् ॥ ३९ ॥	५९४
सूत्रभाष्यम्	५९४
तत्त्वप्रकाशिका	५९४
सङ्गत्यादि	५९४
पूर्वपक्षः	५९४
सिद्धान्तः	५९५
शेषतात्पर्यचन्द्रिका	५९५
एतदधिकरणप्रतिपाद्यविषयः सङ्गतिश्च	५९५
चिन्ताक्रमः पूर्वपक्षश्च	५९८
सिद्धान्तः	५९८
स्वयूथ्यानामेव केषाञ्चित् प्रकारान्तरेणाधिकरणरचनम् तत्र पूर्वपक्षः	६००
सिद्धान्तः	६०१
सूत्रार्थः	६०१
परमतानुवादः	६०१
तन्निरासः	६०२
टीकाक्षरार्थः	६०३
पूर्वपक्षीयशुद्धवैरूप्यन्यायस्य व्याख्यानम्	६०४
अविघ्नत्वाख्यसिद्धान्तन्यायस्य व्याख्यानम्	६०४
॥ अथ काम्याधिकरणम् ॥ ४० ॥	६०६
सूत्रभाष्यम्	६०६

विषयः	पृ.सं.
तत्त्वप्रकाशिका	६०६
सङ्गत्यादि	६०६
पूर्वपक्षः	६०६
सिद्धान्तः	६०७
शेषतात्पर्यचन्द्रिका	६०७
अनन्तरसङ्गतिः	६०७
चिन्ताक्रमः पूर्वपक्षश्च	६०८
सिद्धान्तः	६०८
सूत्रार्थः	६०९
अद्वैतमतरीत्या एतदधिकरणशरीरम्	६०९
तन्निरासः	६१०
टीकाक्षरार्थः	६१०
पूर्वपक्षीयाङ्गत्वन्यायव्याख्यानम्	६११
सिद्धान्तीयाविरोधन्यायस्य व्याख्यानम्	६१२
प्रकारान्तरेणाधिकरणव्याख्यानस्य निरासः	६१२
॥ अथाङ्गाधिकरणम् ॥ ४१ ॥	६१४
सूत्रभाष्यम्	६१४
तत्त्वप्रकाशिका	६१५
सङ्गत्यादि	६१५
पूर्वपक्षः	६१५
सिद्धान्तः	६१५
भगवदङ्गाश्रितत्वेन देवतोपासनस्य कर्तव्यतायाः श्रुत्या समर्थनम्	६१५

विषयः	पृ.सं.
उक्तोपासनस्य निरधिकारिकत्वशङ्कानिरासः	६१६
भगवद्गुणानां सर्वोपास्यत्वश्रुतेरुक्तोपासनसमर्थनम्	६१६
शेषतात्पर्यचन्द्रिका	६१६
सङ्गतिः	६१६
पूर्वपक्षः	६१७
सिद्धान्तः	६१८
सूत्राक्षरार्थः	६१८
सूत्रक्रमः	६२०
टीकायामविशेषदृष्टिन्यायस्य व्याख्यानम्	६२०
टीकायां गुणवैशेष्यन्यायस्य व्याख्यानम्	६२१
॥ अथ नवाधिकरणम् ॥ ४२ ॥	६२२
सूत्रभाष्यम्	६२२
तत्त्वप्रकाशिका	६२२
सङ्गत्यादि	६२२
पूर्वपक्षः	६२२
सिद्धान्तः	६२३
शेषतात्पर्यचन्द्रिका	६२३
अनन्तरसङ्गतिः	६२३
पूर्वपक्षः	६२४
सिद्धान्तः	६२४
सूत्राक्षरार्थः	६२५

विषयः	पृ.सं.
'अङ्गेषु यथाऽऽश्रयभावः' इत्यारभ्य 'दर्शनाच्च' इत्यन्तं षट्सूत्री एकमधिकरणमिति मतानुवादः	६२५
तन्मतविमर्शश्च	६२६
'अङ्गेषु यथाऽऽश्रयभावः' इति सूत्रस्य पराभिमतार्थनिरासः	६२७
'शिष्टेश्च' इति सूत्रस्य पराभिमतार्थनिरासः	६२७
'समाहारात्' इति सूत्रस्य परोक्तार्थनिरासः	६२८
'गुणसाधारण्यश्रुतेश्च' इति सूत्रस्य परोक्तार्थनिरासः	६२८
'न वाऽतत्सहभावश्रुतेः' इत्यस्य परोक्तार्थः	६२८
तद्विमर्शः	६२९
'दर्शनाच्च' इति सूत्रस्य पराभिमतार्थालोचनम्	६२९
आचार्यकृतैतत्पादव्याख्यानस्य सामञ्जस्यकथनेनोपसंहारः	६३०
टीकायां पूर्वपक्षीयक्रियान्यायस्य व्याख्यानम्	६३०
टीकायां सिद्धान्तीयागमन्यायस्य व्याख्यानम्	६३१
परिशिष्टम् - १	६३३
परिशिष्टम् - २	६३९
परिशिष्टम् - ३	६४६

०-०-०

सङ्केताक्षरसूची

अ.को.	-	अमरकोषः
अ.र.	-	अग्निरहस्यम्
अ.शिखो.	-	अथर्वशिखोपनिषत्
आ.उ.	-	आथर्वणोपनिषत्
आ.श्रौ.सू.	-	आश्वलायनश्रौतसूत्रम्
ऋ.	-	ऋग्वेदः
ऋ.सं.	-	ऋक्संहिता
ऐ.आ.	-	ऐतरेयारण्यकम्
ऐ.उ.	-	ऐतरेयोपनिषत्
कठ.उ.	-	कठोपनिषत्
के.उ.	-	केनोपनिषत्
कौ.उ.	-	कौषीतक्युपनिषत्
गन्धर्व.उ.	-	गन्धर्वोपनिषत्
ग.पु.प्रे.का.अ.	-	गरुडपुराणप्रेतकाण्डम्, अध्यायः
चित्त्यु.	-	चित्त्युपनिषत्
छा.उ.	-	छान्दोग्योपनिषत्
तै.आ.	-	तैत्तिरीयारण्यकम्
तै.उ.	-	तैत्तिरीयोपनिषत्
तै.ना.उ.	-	तैत्तिरीयनारायणोपनिषत्
तै.ब्रा.	-	तैत्तिरीयब्राह्मणम्
तै.सं.	-	तैत्तिरीयसंहिता
त्रि.म.ना.उ.	-	त्रिपाद्विभूतिमहानारायणोपनिषत्
ना.ता.उ.	-	नारायणोत्तरतापिन्युपनिषत्

नार.उ.	-	नारसिंहोपनिषत्
नृ.पू.	-	नृसिंहपूर्वतापिन्युपनिषत्
नृसिंह.उ.	-	नृसिंहोपनिषत्
न्या.वि.	-	न्यायविवरणम्
प्र.उ.	-	प्रश्नोपनिषत्
बृ.उ.	-	बृहदारण्यकोपनिषत्
ब्र.सू.	-	ब्रह्मसूत्रम्
ब्र.सू.भा.उदा.	-	ब्रह्मसूत्रभाष्योदाहृता
भ.गी.	-	भगवद्गीता
भाग.	-	भागवतम्
भा.ता.	-	भागवततात्पर्यम्
म.ना.उ.	-	महानारायणोपनिषत्
म.भा.	-	महाभारतम्
म.भा.उ.प.अ.	-	महाभारतम् उद्योगपर्वः, अध्यायः
मा.श्रौ.सू.	-	मानवश्रौतसूत्रम्
मुण्ड.उ.	-	मुण्डकोपनिषत्
मै.उ.	-	मैत्रायण्युपनिषत्
यो.चू.उ.	-	योगचूडामण्युपनिषत्
वि.त.विनि.	-	विष्णुतत्त्वविनिर्णयः
शरब.उ.	-	शरबोपनिषत्
शरभ.उ.	-	शरभोपनिषत्
शा.भा.उदा.श्रुतिः	-	शाङ्करभाष्योदाहृतश्रुतिः
श्वे.उ.	-	श्वेताश्वतरोपनिषत्
(सु.)सुबाल.उ.	-	सुबालोपनिषत्

॥ श्री वेदव्यासाय नमः ॥

श्रीशेषतात्पर्यचन्द्रिकाभूषितश्रीमत्तत्त्वप्रकाशिकासमलङ्कृते श्रीमद्ब्रह्मसूत्रभाष्ये

तृतीयाध्याये द्वितीयपादः

(अवशिष्टाधिकरणानि)

॥ सूत्रभाष्यम् ॥

॥ अथ पालकत्वाधिकरणम् ॥ १३ ॥

सृष्टिसंहारकर्तृत्वमेवास्य, न पालकत्वम्। स्वतः सिद्धेरित्यत आह-

॥ ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयःॐ ॥ ३-२-२२ ॥

उक्तं सृष्टिसंहारकर्तृत्वमात्रं प्रतिषिध्य ततोऽधिकं ब्रवीति- 'नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति' (ऋ. १०-३१-८) इति। चशब्दात् स्मृतिश्च।

'सृष्टिं च पालनं चैव संहारं नियमं तथा।
एक एव करोतीशः सर्वस्य जगतो हरिः॥'

इति ब्रह्माण्डे॥ २२॥

॥ इति पालकत्वाधिकरणम् ॥१३॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मप्राप्तिसाधनभक्त्यर्थं तस्य विश्वपालकत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। पालकत्वगुणाभावे तत्र निरतिशयभक्त्यनुदयात् तत् समर्थनीयमेव। सृष्ट्यादिकं जगतो हरिः करोतीत्युक्तम्। तत्र जगत्पालनमेव विषयः। विष्णोर्युक्तमयुक्तं वेति सन्देहः। गुणानामपि युक्तायुक्तत्वदर्शनं सन्देहबीजम्।

सृष्टिसंहारकर्तुर्भगवतः पालकत्वं नास्तीति पूर्वपक्षः

पूर्वपक्षयति - सृष्टीति ॥ न पालकत्वं भगवतोऽस्ति। सृष्टिसंहारकर्तृत्वात्। सत्यां च सृष्टौ यावत्संहारं जगत्स्थितेः स्वत एव सिद्धेः। संहर्तुरसंहारातिरिक्तव्यापारस्य रक्षारूपस्यैवायोगात्। अन्यस्य तु सृष्ट्यादिकर्तृत्वे सम्भवति निवारणादिव्यापारः। एतेनावान्तरोपद्रवनिवारणं च प्रत्युक्तम्। तत्रापि स्वयं कर्तृत्वात्। अतः पालकत्वाभावेन महामहिमत्वाभावाद् अयुक्ता तत्र निरतिशया भक्तिरिति भावः।

सृष्टिसंहारमात्रकर्तृत्वस्य श्रुतौ प्रतिषेधात् पालकत्वमप्यस्तीति सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे - अत इति॥ अस्त्येव हरेः पालकत्वम्। यतः 'नैतावदेना' (ऋ. १०.३१.८) इति श्रुतिः प्रकृतस्य सृष्ट्यादिकर्तृत्वस्य तावन्मात्रत्वं निषिध्य ततोऽधिकं पालनमपि ब्रवीति। तेन ज्ञायते सृष्टिसंहारकर्तुरपि पालकत्वमिति भावः। अनेनेश्वरेण भवत् कार्यमेतावत् प्रागुक्तं सृष्टिसंहारमात्रं न भवति। किन्त्वन्यदस्ति। किं तत्? स परो भक्ताभिलषितसेचको द्यावापृथिवी धत्ते पुष्णाति चेत्यर्थः। सृष्टिसंहारकर्तुरपि पालकत्वे स्पष्टस्मृतिं चाऽह- चशब्दादिति॥ सुमुचितेति शेषः। अनेन स्थितेः

स्वतस्सिद्धत्वं च परिहृतम्। धारणपोषणादेरुक्तत्वादिति। अतः पालनादिमहामहिम्नि हरौ भक्तिर्युक्तेति सिद्धम्॥ २२॥

॥ इति पालकत्वाधिकरणम्॥१३॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयःॐ ॥ ॥ ३-२-२२ ॥

पेटिकासङ्गतिः

लोके स्वपालक एव भक्त्युत्पत्तिदर्शनादपालकत्वं तत्र प्रतिबन्धकमिति पालकत्वव्युत्पादनेन भक्त्युत्पत्तिप्रतिबन्धकनिरासोऽत्र क्रियत इति समर्थनपेटिकासङ्गतिः। निरतिशयभक्तिविषयटीका पूर्ववत् कैमुत्यद्योतिकैव नेया।

पूर्वाधिकरणसङ्गत्यभावशङ्का

नन्वस्य पूर्वाधिकरणसङ्गतिर्न लभ्यते। नच पूर्वत्र 'दर्शनाच्च' (ब्र.सू. ३-१-२१) इति सूत्रेण भक्तितारतम्यसाधकानन्दतारतम्ये श्रुतिस्मृतिरूपप्रमाणोपन्यासवदत्रापि विष्णोः पालकत्वे 'ब्रवीति च' इति श्रुतिस्मृत्योरुपन्यासादनन्तरसङ्गतिरिति वाच्यम्। अरूपाधिकरणे 'दर्शयति चाथो अपि स्मर्यते' (ब्र.सू. ३-२-१७) इति सूत्रे श्रुतिस्मृत्योरुपन्यासात् तदानन्तर्यापत्तेः। अत्रापि सङ्गतत्वाद् वचनमिति समाधानं तु क्लिष्टम्। प्रत्युत पूर्वोक्तमानन्दतारतम्यं श्रौतमपि न युज्यते। भगवदानन्दप्रतिबिम्बत्वस्य 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः' (ब्र.सू. ३-२-३२) इति सूत्रे सम्बन्धशब्देन वक्ष्यमाणत्वात्। भगवदानन्दस्य च 'स्थानतोऽपि' (ब्र.सू. ३-२-११) इत्यत्र तारतम्याभावोक्तेः। नहि बिम्बावैचित्र्ये प्रतिबिम्बवैचित्र्यं भवतीति शङ्कनात्। 'स्थानविशेषात् प्रकाशादिवत्' (ब्र.सू. ३-२-३५) इत्यधिकरणस्यैवात्र सङ्गतत्वाच्च। विचारितं च वृद्धिनयानन्तरं स्थानविशेषाधिकरणप्रमेयं सुधानुव्याख्यानयोरिति चेत्,

तन्निरासः

न। न केवलं भक्तितारतम्येन मोक्षानन्दतारतम्यमात्रं, किन्तु धारणपोषणादिसांसारिकाभिलषितसकलसिद्धितारतम्यमपीति समर्थनस्येहैव सङ्गतत्वात्। यत्तु सुधानुव्याख्यानयोः वृद्धिनयानन्तरं स्थानविशेषाधिकरणप्रमेयं विचार्यते तत्तु स्थानविशेषनयस्य न केवलं 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः' (ब्र.सू. ३-२-३२) इति सूत्रेण सङ्गतिः, किन्तु वृद्धिनयेनापि, तेन तस्य विषयादिसमर्पणसम्भवादिति सूचयितुम्।

विषयसंशयौ

जन्मादिसूत्रोक्तं जगत्पालकत्वं विषयः। युक्तमयुक्तं वेति सन्देहः। द्वैविध्यदर्शनं सन्देहबीजम्। ननु न क्वापि गुणेषु अयुक्तत्वमुपलब्धं, गुणत्वव्याहतेरिति। सत्यम्। चित्तद्रवीभावो हि लोके गुणो दृष्टः। अन्यथा निर्दयत्वप्राप्तेः। स चेश्वरे न युक्तः। चित्तविकाराभावादित्याद्यूह्यम्।

पूर्वपक्षः

तत्र विष्णोर्जगत्पालकत्वं न युक्तम् । प्रमाणाभावात्। नच 'यतो वा इमानि' (तै.उ. ३.३४) इत्यादिवाक्यं प्रमाणम्। तस्य सृष्टिसंहारकर्तृत्वयोरेव तात्पर्यात्। पालकत्वेऽपि तात्पर्याभावात्। तद्धि, स्रष्टृत्वसंहर्तृत्वे जगति स्वप्रयोज्यामुत्पत्तिं नाशं च यथा अपेक्षेते तथा स्वप्रयोज्यं जगति धर्मान्तरमपेक्षते। तत्तु दुर्वचम्। तथाहि- तत् किं संहारप्रागभावः, संहारनिवारणव्यापारविषयत्वं वा सृष्टिप्रेरणमात्रविषयत्वं वा अवान्तरोपद्रवनिवारणविषयत्वं वा। नाऽद्यः। प्रागभावस्यानादित्वेन तत्रेश्वरापेक्षाभावात्। भावे वा सृष्ट्यादिवद् भगवति व्यापारान्तरासिद्धेः। असंहारव्यतिरिक्तव्यापारस्य पालकत्वस्याद्याप्यसिद्धेः। न द्वितीयः। संहारस्यान्यकर्तृकत्वप्राप्तेः। स्वकर्तृकसंहारे स्वस्यैव निवारकत्वानुपपत्तेः। अत एव न तृतीयः। नापि चतुर्थः। अवान्तरोपद्रवस्यापि सर्वकर्तृत्वश्रुत्या भगवदधीनत्वेन स्वस्यैव तत्र निवारकत्वानुपपत्तेः। तथाच सत्यां सृष्टौ यावत्संहारं जगतः स्वत एव स्थितिसम्भवात् तदर्थं भगवतः पालकत्वरूपधर्मान्तरस्याकल्प्यत्वात्,

स्रष्टृत्वादिवदेवैतत् पालकत्वं जगत्यपि।
धर्मान्तरमपेक्षेत तच्च नैवोपलभ्यते ॥ १ ॥

संहाराभाव एवातः पालनं नान्यदिष्यते।
अतोऽस्य पालकत्वाख्यं धर्मं नेक्षामहे वयम् ॥ २ ॥

इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु - अस्त्येव धारणपोषणाख्यं पालनं संहाराभावातिरिक्तम्। अचेतनानां वृद्ध्यादिकस्य, चेतनानां सुखतदनुकूले परिस्पन्दादिरूपस्य च बहुलमुपलब्धेः। तस्य चेश्वरः कर्ता। अन्यथेश्वरत्वहानेः। एतेन संहारकर्तृत्वमन्यगतं स्यादिति परास्तम्। संहारनिवारणादिव्यापारवत्त्वस्य पालकत्वरूपत्वानभ्युपगमात्। तथाच -

चेतनाचेतनेष्वस्ति धारणं पोषणं यतः।
अतोऽस्त्यसंहृतेरन्यत् पालकत्वं परेशितुः ॥

अत्र न केवलं भक्तितारतम्येन मौक्तिकानन्दतारतम्यप्रद एव, किन्तु सांसारिकवृद्ध्याद्यभिलषितप्रदाताऽपि भगवानिति फलितम्।

सूत्रार्थः

सूत्रार्थस्तु - **प्रकृतस्य** सृष्टिसंहारकर्तृत्वस्यैव **एतावत्त्वं** पर्याप्तत्वं **प्रतिषेधति**

'नैतावदेना' (ऋक्.सं. १०.३१.८) इति श्रुतिः। एवं प्रतिषिध्य **भूयः** अधिकं **ब्रवीति च** ब्रह्माण्डस्मृतिश्चेति।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - अयोगन्यायं सम्बन्धिप्रदर्शनपूर्वकं विवृण्वत् **'नच संहारकर्तुरसंहारादन्यरक्षाऽयोगः'** (न्या.वि.) इति वाक्यं भाष्यविवरणपरमपि, अत एव भाष्ययोजनानन्तरमेव योज्यमिति मन्वानो भाष्यमादौ संयोज्य तत्र हेतुत्वेन व्याचष्टे- **संहर्तुरसंहारेति** । विशेषदृष्टिन्यायमेतदधिकरणसङ्गतत्वेन विवृण्वत् **' "स सृजति स पालयति स विनाशयति" इत्यादिविशेषवाक्यादन्नदानाद्युपपत्तेः'** (न्या.वि.) इति वाक्यं तत्र 'विशेषवाक्यात्' इत्यन्तं 'चशब्दात् स्मृतिश्च' इति भाष्यं च परस्परोपलक्षणपरमिति शिष्यैरेवोह्यमिति 'अन्नदानाद्युपपत्तेः' इत्यन्तिमवाक्यं सूचनया व्याचष्टे-**धारणपोषणादेरुक्तत्वादिति**॥

न्यायविवरणे विशेषदृष्टिन्यायस्य व्याख्यानम्

अनेन विवरणे विशेषदृष्टिन्यायः द्वेधा व्याख्यातः । 'स सृजति' इत्यादिविशेषवाक्यादन्नदानादिविशेषदर्शनाच्चेति। यदि 'स सृजति', 'नैतावदेना परः' इत्यादिवाक्यं कथञ्चिद् योज्येत तर्हीश्वरप्रार्थनादिना वृष्ट्यादिद्वारा तत्कर्तृकमन्नदानादिकं दृश्यमानं न स्यात्। ततश्चोत्पादविनाशकर्तुरपि संहारोदासीनत्वातिरिक्तं पालकत्वमङ्गीकार्यमेवेति विवरणार्थो बोध्यः। अनेन सौत्रश्चशब्द उक्तयुक्तिसमुच्चायकोऽपि व्याख्येयः। तेन "ब्रवीति" सामान्यवचनेनैव श्रुतिस्मृत्योर्ग्रहणसम्भवे चशब्दो व्यर्थ एवेति शङ्काऽपि निरस्ता । सृष्टिसंहारकर्तृत्वमन्यस्यैवाङ्गीकृत्य पालकत्वं भगवतः किं नाङ्गीक्रियते? कालभेदो वा कुतो नाऽश्रीयते? इत्याशङ्कानिरासाय ब्रह्माण्डवचनं पृथग् भाष्ये चशब्देन सङ्गृहीतमित्यादि भाष्यादौ स्वयमूहनीयम्।

न्यायविवरणवाक्यस्य व्याख्यानान्तरम्

यद्वा 'विशेषदृष्टिवाक्ये च' इति न्यायमालायां न्यायद्वयमप्येतदधिकरणसङ्गतत्वेन व्याख्यानाय विवरणवाक्यं प्रवृत्तम्। [1]तथाहि - सोपानारोहणन्यायेन पश्चादुद्दिष्टमपि विशेषवाक्यन्यायमादौ विवृणोति- **स सृजति स पालयतीत्यादिना** ॥ यदाऽन्यः सृजति तदा विष्णुः पालयति । यदाऽन्यः पालयति तदा विष्णुः सृजति इत्यर्थोपपत्तेः इति । विशेषवाक्यस्य सावकाशत्वशङ्कायां प्रथमोद्दिष्टविशेषदृष्टिन्यायं विवृणोति- **अन्नदानाद्युपपत्तेश्चेति** ॥ यद्वा विशेषवाक्यमेवेह न्यायः । न्यायमालागतचशब्दार्थोऽन्नदानाद्युपपत्तिरिति व्याख्येयम्।

सङ्क्षेपभाष्येणैतदधिकरणतात्पर्यवर्णनम्

'तद्भक्तितारतम्येन तारतम्यं विमुक्तिगम्।' इति सङ्क्षेपभाष्यमुपलक्षणया सांसारिकसुखस्यापि भगवद्भक्तितारतम्यमेव नियामकमिति योजनयैतदधिकरणतात्पर्यकथनपरमपि द्रष्टव्यम्।

॥ इति पालकत्वाधिकरणम्॥ १३॥

---

१. म. तथाऽपि।

॥ सूत्रभाष्यम् ॥

॥ अथ अव्यक्ताधिकरणम् ॥ १४ ॥

परमात्मापरोक्ष्यं च तत्प्रसादादेव न जीवशक्त्येति वक्तुमुच्यते-

॥ ॐ तदव्यक्तमाह हि ॐ ॥ ३-२-२३ ॥ अ० १४ ॥

अव्यक्तमेव तद् ब्रह्म स्वतः।

'अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलम्[१]।
यज्ज्ञात्वा मुच्यते जन्तुरानन्दश्चाव्ययो[२] भवेत् ॥'
इति हि कौण्ठरव्यश्रुतिः ॥ २३ ॥

॥ ॐ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॐ ॥ ३-२-२४ ॥

आराधनेऽप्यव्यक्तमेव। ज्ञानिनां [३]प्रत्यक्षेणेतरेषाम् अतिसूक्ष्मत्वलिङ्गादनुमानेन।

'न तमाराधयित्वाऽपि कश्चिद् व्यक्तीकरिष्यति।
नित्याव्यक्तो यतो देवः परमात्मा सनातनः ॥'
इति ब्रह्मवैवर्ते[४] ॥ २४ ॥

नित्याव्यक्तेन रूपेण तथैव तिष्ठति। व्यक्तं किञ्चिद्रूपं गृहीत्वा दृश्यते। यथाऽग्न्यादयः तन्मात्रारूपेणादृश्या अपि स्थूलरूपेण दृश्यन्त एवमिति चेत्, न-

॥ ॐ प्रकाशवच्चावैशेष्यम् ॐ ॥ ३-२-२५ ॥

१. ह. निष्कळम्। २. प. अक्षयः।
३. ह. ज्ञानिप्रत्यक्षेण ४. ह. इति च ब्रह्मवैवर्ते

अग्न्यादिवत् स्थूलसूक्ष्मत्वविशेषाभावात्। 'नासौ सूक्ष्मो न स्थूलः पर एव स भवति[१] तस्मादाहुः परम इति' इति माण्डव्यश्रुतेः

'स्थूलसूक्ष्मविशेषोऽत्र न क्वचित् परमेश्वरे।
सर्वत्रैकप्रकारोऽसौ सर्वरूपेष्वजो यतः ॥' इति च गारुडे।
'अव्यक्तव्यक्तभावौ च न क्वचित् परमेश्वरे।
सर्वत्राव्यक्तरूपोऽयं यत एव जनार्दनः ॥' इति कौर्मे[२] ॥ २५ ॥

तर्हि किं यत्नेनेत्यत आह -

॥ ॐ प्रकाशश्च कर्मण्यभ्यासात् ॐ ॥ ३-२-२६ ॥

विषयभूते तस्मिन्नेव श्रवणाद्यभ्यासात् प्रकाशश्च भवति। ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. ४-४-५) इति श्रुतेः ॥ २६ ॥

नित्याव्यक्तस्य कथं प्रकाश इत्यत उच्यते -

॥ ॐ अतोऽनन्तेन तथा हि लिङ्गम् ॐ ॥ ३-२-२७ ॥

उभयत्र प्रमाणभावात् तत्प्रसादादेव प्रकाशो भवति। 'तस्याभिध्यानाद् योजनात् तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे.उ. १-१०) इति लिङ्गात्। युज्यते च तस्यानन्तशक्तित्वात्।

'नित्याव्यक्तोऽपि भगवानीक्ष्यते निजशक्तितः।
तमृते परमात्मानं कः पश्येतामितं प्रभुम् ॥'
इति नारायणाध्यात्मे[३] ॥ २७ ॥

॥ इत्यव्यक्ताधिकरणम् ॥ १४ ॥

१. ह. सदा भवति। २. ह. इति च कौर्मे ३. ह. इति च नारायणाध्यात्मे।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनभक्त्यर्थं तस्योपलब्धि(ब्ध्य)योग्यत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । उपलब्धि(ब्ध्य)योग्यत्वे भक्तिवैयर्थ्यप्रसङ्गात् तदभावः समर्थनीयः । प्रकृता भक्तिरेव विषयः । कर्तव्या न वेति सन्देहः । कर्तव्याकर्तव्यव्यापारदर्शनं सन्देहबीजम् ।

पूर्वपक्षः

न कार्येति पूर्वः पक्षः । प्रयोजनाभावात् । भगवदापरोक्ष्यं प्रयोजनमिति चेत्, न तद्भक्तिप्रयोजनम् । स्तम्भादिवत् पुरुषप्रयत्नेनैव तदापरोक्ष्यसम्भवात् । तस्याव्यक्तत्वं चेद् व्यर्थैव तद्भक्तिः । अव्यक्तस्वभावस्य साधनशतेनापि दर्शनायोगात् । तदभ्युपगमे चेश्वरो न प्रतीयतेऽव्यक्तस्वभावत्वाददृष्टादिवदिति युक्तिविरोधः । अतो भक्तेर्व्यर्थत्वादयुक्तं तदर्थं महामाहात्म्यवर्णनमिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतारयति - **परमात्मेति** ॥ तत्प्रसादाद् भक्तिसाध्यादिति शेषः । **वक्तुम्** 'अतोऽनन्तेन' इत्यादौ । उच्यते अव्यक्तत्वमिति शेषः । सूत्रं व्याचष्टे - **अव्यक्तमिति** ॥ कर्तव्यैव भगवद्भक्तिः । तस्याव्यक्तस्वभावत्वेन पुरुषप्रयत्नेन द्रष्टुमशक्यत्वात् । अव्यक्तत्वं च तस्य श्रुतिराहेति भावः ॥ २३ ॥

आराधनेन भगवान् व्यक्तीभविष्यतीति शङ्का

अस्तु ब्रह्म स्वतोऽव्यक्तं, तथाऽप्याराधनेन पुरुषप्रयत्नेन व्यक्तीभविष्यति । समाराधनेनाव्यक्तयक्षादिसाक्षात्कारदर्शनात् । एवञ्च किं भक्त्येत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे - **अपीति** ॥

तन्निरासः

न भक्तिरहिताराधनेनापि ब्रह्म व्यक्तीकर्तुं शक्यते । आराधनेऽप्यव्यक्तत्वस्य ज्ञानिप्रत्यक्षसिद्धत्वात्, अतिसूक्ष्मत्वहेतुकानुमानसिद्धत्वाच्चेत्यर्थः । अव्यक्तत्वं प्रत्यक्षसिद्धमिति व्याहतिरुत्तरत्र गर्भस्रावेणैव नङ्क्ष्यति । प्रत्यक्षसिद्धार्थेऽनुमानापेक्षाभावादेव इतरेषामित्युक्तम् ।

परप्रत्यक्षस्यासिद्धत्वात् कथमत्र ज्ञानिप्रत्यक्षं प्रमाणीक्रियते? ज्ञानिनां तदुक्त्यन्यथानुपपत्त्या तत्प्रत्यक्षसिद्धिरिति भावेनाऽह- **नेति** ॥ नित्याव्यक्त इत्यनेन यक्षादिप्रतिबन्दी परिहृता भवति ॥ २४ ॥

मूलरूपेणाव्यक्तस्यापि ब्रह्मणो गृहीतरूपैः व्यक्तत्वं युज्यत इति शङ्का

आक्षिपति- **नित्येति** ॥ अस्तु ब्रह्म मूलरूपेणाव्यक्तम् । तस्योत्पत्त्यादिरहितत्वात् । तथाऽपि गृहीतरूपैः व्यक्तीभवत्येव । तेषामुत्पत्तिमत्त्वात् । दृष्टं ह्यनलजलभुवां भूतानां तन्मात्रालक्षणानुत्पन्नमूलरूपेणाव्यक्तानामप्युत्पन्नरूपेण व्यक्तत्वम् । अतो भक्तिमन्तरेणापि ज्ञानलाभाद् व्यर्था भक्तिः । नहि स्वगतविशेषशून्ये ब्रह्मणि नियतोऽस्ति मूलरूपापरोक्ष्यमेव पुरुषार्थहेतुरितीति भावः ।

तन्निरासः

एतत् प्रतिषेधति- **नेति** ॥ एतेन सूत्रगतः चशब्दः शङ्काव्यावृत्त्यर्थ इत्युक्तं भवति । हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य व्याचष्टे - **प्रकाशवदिति** ॥ भवेदग्न्यादीनां केनचिद् रूपेण व्यक्तत्वं केनचिदव्यक्तत्वम् । स्थूलसूक्ष्मविशेषवत्त्वात् । स्थौल्यादिनिमित्तो हि व्यक्त्यादिभावः । नचैवं ब्रह्मणि केनचिद् रूपेण स्थूलत्वं केनचित् सूक्ष्मत्वमिति विशेषोऽस्ति, येन व्यक्तत्वमव्यक्तत्वं च स्यादिति भावः । ब्रह्मणि स्थूलसूक्ष्मविशेषो नास्तीत्येतत् कुतः? येन

व्यक्ताव्यक्तताभाव इत्यत आह- **नासाविति ॥** केनचिद् रूपेण सूक्ष्मः केनचिद् रूपेण स्थूल इति न, किन्तु सर्वत्र परमसूक्ष्म एवेत्यर्थः । उत्पन्नानुत्पन्नमूलरूपावताररूपाणां कथं स्थूलसूक्ष्मविशेषाभाव इत्यत आह- **स्थूलेति ॥**

एवं व्यापकानुपलब्ध्या व्यक्ताव्यक्तत्वाभावो ब्रह्मणीत्युक्तम्। स्मृत्याऽपि तदभावं साधयति- **अव्यक्तेति ॥** जननमर्दयतीति जनार्दनः॥ २५ ॥

ब्रह्मणः सर्वथा अव्यक्तत्वे भक्त्यादेरप्रयोजनत्वशङ्कातन्निरासौ

नन्वेवं ब्रह्मणः सर्वथाऽव्यक्तत्वे किं भक्त्यादिना प्रयोजनमित्याशङ्कापरिहाराय सूत्रमवतार्य व्याचष्टे- **तर्हीति ॥** अव्यक्तत्वेऽपि ब्रह्मणो न ज्ञानार्थं प्रयत्नवैयर्थ्यम्। तद्विषये श्रवणाद्यभ्यासेन भक्तिपूर्वकेण तदापरोक्ष्यभावात्। अवाच्यस्य शास्त्रविषयत्वाभावान्न श्रवणादीति न वाच्यम् । विषयत्वस्येक्षत्यधिकरणे साधितत्वादिति भावः। श्रवणाद्यभ्यासेन ब्रह्मदर्शनं भवतीत्येतत् कुत इत्यत आह- **आत्मेति ॥** २६ ॥

नित्याव्यक्तस्य प्रकाशानुपपत्तिशङ्का तन्निरासश्च

ननु कथं नित्याव्यक्तस्य ब्रह्मणः प्रकाशः श्रवणादिनाऽपि भवति। युक्तिविरोधात्। नहि साधनशतेनादृष्टं दृष्टं भवतीत्याशङ्क्य तत्परिहाराय सूत्रमवतार्य व्याचष्टे- **नित्येति ॥** अव्यक्तस्याप्यापरोक्ष्यं ब्रह्मणो भवत्येव। साधनसामर्थ्येन तदभावेऽपि तत्प्रसादादेव। कुत एतत्? अव्यक्तत्वे प्रत्यक्षत्वे च प्रमाणसद्भावात् तदन्यथानुपपत्त्या पुरुषप्रयत्नेनाप्रत्यक्षत्वं स्वप्रसादात् प्रत्यक्षत्वं च ज्ञायत इति भावः।

भगवद्दर्शनभावे युक्तिः

बलवद्युक्त्या चैतत् साधयति- **तस्येति ॥** तस्याभिध्यानात्, इच्छया

प्रसादेन संसारो निवर्तत इत्युच्यते । एतच्च मोक्षस्य प्रसादसाध्यत्वं लिङ्गं भगवत्प्रसादेन तद्दर्शनभावं च ज्ञापयति । 'दृष्ट्वैव तं मुच्यते' इति मोक्षस्य तद्दर्शनसाध्यत्वश्रवणात् प्रसादाद् दर्शनं, दर्शनान्मोक्ष इत्यवश्यमङ्गीकार्यत्वादिति भावः ।

नन्वव्यक्तस्वभावस्य प्रसादेनापि प्रत्यक्षता न युज्यते। नहि प्रसन्नोऽपि नरो वानरो भवितुमीष्ट इत्यत आह- युज्यते चेति ॥ सूत्रार्थे स्मृतिं चाऽह- **नित्येति ॥** अतो दर्शनार्थं भक्तेः कर्तव्यत्वाद् युक्तं माहात्म्यवर्णनमिति सिद्धम्॥ २७॥

॥ इत्यव्यक्ताधिकरणम्॥ १४॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ तदव्यक्तमाह हि ॐ ॥ ३-२-२२ ॥

एतदधिकरणविषयः

अत्र भक्तेः कर्तव्यतासिद्धये भगवतः उपलब्ध्ययोग्यत्वं समर्थ्यते ।

भगवतो व्यक्तत्वस्यैव एतदधिकरणविषयत्वमुचितमिति शङ्का

ननूपलब्धियोग्यत्वस्य समर्थनं न्याय्यम्। भावरूपत्वात्। भक्तिकर्तव्यतोपयोगित्वस्य तदभावस्य भक्तिप्रतिबन्धकत्वस्य चाविशेषात्। अत एवारूपाधिकरणटीकायां 'कण्ठोक्तमरूपत्वमुल्लङ्घ्य अप्राकृतरूपसमर्थनात्' इत्युक्तम्। अन्यथाऽरूपवदिति सूत्रानुसारात् प्राकृतरूपाभावसमर्थनादित्यवक्ष्यत्। अत एव टीकायां 'तस्याव्यक्तत्वं चेद् व्यर्थैव भक्तिः' इत्याद्युक्तम्। अत एव च भाष्ये 'परमात्मापरोक्ष्यं तत्प्रसादादेव न जीवशक्त्येति वक्तुमुच्यते' इति व्यक्तत्वं प्रधानप्रमेयम् अव्यक्तत्वं तदुपयुक्तमित्युक्तम् । किञ्च, पक्षद्वयेऽपि भक्ति-

वैयर्थ्यप्रसङ्गवद् वैराग्यादिवैयर्थ्यप्रसङ्गस्याप्यविशेषेऽधस्तात् पुरस्ताद् वा समर्थनसम्भवेऽपि भक्तिपाद एव निवेशे विशेषहेत्वभावः। अम्बुनय एव फलस्य साधितत्वात् तेनास्य गतार्थता च स्यात्। नच तत्र मोक्षस्य भक्तिफलत्वसमर्थनम् अत्र त्वपरोक्षस्येति वाच्यम्। तथा सत्यम्बुनयस्यैतदानन्तर्यं स्यात्। साक्षात्फल-समर्थनस्य युक्तत्वात्। महामल्लभङ्गन्यायेन तस्य प्राथम्येऽपि तदानन्तर्यमेवास्य स्यात्। पालकत्वादिनयव्यवधाने कारणाभावाच्च।

तत्परिहारः

अत्रोच्यते। भक्तिप्रतिबन्धकधर्मनिरासो ह्यत्र चिकीर्षितः। समर्थनपेटिका-त्वात्। यद्यप्युपलब्ध्ययोग्यत्वस्यापि भक्तिप्रतिबन्धकत्वं सम्भावितम्। तथाऽपि तन्न युक्तम्। उपलब्ध्ययोग्येऽपि राजभोगादौ मर्त्यानामादरदर्शनात्। परन्तु अव्यक्तस्वभावस्य साधनशतेनापि दर्शनायोगाद् उत्पन्नाऽपि भक्तिर्न स्वसाध्यं साधयतीति वैय्यर्थ्यापादकमेवाव्यक्तत्वं न पुनर्भक्त्युत्पत्तावेव प्रतिबन्धकम्। व्यक्तत्वं तु तत्रैव। अनादरस्यैव व्यक्ते प्रायेणोपलम्भात्। यथोक्तम्- 'सन्निधानं हि मर्त्यानामनादरणकारणम्' इति। अत एव गोपिकानुजिघृक्षया भक्तिप्रतिबन्धकं व्यक्तत्वमालोच्य तद्दूरीकरणायान्तर्हितं श्रीकृष्णेनेति वैयासिक्यां श्रूयते। अतो व्यक्तत्वमेव प्रतिबन्धकत्वान्निराकरणीयमिति युक्तमव्यक्तत्वं प्रधानं प्रमेयम्। तत्रोक्तवक्ष्यमाणरीत्या व्यक्तत्वस्योपयोगदर्शनात् तदपि प्रमेयमेव। अत एव 'प्रकाशश्च कर्मण्यभ्यासात्' (ब्र.सू. ३.२.२६) इत्यादिनाऽन्त्य एवैतदाह। अत एव 'परमात्मापरोक्ष्यं च' इत्यादिभाष्यं व्यक्तत्वं वक्तुमादावव्यक्तत्वमुच्यत इत्ये-वम्परं न व्याख्येयम्। किन्तु दलद्वयात्माधिकरणस्य पूर्वोत्तरदलसिद्धभग-वन्माहात्म्यप्रदर्शनपरं फलोक्तिपरं व्याख्येयम्। अत एव न्यायविवरणे 'अनन्त-शक्तित्वाद् विष्णोः' इत्युक्तम्। एतेन भावत्वाद् व्यक्तत्वं प्रतिपाद्यमिति निरस्तम्। स्यादिदं यदि व्यक्तत्वाव्यक्तत्वयोर्भक्तिप्रतिबन्धकत्वाविशेषः। नचासावस्ति।

अरूपाधिकरणवैषम्यम्

अरूपाधिकरणे तु, रूपाभावाक्षिप्तसौन्दर्याभाववद् रूपाक्षिप्तानित्यत्वस्यापि भक्तिप्रतिबन्धकत्वदर्शनात् प्रथमोक्तमप्यरूपत्वम् अभावरूपत्वादुल्लङ्घ्य भावरूपत्वाद् रूपमेव प्रतिपाद्यमित्युक्तम्। सूत्रकृता तु रूपाङ्गीकारेऽनित्यत्व-दोषस्य झटिति प्रतीतेस्तत्परिजिहीर्षया प्रथममरूपित्वमेवोक्तम्। अत एवात्र 'प्रकाशश्च कर्मण्यभ्यासात्' (ब्र.सू. ३.२.२६), 'अतोऽनन्तेन तथा हि लिङ्गम्' (ब्र.सू. ३.२.२७) इति द्विसूत्र्याः त्रिसूत्र्याश्च भावाभावप्रमेयत्वात् क्रमेण पठितव्यत्वेऽपि त्रिसूत्र्याः [1]व्यर्थत्वेनैतत्पादनिवेशसिद्धये भक्तिप्रतिबन्धकव्यक्त-त्वाभावप्रतिपादनपरायास्त्रिसूत्र्या अपि द्विसूत्र्याः पूर्वं निवेशः सूत्रकृतेष्टः[2]।

अदृश्यत्वादिनयेन गतार्थताशङ्का, परिहारश्च

नन्वेवम् अदृश्यत्वादिनयेन गतार्थता। अदृश्यत्वस्य भगवन्निष्ठत्वे परोपन्यस्तमक्षरात् परतः परत्वं बाधकम् अक्षरत्रैविध्यकथनेन तत्र निरस्तम्। इह साधकमुच्यते। तत्र लिङ्गेन पूर्वपक्षिते लिङ्गान्तरेण समाधानम्। अत्र 'द्रष्टव्यः' (बृ.उ. ४.४.५) इत्यादिश्रुत्या पूर्वपक्षिते श्रुत्यैव समाधानम्। तत्रादृश्यत्वा-त्मत्वादीनां बहूनां समर्थनम्। अत्रैकस्यैव। तत्रादृश्यत्वादिगुणकाक्षरस्य ब्रह्मतासमर्थनम्। अत्र साक्षादेवादृश्यत्वसमर्थनम्। तत्रादृश्यत्वादिलिङ्गजातस्य तत्सहचरिताक्षरनाम्नो वा समन्वयः फलम्। अत्र तु भक्तिरिति वा प्राणाधि-करणान्त्यप्राणाधिकरणादाविव प्रतिपाद्यभेदस्योहनीयत्वात्। महामल्लभङ्गन्यायेन प्रधानमोक्षफलत्वाभावं निराकृत्य वक्ष्यमाणोक्तसङ्गतिविशेषेणात्रावान्तर-फलत्वाभावशङ्का निराक्रियत इति नाम्बुनयेन गतार्थता।

---

१. म. व्यत्ययेन।

२. म. प्रकृतेष्टः

अस्याधिकरणस्य वैराग्योपासनादिपादेषु निबन्धनशङ्कापरिहारः

यच्चास्य वैराग्योपासनादिपादेषु निबन्धनशङ्कनं तच्च वक्ष्यमाणेन पूर्वोत्तराधिकरणाभ्यां सङ्गतिविशेषेणैव नङ्क्ष्यति। नचान्यत्रापि सङ्गतिविशेषोहासम्भवेन तत्र निवेशः स्यादिति वाच्यम्। किमिदं सम्भावनामात्रं किं वा निश्चयः। नाऽद्यः। तस्यासाधकत्वात्। न द्वितीयः। कथञ्चित् पूर्वेणोत्तरेण वा एकैकाधिकरणेनास्य वैराग्यपादादौ सङ्गतिसम्भवेऽप्यत्रेवोभाभ्यामपि सङ्गत्यदर्शनात्।

अस्याधिकरणस्यादृश्यत्वादिनयेन सङ्गतिः

अत्र 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' (ब्र.सू. ३.२.२४) इत्यादिना यक्षादिप्रतिबन्दीपरिहारेणादृश्यत्वसमर्थनप्रतीतेः अदृश्यत्वनयेन सङ्गतिः। सन्न्यायरत्नावल्यां तु, यदुक्तं 'भक्तितारतम्यस्य मुक्तावानन्दतारतम्यं साध्यम्' इति तन्न। 'यदा पश्यः पश्यते रुग्मवर्णम्' (आ.उ. ३.१.३) इति दर्शनसाध्यत्वश्रवणात्। नच दर्शनसहितभक्तितारतम्यस्य हरिविषयस्य मुक्तावानन्दतारतम्यं साध्यमिति वाच्यम्। 'यदेकमव्यक्तमनन्तरूपम्' (म.ना. १.५) (त्रि.म. ना. ४.३), 'न चक्षुषा पश्यति' (कठ.६.९, श्वे.उ.४.२०,म.ना.उ. १.११) इत्यादि हरेरदृश्यत्वश्रवणादित्युत्थानाद् वृद्धिनयेन पूर्वसङ्गतिरुक्ता।

पूर्वाधिकरणेनानन्तरसङ्गतिः

अनन्तरसङ्गतिस्तु, जन्मादिसूत्रोक्तपालकत्वसमर्थनानन्तरं नियमने घटादिविषये ज्ञाने च विवादाभावाद् भगवद्विषयज्ञानं जीवस्य भगवदनुग्रहायत्तमितीह समर्थनात्, यथा 'द्यावापृथिवी बिभर्ति' इत्यादिनिरवकाशश्रुत्या पालकत्वमभ्युपेयते तथा 'सदाव्यक्तं च निष्कलम्' (भाष्योदाहृतकौण्ठरव्यश्रुतिः) इति श्रुत्या निरवकाशया व्यक्तत्वमङ्गीक्रियतामिति वा, 'द्यावापृथिवी' इति श्रवणादपालकत्वं यथा नाङ्गीक्रियते, तथा व्यक्तमिति श्रवणात् तदभावरूपमव्यक्तत्वं नाङ्गीकरणीयम्। ततश्च न भक्त्या प्रयोजनमिति वा शङ्कनाद् वा प्रत्येतव्या।

चिन्ताक्रमः, पूर्वपक्षश्च

अत्र भक्तिः कर्तव्या न वेति चिन्ता। तदर्थं भक्तेः प्रयोजनमस्ति न वेति। न कर्तव्या भक्तिः। प्रयोजनाभावात्। लौकिकस्य कृष्यादिसाध्यत्वात्। अलौकिकस्य यागादिसाध्यत्वात्। नचाम्बुनये सम्यक् सादृश्याभिव्यक्तिलक्षणमोक्षप्रयोजनं साधितमिति वाच्यम्। तद्धि पुनर्न साक्षात् प्रयोजनं भक्तेः। 'द्रष्टव्यः' (बृ.उ. ४.४.५) इत्यादिवाक्यविरोधात्। किन्त्वपरोक्षद्वारैव। अपरोक्षं च भगवति दुःसम्पादनम्। तथाहि-

> व्यक्तत्वे तस्य[1] वैय्यर्थ्यमव्यक्तत्वे वृथा कृतिः।
> तदेषोभयतः पाशारज्जुः स्यादनिवारिता॥

स किं व्यक्त उताव्यक्तः। नाऽद्यः, व्यक्तस्वभावे स्तम्भादाविव स्वत एवाऽपरोक्ष्यसम्भवेन भक्त्यादिरूपातिप्रयत्नवैफल्यापत्तेः। न द्वितीयः। अव्यक्तस्वभावस्य साधनशतेनापि दर्शनायोगात्। नचाव्यक्तोऽपि यक्षादिर्दृश्यत इति वाच्यम्। तत्राव्यक्तत्वासम्मतेः। कदाचिद् दर्शनं त्वन्तर्धानशक्त्यादिनैवोपपन्नम्। अन्यथा व्यक्तत्वाव्यक्तत्वयोर्विरोधाभावप्रसङ्गात्। ततश्च विमतो भगवान्न प्रत्यक्षः। अव्यक्तत्वादिति पुनर्भक्त्यादिप्रयत्नवैय्यर्थ्यमिति पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

> अव्यक्तं यद्यपि ब्रह्म जीवसामर्थ्ययोगतः।
> तथाऽपि स्वेच्छया व्यक्तं ज्ञानिप्रत्यक्षतः स्फुटम्॥

यथेच्छति तथाऽस्तु। यद्यव्यक्तं ब्रह्म तर्हि प्रमाणाभाव इति चेन्न। 'अरूप-

---

१. म. भक्ति

मव्ययम्' (भाष्योदाहृतकौण्ठरव्यश्रुतिः) इत्यादिभाष्योदाहृतकौण्ठरव्यश्रुतेः। तर्हीदं यक्षादिसाधारणम्। श्रुतेः साधारणत्वादिति चेन्न। सर्वथाऽव्यक्तत्वस्यैव ब्रह्मण्यङ्गीकारात्। यक्षादि तु भक्तिरहितपूजयाऽपि अध्यक्षीकर्तुं शक्यते। नचात्र प्रमाणाभावः। ज्ञानिप्रत्यक्षातिसूक्ष्मत्वलिङ्गकानुमानयोः सत्त्वात्।

अतिसूक्ष्मत्वलिङ्गकानुमानादिना ब्रह्मणोऽव्यक्तत्वसाधनानुपपत्तिशङ्का

नन्वतिसूक्ष्मत्वानुमाने मूलरूपं ब्रह्म पक्षीक्रियते, उत गृहीतरूपम्। नाऽद्यः। 'मूलरूपं ब्रह्म नित्याव्यक्तम्। सूक्ष्मत्वात् । पञ्चतन्मात्रावत्' इति प्रयोगे मूलरूपस्य ब्रह्मणोऽव्यक्तत्वस्यास्माभिरप्यङ्गीकारेण सिद्धसाधनत्वात्। न द्वितीयः। 'गृहीतरूपं ब्रह्म नित्याव्यक्तम्। सूक्ष्मत्वात्' इति प्रयोगे हेतोरसिद्धेः। नह्युत्पत्तिमतः गृहीतरूपस्य सूक्ष्मत्वं युक्तम्। तन्मात्राकार्याणां भूतानां तददर्शनात्। अन्यथा तेषामपि सूक्ष्मत्वापत्तिः। अत एव ज्ञानिप्रत्यक्षमपि मूलरूपेणान्यथासिद्धम्। तथाच गृहीतरूपस्य ब्रह्मण अव्यक्तत्वे प्रमाणाभावेन व्यक्तत्वे सिद्धे तत्र स्तम्भादाविव प्रयत्नमन्तरेणाप्यपरोक्षत्वसम्भवेन तेन च मोक्षस्यापि सम्भवेन भक्तिर्न कर्तव्यैव। नच गृहीतरूपस्य ब्रह्मणः सुसम्पाद्यमपि दर्शनं न मोक्षसाधनमिति वाच्यम्। तत्र मानाभावात्। नस्थानादिनयविरोधाच्च। स्वगतविशेषशून्ये ब्रह्मणि तादृङ्नियमस्यानभ्युपगमाच्च।

तन्निरासेन ब्रह्मणोऽव्यक्तत्वस्य व्यक्तत्वस्य च समर्थनम्

मैवम्। स्थौल्यं हि व्यक्तत्वव्यापकतया घटादौ उपलब्धम्। नच गृहीतरूपे ब्रह्मणि स्थौल्यमस्ति। सूक्ष्मत्वश्रुतिविरोधात्। मूलरूपावतारयोः सूक्ष्मत्वस्थौल्यव्यवस्थितेः 'नेह नानाऽस्ति किञ्चन' (बृ.उ. ६.४.१९, कठ.उ. ४.११) इत्यादिना निषेधात्। तथाच सर्वथाऽव्यक्तत्वपक्षो निरवद्यः। एवं व्यक्तत्वपक्षोऽपि। नचाव्यक्तस्य व्यक्तत्वं कथं न विरुद्धमिति वाच्यम्। साधनसामर्थ्येनाव्यक्तस्यापि स्वप्रसादेन स्वकीयानादिसङ्कल्पादिना च व्यक्तत्वमिति

व्यवस्थाश्रयणात्। अव्यक्तत्वे प्रत्यक्षत्वे च प्रमाणमुक्तम्। व्याहतं चेदं प्रतीयते। नहि शास्त्रं व्याहतं प्रतिपादयतीत्यवश्यं साधनसामर्थ्यस्वप्रसादरूपमुखभेदमाश्रित्य विरोधः परिहरणीयः। अन्यथा फलचमसाधिकरणेऽपि 'स यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य ताः सम्पिष्य दधनि सम्मृज्य[1] तमस्मै भक्षं प्रयच्छेन्न सोमम्' इति वाक्यावगतफलचमसस्यापि उत्पत्तिशिष्टसोमावरुद्धे प्रवेशायोगेन फलचमसस्य राजन्यकर्तृकप्रयोगे निवेशायोग इति।

सूत्रार्थः

सूत्रार्थस्तु - **तद्** ब्रह्म **अव्यक्तमेव** स्वतः, **हि** यस्मात् कौण्ठरव्यश्रुतिरव्यक्तं ब्रह्माऽह। द्वितीयसूत्रेऽव्यक्तमित्यनुकृष्यते। **संराधनेऽपि** ब्रह्म व्यक्तीकर्तुं न शक्यतेऽव्यक्तत्वेन ज्ञानि**प्रत्यक्ष**सिद्धत्वात्। **अनुमान**सिद्धत्वाच्चेति। तृतीये त्वाद्यं सूत्रं सकलमनुवर्तते। चशब्दः न समुच्चायकः। किन्तु मूलरूपेणाव्यक्तमपि ब्रह्म गृहीतरूपेण प्रकाशादिवन्न व्यक्तमिति सूचयति। **अवैशेष्यं** स्वार्थे ष्यञ्। बहुव्रीहिर्वा। विशेषाभावः। अत्रापि प्रकाशवदिति सम्बद्ध्यते। व्यतिरेकश्च दृष्टान्तः। ततश्च तेजोजलपृथिवीवत् स्थूलसूक्ष्मविशेषाभावः, यतो 'नासौ सूक्ष्मो न स्थूलः' (भाष्योदाहृतमाण्डव्यश्रुतिः), 'स्थूलसूक्ष्मविशेषोऽत्र न क्वचित्' (भाष्योदाहृतगारुडवचनम्) इति माण्डव्यश्रुतिः गारुडस्मृतिश्चाऽहेति योज्यम्। अत्राऽऽकाशस्य भूतादित्वेऽपि तस्य स्थूलसूक्ष्मविशेषाभावाद्, वायोश्च तद्भावेऽप्यप्रत्यक्षत्वादनलमारभ्य स्थूलसूक्ष्मविभागः प्रत्यक्षत्वाप्रत्यक्षत्वविभागश्चेति प्रकाशग्रहणम्। तत्र जलभूम्योरुपलक्षणं न्यायसाम्यात्। प्रसिद्धतेजःपदं विहायाप्रसिद्धप्रकाशपदग्रहणेन तेजस्युत्पन्नरूपेण व्यक्तत्वे न प्रमाणान्तरं गवेषणीयमिति सूचयति।

चतुर्थसूत्रे चशब्दः पूर्ववच्छङ्काव्यावर्तकः। प्रमाणसूचकोऽप्यर्थश्च। कर्मणी-

१. 'दधन्युपमृज्य, दधन्युन्मृज्य' इति शास्त्रदीपिकायाम्।

त्यावर्तते । श्रवणादिरूपे **कर्मण्यभ्यासात्** कर्मणि ईक्षत्यधिकरणोक्तरीत्या शास्त्रजन्यज्ञानविषये ब्रह्मणि, विषयसप्तमी चेयं, **प्रकाशो**ऽपि भवति। 'द्रष्टव्यः' इत्यादिश्रुतेर्भगवद्विषयकदर्शनमपि भवतीति न प्रतीतिप्रयत्नवैयर्थ्यशङ्का कार्येति सिद्ध्यति।

पञ्चमे प्रकाश इत्यनुवर्तते। अत इत्यावर्तते। यतः अव्यक्तत्वे व्यक्तत्वे चोभयत्र प्रमाणमस्ति **अतो** मुखभेदमाश्रित्य साधनसामर्थ्येनाप्रकाशोऽपि, अतः प्रसादादेव प्रकाशोऽङ्गीकार्यः । अन्यथा व्यक्तत्वाव्यक्तत्वप्रमाणयोर्विरोधेनाप्रामाण्य-प्रसङ्गात् । न केवलमर्थापत्तिमात्रं प्रकाशं गमयति किन्तु **लिङ्गं तथा** प्रकाशं गमयति। लिङ्गं च 'तस्याभिध्यानाद् योजनात् तत्त्वभावात्' (श्वे.उ. १.१०) इति श्रुतिसिद्धम्। प्रसादस्य मोक्षहेतुत्वं 'दृष्ट्वैव तं मुच्यते नापरेण' इति श्रुति-सिद्धम् । ज्ञानस्य मोक्षहेतुत्वं च प्रसादादेव ज्ञानं भवतीत्यर्थस्य सूचकम् । प्रसादादपि कथं नित्याव्यक्तदर्शनमित्यत उक्तम्- **अनन्तेनेति ॥** भावप्रधानो निर्देशः। तृतीया च पञ्चम्यर्थे। अनन्तशक्तित्वाद् भगवत इति फलितम्।

पञ्चमसूत्रस्य वर्णकान्तरम्

यद्वा, अत इत्यनन्तेनेति सामानाधिकरण्यम्। अत एव तृतीयार्थे तसिः । हेतुगर्भं चेदं विशेषणम्। अनन्तशक्तिनाऽनेन भगवता प्रकाशो विततो[1] भवतीति योजना द्रष्टव्या।

सूत्रक्रमौचित्यनिरूपणम्

सूत्रक्रमस्तु महामल्लभङ्गन्यायेन बहुत्वात् त्रिसूत्र्याऽव्यक्तत्वसाधनं, द्विसूत्र्या व्यक्तत्वसाधनम्। तत्रापि सोपानारोहणन्यायेनाव्यक्तत्वसाधारणप्रमाणोपन्यासः प्रथमे, द्वितीये तु निरवकाशप्रत्यक्षानुमानयोरुपन्यासः, तृतीयेऽनुमानस्यासिद्धि-परिहारः, चतुर्थे व्यक्तत्वे प्रमाणोपन्यासः, पञ्चमे तत्र प्राप्तविरोधपरिहार इति।

१. म. विवृतो

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- न्यायमालोक्तं तर्कबाधन्यायं विषयप्रदर्शनपूर्वकं विवृण्वत् **'नचाव्यक्तस्वभावस्य दर्शने तर्कबाधः'** (न्या.वि.) इति वाक्यमव्यक्त-स्वभावस्य दर्शनेऽभ्युपगम्यमाने तर्कबाध इत्युक्त्या व्यक्तस्वभावस्य दर्शनेऽभ्युप-गम्यमानेऽपि दूषणमस्तीति सूचितमिति व्यक्तत्वपक्षे 'न तद्व्यक्तिप्रयोजनम्' इत्यादिना 'सम्भवात्' इत्यन्तेन दूषणमभिधायाव्यक्तत्वपक्षे दूषणाभिधानपर-तया तर्काकारप्रदर्शनपूर्वकं बाधार्थं च वदन् व्याचष्टे- **तस्याव्यक्तत्वं चेदिति ॥**

पादसङ्गत्यर्थमाह- **भक्तिसाध्यादिति ॥** उत्तराधिकरणे वक्तुमेतदधिकरणेऽ-व्यक्ताद्युच्यते चेदुत्तराधिकरणमेव पूर्वतनसूत्रचतुष्टयवत् पादसङ्गतं स्यादत आह- **'अतोऽनन्तेन' इत्यादाविति ॥** आदिशब्देन 'परमात्मापरोक्ष्यं च तत्प्रसादादेव' इति भाष्यानुकरणाय व्युत्क्रमेण पूर्वतनसूत्रचतुष्टयं गृह्यते । 'अव्यक्तत्वमिति शेष इति' इत्युपलक्षणमेतत्। ततश्च परमात्मापरोक्ष्यं च तत्प्रसादादेव न जीव-शक्त्येति त्रिसूत्र्या द्विसूत्र्या च वक्तुमव्यक्तत्वं व्यक्तत्वं चोच्यतेऽस्मिन्नित्यर्थः। **॥ अव्यक्तत्वं प्रत्यक्षसिद्धमिति व्याहतिरिति ॥** अव्यक्तस्य ब्रह्मण एव प्रत्यक्ष-सिद्धत्वाभावेन तद्गतस्य धर्मस्य सुतरां तदभाव इति भावः। [1]एतेनाऽगामिसूत्र-गतः 'प्रकाशवच्चावैशेष्यम्' (ब्र.सू. ३.२.२५) इति व्याख्यास्यमानसूत्रगत इत्यर्थः॥ **विशेषोऽस्तीति ॥** प्रतिनियतविशेषो नास्तीत्यर्थः॥ **सर्वत्र परमसूक्ष्म एवेत्यर्थ इति ॥** सर्वत्र परमस्थूल एवेत्यर्थ इत्यपि ग्राह्यम्। अन्यथा 'महतो महीयान्' इति श्रुतिविरोधात् । नच तर्हि व्यक्तत्वापत्तिः । परमसूक्ष्मत्ववत् परमस्थौल्यस्यापि व्यक्तिप्रतिबन्धकत्वात् । अन्यथा मेर्वाद्यपेक्षया सूक्ष्मोऽपि घटः प्रत्यक्षो न स्यादिति भावः। 'कर्मण्यभ्यासात्' इति सूत्रतात्पर्यं प्रकृतोप-

१. 'एतेन सूत्रगतः' इति मुद्रितः पाठः । 'एतेनाऽगामिसूत्रगतः' इति शेषचन्द्रिकारीत्या टीकापाठ इति भाति।

योगसिद्धये **भक्तिपूर्वक**पदाध्याहारेण दर्शयति- **तद्विषये श्रवणादीति** ॥ ब्रह्मविषय इत्यर्थः । कर्मणीति सौत्रपदमावृत्य भगवद्विशेषणमित्यभिप्रेत्य व्याख्यातुमाह- **अवाच्यस्येति** ॥

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

न्यायमालोक्तं पुंशक्तिन्यायं साध्यप्रदर्शनपूर्वकं विवृण्वत् 'अनन्तशक्तित्वाद् विष्णोः तच्छक्त्या व्यक्तस्यापि दर्शनोपपत्तेः' (न्या.वि. ३.२.१४) इति वाक्यं पुंशक्तिन्यायस्य सौत्रव्युत्पादनपरेण 'युज्यते च तस्यानन्तशक्तित्वात्' इति भाष्येण सहैव व्याचष्टे- **नन्वव्यक्तस्वभावस्येति** ॥

'उपलब्ध्ययोग्यत्वसमर्थनादस्ति शास्त्रादि' इत्यादिपाठो दृश्यते चेदुपलब्ध्ययोग्यत्वरूपाव्यक्तत्वस्य भक्तिप्रतिबन्धकत्वाभावादव्यक्तत्वप्रतिपादनं समर्थनपेटिकायां प्रासङ्गिकम् । व्यक्तत्वसहिताव्यक्तत्वस्य भक्तिसाधकत्वेऽपि केवलाव्यक्तत्वस्यात्यन्तासति भक्तिप्रतिबन्धकत्वदर्शनात् केवलव्यक्तत्वस्य घटादौ प्रतिबन्धकत्वदर्शनेऽपि अव्यक्तत्वसहितस्य व्यक्तत्वस्य तदभावात् साक्षात् सङ्गतं वा प्रत्येतव्यम् । अस्मिंश्च पक्षे 'परमात्मापरोक्ष्यं च तत्प्रसादादेव न जीवशक्त्येति वक्तुम्' इति भाष्यम्, 'अव्यक्तत्वमिति शेषः' इत्यादिटीका च व्यक्तत्वं प्रधानप्रमेयमव्यक्तत्वं तदुपयुक्तमित्येवम्परतया योज्या ।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

'सर्वदेशेषु कालेषु स एकः परमेश्वरः' (अणुभाष्यम् ३.३) इति सङ्क्षेपभाष्यं मूलरूपेऽवताररूपे च क्वचित् स्थूलः क्वचित् सूक्ष्मः क्वचिद् व्यक्तः क्वचिदव्यक्त इति विशेषरहितः अभिन्न एव अचिन्त्याद्भुतशक्त्या परमेश्वरः भक्त्या प्रसन्नः अभिव्यज्यत इति योजनयैतदधिकरणतात्पर्यकथनपरमपि व्याख्येयम् ।

॥ इत्यव्यक्ताधिकरणम् ॥ १४ ॥

॥ अथ उभयव्यपदेशाधिकरणम् ॥ १५ ॥

स्वरूपेणाऽनन्दादिना कथमानन्दित्वादिरित्यत उच्यते[1] -

॥ ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ ॥

॥ ३-२-२८ ॥

'आनन्दं ब्रह्मणो विद्वान्' (तै.उ. २-४)। 'अथैष एव परम आनन्दः' (बृ.उ. ६-३-३३) इत्युभयव्यपदेशादहिकुण्डलवदेव युज्यते । यथाऽहिः कुण्डली कुण्डलं च । तुशब्दात् केवलश्रुतिगम्यत्वं दर्शयति ॥ २८ ॥

॥ ॐ प्रकाशाश्रयवद्वा तेजस्त्वात् ॐ ॥ ३-२-२९ ॥

यथाऽऽदित्यस्य प्रकाशत्वं प्रकाशित्वं च, एवं वा दृष्टान्तः । तेजोरूपत्वाद् ब्रह्मणः ॥ २९ ॥

॥ ॐ पूर्ववद्वा ॐ ॥ ३-२-३० ॥

यथैक एव कालः पूर्व इत्यवच्छेदकोऽवच्छेद्यश्च भवति । अतिसूक्ष्मत्वापेक्षयैष दृष्टान्तः । स्थूलमतीनां च प्रदर्शनार्थमहिकुण्डलदृष्टान्तः ।

'प्रकाशवत् कालवद् वा यथाऽङ्गे शयनादिकम् ।
ब्रह्मणश्चैव मुक्तानामानन्दोऽभिन्न एव तु ॥'

इति नारायणाध्यात्मे ।

'आनन्देन त्वभिन्नेन व्यवहारः प्रकाशवत् ।
कालवद् वा यथा कालः स्वावच्छेदकतां व्रजेत् ॥'

इति पाद्मे[2] ॥३०॥

---

१. ह. इत्यत्रोच्यते ।

२. ह. इति ब्राह्मे

॥ ॐ प्रतिषेधाच्च ॐ ॥ ३-२-३१ ॥

'एकमेवाद्वितीयम्' (छां.उ. ६-२-१)। 'नेह नानाऽस्ति किञ्चन' (कठ. उ. २-४-११) इति भेदस्य॥ ३१॥

॥ इति उभयव्यपदेशाधिकरणम् (पा.अहिकुण्डलाधिकरणम्)॥ १५॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मप्राप्तिसाधनभक्त्यर्थं तस्य गुणित्वसमर्थनादस्ति शास्त्रादि-सङ्गतिः। गुणित्वाभावे तत्र भक्त्यनुदयात् तत् समर्थनीयम्। प्रकृता भक्तिरेव विषयः। कर्तव्या न वेति सन्देहः। पूर्वोक्तमेव सन्देहबीजम्। पूर्वपक्षयति- **स्वरूपेणेति**॥

पूर्वपक्षः

न भगवद्भक्तिः कर्तव्या। तस्याऽनन्दित्वाद्यभावात्। नह्यगुणिनि भक्तिरुपपन्ना। न चाऽनन्दित्वादिकमङ्गीकर्तुं शक्यं ब्रह्मणः। आनन्दादीनां तत्स्वरूपत्वाभ्युपगमात्। अन्यथा समवायनिराकरणानुपपत्तेः। स्वरूपेण चाऽनन्दादिना आनन्दित्वादेर्युक्तिविरुद्धत्वात्। अथापि गुणित्वाङ्गीकारे गुणानां तत्स्वरूपत्वं त्याज्यम्। गुणानां गुणिस्वरूपत्वस्य युक्तिविरुद्ध-त्वात्। नचानन्दादिभोक्तृतां विना तत्स्वरूपत्वं महिमा। द्रविणवत्त्वे हि पारिवृढ्यं न तु द्रविणत्वे। अतो गुणित्वाभावेन भक्त्ययोगाद् व्यर्थं माहात्म्य-वर्णनमिति भावः।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे - **अत इति**॥ कर्तव्यैव भगवद्भक्तिः।

श्रुतिषु गुणात्मकत्वेन गुणित्वेन च व्यपदेशात्। गुणस्वरूपस्याप्यानन्दि-त्वाद्युपपत्तेरिति भावः। ननु श्रौतमपि गुणात्मकस्य गुणित्वं कथं युज्यते अदर्शनादित्यत आह- **अहीति**॥ तदेव विवृणोति- **यथेति**॥ यथा कुण्डलात्मकस्याप्यहेर्विशेषादेव कुण्डलित्वमेवमानन्दाद्यत्मकस्यापि ब्रह्मणो विशेषादेवाऽनन्दित्वादिकं युज्यत इति भावः। नेश्वरो गुणवान्। गुणात्म-कत्वाद् यथा न स्वः स्ववान्, दण्डो दण्डवान् वा। आनन्दाद्या न ब्रह्मणो गुणाः। तत्स्वरूपत्वाद् ब्रह्मवदित्यत आह- **तुशब्दादिति**॥ भवेदत्र युक्तिविरोधो यदि ब्रह्मस्वरूपादि युक्तिगम्यं स्यात्। नैतदस्ति। केवलश्रुतिगम्यत्वादिति भावः॥ २८॥

दृष्टान्तान्तरेण पूर्वोक्तप्रमेयसमर्थनम्

दृष्टान्तान्तरेणैतदेव समर्थयत् सूत्रमुपन्यस्य व्याचष्टे- **प्रकाशेति**॥ यथा प्रकाशात्मकस्याप्यादित्यस्य प्रकाशित्वं विशेषबलादेवं गुणात्मकस्यापि ब्रह्मणो गुणित्वं विशेषबलाद् युज्यत इति भावः। नन्वत्र घटादीनामपि दृष्टान्तयितुं युक्तत्वाद् विशिष्याऽदित्यग्रहणे का विवक्षेत्यत आह- **तेजोरूपत्वादिति** ॥ २९॥

कालरूपदृष्टान्तान्तरेण पूर्वोक्तप्रमेयसमर्थनम्

दृष्टान्तान्तरेणैतत् साधयत् सूत्रमुपन्यस्य व्याचष्टे - **पूर्ववद्वेति**॥ यथा कालस्य पूर्वेणाभेदेऽपि काल इति विशेष्यो भवति पूर्व इति विशेषको विशेषादेव तथा गुणात्मकस्यापि ब्रह्मणो विशेषादेव गुणि ब्रह्मेति विशेषण-विशेष्यभावो युज्यत इति भावः। व्यर्थोक्तेरपर्यवसानात् किमर्थोऽयं दृष्टान्त इत्यत आह- **अतीति**॥ ब्रह्मण इति शेषः। अलमनेन भेदाभेदविषयेण किमाद्यदृष्टान्तेनेत्यत आह- **स्थूलेति**॥ एकस्मिन्नेव विशेषणविशेष्यभाव-स्येति शेषः। अस्मिन्नेवार्थे स्मृती पठति- **प्रकाशवदिति**॥ शयनमव-

स्याविशेषः । अङ्गादभिन्नोऽप्यङ्गे शयनमित्यङ्गविशेषणं भवतीत्यर्थः । आदिपदेन शेते इति कर्मकर्तृभावः । अभिन्न एव ब्रह्मणः मुक्तानामित्युच्यत इत्यर्थः । व्यवहारो विशेषणविशेष्यभावेन ॥ ३० ॥

गुणगुणिनोः भेदमात्राभ्युपगमे श्रुतिविरोधवर्णनम्

किमनेन गुणगुणिनोरभेदमभ्युपेत्य गुणित्वप्रतिपादनेन ? भेद एव तयोः किं न स्यादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे - प्रतिषेधाच्चेति ॥ भाष्यस्य सूत्रेणान्वयः । घटादिवत् स्वावयवैकत्वनिषेधायैवकारः । समाधिकनिषेधोऽद्वितीयमिति । किञ्चन नाना गुणगुण्यादि । अतो गुणिनि हरौ भक्तिसम्भवाद् युक्तं तन्महिमवर्णनमिति सिद्धम् ॥ ३१ ॥अ. १५ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ उभयव्यपदेशात्त्वहिकुण्डलवत् ॐ ॥

अनन्तरसङ्गतिः

यथाऽव्यक्तनये 'अरूपमक्षरं[1] ब्रह्म सदाऽव्यक्तं च निष्कलम् । यज्ज्ञात्वा' (भाष्य.उ. कौण्ठरव्यश्रुतिः) इति श्रुतौ व्यक्तत्वाव्यक्तत्वोभयव्यपदेशादुभयरूपं ब्रह्माङ्गीकृतम् । तथाऽनन्दित्वानन्दस्वरूपत्वयोरुभयोरपि 'आनन्दं ब्रह्मणो विद्वान्' (तै.उ. २.४), 'अथैष एव परम आनन्दः' (बृ.उ. ६.३.३३) इति व्यपदेशादुभयरूपं ब्रह्माङ्गीकर्तव्यमित्यतिदेशादनन्तरसङ्गतिः । नचैवमरूपाधिकरणानन्तर्यं स्यात् । [2]तत्रापि रूपारूपोभयव्यपदेशस्य सद्भावात् । उत्तराधिकरणस्य वाऽत्र निवेश आपद्येत । [3]तत्रापि भगवद्गुणानामलौकिकत्वं लौकिकानन्दादिशब्दवाच्यत्वं च 'यतो वाचो निवर्तन्ते' (तै.उ. २.४-५),

१. म. अजरं । २. म. तस्यापि । ३. म. तथाऽपि ।

'अलौकिकोऽपि ज्ञानादिस्तच्छब्दैरेव भण्यते' (पाद्मवचनम्) इति श्रुतिस्मृतिभ्यां व्यपदिश्यत एव । एवं स्थानविशेषाधिकरणे भगवदानन्दादौ वैचित्र्याभावस्य विचित्रब्रह्माद्यानन्दबिम्बत्वस्य चोभयस्यापि

'ऐश्वर्यात् परमाद् विष्णोर्भक्त्यादीनामनादितः ।
ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रता ॥' (पाद्मवचनम्)

इत्यादौ व्यपदेशात् तस्य वाऽत्र निवेशापात इति वाच्यम् । अरूपाधिकरणोक्तहेतुपरामर्शसौकर्याय सूर्यकाधिकरणस्यैव तदनन्तरसङ्गतत्वेनास्याधिकरणस्यात्रापि सङ्गतस्य सूर्यकाधिकरणवदरूपाधिकरणादानन्तर्येऽसाधारणसङ्गत्याभावात् । अत्र दृष्टान्तत्रयेऽभिहिते एवाऽनन्दस्य लोकोपमत्वशङ्कोन्मेष इति न परनयस्यात्र निवेशोऽपि शङ्कार्हः । एवं स्थानविशेषाधिकरणस्यापीत्यायूह्यम् ।

प्रकारान्तरेण सङ्गतिवर्णनम्

यद्वा, यद्युभयव्यपदेशाद् व्यक्तत्वमव्यक्तत्वं चाङ्गीक्रियते तर्हि तत एव ब्रह्मानन्दयोर्भेदाभेदावपि स्यातामिति पूर्वाधिकरणोक्तन्यायमुपजीव्य प्रवर्तनादनन्तरसङ्गतिः । व्यक्तत्वादिवदानन्दित्वाभावस्य आनन्दस्वरूपत्वाभावस्य च भक्तिप्रतिबन्धकत्वादुभयनिरासेन तदुभयसमर्थनादस्य पेटिकासङ्गतिरपि द्रष्टव्या ।

विषयसंशयौ तथा चिन्ताक्रमश्च

अत्र सप्ताधिकरण्याः पूर्वोक्तगुणानां यदर्थं विवरणमकारि सा भक्तिर्विषयः । कर्तव्या न वेति सन्देहः । तदर्थं भगवत्यानन्दित्वादिकमस्ति न वेति चिन्तनीयम् ।

पूर्वपक्षः

तत्र न कर्तव्या भक्तिः । भक्तिप्रयोजकस्याभावात् । आनन्दत्वस्य धनत्वस्येव

तदप्रयोजकत्वात्। आनन्दित्वं हि धनवत्त्वमिव प्रयोजकं दृष्टम्। तच्च ब्रह्मणि नास्ति। तथाहि। स आनन्दादिर्ब्रह्मणा भिन्न उताभिन्नः। नाऽद्यः। भिन्नस्य तद्वत्त्वे पुरुषस्य दण्डेनेव सम्बन्धसापेक्षत्वात्। नचैतयोस्तयोरिव संयोगो भवति। गुणगुणिनोः मया संयोगानङ्गीकारात्। समवायस्य त्वया द्वितीये निराकृतत्वात्। 'आह च तन्मात्रम्' (ब्र.सू. ३-२-१६) इत्युक्तिविरोधाच्च। नापि द्वितीयः। तदभिन्ने तद्वत्त्वस्य क्वाप्यदर्शनात्। नेश्वरो गुणवान्, गुणात्मकत्वात्, यथा न धनं धनवत्, दण्डो वा दण्डवानिनिति युक्तिविरोधाच्च। नचाप्रयोजको हेतुः। गुणवत्त्वे गुणात्मकत्वस्य हेतोरुच्छित्तिप्रसङ्गात्। आनन्दाद्याः न ब्रह्मगुणाः। तत्स्वरूपत्वादिति युक्तिविरोधाच्च। नचाव्यक्तत्वादिवदुपपत्तिः। तत्र जीवसामर्थ्येनाव्यक्तत्वमीशसामर्थ्येन व्यक्तत्वमिति व्यवस्थयोभयोपपत्तावपीह तदुभयस्वीकारायोगात्। तथाच

गुणित्वे ब्रह्मणस्त्याज्यं स्वरूपत्वं न चेन्नच।
गुणित्वं तस्य तेनैव भजनं नोपपद्यते॥

इति पूर्वपक्षः।

सिद्धान्तः

स्यादयं युक्तिविरोधो यदि ब्रह्मस्वरूपादि युक्तिगम्यं स्यात्। केवलं श्रुतिगम्यं हिं तदिति शास्त्रयोनिनये व्युत्पादितम्। श्रुतिश्च 'आनन्दं ब्रह्मणो विद्वान्' (तै.उ. २.४), 'अथैष एव परमानन्दरूपः' (बृ.उ. ६.३.३३) इत्यादिका गुणित्वेन गुणात्मकत्वेन च भगवन्तं व्यपदिशति। नच युक्तिविरोधाच्छुतेरुपचरितार्थत्वं कल्प्यम्। ब्रह्म आनन्दः आनन्दि च। तथा व्यपदिश्यमानत्वात्। यो यथा व्यपदिश्यते स तथा प्रतिपत्तव्यः। यथाऽहिः कुण्डलत्वेन च कुण्डलित्वेन च व्यपदिश्यमानः कुण्डलं कुण्डली चेति युक्तिसाहित्येन श्रुतेः प्राबल्यात्। नचाहिकुण्डलयोर्भेदाभेदाङ्गीकारेण भेदस्यापि सद्भावात् तत्र तथात्वेऽपीह ब्रह्मतद्गुणयोरत्यन्ताभेदेन तदनुपपत्तिः। ततश्च भेदसाहित्यस्य तत्रोपाधित्वमिति

वाच्यम्। प्रकाशात्मके सूर्ये प्रकाशित्वसद्भावेन तत्र भेदसाहित्यस्य साध्याव्यापकत्वात्। नच तत्रापि भेदोऽस्तीति वाच्यम्। प्रकाशं विना सूर्यस्य कदाऽप्यनवस्थानात्।

किञ्च पूर्वकाल उत्तरकाल इति व्यवह्रियमाणः कालः क्षणलवादिः क्षणलवादिनैवावच्छिद्यत इति पुरुषस्य दण्ड इव विशेषणम्। विशेष्यं च तद्वदेव। तत्र पूर्वक्षणस्य पूर्वक्षणान्तरमेव विशेषणमिति चेन्न। एकस्मिन् क्षणे कालद्वयानङ्गीकारात्। अङ्गीकारे त्वनवस्था। नचाखण्डः कालः क्षणलवादेर्विशेष्यमिति वाच्यम्। अखण्डस्यापि कालस्य क्षणादित्वापातात्। तदर्थमौपाधिकभेदाश्रयणे पुनरनवस्था। तथाच क्षणादिरूपः कालः स्वाभिन्नक्षणादिमानपि वक्तव्य इति तत्रापि साध्यव्यापकताभङ्गः। सूर्ये काले च भेदाभावेऽपि तत्प्रतिनिधिभूतवस्तुसामर्थ्यापरपर्यायविशेषसद्भावान्न दोष इति चेन्न। तथाऽपि भेदसाहित्यस्योपाधेः साध्यव्यापकताभङ्गापरिहारात्। प्रतिनिधिसद्भावादेव भेदोऽपि सत्कल्प एव। घटकसद्भावो वोपाधिर्भविष्यतीति चेन्न। तर्हि प्रकृतेऽप्यानन्दब्रह्मणोर्विशेषसद्भावेन साधनाव्यापकत्वाद्। विशेषोऽपि विशेष्याभिन्न एव। तत्रापि भेदव्यवहारनिर्वाहकविशेषोऽङ्गीकार्यस्तत्राप्येवमिति विशेषपरम्परयाऽनवस्था स्यादिति चेन्न। तार्किकमते समवायस्य स्वरूपसम्बन्धस्य जातेर्विशेषस्य च स्वनिर्वाहकतावद् ब्रह्मण्यङ्गीकृतविशेषस्यापि स्वनिर्वाहकताङ्गीकारात्। सर्वेषां ब्रह्मधर्माणां ब्रह्मणा सह सविशेषात्यन्ताभेदः विशेषस्याप्यभेदः स्वनिर्वाहकता चेति बहु कल्पनीयमिति चेदानन्दित्वानन्दत्वोभयव्यपदेशः श्रौतो यावता विना न निर्व्यूह्यते तावतोऽङ्गीकारस्य कल्पनात्वाभावात्। अन्यथा चेश्वरानुमानाद् ज्योतिष्टोमादिवाक्याच्चेश्वरस्यैकत्वं तज्ज्ञानस्यैकत्वं नित्यत्वमित्यादि, यागस्य विनश्वरत्वेन तज्जन्यमदृष्टं महापातकादिविनाश्यं, फलपर्यन्तस्यापि क्रियासमानाधिकरणं चेत्याद्यपि कल्पना न स्यात्।

एतेन जीवब्रह्मणो राहुशिरसोः घटस्वरूपयोश्चोभयव्यपदेशान्यथानुपपत्त्या भेदाभेदोऽप्यङ्गीकार्य इति परास्तम्। जीवब्रह्मणोरुभयव्यपदेशस्य अंशांशिभावादिनैवोपपत्तेरुक्तत्वात्। राह्वादेस्तु भेदप्रतिनिधिविशेषबलेनोभयव्यपदेशोपपत्तेः। गवाश्वादेरपि विशेषबलादेव भेदव्यवहारोपपत्तेर्भेदो दत्तजलाञ्जलिः स्यादिति चेत्। नहि निधिसद्भावे प्रतिनिध्याश्रयणं युक्तम्। तथा सति सोमस्याग्रहणप्रसङ्गात्। तर्हि ब्रह्मतदानन्दयोर्गवाश्वादिवन्मुख्यभेद एवाङ्गीक्रियतामिति चेन्न। तस्य 'नेह नानाऽस्ति किञ्चन' (कठ.उ. ४.११) इत्यादिना निषेधेन ब्रह्मण्यलाभात्। नहि सिद्धचलाभेऽपि न प्रतिसिद्धचुपादानम्। तथा सति पूतिकाऽग्रहणप्रसङ्गात्। तथाच-

यदा विशेषः सर्वेण वादिना शिरसोह्यते।
तदा ब्रह्मण आनन्दित्वादौ श्रौते तु का क्षतिः॥ इति सिद्धान्तः।

सूत्रार्थस्तु स्पष्टः। क्रमोऽपि भाष्यादौ प्रतिपादितः।

शाङ्करभाष्यानुसारेणाधिकरणस्वरूपम्

अन्ये तु 'प्रकृतैतावत्त्वं हि प्रतिषेधति' (ब्र.सू. ३.२.२२) इत्यादिकां 'प्रतिषेधाच्च' (ब्र.सू. ३.२.३१) इत्येवमन्तां दशसूत्रीं चतुर्थपञ्चमयोरेकत्वेन, चतुर्थे आदिपदसंयोजनेन चापपाठेन नवसूत्रीं विधायेत्थं व्याचक्षते। 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' (बृ.उ. २.३.१) इत्युपक्रम्य पठ्यते 'अथात आदेशो नेति नेति नह्येतस्मादिति नेत्यन्यत् परमस्ति' (बृ.उ. १.३.७) इति। तत्र संशयः किमयं प्रतिषेधो रूपद्वयं सवासनं ब्रह्म चेत्येतत्सर्वं प्रतिषेधति, उतैकतरम्। यदाऽप्येकतरं तदाऽपि किं ब्रह्म प्रतिषेधति द्वे रूपे परिशिनष्टि उत रूपद्वयं प्रतिषेधति ब्रह्म परिशिनष्टीति। तत्र सद्बोधरूपं ब्रह्म मूर्तामूर्तप्रपञ्चसाधाराणतया सामान्यं, तस्य तु विशेषाः मूर्तादयः। एवं च द्वौ प्रतिषेधौ। द्विर्नेति श्रवणात्। तयोरेकेन सप्रपञ्चं ब्रह्मणो रूपं मूर्तामूर्तात्मकं प्रतिषिध्यते।

नच विशेषेषु यावत्सु निषिद्धेषु सामान्यमवस्थातुमर्हतीति। द्वितीयेन तु परं ब्रह्मापि निषिध्यते। अथवा ब्रह्मैव प्रतिषिध्यते नतु तस्य रूपं मूर्तादि। प्रत्यक्षादिप्रमाणसिद्धत्वात्। ब्रह्म तु सकलवाङ्मनसातीतत्वेनासम्भाव्यसद्भावं निषेद्धुं योग्यम्। वीप्सा तु तदत्यन्ताभावसूचनायेति युक्तम्।

प्रत्यक्षादिमितद्वैतनिषेधे तद्विरोधतः।
अमितं ब्रह्म योग्यत्वादविरोधान्निषिध्यते॥ इति प्राप्ते -

न तावदाद्यः पक्षो युक्तः। शून्यवादप्रसङ्गात्। किञ्चिद्धि परमार्थमालम्ब्यापरमार्थः प्रतिषिध्यते। यथा रज्ज्वादिषु सर्पादयः। तच्च परिशिष्यमाणे कस्मिंश्चिद्भावेऽवकल्प्यते। कृत्स्नप्रतिषेधे तु कोऽन्यो भावः परिशिष्येत्। नापि ब्रह्ममात्रप्रतिषेध उपपद्यते। 'ब्रह्म ते ब्रवाणि' (बृ.उ. २.१.१) इत्युपक्रमविरोधात्। 'असन्नेव स भवति' (तै.उ. २.६) इत्यादिनिन्दाविरोधात्। 'अस्तीत्येवोलब्धव्यः' (कठ.उ. ६.१३) इत्यवधारणविरोधात्। सर्ववेदान्तव्याकोपप्रसङ्गाच्च।

उपाधिद्वैतबाधे हि नोपधेयस्य बाधनम्।
आश्रयस्य निषेधः स्यादिति सर्वं न बाध्यते॥
मानान्तराविषयो ब्रह्म शब्देनैव प्रमीयते।
तन्निषेधस्य तेनैव प्रमाणेन विरुद्ध्यते॥ इति सिद्धान्त इति।

तन्निरासः

तन्न।

न स्थानतोऽपीत्यस्मात् प्राक् त्वंपदार्थो विधित्सितः।
तत्पदार्थस्ततः पश्चाद् यावत्पादः समाप्यते॥

इति वदतस्तव मते तत्पदार्थभूतनिर्विशेषब्रह्मप्रतिपादनमेव सङ्गतमिति 'नेति नेति' (बृ.उ. २.३.६) इति प्रतिषेधस्य विषयनिर्धारणपरैतदधिकरणारम्भस्येह

सङ्गत्यभावात्। नचेहापि निर्विशेषब्रह्मैव समर्थ्यत इति वक्तव्यम्। नेति नेतीत्यर्थकथनार्थमेतदधिकरणमिति भामतीविरोधात्। तदर्थकथनद्वारा ब्रह्मैव निष्कृष्टं भविष्यतीति चेन्न। 'अरूपवदेव हि तत्प्रधानत्वात्' (ब्र.सू.३-२-१४) इत्यादौ पूर्वस्मिन्नेवाधिकरणे ब्रह्मणो निष्कृष्टत्वात्। 'अशब्दमस्पर्शम्' (कठ.उ. ३.१५) इत्यादिवाक्यमुखेन निष्कर्षेऽपि 'नेति नेति' (बृ.उ. २.३.६) इत्यादिवाक्यमुखेन निष्कर्षाभावेन मुखभेदादौदुम्बराधिकरणपर्णमय्यधिकरणयोरिव न गतार्थतेति चेन्न। 'दर्शयति चाथो अपि स्मर्यते' (ब्र.सू.३-२-१७) इति सूत्रविषयतया 'अथात आदेशो नेति नेति' (बृ.उ. २.३.६), 'अन्यदेव तद् विदितादथो अविदितादधि' (के.उ. १.४), 'यतो वाचो निवर्तन्ते' (तै.उ. २.४.१) इत्यादिश्रुतीनां त्वयैव गृहीतत्वात्।

अत्र कल्पतरूक्तः परिहारः

ननूपष्टम्भकत्वेन सूत्रगृहीतश्रुत्यर्थमाक्षिप्येह समाधीयत इति नासङ्गतिः। यथोक्तं कल्पतरौ -

निषेधश्रुतिभिर्ब्रह्म निर्विशेषं निरूपितम्।
तासां ब्रह्मनिषेद्धृत्वमिहाऽशङ्क्य निरस्यते॥

अथवा

सन्मात्रं ब्रह्मसामान्यं तद्विशेषानपेक्षते।
विशेषेषु निषिद्धेषु नास्ति ब्रह्मेति शङ्क्यते॥ इति।

तन्निरासः

मैवम्। ब्रह्मैव नास्तीति शङ्कायाः शास्त्रारम्भं प्रत्येव प्रतिबन्धकत्वेन तन्निरसनं शास्त्रादावेव कार्यं प्रसक्तमिति तस्येह प्रसक्त्ययोगात्। 'अथातो ब्रह्मजिज्ञासा' (ब्र.सू. १.१.१) इति सूत्रार्थावगत्यनन्तरमेव वा ब्रह्मैव न सत्, 'नेति नेति' इति निषेधात्। अतः कस्य जिज्ञासा विधीयत इत्युत्थानेन तदनन्तरमेव सङ्गतत्वेऽपीह तदयोगात्। नहि सम्भवत्यापाततो ब्रह्मप्रत्येतुः शङ्का न सम्भवति,

समन्वयाविरोधाभ्यां ब्रह्म निश्चिन्वतस्तु तत् सम्भवतीति। मूर्तामूर्तात्मकप्रपञ्चस्य ब्रह्मणश्च प्रत्यक्षादिप्रमाणसिद्धत्वेन तदुभयनिषेधात्मकपूर्वपक्षस्यानुत्थानाच्च।

वाचस्पत्युक्ता पूर्वपक्षोपष्टम्भकयुक्तिः

अत्रोक्तं वाचस्पतिना - यद्यपि तेषु तेषु वेदान्तप्रदेशेषु ब्रह्मस्वरूपं 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१, त्रि.म.ना. ३.३) इत्यादिना प्रतिपादितम्। 'असन्नेव स भवति' (तै.उ. २.६) इत्यादिना तदसद्भावज्ञानं च निन्दितम्। 'अस्तीत्येवोपलब्धव्यः' (कठ. ६.१३) इति चास्य सत्त्वमवधारितम्। तथाऽपि सद्बोधरूपं ब्रह्म सवासनमूर्तामूर्तरूपसाधारणतया च सामान्यम्। तस्य चैते विशेषाः मूर्तामूर्तादयः। नच तत्तद्विशेषनिषेधे सामान्यमवस्थातुमर्हति। 'निर्विशेषं न सामान्यं भवेच्छशविषाणवत्' इति वृद्धवचनात्। तस्माद् विशेषनिषेधे तत्सामान्यस्य ब्रह्मणोऽनवस्थानात् सर्वस्यायं निषेधः- इति।

तन्निरासः

तदयुक्तम्। किमत्र पूर्वपक्षवादी वेदप्रामाण्यमङ्गीकरोति न वा ? नेति पक्षे अत एव 'नह्येतस्मादिति नेत्यन्यत् परमस्ति' (बृ.उ. २.३.६) इति निषेधात् परं नास्तीति सर्वनिषेधमेव तत्त्वमाह श्रुतिरिति वाचस्पत्युक्तं पूर्वपक्षोपष्टम्भकं न स्यात्। आद्ये तु 'सत्यं ज्ञानमनन्तम्' (तै.उ. २.१.१) इत्यादिश्रुतीनां गत्यनुक्तेः पूर्वपक्षानुदयः।

भामत्यां पूर्वपक्षोत्थानसमर्थनम्

अत्रोक्तं वाचस्पतिना - 'अस्तीत्येवोपलब्धव्यः' (कठ.उ. ६.१३) इति चासत्यपि ब्रह्मणि सत्त्वेनोपासनार्थतयोपासनाविधिवन्नेयम्। न त्वस्तित्वमेवास्य तत्त्वम्। तत्प्रशंसार्था चासद्भावनिन्दा। यच्चान्यत्र 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१) इति ब्रह्मस्वरूपप्रतिपादनं तदपि मूर्तामूर्तप्रतिपादनवन्निषेधार्थम्।

नच 'नेति नेति' (बृ.उ. २.३.६) इत्यनेन सन्निहितमूर्तामूर्तप्रतिपादकवाक्यप्राप्तस्य निषेधसम्भवे दूरस्थसत्यज्ञानादिवाक्यप्राप्तनिषेधायोगेन दूरस्थो निषेधः कथं तेन सम्बद्ध्यत इति वाच्यम्। यतो 'येन यस्यार्थसम्बन्धो दूरस्थस्यापि तेन सः' इति न्यायेनासन्निहितोऽपि निषेधो योग्यत्वात् सम्भत्स्यत इति।

तन्निरासः

तदप्ययुक्तम्। एवं भङ्ग्यन्तरेण श्रुत्यप्रामाण्यमेवाऽपतितम्। प्रपञ्चभागस्येव ब्रह्मभागस्यापि स्वार्थे तात्पर्याभावेन निरभिधेयत्वस्य दुर्वारत्वात्। अन्यथा शशविषाणमस्तीति वाक्यस्यापि निरभिधेयत्वं न स्यात्। 'नेति नेति' (बृ.उ. २.३.६) इति वाक्यप्रतिपाद्यमभावाख्यमभिधेयमस्तीति चेत्, मूर्खप्रलपितमेतत्। नहि 'सत्यं ज्ञानम्' (तै.उ. २.१.१) इत्यादिभावाभिधेयेषु वाक्येष्वभावोऽभिधेयो युज्यते। निषेधस्य प्राधान्यात् तदेकवाक्यतापन्नानां सत्यज्ञानादिवाक्यानां प्रयाजादिवाक्यानामिव प्रधानपरत्वं सम्भवतीति चेन्न। 'अरूपवदेव हि तत्प्रधानत्वात्' (ब्र.सू. ३.२.१४) इत्यत्र वेदान्तानां ब्रह्मप्राधान्यस्य निश्चितत्वेन निषेधप्राधान्यायोगात्।

किञ्च सत्यज्ञानादिवाक्यानां 'नेति नेति' इत्यादिनिषेधवाक्यैकवाक्यता न तावन्निषेध्यसमर्पकत्वेन। यच्छब्दाद्युपबन्धाभावात्। अन्यथा 'नेति नेति' इत्यादिवाक्यमेव सत्यज्ञानादिवाक्यनिषेध्यसमर्पकतया तदेकवाक्यतापन्नं स्वार्थतात्पर्यभाङ् न स्यात्। नापि तत्प्रकरणपाठात्। दूरस्थत्वात्। निर्विण्णैरिव 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इति फलादिभिर्व्यवधानाच्च।

अद्वैतभाष्योक्तः एतदधिकरणसिद्धान्तोऽप्ययुक्तः

सिद्धान्तोऽप्ययुक्तः। यो हि वादी सर्वस्यापि निषेधमनुजानाति स शून्यवाद्येवेति कथं शून्यवादप्रसङ्गाद् बिभेति। अत एव 'नच तद्विशेषनिषेधे सामान्यमवस्थातुमर्हति' इत्यादिशून्यवादमेवाभ्युपेत्य पूर्वपक्षः प्रवर्तितः।

भामत्यां शून्यवादप्रसङ्गस्य परिहारः

अत्रोक्तं वाचस्पतिना- न शून्यवादप्रसङ्ग इष्ट :। अयुक्तत्वात्। तथाहि। उपाधयो ह्यमी पृथिव्यादयोऽविद्याकल्पिताः। न त्वश्वस्य शफादय इव स्वाभाविका विशेषाः। नचोपाधिविगमे उपहितस्याऽप्यभावोऽप्रतीतिर्वाऽस्ति। तथा सत्युपाधीनां दर्पणकृपाणादीनामपगमे मुखस्याप्यभावाप्रतीती स्याताम्। तस्मादुपाधिनिषेधेऽपि नोपहितस्य ब्रह्मणः शशविषाणायमानताऽप्रत्ययो वा युक्त इति।

तन्निरासः

तन्न। बिम्बभूतमुखादिस्थानीयं चैतन्यमिह ब्रह्मशब्देनोच्यते उत दर्पणाद्युपाधिप्रतिफलितप्रतिमुखस्थानीयम्। नाऽद्यः। यावद्विशेषापगमे निर्विशेषसामान्याभावशङ्कायाः परिहारानभिधानात्। कल्पितानां यावतां विशेषाणां निषेधेऽप्यकल्पितविशेषाणां तदभावेन निर्विशेषत्वाप्रसक्त्या न सामान्यस्य ब्रह्मणः शशशृङ्गायमाणतेति परिहारो दृश्यत इति चेन्न। दर्पणकृपाणादीनामुपाधिरूपाणां विशेषाणामपगमेऽपि बिम्बभूते मुखे प्रांशुत्ववर्तुलत्वादिस्वाभाविकविशेषाणामनपगमादभावाप्रतीत्योरसम्भवेऽपि ब्रह्मणि तदभावेनाऽभावाप्रतीत्योः शशविषाणादिवद् दुर्वारत्वात्। स्वाभाविकविशेषाणां ब्रह्मण्यङ्गीकारे सविशेषवादापातात्। विशेषस्य ब्रह्ममात्रत्वे चोक्तदोषतादवस्थ्यात्। अतिरिक्तत्वेऽविशेषात् तस्यापि निषेधापाताच्च। न द्वितीयः। तस्यापि प्रपञ्चकोटिप्रविष्टतया त्वन्मते[1] निषेधावश्यम्भावात्। मुखप्रतिबन्दीग्रहणायोगाच्च। किञ्च मूर्तामूर्तप्रपञ्चयोरिव ब्रह्मणोऽपि सन्निधानविशेषान्नेतिवाक्येन निषेधो युक्तः।

नेति नेतीत्यत्र ब्रह्मणोऽपि निषेधापत्तिर्न युक्तेति भामत्युक्तिः तन्निरासश्च

[2]अत्रोक्तं वाचस्पतिना - नहि भावमनुपाश्रित्य प्रतिषेध उपपद्यते। किञ्चिद्धि

१. म. तन्मते। २. म. यच्चोक्तं।

क्वचिन्निषिध्यते। न ह्यनाश्रयः प्रतिषेधः शक्यः प्रतिपत्तुमिति। तन्न। धर्मिणोऽप्यभावे प्रतिषेधः कुतो न प्रतिपत्तुं शक्यत इति वक्तव्यम्। रज्ज्वादावेव सर्पादयः प्रतिषिध्यमाना दृष्टाः, न पुनः शशशृङ्गादाविति चेत्। रज्ज्वादौ सर्पादय एव प्रतिषिध्यन्ते न पुनः शशशृङ्गादय इति किं न पश्यसि। ततश्चाधिष्ठानं विना भ्रमानुत्पादेन यथा प्रतिषेधोऽशक्यस्तथा सत्यसर्पादिकं विना भ्रमानुत्पादेन तत्प्रतिषेधोऽप्यशक्य एवेति ब्रह्मणि प्रपञ्चाद्यारोपप्रयोज्यनिषेधसिद्ध्यर्थमेव सत्यभूतप्रपञ्चान्तरमङ्गीकार्यं स्यादिति निराश्रयत्वप्रतिषेधस्यैव युक्तत्वात्। एतेन द्वितीयपक्षदूषणमप्यपास्तम्। यतो यथा प्रपञ्चमनूद्य निषेधस्तथा ब्रह्माप्यनूद्य निषेधः कुतो न प्रवर्तते। पूर्ववाक्ये प्रकृतत्वसाम्यात्।

भामत्यां ब्रह्मप्रतिषेधस्यानुपपत्तिकथनम्

अत्रोक्तं वाचस्पतिना - युक्तं नैसर्गिकाविद्याप्राप्तः प्रपञ्चः प्रतिषिध्यते। प्राप्तिपूर्वकत्वात् प्रतिषेधस्य। ब्रह्म तु नाविद्यासिद्धम्। नापि प्रमाणान्तरात्। तस्माच्छब्देन प्राप्यैव प्रतिषेधनीयम्। तथाच यस्तस्य वाचकः स तत्पर इति स ब्रह्मणि प्रमाणमिति कथं तस्य निषेधः? नच पर्युदासाधिकरणपूर्वपक्षन्यायेन विकल्पः। वस्तुनि सिद्धस्वभावे तदनुपपत्तेः। नचावाङ्मनसगोचरः बुद्धावुल्लेखितुं शक्यः। अशक्यश्च कथं प्रतिषिध्यते। प्रपञ्चस्त्वनाद्यविद्यासिद्धोऽनूद्य ब्रह्मणि प्रतिषिध्यत इति।

तन्निरासः

तन्न। प्रपञ्चस्य किं प्राप्तिः प्रमाणेनोताऽभासेन। नाऽद्यः। प्रमाणप्राप्तस्य निषेधानुपपत्तेः। निषेधे च तत्प्रत्यायकस्य प्रमाणत्वानुपपत्तेः। न ह्यनुकूलतर्कादिसाचिव्येन प्रमाणस्यानुमानस्य प्रमेयं बाध्यं दृष्टम्। अन्यथा शब्दरूपप्रमाणप्राप्तस्यापि ब्रह्मणो निषेधः स्यात्। न द्वितीयः। 'आकाशाद् वायुः' (तै.उ. २.१.१) इत्यादिप्रमाणेनैव प्राप्तत्वात्। प्रत्यक्षेण प्राप्तिरस्तीति चेन्न।

तस्याऽभासत्वायोगात्। शुक्तिरजतादिप्रत्यक्षे तत्त्वं दृष्टमिति चेत् - 'अग्निना सिञ्चेत्' इत्यादौ किं न दृष्टम्? निर्दोषशब्दे न दृष्टमिति चेत् - निर्दोषप्रत्यक्षेऽपि न दृष्टमिति समम्। सर्वस्याप्यविद्याकल्पितत्वासिद्धेश्च। प्रपञ्चस्त्वनाद्यविद्यासिद्धोऽनूद्य ब्रह्मणि प्रतिषिध्यत इति वैषम्यं चायुक्तम्। त्वन्मतेऽप्यविद्यायाः कल्पकत्वेऽपि प्रत्यायकत्वानङ्गीकारात्। अन्यथा प्रमासाधनत्वरूपस्य वाऽनधिगतार्थगन्तृत्वादिरूपस्य वा प्रमाणलक्षस्याविद्यायामतिव्याप्त्यापत्तेः। ब्रह्मणोऽपि शून्यवादिरीत्याऽऽभासेन ब्रह्मास्मीति त्वदीयवाक्येन प्राप्तस्य निषेधसम्भवेन वैषम्यायोगाच्च।

भामत्याम् अवाङ्मनसगोचरस्य ब्रह्मणो निषेधानुपपत्तिकथनं, तन्निरासश्च

एतेनैव 'नचावाङ्मनसगोचरः' इत्याद्यपि निरस्तम्। ब्रह्मणो वाङ्मनसागोचरत्वे 'नेति नेति' इत्यादिवाक्ये ब्रह्म न निषिध्यत इति वाङ्मनसगोचरत्वागोचरत्वाभ्यां व्याघाताच्च। '' 'ब्रह्म ते ब्रवाणि' (बृ.उ. २.१.१) इत्युपक्रमविरोधात्'' इति भाष्यव्याख्यानावसरे 'वेदान्तानां सर्वेषामेव ब्रह्मपरत्वमुपपादितं प्रथमेऽध्याये' इत्यादिना ''वेदान्तवाचां मनसि सन्निधानाद् ब्रह्मणो वाङ्मनसातीत्वं नाञ्जसम्। अपि तूपपादनप्रक्रियोपक्रम एषः। यथा गवादयो विषयाः साक्षाच्छृङ्गग्राहिकया प्रतिपाद्यन्ते प्रतीयन्ते च, नैवं ब्रह्म। 'भेदप्रपञ्चविलयद्वारेण च निरूपणम्' '' इत्यभियुक्तोक्तेरित्यादिना च भामतीग्रन्थेन वाङ्मनसागोचरत्वस्य गत्युक्तिपूर्वकं वेदान्तानां ब्रह्मपरत्वप्रतिपादनेन वाङ्मनसगोचरत्वस्यैव व्यवस्थापनाच्च।

किञ्च ब्रह्मणो वाङ्मनसागोचरत्वे 'नेति नेति' (बृ.उ. ९.२६, ४.२.४, ४.४.२२) इत्यादितत्प्रतिषेधस्य ब्रह्मगोचरप्रमाणान्तरस्यैवासत्कल्पतया न सुतरां तद्विरोध इति निर्बाधमेव प्रवृत्त्युपपत्तिः। यच्च वेदान्ता महता प्रयत्नेन ब्रह्म प्रतिपादयितुं प्रवृत्ता अतो न निषेधोऽत्र युक्त इति वैषम्यान्तरमुक्तं, तदपि 'अथात

आनन्दस्य मीमांसा भवति' (तै.उ.२.८) इति 'अथातो रेतसः सृष्टिः' (ऐ.उ.१.३.१), 'अथातो विभूतयोऽस्य पुरुषस्य' इत्यादिनोपक्रम्य महता प्रयत्नेन प्रपञ्चमपि प्रतिपादयन्ति वेदान्ता इति प्रपञ्चनिषेधोऽपि न युक्त इति साम्याद्युक्तम्।

शाङ्करभाष्ये वेदान्तैः ब्रह्मणोऽपि निषेधे तेषां निष्प्रयोजनत्वोक्तिरयुक्ता

एतेन प्रमाणान्तरानवगतमेव ब्रह्म स्वयमेव प्रतिपाद्य पुनस्तन्निषेधने वेदान्तानां 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायेन निष्प्रयोजनत्वं प्रसज्यत इति भाष्योक्तं वैषम्यान्तरमप्ययुक्तम्। प्रपञ्चस्यापि प्रमाणान्तरगोचरत्वेन तन्निषेधे वेदान्तानां निष्प्रयोजनत्वसाम्यात्। अतीन्द्रियस्याप्रत्यक्षत्वादसिद्धेरिति चेत्- शब्दः कचिदाश्रितः गुणत्वादित्यनुमानात् तत्सिद्धेश्च। क्षित्यादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानेन स्वप्रकाशत्वेन सर्वप्रत्ययेन च सिद्धिस्त्वयैव ब्रह्मणोऽङ्गीकृता[1]। अन्यथा 'तत्तु समन्वयात्' (ब्र.सू.१-१-४), 'आनन्दमयोऽभ्यासात्' (ब्र.सू.१-१-१२), 'आकाशस्तल्लिङ्गात्' (ब्र.सू.१-१-२२), 'अत एव प्राणः' (ब्र.सू.१-१-२३), 'अरूपवदेव हि तत्प्रधानत्वात्' (ब्र.सू.३-२-१४) इत्याद्यनुमानोपन्यासो न स्यात्। यदि च तानि वेदोपजीवितया न प्रमाणान्तरशब्देनोच्यन्ते तदा 'शब्दः कचिदाश्रितः' इत्यादीन्यपि 'शब्दगुणं नभः' इत्याद्यागमोपजीवीनीति समम्। धर्माधर्मस्वर्गनरकादेः स्वरूपमात्रं यद्यप्यनुमानगम्यं, तथाऽप्यङ्गाङ्गिभावसाध्यसाधनभावादेरनुमानमात्रान्न सिद्धिरिति शब्दैकगम्यत्वे 'चोदनालक्षणोऽर्थो धर्मः' (पूर्वमीमांसा १.१.२) इति जैमिनिसूत्रात् सिद्धे प्रमाणान्तरागोचरत्वस्य धर्मादाववश्याङ्गीकार्यत्वाच्च।

ब्रह्मप्रपञ्चयोः वैषम्यान्तरप्रदर्शनेन नेति नेतीत्यत्र ब्रह्मणोऽनिषेधोक्तिरप्ययुक्ता

एतेन यद्यपि प्रपञ्चब्रह्मणी पूर्ववाक्ये प्रकृते 'द्वे वाव ब्रह्मणो रूपे' (बृ.उ.२.३.१) इत्यादौ, तथाऽपि षष्ठ्यन्तनिर्देशेन प्रपञ्चावच्छेदकत्वेनाप्रधानतया

१. म. अङ्गीक्रियते।

ब्रह्म प्रकृतम्। प्रपञ्चस्तु प्रथमान्तनिर्देशात् प्रधानतया प्रकृत इति 'नेति नेति' (बृ.उ. ४.२.४) इति निषेधेन प्रधानतया गृह्यते। अप्रधानं ब्रह्म तु न गृह्यत इति वैषम्यान्तरं परास्तम्। शब्दतोऽप्राधान्येऽपि 'राजपुरुषः' इत्यादौ राज्ञ इव ब्रह्मणोऽर्थतः प्राधान्योपपत्तेः। शब्दानामर्थावबोधार्थत्वेनोपयुक्ततया तत्कृतप्राधान्यस्यातन्त्रत्वात्। अन्यथा 'ब्रह्मजिज्ञासा' इत्यादावपि ब्रह्मणः शब्दतोऽप्राधान्यप्रतीतेः 'जन्माद्यस्य यतः' (ब्र.सू. १.१.२) इति द्वितीयसूत्रस्थयच्छब्देन परामर्शो न स्यात्। विधाने प्राधान्यनिर्देशस्यातन्त्रत्वे निषेधने सुतरां तस्यातन्त्रत्वाच्च। तथाच कथञ्चिदपि ब्रह्मप्रपञ्चयोर्वैषम्यायोगेन 'नेति नेति' इति श्रुतिः प्रपञ्चं निषेधति। ब्रह्म परिशिनष्टीति पक्षो न युक्तः।

प्रकृतप्रतिषेधे स्यात् प्रपञ्चब्रह्मणोर्बलात्।
न चेत् प्रमाणसिद्धत्वादुभयोर्न निषेधनम्॥

किञ्चात्र ब्रह्म मूर्तामूर्तमपि नेत्युक्तौ घटः पटो नेत्युक्ताविव मूर्तामूर्तभेद एव प्रतीयते। न तु तयोरभावः। अतोऽद्वैतप्रतिकूलता स्फुटैव। संसर्गाभावाभिप्राये न तावत् प्रागभावः प्रध्वंसो वा विवक्षितः। तयोः प्रतियोगिसत्त्वसापेक्षत्वनियमान्मूर्तामूर्तयोः सत्त्वापातात्। व्यावहारिकसत्त्वमङ्गीकृतमेवेति चेत्। प्रतियोगितदभावयोर्विरोधसिद्ध्यर्थं समसत्ताकत्वनियमस्यावश्यापेक्षितत्वात्, प्रागभावप्रध्वंसयोरपि तथात्वापातेनाद्वैतस्य पारमार्थिकत्वं न स्यात्। नाप्यत्यन्ताभावः। प्रपञ्चस्य व्यावहारिकसत्त्वाभ्युपगमात्। नहि व्यावहारिकसतो घटादेरत्यन्ताभावोऽङ्गीकर्तुं शक्यः। तुच्छवदसत्त्वापातात्। नेति नेतीति नञर्थोल्लिखितधीविषयत्वे ब्रह्मणोऽभावरूपतापर्यवसानेन 'भावरूपं ब्रह्म' इति सिद्धान्तव्याकोपापाताच्च।

ब्रह्मणोऽभावरूपतापत्तेः परिहारप्रयत्नः तन्निरासश्च

नात्राभावरूपतापत्तिर्ब्रह्मणः। 'नह्येतस्मादिति नेत्यन्यत्परमस्ति' (बृ.उ.

२.३.६) इति, 'अथ नामधेयं सत्यस्य सत्यम्' (बृ.उ. २.३.६) इति 'प्राणो वै सत्यं तेषामेष सत्यः' (बृ.उ. ४.१.२०) इति च वाक्यशेषेण भावरूपत्वावगमात्। एतस्माद् ब्रह्मणोऽन्यद् व्यतिरिक्तं न ह्यस्ति इति यतोऽतो नेत्युच्यते श्रुतौ, नतु ब्रह्मैव नास्तीत्युच्यते। तथाच अन्यत् परमप्रतिषिद्धं ब्रह्मास्त्येव। यद्वा, नेति नेत्यस्माद् ब्रह्मण आदेशादन्यत् परमादेशनं नह्यस्ति। ब्रह्मण उपदेशप्रकारोऽयमेव नान्योऽस्तीति यावदिति योजनाद्वयेन भावरूपत्वस्यैव प्रतीतेः। 'अथ नामधेयम्' (बृ.उ. २.३.६) इत्यादौ च मूर्तामूर्ते च व्यावहारिकं सत्यं, ब्रह्म तु पारमार्थिकं सत्यमिति 'सत्यस्य सत्यम्' इति नामधेयं ब्रह्मणो युक्तमित्यर्थावगमादिति चेन्न। वाक्यशेषयोरभावत्वप्रतिषेधानवगमात्। अन्यत् परं ब्रह्मास्तीति विधिमुखप्रत्ययवेद्यत्वे भावत्वप्राप्तावर्थादभावव्यावृत्तिः प्रतीयत इति चेत्, न। घटाभावोऽस्तीत्यादौ तददर्शनात्। अभावत्वव्यावृत्तिप्रयोजकभावत्वधर्मानङ्गीकारेण तथा प्रतीत्यसम्भवाच्च। 'सत्यस्य सत्यम्' (बृ.उ. २.३.६) इति नामधेयेन तु सत्यस्य सत्यत्वरूपपारमार्थिकसत्यत्वप्राप्तावप्यभावस्यापि तत्सम्भवेन भावत्वानवगमात्। 'मङ्गलानां च मङ्गलम्' इत्यादौ 'राजा परमधार्मिकः' इत्यादावितरेषां मङ्गलत्वं धार्मिकत्वं चानपहायैव मङ्गलमङ्गलत्वादिप्रतीतिवदिहापि सत्यसत्यत्वादिप्रतीत्युपपत्तेश्च।

किञ्चात्र 'नेति नेति' इति श्रुतौ प्रपञ्चनिषेधोऽयुक्तः।

'कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्।' (कठ.उ.४.१),

'ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यते निष्कलं ध्यायमानः॥'
(मु. ३.१.८),

'यं विनिद्रा जितश्वासाः सन्तुष्टास्संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥' (म.भा. १२.४७.३५),

'योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्।' (म.भा.उ.प., अ. ४५.१),

'योगिनो यं प्रपश्यन्ति [1]योगेशं तं नतोऽस्म्यहम्।' (भाग.८.३.२५),

'सञ्चिन्तयेद् भगवतश्चरणारविन्दम्।' (भाग. ३.२९.२१),

'यमाराध्य जगन्नाथम्', 'तमाराधय सुव्रत।',

'आराधिते जगन्नाथे।',

'आत्मेतुपासनं कार्यं सर्वदैव मुमुक्षुभिः।' (भाष्योदाहृतभविष्यत्पर्ववचनम्)

इत्यादिवचनैः संराध्यसंराधकभावप्रतीत्या जीवब्रह्मभेदस्यैव प्रतीतेः। तथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुल्यवष्टम्भकरकोदकप्रभृतिषु छिन्नेषु भिन्नेषु चलितेषु वा छेदभेदचलनादिविशेषवत्तामश्नुवन्त इव प्रतीयमाना अपि न स्वकीयां छेदभेदचलनादिहीनतां जहति। एवं जीवोऽप्यविद्याकृतसंराधकत्वोपासकत्वादिधर्मभागिव प्रतीयमानः स्वकीयब्रह्मात्मतां स्वयं न जहातीति चेत्। आरोपितब्राह्मण्यादिना चतुर्थेन विहितकर्मानुष्ठानेऽपि इष्टाप्राप्त्यनिष्टप्राप्त्योरिवाऽरोपितसंराधकत्वादिना[2] जीवेन ब्रह्मानाराधनादावपीष्टाप्राप्तिः प्रत्यवायप्राप्तिश्च स्यात्। वस्तुतो रज्जुखण्डे सर्पत्वाभावेऽप्यारोपितस्यापि भयकम्पादिहेतुत्वं दृश्यत एवेत्यारोपितकर्तृत्वस्यापि करणाकरणयोरिष्टानिष्टहेतुत्वं भविष्यतीति चेन्न। तद्वदेव शूद्रेऽप्यारोपितकर्तृत्वस्य तद्धेतुत्वं स्यादित्युक्तत्वात्। मन्मतेऽसतः साधकत्वानङ्गीकारेण दृष्टान्तानुपपत्तेश्च। त्वन्मतेऽपि भयकम्पादेः ज्ञानसाध्यत्वेनाऽरोपितस्य सर्पत्वादेः ज्ञानकार्यभयकम्पादिहेतुत्वेऽपि तदितरकार्यदंशनादिहेतुत्वायोगवदिह ज्ञानेतरकार्यप्रत्यवायादिहेतुत्वायोगाच्च। तस्मात्

नेति नेतीति वाक्ये स्यादुभयप्रतिषेधनम्।
इति यो मन्यते शून्यवादी स इति निश्चयात्॥

---

१. म. योगीशं तं नमाम्यहम्। २. म. उपासकत्वादिना।

तं प्रत्येव तदापत्तिर्दूषणं स्यात् कथं वद।
कथं च दूषणं न स्यात् प्रामाणिकनिषेधने ॥

प्रकृतैतावत्त्वमिति सूत्रस्य अद्वैत्यभिमतार्थकथनपूर्वकं तन्निरासः

एतेन, प्रकृतं यदेतावत्त्वं ब्रह्मणो मूर्तामूर्तरूपत्वं 'नेति नेति' इति श्रुतिस्तदेव प्रतिषेधति न ब्रह्मापि। नचैतावता ब्रह्मणः प्रतिषेधमात्रत्वं मन्तव्यम्। ततो भूयः प्रतिषेधादनन्तरं च 'नह्येतस्मादिति नेत्यन्यत् परमस्ति' इति वाक्यशेषेणान्यत् परमस्तीति भावत्वं यतो ब्रवीति श्रुतिः।

यद्वा ततो भूयः नेति नेतीत्यादेशादनन्तरमपि, 'अथ नामधेयं सत्यस्य सत्यम्' (बृ.उ. २.३.६)इति यतो ब्रवीति श्रुतिरिति सूत्रव्याख्यानं निरस्तम्। इयत्तावाचिन एतावत्त्वशब्दस्य मूर्तामूर्तरूपवत्त्वपरत्वायोगात्[१]। आधिक्यवाचिनो भूयःशब्दस्याऽनन्तरार्थत्वानौचित्यात्। तत इत्यनेनैवोक्तार्थलाभेन भूय इत्यस्य वैय्यर्थ्याच्च। भावत्वमित्यध्याहाराच्च।

'तदव्यक्तमाह हि' 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' इति सूत्रद्वयस्य अद्वैत्यभिमतार्थकथनद्वारा तन्निरासः

एतेन प्रतिषिद्धात् प्रपञ्चात् परं ब्रह्मास्ति चेत् कुतो न गृह्यत इति द्वितीय-सूत्रमवतार्य तद् ब्रह्म 'न चक्षुषा गृह्यते नापि वाचा' (मुण्ड.उ.१.३.८) इत्याद्या श्रुतिर्यतोऽव्यक्तमनिन्द्रियग्राह्यमाह, अतो नोक्तशङ्कावकाश इति व्याख्यानमप्य-युक्तम्। प्रपञ्चनिषेधे ब्रह्मणोऽपि निषेधावश्यम्भावात्। 'योगिनो यं प्रपश्यन्ति' (भाग. ८.३.२५) इत्यादिविरोधाच्च। 'कश्चिद् धीरः प्रत्यगात्मानमैक्षत्' (कठ.उ. ४.१), 'यं विनिद्रा जितश्वासाः' (म.भा. १२.४७.३५) इत्यादि-श्रुतिस्मृतिभ्यामव्यक्तमपि चैतद् ब्रह्म संराधनकाले पश्यन्ति योगिन इति 'अपि

१. म. मूर्तामूर्तपरत्वायोगात्।

संराधने प्रत्यक्षानुमानाभ्याम्' इति सूत्रव्याख्यानं चायुक्तम्। पश्यन्तीत्य-ध्याहारप्रसङ्गात्। अव्यक्तस्य ब्रह्मणः कथं दर्शनमित्याशङ्काया अचिन्त्याद्भुत-शक्त्या परिहारेऽपि तदप्रतिपादककेवलश्रुतिस्मृतिभ्यां परिहारायोगाच्च।

'प्रकाश' इत्यादिसूत्रत्रयस्य पराभिमतार्थवर्णनद्वारा तन्निरासः

ननु संराध्यसंराधकभावाभ्युपगमात् परेतरात्मनोरन्यत्वं स्यादित्यव-तार्याऽदिशब्दं च प्रक्षिप्य सूत्रद्वयमेकत्वेन पठित्वा यथा प्रकाशाकाशसवितृ-प्रभृतेरङ्गुलिकरकोदकप्रभृतौ कर्मण्युपाधौ प्रकाशविशेषवत्तयाऽवभासः अवैशेष्यं स्वाभाविकविशेषाभावश्च, एवं जीवपरयोरपि विशेषवत्तया प्रतिभासः स्वाभाविकविशेषाभावश्च युज्यते। अभ्यासादसकृत् प्राज्ञपरयोरभेदो यतः प्रतिपाद्यत इति 'प्रकाशादिवच्चावैशेष्यम्' (ब्र.सू. ३.२.२५) 'प्रकाशश्च कर्मण्यभ्यासात्' (ब्र.सू. ३.२.२६) इत्यन्तं व्याख्यानम् अयुक्तम्। बहु-ध्याहारप्रसङ्गात्। कर्मणीत्यस्योपाधाविति व्याख्यानस्य चादृष्टचरत्वात्। वाचारम्भणाधिकरणे 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इति पूर्वाधिकरणे च जीवपरयोरभेदस्य ब्रह्मनिर्विशेषत्वस्य च बहुधा प्रतिपादनेनेह पुनः शङ्काया अनुदयाच्च। उदये वाऽभेदप्रतिपादकवाक्यमात्रेण परिहारायोगाच्च। अत एवानन्तेन परेण प्राज्ञेनाऽत्मना जीव एकत्वं गच्छति। तथाहि लिङ्गं 'स यो हवै तत्परं ब्रह्म वेद ब्रह्मैव भवति' (रुद्रहृदय ५२), 'ब्रह्मैव सन् ब्रह्माप्येति' (बृह.उ. ४.४.६, सुबाला. उ. ३.३) इत्येवमादि लिङ्गं हि दृश्यते। अन्यथा परेणैकात्म्यं जीवो न गच्छेदेवेति भेदस्य कल्पितत्वेऽभेदस्य स्वाभाविकत्वे च युक्त्यन्तरं 'अतोऽनन्तेन तथा हि लिङ्गम्' (ब्र.सू. ३-२-२७) इत्यनेनोच्यत इति व्याख्यानमपि बह्वध्याहारप्रसङ्गाद् जीवब्रह्मणोरैक्यप्राप्तेर्बहुधा निराकृत-त्वाच्चायुक्तम्।

'उभयव्यपदेशात् त्वहिकुण्डलवत्' इत्यारभ्य 'प्रतिषेधाच्च' इत्यन्तस्य सूत्रचतुष्टयस्य पराभिमतार्थवर्णनम्

यथैकस्यैव वस्तुनोऽहित्वेन रूपेणाभेदः कुण्डलत्वप्रांशुत्वादिना भेद एवमेव जीवब्रह्मणोः 'तत्त्वमसि' (छा.उ. ६.३.११), 'अहं ब्रह्मास्मि' (बृ.उ. १.४.१०) इत्यादावभेदस्य, 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' (मुण्ड.उ. ३.१.८) इति भेदस्य चैवमुभयोर्व्यपदेशात्, चित्त्वेनाभेदो जीवत्वेन भेदश्च युज्यत इति 'उभयव्यपदेशात्त्वहिकुण्डलवत्' इति सूत्रेण परेतरात्मनोरन्यत्वं स्यादिति पूर्वप्राप्तशङ्कायाः स्वमतेन प्रकाशादि[1]वच्चेत्यादिनोक्तसमाधानस्य दार्ढ्याय परमतेन समाधानमुच्यत इति व्याख्याय 'प्रकाशाश्रयवद् वा तेजस्त्वात्' (ब्र.सू. ३-२-२९) इत्यनेनापि सूत्रेण[2] वा प्रकाशाश्रयत्वं प्रतिपत्तव्यं सौरालोकतदाश्रयसूर्यवत्, तेजस्त्वाविशेषात्। जीवपरमात्मानावत्यन्ताभिन्नावेवेति परमतेनैव समाधानान्तरमुच्यत इति व्याख्याय 'पूर्ववद् वा' (ब्र.सू. ३.२.३०) इति सूत्रेण यथा पूर्वमुपन्यस्तं 'प्रकाशादिवच्चा[3]वैशेष्यम्' इति तथैवैतद् भवितुमर्हतीति स्वमतमुपन्यस्य 'नान्योऽतोऽस्ति द्रष्टा' (बृ.उ. ३.७.२३) 'नेति नेति' इत्यादिना परस्याऽत्मनोऽन्यस्य चेतनस्य प्रतिषेधाद् वाऽयमेव सिद्धान्त इति 'प्रतिषेधाच्च' इत्यन्तं सूत्रचतुष्टयं व्याख्यातम्।

तन्निरासः

तत्र भेदाभेदयोः प्रतियोग्यनुयोगिभावेन विरोधस्य स्फुटत्वात्, दृष्टान्तमात्रस्यासाधकत्वाच्च भेदाभेदमतमनुपपन्नमेवेति तन्मतेन समाधानकथनपरतया सूत्रव्याख्यानेन सूत्रकृदचातुर्यमेव प्रकटितमिति सूत्रकृद्द्रोहस्तवाऽपद्यत एव।

ननु चित्त्वेनाभेदो जीवत्वेन भेदोऽहित्वकुण्डलत्वाभ्यामिव प्रतियोगितावच्छेदकभेदाद् भेदाभेदयोरविरोध इति चेन्न। अहित्वकुण्डलत्वयोरुभयोरपि

१. म. प्रकाशवच्च। २. म. 'न' इत्यधिकपाठः। ३. म. प्रकाशवच्च।

सत्त्वेन तदवच्छिन्नभेदाभेदयोरविरोधेऽपीह चित्त्वजीवत्वयोः स्वाभाविकत्वाभावेन विरोधापरिहारात्। अत एव 'प्रकाशाश्रयवद् वा तेजस्त्वात्' (ब्र.सू. ३.२.२९) इति सूत्रव्याख्यानमप्ययुक्तम्। पूर्वमताद् भेदाभावाच्च।

अहिकुण्डलसूत्रप्रकाशाश्रयसूत्रयोः पुनरुक्तिपरिहारः भामत्यां न समञ्जसः

ननु प्रतियोगितावच्छेदकभेदाद् भेदाभेदयोरविरोधमाश्रित्य पूर्वमतं प्रवृत्तम्। द्वितीयं तु सर्वभेदाभेदयोः सहैवोपलम्भाद् भेदाभावेऽपि सवितृप्रकाशयोरिव विरोधो नास्तीति मतमवलम्ब्योच्यते। नच सर्वत्राप्येवं समाधानसम्भवेन विरुद्धमिति नः क्व सम्प्रत्यय इति वाच्यम्। न यत्प्रमाणेनोभयमुपलभ्यते तत्रैव विरुद्धमिति सम्प्रत्ययो भविष्यति स्थाणुत्वपुरुषत्वयोरिव। आगमतश्च इहैकगोचरावपि भेदाभेदौ न विरोधमावहतः सवितृप्रकाशयोरिव प्रत्यक्षप्रमाणादिति प्रकारान्तरेण भेदाभेदयोरविरोध उच्यत इति भेदाभेदावलम्बनेऽप्यस्य मतस्य न पुनरुक्तिरिति चेन्न। त्वद्रीत्या सर्ववेदान्तानामभेदमात्रपरत्वेन मद्रीत्या भेदमात्रपरत्वेन च भेदाभेदपरागमस्यैवासिद्धेः। अभेदागमस्यान्यत्र निरस्तत्वाच्च। सवितृप्रकाशयोरत्यन्ताभेदेऽपि भेदप्रतिनिधिविशेषबलात् पटशौक्ल्ययोरिव भेदव्यवहारमात्रमवलम्ब्यैव द्वितीयं मतं प्रवृत्तमिति तस्य परमतत्वेनोपन्यासायोगाच्च। अत एव 'पूर्ववद्वा' इत्यस्य स्वमतोपन्यासपरत्वेन व्याख्यानं च प्रत्युक्तम्। 'प्रकाशवच्चावैशेष्यम्' (ब्र.सू. ३.२.२५) इति सूत्रप्रमेयस्य स्वमतत्वेनेह पुनस्तदुपन्यासे प्रयोजनादर्शनाच्च। उत्तरयोः परमतत्वख्यापकवाशब्दादियोगेनैव पूर्वस्य स्वमतत्वसिद्धेः। स्वपरमतयोः साधकबाधकयोरिहानुपन्यासाच्च।

भामत्यां भेदाभेदपक्षदूषणम्

अत्रोक्तं वाचस्पतिना- यस्य मतमेकस्यैव वस्तुनोऽहित्वेनाभेदः कुण्डलत्वादिरूपेण भेद इति स एवं ब्रुवाणः प्रष्टव्यो जायते। किमहित्वकुण्डलत्वे धर्मिणो

भिन्ने उताभिन्ने। नाऽद्यः। तद्वतोरहिकुण्डलयोः परस्परं भिन्नघटत्वपटत्वाश्रययोरिव भेदप्राप्त्याऽहित्वेनाभेदः कुण्डलत्वेन भेद इति व्यवस्थायोगात्। अन्यथा घटपटयोरपि भेदाभेदापत्तिः। न द्वितीयः। तथा सति को भेदाभेदयोर्विषयभेदः? तयोर्वस्तुतोऽनन्यत्वेनाभेदात्। अतो विषयभेदेनाविरोध इति न पूर्वमतं युक्तम्। नाप्युत्तरं मतम्। सदाऽनुभूयमानत्वात् तयोरविरोध इति मतं युज्यते। स्वरूपविरुद्धयोरप्येवमविरोधे क नाम विरोधो व्यवतिष्ठते? नच सदाऽनुभूयमानमपि विचारसहभाविकं भवितुमर्हति। देहात्मभावस्य सर्वानुभूयमानस्य भाविकत्वप्रसङ्गादिति चेन्न।

तद्दूषणम्

एवमपि स्वपक्षसाधकस्यानुपन्यासात्। प्राज्ञपरयोरभेदाभ्यासः साधक उपन्यस्त इति चेन्न। 'नचाभेदे कश्चिदागमः', 'सन्ति च भेदे सर्वागमाः' (वि.त.नि.) इति सप्रतिज्ञमन्यत्र निराकृतत्वात्।

'पूर्ववद् वा' (ब्र.सू. ३.२.३०) इति सूत्रं च व्यर्थमेव। अयुक्तं च परपक्षदूषणम्। धर्मिणाऽत्यन्ताभिन्नमहित्वं, कुण्डलत्वं तु भिन्नमित्युक्तावहित्वकुण्डलत्वे भिन्ने उताभिन्ने इति विकल्प्य दूषणानवकाशात्। नहि धर्मी सर्वेणापि धर्मेण भिन्न एवाभिन्न एवेति वाऽस्ति नियमः।

एवं द्वितीयमतदूषणमप्ययुक्तम्। तेन हि प्रमाणेन सहोपलब्धयोरन्यत्र विरुद्धत्वेन प्रतीयमानयोरपि सहानवस्थितिरिति नियतत्वगर्भविरुद्धत्वं नास्तीत्युक्तम्। त्वया तु देहात्मभावस्य सदाऽनुभूयमानस्य सत्त्वप्रसङ्ग इत्युच्यते। ततश्च किं केन सङ्गतम्? नहि देहात्मभावः केनचित् प्रमाणेनोपलभ्यते। किन्तु दोषादेवेति हि सर्वसम्प्रतिपत्तिः। जीवपरमात्मनोर्भेदाभेदौ तु तदुभयप्रतिपादकागमान्यथानुपपत्तिरूपप्रमाणेनैव प्रमिताविति हि तेनैवोक्तम्। विचारा-

सहत्वं त्वप्रयोजकमेव। अन्यथा 'अणोरणीयान्महतो महीयान्' (कठ.उ. २.२०, म.ना.उ. ८.१) इत्याद्यागमप्रतिपादितयोरप्यणुत्वमहत्त्वयोर्विचारासहत्वात्। न चाणुत्वमौपाधिकं महत्त्वं तु स्वाभाविकमिति विचारसहत्वमस्तीति वाच्यम्। वैपरीत्यस्यापि सम्भवात्। तन्मतेऽप्यात्मनः व्यापकत्वात्मकस्य महत्त्वस्य स्वाभाविकत्वेऽपि स्थौल्यादिरूपस्य तदभावाच्च। 'प्रतिषेधाच्च' इति सूत्रव्याख्यानं तु 'नेति नेति' इत्याद्यसकृदुदाहृतश्रुतिविषयत्वात् पुनरुक्तमित्युपेक्षणीयम्।

तस्माद् बहूनां सूत्राणां व्याख्यानव्याजतो भृशम्।
अयुक्तत्वमसाङ्गत्यं निष्फलत्वं च साधितम्॥ इति।

रामानुजाभ्युपगतोभयव्यपदेशाधिकरणस्वरूपम्

केचित्तु 'उभयव्यपदेशात् त्वहिकुण्डलवत्' इत्यारभ्य 'प्रतिषेधाच्च' इत्यन्तं सूत्रचतुष्टयमेकमधिकरणं विधाय व्याचक्षते- 'द्वे वाव ब्रह्मणो रूपे' इत्यादिनोपदिष्टम् अचिद्वस्तुनो ब्रह्मरूपत्वं किं ब्रह्मस्वरूपस्यैवाचिद्रूपेण परिणामाद् भवति, उत परस्मिन् ब्रह्मणि मूर्तामूर्तात्मके जडे चैकजातियोगाद् भवति, अथ जीववद् ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनेति संशयः। 'ब्रह्मैवेदं सर्वम्' (नृसिंह.उ. ७.३), 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२), इति, 'हन्ताहमिमास्तिस्रो देवताः', 'अनेन जीवेनाऽत्मनाऽनुप्रविश्य' (छा.उ. ६.३.२) इति च भिन्नत्वाभिन्नत्वरूपोभयव्यपदेशोपपत्तये ब्रह्मैवाचिद्रूपेण परिणतं, यथाऽहिरेव कुण्डलाद्याकारेण परिणमत इति प्रथमः पक्षः। तथा सति ब्रह्मणो निर्दोषता बाध्येतेति सौरप्रकाशस्य तेजस्त्वजातियोगात् तेजोरूपेण सवित्रादिनाऽभेदाद् यथा तेजोरूपत्वं तथा सद्ब्रह्मणोऽपि सत्त्वरूपजातियोगेनाभेदात् सद्रूपत्वमिति द्वितीयः पक्षः। एवं सति 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२), 'ब्रह्मैवेदं सर्वम्' (नृसिंह.उ. ७.३) इति ब्रह्मस्वरूपस्यैव सर्वशब्दवाच्यत्वव्यपदेशबाधः स्यात्। नहि

सद्व्यक्तिविशेषरूपं ब्रह्म सद्व्यक्तिविशेषमूर्तामूर्तवाचकशब्दवाच्यं भवितुमर्हति। तथा सति द्रव्यत्वजातियोगेनैव घटव्यक्तिः द्रव्यशब्देनेव पटादिद्रव्यव्यक्त्यन्तरवाचकपटादिशब्दैस्तथैवैव गोव्यक्तिः खण्डो गौः मुण्डो गौः-इत्यादिसर्वगोव्यक्तिवाचिशब्दैरभिधीयेत। अतो जीवस्येव ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनाचिद्वस्तुनोऽपि ब्रह्मांशत्वमिति राद्धान्त इति।

विशिष्टाद्वैतमते एतदधिकरणस्य पादासङ्गतिः, चारितार्थ्यं, पूर्वपक्षदौर्बल्यं च

तन्न। साधनाध्याये भक्तिपादे चास्य सङ्गत्यभावात्। अत एव 'तस्याचिद्वस्तुनो ब्रह्मस्वरूपत्वप्रकारश्चिन्त्यते, ब्रह्मणो निर्दोषत्वसिद्ध्यर्थम्' इति भाष्योक्तं निरस्तम्। 'प्रकाशादिवन्नैवं परः' इत्यादिनैव चारितार्थ्याच्च। ब्रह्मोपादेयत्वेन जडस्य ब्रह्मानन्यत्वेन ब्रह्मस्वरूपत्वस्य च 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'(ब्र.सू. १-४-२४), 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू. २-१-१५) इत्यादावेवोक्तत्वाच्च। ''इह स्थाप्यमानं विशेषणविशेष्यभावमङ्गीकृत्य 'प्रकृतिश्च' (ब्र.सू. १.४.२४), 'तदनन्यत्वमारम्भण' (ब्र.सू. २.१.१५) इत्यादौ सूक्ष्मचिदचिद्वस्तुविशिष्टाद् ब्रह्मणः स्थूलचिदचिद्विशिष्टस्योत्पत्तिरनन्यत्वं चोक्तम्'' इति भाष्योक्तं समाधानं त्वगतिकागतिः। भिन्नस्य जडस्य विशेषणत्वरूपांशत्वेन ब्रह्मस्वरूपत्वस्य च, भिन्नस्यापि जीवस्य विशेषणत्वरूपांशत्वेन ब्रह्मस्वरूपत्वप्रतिपादनपरेण 'अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके'(ब्र.सू २.३.४२) इति द्वितीयनयेनैव[१] सिद्धेश्च। नहि न्यायसाम्ये विषयभेदमात्रेणाधिकरणान्तरारम्भो युक्तः। एतेन 'तत्र जीवब्रह्मणोरंशांशिभाव उक्तः। इह त्वचित्प्रपञ्चब्रह्मणोः' इति श्रुतप्रकाशिकोक्तं निरस्तम्। चेतनस्य जडात्मना परिणामस्य काप्यदर्शनेनैकजातियोगेन तत्स्वरूपत्वे सत्ताजातियोगेन वस्त्वन्तराभेदस्य सर्वसाधारण्येन पूर्वपक्षयोरत्यन्तदुर्बलत्वाच्च।

१. 'द्वितीयाध्यायनयेनैव' इति पाठेन भाव्यमिति भाति।

सिद्धान्तोऽप्ययुक्तः

सिद्धान्तोऽपि किं प्रपञ्चब्रह्मणोर्भेदमङ्गीकृत्य प्रवर्तते, उताभेदं, अथोभयम्। नाऽद्यः। 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२), 'ब्रह्मैवेदं सर्वम्' (नृसिंह.उ. ७.३) इत्यभेदश्रुतिविरोधात्। न द्वितीयः। 'हन्ताहमिमास्तिस्रो देवताः' इत्यादिभेदश्रुतिविरोधात्। नान्त्यः। भेदाभेदयोः परस्परं विरोधात्। पूर्वोक्तपक्षद्वयदूषणप्रसङ्गाच्च।

जगतः ब्रह्मांशत्वस्य ब्रह्मैकदेशरूपत्वेऽनुपपत्तयः

ननु ब्रह्मजगतोरंशांशिभावाङ्गीकारेणांशांशिनोश्च पटतदंशयोर्भेदाभेदौ यथा तथेहापीति चेत्, तर्हि पटैकदेशे पटत्वस्येव ब्रह्मैकदेशे प्रपञ्चेऽपि ब्रह्मत्वजातेस्सत्त्वापत्तिः। न चेष्टापत्तिः। तस्यापि जगत्कारणत्वाद्यापत्तेः। सत्त्वमात्रमेव ब्रह्मत्वं नतु जगत्कारणत्वसमनियतम्। तथाच तन्तूपादेयत्वात् पटैकदेशस्य पटत्ववत्त्वेऽपि आतानवितानात्मत्वविशेषसमनियतपटत्वस्याभाववद् ब्रह्मांशे प्रपञ्चे सत्त्वसमनियतस्य ब्रह्मत्वस्य सद्भावेऽपि जगत्कारणत्वसमनियतस्याभाव इति चेन्न। पटैकदेशे पटव्यवहारवत् प्रपञ्चे ब्रह्मव्यवहारादर्शनात्। 'ब्रह्मैवेदं सर्वम्' (नृसिंह.उ. ७.३) इति व्यवहारस्तु गौण्यादिना सावकाशः। अन्यथा सिंहमाणवकयोरप्यंशांशिभावमुपेत्य क्रौर्यादिसमनियतसिंहत्वस्य माणवकेऽपि सम्भवेन व्यवहारस्य मुख्यत्वोपपत्तौ गौण्यादिवृत्त्यन्तरोच्छेदप्रसङ्गः।

ब्रह्मविशेषणत्वमेव जगतो ब्रह्मांशत्वमित्याशयनिरासः

नन्वंशत्वं नैकदेशत्वं येनोक्तदोषः स्यात्। किन्तु विशेषणत्वम्। तत्त्वं च प्रपञ्चस्य 'यस्य पृथिवी शरीरम्' (बृह.उ. ३.७.३, सु.उ. ७.१), 'यस्याऽत्मा शरीरम्' इत्यादिश्रुत्या शरीरत्वमेव। तथाच 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२) इत्याद्यभेदव्यवहारो मुख्य एव। विशेषणविशेष्ययोः स्वरूप-

स्वभावभेदो दण्डपुरुषयोर्दृष्ट इति भेदव्यवहारोऽपि मुख्य एवेति चेन्न। विशिष्टं विशेषणविशेष्यतत्सम्बन्धातिरिक्तमिति मतावलम्बनेनेत्थमुच्यते, उत तत्स्वरूपमिति मतावलम्बनेन। नाऽद्यः। विशिष्टं विशेषणोपादानकं, विशेष्योपादानकं, उभयोपादानकमिति पक्षत्रयेऽपि विशेषणादीनां विशिष्टाभेदसम्भवेऽपि विशेषणविशेष्ययोरभेदाप्रसक्त्या 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२) इत्यादिविशेष्याभेदव्यवहारस्य मुख्यत्वायोगात्। द्वितीये तु विशेषणविशेष्यतत्सम्बन्धात्मकस्यापि विशिष्टस्य केवलविशेष्यरूपत्वाभावेन ब्रह्माभेदव्यवहारस्य मुख्यत्वानुपपत्तिरेव। नच 'ब्रह्मैवेदं सर्वम्' (नृसिंह.उ. ७.३) इत्यत्र प्रपञ्चब्रह्मतत्सम्बन्धात्मकविशिष्टमेव ब्रह्मशब्देनोच्यते न विशेष्यमात्रं, तेन सर्वशब्दोदितचिदचिद्वस्तुनस्तदभेदो मुख्य एवेति वाच्यम्। किं सर्वत्रापि ब्रह्मादिशब्दस्यायमेवार्थः, किं वाऽभेदव्यपदेशस्थस्य। नाऽद्यः। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१), 'यः सर्वज्ञः स सर्ववित्' (मुण्ड.उ. १.१.९, २.२.७), 'यस्याऽत्मा शरीरम्', 'यस्य पृथिवी शरीरम्' (बृह.उ. ३.७.३, सु.उ. ७.१) इत्यादावपि प्रपञ्चविशिष्टपरत्वे प्रपञ्चविशिष्टस्यापरिच्छिन्नत्वादिप्राप्तौ प्रपञ्चस्यापि तदापातेनापरिच्छिन्नत्वादेर्ब्रह्मलक्षणत्वानुपपत्तेः। प्रपञ्चविशिष्टस्य प्रपञ्चशरीरकत्वे दण्डविशिष्टस्य दण्डसम्बन्ध इवाऽत्माश्रयाद्यापत्तेश्च। प्रपञ्चविशिष्टस्यैव सर्वत्र ब्रह्मशब्दार्थत्वे 'द्वा सुपर्णा' (ऋ.सं. २.३.१७) इत्यादिभेदव्यपदेशस्य विशिष्टे द्वित्वाभावेन मुख्यत्वानुपपत्तेश्च। विशिष्टे शक्तिग्राहकप्रमाणाभावात्। अन्यथा घटपदस्यापि स्वेतरविशिष्टवाचित्वापत्त्या स्वविशेषणीभूतानामितरेषां घटपदार्थविशिष्टैकदेशत्वेन वल्मीकादौ घटत्वव्यवहारस्य मुख्यत्वापत्तेः। विशेष्यमात्रवाच्यपि ब्रह्मादिशब्द इह लक्षणया प्रपञ्चविशिष्टपर एवेति चेत्, तर्हि कथमभेदव्यपदेशो मुख्यः स्यात्। अत एव न द्वितीयः। शुक्लः पटः, पटस्य शौक्ल्यमित्यादिव्यवहारदर्शनेन विशेषणविशेष्यभावस्य कामचारित्वेन 'द्वे वाव ब्रह्मणो रूपे' (मैत्र.उ. ६.१५), 'यस्याऽत्मा शरीरम्'

इत्यादौ ब्रह्मणोऽपि विशेषणत्वदर्शनेन तद्विशिष्टस्य प्रपञ्चस्य प्रपञ्चशब्दार्थतापत्तेश्च।

विशेषणत्वं शरीरत्वरूपमित्यप्ययुक्तम्

तच्छरीरत्वमेवेह तद्विशेषणत्वं न त्वन्यत्, तथाच 'यस्य पृथिवी शरीरम्' (बृ.उ. ३.७.३)इत्यादिवद् ब्रह्मणः प्रपञ्चशरीरत्वे प्रमाणं नास्ति। तेन चिदचिच्छरीरकं ब्रह्मेति पर्यवस्यतीति चेत्, तर्हि किमिदं प्रपञ्चस्य ब्रह्म प्रति शरीरत्वम्? भोगायतनत्वमिति चेत्, तद्धि भोगावच्छेदकत्वम्। नहि ब्रह्मणः पृथिव्यादिना भोगोऽवच्छिद्यते तदन्यत्र भोगाभावप्रसङ्गात्। तत्कृतदुःखादिभोगप्रसङ्गेन निर्दोषित्वहानेश्च। तदाश्रयत्वं तच्छरीरत्वमिति चेन्न। देवदत्ताधारभूतलादेरपि तच्छरीरत्वापत्तेः। 'यस्मिन् द्यौः पृथिवी च' (मुण्ड.उ. २.२५) इत्यादिना पृथिव्याद्याश्रयत्वाद् ब्रह्मणः पृथिव्यादिकं प्रति शरीरत्वापाताच्च। विस्तरस्तु 'नाना व्यपदेशात्' इत्यत्र केषाञ्चिन्मतदूषणावसरे द्रष्टव्यः। शरीरत्वविशेषणत्वयोर्देवदत्तादिकं प्रति विशेषणीभूते दण्डादौ शरीरत्वाभावेन 'देवदत्तस्य शरीरम्' इत्यादौ विशेषणत्वाभावेन च परस्परपरिहारेण वर्तमानयोः परस्परात्मत्वानुपपत्तेश्च। अपृथक्सिद्धविशेषणत्वं शरीरत्वं न व्यभिचरति। दण्डादेश्च देवदत्तादिना पृथक् सिद्धेः। [1]शरीरत्वव्याप्त्यभावेऽप्यपृथक्सिद्धानि विशेषणानि तत्सहचरितान्येव। ब्रह्मणश्च मूर्तामूर्तादीनि घटादेर्मृदादीनि वा न पृथक् सिद्धानि। नहि तानि दण्डादीनि पुरुषमिव ब्रह्मापहाय वर्तन्ते। अन्तर्याम्यधिकरणविरोधादिति चेन्मैवम्। मृदादेरपृथक्सिद्धविशेषणस्यापि घटादिकं प्रति शरीरत्वादर्शनात्। ब्रह्मणोऽप्युक्तरीत्या प्रपञ्चं प्रत्यपृथक्सिद्धविशेषणत्वसम्भवेन शरीरत्वापाताच्च। अत एव सूत्राणां तदीययोजना अपि

१. 'तथा च विशेषणत्वमात्रस्य शरीरत्वव्याप्त्यभावेऽपि' इति पाठेन भाव्यमिति भाति।

निरस्ताः। 'प्रतिषेधाच्च'(ब्र.सू. ३.२.३१) इत्यन्तिमसूत्रव्याख्यानं तु दोषप्रतिषेधस्य बहुधा प्रतिपादितत्वेन पुनरुक्तम्। तदेवं परकीयव्याख्यानमपपाठादिग्रस्तमसाम्प्रदायकं चेत्युपेक्ष्य सर्वज्ञमुनिकृतव्याख्यानमेव दोषगन्धविधुरमिति सिद्धम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- 'स्वरूपेणाऽनन्दादिना कथमानन्दित्वादिः' इति भाष्यरीत्याऽऽनन्दित्वस्य, 'न च गुणानां गुणिस्वरूपत्वं विरुद्धम्' इति विवरणरीत्या गुणात्मकत्वस्य प्रतिपाद्यता चात्र प्रतीयते। किमत्र तत्त्वमिति जिज्ञासायामाह- **तस्य गुणित्वसमर्थनादिति**॥ नियामकमाह- **गुणित्वाभाव इति**॥ गुणात्मकत्वाभावस्य भक्तिप्रतिबन्धकत्वादिति भावः। यवागून्यायेन 'कथमानन्दित्वादिः' इति भाष्यमाक्षेपपरतया व्याचष्टे- **नचाऽनन्दित्वादिकमङ्गीकर्तुं शक्यमिति**॥ स्वरूपेणेत्यादिहेतुगर्भविशेषणतात्पर्यमाह- **आनन्दादीनां तत्स्वरूपत्वाभ्युपगमादिति**॥ तत्रासिद्धिं स्वयमेव निराह- **अन्यथा समवायेति**॥ आनन्दादीनां तत्स्वरूपत्वं यदि सिद्धान्तस्तर्हि धर्मिस्वरूपातिरिक्तत्वाभावात् समवायस्य च सम्बन्धस्य सम्बन्धिद्वयसापेक्षत्वादनवस्थानाच्च न समवायोऽङ्गीकार्य इत्यादितन्निराकरणं द्वितीये न स्यादित्यर्थः। भगवान् नाऽनन्दित्वेनाङ्गीकर्तुं शक्यः। आनन्दात्मकत्वेनाभ्युपगतत्वादित्याद्युक्तिविरुद्धत्वाद् भगवत आनन्दित्वादिकं कथम्? न कथमपीति समुदायार्थः।

ननु विमतो नाऽनन्दी आनन्दात्मकत्वादित्येव यथाभाष्यं प्रयोगो युक्तः। मैवम्। तथा सति तार्किको ब्रूयाद्धेतोरसिद्धिरिति। टीकारीत्या तु भगवत आनन्दात्मकत्वाभ्युपगन्तारं प्रत्येवेदमुच्यते। त्वं तु तूष्णीमास्वेति सूच्यते। सति चैवं विशिष्टस्य हेतुत्वे भ्रान्तेन रजतत्वेनाभ्युपगतस्यापि पुरोवर्तिनः शुक्तित्वमिव ब्रह्मण आनन्दित्वादिकं किं न स्यादित्यतः प्रतिज्ञायामपि

विशेषणमावश्यकम्। तार्किकः प्रागेव व्यावर्तितः। सिद्धान्ती तु स्वस्याभ्रान्तत्वं मन्यते। स कथं स्वसिद्धान्तविरुद्धमानन्दित्वादिकमङ्गीकुर्यादिति भावसूचनाय शक्तिपर्यन्तं प्रयोगो युक्तः।

टीकायां विलोमताख्यपूर्वपक्षन्यायविवरणव्याख्यानम्

'विलोमता' इत्युक्तन्यायं सम्बन्धिप्रदर्शनपूर्वकं विवृण्वत् **'नच गुणानां गुणिस्वरूपत्वं विरुद्धम्'** (न्या.वि.) इति वाक्यं गुणिस्वरूपत्वप्रतिक्षेपकं प्रतीयते। तत्तु नोपयुक्तमधिकं चेत्यतो भाष्याभिमते प्रयोगेऽप्रयोजकताऽनेन निराक्रियत इति मन्वानोऽवतारयति- **अथापि गुणित्वाङ्गीकार इति**॥ हेतूच्छित्तिरूपतर्कसमर्पकतया विवरणं नानुपयुक्तं नाप्यधिकमिति भावः। विवरणोक्तगुणगुणिशब्दावानन्दज्ञानादेरानन्दिज्ञान्यादेश्च वाचकाविति भाष्ये विवृतम्।

टीकायां निदर्शनाख्यसिद्धान्तन्यायविवरणव्याख्यानम्

निदर्शनन्यायं सम्बन्धिप्रदर्शनेन विवृण्वत् **'कालादिदृष्टान्तात्'** (न्या.वि.) इति वाक्यं भाष्येण सहैव तात्पर्यतो व्याख्यातुमवतारयति- **ननु श्रौतमपीति**॥ सूक्ष्ममतीनां प्राधान्याद् व्युत्क्रमेण कालादीत्युक्तं विवरण इति द्रष्टव्यम्।

सङ्क्षेपभाष्ये एतदधिकरणार्थोक्तिः

'सर्वरूपेष्वभेदवान्' इति सङ्क्षेपभाष्ये सप्तमीमहिम्नैवाऽनन्दित्वादिकमपि तात्पर्यं प्रतिपादितं वेदितव्यम्।

॥ इत्यहिकुण्डलाधिकरणम्॥ १९॥

॥ अथ परानन्दाधिकरणम् ॥ १६ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ ॥
॥ ३-२-३२ ॥

नचाऽनन्दादित्वाल्लोकानन्दादिवत् । 'एष सेतुर्विधृतिः' (छा.उ.८-४-१), 'य एष आनन्दः परस्य', 'एष नित्यो महिमा ब्राह्मणस्य' (बृ.उ.६-४-२३) इति सेतुत्वं ह्युच्यते । 'यतो वाचो निवर्तन्ते' (तै.उ.२-४)इत्युन्मानत्वम् । 'एतस्यैवाऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ.उ.६-३-३२) इति सम्बन्धः ।

'अन्यज्ज्ञानं तु जीवानामन्यज्ज्ञानं परस्य च ।
नित्यानन्दाव्ययं पूर्णं परज्ञानं विधीयते ॥' इति भेदः ।

अतो लौकिकत्वात् परमेव ब्रह्मानन्दादिकम् ॥३२॥

॥ ॐ दर्शनात्[1] ॐ ॥ ३- २- ३३ ॥

दर्शनादेव चान्यानन्दादीनाम् । 'अदृष्टमव्यवहार्यमव्यपदेश्यं सुखं ज्ञानमोजो बलमिति ब्रह्मणस्तस्माद् ब्रह्मेत्याचक्षते तस्माद् ब्रह्मेत्याचक्षते' इति कौण्डिन्यश्रुतिः[2] ॥ ३३ ॥

अप्रसिद्धस्य कथम् 'आनन्दः' इत्यादिव्यपदेश इत्यतो वक्ति -

ॐ बुद्ध्यर्थः पादवत् ॐ ॥ ३- २- ३४ ॥

१. हृ. दर्शनात्तु । २. हृ. इति हि कौण्डिन्यश्रुतिः ।

जीवेश्वरसम्बन्धज्ञापनार्थमप्रसिद्धोऽपि पादो यथा पादशब्देन व्यपदिश्यते 'पादोऽस्य विश्वा भूतानि' (ऋ.सं.१०.९०.३, चित्सु.१२.२) इति तथा ।

अलौकिकोऽपि ज्ञानादिस्तच्छब्दैरेव भण्यते ।
ज्ञापनार्थाय लोकस्य यथा राजेव देवराट्' ॥

इति पाद्मे[1] ॥ ३४ ॥

॥ इति परानन्दाधिकरणम् ॥ अ.१६ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्रेश्वरप्राप्तिसाधनभक्त्यर्थं तद्गुणानां लोकविलक्षणत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । लौकिकत्वे न तत्र निरतिशया भक्तिः स्यात् । अतस्तत् समर्थनीयम् । प्रकृतं भगवद्गुणजातं विषयः । लौकिकमलौकिकं वेति सन्देहः । उभयथाऽपि सम्भावना सन्देहबीजम् ।

पूर्वपक्षः

लोकसदृशमिति पूर्वः पक्षः । आनन्दादिशब्दवाच्यत्वात् । अन्यथा 'आनन्दं ब्रह्मणो विद्वान्' (तै.उ.२) इत्यादिप्रयोगस्तत्र न स्यात् । नहि घटविलक्षणार्थे घटपदं युज्यते ।अस्ति च प्रयोगः ।अतो लोकानन्दादिवदीश्वरानन्दादीति न तत्रातिशयेन भक्तिर्युक्तेति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **परमिति** ॥ न ब्रह्मानन्दादिकं तच्छब्दवाच्यत्वाल्लौकिकं, किन्त्वतो लौकिकानन्दादेः परं विलक्षणमेव ।

१.हृ. इति च पाद्मे ।

कस्मात् ? लोकानन्दादावसम्भावितसेतून्मानत्वादेर्वैलक्षण्यस्य व्यपदेशादिति भावः। **उन्मानत्वं** पूर्णत्वम्। **मात्रां** तत्प्रतिबिम्बांशम्। **सम्बन्धो** बिम्बप्रतिबिम्बभावः। **अन्यद्** विलक्षणम्।अलौकिकत्वात् परमिति प्रकारिप्रकारदर्शनेन व्याख्यानमेव।अलौकिकत्वावगमादिति वा।अथवा नचेति पूर्वपक्षं प्रतिषिध्य एष इति सौत्रहेतून् व्याख्यायातः परमिति प्रतिज्ञा व्याख्यायते। तत्रात इत्यनुवादेन लौकिकत्वादिति व्याख्यानम्। **लौकिकत्वात् परमिति** अलौकिकमित्यर्थः॥ ३२॥

हेत्वन्तरेणाऽनन्दादेरलौकिकत्वसमर्थनम्

हेत्वन्तरेणाऽनन्दादेरलौकिकत्वं समर्थयत् सूत्रमुपन्यस्य व्याचष्टे- **दर्शनादिति ॥** मनोवाग्गोचरत्वादित्यर्थः। तथाऽपि कथमलौकिकत्वं ब्रह्मानन्दादेरित्यत आह- **अदृष्टमिति ॥** व्यवहारो वाचा। व्यपदेशो विविक्ततया निरूपणम्॥ ३३॥

अलौकिकेऽप्यानन्दादौ पाददृष्टान्तेन तत्पदप्रयोगसमर्थनम्

नन्वेवमानन्दादेरलौकिकत्वात् कथं श्रुतिपुराणादिष्वानन्दादिप्रयोग इत्याशङ्क्य तत्परिहाराय सूत्रमवतार्य व्याचष्टे- अप्रसिद्धस्येति ॥ यथा खलु प्रसिद्धचरणविलक्षणे मूर्तित्रयविलक्षणे च भूतपादे 'पादोऽस्य विश्वा भूतानि' (ऋ.सं.१०.९०.३, चित्तु. १२.२) इति पादपदं प्रयुज्यते, यथा पुरुषपादस्य तदंशत्वं तथा भूतानामिति जीवेशयोरंशांशित्वसम्बन्धज्ञापनार्थम्। ज्ञातांशभावस्तु भेदश्रुतिपर्यालोचनया भिन्नांशत्वं प्रत्येति। तथा लोकविलक्षणेऽप्यानन्दादौ तत्पदप्रयोगो युज्यते। तस्यानुकूलवेद्यत्वादिज्ञापनार्थत्वात्। अन्यथा तत्प्रत्यायनोपायाभावात्। ज्ञाततावन्मात्रस्य श्रुत्यन्तरबलेनालौकिकत्वबुद्धिश्च भवतीति भावः। अत्र स्मृतिं चाऽह- अलौकिकोऽपीति ॥

उक्तं चान्यत्र - 'आनन्दो नेदृशानन्द इत्युक्ते लोकतः परम्।
प्रतिभाति नचाऽभाति यथावद् दर्शनं विना॥' इति।

व्युत्पत्तिश्च सौवर्णघटे घटशब्दस्येव किञ्चित्सादृश्येनैवोपपद्यते। अतोऽलौकिकगुणे हरौ कर्तव्या भक्तिरिति सिद्धम्॥ ३४॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॐ ॥
॥ ३-२ ३३ ॥

एतदधिकरणप्रतिपाद्यविषयः सङ्गतिश्च

अत्र भगवदानन्दादीनां सर्वोत्कृष्टत्वं प्रतिपाद्यते। तस्यैव निरतिशयमाहात्म्यरूपत्वात्। लोकवैलक्षण्यस्य तत्सादृश्याभावमात्ररूपस्य जीवतत्साधारण्येन तत्प्रतिपादनस्य भक्तावनुपयोगात्। उक्तं च तत्त्वप्रदीपे - 'सर्वस्मादुत्तममेव ब्रह्मानन्दादिकम्' इति। अत एवात्र 'भक्त्यर्थं तद्गुणानां [1]लोकविलक्षणत्वसमर्थनात्' इति टीकाऽपि न तन्मात्रपर्यवसिता, किन्तु तद्गुणानामुत्कृष्टत्वसिद्धये लोकविलक्षणत्वसमर्थनादिति वाक्यवृत्तिमाश्रित्योत्कृष्टत्वपर्यन्ता व्याख्येया। अवान्तरप्रमेयस्यालौकिकत्वस्य[2] प्रधानप्रमेयस्योत्कृष्टत्वस्य चाभावः भक्त्युत्पत्तौ प्रतिबन्धकः। लौकिकेऽनुत्कृष्टे च स्तम्भादाविव तदनुपपत्तेः। ततश्च भक्तिप्रतिबन्धकधर्मनिरासात् समर्थनपेटिकासङ्गतिः। तदर्थमेव टीकायां प्रकृता भक्तिरेव विषयः, कर्तव्या न वेति, तदर्थं प्रकृतगुणजातमनुत्कृष्टमुत्कृष्टं वा, तदर्थं च लौकिकमलौकिकं चेति चिन्तनीयमिति संशयवाक्यं योज्यम्। अत एव च 'न तत्रातिशयेन भक्तिर्युक्ता' इति पूर्वपक्षोपसंहारटीकाऽपि पूर्ववत् कैमुत्येन व्याख्येया। अत एव सिद्धान्तोपसंहारटीकायां 'कर्तव्या भक्तिः' इत्येवोक्तम्।

---

१. म. लौकिक। २. म. अलौकिकत्वस्य

ननु पूर्वत्र भगवद्गुणानां निरवकाशयुक्तिसिद्धविशेषबलेनाशेषविरोधानामपाकरणादुभयव्यपदेशान्यथानुपपत्त्या तद्गुणत्वं तत्स्वरूपत्वं च यत् प्रतिपादितं तद् युक्तमेव। इह त्वङ्गीकृतेनापि विशेषेणाऽनन्दादिपदप्रयोगाद्यनुपपत्तिरूपबाधकपरिहारासम्भवाल्लौकिकशब्दवाच्यत्वमलौकिकत्वं च व्यपदिश्यमानमपि नाङ्गीकर्तुं शक्यत इति शङ्कायाः स्थित एवाहिकुण्डलनये प्रवृत्तेरनन्तरसङ्गतिः।

पूर्वपक्षः

तत्र न कर्तव्या भक्तिः भगवति। तस्योत्कृष्टगुणत्वाभावात्। ततश्च- हरिर्न मद्भजनीयः। मदनुत्कृष्टगुणत्वात्। यो मदनुत्कृष्टगुणः स मद्भजनीयो न, यथाऽहं यथा च मच्छिष्यः। नचासिद्धो हेतुः। विमतो मदादिर्लोकोत्कृष्टगुणो न भवति। लोकसदृशगुणत्वात्। यो यत्सदृशगुणः स तदुत्कृष्टगुणो न। यथा ब्रह्मशेषादिसदृशगुणो वायुरुद्रादिः। नचात्रापि हेतुरसिद्धः। अलौकिकत्वे भगवदानन्दादिपदप्रयोगो न स्यात्।

विशेषबलाद्भगवद्गुणेष्वानन्दादिपदप्रयोग इत्ययुक्तम्

ननु तदर्थं लौकिकत्वमुत्कृष्टत्वार्थमलौकिकत्वं चाङ्गीक्रियते। **'अलौकिकास्तस्य शब्दास्तथाऽर्था अलौकिको ह्येष विष्णुः परत्वात्'** (न्या.वि.) इति वचनादलौकिकत्वस्यापि प्रमितत्वात्। नचैकस्मिंस्तदुभयं विरुद्धम्। एकस्मिन्नेव कुण्डलत्वकुण्डलित्वयोरिव, आनन्दत्वानन्दित्वादेरिव विशेषबलेनाङ्गीकारोपपत्तेः। उभयव्यपदेशाविशेषादिति चेन्न। निर्भेदवस्तुनि निरवकाशोभयव्यपदेशे भेदप्रतिनिधिविशेषो घटक इत्युक्तम्। इह त्वानन्दादिपदप्रयोगानुपपत्तेरपरिहार्यत्वात्। पूर्ववदेवोभयस्मिन्नपि प्रमाणभावादिति चेन्न। आनन्दादिश्रुतेरुपचारोपपत्तेः।

लौकिकं चेत् परब्रह्म नोत्कृष्टगुणकं भवेत्।
अलौकिकं यदि पदैरानन्दाद्यैर्न चोच्यताम्॥ इति पूर्वः पक्षः।

भगवदानन्दादावानन्दादिपदप्रयोगस्य न प्रयोजनाभावः

अलौकिकमेव तत्। तथा श्रुतेः। नचाऽनन्दादिपदप्रयोगाद्यनुपपत्तिः। किं प्रयोजनाभावमाशङ्कसे उत व्युत्पत्तिग्रहाभावम्। नाऽद्यः। आनन्दादावानन्दपदप्रयोगेण, ज्ञाने ज्ञानपदप्रयोगेण चानुकूलवेदनीयत्वार्थप्रकाशत्वयोर्ज्ञापनात्। नहि तदिन्द्रियग्राह्यम्। येन तत्र तत्पदप्रयोगमन्तरेणापि तज्ज्ञापयितुं शक्यं स्यात्। लौकिकानन्दादाविवानुकूलवेदनीयत्वादिज्ञापने लौकिकत्वमेवाऽपन्नमिति चेन्न। सान्तत्वसातिशयत्वाद्यभावेनाऽनन्दस्य ज्ञानक्रियाद्यात्मकत्वादिना चालौकिकत्वस्यापि सम्भवात्। नहि सालक्षण्यं कतिपयैरेव धर्मैः, वैलक्षण्यं तु सर्वैर्धर्मैरित्यस्ति नियमः। अन्यथा गवाश्वादेरपि तदभावप्रसङ्गात्। सान्तत्वाद्यभावस्यैवोत्कृष्टत्वोपयोगित्वात्। अनुकूलवेदनीयत्वाद्यभावस्य तत्प्रतिकूलत्वाच्च। भगवद्गुणजातान्तर्गतानुकूलत्वादेरेव लौकिकत्वमापन्नमिति चेन्न। तस्याप्यस्मदीयानन्दगतानुकूलत्वादिधर्मसदृशधर्मसद्भावेनानुकूलपदप्रयोगेऽपि निरुपाधिकत्वादिधर्मान्तरेण तद्वैलक्षण्यस्याप्युपपत्तेः।

आनन्दादिपदानां भगवदानन्दादौ व्युत्पत्तिग्रहाभावोऽपि नास्ति

न द्वितीयः। मदीयानन्दसदृशो भगवदानन्द इति वा, यद्येवमन्योऽप्यनुकूलतया वेदनीयो दृष्टस्तर्हि सोऽप्यानन्दपदवाच्यः प्रतिपत्तव्य इति वा घटादिषु देशकालान्तरेषु घटादिपदानामिव तत्सम्भवात्। न चाऽद्यपक्षे 'सिंहसदृशो माणवकः' इति प्रत्यायकस्य सिंहशब्दस्येवाऽनन्दशब्दस्याऽनन्दे गौणी वृत्तिः, 'आनन्दं ब्रह्मणः' (तै.उ. २.४, शरभ.उ. ५.१८) इत्यादौ सादृश्यघटितवाक्यार्थप्रतीतिश्च स्यादिति वाच्यम्। सादृश्यस्य प्रत्यासत्तिमात्रत्वेन शक्तिग्रहे प्रवेशाभावात्। बुद्ध्यारोहाय तथा प्रतीत्याकारप्रदर्शनमात्रेण तस्य तत्र प्रवेशानभ्युपगमात्। अलौकिकत्वे लौकिकशब्दवाच्यत्वं कथमिति चेन्न। तथा व्याप्त्यभावात्। भावे वाऽलौकिकशब्दवाच्यत्वाङ्गीकारेणास्माकमप्रतिपक्षत्वात्।

अलौकिकशब्दो लोकवेदाधिकरणन्यायविरोधान्नाङ्गीकर्तुमुचित इति चेन्न । स्वरूपोत्तमत्वोत्तमार्थत्वाभ्यामेवाथातःप्रभृतीनां शब्दानां

'सिसृक्षोः परमाद् विष्णोः प्रथमं द्वौ विनिसृतौ ।
ॐकारश्चाथशब्दश्च तस्मात् प्राथमिकौ क्रमात् ।
तथौ प्राणात्मकौ प्रोक्तौ व्याप्तिस्थितिविधायकौ ॥'
(ब्र.सू.भा. उदाहृतप्रमाणम् १.१.१)

इत्यादिना भाष्ये, अग्न्यादिशब्दानां च 'तत्राऽह्यग्रेऽग्निनामकम्' इति ऋग्भाष्ये चालौकिकत्वसमनियतप्राथमिकत्वकथनादलौकिकार्थत्वेनाऽनन्दादिशब्दानामलौकिकत्वस्याङ्गीकार्यत्वात् ।

सर्वेषामपि शब्दानां लौकिकत्वमलौकित्वं च

यद्वा,

'ऋगाद्या अपरा विद्या यदा विष्णोर्न वाचकाः ।
ता एव परमा विद्या यदा विष्णोस्तु वाचकाः ॥' (आथ.भा.)

इति वचनेन सर्वेषामप्यलौकिकविष्णुवाचित्वस्य कण्ठरवेणोक्तत्वादुत्तमार्थत्वं, तत एवालौकिकत्वं च सिद्ध्यति । सर्वेषामप्येवमलौकिकत्वे लौकिकानामर्थानामलौकिकशब्दवाच्यत्वं च कथमिति चेन्न । लौकिकत्वस्याप्याङ्गीकारात् । नचैतद् विरुद्धम् । विवक्षाभेदेन दशाभेदेन चोभयोपपत्तेः । अत एव 'यदा विष्णोर्न वाचकाः', 'यदा विष्णोस्तु वाचकाः' इति प्रतिपत्तृभेदेन दशाभेदोऽप्युक्तः । अन्यथा मन्त्राणां प्रयोगकाले दृष्टार्थत्वं जपकाले तदभावः, स्विष्टकृत्सूक्तवाक्यादीनां होमांशे प्रतिपत्तिकर्मत्वं यागांशे तदभावः, दध्यादीनां च कामनादशायामिन्द्रियसाधनत्वं तदभावे यागमात्रसाधनत्वं, निरुप्तानां व्रीह्यादीनां चन्द्राभ्युदयाभावे प्राकृतदेवतासम्बन्धः तद्भावे तु इन्द्रप्रदात्रादिवैकृतदेवतासम्बन्धः, ससुब्रह्मण्यानां चतुर्णां षोडशर्त्विगपेक्षयाऽन्तरङ्गत्वम्

अपसुब्रह्मण्यापेक्षया बहिरङ्गत्वं, यणादेशस्याऽच्निमित्तकत्वदशायां सावकाशत्वमसंयोगपूर्वकत्वादिनिमित्तकत्वदशायां तदभावः, वृद्धेश्च किन्निमित्तकत्वदशायां किद्बाध्यत्वं तदनिमित्तकत्वदशायां तदबाध्यत्वं, शूद्राशब्दस्य जातिविवक्षायामसाधुत्वं तदभावे तदभावः, भ्रातृव्यशब्दस्य नित्त्वे सपत्नप्रत्यायकत्वं तित्त्वे तदभावः, पूर्वपदप्रकृतिस्वरान्तत्वे बहुव्रीहिस्तदभावे तदभावः, ज्ञानत्वाद्यवच्छिन्ने ज्ञानादावीश्वरीयत्वे नित्यत्वमन्यविषये त्वनित्यत्वं, समवायस्य च घटादौ रूपांशेऽपि सम्बन्धत्वं वाय्वादौ रूपांशेऽपि सम्बन्धत्वाभावः, घटादिरूपकार्यस्य च सूक्ष्ममूलकारणरूपेण सत्त्वं कार्यरूपेणासत्त्वं, सत्यज्ञानादिवाक्यस्य च लक्षितचिन्मात्रविवक्षायां तत्त्वावेदकत्वं विशिष्टविवक्षायामतत्त्वावेदकत्वमित्यादि च न स्यात् । अत एव 'अलौकिकास्तस्य शब्दास्तथाऽर्थाः' इति श्रुत्युदाहरणमपि न्यायविवरणे नासङ्गतम् । लोकवेदाधिकरणं तु लोकवेदार्थयोर्लोक एवार्थे प्रयुक्तशब्दविषयम् ।

अलौकिकमपि स्वर्णघटवद् बोध्यतां पदैः ।
लौकिकैरपि वा शब्दैः लोकबाह्यैरितीक्ष्यताम्[1] ॥

इति सिद्धान्तः ।

सूत्रार्थक्रमो टीकायामेव स्फुटः ।

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु- 'विलोमता' इत्युक्तन्यायमेतदधिकरणसङ्गतत्वेन विवृण्वत् **'नच ब्रह्मानन्दादीनामन्यथात्वादतच्छब्दत्वं तच्छब्दत्वे लोकोपमत्वं चेति विलोमता'** (न्या.वि.) इति वाक्यं, विमतो भगवदानन्दो लौकिकः आनन्दशब्दवाच्यत्वादिति भाष्याभिमतप्रयोगेऽप्रयोजकत्वशङ्कायां, यद्यलौकिकत्वं स्यान्न [2]स्यादानन्दशब्दवाच्यत्वमित्यनिष्टापादनपरं पूर्ववाक्यम्; अस्ति चाऽनन्दशब्द-

---

१. म. इष्यत्वम् । २. म. 'तदा' इत्यधिकः पाठः ।

वाच्यत्वम्, तस्मान्नालौकिकत्वमिति विपर्ययपर्यवसानपरं तच्छब्दत्व इत्याद्युत्तरं वाक्यमिति मन्वानो व्याचष्टे- **अन्यथा 'आनन्दं ब्रह्मणः'** (तै.उ. २.४., शरभ.उ. ५.१८) **इत्यादिना ॥** अनेनात्राप्रयोजकत्वं शङ्कमानेन **अन्यथात्वात्** प्रकृतलौकिकत्वसाध्यान्यथाभूतालौकिकत्वस्याङ्गीकारात्, **अतच्छब्दत्वं** स आनन्दादिः पदविशेषः शब्द्यतेऽनेनेति शब्दः वाचको येषां ते तच्छब्दाः तेषां भावः, आनन्दादिपदवाच्यत्वं न स्यादिति नञ्व्यत्ययाध्याहाराभ्यां पूर्ववाक्यं योज्यम्। न चेष्टापत्तिः। तर्हि तत्र तत्पदप्रयोगो न स्यात्। अस्ति चाऽनन्दं ब्रह्मण इति प्रयोगः। ततस्तत्पदवाच्यत्वमस्ति। ततश्चैवं तच्छब्दवाच्यत्वेऽवश्यमङ्गीकार्ये सति लोकोपमत्वं लोकसदृशत्वमिति तर्कसहायेन भाष्योक्तानुमानेन विलोमता विरुद्धता अलौकिकत्वाङ्गीकारस्येति पुरस्तात् परस्ताच्चाध्याहारेण योज्यमिति सूचितम्। चशब्द उक्तरीत्याऽध्याहारं सूचयतीति ध्येयम्।

यद्वा, आनन्दादीनामलौकिकत्वं वदता वक्तव्यम्। किं तेषामानन्दादिपदवाच्यत्वमस्ति न वेति। नान्त्य इत्याह- **ब्रह्मानन्दादीनामन्यथात्वादतच्छब्दत्वमिति ॥ अन्यथात्वाद्** आनन्दादित्वाद् **अतच्छब्दत्वं**, तेषां शब्द इव शब्दो यस्य, उष्ट्रमुख इति यथा तस्य भावः आनन्दादिवाचकशब्दप्रयोगविषयत्वमिति यावत्। नचेष्टापत्तिः। 'आनन्दं ब्रह्मणः' (तै.उ. २.४.,शरभ.उ.५.१८) इति श्रुतौ प्रयोगदर्शनादिति भावः। नाऽद्य इत्याह- **तच्छब्दत्व इति ॥** विग्रहः पूर्ववदेव। आनन्दादिवाचकशब्दवाच्यत्वे लोकोपमत्वमेव वक्तव्यमेवं विरोध इति।

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

'अलौकिकत्वमाधिक्यम्' इति न्यायमालागतालौकिकत्वन्यायं विषय्युपलक्षणेन विवृण्वत् " **'अलौकिकास्तस्य शब्दास्तथाऽर्था अलौकिको ह्येष विष्णुः परस्तात्। तथाऽपि शब्दा लौकिका अप्यमुष्मिन् प्रवर्तमाना**

अधिकार्थान् वदन्ति ॥' इत्यादिश्रुतिभ्योऽलौकिकत्वावगमात्।"(न्या. वि.) इति वाक्यं व्याचष्टे- **अलौकिकत्वावगमादिति ॥**

भगवतोऽलौकिकत्वेऽस्ति साधकम्

अयं भावः। अलौकिकत्वाङ्गीकारे किं साधकं नास्तीत्युच्यते उत बाधकमस्तीति। नाऽद्यः। विष्णुरलौकिको भवितुमर्हति। सर्वोत्कृष्टत्वात्। तथा तद्धर्म आनन्दादिरलौकिकः। अलौकिकनिष्ठधर्मत्वात् चरुयूपत्वादिवत्। नचैतदनुमानं पूर्वोक्तानुमानबाधितमिति वाच्यम्। 'अलौकिको ह्येष विष्णुः परस्तात्' (न्या.वि.उदाहृता श्रुतिः) इति श्रुत्युक्तत्वेन प्राबल्यात्।

अत एव न द्वितीयः। अलौकिके चरुयूपादौ वाच्यत्वदर्शनेन व्यभिचारात्। लौकिकशब्दवाच्यत्वं हेतूक्रियते चेत्, पक्षीभूतभगवदानन्दादिवाचकशब्दानां चरुयूपादिशब्दवदलौकिकत्वेन हेतोरसिद्धिः। चरुयूपादिशब्दानां लोकेऽप्रयुज्यमानत्वेनालौकिकत्वेऽप्यानन्दादिशब्दानां लोकेऽपि प्रयुज्यमानानां लौकिकत्वमेव युक्तं घटादिशब्दवदिति चेन्न। 'विमता आनन्दादिशब्दा अलौकिकाः अलौकिकार्थप्रतिपादकत्वात् चरुयूपादिशब्दवत्' इत्यनुमानविरोधेन तस्याप्रामाण्यात्। नच विनिगमनाभावः। 'अलौकिकास्तस्य शब्दास्तथाऽर्थाः' इति श्रुत्युक्तत्वेनास्य प्राबल्यात्। लौकिकार्थप्रतिपादकत्वेन न्यायसाम्याल्लौकिकत्वं स्यादिति चेत्। तत्र किं लौकिकत्वमपि स्यादित्यापाद्यते, उत लौकिकत्वमेव स्यादिति। नाऽद्यः। विवक्षाभेदेन दशाभेदेन च प्रतिद्वन्द्विधर्मयोः बहुषु स्थलेषु समावेशस्योक्तत्वेनेष्टत्वात्। न द्वितीयः। लौकिकार्थप्रतिपादकत्वेन लौकिकत्ववदलौकिकार्थप्रतिपादकत्वेनालौकिकत्वस्यापि न्याय्यत्वात्। अथापि लोकवेदाधिकरणन्यायेन शब्दव्यक्तिभेदाभावाल्लौकिकत्वमेवाऽश्रियते। तथाऽपि नानुपपत्तिः। लौकिकानामेव शब्दानामुत्तमार्थप्रतिपादकत्वसम्भवात्। दृष्टं हि

योग्यतावशाद् धनवच्छब्दस्य '[१]कर्षकरातिकुबेरे चोत्तरोत्तरमाधिक्यार्थ[२] प्रतिपादकत्वमिति। ततश्च परत्वाद् विष्णुरलौकिकः। हि यस्माद् विष्णुरलौकिकस्तस्मादेव तस्य विष्णोः अर्था आनन्दादयोऽप्यलौकिकाः। तथाशब्दोऽलौकिका इत्यस्य हीत्यस्यानुकर्षणार्थः। यस्मादप्यर्था अलौकिकास्तस्मादानन्दादयः शब्दा अप्यलौकिकाः।

अथ सर्वे शब्दा लौकिका इति पक्षः तथाऽपि लौकिका अपि शब्दा अमुष्मिन् प्रवर्तमानाश्चेद् धनवद्घटादिशब्दा इवाधिकार्थान् वदन्तीति विवरणोदाहृतश्रुत्यर्थो बोध्यः। अत्र जीवस्वरूपानन्दस्यापि 'युवा स्यात् साधु युवाऽध्यायकः' (तै.उ. २.८) इत्यादिना सावधिकत्वप्रतीतेर्नालौकिकत्वमिति फलितम्।

सङ्क्षेपभाष्ये एतदधिकरणार्थवर्णनम्

'सर्वरूपेष्वभेदवान्' इत्युक्तेर्वाऽऽनन्दादिसर्वधर्मेषु ज्ञानक्रियाद्यभेदवानिति योजनयैतदधिकरणतात्पर्यमप्युक्तं भवति।

॥ इति परानन्दाधिकरणम् ॥ १६ ॥

१. 'कर्षकादौ कुबेरे च' इति पाठेन भाव्यमिति भाति। २. म. अधिकार्थ

॥ अथ स्थानविशेषाधिकरणम् ॥ १७ ॥

॥ सूत्रभाष्यम् ॥

परानन्दमात्रत्वे कथं ब्रह्माद्यानन्दादीनां[१] विशेष इत्यत उच्यते-

॥ ॐ स्थानविशेषात् प्रकाशादिवत् ॐ ॥ ३-२-३५ ॥

यथाऽऽदित्यस्य दर्पणादिस्थानविशेषात् प्रतिबिम्बे विशेष[२] एवमानन्दादेरपि।

'ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च[३]।
प्रतिबिम्बत्वमायाति मध्योच्चादिविशेषतः॥'

इति वाराहे[४] ॥ ३५ ॥

॥ ॐ उपपत्तेश्च ॐ ॥ ३-२-३६ ॥

'ऐश्वर्यात् परमाद् विष्णोर्भक्त्यादीनामनादितः।
ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रता॥'

इति पाद्मे[५] ॥ ३६ ॥

॥ इति स्थानविशेषाधिकरणम् ॥१७॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनभक्त्यर्थं ब्रह्माद्यानन्दादीनां भगवदानन्दादि-

१. ह. ब्रह्माद्यानन्दानाम्। २. ह. प्रतिबिम्बविशेषः।
३. ह. आनन्दः परमस्य च। ४. ह. विभेदत इति च वाराहे।
५. ह. इति हि पाद्मे।

प्रतिबिम्बत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । तदभावे प्रागुक्तालौकिकत्वासम्भवेन भक्त्यतिशयायोगात् तत् समर्थनीयम् । ब्रह्माद्यानन्दादीनां ब्रह्मानन्दादिप्रतिबिम्बत्वमुक्तम् । तद्ब्रह्माद्यानन्दादि विषयः । भगवदानन्दादिप्रतिबिम्बं न वेति सन्देहः । उक्तेर्द्वैविध्यदर्शनं सन्देहबीजम् ।

पूर्वपक्षः

पूर्वपक्षयति- **परेति** ॥ नान्यानन्दादयो भगवदानन्दादिप्रतिबिम्बभूताः । तथात्वे मिथो वैचित्र्यायोगात् । मिथो विचित्राणामपि तत्प्रतिबिम्बत्वे भगवदानन्दादौ वैचित्र्यं स्यात् । तथाच भगवद्रूपेषु गुणतारतम्यं स्यादिति न तत्र भक्तिर्युक्ता । नचादृष्टादिनियमेन वैचित्र्यम् । स्वाभाविकानन्दादेरादिमत्कारणानुपपत्तेः । अतोऽलौकिकत्वाभावान्न भगवति निरतिशया भक्तिर्युक्तेति भावः ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत इति** ॥ भवत्यन्यानन्दादीश्वरानन्दादिप्रतिबिम्बभूतं, न तावता वैचित्र्यानुपपत्तिः । नापि बिम्बवैचित्र्यापत्तिः । यथा खलु बिम्बवैचित्र्याभावेऽपि जलसूर्यकान्तादिस्थानगुणात् सूर्यादिप्रतिबिम्बेष्वग्निजनकत्वादिवैचित्र्यमेवं ब्रह्मादिस्थानगुणवैचित्र्येणाविचित्रभगवदानन्दादिप्रतिबिम्बानां वैचित्र्योपपत्तेरिति भावः । अत्र स्मृतिं चाऽह- **ब्रह्मादीति** ॥ प्रतिबिम्बत्वमायाति प्रतिफलितो भवतीत्यर्थः ॥ ३५ ॥

युक्त्यन्तरेण ब्रह्माद्यानन्दादिवैचित्र्यसमर्थनम्

युक्त्यन्तरेण बिम्बानन्दाद्यवैचित्र्येऽपि प्रतिबिम्बवैचित्र्यमुपपादयत् सूत्रं पठित्वा स्मृत्यैव व्याचष्टे- **उपपत्तेश्चेति** ॥ न केवलं प्रतिबिम्बानन्दादिवैचित्र्यं

ब्रह्मादिस्थानगतभक्त्यादिगुणेनोपपन्नम् । किं नाम? बिम्बभूतभगवदैश्वर्यवशाच्चेति भावः । पुरुषापाद्यानां भक्त्यादिस्थानगुणानां कथं स्वाभाविकानन्दादिवैचित्र्यहेतुत्वमिति परिहर्तुमनादित्वोक्तिः । स्यादेतत् । स्थानगुणेनैवोपपद्यमाने वैचित्र्ये न बिम्बसामर्थ्यमुपयुज्यत इति । मैवम् । सूर्यकान्तादिगतसूर्यकादिवैचित्र्येऽपि बिम्बसामर्थ्यस्याप्युपयोगदर्शनात् । स्थानगुणस्यैव निमित्तत्वे मुखप्रतिबिम्बस्यापि तद्गतस्याग्निजनकत्वप्रसङ्गात् । नच तर्हि बिम्बसामर्थ्यमेवोपयोगीति वाच्यम् । तस्य सर्वत्रापि साम्यात् । अतो युक्तं सूत्रद्वयमपि । अतो ब्रह्मादिगुणबिम्बालौकिकगुणे हरौ युक्तैव भक्तिरिति सिद्धम् ॥ ३६ ॥ अधि. १७ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ स्थानविशेषात् प्रकाशादिवत् ॐ ॥ ३-२-३४ ॥

सङ्गतिः

अत्र 'एतस्यैवाऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ.उ. ६.३.३२) इति भगवदानन्दस्येतरानन्दप्रतिबिम्बत्वरूपसम्बन्धव्यपदेशादलौकिकत्वे पूर्वस्मिन्नधिकरणे प्रतिपादित एवानयोर्बिम्बप्रतिबिम्बत्वसम्बन्ध उपपद्यते । इतरानन्दवैचित्र्यस्य वृद्धिनये प्रतिपादितत्वादिति शङ्काया उत्थानादनन्तरसङ्गतिरिति प्रागेवोक्तम् । अत एव चतुर्मुखाद्यानन्दादीनां परब्रह्मानन्दादिप्रतिबिम्बत्वाभावेऽन्यानन्दादीनां विचित्रत्वस्य भगवदानन्दादौ वैचित्र्यस्य वा प्राप्त्या लोकसदृशत्वापत्त्या न तस्मिन् भक्तिरुत्पद्यत इति भक्तिप्रतिबन्धकीभूताप्रतिबिम्बत्वादेर्निरासेन पेटिकासङ्गतिरपि ऊह्या ।

अधिकरणरचनायां वक्रमार्गाश्रयणे कारणोक्तिः

अत्र यद्यपि पूर्वप्रकृतं भगवदानन्दादीनां सम्बन्धशब्दोक्तं बिम्बत्वं विषयः ।

युक्तमयुक्तं वेति सन्देह इत्यादिवाचोभङ्ग्या ऋजुमार्गेणाधिकरणरचनसम्भवे कथञ्चिच्चतुर्मुखाद्यानन्दादीनामेव प्रकृतत्वं सम्पाद्य तत्र प्रतिबिम्बत्वादिचिन्तापूर्वकमधिकरणरचनं कुतः? इति शङ्का भवति। तथाऽपि

'ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च।
प्रतिबिम्बत्वमायाति मध्योच्चादिविशेषतः ॥'

इति वाराहवचनेन चतुर्मुखाद्यानन्दादीनामेव प्रतिबिम्बत्वसमर्थनात् तदनुसारिणि च सूत्रे 'स्थानविशेषात्' इत्युपाधिविशेषोक्त्या तदनुकारिणि च भाष्ये 'दर्पणादिस्थानविशेषात्' इति श्रवणात् तदनुसारेण टीकायां वक्रमार्गाश्रयणम्।

यद्वा बिम्बस्यैकरूप्येऽपि प्रतिबिम्बे वैचित्र्यं किन्निबन्धनमिति शङ्कायाः स्थानविशेषोक्त्या परिहारसम्भवेऽपि प्रतिबिम्बानां विचित्रत्वे बिम्बे तदभावः किन्निबन्धन इति शङ्कायाः परिहारासम्भवाद् वक्रोक्तिः।

चिन्ताक्रमः

अत्र भक्तिः कर्तव्या न वेति सन्देहः। तदर्थं पूर्वोक्तमलौकिकत्वसाधनं ब्रह्मानन्दादेश्चतुर्मुखानन्दादीन् प्रति बिम्बत्वं युक्तं न वा। तदर्थं चतुर्मुखानन्दादि भगवदानन्दादिप्रतिबिम्बं न वेति चिन्तनीयम्।

पूर्वपक्षः

तत्र, चतुर्मुखाद्यानन्दो न भगवदानन्दप्रतिबिम्बः। विचित्रत्वात्। व्यतिरेकेण दर्पणादिस्थप्रतिबिम्बवत्। नचाप्रयोजको हेतुः। यदि भगवदानन्दप्रतिबिम्बः स्यात् तस्य वैचित्र्यशून्यतया तत्प्रतिबिम्बे वैचित्र्यं न स्यात्। कार्यवैचित्र्यस्य कारणवैचित्र्यायत्तत्वात्। अन्यथाऽकारणकार्योत्पत्तिप्रसङ्गः। कादाचित्कानामदृष्टादीनां च सार्वकालिककार्यवैचित्र्यं प्रत्यप्रयोजकत्वात्। बिम्बवैचित्र्यं न स्थाननयविरुद्धम्। ततश्च

बिम्बत्वं परमानन्दस्यान्यानन्दान् प्रतीरितम्।
न युक्तं तत एवास्य लौकिकत्वं भवेद् ध्रुवम् ॥ इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु-

अन्यानन्देषु वैचित्र्यं बिम्बानन्दस्य नास्ति तत्।
अनाद्युपाधिवैचित्र्यादादित्यादेरिवेष्यताम् ॥

भाव्यं हि प्रतिबिम्बवैचित्र्ये कारणेन न बिम्बवैचित्र्येणैवेति नियमः। सूर्यकान्तजलादिनिष्ठप्रतिबिम्बयोर्वैचित्र्याभावापत्तेः। दर्पणादौ बिम्बवैचित्र्येण प्रतिबिम्बवैचित्र्यं दृश्यत इति चेत्, किं तावता? उपाधिवैचित्र्याभावेऽपि बिम्बवैचित्र्येण प्रतिबिम्बवैचित्र्यदर्शनान्न तस्य कारणत्वमिति चेत्, तथाऽप्युपाधिवैचित्र्यस्य कारणत्वं न विच्छिन्नम्। नहि वैकल्पिककारणवत्सु कारणान्तरसद्भावप्रयुक्तजनिमत्सु कारणान्तरव्यतिरेकव्यभिचारमादाय तस्याकारणत्वं शङ्कार्हम्। तथा सति [१]कारीर्यदिरपि वृष्ट्यादावकारणत्वं शङ्क्यं स्यात्। नच सर्वत्राप्येवं व्यतिरेकव्यभिचारो न शङ्कनीयः स्यादिति वाच्यम्। आदित्यादेर्देवदत्तादेश्चोपाधिवैचित्र्यबिम्बवैचित्र्ययोः प्रतिबिम्बवैचित्र्यकारणताग्राहिणो नियामकस्यानन्यथासिद्धनिदर्शनस्येव सर्वत्र नियामकस्याभावात्।

ननु सूर्यस्य बिम्बस्य प्रकाशरूपत्वरूपसामर्थ्यवैशेष्येणैव सूर्यकान्तादौ प्रतिफलितस्याग्निजनकत्वादिरूपवैचित्र्यं, नतु स्थानमहिम्ना। तथा सति तत्र प्रतिफलितस्यापि मुख्यस्य वह्निजनकत्वापत्तिः। तथाचोपाधिवैचित्र्यस्याकारणताग्राहकमनन्यथासिद्धं निदर्शनमसिद्धम् इति चेत्। मैवम्। प्रकाशरूपस्याऽदित्यस्य जले प्रतिफलनेऽपि वह्निजनकत्वादर्शनात्। तर्ह्युभयमप्रयोजकमेवेति

१. क. कार्यदिरपि।

निमित्तान्तरं गवेषणीयमिति चेन्न। गवेषणेऽपि निमित्तान्तरस्यादर्शनेन प्रत्येकं व्यभिचारदर्शनेऽपि समर्थबिम्बकत्वरूपविशिष्टस्योपाधिवैचित्र्यस्य तददर्शनेन प्रतिबिम्बवैचित्र्यं प्रति निमित्तत्वोपपत्तेः। स्थानवैशेष्यस्य बिम्बसामर्थ्यस्य च प्रत्येकं लौकिकमेव हेतुत्वमङ्गीकर्तुं शक्यम्। व्यभिचारोपलब्धेः। [१]भगवद्बिम्बक-प्रतिबिम्बे तु प्रत्येकमपि वैचित्र्ये निमित्तं भवत्येव व्यभिचारानुपलम्भात्। नहि सूर्यकान्तोपाधिकस्य प्रतिबिम्बस्य सूर्याद्यनुमुखादिबिम्बकत्ववद् ब्रह्मादि-जीवस्वरूपोपाधिकस्य प्रतिबिम्बस्य भगवदन्यबिम्बकत्वमस्ति। येन व्यभिचारो दृश्येत। ततश्चेह प्रत्येकमुभयमपि प्रयोजकं ब्रह्माद्यानन्दवैचित्र्य इति द्योतयितुमेव योगविभागश्च युक्तः। अत एव सोपानारोहणन्यायेन बहिरङ्गं समाधानमाद्येनोक्त्वा द्वितीयेनान्तरङ्गं समाधानमभिधीयत इति सूत्रक्रमोऽप्युन्नेयः।

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु - 'नानाभावः प्रलोभश्च' इति न्यायमालोक्तनानाभावन्यायं विवृण्वत् 'नच ब्रह्माद्यानन्दवैचित्र्ये बिम्बभूतविष्ण्वानन्दवैचित्र्यम्' (न्या.वि.) इति वाक्यं भाष्याभिप्रेते प्रयोगेऽप्रयोजत्वशङ्कायां तर्कपरमिदमिति मन्वानो व्याचष्टे- [२]**विचित्राणामपीति ॥** एतेन भगवदानन्दप्रतिबिम्बत्वेनाभिमतो ब्रह्माद्यानन्दस्तारतम्योपेतो न वा। आद्यस्येदमुत्तरम्। ब्रह्माद्यानन्दे तारतम्य-रूपवैचित्र्ये विष्ण्वानन्दे तारतम्यरूपवैचित्र्यं स्यात्। ततश्च न [३]स्थाननियमविरोध इति। द्वितीयस्य 'परमानन्दमात्रत्वे ब्रह्मानन्दादीनां कथं विशेषः' इति भाष्य-मुत्तरम्। तादर्थ्ये सप्तमी। यद्यन्यानन्दादीनां वैचित्र्यं नेष्यते तर्हि परमानन्दमात्र-त्वसिद्ध्यै वृद्धिनये कथं विशेषः प्रतिपादितो युज्यत इति विवरणभाष्ययोजना सूचिता। ततश्च प्रतिबिम्बत्वमभिलषताऽन्यानन्दादेर्वैचित्र्यं वा त्याज्यं, स्वीकार्यं

१. भगवद्बिम्बके प्रतिबिम्बे तु २. क. वैचित्र्यमपीति।
३. स्थाननयविरोधः।

वा भगवदानन्दस्य वैचित्र्यम्। तदुभयमप्यशक्यम्। वृद्धिनयस्थाननयविरो-धात्। ततो बिम्बप्रतिबिम्बभाव एव त्याज्य इति परनयाक्षेपेणात्र पूर्वपक्षो बोध्यः। न्यायमालायां नानाभाव इति पदं यतो नानाभावो वृद्धिनयेऽभिप्रेत अतो नानाभावो विष्ण्वानन्दस्येत्यावृत्त्या विवरणे व्याख्यातं द्रष्टव्यम्।

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

'अलौकिकत्वमाधिक्यम्' इति न्यायमालायां सङ्गृहीतमाधिक्यन्यायं सूत्रसङ्गतत्वेन विवृण्वत् **'आदित्यादिवदाधिक्यात्। नहि सूर्यकान्तप्रतिबिम्ब-स्याग्निजनकत्वशक्तिर्न जलगतस्येत्येतावता सूर्यवैचित्र्यम्। आधिक्यं हि तत्र निमित्तम्। सूर्यचन्द्रप्रतिबिम्बं विनाऽन्यत्र तथा विशेषादृष्टेः'** (न्या.वि.) इति वाक्यम् आदिपदं न चन्द्रमात्रपरम्, किन्तु सूर्यकान्तपरमपीति मन्वानः प्रथमसूत्रव्याख्यानसौकर्यायाऽदिपदगृहीतमपि स्थानवैशेष्यं विवृण्वत् भाष्येण सहैव 'सूर्यवैचित्र्यम्' इत्यन्तं व्याचष्टे- **यथा खलु बिम्बवैचित्र्याभावेऽपीत्या-दिना ॥** अथ साक्षादेव स्वशब्दोक्तमादित्यदृष्टान्तमादिपदोक्तं चन्द्रदृष्टान्तं च द्वितीयसूत्राभिप्रेततया विवृण्वन् तात्पर्यतो व्याचष्टे- **बिम्बभूतभगवदैश्वर्य-वशाच्चेति भाव इति ॥** एवं 'नहि सूर्यकान्तप्रतिबिम्बस्य' इत्यादिवाक्यमादि-पदोक्तस्थानविशेषविवरणपरं व्याख्यायाधुना द्वितीयसूत्रसार्थक्यकथनाय तद्वैयर्थ्यशङ्कापरत्वेनापि व्याख्याति- **स्यादेतदिति ॥**

एतेन सूर्यकान्तगतसूर्यकस्याग्निजनकत्वं न जलगतस्येत्येतावता च बिम्बभूत-सूर्ये वैचित्र्यं नह्यस्ति। नचानुभूयते। ततश्च बिम्बसामर्थ्याभावेऽपि प्रतिबिम्ब-वैचित्र्यं स्थानसामर्थ्यैनैवोपपन्नमिति बिम्बसामर्थ्याख्यहेतुकथनस्यायुक्तत्वाद-नुपयुक्तत्वाच्च द्वितीयं सूत्रं व्यर्थमिति सोपस्करेण 'सूर्यवैचित्र्यम्' इत्यन्तं व्याख्येयमिति सूचितम्। एवं प्राप्तशङ्कोत्तरत्वेन 'आधिक्यं हि तत्र निमित्तम्' इत्यादिवाक्यं व्याचष्टे- **मैवमित्यादिनाऽग्निजनकत्वप्रसङ्गादित्यन्तेन ॥** तेन

सूर्यकान्तचन्द्रकान्तशिलयोरेव सूर्यचन्द्राभ्यां जातं प्रतिबिम्बसूर्यकं चन्द्रकं च विनाऽन्यत्र तयोरेव शिलयोः मुखरूपबिम्बान्तराज्जाते प्रतिबिम्बे नासाचक्षुरादि-रूपविशेषान्तरदर्शनेऽपि तथा विशेषादृष्टेरग्निजनकत्वजलस्रावित्वादि-विवक्षितविशेषस्यादर्शनात्, न स्थानसामर्थ्यमात्रं प्रतिबिम्बवैचित्र्यप्रयोजक-मङ्गीकर्तुं शक्यम्। किं नाम ? बिम्बसामर्थ्यमपीत्यतः द्वितीयं सूत्रं सार्थकमिति योज्यमित्युक्तं भवति।

यद्वा, नहीत्यादिवैचित्र्यमित्यन्तं प्रथमसूत्रस्य वैयर्थ्यनिवारकम्। 'आधिक्यम्' इत्यादि तु द्वितीयसूत्रस्येत्यभिप्रेत्य पदकृत्यविचारप्रक्रियां शिक्षयन्नेव द्वितीय-सूत्रवैयर्थ्यनिवारकमन्तिममपि वाक्यं व्याख्यातुं शङ्कामुद्भावयति- **स्यादेत-दिति** ॥ व्याचष्टे- **मैवमिति** ॥ आदिवाक्यं व्याख्याति- **नच तर्हीति** ॥ तथाच सूर्ये नहि वैचित्र्यमनुभूयते। तस्य सूर्यकान्ते जले च सर्वत्र प्रकाशात्मकत्वादि-साम्यात्। सूर्यकयोश्च वैलक्षण्यमनुभूयते। नच तावता सूर्ये वैलक्षण्यमङ्गीकर्तुं शक्यते। अतस्तत्र स्फुट एव व्यभिचार इति न सार्वत्रिकं बिम्बसामर्थ्यं प्रयोजकमिति प्रथमसूत्रमपि सार्थकमेवेति योज्यम्।

सङ्क्षेपभाष्येण एतदधिकरणतात्पर्योक्तिः

ब्रह्मादिनिष्ठभक्त्यादिगुणतारतम्येन वैचित्र्येण प्रतिबिम्ब आनन्दादौ तारतम्यं वैचित्र्यं, न तदर्थं बिम्बे तारतम्यं स्वीकार्यमिति यस्मात् तत् तस्मात् 'सर्वरूपेष्व-भेदवान्' इति योजनया सङ्क्षेपभाष्येणास्यापि तात्पर्यमुक्तं वेदितव्यम्।

॥ इति स्थानविशेषाधिकरणम् ॥ १७ ॥

॥ अथ प्रतिषेधाधिकरणम् ॥ १८ ॥

॥ सूत्रभाष्यम् ॥

ध्यानकाले यच्चित्ते प्रदृश्यते तदेव हि ब्रह्मरूपम्। अतः कथमव्यक्ततेत्यत आह-

॥ ॐ तथाऽन्यत् प्रतिषेधात् ॐ ॥ ३-२-३७ ॥

यथा जीवानन्दादेरन्यद् ब्रह्म तथोपासाकृतादपि।

'यन्मनसा न मनुते येनाऽहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥' (के.उ. १-६)

इति प्रतिषेधात्।

'पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितम्।
ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रदम् ॥
तदुपासनं च भवति प्रतिमोपासनं यथा।
दृश्यते त्वापरोक्ष्येण[1] ज्ञानेनैव परं पदम्।
उपासना त्वापरोक्ष्यं गमयेत् तत्प्रसादतः ॥' इति ब्रह्मतर्के[2] ॥ ३७ ॥

॥ इति प्रतिषेधाधिकरणम् (तथाऽन्यत्वाधिकरणम्.पा.) ॥ १८ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनभक्त्यर्थं पुनस्तस्याव्यक्तत्वसमर्थनादस्ति

१. हृ. त्वपरोक्षेण। २. हृ. इति च ब्रह्मतर्के

शास्त्रादिसङ्गतिः। व्यक्तत्वे तस्य भक्तिवैयर्थ्यापातात् तत् समर्थनीयम्। प्रकृतं ब्रह्मैवात्र विषयः। व्यक्तमव्यक्तं वेति सन्देहः। पदार्थद्वैविध्यदर्शनं सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **ध्यानेति**॥ न ब्रह्माव्यक्तम्। तस्य ध्यानकाले चित्ते प्रतीयमानत्वात्। ध्यानकाले प्रतीतं न ब्रह्म तस्य ध्यातृबहुत्वेन बहुत्वापत्तेरिति चेन्न। स्वरूपभेदाभावेऽपि ब्रह्मरूपाणां नानात्वेन तदुपपत्तेः। अन्यथा ध्यानवैयर्थ्यात्। नहि यत्किञ्चिद्ध्यानेन ब्रह्म फलं ददातीति युक्तम्। अतो ध्यानकाले पुरुषप्रयत्नेन प्रतीतस्य ब्रह्मरूपत्वेनाव्यक्तत्वाभावाद् व्यर्था तद्भक्तिरिति भावः।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत इति**॥ न ध्यानकाले प्रतीतत्वेन ब्रह्मणो व्यक्तत्वं मन्तव्यम्। ध्यानप्रतीतस्याब्रह्मत्वात्। तत् कुतः? 'यथा खलु जीवानन्दादीनामल्पत्वादिकारणेन ब्रह्मानन्दादि तद्विलक्षणमेव तथोपासाकृतस्य दुर्लक्षणत्वादिना कारणेन ब्रह्मणस्ततो वैलक्षण्यात्। निर्दोषदोषिणोर्ब्रह्मोपासाकृतयोरैक्यानुपपत्तेरेव हि 'यन्मनसा' (के.उ. १.६) इति श्रुतिस्तस्य ब्रह्मत्वं प्रतिषेधतीति भावः। पुरुषो यद् वस्तु न मनुते। ध्यानकालप्रतीतस्याब्रह्मत्वे कथं ब्रह्म फलदं स्यादित्यत आह- **पश्यन्तीति**॥ स्थितिमात्रेण कथं फलदमनुपासितत्वादित्यत आह- **तदिति**॥ प्रतिबिम्बोपासनमिति सम्बद्ध्यते। ब्रह्मैव तत् कुतो नेत्यत आह- **दृश्यत इति**॥ तर्हि ज्ञानायैव प्रयतितव्यं किमुपासनयेत्यत आह- **उपासनेति**॥ अतो ध्यानप्रतीतस्याब्रह्मत्वेन तस्याव्यक्तत्वात् कर्तव्यैव तत्र भक्तिरिति सिद्धम् ॥ ३७॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ तथाऽन्यत् प्रतिषेधात् ॐ ॥ ३-२-३७ ॥

अनन्तरसङ्गतिः

ब्रह्म यथा बिम्बप्रतिबिम्बभावाख्यविरुद्धधर्मव्यपदेशाद् ब्रह्माद्यन्यत्, तथा सुभगत्वदुर्भगत्वरूपविरुद्धधर्मव्यपदेशाच्चित्तप्रतीतादन्यदिति, स्थानविशेषबिम्बसामर्थ्याभ्यां यथा प्रतिबिम्बवैचित्र्यं न, तेन बिम्बे वैचित्र्यं लौकिकत्वं चास्ति तथा ध्यातृचित्तरूपस्थानविशेषबिम्बसामर्थ्याभ्यामेव चित्तप्रतिबिम्बितस्य वैचित्र्यं, न तेन बिम्बवैचित्र्यं नापि व्यक्तत्वमिति वाऽतिदेशनाद्, युक्तं पूर्वत्र प्रतिबिम्बवैचित्र्यं बाधकाभावात्, इह फलदानानुपपत्तिरूपबाधकसद्भावात् तत्र युज्यत इत्युत्थानाद्वाऽनन्तरसङ्गतिः।

अत्र यद्यप्युपासाकृते प्रतिबिम्बप्रसङ्गसन्निधापिते वैचित्र्यं युज्यते न वेत्यादिरूपेण चिन्तादि शक्यते कर्तुम्। तथाऽपि 'उपपत्तेश्च' (ब्र.सू. ३.२.३६) इत्यतीतसूत्रे प्रतिबिम्बवैचित्र्यघटकसामर्थ्यवत्त्वेन प्रकृतं ब्रह्म विशेष्यतयाऽन्वेतीत्युक्तिसौकर्याय 'तथाऽन्यत्' (ब्र.सू. ३.२.३७) इति सूत्रेण तदनुसाराद् ब्रह्मशास्त्रत्वाच्च ब्रह्मविषयमेव युक्तम्।

अव्यक्तनयेन गतार्थताशङ्का तत्परिहारश्च

अव्यक्तत्वं प्रमितमित्येतावदेवोक्तमव्यक्तनये। तत्तु न यावत् तत्र प्राप्तविरोधशङ्काप्रक्षालनं तावदुक्तमपि हृदये तिष्ठतीति प्रथमाध्यायोक्तप्रमेयेषु द्वितीयेनेवेहापि तादृशशङ्कापङ्कक्षालनमनेन विधास्यत इति न गतार्थता। अन्यथा 'भाक्तं वाऽनात्मभावित्वात् तथा हि दर्शयति' (ब्र.सू. ३-१-७), 'विद्यैव तु निर्धारणात्' (ब्र.सू. ३-३-४८), 'श्रुत्यादिबलीयस्त्वाच्च न बाधः' (ब्र.सू. ३-३-५०), 'अम्बुवदग्रहणात्' (ब्र.सू. ३-२-१९), 'अनुबन्धादिभ्यः' (ब्र.सू. ३-३-५१) इत्यादावन्योन्यं गतार्थताऽपरिहारात्।

पूर्वपक्षः

ध्यातृचित्तगतं ब्रह्म न चेत् किं फलदं भवेत् ।
ततो व्यक्तं ततस्तत्र भक्तिर्नैव विधीयते ॥ इति पूर्वः पक्षः ।

सिद्धान्तः

सिद्धान्तस्तु -

प्रतिमायां स्थितं ब्रह्म पूजितं स्यात् फलप्रदम् ।
यथा तथा ध्यातृचित्तगतेऽपि ध्यातमञ्जसा ॥

स्फुटः सूत्रार्थः ।

पूर्वपक्षन्यायविवरणव्याख्यात्मकटीकावतरणम्

टीकाक्षरार्थस्तु - नानाभावन्यायमेवात्र सङ्गतत्वेन साध्यमध्याहृत्य विवृण्वत् 'नच नानाभावाद् विष्णोश्चित्तप्रतिबिम्बरूपता' (न्या.वि.) इति वाक्यं भाष्येण सहैकार्थ्यादाकाङ्क्षाक्रमेण व्याचष्टे- **ध्यानकाले चित्ते प्रतीयमानत्वादिति** ॥ तत्र बाधकं शङ्कते- **ध्यानकाल इति** ॥ **बहुत्वापत्तेरिति** ॥ ततश्च बहुत्वसङ्ख्याया घटादौ भेदव्याप्तिदर्शनेन तदापत्तिः । तस्य च 'नेह नाना' (बृ.उ. ६.४.१९, कठ.उ. ४.११) इति निषिद्धत्वादिति गुहाधिकरण[1] विस्मरणाच्छङ्केति भावः । एतदुत्तरत्वेन 'नानाभावाद् विष्णोः' इति पूर्वविवरणं व्याचष्टे- **स्वरूपभेदाभावेऽपीति** ॥ तथाच भाष्योक्तहिशब्दो विवरणोक्तहेतुसूचक इत्युक्तं भवति । व्याप्तिग्राहकप्रमाणाभावेन [2]दर्शनमात्रस्याप्रयोजकतया बहुत्वस्य[3] भेदव्याप्त्यभावाद्[4] भेदाभावेऽपि रूपबहुत्वेनैव बहुत्वोपपत्तेरिति [5]गुहाधिकरणं स्मर्यतामिति भावः । अनेन विष्णोर्नानाभावाद् बहुरूपत्वात् स्वरूपभेदाभावेऽपि ब्रह्मरूपाणां

१. म. गुणाधिकरण । २. म. अदर्शन ।
३. म. भेदत्वस्य । ४. म. व्याप्त्यभावात् ।
५. म. गुणाधिकरणम् ।

नानात्वेन तदुपपत्तेरिति यावत् । चित्ते यः प्रतिबिम्बः तत्स्वरूपता विष्णोः । प्रतिबिम्बस्य च व्यक्तत्वान्नाव्यक्तत्वमित्यर्थ उक्तो भवति ।

सिद्धान्तन्यायविवरणभाष्यव्याख्यात्मकटीकांशावतारणम्

आधिक्यन्यायमेव प्रतिद्वन्द्विप्रदर्शनेन सूत्रस्पर्शज्ञापनेन च विवृण्वत् ''आधिक्यादेव प्रतिबिम्बे हि विशेषाः प्रतीयन्ते । अतो हि श्रुतिः प्रतिषेधति- 'नेदं यदिदमुपास ते ' (के.उ. ख.२.म.२) इति '' (न्या.वि.) इति वाक्यं सूत्रभाष्याभ्यामैकार्थ्याद् युगपद् व्याचष्टे- **यथा खलु जीवानन्दादीनामिति** ॥ अत्र 'ततो वैलक्षण्यात्' इत्यन्तेन 'प्रतीयन्ते' इत्यन्तं, 'निर्दोषदोषिणोः' इत्यारभ्य 'प्रतिषेधतीति भावः' इत्यन्तेन च 'अतो हि श्रुतिः' इत्युत्तरवाक्यं चोक्ततात्पर्यं भवति । ततश्च विष्णोश्चित्तप्रतिबिम्बितात्मत्वाभावे न हेत्वन्तरं मृग्यम् । किन्तु पूर्वनयोक्तसुलक्षणत्वाद्यात्मकोत्तमत्वरूपमाधिक्यमेव हेतुरिति 'आधिक्यादेव' इत्यस्यार्थः ।

सुलक्षणत्वाद्याधिक्यं चित्तप्रतिबिम्बितेऽप्यस्ति चेत् कथं हेतुः स्यादित्यत आह- **प्रतिबिम्बे हीति** ॥ ध्यानकाले प्रतीते प्रतीके दुर्लक्षणत्ववासना-विकृतत्वादिरूपाः विशेषाः धर्माः प्रतीयन्ते हि । एतद् ध्यातृपुरुषानुभवसिद्धं हि यस्मादेवं तस्मान्नाऽधिक्यमन्यगामीति । तत्रैव हेत्वन्तरमाह- **अतो हीति** ॥ दुर्लक्षणत्वादिरूपतद्व्यावर्तकधर्मसद्भावादेव हि 'नेदं यदिदमुपास ते' (के.उ. ख.२.म.२.) इति तलवकारश्रुतिः इदं चित्ते प्रतिबिम्बितं ब्रह्म नेति तत्स्वरूपत्वं[1] निषेधति । अन्यथा व्यापकनिवृत्त्या व्याप्यनिवृत्तिरिति निषेधो न स्यादिति । ब्रह्म न प्रतीकात्मकं श्रुतिप्रतिषेधादित्युपक्रमेणैव साधनसम्भवेऽप्यापादन-प्रक्रियाशिक्षणायैवमुक्तिरिति विवरणाक्षरयोजना द्रष्टव्या ।

१. म. स्वरूपम् ।

सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यकथनम्

'स एकः परमेश्वरः' इत्यत्रैश्वर्याद्युपलक्षितानन्तसल्लक्षणोपेतो हरिरेक एव। तदन्ये दुर्लक्षणोपेता एवेति योजनयैतदधिकरणतात्पर्यमुक्तं वेदितव्यम्।

॥ इति प्रतिषेधाधिकरणम्॥ १८॥

(तथाऽन्यत्वाधिकरणम्)

॥ अथ सर्वगतत्वाधिकरणम्॥१९॥

॥ सूत्रभाष्यम् ॥

देशकालान्तरेऽन्यतोऽपि सृष्ट्यादिर्युक्तेत्यतो ब्रूते -

ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्यः ॐ ॥

॥ ३-२-३८ ॥

सर्वदेशकालवस्तुष्वनेनैव सृष्ट्यादिकं प्रवर्तते। 'एष सर्व एष सर्वगत एष सर्वेश्वर[1] एषोऽचिन्त्य एष परमः' इति भाल्लवेयश्रुतिः[2]।

'सर्वत्र सर्वमेतस्मात् सर्वदा सर्ववस्तुषु।
स्वरूपभूतया नित्यशक्त्या मायाख्यया यतः।
अतो मायामयं विष्णुं प्रवदन्ति सनातनम्॥'

इति चतुर्वेदशिखायाम्[3]। आदिशब्दादन्यत्र प्रमाणाभावाच्च॥ ३८॥

॥ इति सर्वगतत्वाधिकरणम्॥ १९॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यदि

अत्र भगवत्प्राप्तिसाधनभक्त्यर्थं तस्यैव जगत्कर्तृत्वादिसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा तत्र निरतिशयभक्त्ययोगात् समर्थनीयमेव। प्रकृतः

१. ह्. ईश्वरः। २. ह्. इति हि भाल्लवेयश्रुतिः।
३. ह्. इति हि चतुर्वेदशिखायाम्।

परमेश्वरो विषयः । किं सर्वदेशकालीनसृष्ट्यादिकर्ता न वेति सन्देहः । प्राचीनोक्तेरुभयथा सम्भवः सन्देहबीजम् ।

पूर्वपक्षः

पूर्वपक्षयति- **देशेति ॥** सर्वसृष्ट्यादि न ब्रह्मण एव, किन्तु देशकालान्तरेऽन्यतोऽपि । राजादीनां तथा दर्शनात् । नच विष्णोरन्यस्य स्वातन्त्र्याभावेन ततः सृष्ट्यादिक्रियाऽयुक्तेति युक्तम् । भगवतैवान्येभ्यः स्वस्वातन्त्र्यप्रदानेनोपपत्तेः । नचैतदसम्भावितम् । तस्यावतारेषु विविधासम्भावितलीलादर्शनात् । अतोऽन्येषामपि स्वातन्त्र्यान्न विष्णावेव निरतिशयभक्तिर्युक्तेति भावः ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत इति ॥** भगवतैव सर्वदेशकालीनं सृष्ट्यादि, न तु देशकालान्तरेऽन्यस्य कल्पनीयम् । तथाहि । किं विष्णोः सर्वकर्तृत्वादौ प्रमाणाभावादेतत् कल्प्यते, अन्यत्र प्रमाणसद्भावाद्वा । उत सम्भावनामात्रात् । नाऽद्यः । श्रुतिसद्भावात् । न द्वितीयः । तदभावात् । नान्त्यः । अप्रामाणिककल्पनस्य क्वाप्यनुपयोगात् । नचावतारेषु विविधलीलादर्शनादेतत् कल्प्यम् । 'स्वातन्त्र्यात् क्रीडते विष्णुर्न हि स्वातन्त्र्यमन्यगम् । करोति क्वापि' इत्यादेरत्यक्तस्वातन्त्र्यस्यैव क्रीडावगमादिति भावः । सर्वगतत्वं च ब्रह्मणः सर्वसृष्ट्याद्यर्थमेव । 'अनुप्रविश्य नामरूपे व्याकरोद्' (छा.उ. ६.३.३)इत्यादेः । **मायामयशब्दो** मायामयशब्दं व्याकुर्वती श्रुतिः। **सर्ववस्तुषु सर्वं** सर्ववस्तुविषयं सृष्ट्यादीत्यर्थः । इति सङ्गृहीतमिति शेषः। अतो ब्रह्मणि सर्वजगज्जन्मादिकर्तरि भक्तिः कार्येति सिद्धम् ॥ ३८ ॥

॥ इति सर्वगतत्वाधिकरणम् ॥ १९ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्यः ॐ ॥३-२-३८॥

सङ्गतिः

अत्र सर्वदेशकालस्थितवस्तूनां सृष्ट्याद्यष्टकं भगवानेव विधत्त इति स्वातन्त्र्यस्य भगवदेकनिष्ठत्वाङ्गीकारेणापि प्राप्तपूर्वपक्षनिरासः, अखण्डेशत्वाधिकरणे तु तदनङ्गीकारेणेति न गतार्थता । यद्यपीदं तदनन्तरमेव वक्तव्यम् । तथाऽपि पूर्वोक्तनानाभावरूपपूर्वपक्षन्यायैक्याद्, यथा ब्रह्मोपासाकृतादन्यत् तथा सर्वदेशकालसृष्टिकर्तुरप्यन्यद् ब्रह्मेतुत्थानाद् वाऽत्रापि सङ्गतम् । देशकालान्तरे स्वातन्त्र्येणैवान्यस्य कर्तुस्सम्भवे तद्देशकालस्थानां जनानां तत्रैव भक्त्युत्पत्त्या भगवति भक्त्युत्पत्तिः प्रतिबध्यत इति तन्निरासोऽस्यां पेटिकायां सङ्गतिरित्याद्यूह्यम् ।

पूर्वपक्षः

अत्र -

स्वातन्त्र्यं भगवान् यस्मै दातुमुत्सहते यदा ।
तदाऽन्योऽपि जगत्कर्ता स कथं वार्यते त्वया ॥

इति पूर्वः पक्षः ।

सिद्धान्तः

स्वातन्त्र्यमन्यगं नैव करोति प्रेक्षया स्वया ।
नियतत्वादेवमेव स्वातन्त्र्यं नान्यगं भवेत् ॥ इति सिद्धान्तः ।

परमत इत्यादिसप्तसूत्री 'एकाधिकरणम्'इत्यङ्गीकर्तृमायावादिमतानुवादनिरासौ

अत्रान्यैः 'परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः' (ब्र.सू. ३.२.३२) इत्यारभ्य 'अनेन सर्वगतत्वमायामयशब्दादिभ्यः' (ब्र.सू. ३.२.३८) इत्यन्त-

मेकमधिकरणम्। यदेतन्निरस्तप्रपञ्चं ब्रह्म निर्धारितं तस्मात् परमन्यत् तत्त्वमस्ति नास्तीति सन्देहेऽस्तीति पूर्वपक्षो, नास्तीति सिद्धान्त इति व्याख्यातम्।

तन्न। 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र.सू. २.१.१५), 'प्रकृतैतावत्त्वं प्रतिषेधति' (ब्र.सू. ३.२.२२) इत्यादौ बहुश्रुत्यादिकमुदाहृत्य प्रपञ्चस्याभाव उपपादित एवेतीह पुनरारम्भायोगात्। द्युभ्वाधिकरणे सेतुशब्दप्राप्तपूर्वपक्षस्य निराकृतत्वाच्च। नच तस्मिन्नधिकरणे सेतुशब्दस्य पूर्वपक्षेऽप्यमुख्यार्थत्वाद् विधरणत्वमर्थ आश्रितः। इह तून्मानव्यपदेशानां मुख्यार्थलाभः पूर्वपक्षेऽस्ति। अतस्तेषां समाधानाय पुनरारम्भ इति वाच्यम्। सेतुशब्दप्राप्तपूर्वपक्षस्यानुत्थानतादवस्थ्यात्। साक्षाच्छ्रुत्युक्तस्य प्रपञ्चस्य निषेधे तदाक्षिप्तोन्मानादिप्राप्तप्रपञ्चस्य निषेधाय पुनरारम्भायोगाच्च। अनन्तराधिकरणसङ्गत्यदर्शनाच्च। पूर्वाधिकरणे श्रुतिप्रसिद्धस्य ब्रह्मणः निषेधायोगो यथा एवमेव श्रुतिप्रसिद्धस्य ब्रह्मातिरिक्तस्य वस्तुनः श्रुत्यैव निषेधो न युज्यत इति सङ्गतिर्दृश्यत इति चेत्, न। प्रमाणान्तरागोचरस्य ब्रह्मणः श्रुत्या निषेधायोगेऽपि प्रत्यक्षादिप्रमाणान्तरगोचरस्य प्रपञ्चस्य श्रुत्या निषेधसम्भवेन पूर्वन्यायेनेहाऽऽक्षेपायोगात्।

परमतेति प्रथमसूत्रस्य पूर्वपक्षसूत्रत्वव्याख्यानप्रत्याख्यानम्

अत एव- अतो ब्रह्मणः परमन्यत् तत्त्वमस्ति। 'अथ य आत्मा स सेतुर्विधृतिः' (छा.उ. ८.४.१) इत्यात्मशब्दोदितस्य सेतुत्वव्यपदेशात्। 'तदेतद्ब्रह्म चतुष्पाद् अष्टाशफं षोडशकलम्' (शा.भा.उ.श्रुतिः) इति उन्मानव्यपदेशात्। 'सता सौम्य तदा सम्पन्नो भवति' (छा.उ. ६.८.१)इति 'शारीर आत्मा' (तै.उ.२.१०), 'प्राज्ञेनाऽऽत्मना सम्परिष्वक्तः' (बृ.उ. ४.३.२१) इति सम्बन्धव्यपदेशात्। 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' (छा.उ. ४.१५.१), 'अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते' (छा.उ. १.७.५) इति भेदव्यपदेशाच्च इत्याद्यस्य

पूर्वपक्षसूत्रत्वमभ्युपेत्य व्याख्यानं परास्तम्। 'विश्वं सत्यम्' इत्यादिश्रुत्यैव सत्त्वसम्भवेऽपि सेतुत्वादिव्यपदेशान्यथानुपपत्तिलब्धसत्त्वेन पूर्वपक्षायोगात्।

'सामान्यात्तु' इति प्रक्षिप्तसूत्रस्य व्याख्यानिरासः

यच्च, सम्प्रदायगतदर्शनादित्यनन्तरसूत्रमपलप्य 'सामान्यात्तु' इति[1] प्रक्षिप्य प्रसिद्धसेतुसादृश्यादेव सेतुत्वव्यपदेशः, नतु मुख्य इति सेतुत्वव्यपदेशस्य समाधानमस्यार्थ इत्युक्तं, तदपि न। तथाऽपि लौकिकसेतुवदेवेतरसापेक्षत्वस्य दुर्वारत्वात्।

'बुद्ध्यर्थः पादवत्' इति तृतीयसूत्रव्याख्याननिरासः

यच्चोक्तम्- उन्मानव्यपदेशोऽपि न ब्रह्मव्यतिरिक्तवस्त्वस्तित्वप्रतिपत्त्यर्थः, अपि तु बुद्ध्यर्थ उपासनार्थ इति यावत्। यथा मनआकाशयोरध्यात्ममधिदैवतं च ब्रह्मप्रतीकयोश्चत्वारो वागादयो मनस्सम्बन्धिनः पादाः, चत्वारश्चाग्न्यादयः आकाशसम्बन्धिनः पादाः इति तृतीयस्यार्थ इति तन्न। असदुपासनाया अनर्थहेतुत्वेनोपासनार्थस्यापि प्रपञ्चस्य सत्त्वप्राप्तेरवर्जनीयत्वात्।

स्थानविशेषादिति चतुर्थसूत्रव्याख्यानप्रत्याख्यानम्

यच्चोक्तम्- सम्बन्धव्यपदेशो भेदव्यपदेशश्च स्थानविशेषादेवोपाधिविशेषमपेक्ष्यैव प्रवर्तते प्रकाशादिवत्। यथा घटभङ्गे घटाकाशो महाकाशेन संपन्न इत्युपचर्यते, यथा वा घटाद्युपाधिभेदाद् घटाकाशो महाकाश इति भेदेन व्यपदेशस्तद्वदेवेति चतुर्थस्यार्थ इति तन्न। स्वाभाविकभेदेनैव सम्बन्धभेदव्यपदेशयोर्मुख्यत्वोपपत्तावौपचारिकत्वाङ्गीकारस्यान्याय्यत्वात्। प्रकाशशब्दस्याऽऽकाशे व्युत्पत्त्ययोगाच्च। सौरचान्द्रमसपरत्वे तु विवक्षितार्थालाभः।

'उपपत्तेश्च' इति पञ्चमसूत्रव्याख्याननिरासः

यच्च 'स्वमपीतो भवति' (छा.उ. ६.३.१) इति स्वरूपसम्बन्ध एवोपदिश्यते

---

१. म. सामान्यादिति।

अत ईदृश एव सम्बन्ध उपपद्यते नान्यादृशो मुख्यः। 'योऽयं बहिर्धा पुरुषादाकाशः' (छा.उ. ३.१२.७), 'योऽयमन्तः पुरुष आकाशः' (छा.उ. १.१२.८), 'योऽयमन्तर्हृदय आकाशः' (छा.उ. ३.१२.९) इति स्थानकृतं भेदव्यपदेश-मुपपादयति यतः श्रुतिः अतो भेदोऽपीदृश एवोपपद्यते नान्यादृश इत्युपपत्तेश्चेति सूत्रस्यार्थ इत्युक्तं, तदपि नोपपद्यते। 'स्वमपीतो भवति' (छा.उ. ६.३.१) इत्यादावुपाधिना सम्बन्धस्याप्रतिपादनादीदृश एवेत्युपमाऽयोगात्। व्यतिरेक-दृष्टान्ताभिप्राये च स्वरूपसम्बन्धस्य त्वयाऽनङ्गीकारात्। अन्यथाऽऽध्यासिक-सम्बन्धस्यातन्त्रत्वापत्तेः। एतेन भेदव्यपदेशसमाधानं च निरस्तम्।

'तथाऽन्यत् प्रतिषेधात्' इत्यपपाठकल्पितसूत्रस्य व्याख्यानिरासः

यच्च 'तथाऽन्यप्रतिषेधात्' इत्यपपाठं विधाय ब्रह्मणोऽन्यस्य 'नेह नानाऽस्ति किञ्चन' इत्यादिना प्रतिषेधाद् ब्रह्मणः परं वस्त्वन्तरं नास्तीति व्याख्यानं, तदयु-क्तम्। 'प्रकृतैतावत्त्वम्' इत्यनेन गतार्थत्वात्। तथाशब्दवैयर्थ्याच्च। अन्यप्रतिषेधा-दपीति तथाशब्दस्याप्यर्थत्वे तु पूर्वं युक्त्यन्तरानुपन्यासात् समुच्चेतव्याभावः। परपक्षदूषणस्यैव समुच्चेतव्यत्वे स्वारस्यहानिः।

अनेन सर्वेति सप्तमसूत्रव्याख्यानिरासः

एतेन, अनेन सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन चाऽत्मनः सर्वगतत्वं सिद्ध्यति। अन्यथा तन्न स्यात्। नहि सेतुव्यपदेशे मुख्ये सति तद्वदेव परिच्छिन्नस्य ब्रह्मणोऽपरिच्छिन्नत्वगर्भसर्वगतत्वं सम्भवति। नचान्यप्रतिषेधाभावे वस्त्वन्तराद् व्यावृत्तिः सिद्धैवेति वस्तुपरिच्छेद एव प्राप्त इति वस्त्वपरिच्छिन्न-त्वात्मकं सर्वगतत्वं सम्भवति। सर्वगतत्वं चाऽत्मनः 'यावान् वाऽयमाकाशस्ता-वानेषोऽन्तर्हृदय आकाशः' (छा.उ. ८.१.३) इत्यादिभ्यो व्याप्तिवचनत्वा-दायामशब्दवाच्येभ्यो वचनेभ्यः सिद्धमिति विपक्षे बाधकमनेनोपन्यस्यत इति 'अनेन सर्वगतत्वमायामशब्दादिभ्यः' इत्यपपाठं विधायान्तिमसूत्रार्थकथनं परास्तम्। सेतुत्वव्यपदेशस्य गौणत्वेऽपि परिच्छिन्नत्वाप्राप्तेर्दुर्वारत्वात्।

सर्वगतत्वस्यापरिच्छिन्नत्वाद्यात्मकत्वाभावाच्च। प्रत्युत सर्वगतत्वस्य वस्त्वन्तर-सापेक्षत्वाच्च।

'तस्मान्नैतानि सूत्राणि कुमनीषाबलात् क्वचित्।
व्याख्यातव्यानि किन्त्वार्यसम्प्रदायानुसारतः॥'

विशिष्टाद्वैत्यभ्युपगताधिकरणपरीक्षा

केचित्तु मायिन इव 'दर्शनात्' (ब्र.सू. ३.२.३३) इति द्वितीयसूत्रप्रति-निधितया 'सामान्यात्तु' इति कल्पयित्वा 'तथाऽन्यत् प्रतिषेधात्' (ब्र.सू. ३.२.२७) इति सूत्रेऽन्यप्रतिषेधादित्यपपाठेन समस्तपदत्वं विधाय 'अनेन सर्वगतत्वमायामयशब्दादिभ्यः' (ब्र.सू. ३.२.३८) इति सूत्रम् 'आयाम-शब्दादिभ्यः' इत्यपपाठेन पठित्वैकमधिकरणं विधायाप्येवं व्याचक्षते- 'यतो वा इमानि' (तै.उ. ३.१) इत्यादिना जन्मादिसूत्रैः 'अतोऽनन्तेन तथा हि लिङ्गम्' (ब्र.सू. ३.२.२७) इत्यन्तैर्जगत्कारणतया निर्दिष्टात् परस्माद् ब्रह्मणोऽप्यधिकं तत्त्वं किमप्यस्ति वेति संशये, इतोऽप्यधिकं तत्त्वमस्तीति पूर्वः पक्षः नेति सिद्धान्त इति। तदपि न। अहिकुण्डलाधिकरणव्यवधानायोगात्। 'ततो ब्रवीति च भूयः' इत्यंशेन 'नह्येतस्मादिति नेत्यन्यत् परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणो वै सत्यं तेषामेष सत्यम्' (बृ.उ. २.३.६) इति वाक्यशेषग्राहकेण परब्रह्मणोऽधिकं तत्त्वं नास्तीति प्रतिपादनात्। 'अक्षरमम्बरान्तधृतेः' (ब्र.सू. १.३.१०) इत्यादौ चोत्तमवस्तुनिषेधात् पुनरारम्भानुपपत्तेश्च। उक्तमेव प्रमेयं कैश्चिद्धेत्वाभासैराशङ्क्य समाधीयत इति चेन्न। शास्त्रापर्यवसानप्रसङ्गात्। अनन्तरसङ्गत्यभावाच्च।

परमत इति प्रथमसूत्रव्याख्यानपरीक्षा

यदुक्तम्- अतः पूर्वप्रकृतान्निखिलजगत्कारणात् परस्माद् ब्रह्मणः परमुत्तमं तत्त्वं किञ्चिदस्तीति मन्यते पूर्वपक्षी। कुतः? 'य आत्मा स सेतुः' (छा.उ.

८.४.१) इति सेतुत्वव्यपदेशात्। लौकिको हि सेतुः कस्यचित् पारादेः स्वयं प्रापकः, न तु मुख्यप्राप्यः। तद्वद् ब्रह्मापि स्वयमन्यस्य मुख्यप्राप्यस्य प्रापकमेवेत्यवगम्यते। 'चतुष्पाद् ब्रह्म', 'षोडशकलं ब्रह्म' (शाङ्करभाष्योदाहृतश्रुतिः) इति मितत्वव्यपदेशाच्च। स हि ब्रह्मणोऽन्येनामितेन भवितव्यमित्यवगमयति। 'अमृतस्यैष सेतुः' (मुण्ड.उ. २.२.५) इति प्राप्यप्रापकत्वरूपसम्बन्धव्यपदेशाच्च। नह्यन्यस्योत्तमस्याभावे सेतुशब्दवाच्यस्य परब्रह्मणः प्रापकत्वं सम्भवति। तस्मादमृतशब्दवाच्यं ब्रह्मणोऽन्यदुत्तममस्तीति प्रतीयते। 'तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरम्' (श्वेत.उ. ३.९) इति पुरुषशब्दनिर्दिष्टाद् ब्रह्मण उत्तरत्वेन व्यपदेशाच्चेति पूर्वपक्षोऽनेनोच्यत इत्याद्यस्य व्याख्यानं तदयुक्तम्। सेतुत्वादिव्यपदेशमात्रेणान्यस्योत्तमस्यासिद्धेः। नहि दृष्टान्तगतसर्वधर्मेणापि दार्ष्टान्तिके वर्तितव्यमित्यस्ति नियमः। विधारणसमर्थाश्रयत्वादि तु नान्योत्तमत्वमाक्षिपति। एवं 'सेतुं तीर्त्वा' इति तस्य तरितव्यत्वोपदेशात् तदुत्तमत्वसिद्धिस्तर्हि तदेव वक्तव्यम्। किमनेनार्थात् प्रापकेण। उच्छब्दश्चोद्गतमुत्थितमित्यादौ अर्थाभावे वर्तत इत्युन्मानशब्दस्य मानराहित्यमेवार्थ इति मितत्वव्यपदेशादित्यपव्याख्यानमेव। मितत्वव्यपदेशस्य ब्रह्मान्यत्वप्रापकत्वास्फूर्तेश्च। 'अमृतस्यैष सेतुः' (मुण्ड.उ. २.२.५) इति षष्ठीघटितस्य व्यपदेशस्य सम्बन्धव्यपदेशत्ववत् 'ततो यदुत्तरम्' इति पञ्चमीगर्भस्यापि व्यपदेशस्य सम्बन्धव्यपदेशत्वसम्भवाद् भेदव्यपदेशत्वेन व्याख्यानायोगात्।

द्वितीयसूत्रव्याख्यानपरीक्षा

यच्च, यथा सेतुर्जलादीनां धारक एवमेव लोकानामसम्भेदाय ब्रह्मापि धारकमिति सेतुसामान्याद् धारकत्वेन सेतुसादृश्याद् ब्रह्मणः सेतुत्वव्यपदेशः, न त्वन्यप्राप्यवस्तुकत्वादिनेति सेतुत्वव्यपदेशस्य दूषणमनेनोच्यत इति कल्पितस्य 'सामान्यात्तु' इत्यस्य व्याख्यानं तत्तु न तद्गतपदारूढम्। प्रकृतत्वात् सेतोरन्वये

उन्मानसम्बन्धभेदानामपि तत एव सादृश्यप्रतियोगित्वेनान्वयापातात्। प्राप्यवस्त्वन्तरकत्वस्यापि सेतुधर्मस्य सामान्यशब्देन ग्रहणे निवारकाभावाच्च। गौणवृत्त्याश्रयणस्य पक्षद्वयेऽपि सद्भावात्।

तृतीयचतुर्थसूत्रव्याख्यानपरीक्षा

'चतुष्पाद् ब्रह्म', 'पादोऽस्य विश्वा भूतानि' (ऋ.सं. १०.९०.३, त्रि.म.ना. ४.४) इत्युन्मानव्यपदेशस्तथोपासनार्थः। यथा 'वाक् पादः' इत्यादिना वागादिपादव्यपदेशः इति 'बुद्ध्यर्थः पादवत्' (ब्र.सू. ३.२.३४) इति सूत्रं व्याख्याय, स्वयमपरिमितस्वरूपस्याप्यनुसन्धानार्थतयाऽपि कथमुन्मानत्वमिति चेत्, प्रतिपन्नवागादिस्थानविशेषसम्बन्धात् तत्तत्स्थानसम्बन्धित्वेनावच्छिद्यानुसन्धानं युज्यते यथा प्रकाशादेर्विततस्याप्यमितस्य वातायनघटादाविति 'स्थानविशेषात् प्रकाशादिवत्' (ब्र.सू. ३.२.३५) इति चतुर्थस्य व्याख्यानं, तन्न। अपरिमितस्य ब्रह्मणः कथं परिमितत्वव्यपदेशः? इत्याक्षेपस्य तद्घटकोक्त्येव प्रयोजनोक्त्या शान्त्यभावात्। अपृष्टपरिभाषणप्रसङ्गाच्च। 'स्थानविशेषात्' इत्यस्य सम्बन्धपर्यन्तत्वे लक्षणाप्रसङ्गाच्च। 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' (ब्र.सू. १-३-२५) इत्यादावस्याः सूत्रावतारशङ्कायाः परिहृतत्वाच्च।

पञ्चमसूत्रव्याख्यानपरीक्षा

'उपपत्तेश्च', 'अमृतस्यैष सेतुः' (मुण्ड.उ. २.२.५) इति स्वस्यैव स्वयम्प्रापक इति सेतुत्वव्यपदेशोपपत्तेश्चान्यत् परमस्तीति कल्पनं न युज्यत इति तदनन्तरसूत्रार्थवर्णनं चायुक्तम्। ततोऽन्यस्याभावे प्रापकत्वव्यपदेशस्य बाधकान्तरस्येहोद्धारेऽपि तदभावसाधकस्य युक्तिविशेषस्यानुपन्यासात् 'उपपत्तेश्च' (ब्र.सू. ३.२.३६) इति सूत्रास्वारस्यात्। सम्बन्धभेदव्यपदेशयोः शङ्कितयोर्गतिप्रदर्शनानन्तरमेव सेतुव्यपदेशरूपबाधकस्योद्धारे सङ्गतिसम्भवेऽपि इदानीमवसराभावाच्च।

'तथाऽन्यप्रतिषेधात्' इति षष्ठसूत्रव्याख्यानपरीक्षा

'ततो यदुत्तरम्' इति बाधके शङ्किते ब्रह्मणोऽन्यस्य कस्यचिदुत्तमत्वं नाऽह। 'न तस्येशे कश्चन तस्य नाम महद् यशः' (तै.ना.उ. १.१०), 'नह्येतस्मादिति नेत्यन्यत् परमस्ति' (बृ.उ. २.३.६), 'यस्मात् परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्' (श्वे.उ. ३.९) इत्यादिनाऽन्यस्य प्रतिषेधादिति 'तथाऽन्यप्रतिषेधात्' इति सूत्रव्याख्यानं, तदप्ययुक्तम्। 'ततो यदुत्तरम्' इति बाधके शङ्किते तद्दूषणस्येदम्प्रथमत्वात् समुच्चायकतथा-शब्दायोगात्। 'उपपत्तेश्च' (ब्र.सू. ३.२.३६) इत्यनेनैवास्यापि बाधकस्यो-द्धारसम्भवेन 'ततो ब्रवीति च भूयः' इत्युक्तार्थत्वाच्च। सूत्रप्रणयनवैयर्थ्याच्च। मद्रीत्या तथाऽन्यदलौकिकं लौकिकत्वप्रतिषेधादिति सूत्रेणैव हेतुसाध्ययोः समर्पणसम्भवेऽपपाठेनाध्याहारेण च व्याख्यानानुपपत्तेश्च। 'ततो यदुत्तरम्' इति श्रुतेरर्थान्तरस्यानुक्त्या बाधकपरिहारस्याप्यसम्भवाच्च। यतो ब्रह्मैव सर्वोत्तमम्, अतो 'यदुत्तरं ब्रह्मैतद् ये विदुस्ते अमृता भवन्ति अथेतरे अज्ञानिनः दुःखमेवापियन्ति' इति पूर्वोक्तप्रमेयमुपसंहृतमिति गतिरस्य वाक्यस्य भविष्य-तीति चेत्, तर्ह्येतदेवावश्यं वक्तव्यमनुक्त्वाऽवश्यवक्तव्यकथनेऽस्य सूत्रत्व-भङ्गापत्तेः।

अनेन सर्वगतेति सप्तमसूत्रव्याख्यानपरीक्षा

'तेनेदं पूर्णं पुरुषेण सर्वम्' (तै.ना.उ., श्वे.उ. ३.३९), 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' (तै.ना.उ. ११.११), 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' (मुण्ड.उ. १.१.६) इत्यादिभ्यो व्याप्तिवाचित्वादायामविवक्षितेभ्यो[१] वचनेभ्यः 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२) इत्याद्यादिशब्दगृहीतेभ्यो वचनेभ्यश्चानेन ब्रह्मणा सर्वगतत्वं सर्वस्यापि तेन व्याप्तत्वमुच्यत इत्यन्तिमस्यार्थोऽप्ययुक्तः।

१. 'आयामपदविवक्षितेभ्यः' इति पाठेन भाव्यमिति भाति।

अत्र हि किमनेन कृतं स्यादिति वक्तव्यम्। साधकान्तरमुच्यत इति चेन्न। चशब्दादर्शनात्। अन्यस्य वस्तुनोऽङ्गीकारे तस्यैव सर्वगतत्वं श्रुतिः श्रावयेन्न ब्रह्मण इति बाधकमनेनोच्यत इति चेत्, अन्यप्रतिषेधात्मकं बाधकमुक्तमेव। बाधकान्तरमनेनोच्यत इति तु चशब्दाभावादयुक्तमित्युक्तम्। 'सर्वगतं सुसूक्ष्मम्' इत्यादिस्पष्टतरप्रमाणोपन्यासानन्तरं 'आत्मैवेदं सर्वम्' (छा.उ. ७.२५.२) इत्यादिव्याख्यानसापेक्षास्पष्टप्रमाणग्राहकादिशब्दवैयर्थ्याच्च । 'कर्तृकर्मणोः कृति' (पा.सू. २.३.६५) इति षष्ठ्यापत्तेश्च । असामर्थ्येनोक्तप्रयोजना-युक्तेश्च। तस्मात्-

असम्प्रदायतः प्राप्तं व्याख्यानं नेष्टसाधनम्।
सम्प्रदायज्ञसर्वज्ञमुनिना कृतमेव नः॥

टीकायाः पूर्वपक्षन्यायविवरणयोजकत्वम्

टीकाक्षरार्थस्तु- नानाभावन्यायं भवति अनेन वस्तुसिद्धिरिति भावो दर्शन-मित्यभिप्रेत्य नानाशब्दस्य विशेष्यं निर्दिशद् भाष्योक्तयुक्तत्वमप्युपपाद-यदेतदधिकरणसङ्गतत्वेन विवृण्वत् **'नच नानावतारकौतुकदर्शनाद् विष्णोः कदाचिद् देशकालान्तरे कौतुकादेव सृष्ट्यादिकमकुर्वन्नन्यमेव सामस्त्येन नियोजयति'** (न्या. वि.) इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे- **न च विष्णोरन्य-स्येति** ॥ शङ्कते- **नचैतदसम्भावितमिति** ॥ अप्रेक्षावत्त्वप्राप्तेरिति भावः । तदुत्तरत्वेन 'नानावतारकौतुकदर्शनाद् विष्णोः' इत्यन्तं व्याचष्टे- **तस्यावतारे-ष्विति** ॥ गोपिकायै स्वबन्धकत्वस्य उग्रसेनपाण्डवप्रभृतिभ्यश्च स्वसेव्यत्वस्य, भीष्मादिभ्यश्च स्वप्रहर्तृत्वादिसामर्थ्यस्य च दानदर्शनादिति भावः । तथाच कौतुकशब्दो लीलापरः। स चावतारशब्देन सप्तम्यन्तेन समस्यते। नानाशब्दश्च कौतुकविशेषणम् । नानाविधस्य स्वबन्धकत्वादिशक्तिदानादिरूपस्य कृष्णाद्यवतारगतकौतुकस्य दर्शनाद् विष्णोरन्यस्मै स्वातन्त्र्यदानाख्यलीलाऽपि

सम्भावितैव। तथाच विष्णुः कचिद्देशकालविशेषे स्वातन्त्र्येण सृष्ट्यादिकं कुर्वन्नपि कचित् कदाचिद् देशकालान्तरे लीलयैवान्यस्मै स्वातन्त्र्यं दत्त्वा तमन्यं सामस्त्येनैव स्वातन्त्र्येणैव सृष्ट्यादौ नियोजयतीत्येतदपि सम्भावितमेवेति विवरणयोजना द्रष्टव्या।

टीकायाः सिद्धान्तन्यायविवरणयोजकत्वम्

न्यायमालोक्तं स्वातन्त्र्यन्यायं श्रुत्युदाहरणपूर्वकं विवृण्वत् '' 'सर्वत्र सर्वमेतस्मात्' (माध्व.भा.उ. चतुर्वेदशिखा) इत्यादिश्रुत्या क्रीडायामपि स्वातन्त्र्यात्।

'स्वातन्त्र्यात् क्रीडते विष्णुर्न च स्वातन्त्र्यमन्यगम्।
करोति कापि नियता क्रीडा सृष्ट्यादिकाऽस्य[१] च॥
नियतक्रीडनादेव कर्ता नान्योऽस्ति कस्यचित्।
अस्वतन्त्रो हि चलति चलचित्तादशक्तितः।
स्वतन्त्रः पूर्णशक्तिः सन् कुतोऽसौ नियतिं त्यजेत्॥'

इति श्रुतेश्च'' (अनुपलब्धाकरा श्रुतिः) इति वाक्यं व्यर्थम्। स्वपरपक्ष-साधकसदसद्भावयोर्भाष्ये एव सूत्रस्थादिशब्दव्याख्यानेन सूचितत्वादित्यत एतत्सार्थक्याय त्रेधा विकल्प्य भाष्यं च क्रमेण व्याचष्टे- **किं विष्णोः सर्व-कर्तृत्व इत्यादिना॥** आद्यनिरासकत्वेन भाष्यं योजयति- **नाऽद्यः। श्रुति-सद्भावादिति॥** भाल्लवेयचतुर्वेदशिखयोः सद्भावादित्यर्थः। 'आदिशब्दादन्यत्र प्रमाणाभावात्' इति भाष्यं द्वितीयनिरासकतया योजयति- **न द्वितीयः। तदभावादिति॥** तृतीयनिरासकत्वेन विवरणं व्याख्यातुमादौ किञ्चिदध्याहरति- **नान्त्यः। अप्रामाणिककल्पनस्येति॥** सम्भावनामात्रस्य प्रमाणत्वाभावात् तन्मात्रादेव प्राप्ताप्रामाणिकान्यकर्तृत्वादिकल्पनस्य कस्मिंश्चिदपि प्रमेये उप-

१. ह. सृष्ट्यादिगाऽस्य

योगायोगादित्यर्थः। 'नानावतारकौतुकदर्शनाद् विष्णोः' इत्यादिविवरणोक्त-पूर्वपक्षनिरासकत्वेन प्रस्तुतं विवरणं व्याख्यातुमवतारयति - **नचावतारे-ष्विति॥** तत्कल्पनं नाप्रामाणिकम्। अवतारेषु विविधलीलादर्शनस्यैव प्रमाणत्वादित्यर्थः। एतन्निरासकतया 'क्रीडायामपि स्वातन्त्र्यात्' इत्यादि-वाक्यमर्थक्रमाद् व्याचष्टे- **स्वातन्त्र्यात् क्रीडते विष्णुरित्यादिना क्रीडावगमादित्यन्तेन॥**

अत्र यद्यपि विवरणे 'क्रीडायामपि स्वातन्त्र्यावगमात्' इत्याद्येवोक्तरीत्योप-क्षिप्तपक्षदूषणत्वेन युक्तम्। न तु ततः प्राचीनं 'सर्वत्र सर्वमेतस्मात्' (चतुर्वेद-शिखाश्रुतिः) इत्यादिश्रुत्यन्तम्। तथाऽपि स्वपक्षसाधकोक्त्यनन्तरमेव परपक्षः प्रतिक्षेप्य इति वादकथाप्रक्रियाशिक्षणाय भाष्योक्तानुवादमात्रम्। तृतीयान्तस्य प्रमाणाभावादिति प्रथमपक्षायोगादित्यध्याहृतेनान्वयः। तेन तावदेकं वाक्यमिति सिद्ध्यति। यद्यपि भाष्ये 'एष सर्व एष सर्वगतः' (भाष्य.उ.भाल्लवेयश्रुतिः) इत्यादिभाल्लवेयश्रुतिः सूत्रानुसारात् प्रथमत उपात्तेति विवरणेऽपि तथैवानुवादो युक्तः। तथाऽपि स्पष्टं विवक्षितार्थप्रतिपादनाभावात् तल्लङ्घनेनानन्तरोपात्त-श्रुत्यनुवादः। सूत्रे तु वादकथाप्रक्रियाशिक्षणाय व्यत्यासः। विवक्षितार्थ-प्रतिपादकत्वेनाभ्यर्हितत्वेऽपि चतुर्वेदशिखाया अल्पाल्पच्तरत्वाभावेन पूर्व-निर्देशाभावः। तदनुसारिणि भाष्ये च स्पष्टं विवक्षितार्थप्रतिपादकत्व-रूपाभ्यर्हितत्वाभावेऽपि भाल्लवेयश्रुतेः पूर्वनिर्देशः। अत एव टीकायां सर्वगतत्वं च ब्रह्मणः सर्वसृष्ट्यर्थमेवेति बलादेव भाल्लवेयश्रुतेर्विवक्षितार्थे तात्पर्योपपाद-नम्। ततश्चैवं श्रुतियोजना- कस्यचित् सृष्ट्यादेः स्वातन्त्र्यात् कर्ता विष्णोरन्यो नास्ति स्वातन्त्र्यस्य विष्ण्वैकनिष्ठत्वात्।

ननु विष्ण्वैकनिष्ठस्योपास्यत्वादेरुग्रसेनादिभ्यो लीलया दानदर्शनात् स्वातन्त्र्यमपि लीलया दीयमानमन्यगं किं न स्यादत आह- **क्रीडते विष्णु-**

रिति ॥ यद्यपि विष्णुः स्वोपास्यत्वादिदानेन क्रीडते तथाऽपि कचिंद् देशकालेषु स्वातन्त्र्यमन्यगं न करोत्येवान्यस्मै स्वातन्त्र्यं न ददाति।

किञ्चास्य विष्णोः सृष्ट्यादिविषयणी क्रीडा च नियता। क्रीडयाऽपि संहारकाले सृष्टिं न करोति। नापि सृष्टिकाले संहारमित्यर्थः। एतच्च प्रतिबन्दीग्रहणायोक्तम्। तत्र हेतुमाह- **नियतक्रीडनादेवेति** ॥ क्रीडायामपि नियमाङ्गीकारात् स्वोपास्यत्वादेर्लीलया दानं, स्वातन्त्र्यस्य तदभावः। यथा सृष्टिकाले एव सृष्टिर्न संहारकाले। तथाऽपि निमयःस्यादिति भावः। समरे योद्धृभिः स्वसङ्कल्पितोऽप्यपलायननियमस्त्यज्यमानो दृश्यत इति चेत्, तत्राऽह- **अस्वतन्त्रो हीति** ॥ अस्वतन्त्रो नियतिं त्यजति। कुतः ? यतश्चलति धैर्यात्। तदपि कुतः? चलचित्तात्। भावप्रधानः चलचित्तत्वात्। तदपि अशक्तितः अल्पशक्तित्वात्। ईश्वरस्तु स्वतन्त्रोऽत एवाचश्चलचित्तोऽत एव पूर्णशक्तिः सन्नपि कुतो नियतिं त्यजेदिति श्रुतेश्च क्रीडायामपि स्वातन्त्र्यादत्यक्तस्वातन्त्र्यस्यैव क्रीडावगमादित्यादि पूर्वेणान्वयः। चशब्दश्च भाष्योक्तसाधकसद्भावानुवादसमुच्चायकः।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

सङ्क्षेपभाष्यमपि अखण्डेशत्वाधिकरणस्येवास्यापि सङ्ग्राहकं योज्यम्।

॥ इति सर्वगतत्वाधिकरणम् ॥ १९ ॥

॥ अथ फलदानाधिकरणम् ॥२०॥

॥ सूत्रभाष्यम् ॥

कर्मापेक्षत्वात् फलदानस्य तदेव ददातीति न वाच्यम्। कुतः ?

॥ ॐ फलमत उपपत्तेः ॐ ॥ ३-२-३९ ॥

अत एवेश्वरात् फलं भवति। नह्यचेतनस्य स्वतः प्रवृत्तिर्युज्यते ॥ ३९॥

॥ ॐ श्रुतत्वाच्च ॐ ॥ ३-२-४० ॥

'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्' ॥ (बृ.उ.५-९-२८) इति ॥ ४० ॥

॥ ॐ धर्मं जैमिनिरत एव ॐ ॥ ४१ ॥

यतः फलं तदेव कर्मेश्वराद् भवति। 'एष ह्येव साधु कर्म कारयति' (कौ. उ. ३-८) इति श्रुतेरिति जैमिनिः ॥ ४१ ॥

॥ ॐ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॐ ॥ ४२ ॥

परस्य कर्मणश्चोभयोः फलकारणत्वेऽपि न कर्म परप्रवर्तकम्। पर एव कर्मणः प्रवर्तकः[1]। 'पुण्येन पुण्यं लोकं नयति पापेन पापम्' (प्र. उ. ३-२) इति हेतुव्यपदेशात्। 'द्रव्यं कर्म च कालश्च' इति च ॥ ४२ ॥

॥ इति फलदानाधिकरणम् ॥ २० ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥

---

१. ह. कर्मप्रवर्तकः।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवत्प्राप्तिसाधनभक्त्यर्थं तस्य कर्मफलदातृत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। तदभावे निरतिशयैश्वर्यायोगेन तत्र निरतिशयभक्त्यनुदयात् तत् समर्थनीयम्। प्रकृतो हरिरेव विषयः। किं कर्मफलदाता न वेति सन्देहः। विप्रतिपत्तिः सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **कर्मेति** ॥ कर्मैव फलदातृ, नेश्वरः। यैः फलदातृत्वमीश्वरस्योच्यते तैरपि तस्य कर्मापेक्षया फलदातृत्वस्यावश्यमङ्गीकार्यत्वात्। अन्यथा कर्मवैयर्थ्यापातात्। ततश्च वेदाप्रामाण्यप्रसङ्गाद् वैषम्यादिदोषानुषङ्गादकृतकर्मणः फलादर्शनाच्च। एवं च सति फलस्य कर्मान्वयव्यतिरेकित्वात् तदेव फलप्रदं, नेश्वरः। अतो न तद्भक्तिः कार्येति भावः।

सिद्धान्तः

सिद्धान्तयन्नेतत् प्रतिषेधति- **इति न वाच्यमिति** ॥ हेतुं पृच्छति- **कुत इति** ॥ तदुत्तरत्वेन सूत्रमुपन्यस्य व्याचष्टे- **फलमिति** ॥ ईश्वर एव फलदाता न कर्म। तस्य चेतनत्वेन फलदानोपपत्तेः। इतरस्याचेतनत्वेनानुपपत्तेः। यत एवमतो न वाच्यमिति भावः ॥ ३९ ॥

ईश्वरस्य फलदातृत्वनिश्चायकप्रमाणोपन्यासः

नन्वीश्वरस्य चेतनत्वेन फलदातृत्वसम्भावनैव भवेत्, नतु निश्चयः। अतः कुतोऽसावित्याशङ्कां परिहरत् सूत्रं पठित्वा तदुपात्तश्रुतिमुदाहरति- **श्रुतत्वाच्चेति** ॥ दातुर्यजमानस्य तिष्ठमानस्य स्वस्मिन् मनसा वर्तमानस्य रातिः फलप्रदमित्यर्थः ॥ ४० ॥

अन्वयव्यतिरेकाभ्यां कर्मणः फलदातृत्वाक्षेपः

उक्तमाक्षिपत् सूत्रमुपन्यस्य व्याचष्टे- **धर्ममिति** ॥ यदुक्तमीश्वर एव फलदाता न कर्मेति, तदयुक्तम्। फलस्य कर्मान्वयव्यतिरेकित्वात्। इदं तु न्याय्यं कर्मैव फलप्रदम्। तच्च कर्मेश्वराद् भवतीतीश्वरोऽपि फलदातृतयोपचर्यते 'रातिर्दातुः' (बृ.उ. ५.९.२८) इत्यादिश्रुताविति। कर्मकारणत्वं चेश्वरस्योपचारबीजम् 'एष ह्येव' (कौ.उ. ३.८) इति श्रुतिसिद्धम्। न केवलं कर्मणः फलदातृत्वं न्यायप्राप्तं, किं नाम? जैमिनिराचार्योऽपि मन्यत इति भावः। धर्मपदमधर्मस्याप्युपलक्षणम्। अत्रात एवेति द्विधा व्याख्यातं ज्ञेयम् ॥ ४१ ॥

तत्परिहारः

एतत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **पूर्वं त्विति** ॥ कर्मैव फलप्रदमीश्वरे तूपचार इत्युक्तमयुक्तम्। किन्तु कर्मान्वयव्यतिरेकित्वात् फलस्य श्रुतिबलादेवेश्वरकर्मणोरुभयोरपि तत्कारणत्वम्। तत्रापि नोभयोः समप्रधानभावः, किन्तु फलदानक्रियायामेकं कर्त्रन्यत् कारणम्। तत्रापि न कर्म कर्तृ सत् कारणमीश्वरं प्रयोजयति। किं नाम? फलदाने पूर्वोक्तं ब्रह्मैव कर्तृ करणभूतं कर्म प्रवर्तयति। करणत्वेऽपि कर्मणोऽन्वयव्यतिरेकाविरोधात्। कुत एतत्? चेतनस्य कर्तृत्वमचेतनस्य करणत्वमिति लोके दर्शनात् 'पुण्येन' इति श्रुतौ ब्रह्मणः कर्तृत्वव्यपदेशात् कर्मणः करणत्वव्यपदेशाच्चेति भगवान् बादरायणो मन्यत इति भावः। सामान्यतः कर्मणः कारणत्वं जैमिनेरभिप्रेतम्। तच्चाभ्युपगतमिति न विरोधः। न केवलं फलदानक्रियायां कर्म परप्रेरितं, किन्तु तत्सत्ताऽपीश्वराधीनेति न तत्कर्त्रीति भावेनाऽह- **द्रव्यमिति** ॥ अतः परमेश्वरस्यैव कर्मफलदातृत्वान्निरतिशयमहिम्नि तस्मिन् भक्तिः कर्तव्येति सिद्धम् ॥ ४२ ॥ अ.२० ॥

॥ इति श्रीमदानन्दभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्त्वप्रकाशिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥

॥ शेषतात्पर्यचन्द्रिका ॥

ॐ फलमत उपपत्तेःॐ ॥ ३-२-३९ ॥

एतदधिकरणप्रतिपाद्यविषयः सङ्गतिश्च

अत्रेश्वरः कृष्यादिलौकिकसाधनैः कर्मज्ञानादिवैदिकसाधनैः **प्रत्यवायादिना च** उत्पाद्यानां धान्यादीनां स्वर्गनरकादीनां मोक्षात्मनां कर्मक्षयोत्क्रान्तिमार्गभोगानां[1] च फलानां दातेति प्रतिपाद्यते। ''कर्मफलदातृत्वसमर्थनात्' इत्यादिटीका तु स्थालीपुलाकन्यायेन प्रवृत्ता न तन्मात्रपरा। अन्यथा सूत्रे सामान्योक्तिः 'स्वर्गनरकादीनाम्' इति सुधायां चाऽदिशब्दश्च न स्यात्। धान्यापवर्गयोर्दातृत्वविचिकित्सायामधिकरणान्तरारम्भश्च स्यात्। अत एव 'क्वचिज्ज्ञानं जनयन् भस्म कुर्यात् स्वेच्छावृत्तिस्तस्य विष्णोः सदैव' (ब्रह्माण्डपुराणम्) इति कर्मक्षयमपि भगवानेव करोतीति विवरणसिद्धान्तोक्तिरपि घटते। अत एव स्यादिदं सृष्ट्यादिकर्तृत्वं भगवतः यदि तदन्तर्गतमोक्षादिफलदातृत्वं स्यादिति शङ्कनाद् वा, पूर्वोक्तस्वातन्त्र्यरूपन्यायातिदेशनाद् वाऽनन्तरसङ्गतिः।

संशयपूर्वपक्षौ

तत्रेश्वरः फलदाता न वा। तस्य फलदातृत्वे प्रमाणं बाधकाभावश्चास्ति न वेत्यादि संशयितव्यम्। तत्र

कर्मादि स्वफलं दद्यादन्यथा तद् वृथा भवेत्।
वेदप्रामाण्यभङ्गाच्च नेशो मानाद्यभावतः ॥

नेश्वरः फलदाताऽभ्युपगन्तुं शक्यते। कर्तृत्वगर्भस्य दातृत्वस्य हि व्यापकं कारणत्वम्। कारणत्वविशेषत्वात् कर्तृत्वस्य। सामान्यविशेषयोश्च द्रव्यत्वघटत्वादिवद् व्याप्यव्यापकभावनियमात्। फलकारणत्वं च ब्रह्मणि नोपपद्यते।

१. म. भोगरूपाणाम्।

'स कारयेत् पुण्यमथापि पापम्' (ब्र.सू.भा.उदाहृतचतुर्वेदशिखाश्रुतिः) इत्यादिश्रुत्यवगतकर्मादिकारणत्वेनोपक्षीणत्वात्। नचान्यत्रोपक्षीणं कुलालजनकत्वादिकारणवत्[1] कारणं भवितुमर्हम्। न चाऽत्र कारणत्वावगमकारणमन्वयव्यतिरेकानुविधानमस्ति। अत एव 'रातिर्दातुः परायणम्' (बृ.उ. ५.९.२८) इत्यादिश्रुतिभिः फलकारणकर्मकारणत्वात् फलकारणमित्युपचर्यते। कर्मणः फलकारणत्वं चान्वयव्यतिरेकाभ्यां सर्वैरङ्गीकृतमेव। ईशस्य वैषम्यनैर्घृण्यादिपरिजिहीर्षया कर्मादिसाधनापेक्षां वदताऽपि कारणत्वस्यावश्याङ्गीकार्यत्वात्। अकृतकर्मणः फलसद्भावे 'स्वर्गकामो यजेत' (आ.श्रौ.सू.) इत्यादिश्रुतिवैयर्थ्यादप्रामाण्यादिदोषप्रसङ्गाच्च।

कारणत्वकर्तृत्वयोर्मध्ये कर्मणः कारणत्वमात्राङ्गीकारेण पूर्वपक्षः

ननु किमत्र कर्मणः कारणत्वं कर्तृत्वं चोभयं स्वीकृतम्, उत कारणत्वमेव न कर्तृत्वमिति। नाऽद्यः। कर्मणोऽचेतनस्य प्रयत्नादिगर्भकर्तृत्वासम्भवात्। न द्वितीयः। तथा सतीश्वरोऽप्युक्तरीत्या तव कर्ता नेष्ट इति फलमकर्तृकमापद्येत। तच्च नेष्टम्। कार्यमात्रस्य कर्तृनैयत्यादिति चेन्न। कारणत्वमात्राङ्गीकारेणेह पूर्वपक्षसम्भवात्। तर्हि फलस्य कः कर्तेति चेत्, न कोऽपि। कार्यस्य सकर्तृकत्वनियमस्तु जलपानादिजन्यतृप्त्यादौ व्यभिचीर्णः। अयं च पक्षो 'न ब्रूमो वयं राजादिरिव कर्म फलं ददातीति। किन्तु कारणमात्रम्' इति सुधायामुक्तः।

उभयाङ्गीकारेण पूर्वपक्षः

यद्वा, इहत्यटीकारीत्या कर्मण उभयमङ्गीकृत्यैव पूर्वपक्षः। नचाचेतनस्य कर्तृत्वानुपपत्तिः। 'फलं पतति', 'घटस्तिष्ठति' इत्यादौ तद्दर्शनेनाचेतनस्य कर्तृत्वाभावनियमासिद्धेः। नचाऽगमविरोधः। 'सिंहो माणवकः' इत्यादिवदुपचारसम्भवात्। 'स्वर्गकामो यजेत' (आ.श्रौ.सू.) इत्याद्यागमस्यैवोपचारसम्भवेन वैपरीत्यं किं न स्यादिति चेन्न। बहुबाधस्यान्याय्यत्वात्। बहवो

१. 'कुलालजनकादिवत्' इति पाठेन भाव्यमिति भाति।

ह्यागमाः कर्मविधायकाः। ब्रह्मकारणत्वावगमास्तु कतिपयाः सावकाशा अतत्तात्पर्यकाश्चेति न वैपरीत्यं युक्तम्।

निखिलाम्नायस्य निष्प्रपञ्चब्रह्मण्येव तात्पर्यात् कर्मणां फलदातृत्वबोधकश्रुतीनामेवोपचरितार्थत्वमिति भामतीरीत्या वैपरीत्यशङ्का

अत्राऽह- 'स्वर्गकामो यजेत' (आ.श्रौ.सू.) इत्यादयो विधयो यागादिकं फलं प्रति साधनतया विदधतीति ब्रुवाणः प्रष्टव्यो जायते। किं यागादय एव क्रिया, न ततोऽतिरिक्ता क्रियाऽस्तीति तव पक्षः, उत तदतिरेकिणी भावनाऽस्तीति। नाऽद्यः। तथा सति यजेतेत्यादिपदेभ्य एव पूर्वापरीभूताः साध्यस्वभावा एव यागादयोऽवगम्यन्त इति न तेषां साध्यान्तरापेक्षाऽस्तीति न स्वर्गेण साध्यान्तरेण सम्बन्धमर्हन्ति। न द्वितीयः। अङ्गीकृताऽप्यतिरिक्ता भावना स्वपदोपात्तं पूर्वावगतं च भाव्यं धात्वर्थमपहाय न भिन्नपदोपात्तं पुरुषविशेषणं च स्वर्गादिकं भाव्यतया स्वीकर्तुमर्हति। नचाऽख्यातवाच्यभावना यागं स्वर्गं च भाव्यतया स्वीकरोति। 'यागं कुर्यात्, स्वर्गं कुर्यात्' इति वाक्यभेदप्रसङ्गात्। स्वर्गादेः सिद्धस्वभावस्य पुरुषप्रयत्नाख्यभावनायाः साक्षात्साध्यत्वस्य धात्वर्थस्येवायोगेन तत्त्यागेनैकपदोपात्तयत्नसाध्ययागादेरेव भावनया ग्रहणस्यैवौचित्याच्च। स्वर्गस्तु नामपदवाच्यतया पुरुषविशेषणतया च गुणत्वेनैव 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः' इति न्यायेन सम्भत्स्यते, न फलत्वेन। नचेदमपि युक्तम्। यागादेः दुःखत्वेन पुरुषेणासमीहितत्वात्। असमीहितं च न भावनया भाव्यत्वेन ग्रहीतुं योग्यम्। अतस्तत्कामी नात्राधिकारी लभ्यते। नापि स्वर्गकामी। प्रागेव दूषितत्वात्। आहत्याधिकारी दुर्लभ इति 'यजेत स्वर्गकामः' (आ.श्रौ.सू.) इत्याद्याम्नायस्य वैयर्थ्यमेव प्राप्नोतीति मन्वानाः निखिलस्याप्याम्नायस्य निर्मृष्टनिखिलदुःखानुषङ्गनित्यसुखमयनिष्प्रपञ्चब्रह्मपरत्वं निश्चिनुमः। न तु यागादेः स्वर्गसाधनत्वादावित्यतत्परत्वाविशेषात् तेषामेवोपरिचरितत्वमिति वैपरीत्यशङ्कानुद्धार एव।

यजेतेत्यादिवाक्यस्य निष्प्रपञ्चब्रह्मणि तात्पर्यवर्णनम्

कथं 'यजेत' इत्यादिवाक्ये निष्प्रपञ्चब्रह्मणि तात्पर्यं प्रत्येतव्यम्? एवमेव तात्पर्येऽङ्गीक्रियमाणे सप्रपञ्चब्रह्मणि तात्पर्यं स्यादिति चेत्, अयमत्र निष्प्रपञ्चब्रह्मणि तात्पर्यनिश्चयप्रकारः। सर्वत्रैवाऽम्नाये क्वचित् कस्यचिदारोपितस्य प्रपञ्चस्य प्रविलयोऽर्थादवगम्यते। इह तावत् 'स्वर्गकामो यजेत' (आ.श्रौ.सू.) इत्यादावापाततो देहातिरिक्तः आमुष्मिकफलभोगसमर्थोऽधिकार्यवगम्यते। नच देहात्मभावस्याध्यस्तस्यानपगमे तत् सम्भवतीति देहात्मभावप्रविलये तात्पर्यमेवञ्जातीयकानां विधिवाक्यानां निश्चित्य, तद्द्वारा निष्प्रपञ्चब्रह्मण्यपि निश्चीयते। नचाऽपाततः प्रतीयमानाधिकार्यादावेतत्तात्पर्यं निश्चीयतामिति वाच्यम्। आमुष्मिकस्य स्वर्गादेरुक्तरीत्या भावनया भाव्यत्वेन ग्रहणासम्भवेन फलत्वायोगेन तत्कामस्याधिकारित्वायोगात्।

'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यैहिकफलकवाक्यस्य 'न कलञ्जं भक्षयेत्' इत्यादिनिषेधवाक्यानां च निष्प्रपञ्चब्रह्मणि तात्पर्यकथनम्

नन्वस्त्वेवमामुष्मिकफलवाक्ये देहात्मभावाख्याध्यस्तप्रपञ्चप्रविलये तात्पर्यनिश्चयः। यानि त्वैहिकफलसम्बन्धानि 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादीनि परप्रकरणाम्नातानि तेषु कथम्? इत्थम्। तत्राप्यापाततो वाक्यद्वयश्रवणसमनन्तरं 'स्वर्गकामो यजेत', 'श्वेतमालभेत भूतिकामः' (तै.सं. २.१.१) इत्यनयोरिव कामपदमहिम्ना 'यजेत स्वर्गकामः', 'पशुकामस्य प्रणयेत्' इत्यनयोरपि वाक्ययोरधिकारिभेदः प्रतीयते। नच वस्तुतोऽसावस्ति। प्रकरणबलेन यागेऽधिकृतस्यैवेहाधिकारावगमात्। अतो देहात्मत्वादिवदिहाधिकारिभेदोऽध्यस्त एव। तथाचाधिकारिभेदाख्याध्यस्तप्रपञ्चप्रविलयो भवति। वस्तुतो विचार्यमाणेऽधिकृताधिकारावगमात्।

'न कलञ्जं भक्षयेत्', 'ब्राह्मणो न हन्तव्यः', 'नानुयाजेषु येयजामहं करोति'

इत्यादिनिषेधे तु कथम्? तत्रोक्तप्रकारद्वयासम्भवात् प्रकारान्तरस्यानवभासात्। मैवम्। कलञ्जभक्षणब्राह्मणहननयेयजामहेषु प्रवृत्तिस्तावन्निवार्यते। प्रवृत्तिश्च ब्रह्मणोऽतिरिक्तस्य सर्वस्याऽविद्यकत्वसिद्धान्तेऽध्यस्तैवेति तन्निषेधने प्रवृत्त्याख्याध्यस्तप्रपञ्चप्रविलयः सुलभ एव।

अनारभ्याधीतानां साङ्ग्रहिण्यादिवाक्यानामपि निष्प्रपञ्चब्रह्मणि तात्पर्यनिरूपणम्

नन्वथापि 'साङ्ग्रहिण्या[१] यजेत ग्रामकामः', 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' (तै.सं. २.३.२), 'वायव्यं श्वेतमालभेत भूतिकामः' (तै.सं. २.१.१) इत्यादीनि यान्यनारभ्याधीतानि ऐहिकफलकानि तेषु कथम्? ऐहिकफलभोगसमर्थस्याधिकारित्वावगमेऽपि देहात्मभावप्रविलयाभावात्। अधिकृताधिकारानपगमेनाधिकारिभेदप्रविलयाभावात्। नञा हि निर्देशाभावेन प्रवृत्तेरप्यवारणाच्च।

मैवम्। यतस्तत्राप्यस्ति प्रकारविशेषः। 'विषं भक्षय, माऽस्य गृहे भुङ्क्ष्व' इत्यादौ 'विषं भक्षय' इति विधेर्न विषभक्षणविधौ तात्पर्यम्। अपि तु शत्रुगृहभोजननिवर्तने।[२] 'माऽस्य गृहे भुङ्क्ष्व' इति उत्तरवाक्याद् यथा तात्पर्यमवगम्यते तथा 'मा गृधः कस्यचिद् धनम्' इति वाक्यान्तरबलात् 'साङ्ग्रहिण्या यजेत' इत्यादावपि राजसेवादिदृष्टोपायप्रतिषेध एव तात्पर्यं, नतु साङ्ग्रहिण्यादिप्रवृत्तौ। अत एव रागाद् राजसेवादौ प्रवृत्तस्य प्रवृत्तिनिषेधकत्वादेव साङ्ग्रहिण्यादीनां शास्त्रत्वमपि युक्तम्। साङ्ग्रहिण्यादिप्रवृत्तौ तात्पर्ये तु प्रागेव रागेणान्धीभूतस्य रागसंवर्धनाच्छिक्षकत्वाभावेनाशास्त्रत्वप्रसङ्ग इत्येवं सर्वत्रापि प्रपञ्चप्रविलयार्थत्वमूह्यमिति तद्द्वारा निष्प्रपञ्चब्रह्मणि तात्पर्यसिद्धेर्न क्वापि कर्मफलसम्बन्धे तात्पर्यमिति कर्मणः फलसाधनत्वबोधकाभावादनादिविचित्राविद्यासहकारिणः

१. क. साङ्ग्रहण्या।
२. वाक्यारम्भे 'अत्र' इति पदम् आवश्यकमिति भाति।

कर्मानपेक्षादीश्वरादेव विचित्रफलोत्पत्तिरिति युक्तम्। अतः कथमीश्वरस्य फलसाधनकर्मसाधनत्वेनेश्वरकारणत्ववाचिनामुपचरितार्थत्वमिति।

तन्निरासः

अत्रोच्यते। 'यजेत स्वर्गकामः' इत्यादीनां स्वर्गकामादिरूपाधिकारिणि तात्पर्यानभ्युपगमे विधित्वमेव न स्यात्। प्रवर्तकत्वं हि विधित्वम्। न ह्यधिकारी नास्ति, प्रवर्तयति चेदं वाक्यमिति विप्रतिषिद्धमङ्गीकर्तुं युक्तम्। प्रवर्तकस्याधिकृतसापेक्षत्वनियमात्। प्रयोजनाभावाच्च विधित्वानुपपत्तिः। नहि प्रयोजनं विना किञ्चित् प्रेरयतीति युक्तम्।

यद्यपि पवनादिरूपाध्यायादिश्च प्रवर्तकोऽधिकारिप्रयोजने विनाऽपि दृष्टः। तथाऽपीह विवक्षितस्योपदेशत्वात्मकविधित्वस्योपदेश्यपुरुषप्रयोजनं विनाऽनुपपत्तिः। 'आरोग्यकामो जीर्णे भुञ्जीत', 'एष तु पन्थाः, गच्छतु भवाननेन' इत्याद्युपदेशात्मकविधिषु नियोक्तुः प्रयोजनाभावेऽपि नियोज्यस्य प्रयोजनदर्शनात्।

यद्यपि 'जलमाहरस्व। पास्यामो वयम्' इत्याद्युपाध्यायवाक्ये आज्ञात्वादिरूपविधित्वं नियोज्यस्य प्रयोजनं च नास्तीत्युपलब्धम्। तथाऽपि इहापौरुषेये वेदेऽभिप्रायगर्भाज्ञात्वरूपस्य विधित्वस्यासम्भवेनोपदेशत्वरूपस्यैव 'तस्य ज्ञानमुपदेशः' इत्यभियुक्तोक्तिबलात् स्वीकार्यतया, तत्र च नियोज्यप्रयोजनमवश्यमपेक्षितमेव। भावना हि स्वस्याः प्रवर्तनात्वसिद्धये समीहितभाव्यत्वमात्मनः प्रतीक्षमाणा सन्निहितं यागं दुःखात्मकत्वेन चेतनसमीहानास्पदत्वादुपेक्षमाणा दूरस्थं नामपदाभिधेयं पुरुषविशेषणमपि स्वर्गादिकं भाव्यत्वेन गृह्णाति। एवं फलार्थप्रवृत्तभावनाभाव्यत्वलक्षणसाध्यत्वं यागस्याप्यस्ति। तथाऽपि अफलार्थप्रवृत्तभावनाभाव्यत्वाभावेन स्वर्गादिना समप्राधान्यायोगेन फलार्थप्रवृत्तभावनां प्रति फलस्य स्वर्गादेर्भाव्यत्वेन यागादेश्च साधनत्वेन चैकस्यां

भावनायामन्वयसम्भवेन वाक्यभेद इत्याद्युक्तं भावार्थाधिकरणे। सिद्धस्वभावस्यापि स्वर्गादेरात्मसम्बन्धोत्पादनक्रियासमावेशेन दार्वादेः छिदिक्रियादिसमावेशादिनेव साध्यत्वमुपपन्नम्। अत एव कामयमानोऽपि पुरुषो नहि 'स्वर्गः स्वात्मानं लभताम्' इति कामयते। किन्तु 'भोगोऽस्माकं भवतु' इति। अतो युक्तं यागादयः स्वर्गादीष्टोपाया एवेति वाक्येन प्रतिपाद्यते इत्यवगन्तुम्। इतरथा तु स्वर्गकामाः न यागमनुतिष्ठेरन् इति अननुष्ठापकत्वरूपमप्रामाण्यं वेदस्याऽपद्येत।

समस्ताम्नायस्य अध्यस्तप्रपञ्चप्रविलये तात्पर्यनिरासपूर्वकं पूर्वपरोपसंहारः

यदुक्तं सर्वस्याप्याम्नायस्याध्यस्तप्रपञ्चप्रविलये तात्पर्यमिति तदयुक्तम्। 'आकाशाद् वायुः' (तै.उ. २.१.१), 'वायोरग्निः' (तै.उ. २.१.१) इत्यादिसृष्टि-वाक्यानां तदयोगात्। प्रमाणान्तराप्राप्तसाध्यसाधनभावादिसम्बन्धं प्रापय्य स्वयमेव निषेधतामाम्नायानामुन्मत्तवाक्यसाम्यं च स्यात्। 'यजेत' इत्यत्र देहातिरिक्तात्मसद्भावावगमेन तत्राध्यस्तदेहात्मभावप्रविलयवद् देहात्मभेदस्य, साङ्ग्रहिण्यादिवाक्ये च काम्यमानेन ग्रामादिकामयितृभेदस्य, निषेधवाक्ये च भक्ष्यभक्षकादिभेदस्य चोत्पत्तिसम्भवेन सप्रपञ्चे ब्रह्मणि भेदप्रपञ्चोत्पत्तिद्वारा सर्वस्याप्याम्नायस्यैवंतात्पर्यापत्त्या नियमपरिसङ्ख्याविधित्वाद्याश्रयणेन बहुप्रमाणविरोधेन च प्रसक्तान् प्रबलान् बहूनपि दोषान् स्वीकृत्य च प्रपञ्चप्रविलयद्वारा निष्प्रपञ्चब्रह्मपरतया व्याख्यानस्य कुसृष्टियुक्तस्याऽदरणायोगाच्च।

किञ्च देहात्मत्वप्रविलयोऽधिकारिभेदप्रविलयश्च वाक्येभ्यो जायत इति वदतस्तव स्वर्गकामादेरधिकारित्वमेभ्यो वाक्येभ्योऽवगम्यते न वा। नेति पक्षे देहात्मत्वाधिकारिभेदयोः प्रविलयानुपपत्तिः। आद्ये तु तत्परत्वमेव, नार्थायातप्रपञ्चप्रविलयपरत्वम्। स्वरसतः प्रतीयमानेऽर्थे हि वाक्यतात्पर्ये सम्भवति न सम्पातायातपरत्वमुचितम्। नचैतावता शास्त्रत्वव्याघातः। तद्धि पुरुषश्रेयोभिधायकत्वम्। सरागवीतरागपुरुषश्रेयोभिधायकत्वेन स्वर्गाद्युपायशासनेऽपि

शास्त्रत्वस्याक्षतेः। नच विनश्वरस्य कर्मणः कालान्तरभाविस्वर्गजनकत्वं प्रामाणिकमपि नाङ्गीकर्तुमुचितम्, ईश्वरस्य तु स्थायिनस्तद्युक्तमिति वाच्यम्। कर्मानपेक्षस्येश्वरस्य तद्धेतुत्वे वैषम्यनैर्घृण्यादेः, फलस्य यावदीश्वरभावित्वस्य चाऽपत्तेः। तदपेक्षायां तु सैवानुपपत्तिस्त्वयाऽपि परिहरणीयेत्यावयोः साम्यं सङ्कटस्य। यदि कर्मण एव कश्चिदवस्थाविशेषोऽपूर्वं वा कर्मफलयोर्मध्ये तैलपानपुष्ट्योर्मध्ये तैलपरिणामभेद इव कश्चिदवान्तरव्यापारः कल्प्येत तदा साम्यमेवाऽवयोः परिहारेऽपि। तस्मादीश्वरस्य फलकर्तृत्वव्यापकफलकारणत्वायोगेन तद्व्याप्यं फलदातृत्वमपि न युक्तमिति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

अचेतनं कर्म न स्यात् फलदं काप्यदर्शनात्।
अबादेस्तृप्तिरित्यत्र देवताकार्यमिष्यते॥

नहि वयं कर्मणः कारणत्वं निषेधामः। येनेयता प्रबन्धेन महता प्रयत्नेन च तदुपपादनीयं स्यात्। किन्तु ईश्वरस्यापि फलकर्तृत्वप्राप्तये कारणत्वमस्तीति वदामः। नच कर्मणोऽपि कारणत्वे ईश्वरवदेव कर्तृत्वमपि स्यादिति वाच्यम्। नहीश्वरे कारणत्वेन कर्तृत्वं साधयामः। व्यापकेन सामान्येन व्याप्यस्य विशेषस्य साधनायोगात्। किन्तु कर्तृत्वव्यापककारणत्वनिवृत्त्या कर्तृत्वमपि निवर्तत इत्याक्षिपन्तं प्रति कारणत्वमीश्वरान्न निवर्तत इति वदामः। तत्प्रकारश्च 'यमेभ्यो लोकेभ्य उन्निनीषति', 'रातिर्दातुः परायणम्' (बृ.उ. ५.९.२८) इत्यादिश्रुत्यतिलङ्घनायोगेन फलकर्तृत्वे सिद्धे तद्व्यापकीभूतं फलकारणत्वमप्यङ्गीकार्यम्। नत्वीश्वरस्य फलकारणकर्मोपजीवनोपक्षीणता। तथा सति कर्मकारणत्वेनावगतेश्वरोद्बोधनोपक्षीणतामङ्गीकृत्य 'यजेत स्वर्गकामः' (आ.श्रौ.सू.) इत्यादिवाक्यावगतमपि फलकारणत्वं त्याज्यं स्यात्। यदि च कुलालस्य

घटकारणत्वं च प्रामाणिकत्वाद् यथा नापह्नवयोग्यं तथैव कर्मण ईश्वरोद्बोधनकारणत्वं फलकारणत्वं च नापह्नवयोग्यं मन्यसे तदेश्वरोऽपि कुतो न तथा मन्यसे। ईश्वरः कर्मापेक्ष्यैव फलकारणं नान्यथेति नियमवद्, ईश्वरमपेक्ष्यैव कर्मापि फलं साधयति नान्यथेत्यप्यस्ति नियमः। नचाबादिना[1] तृप्तौ कूलेन पतने च जनयितव्ये कारणान्तरानपेक्षत्वदर्शनादिहापि कर्मणा फले जनयितव्ये न कारणान्तरमपेक्षणीयं बाधकाभावात्। ईश्वरेण तु तस्मिन् जनयितव्ये कर्मावश्यमपेक्षणीयम्। वैषम्यनैर्घृण्यादिप्रसक्तिरूपबाधकसद्भावादिति वाच्यम्। तथा सति फलदानरूपक्रियायामीश्वरानपेक्षं कर्मैव फलं साधयतीति वाचोभङ्ग्या कर्मण एव कर्तृत्वं चेतनत्वं चाङ्गीकृतं स्यात्। क्रियामात्रस्य कर्तृजन्यत्वस्य कर्तुश्चेतनत्वस्य च नियतत्वात्। तृप्त्यादौ च

'नारायणानिरुद्धौ तु भोज्यवस्तुषु संस्थितौ।
तर्पकौ सर्वजीवानाम्'

इति ईश्वरहेतुत्वश्रवणात्। [2]कार्यानुमानेन च सकर्तृकत्वस्यावस्थितत्वान्न क्रियायाः कर्तृत्वव्यभिचारः शङ्कनीयः। तथाच कर्तुरभावे कार्यानुत्पादनियमात् कर्मणः कारणत्वमात्रपक्षावलम्बनेन प्राप्तः पूर्वपक्षो न युक्तः।

कर्मणः कर्तृत्वकारणत्वोभयाङ्गीकारेण कृतस्य पूर्वपक्षस्य निरासः

एवं कर्तृत्वस्य चेतनत्वव्याप्तेरपि व्यभिचारदर्शनेन कर्मणः कर्तृत्वकारणत्वोभयावलम्बनेन प्राप्तपूर्वपक्षोऽप्ययुक्तः। दृष्टानुसारिणी हि कल्पना युक्ता। नहि जातु मृत्पिण्डादयः कुम्भकाराद्यनधिष्ठिताः कुम्भाद्यारम्भका दृष्टाः। नच विद्युत्पवनादिभिरप्रयत्नपूर्वैर्व्यभिचारः। तेषामपि कल्पनास्पदतया पक्षसमत्वात्।

१. म. अन्नादिना। २. म. कार्यत्वानुमानेन।

'तस्मान्नाचेतनं कर्माप्यपूर्वं[1] चेतनं विना।
स्वतन्त्रमेव सत् कार्यं कुर्वद् दृष्टं कदाचन॥
कर्माणि तानि च पृथक् चेतनान्येव सर्वशः।
अचेतनशरीराणि स्वकर्मफलभाञ्जि च॥'

इत्याद्येतदधिकरणस्थानुव्याख्यानेन कर्मणां चेतनत्वावगमान्नैष दोष इति वाच्यम्। भ्रान्तोऽसि। नहि तत्र कर्मशब्देन प्रकृतमचेतनं कर्मोच्यते। किन्तु कर्माभिमानिनश्चेतनविशेषा एव। अत एव तत्र तेष्विति पदं प्रतिगृह्य 'कर्माभिमानिषु' इति सुधायां व्याख्यातम्। तस्मादचेतनस्य कर्तृत्वं दृष्टिविरुद्धम्।

कर्माभिमानिचेतनस्यैव फलकर्तृत्वं नेश्वरस्येति पक्षनिरासः

एतेन, कर्माभिमानिचेतनविशेषस्यैव फलकर्तृत्वोपपत्तेर्नेश्वरस्य तदङ्गीकार्यमिति प्रत्युक्तम्। जीवस्यापि कर्मवदस्वतन्त्रत्वात्। ईश्वरप्रेरितस्य तु ईश्वरवादाविरोधादङ्गीक्रियत एव। कर्मणस्तु ईश्वरप्रेरितस्यापि तन्नाङ्गीक्रियते। अचेतनत्वात्। कर्माभिमानिजीवप्रेरणोपक्षीणत्वं तु पूर्ववन्निरसनीयम्।

यजमानस्य फलकर्तृत्वपक्षनिरासः

एतेन, कर्मानुष्ठातैव यजमानः फलस्य कर्तेति निरस्तम्। कर्मस्वरूपसामान्यविशेषविनियोगादिज्ञानशून्यस्य तदनुपपत्तेश्च। अथापि कल्पने दृष्टिविरोधः। अन्यथा विनष्टस्यापि कर्मणोऽप्रसन्नादपि राज्ञः फलमविचित्रस्यापीश्वरस्य विचित्रानन्तकर्मानपेक्ष्यैवेदृक्फलदानेऽपि[2] अवैषम्यनैर्घृण्यादित्यादी दृष्टिविरुद्धं सर्वमप्यापद्येत।

फलदाने कर्मण एव स्वातन्त्र्यम्, ईश्वरे तदुपचरितमिति पक्षनिरासेनोपसंहारः

एतेन, कर्मणोद्बोधितः प्रेरितश्चेश्वर एव फलं ददातीति तस्य स्वातन्त्र्यं तद्गर्भं

१. क. नापूर्वम्। २. पृथक्फलदानेऽपि।

कर्तृत्वं चोपचरितं, कर्मणि तदुभयं मुख्यमिति परास्तम्।

'धर्माधर्मान् पृथक् पश्यन् स्वेच्छया बोधयत्यजः।
न ते विशेषं कर्मापि प्रेरणादिकमुच्यते।
कुर्युः कदाचित् तेनायं स्वतन्त्रोऽनुपचारतः॥'

इत्यागमविरोधात्। तस्मादीश्वर एव दानपरिचरणप्रणामाञ्जलिकरणस्तुतिमयीभिरतिश्रद्धोज्जृम्भिताभिः भक्तिभरोन्नताभिरर्चाभिराराधितः प्रसन्नः स्वस्वयोग्यतानुरूपमाराधकाय तादृशमेव फलं प्रयच्छति। कलञ्जभक्षणब्रह्मधिकारहननत्वङ्कारादिभिः नास्तिक्याद्युज्जृम्भिताभिः विक्रियाभी रुष्टश्च तत्कर्त्रेऽहितं प्रयच्छतीत्येवाङ्गीकरणं न कस्यापि वाक्यस्य प्रामाण्योपचरितार्थत्वाद्यापादकं, न कस्यचिद् दृष्टेर्विरुद्धमित्यनवद्यम्।

अत्र पूर्वोक्तं समाधानं सुधोक्तं, द्वितीयं तु टीकोक्तमिति विवेक्तव्यम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु, एतदधिकरणप्रतिपाद्यमाह- **अत्र भगवत्प्राप्तिसाधनेति॥ तस्य** प्राप्यस्यैव भगवतः, न तु परमत इव प्राप्यनिर्विशेषब्रह्मणो 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इत्यारभ्य पूर्वाधिकरणेषु प्रकृतादन्यस्येश्वरस्य व्यावहारिकीं दशामवलम्ब्य कर्मफलदातृत्वं समर्थ्यत इत्यर्थः।

परमतविमर्शः

अनेन यदुक्तमुभाभ्यामीश्वरः कर्मफलदाता न वेति सन्देहे, कर्मैव फलदातृनेश्वर इति पूर्वपक्षे, ईश्वर एव फलदाता, न त्वचेतनं कर्मेति सिद्धान्त इति तदयुक्तम्। अन्येषां मते **'तत्पदार्थस्ततः पश्चाद् यावत्पादः समाप्यते'** इत्युक्त्या 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इति पेटिकायां निर्विशेषब्रह्मस्वरूपस्यैव वक्तव्यतया फलदातृत्वादिविशेषवतः ईश्वरस्य निरूपणे सङ्गत्यदर्शनात्।

व्यावहारिकीं च दशामवलम्ब्येदमुच्यत इत्यपि न। 'अन्तस्तद्धर्मोपदेशात्' (ब्र.सू. १.१.२०) इत्यादौ बहुधा निरूपितत्वेनेह पुनर्निरूपणे प्रयोजनादर्शनात्।

अमलानन्दमतनिरासः

पूर्वाधिकरणे ब्रह्मव्यतिरिक्तवस्तुनिषेधे कृते सति ब्रह्मणः फलदातृत्वमपि न स्यादित्याशङ्क्येह समर्थ्यत इत्यमलानन्दोक्तं कर्णस्पर्शे कटिचालनन्यायमनुसरति। नहि ब्रह्मणः फलदातृत्वं कथमित्याशङ्क्येश्वरस्य फलदातृत्वसमर्थनेन निराक्रियते। ब्रह्मव्यतिरिक्तवस्तुनिषेधमुखेन त्वद्भाष्यटीकयोः पूर्वपक्षाप्रवर्तनादप्ययुक्तं च। ब्रह्मव्यतिरिक्तवस्तुनिषेधे फलदातृत्वस्यापि तदतिरिक्तत्वाविशेषात् सिद्धान्तेऽपि तस्य निषेधावश्यम्भावेन पुनरिह तस्य समर्थनेऽपसिद्धान्ताद्वैतभङ्गाद्यापाताच्च।

विशिष्टाद्वैतमते ब्रह्मणः फलदातृत्वानुपपत्तिनिरूपणम्

केषाञ्चिन्मतेऽपि सूक्ष्मचिदचिद्वस्तुविशिष्टाद् ब्रह्मणः स्थूलचिदचिद्विशिष्टब्रह्मणः उत्पत्तिरित्यङ्गीकारेण सूक्ष्मकर्मादिविशिष्टब्रह्मणः फलदातृत्वेन निष्कृष्टस्य ब्रह्मणः तदभावेन फलदातृत्वसमर्थनाभावात्। विशिष्टस्य कारणत्वे तदेकदेशस्य ब्रह्मणोऽपि फलदातृत्वमक्षतमिति चेत्, तर्हि कर्मणोऽपि विशेषणस्य विशेष्यवद् विशिष्टैकदेशत्वेन फलदातृत्वस्य न्याय्यतया निषेधायोगात्।

किञ्च प्रपञ्चविशिष्टस्य ब्रह्मत्वे विशिष्टान्तर्गतस्य फलादिप्रपञ्चस्य तज्जत्वायोगेन ब्रह्मणः फलदातृत्वायोगः। नहि दण्डविशिष्टो देवदत्तः दण्डं जनयति। आत्माश्रयाद्यापातात्। अब्रह्मत्वे तु प्राप्यस्य ब्रह्मण एव फलदातृत्वादिमाहात्म्यवर्णनस्य सङ्गतत्वेऽपि ब्रह्मभिन्नस्यात एवाप्राप्यस्य विशिष्टस्येह तद्वर्णनसङ्गत्ययोगादित्यादिदूषणगणग्रासादिति सूचयति।

शाङ्करभाष्येऽस्याधिकरणस्य सिद्धान्तोपक्रमत्वोक्तिनिरासः

अत्र 'सिद्धान्तोपक्रममिदमधिकरणम्' इति वाचस्पत्युक्तमयुक्तम्। सिद्धान्त-

स्योत्तरपक्षत्वव्याहतेः। पूर्वपक्षस्य चानन्तरप्राप्तस्य पूर्वपक्षत्वव्याहतेश्च। 'पूर्वं तु बादरायणो हेतुव्यपदेशात्' (ब्र.सू.३-३-२४) इति सिद्धान्तशेषानुवृत्तेस्तयोर्न तत्त्वव्याहतिरिति चेत्- न। आदौ सिद्धान्तस्योपक्रमे तत्त्वव्याघातानिस्तारात्। 'धर्मं जैमिनिरत एव' (ब्र.सू.३-२-४१) इति जैमिनिग्रहणात् पूर्वपक्षप्रतिपादकत्वसूचनेन तथा व्याख्यायत इति चेन्न। 'भेदादिति चेन्न प्रत्येकमतद्वचनात्' (ब्र.सू. ३.३.२) इत्युत्तरसूत्रे पूर्वपक्षसूचनात् 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इत्यधिकरणस्यापि सिद्धान्तोपक्रमत्वप्रसङ्गात्। इतः प्राक् परं च काप्यधिकरणे सिद्धान्तोपक्रमादर्शनाच्च। तस्माज्जिज्ञासाधिकरणादिष्विव सौत्रपदसूचितपूर्वपक्ष इहाप्युन्नेय इति भावेन पूर्वपक्षप्रदर्शनाय कर्मापेक्षयेति प्रवृत्तं भाष्यमवतारयति- **पूर्वपक्षयतीति**॥

'नच कर्मान्वयव्यतिरेकात् फलस्येश्वरः फलदातेति प्रलोभमात्रम्' इति पूर्वपक्षन्यायविवरणस्य यथाटीकं व्याख्यानम्

प्रलोभन्यायं मात्रपदसंयोजनेन विशेष्यप्रदर्शनपूर्वकं विवृण्वत् 'नच कर्मान्वयव्यतिरेकात् फलस्येश्वरः फलदातेति प्रलोभमात्रम्' (न्या.वि.) इति वाक्यं व्याचष्टे- **एवं सतीति**॥ अकृतकर्मणः फलादर्शने कृतकर्मणः फलदर्शने च सतीत्यर्थः। अनेन फलस्य कर्मान्वयव्यतिरेकित्वात् कर्मैव फलप्रदं नेश्वर इति शेषः। 'रातिर्दातुः परायणम्' (बृ.उ. ५.९.२८) इति श्रुतेः का गतिरित्यत आह- **ईश्वर इति**॥ ईश्वरः फलदातेति वचनं प्रलोभमात्रम् उपचारमात्रम् गौण्या वृत्त्या प्रवर्तते, न मुख्यवृत्त्येति यावदिति विवरणव्याख्यानं सूचितम्।

'तस्यैव स्वातन्त्र्यात्' इति सिद्धान्तन्यायविवरणस्य यथाटीकं व्याख्यानम्

स्वातन्त्र्यन्यायमेतदधिकरणसङ्गतत्वेन सम्बन्धिपदाध्याहारेण स्मृत्याद्युदाहरणपूर्वं विवृण्वत् 'तस्यैव स्वातन्त्र्यात्।

'कर्माण्यनन्तानि यथेष्टमीशः सम्पाद्य तेषां फलमिच्छयैव।
कचिद् ददाति क च नो ददाति नह्यानन्त्यात् कर्मणां भोगनाशः॥
स्वातन्त्र्यं चेत् कर्मणां सर्वभोगः स्यान्नह्येवं क्वापि तत् केनचित् स्यात्।
अतो हि स स्वेच्छया किञ्चिदेव फलं कुर्याद् विफलं प्रायशश्च।
कचिज्ज्ञानं जनयन् भस्म कुर्यात् स्वेच्छावृत्तिस्तस्य विष्णोः सदैव॥'
इति ब्रह्माण्डे।

'स्वतन्त्र ईश एवैकस्तद्वशं कर्म सर्वदा।
अत ईशत्वमीशस्य न हीशोऽन्यः कथञ्चन॥' इति श्रुतिः।

अतः प्रलोभकल्पने श्रुतहानिरश्रुतकल्पना चेति हरिरेव फलदः, (न्या.वि.) इति वाक्यं सूत्राक्षरयोजनासूचनव्याजेन सङ्क्षेपतो व्याचष्टे- **तस्य चेतनत्वेनेत्यादिना**॥ ततश्चेश्वरस्यैव स्वातन्त्र्यात् फलदातृत्वं युक्तं, न कर्मणस्तदभावात्। फलदातृत्वं हि फलदानक्रियां प्रति कर्तृत्वं, नान्यत्। तस्यां च दानक्रियायां कर्मेश्वरौ कारणत्वेन प्रामाणिकौ। न तयोश्च समप्राधान्येन दण्डचक्रादिवत् कारणत्वम्। ईश्वरस्य स्वातन्त्र्यात्। कर्मणश्च तदभावात्। नहि स्वतन्त्रपरतन्त्रयोः समप्राधान्यं दृष्टचरम्। ततश्चोभयोः कारणत्वे मुख्यभेदगवेषणायामीश्वरस्य कर्तृत्वं कारणत्वे मुख्यम्। कर्मणश्च कारणत्वं, 'स्वतन्त्रः कर्ता' (पा.सू. १.४.५४) इत्यनुशासनात् तद्गर्भं कर्तृत्वं न कर्मणः कारणत्वे मुख्यं भवितुमर्हति। न वा ईश्वरस्य कारणत्वे करणत्वं मुख्यं भवितुमर्हति। कर्तृप्रयोज्यत्वरूपपारतन्त्र्यगर्भस्य करणत्वस्य तत्रायोगादिति भावः।

कर्मणोऽस्वातन्त्र्ये ईश्वरस्य स्वातन्त्र्ये च प्रमाणोदाहरणम्

स्यादेवं यदीश्वरः एव स्वतन्त्रः, कर्म तु तद्वशत्वादस्वतन्त्रमित्यादिकोऽर्थः प्रामाणिकः स्यादित्यतस्तत्र प्रमाणं पठति- **कर्माण्यनन्तानीति**॥ तत्राऽदौ

'यदीश्वरः स्वतन्त्रो न स्यात् तर्हि कर्माणि यथेष्टं न विनियोजयेत्' इति तर्कं वक्तुं कर्मणां यथेष्टं विनियोज्यत्वमेवाऽद्येन श्लोकेनोच्यते। कर्माणि यथेष्टं विनियोजयतीति शेषः। काकतालीयत्वशङ्कावारणाय - **अनन्तानीति**। यथेष्टविनियोज्यत्वं कर्मणां चेदीशस्तानि जीवैर्न सम्पादयेदेव। नहि नियमेन कर्म सम्पाद्य तत्फलदातुरीश्वरस्य यथेष्टविनियोक्तृत्वं सम्भवतीत्यत उक्तम्- **इच्छयैवेति**॥ एतान्यपेक्ष्यैव फलं ददातीति स्वेच्छयैव फलदाने तान्यपेक्षते। नच तावता यथेष्टविनियोक्तृत्वाभावः। तथा सति स्वेच्छया दण्डमवष्टभ्य गच्छतोऽपङ्गोरपि दण्डं प्रति यथेष्टविनियोक्तृत्वं न स्यात्।

'क्वचिद् ददाति' इति न्यायविवरणपद्यैकदेशव्याख्यानम्

नन्वीश्वरः जीवैः कर्माणि कारयित्वा नियमेन तत्फलं ददाति न वा। नेति पक्षे वेदाप्रामाण्यं, वैषम्यनैर्घृण्यादिकं, नियमेन तत्सम्पादनं च न स्यात्। आद्ये तु कथं यथेष्टविनियोजकः स्यादित्यत उक्तं विवृणोति- **क्वचिद् ददातीति**॥ अयोग्यैः विकर्माणि कारयित्वा नियमेन तत्फलं तेभ्यो ददाति। कस्मिंश्चित् कालविशेषे च तैरेव वेदविहितानि सत्कर्माणि कारयित्वा तत्फलं तेभ्यो न ददाति। तदिन्द्रियप्रवर्तकेभ्यो देवेभ्य एव ददाति।

पूर्वोक्तन्यायविवरणश्लोकैकदेशस्य वर्णकान्तराणि

यद्वा सत्कर्माण्ययोग्यैः कारयित्वाऽपि तत्फलं क्वचित् किञ्चिदेव कल्पितस्वर्गादिकं ददाति। क्व च नो ददाति। किञ्चिदवशिष्टं न समग्रं फलं ददाति। एवं योग्यविषयेऽपि सत्कर्माणि कारयित्वा तत्फलं किञ्चिदेव तेभ्यो[१] ददाति। किञ्चिदवशिष्टं समग्रं फलं तेभ्यो न ददाति। किन्तु तदिन्द्रियप्रवर्तकेभ्य एव देवेभ्यो ददाति। 'स्वामी हि फलमश्नुते' इति न्यायात्।

---

१. क. देवेभ्यो।

एवं, योग्यैरपि कदाचिद् विकर्माणि कारयित्वा तेभ्यस्तत्कृतं फलं किञ्चिदेव ददाति। अवशिष्टं किञ्चित् तेभ्यो न ददाति। किन्त्वयोग्येभ्यः तदिन्द्रियप्रवर्तकेभ्यो ददाति पूर्वन्यायात्। एवं कैश्चिज्जीवैर्जातेष्ट्यादीनि कारयित्वा तत्फलं क्वचित् पुत्रादावेव ददाति। कदाचित् कर्त्रे किञ्चिदपि न ददाति।

एवं, जीवद्वयसमाविष्टशिशुपालादिशरीरे स्थित्वा तैरपि विकर्माणि सुकर्माणि च सम्पाद्य क्वचित् कस्यचित् सुकर्मणः फलं कस्मैचिदेव सज्जीवाय ददाति। कस्मैचिदसज्जीवाय न ददाति। तत्र विकर्मणां फलं चासज्जीवाय ददाति। न तु सज्जीवाय।

> 'हिरण्यकशिपुश्चापि भगवन्निन्दया तमः।
> विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः॥' (भाग.) इत्यादेः।

एवं, कदाचिदपरोक्षज्ञानात् पूर्वं शुभाशुभकर्मणां फलं ददाति। तदनन्तरं च न ददाति। तत्राप्यपरोक्षज्ञानानन्तरं प्रारब्धकर्मणां फलं ददाति। सञ्चितागामिनोस्तु फलं न ददाति। तत्रापि सञ्चितागामिनोः शुभाशुभयोः फलम् अपरोक्षज्ञानजन्मन्युपकर्त्रे सज्जीवाय ददाति। अशुभयोस्तु फलं द्विषते ददाति। 'तस्य पुत्रादायम्' इत्युपक्रम्य 'सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' (माध्व.भा.उ. शाट्यायनश्रुतिः) इति श्रवणात्। तत्रापीष्टपुण्यकर्मणां फलं ज्ञानिने ददाति। अनिष्टपुण्यकर्मणां तु सुहृद्भ्यो ददाति। अशुभकर्मणां तु ज्ञानिने नो ददात्येव। तत्रापि प्रारब्धकर्मणां कदाचित् कस्मैचित् किञ्चिदेवोपमर्देन ददाति। न साकल्येन। कस्मैचित् साकल्येनैव ददाति। तत्राप्यपरोक्षज्ञानोत्तरकृतकर्मणां शुभाशुभानामानन्दवृद्धिह्रासलक्षणं फलं ददाति, तदतिरिक्तं किञ्चिदपि नो ददाति। तत्राप्यपरोक्षज्ञानोत्तरकृतकर्मणां फलं निर्दुःखत्वादिमोक्षैकदेशं ददाति। तदतिरिक्तं किमपि फलं नो ददाति। एवमयोग्यविषयेऽप्यशुभकर्मणां

तमःप्राप्तिरूपमोक्षविषये तदन्यत्रापि योज्यम्। न ह्येवंविधस्येश्वरस्य कर्माणि प्रति न यथेष्टं विनियोक्तृत्वमिति[1] शक्यते वक्तुमिति भावः।

ननु 'क्वचिद् ददाति क्व च नो ददाति' (ब्रह्माण्डवचनम्) इत्युक्तम्[2]। येषां कर्मणां फलं नोपजनितं 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' (ग.पु. प्रे.का.,अ.१.४६) इति वचनात् तेषां नाशायोगेन कर्मक्षयाख्यो मोक्षो न कस्याऽपि स्यादित्यत आह- **नहीति**॥ कर्मणां भोगेनैव नाश इत्ययं पक्षो नास्माकं सम्मत इति सम्बन्धः। कुतः? आनन्त्यात्। एककर्मभोगकाले बहूनां कर्मणां सम्पादनात्। तेषां प्रत्येकमेकैकस्य कर्मणः फलभोगकालेऽपि तादृशानामेव बहूनां कर्मणामार्जनात्। एवं तद्भोगकालेऽपीति कर्मणामानन्त्याद् भोगेन तन्नाशप्रत्याशा न कार्या। किन्तु 'क्वचिज्ज्ञानम्' इत्यादिवक्ष्यमाणन्यायेन महान्तमपि तूलराशिमग्निकणेन संयोजयन्निवानन्तमपि कर्मसङ्घं ज्ञानं जनयन्नीश्वर एव क्षपयति भक्तानुग्रहकातर्यादित्येव युक्तम्। 'नाभुक्तं क्षीयते' (ग.पु.प्रे.का.अ. १.४६) इति वाक्यं तु प्रारब्धकर्मविषयम्। उपमर्देऽप्यल्पभोगाङ्गीकारादिति भावः।

एवमीश्वरस्य स्वातन्त्र्यानुकूलतर्कमभिधाय कर्मणां स्वातन्त्र्ये प्रतिकूल-तर्कमाह- **स्वातन्त्र्यं चेदिति**॥ **सर्वभोगः** सर्वेषां कर्मणां सामस्त्येनोपमर्दादिना विनाऽपि[3] सुहृद्द्विषद्भ्यां दानं विनाऽपि च भोगः स्यादित्यापाद्योक्तिः। तत्रेष्टत्वशङ्कायामुच्यते- **नहीति**॥ क्वापि कस्मिंश्चिदप्यधिकारिविशेषे केनचित् साधनविशेषेणापि तत्कर्मफलभोजनमेवं सामस्त्येन नाङ्गीकर्तुं शक्यम्। कर्मणा-मानन्त्यादित्यर्थः। कस्मिंश्चिदधिकारिविशेषे सामस्त्येन भोगाभावश्चोक्तदिशा स्वाम्यादिभिरनुभूयमानत्वादिति द्रष्टव्यम्। उपसंहरति- **अत इति**॥ 'प्रायशो

१. क. यथेष्टविनियोक्तृत्वमिति। २. म. इत्ययुक्तम्।
३. क. विना च।

विफलं कुर्यात्' इत्येतद् देवताविषयम्। तत्रापि 'महच्चेद् वृत्रहत्यादिवत्' इत्यादि-भाष्यात् प्रारब्धसूचकत्वमस्तीति प्रायश इत्युक्तमिति ब्रह्माण्डपुराणे स्वातन्त्र्याव-गमादिति पूर्वेण सम्बन्धः।

कर्मण ईश्वरवशत्वे श्रुत्युदाहरणम्

नन्वीश्वरः स्वतन्त्रः, कर्म चास्वतन्त्रम्; उपन्यस्ताभ्यां तर्काभ्याम्। तथाऽपि कर्मेश्वरवशं कुतः? तस्यान्यवशत्वेऽप्यस्वातन्त्र्योपपत्तेरित्यत आह- **स्वतन्त्र इति**॥ कर्मान्यवशमिति शङ्कमानस्येशान्तरमभिप्रेतं न वा? नेति पक्षे शङ्काया एवानुदयः। आद्ये तु शङ्कमान ईश्वरः यदि प्रकृतेश्वरादन्यस्तस्यापीश्वरः तर्ह्यस्य प्रकृतस्येश्वरस्येशत्वं न स्यात्। अतः शङ्क्यमानोऽन्यः अन्यस्येशस्येशः कथञ्चन केनापि प्रकारेणेशो न भवेदेव। यदि तु प्रकृतेश्वरस्य शङ्क्यमानः स्वामी नेत्युच्यते तदा स्वतन्त्र ईश एक एव नान्यः शङ्क्यमानः। तद्वशं सर्वदा कर्मेति प्राप्तमेवेति न कर्मणोऽन्यवशत्वशङ्का युक्तेत्यर्थः। इति श्रुतिर्यतः कर्मणोऽन्यवशत्वं निषेधति अत ईशस्यैव स्वातन्त्र्यावगमादिति पूर्वेणैव सम्बन्धः। 'श्रुतेः' इति पाठे तु साक्षादेव सम्बन्धः।

नन्वनेन[1] स्वातन्त्र्यावगतावपि 'रातिर्दातुः परायणम्' (बृ.उ. ५.९.२८) इत्यादिश्रुतीनामुपचरितार्थत्वकल्पनं कुतो नास्तीत्याशङ्क्य दोषद्वयप्रदर्शनपूर्वकं स्वातन्त्र्यनिश्चयस्योपयोगं सूचयन्नेव परमप्रकृतमुपसंहरति- **अत इति**॥ इति दोषद्वयप्रसङ्गात् प्रलोभकल्पनं न युक्तम्। अतो हरिरेव फलप्रद इति सम्बन्ध इति विवरणव्याख्यानं द्रष्टव्यम्।

एतत्पादीयाधिकरणपूर्वपद्यन्यायमालाविवरणम्

एतेन, 'पश्चाददृष्टचविज्ञानकालदुःखपृथग्भवाः।
स्थानभेदो विरुद्धत्वं न्यायसाम्यं स्वतोभवः॥

१. म. नन्वेवम्।

गुणसाम्यमयोगश्च तर्कबाधो विलोमता।
नानाभावः प्रलोभश्च युक्तयः पूर्वपक्षगाः॥'

इत्येतत्पादीयाधिकरणपूर्वपक्षन्यायमालायां पृथग्भवश्च पृथग्भवश्च पृथग्भवश्च पृथग्भवाः इति प्रथमतो विगृह्य, पश्चाददृष्टिश्च अविज्ञानं च कालश्च दुःखं च पृथग्भवाश्च पश्चाददृष्टचविज्ञानकालदुःखपृथग्भवाः इत्येकशेषगर्भद्वन्द्वेन सप्त न्याया उक्ता वेदितव्याः। विलोमतेत्यनेन विलोमा च विलोमा च विलोमानौ, विलोम्नोर्भावः विलोमतेत्येकशेषगर्भविग्रहाश्रयणेन न्यायद्वयमुक्तम्। नानाभाव इत्यनेनापि नाना च नाना च नाना च तेषां भाव इति विग्रहाश्रयणेन न्यायत्रयमुक्तम्। आहत्य विंशतिन्यायाः प्रतिपादिताः।

एतत्पादीयाधिकरणसिद्धान्तन्यायमालाविवरणम्

एवं - 'अशक्यकर्तृताशक्तिः स्वतोऽबोधस्तदेव च (तदैव च)।
अमानक्लृप्तिसन्मानव्यवस्थात्यल्पताभवाः॥
विशेषदृष्टिवाक्ये च पुंशक्तिस्तु निदर्शनम्।
अलौकिकत्वमाधिक्यं स्वातन्त्र्यं निर्णयप्रमाः॥'

इति सिद्धान्तन्यायमालायां तदेवेति तच्छब्देन स्वतोऽबोध इति प्रकृतधात्वर्थस्य बोधनस्य परामर्शः। 'तदैव[1] च' इति पाठे तु स्वतोऽबोध इत्यनेन बोधश्च बोधश्च तयोरभावः स्वतोऽबोध इति विग्रहाश्रयणान्न्यायद्वयमुक्तम्। अमानक्लृप्तिसन्मानेत्यादिसमस्तपदेन सन्मानं च सन्मानं च सन्मानं च सन्मानानि। व्यवस्था च व्यवस्था च इत्यादौ विगृह्य ताभ्यां द्वन्द्वसमासाश्रयणे अष्टौ न्यायाः सङ्गृहीताः। आधिक्यमित्यनेनापि अधिकयोर्भावः आधिक्यमिति विग्रहाश्रयणेन न्यायद्वयमुक्तम्। स्वातन्त्र्यमित्यनेनापि पूर्ववद् द्विवचनान्ताद् भावप्रत्ययोत्पादनेन न्यायद्वयमुक्तम्। आहत्य विंशतिन्यायाः सिद्धान्तस्य साधकाः सङ्गृहीता वेदितव्याः।

---
१. क. तथैव।

तेनाऽचार्याणां मतेऽधिकरणविभाजकोपाधिभूतन्यायानां विंशतिसङ्ख्यात्वात् तावन्त्येवाधिकरणानि, नातोऽधिकानि न्यूनानि चेति निश्चयात्, उभयेषां मतेऽधिकरणाष्टकत्वेन व्याख्यानं, 'दर्शनात्' इति सूत्रस्थाने 'सामान्यात्तु' इति प्रक्षेपेण च स्थानद्वये सूत्रद्वयस्यैकत्वेन पाठेन चैकोनचत्वारिंशत्सूत्रात्मकत्वमस्य पादस्याभ्युपेत्य व्याख्यानं सम्प्रदायाभिज्ञव्याख्यातुर्न मनोगतमित्यपव्याख्यानमेवेत्युपेक्षणीयम्।

भामत्यां पुण्यपापलक्षणसदसदपूर्वप्रत्याख्यानम्

अत्र तस्माद् दृष्टानुगुण्याय यागादिकर्मभिरुत्पन्नाद् देवताप्रसादादेव फलपर्यन्तं स्थायिनः फलोत्पत्तेः कृतमपूर्वेण। एवमशुभेनापि कर्मणा जाताद् देवताविरोधात् श्रुतिस्मृतिसिद्धात् स्थायिनो नरकाद्यनर्थफलोत्पत्तेः सम्भवात् कृतं दुरितापूर्वेणापीति पुण्यपापलक्षणं सदसदपूर्वद्वयं भामत्यादौ प्रत्याख्यातम्।

तन्निरसनपरतया टीकार्थोक्तिः

तदयुक्तम्। 'संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति', 'सुकृताद् भ्रश्यते हि सः', 'संवत्सरकृतं पापं तत्क्षणादेव नश्यति' इत्याद्यागमेन शुभाशुभकर्मातिरिक्तसदसदपूर्वयोः प्रतीतेः कर्मणामन्वक्षं विनाशिनां प्रागेव नाशात् संवत्सरपर्यन्तमार्जितानां पुण्यपापानां नाशवचने विषयत्वानुपपत्तेः।

किञ्च शुभाशुभकर्मभिरेवाङ्गाद्यनुपकृतेः प्रधानैरेवेश्वरप्रसादकोपयोरुत्पत्तौ प्राच्योदीच्याङ्गानुष्ठानानुपपत्तिः। अङ्गोपकृतैस्तदुत्पत्तौ तु प्रधानानां शीघ्रविनाशिनां प्राच्योदीच्याङ्गोपकार्यत्वसिद्धयेऽङ्गानां च तदुपकारकत्वसिद्धयेऽङ्गापूर्वाणां प्रधानापूर्वाणां चावश्याङ्गीकार्यत्वाच्च। नच तत्रापि तत्कर्मानुष्ठानजन्यदेवताप्रसादकोपाभ्यामुपकार्योपकारकभावसिद्धिः। तयोः फलपर्यन्तमात्रपर्यव-

साननियमाभावेन फलानन्त्यप्रसङ्गात् । पापपरिहारार्थं प्रायश्चित्तोपदेशादिवैयर्थ्याच्च । नच देवताप्रसादादेः तत्स्वरूपत्वेऽपि तदुद्बोधानुद्बोधाभ्यामुत्पत्तिनाशव्यवहारः । तदुद्बोधकस्य कर्मणः प्रागेव विनष्टत्वात् । स्थायिनः प्रसादाद्युद्बोधकस्य फलपर्यन्तावस्थायिनोऽपूर्वस्य त्वयाऽनङ्गीकारात् ।

किञ्चापरोक्षज्ञानोत्तरकालं महतोऽपि ब्रह्महत्यादिरूपसञ्चितादेः[1] विनाशादिः प्रारब्धस्य त्वल्पस्य पिपीलिकाहत्यादिरूपस्यापि न विनाश इति बहुभिरागमैः सिद्धम् । तदेतद् वैषम्यं कुत इति वक्तव्यम् । ईश्वरकोपोत्पादानुत्पादाभ्यां भविष्यतीति चेन्न । विकर्मानुष्ठानसमनन्तरमेव तस्योत्पत्तेः । न तदा तस्योत्पत्तिः । किन्तु यावत् कर्म भोक्तुमुपादत्ते तदानीमेव तस्योत्पत्तिरिति चेन्न । तावत्पर्यन्तं कर्मणोऽनवस्थानेन तदुत्पत्त्यनुत्पत्तेः ।

अत एवं वक्तव्यम् । महदल्पाभ्यां विकर्मभ्यां किञ्चिद् दुरितं जायते । तच्च फलोत्पत्तिसमये कोपं जनयति । अत एव प्रारब्धकर्मजन्याल्पदुरितस्यापीश्वरकोपोद्बलितत्वेन शिष्टाकोपनयेन प्राबल्यान्न तस्य ज्ञानेन नाशः । महतस्तु दुरितस्य स्वरूपतः प्राबल्येऽपि ईश्वरकोपानुद्बलितत्वात् तस्य नाशो युक्त इति । अत एव तदर्थमप्यपूर्वमङ्गीकार्यम् । गौरवं त्वप्रामाणिकविषयमिति परमतमयुक्तमिति मन्वानः सौत्रं धर्मपदं व्याचक्षाण एव भाष्याभिप्रायमाह- **धर्मपदमधर्मस्याप्युपलक्षणमिति ॥** सदसदपूर्ववाचकं धर्मपदं तद्विरुद्धमधर्मं तदुभयजनकं शुभाशुभं कर्म च लक्षयतीत्यपेरर्थः । अन्यथाऽधर्मस्योपलक्षणमित्येव ब्रूयादिति द्रष्टव्यम् ।

सूत्रार्थः

सूत्रार्थस्तु - यतो भगवांश्चेतनः **अतो** भगवतः इह चामुत्र च भोग्यं **फलं** भवति चेतनत्वेन फलदा**नोपपत्तेरिति** श्रौतोऽर्थः । न तु कर्मणः फलम् । अचेतनत्वात्तदनुपपत्तेरिति सूचितोऽर्थः । न केवलं सम्भावनैव । **श्रुतत्वाच,**

---

१. क. ब्रह्महत्यादिरूपस्य सञ्चितादेः ।

अतः फलमिति सम्बन्धः । आक्षिपति - **धर्मं जैमिनिरत एव** । भगवतः **धर्ममेव** जातं **जैमिनिर्मन्यते** । **अत एव** धर्मजननोपक्षीणत्वादेव न फलं मन्यते । कर्तृत्वप्रयोजक[1]चेतनत्वाभावाद् यथा कर्मणः कर्तृत्वं नास्तीत्युच्यते, तथा तद्व्यापककारणत्वाभावान्नेश्वरस्य कर्तृत्वमिति शङ्कितुर्हृदयम् । समाधत्ते- **पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ पूर्वं** प्रकृतं ब्रह्मापि कारणं मन्यते । तथाविधश्रुतेरुभयत्र **हेतुत्वव्यपदेश**रूपायास्सत्त्वात् । एवमप्युपक्षीणत्वकल्पने कर्मण्यापत्तेरिति हृदयम् । परन्तु पूर्वं कर्तृ, उत्तरं कर्म करणमिति तु सूचितोऽर्थः। अधिकरणानां क्रमस्तु तत्तदधिकरणसङ्गत्युक्त्या स्फुट एव ।

एतत्पादीयाधिकरणप्रतिपाद्यविषयसङ्ग्रहः

हरिः स्वप्नस्य कर्ता च तिरोधायक एव च ।
जाग्रत्स्वामी सुषुप्तेन प्राप्यः सुप्तिप्रबोधकः ॥

अखण्डेशश्च मुग्धेन प्राप्यो भिन्नस्वरूपवान् ।
अप्राकृतशरीरश्च जीवभिन्न उदाहृतः ॥

फलवद्भक्तगम्यो[2]ऽसौ भक्त्यपेक्षाफलप्रदः ।
विश्वपाता चोपलब्धुमयोग्यो गुणवांस्तथा ॥

अलौकिकगुणो जीवगुणबिम्ब उदाहृतः ।
ध्यानप्रतीतभिन्नश्च सर्वदेशेषु चैकराट् ॥

विक्रियाणां सुक्रियाणां संविदामपि सर्वशः ।
दाता फलानामत्रैवं क्रमाद् भक्त्याऽप्य उच्यते ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीमल्लक्ष्मीनारायणतीर्थपूज्यपादानां शिष्येण रघुनाथयतिना कृतायां शिष्टतात्पर्यचन्द्रिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥

---

१. म. व्यापक । २. क. फलवद्भक्तिगम्यः

॥ अथ तृतीयः पादः ॥

॥ सूत्रभाष्यम् ॥

॥ अथ सर्ववेदा(न्तप्रत्यंया)धिकरणम् ॥ १ ॥

॥ हरिः ॐ ॥ उपासनाऽस्मिन् पाद उच्यते। सर्वपरिज्ञानं प्रथमत उच्यते-

॥ ॐ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॐ ॥ ३-३-१ ॥

अन्तो निर्णयः। 'उभयोरपि दृष्टोऽन्तः' (भ.गी.२-१६)इति वचनात्। सर्ववेदनिर्णयोत्पाद्यज्ञानं ब्रह्म। 'आत्मेत्येवोपासीत' (बृ.उ.३-४-७) इत्यादिविधीनां तदुक्तयुक्तीनां चाविशिष्टत्वात्॥ १॥

॥ ॐ भेदान्नेति चेदेकस्यामपि ॐ ॥ ३-३-२ ॥

'विज्ञानमानन्दं ब्रह्म' (बृ.उ.५-९-२८) 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ.२-१) इत्यादि प्रतिशाखमुक्तिभेदान्नैकाधिकारिविषयाः सर्वशाखा इति चेन्न। एकस्यामपि शाखायाम् 'आत्मेत्येवोपासीत' (बृ.उ.३-४-७) 'कं ब्रह्म खं ब्रह्म[1]' (छा.उ.४-१०-५) इत्यादिभेददर्शनात्।

॥ ॐ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च ॐ ॥
॥ ३-३-३॥

'स्वाध्यायोऽध्येतव्यः' (तै.आ.२-१५) इति सामान्यविधेः। हिशब्दात् 'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना' इति स्मृतेः।

'सर्ववेदोक्तमार्गेण[2] कर्म कुर्वीत नित्यशः।
आनन्दो हि फलं यस्माच्छाखाभेदो ह्यशक्तिजः॥

१. ह्. ॐ खं ब्रह्म। २. ह्. वेदोक्तिमार्गेण।

सर्वकर्मकृतौ यस्मादशक्ताः सर्वजन्तवः।
शाखाभेदं कर्मभेदं व्यासस्तस्मादचीक्लृपत्॥'
इति समाचारे सर्वेषामधिकाराच्च॥ ३॥

॥ ॐ सलिलवच्च तन्नियमः ॐ ॥ ३-३-४ ॥

यथा सर्वं सलिलं समुद्रं गच्छत्येवं सर्वाणि वचनानि ब्रह्मज्ञानार्थानीति नियमः।

आग्नेये च- 'यथा नदीनां सलिलं शक्ये सागरगं भवेत्।
एवं शक्यानि सर्वाणि पुंशक्त्या ब्रह्मवित्तये॥' इति॥ ४॥

॥ ॐ दर्शयति च ॐ ॥ ३-३-५॥

'सर्वैश्च वेदैः परमो हि देवो जिज्ञास्योऽसौ नाल्पवेदैः प्रसिद्ध्येत्।
तस्मादेनं सर्ववेदानधीत्य विचार्य च ज्ञातुमिच्छेन्मुमुक्षुः॥'
इति चतुर्वेदशिखायाम्।

'सर्वान् वेदान् सेतिहासान् सपुराणान् सयुक्तिकान्।
सपञ्चरात्रान् विज्ञाय विष्णुर्ज्ञेयो नचान्यथा॥'
इति ब्रह्मतर्के[1] ॥ ५॥

॥ इति सर्ववेदा(न्तप्रत्यया)धिकरणम्॥ १॥

॥ तत्त्वप्रकाशिका ॥

एतत्पादप्रतिपाद्यविषयः

एतत्पादार्थं दर्शयति- **उपासनेति** ॥ उपासना नाम ब्रह्मजिज्ञासा। सा च

१. ह्. इति च ब्रह्मतर्के

भक्तिसाध्यत्वाद् ज्ञानसाधनत्वाद् भक्त्यनन्तरं ज्ञानात् पूर्वमेवोच्यत इति भावः। आद्याधिकरणतात्पर्यमाह- **सर्वेति ॥** उपासना द्विविधा। समस्तसच्छास्त्राभ्यासरूपा यामाहुः श्रवणमनने इति ध्यानरूपा चेति। तत्राऽद्यायाः ध्यानाङ्गत्वात् सैव प्रथमाधिकरणे विधीयते। समस्तसच्छास्त्रश्रवणमननाभ्यां दूरोत्सारिताज्ञानसंशयविपर्ययस्यैव ध्यानाधिकारित्वादिति भावः। अत एवात्रास्ति शास्त्रादिसङ्गतिः। आद्यसूत्रे श्रवणमनने कर्तव्ये इत्युक्तम्। तयोश्च सर्वशाखाऽविषयत्वेऽस्य शास्त्रस्य सर्वोपादेयताभावप्रसङ्गात् सर्वशाखाविषयत्वं समर्थनीयम्।

विषयसंशयौ

वेदोदितं ब्रह्म विषयः। किमेकैकेनैव सर्वशाखोक्तं श्रवणमननाभ्यां ज्ञातव्यमुत स्वस्वशाखोक्तमिति सन्देहः। सामान्योक्तिः सन्देहबीजम्।

पूर्वपक्षः

स्वस्वशाखोक्तमेव ब्रह्म ज्ञातव्यमिति पूर्वः पक्षः। प्रतिशाखमुच्यमानानामर्थानां पृथक्त्वेन दर्शनात्। अन्यथा सर्वशाखास्वप्येकप्रकारोक्तिः स्यात्। सर्वज्ञानमन्तरेण च ध्यानानधिकारित्वे मन्दानां तदभावः स्यात्। अतः स्वस्वशाखागतार्थस्यैव ज्ञेयत्वान्नास्य शास्त्रस्य सर्वश्रुतिनिर्णायकस्य सर्वोपादेयतेति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठति- **सर्वेति ॥** उपनिषदो वेदान्तपदेनोच्यन्तेऽत्रेति व्याख्यानं पूर्वोत्तरविरुद्धमिति मन्वानोऽन्तशब्दं सप्रमाणकं व्याचष्टे- **अन्त इति ॥** समस्तसूत्रं व्याचष्टे- **सर्वेति ॥** पूर्वसूत्रे पूर्वपदोदितं ब्रह्म सर्ववेदनिर्णयेनोत्पाद्यज्ञानविषयः। किमुक्तं भवति? ध्यानार्थिना श्रवणमननाभ्यां

सर्ववेदान्निर्णीय ज्ञातव्यमिति। कुतः? 'एवं काण्वैर्ज्ञातव्यमेवं माध्यन्दिनैरेवम्' इति काण्वादिशाखास्वधिकारिविशेषनिर्देशाभावात्। स हि भवन् विधिसमीपे स्यात्। विधयश्च 'आत्मेत्येवोपासीत' (बृ.उ. १.४.७) इत्यादयः सर्वाधिकारिसाधारणा एव पठ्यन्ते। नच वाच्यं यथा कर्मविद्यायामधिकारी गृही कल्प्यते तथाऽत्राप्यधिकारिविशेषः कल्प्यतामिति। तत्र स्वर्गकामत्वादिकल्पकसद्भाववदत्र तदभावात्। कल्पकत्वं च ज्ञानविध्यर्थं तत्रोक्तयुक्तीनाम् 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. १.४.७) इत्यादीनां सम्भवति। इतरांशस्य ज्ञेयादिप्रतिपादकत्वात्। युक्तयश्च सर्वाधिकारिसाधारणा एव। अतः सर्वं सर्वैर्ज्ञातव्यमिति भावः।

'सर्वशाखोक्तमेकैकेनैव ज्ञातव्यम्' इति पूर्वोक्तमाक्षिप्य समर्थनम्

उक्तमाक्षिप्य समादधत् सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे- **भेदादिति ॥** यदुक्तं सर्वशाखोक्तमेकैकेनैव ज्ञातव्यमिति न तद्युक्तम्। एकं हि वस्तु अनेन ज्ञातव्यम्। नहि सर्वशाखोक्तं वस्त्वेकम्। कस्याञ्चिच्छाखायां हि विज्ञानानन्दरूपं वस्तूच्यते। क्वचिच्च सत्यज्ञानानन्तं, क्वचिच्छ्रोतृमन्त्रादिरूपम्, अपहतपाप्मत्वादिरूपं चान्यत्रेत्येवमादि। अतः सर्वशाखोक्तानां पृथक्त्वादेकस्यैव ज्ञातव्यत्वात् स्वस्वशाखोक्तमेव ज्ञातव्यमिति भावः। परिहारांशं व्याचष्टे- **नेति ॥** नच तत्तच्छाखोक्तार्थानां पृथक्त्वात् सर्वशाखोक्तं नैकेन ज्ञातव्यमिति वाच्यम्। तथा सत्येकशाखोक्तस्याप्येकेनाज्ञातव्यत्वप्रसङ्गात्। तत्रोक्तार्थानामपि पृथक्त्वदर्शनात्।

अथोच्येत तत्र धर्म्यनुवादेनान्यान्यधर्मविधानादेकमेवोच्यत इति। हन्त तर्ह्यत्रापि तथा किं न स्यात्। नच सर्वशाखानामेकविषयत्वेंऽशे पौनरुक्त्यमिति। एकस्यामपि साम्यात्। अथ यदि तत्र प्रसङ्गभेदादनुवादादिपरिहारः स च समः प्रकृतेऽपीति भावः॥ २॥

पूर्वोक्तप्रमेयस्य हेत्वन्तरेण समर्थनम्

हेत्वन्तरेणैतमर्थं समर्थयत् सूत्रं पठित्वा व्याचष्टे- स्वाध्यायस्येति ॥ अस्ति खलु सर्वशाखा एकैकेनाध्येतव्या इति। 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २.१५) इति स्वाध्यायाध्ययनविधेः सर्वाधिकारिसाधारणत्वात्। अन्यथाऽनेनायं स्वाध्यायोऽध्येतव्य इति विधिप्रसङ्गात्। अध्ययनं च तदुक्तज्ञानार्थमेवेति वक्ष्याम इति भावः। ननु लोके शाखाभेदस्य प्रसिद्धत्वाद् विधेरपि विशेषनिष्ठत्वमिति। मैवम्। विशेषस्मृतिविरोधादिति भावेनाऽह- **हीति ॥** सूचिताया इति शेषः। अनेन सर्वेषां सर्वशाखाध्ययनाभावात् सर्वज्ञानमयुक्तमिति च परास्तम्।

प्रमाणेन सर्ववेदोक्तकर्मसमाचारे सर्वेषामधिकारनिरूपणम्

किञ्च सर्ववेदोक्तकर्मसमाचारे सर्वेषामधिकारसद्भावात् तदुक्तब्रह्मज्ञाने सुतरामधिकार इति सप्रमाणकमाह- सर्वेति ॥ यदि सर्वेषां सर्वशाखाध्ययनादि तर्हि कथमेष शाखाभेदः कर्मभेदश्चेत्यत आह- **शाखेति ॥** कर्मभेदश्चेति ज्ञातव्यम्। तद् विवृणोति- **सर्वेति ॥** सर्वशाखाध्ययने चेति द्रष्टव्यम्। यानि चेमानि विरुद्धकर्माणि 'सामगो वटुर्मुण्डोऽन्यः शिखी' इत्यादीनि तानि चैकशाखागतविरुद्धकर्मवद् विकल्पेन भवन्ति॥ ३॥

मन्दानां ध्यानाभावशङ्का, सलिलदृष्टान्तेन तत्परिहारश्च

यदि सर्वशाखोक्तप्रकारेणैव जानतो ध्यानाधिकारः प्राप्तस्तर्हि मन्दानां ध्यानाभाव इत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- सलिलवदिति ॥ नोक्तभङ्ग्या मन्दानां ध्यानाभावप्राप्तिः। यथा खलु सर्वासामपां समुद्र एवैकायनमिति नियमः प्रतिबन्धाभावमपेक्ष्यैव, न त्वतिदृढः एवं सर्ववेदोक्तप्रकारेण ध्यानेच्छूनां ब्रह्म ज्ञातव्यमिति नियमस्यापि पुरुषशक्त्यपेक्षत्वादिति भावः। अत्रैव स्मृतिमाह- **आग्नेये चेति ॥**

'सर्वशाखोक्तमार्गेण ब्रह्म ज्ञातव्यम्' इत्यस्य श्रुतिस्मृतिभ्यां समर्थनम्

युक्तिसमर्थितार्थं श्रुतिस्मृतिभ्यां च समर्थयत् सूत्रं पठित्वा ते उदाहरति- दर्शयति चेति ॥ अतो भगवद्ध्यानार्थं सर्ववेदोक्तं विज्ञेयमिति सर्वोपादेयं शास्त्रमिति सिद्धम्॥ ५॥ अ. १॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ॐ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः॥

॥ हरिः ॐ ॥

॥ अथ तृतीयः पादः ॥

मङ्गलाचरणम्

यत्पदं मनुजा देवा ऋजवोऽपि स्वशक्तितः।
उपासते रमानाथं तं देवं समुपास्महे॥

उपासनप्रतिज्ञायाः वन्ध्यात्वशङ्का तत्परिहारश्च

यदङ्गं भक्तिः प्राङ् निरूपिता तदेवाङ्गिभूत[1]मुपासनमत्र प्रतिपाद्यत इति भाष्यादावुक्तम्। तत्र मोक्षसाधनप्रसादसाधनवैराग्यभक्त्युपास्तिज्ञानानां मध्ये द्वाभ्यां पादाभ्यामथशब्दोक्तयोर्द्वयोः साधनयोर्निरूपितयोस्तत्कार्यं जिज्ञासाशब्दोक्तोपासना[2] एभिर्गुणैर्भगवदीयैरेवंविध उपासको भगवन्तमुपासीत, एवंविधैस्त्वेवंविधो नोपासीत, इत्यादिप्रकारनिरूपणेन विविच्यत इत्यर्थः। तेनोपासनास्वरूपलक्षणादेरिहाप्रतिपादनाद् वन्ध्येयं प्रतिज्ञेति निरस्तम्।

१. म. अङ्गीभूतम्। २. म. उपासनयैभिः।

त्रिविधोपासननिरूपणम् एतदधिकरणविषयवर्णनं च

सा चोपासना त्रिविधा। शास्त्राभ्यासो ध्यानं समाधिश्चेति। अत्र चोत्तरोत्तरं पूर्वपूर्वस्य कार्याण्यपि, जिज्ञासाशब्देन श्रवणमनननिदिध्यासनानीव, उपासनाशब्देनैवेमान्युच्यन्ते। तत्र समाधेर्ध्यानान्नातीवभेदोऽस्तीति न समाधिः पृथङ् निरूप्यते।

तत्राऽद्येऽधिकरणे श्रवणमनयोर्विषयेयत्तानिर्धारणेन शास्त्राभ्यासरूपोपासना विविच्यते। 'सर्वपरिज्ञानं प्रथमतः' इत्यादिभाष्यादेरप्यत्रैव तात्पर्यम्। तेन नात्र शास्त्राभ्यासस्य स्वरूपं लक्षणं वोच्यते[1]। नापि स कर्तव्य इत्यत्रोच्यते। यं प्रत्युच्यते स वैराग्यादिसाधनसम्पन्नो न वा? आद्ये स्वकारणादेव कार्योत्पत्तेरावश्यकतया तदुत्पादने प्रयत्नविधानानुपपत्तिः। नहि घृतपाने निष्पादितेऽपि पुष्टौ प्रवृत्तिर्विधीयते। विहितश्चाऽद्यसूत्रे जिज्ञासाशब्देन। न द्वितीयः। नहि साधनशून्यमुद्दिश्य शतकृत्वो विधानेऽपि प्रवृत्तिः सम्भवतीत्यादिशङ्कानवकाशः। श्रवणमननयोः किञ्चिच्छाखाविषयत्वं निराकृत्य सर्वशाखाविषयत्वसमर्थनेन शास्त्राभ्यासस्वरूपस्य विवेचनात्।

सर्वशाखाध्ययनप्रवृत्त्यैतदधिकरणप्रवृत्त्योरन्योन्याश्रयत्वशङ्का, तत्परिहारश्च

नन्वनेनाधिकरणेन श्रवणमननयोः सर्वशाखाविषयत्वनिश्चये सति सर्वशाखाध्ययने प्रवृत्तिः, तस्यां सत्यां सर्वशाखार्थनिर्णायकशास्त्रप्रवृत्तिद्वारैतदधिकरणे प्रवृत्तिरित्यन्योन्याश्रय इति चेत्,

अत्र ह्येषा प्रक्रिया। यथाऽष्टवर्षं ब्राह्मणादिकुलजं बालं पित्रादिरुपनीय 'वत्सेत्थं सन्ध्यामुपास्व, वेदमधीष्व' इति सामान्यत उपदिश्य सन्ध्यादिकं कारयति, ततश्चासौ बालः प्रतिदिनमभ्यस्यमानायां सन्ध्यादिक्रियायां पटुः भवति,

१. क. चोच्यते।

ततो वेदांश्चाधीते, ततस्तदर्थज्ञानाय प्रयतमानः पित्रादितस्तच्चाऽप्नुवन् प्रागेव सन्ध्यादिकर्तव्यतां सामान्यतो जानन्ननुतिष्ठंश्च विशेषतो ज्ञानानुष्ठानयोर्दार्ढ्यं प्राप्नोति, ततोऽपि विशेषतो दार्ढ्यमन्विच्छन् पुनर्वेदानेव ज्ञातार्थानपि जैमिन्याद्युक्तन्यायेन मीमांसते, ततश्च दृढतरं ज्ञातानुष्ठानेन वेदार्थस्य कर्मणः फलं प्राप्नोति, ततश्च समग्रं फलं प्राप्तुं शाखान्तराण्यप्येवं मीमांसमानस्ततोऽपि अङ्गाङ्गिभावादिनिश्चयं प्रतिपद्यते, पुनरेवं शाखान्तराण्यालोच्य तमेवातिनिष्कर्षं प्रतिपद्यते, यस्मिन् सत्यस्मै वादिवचनानि न संशयमादधति न वाऽस्य समग्रफलाय कारणान्तरमपेक्षणीयं स्यात् तथेहापि ब्रह्मनिष्ठात् पित्रादेः सामान्यत उपदेशमात्रेण सत्कुलप्रसूतः सात्त्विकप्रकृतिः पूर्वजन्मकृतसुकृतवशात् सर्ववेदानप्यधीयमानो वेदार्थभूतब्रह्मज्ञानविरक्तिभक्त्यादीनि लभते। तत एषः दार्ढ्यमभीप्समानः पूर्वतन्त्र इवोत्तरतन्त्रे प्रवर्तते। ततो बादरायणोक्तन्यायमनुसन्दधानस्य ज्ञानभक्तिविरक्त्यादिदार्ढ्यं भवति। ततश्चैतैर्दृढैर्युक्तो बहुशाखात्मकं वेदाख्यं सच्छास्त्रं भगवत्परत्वेन श्रुतमेवाभ्यस्यति। युक्तिभिर्बादरायणप्रदर्शिताभिः प्रतिवाक्यमयमर्थो न वेति चिन्तयति। एतदेव मननमुच्यते। ततः प्रतिवाक्यमयमेवार्थ इति निष्कर्षद्वारा दृढतरं वैराग्यं भक्तिं चाऽप्नोति। ततोऽपि पुनः श्रवणमननाभ्यां वेदार्थभूतब्रह्मविषयशास्त्रजनितानुभवजातसंस्कारपाटवोद्दलितदृढतरभक्त्यादिसहकारिवशादादरनैरन्तर्याभ्यां वेदार्थश्रवणमननात्मकं शास्त्राभ्यासशब्दितमुपासनाशब्दाभिधेयं कञ्चन मनोवृत्तिविशेषं प्राप्नोति यमेनं 'अथवा सततं शास्त्रविमर्शेन भविष्यति' (अनुव्याख्यानम्) इति भगवदपरोक्षसाक्षात्कारसाधन[1]मामनन्ति। ततो मुख्यप्राणप्रसादान्नियतगुरूपदेशाच्च स्वयोग्यान् भगवदीयान् गुणान् ध्यायति। ततः समाधिमाप्नोति यस्यां सत्यां कुठारादिना भिद्यमानोऽपि न किमपि दुःखमनुसन्धत्ते। ततो ब्रह्म साक्षात्करोति। ततः प्रारब्धावसाने मुक्तो भवतीति। तथाच कथमन्योन्याश्रयः?

१. क. भगवदपरोक्षे साक्षात्साधनम्।

शास्त्राभ्यासस्य ध्यानाङ्गत्वविचारः

ननु शास्त्राभ्यासो ध्यानाङ्गं न वा। आद्ये 'सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी। ध्यानरूपा परा च' (अनुव्याख्यानम् ३.३.१) इति ध्यानसमकक्ष्यत्वोक्त्या स्वतन्त्रोपासनत्वं चास्ति। ब्रह्मसाक्षात्कारहेतुत्वाच्चित्तवृत्तिनिरोधकत्वाङ्गेति सुधया च विरोधः। द्वितीयेऽपि स किं समाधिवद् ध्यानविशेष एवोत तेन समप्रधानः। नाऽद्यः। 'आद्यायाः ध्यानाङ्गत्वात् सैव प्रथमाधिकरणे निरूप्यते' इति टीकाविरोधात्। अत एव न द्वितीयः। मैवम्। श्रवणमनन एव शास्त्राभ्यासः। स च भक्त्यादिवदेव सामान्यतः प्रवृत्तः साधनम्। विशेषतः प्रवृत्तश्चेद् ध्यानवत् साध्यमेव। ततश्च भक्तिदाढर्यादिना यत् साध्यमपरोक्षाव्यवहितसाधनं तदेवेहाऽद्याधिकरणप्रतिपाद्यम्। तदेवम्भूतं शास्त्रस्य श्रवणजं ज्ञानं मननजध्यानेन समकक्ष्यमेव। 'अथवा सततं शास्त्रविमर्शेन भविष्यति' इति निरवकाशवचनात्। तर्हि यवस्य व्रीहिसमकक्ष्यस्य तदपेक्षामन्तरेण स्वातन्त्र्येणैव यागनिर्वर्तकत्ववच्छ्रवणमननयोरपि ध्यानमन्तरेणापरोक्षनिर्वर्तकत्वं स्यात्। न स्यात्। यथा हि बहिर्दर्शनेन स्वतन्त्रेणैव मोक्षवचनात् तस्य बिम्बदर्शनेन समकक्ष्यत्वेनोक्तत्वेऽपि हृदि किञ्चिदुपास्यैव मोक्ष इत्याश्रयणेन बिम्बदर्शनसाधनत्वं प्राप्तं तदनन्तरं बिम्बदर्शनस्यातिप्रयत्नसाध्यत्वाभावेन तदनपेक्षितप्रायमिति समकक्ष्यत्वं चाऽश्रियते[१] तथा प्रकृतेऽपि। अधिकारिणो हि द्विविधाः। केचन शास्त्राभ्यासपाटवप्रधाना भगवद्द्रष्टारः। केचिच्च ध्यानप्रधानाः। तत्र ध्यानप्रधानानामपि किञ्चिच्छास्त्राभ्यसनमपेक्षितमेव। न पूर्वेषामिव बहुतरम्। पूर्वेषामपि किञ्चिद्ध्यानमपेक्षितमेव। न पुनरुत्तरेषामिव ध्यानमेव बहुकालमनुष्ठेयम्। इममेवातिशयमपेक्ष्य समप्राधान्यव्यवहारः। आहत्योभयेषामपि विवक्षितशास्त्राभ्यासमन्तरा ध्यानानुदयात् तस्य तदङ्गत्वं चास्ति। अत एवास्यात्रैव निरूपणं,

१. म. चशब्दो नास्ति।

न पुनर्भक्त्यादेरिव पादान्तरे। तस्य समप्राधान्ये स्पष्टवचनादर्शनात्। तस्मान्नोक्तविरोधः। एवं 'श्रवणजं ज्ञानं पूर्ववृत्तम्' इत्यादिसुधाविरोधोऽपि परिहरणीयः।

नन्वेवं ध्यानाङ्गत्वाद् धारणायमनियमप्राणायामादिकमप्यत्र कुतो न चिन्त्यत इति चेन्न। उपासनापादे तद्भिन्नस्य विचारानर्हत्वात्। योगादिशास्त्रान्तरसिद्धत्वाच्च। अनुबन्धनये यमादिविचारो यथा नासङ्गतस्तथाऽत्रैव वक्ष्यते। श्रवणमननयोस्तूपासनात्वमप्यस्तीत्युक्तम्।

अज्ञानविपर्ययनिवर्तकत्वेन श्रवणमननयोः उभयोरप्यावश्यकत्ववर्णनम्

नन्वेवं श्रवणमननयोः शास्त्राभ्यासरूपत्वे, श्रवणस्य मननस्य वाऽनुष्ठाने शास्त्राभ्यासरूपध्यानाङ्गस्यानुष्ठितत्वादुभयानुष्ठाननियमो न स्यात्। मैवम्। शास्त्राभ्यासो हि जनितार्थज्ञानस्य शास्त्रार्थाविस्मरणसिद्धये गुरुसन्निधौ पुनःपुनरुच्चारणम्। तद्यदा श्रुतितर्कघटितमपि श्रुतिविषय एव बहुलं प्रवर्तते, तर्कविषये तु न बहुलं तदा निरुक्तशास्त्राभ्यासः श्रवणमिति गीयते। अयं शास्त्रप्रमेयेऽज्ञानमपहन्ति। यदा तु तर्कविषये बहुलं प्रवर्तते श्रुतिविषये तु नैवं, तदा मननमुच्यते। अयं च शास्त्रप्रमेयेऽयुक्तताभ्रममपहन्ति। अज्ञानविपर्ययौ च ध्यानप्रतिबन्धकौ। कार्योत्पादे हि यावत्प्रतिबन्धकनिवृत्तिरपेक्षितेति तदर्थमेवोभयानुष्ठानाङ्गीकारात्। वक्ष्यति चैतत् सूत्रकारोऽपि 'तन्निर्धारणार्थनियमः' (ब्र.सू. ३-३-४३) इत्यादिना।

पादपेटिकानिरूपणम्

उपासनाशब्दार्थत्वेनोपस्थितेषु शास्त्राभ्यासरूपमुपासनमाद्येऽधिकरणे निरूप्यते। ततो निरूप्यमाणध्यानोपोद्घाततयोपसंहारानुपसंहारसमर्थनपरत्वादधिकरणत्रयमुपसंहारपेटिका। 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२)

इत्यारभ्याऽपादं ध्यानस्य निरूपणात् तावदेका पेटिका। तत्रापि कैश्चिदधिकरणैर्मानुषाणामुपास्तिप्रकारः, कैश्चिद् देवानां, कैश्चिच्चतुर्मुखस्योच्यत इत्यवान्तरपेटिकात्वम्। अत एव

'सच्चिदानन्द आत्मेति मानुषैस्तु सुरेश्वरैः।
यथाक्रमं बहुगुणैर्ब्रह्मणा त्वखिलैर्गुणैः॥
उपास्यः........................।' (अणुभाष्यम् ३.४)

इति सङ्क्षेपभाष्येऽवान्तरप्रमेय[1]मुपदर्शितम्। पेटिकाभेदे प्रकारान्तरं च वक्ष्यते।

॥ ॐ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॐ ॥ ३-३-१॥

चिन्ताक्रमः

अत्र श्रवणमनने अधिकृत्य चिन्त्यते। ते किं शक्तिमतामपि[2] स्वस्वशाखाविषये कर्तव्ये, उत सर्वशाखाविषये इति। तदर्थमपीत्थं चिन्तनीयम्- स्वस्वशाखाध्ययनमेव कर्तव्यमुत सर्वशाखाध्ययनमिति। तदर्थं सर्वशाखाध्ययनाभावे प्रत्यवायो नास्त्युतास्तीति। तदर्थं किमध्ययनमध्यापनविधिप्रयुक्तमुताध्ययनविधिप्रयुक्तमिति। टीका तु 'पूर्वं तु बादरायणः' (ब्र.सू. ३-२-४१) इति पूर्वसूत्राद् विशेष्यानुवृत्तिसौकर्याय ब्रह्मविद्यात्वस्फुरणाय[3] च पर्यवसानगत्या भेदाभावाच्च प्रवृत्ता। न तूक्तचिन्तया, अनभिप्रेतत्वात्।

पूर्वपक्षः

तत्र

शाखान्तरोक्तकर्मादेरपूर्वत्वप्रसिद्धये।
स्वस्त्वस्य च विवक्षातस्तत्तच्छाखैव पठ्यताम्॥

१. म. अवान्तरप्रयोजनम्। २. म. शक्तिमताऽपि।
३. म. स्फोरणाय।

स्वस्वशाखाविषये एव ते कर्तव्ये, न सर्वशाखाविषये। प्रमाणाभावात्। नच 'आत्मेत्येवोपासीत' इत्याद्युपासनाविध्यादि प्रमाणम्। सामान्यतः श्रवणेऽपि तत्तद्विधिसमीपे- काण्वैरेवं, तैत्तिरीयैरेवमित्यधिकारिविशेषणस्य[1] कल्पनीयत्वात्। यथा 'यजेत' इत्यादौ गृहिणः। अन्यथा 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३.९.३४), 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ.२.१.१) इति पुनरुक्तिप्रसङ्गात्।

किञ्च, तयोरध्ययनं व्यापकम्। श्रवणमननयोरध्ययनं विनाऽयोगात्। अध्ययनं च 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २.१५) इति विधीयमानं तत्तच्छाखागोचरमेव युक्तम्। अन्यथा स्वशब्दवैयर्थ्यापातात्[2]। नचोद्देश्यविशेषणत्वात् स्वत्वमविवक्षितम्। 'अग्नीनादधीत' (तै.सं. ३.५.१) इत्यादावुद्देश्याग्निगतबहुत्वस्य विवक्षितत्वात्।

किञ्च, शाखान्तराणामध्येतव्यत्वनियमे शाखान्तरोदितकर्मणस्तदनुपजीविस्वशाखारूपमानान्तरप्राप्तार्थत्वेनापूर्वता न स्यात्। किञ्च शाखाद्वयेऽपि सर्वाङ्गोपेतप्रधानाम्नानदर्शनेन सर्वशाखाध्ययने कथं नापूर्वताभङ्गः। किञ्चाध्ययनविधेः फलवदर्थावबोधपर्यवसायित्वेनाधीतानां शाखान्तराणां तदुक्तानुष्ठापकत्वावश्यम्भावेन युगपदनुपसंहरणीयानां मुण्डित्व[3]जटिलत्वादीनां वाक्त्वचक्षुष्ट्वादीनां चान्यतरत्यागावश्यम्भावेन सर्वेषां प्रत्यवायाद्यापत्तिः।

किञ्च समर्थपुरुषाणामेवाध्ययनाद्यधिकार इति मन्दानां तदभावेन ध्यानाद्यधिकारोऽपि न स्यात्। किञ्च कर्मकाण्डस्य ब्रह्मपरत्वायोगेन तदंशाध्ययनस्य मुमुक्षोः प्रयोजनाभावेन तदंशपरित्यागावश्यम्भावेन सङ्कोचो दुर्वारः। तस्मादेवञ्जातीयकानां बाधकानां दुरुद्धरत्वात् स्वत्वं विवक्षितमेव।

एतेन 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २.१५) इत्यविशेषप्रवृत्तस्वाध्याय-

१. क. विशेषस्य। २. म. वैयर्थ्यात्। ३. क. मुण्डत्व

विधिप्रयुक्ताध्ययनं सर्वशाखानामेवोचितमिति निरस्तम्। वस्तुतस्तु 'तमध्यापयीत' (आ.श्रौ.सू.) इत्यध्यापनविधिप्रयुक्तमेवाध्ययनम्। तेनैकशाखां माणवकमध्यापयत आचार्यस्याध्यापनविधिलङ्घनाभावान्न प्रत्यवायोऽपि भविष्यति। अध्यापनविधौ हि 'अष्टवर्षं ब्राह्मणमुपनयीत' (आ.श्रौ.सू.) इत्यत्र नयतेः 'सम्माननोत्सञ्जनाचार्यकरणज्ञानप्रभृतिविगणनव्ययेषु नियः' (पा.सू. १.३.३६) इत्यात्मनेपदविधानादाचार्यकरणकाम एवोपनयनेऽधिकारीति तस्यैव 'तमध्यापयीत' (आ.श्रौ.सू.) इत्यत्राप्यधिकारित्वावगमादाचार्यकरणकाम एवाधिकारी। तथाचाऽऽचार्यकरणकामनियोज्यकाध्यापनविधेः यत्किञ्चिच्छाखामध्यापयतोऽपि पर्यवसितत्वान्न शाखान्तराणामध्ययन[1]मिति पूर्वः पक्षः।

सिद्धान्तः

ज्ञानसाध्या क्रिया यस्माद् युक्तं सङ्कोचनं ततः।
नात्र सङ्कोचने किञ्चिन्निमित्तमुपलभ्यते॥

पुनरुक्तिस्तु परिहरिष्यते। नच स्वत्वविवक्षैव निमित्तम्। उद्देश्यगतस्य विवक्षानियमस्योत्सृष्टस्य बलवद्बाधकं विना त्यागायोगात्।

शाखान्तराणामध्येतव्यत्वनियमे अपूर्वत्वाभावापत्तिनिरासः

यदत्रोक्तं तथा सत्यपूर्वता न स्यादिति, तन्न। शाखान्तराणामध्येतव्यत्वनियमेऽपि शाखान्तरोक्तस्य किञ्चिदङ्गसहितस्य प्रधानस्यापूर्वत्वाभावेऽपि विधित्सिताधिकाङ्गांशेऽपूर्वतासम्भवात्। शाखाद्वयोक्तान्यूनानधिकाङ्गोपेतप्रधानांशे चापूर्वताभावस्येष्टत्वात्। समाख्यारूपेण दाढर्यार्थायाः पुनरुक्तेरदोषत्वाच्च। अन्यथा यजुष्याम्नातस्य ज्योतिष्टोमादेर्ऋग्वेदादौ पुनः श्रवणेनापूर्वता न स्यात्। नच वेदान्तरस्याप्यध्येतव्यत्वनियमाभावः शङ्कनीयः। एकस्मिन्नपि

१. म. 'प्रयोजयति' इत्यधिकः पाठः।

यजुर्वेदे आध्वर्यवहोत्रौद्गात्रादिरूपसकलाङ्गसहितस्य कर्मणोऽनाम्नानात्। तेन विना साङ्गस्य कर्मणोऽनुष्ठानायोगात् 'स त्रिभिर्विधीयते' इति वचनाच्च वेदान्तरस्याप्यध्येतव्यत्वनियमसिद्धेः। अत एव ज्योतिष्टोमस्य यजुर्वेद एव बह्वङ्गविशिष्टस्याऽऽम्नानात्, वेदान्तरे तस्य श्रवणं तु याजुर्वेदिकाङ्गादन्यस्याङ्गस्य विधानायानुवादमात्रमिति ज्योतिष्टोमस्य तत्रैवोत्पत्तिमङ्गीकृत्य याजुर्वेदिक एवोपांशुस्वर इत्युक्तम्। प्रधानांशे उक्ताङ्गांशे चापूर्वत्वाभावेऽपि विधित्सिताधिकाङ्गकलापविशेषेऽपूर्वता भवत्येव। समशाखयोस्तु दाढर्यार्थत्वान्न पुनरुक्तिदोष इत्यादिसमाधानं तु ममापि सममित्युक्तम्।

सर्ववेदस्य चाधीतिः कर्मानुष्ठानसिद्धये।
स्वीकर्तव्येति शाखासु वैषम्यं किं कृतं भवेत्॥

पूर्वोक्तप्रत्यवायाद्यापत्तिपरिहारः

यच्च प्रत्यवायाद्यापादनं तदपि युगपदनुपसंहरणीयोदितानुदितहोमादिष्विवाधिकारिभेदाश्रयणेन परिहरणीयम्। यच्च मन्दानां ध्यानाद्यधिकाराभावापादनं तत् सलिलन्यायेन परिहरणीयम्। नह्यल्पानां जलपरमाणूनां सागरगन्तृत्वाभावेनानल्पानामपि तदभावः सम्भवति। मन्दानां सर्ववेदोक्तगुणध्यानानङ्गीकाराच्च। कर्मकाण्डस्यापि महायोगेन भगवद्गुणप्रकाशकत्वेन मुमुक्षुप्रयोजनाभावासिद्धेस्तदंशे सङ्कोचावश्यम्भाववर्णनमप्ययुक्तम्।

तस्मात् स्वत्वाविवक्षायां बाधकं नास्ति नो मते।
चोदनाद्यविशेषादिबाधकं चास्ति ते मते[1]॥

'अध्यापनविधिप्रयुक्तमध्ययनम्' इति पूर्वोक्तस्य निरासेन सिद्धान्तोपसंहारः

यच्चाध्ययनस्याध्यापनविधिप्रयुक्तत्ववर्णनं तदप्ययुक्तम्। एकमेव माणवक-

१. क. बाधकं चास्ति तेन ते।

मध्यापयताऽऽचार्येणाध्यापनविधिरनुष्ठित एवेति माणवकान्तरस्याध्ययनाभावप्रसङ्गात् । उपनायक आचार्ये प्रमिते तदुपनीतस्यैकस्यापि माणवकस्याध्ययनाभावप्रसङ्गाच्च । तस्मात् -

सङ्कोचे कारणाभावात् सर्वाध्ययनमिष्यते ।
श्रवणं मननं चातः सर्वशाखागतं भवेत् ॥ इति सिद्धान्तः ।

पूर्वपक्षसिद्धान्तयोः फलितम्

अत्र सर्वशाखाविषयश्रवणमननयोरभावेऽध्ययनार्थिभिः[1] सर्ववेदान् श्रवणमननाभ्यां निर्णीय, 'ज्ञातव्यं ब्रह्म' इति नियमाभावेन सर्वश्रुत्यर्थनिर्णायकस्य शास्त्रस्य सर्वोपादेयत्वं नास्तीति पूर्वपक्षे फलितम्। सिद्धान्ते तु नियमसद्भावादस्ति सर्वोपादेयत्वमिति ।

सूत्रक्रमः

सूत्रक्रमस्तु, आद्ये स्वपक्षसाधकोक्तिः । अवशिष्टेषु बाधकानामुद्धारः । 'हेत्वन्तरेणैतमर्थं साधयत्' इति 'स्वाध्यायस्य' (ब्र.सू. ३.३.३) इति सूत्रावतारटीका तु बाधकाभावस्य स्वपक्षसाधकत्वं चास्तीत्यभिप्रेत्य, नत्वत्र बाधकोद्धारो[2] न क्रियत इत्यभिप्रेत्य । तथा सति बाधकोद्धारपरात् 'भेदान्नेति चेत्' (ब्र.सू. ३.३.२) इत्यतः प्राचीनत्वमेवास्य सूत्रस्याऽपद्येत। 'चोदनाद्यविशेषात्' (ब्र.सू. ३.३.१) इत्यनेनैव 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २.१५) इत्यादिसङ्ग्रहोपपत्तेः स्वाध्यायसूत्रवैयर्थ्यापत्तेश्च । 'अनेन सर्वेषां सर्वशाखाध्ययनाभावात् सर्वज्ञानमयुक्तम्' इति परास्तमित्युत्तरटीकाविरोधाच्च ।

'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्' इति प्रथमसूत्रार्थः

सूत्रार्थस्तु - **सर्वे** ये **वेदा** अनेकशाखासमुदायात्मकाः तेषां योऽन्त

---
१. म.ध्यानार्थिभिः । २. म. स्वतन्त्रबाधकोद्धारः ।

अभ्यासाद्युक्तन्यायैस्तात्पर्यनिर्णयः तज्जन्यः **प्रत्ययो** ज्ञानं यस्मिन् विषये, प्रतीयते इति वा प्रत्ययं ब्रह्म सर्ववेदान्तप्रत्ययम्। 'पूर्वं तु बादरायणः' (ब्र.सू. ३.२.४२) इति पूर्वसूत्रे प्रकृतं ब्रह्मात्रान्वेति। सर्वशाखाश्रवणमननाभ्यां जिज्ञास्यं ब्रह्म। न तु तत्तच्छाखाश्रवणमननमात्रेणेति यावत्। 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इत्यादीनां सर्वशाखासाधारणात्मस्वरूपोपासनविधीनां तात्पर्यनिर्णयार्थं समन्वयाध्यायोक्तयुक्तीनां काण्वादिशाखायामेवोक्तानां 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. १.४.७) इत्यादियुक्तीनां चाविशिष्टत्वात् । तथाच सर्वशाखासाधारणात्मस्वरूपविषयिणी सर्वशाखासाधारणन्यायघटिता चेच्छ्रवणमननरूपोपासना सर्वशाखानां कथं न स्यादिति भावः ।

'भेदान्नेति चेन्नैकस्यामपि' इति द्वितीयसूत्रार्थः

ननु तैत्तिरीयैः ज्ञानमिति काण्वैस्तु विज्ञानमिति तत्तद्विधिसमीपे तत्तच्छाखिनोऽधिकारिणः कल्प्यन्ते भिन्ना एव। यथा यागादौ गृहिणः। अन्यथा ज्ञानविज्ञानशब्दयोर्वाच्यस्य ब्रह्मण एकत्वात् सर्वशाखाध्यायिनं प्रति विज्ञानशब्दोक्तमेव ब्रह्म ज्ञानपदेनाप्यभिधीयत इति पुनरुक्तिर्दुर्वारा स्यात् इत्याशङ्क्य परिहरति द्वितीयेन सूत्रेण। एवमुक्तरीत्या 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३.९.३४), 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१) इत्यादिना प्रतिशाखं ब्रह्मण ऐक्येऽपि विज्ञानज्ञानपदरूपोक्तिभेदादधिकारिभेदोऽपौनरुक्त्याय कल्प्यते। कल्पितात् तत्तच्छाखिलक्षणाधिकारिभेदात् सर्वशाखासूक्तैकाधिकारिकत्वं नेति चेन्न । **एकस्यामपि** शाखायां 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७), 'खं ब्रह्म' (बृ.उ. ५.१.१) (छा.उ. ४.१०.५) इति च पूर्णत्ववाचकयोरात्मखशब्दरूपोक्त्योर्भेदात्, तत्राप्यपौनरुक्त्याय अधिकारिभेदकल्पनापत्तेः । नचैकस्यामपि शाखायां भिन्नाधिकारिकत्वमिष्टम्। तत्र पौनरुक्त्यं दार्ढ्यहेतुरेव, अभ्यासवदिति यदि तदा प्रकृतेऽपि समानमिति भावः ।

'स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च' इति तृतीयसूत्रार्थः

नन्वध्ययनस्य सर्वशाखाविषयस्याभावेन तद्व्याप्यं श्रवणमननादिरूपमुपासनं न युज्यत इति बाधकान्तरं व्यापकसमर्थनेन परिह्रियते तृतीयेन सूत्रेण। **स्वाध्यायस्य तथात्वेन** स्वाध्यायशब्दोक्तवेदमात्रस्य सर्वशाखिसाधारण्येन ज्ञानार्थं 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २.१५) इति सामान्यतो विहितत्वेन सर्वशाखाध्ययनं न क्वचिद् व्यावर्तत इति शेषः । अत्रापि पूर्ववदधिकारिविशेषः कल्प्यते? नेत्याह। 'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना' (ब्रह्मसूत्रभाष्योदाहृतश्रुतिः) इति स्मृतिसूचकेन हिशब्देन । कैमुतिकन्यायेनापि सर्वशाखानामध्ययनं साधयति- **समाचारे** सर्वकर्मकृतौ 'सर्ववेदोक्तमार्गेण कर्म कुर्वीत नित्यशः' (ब्रह्मसूत्रभाष्योदाहृतश्रुतिः) इत्यादिनाऽ**धिकारात्** किमु वक्तव्यमिति । यद्वा, सर्वशाखाध्ययने सर्वकर्मानुष्ठानमपि प्रसज्येतेत्येतद् बाधकमिष्टापत्त्या परिहरति।

'सलिलवच्च तन्नियमः' इति चतुर्थसूत्रार्थः

सर्वशाखाश्रवणमननवत एव ध्यानाधिकारसम्प्राप्त्या मन्दानां ध्यानेऽधिकारो न स्यादिति। बाधकान्तरं 'सलिलवच्च तन्नियमः' (ब्र.सू. ३.३.४) इति चतुर्थे परिहरति।

यद्वा, यदि सर्वा अपि शाखा अविशेषेण सर्वशाखिनः प्रति सर्वानपि ब्रह्मनिष्ठान् गुणान् प्रकाशयन्ति तर्हि ब्रह्मान्तानामधिकारिणां ज्ञाने वैषम्यं न स्यादिति बाधकमनेनोद्ध्रियते। शाखिभेदेन वैषम्याभावेऽपि सलिलवत् प्रमातृशक्तिभेदेन तासामेव शाखानां प्रमेयब्रह्मप्रमाणवैषम्यसत्त्वाज्ज्ञाने वैषम्यम् । अत एव मन्दानां तदनुसारेण ध्यानमपि सम्भवतीति भावः।

'दर्शयति च' इत्यन्तिमसूत्रार्थः

ननु स्वरवर्णाद्यात्मकस्य तत्तत्कर्माभिधायकस्य कर्मकाण्डस्य कथं ब्रह्मपरत्वमिति बाधकान्तरं परिहरत्यन्तेन।

'सर्वैश्च वेदैः परमो हि देवो विज्ञास्यः'

(ब्रह्मसूत्रभाष्योदाहृतचतुर्वेदशिखाश्रुतिः),

'सर्वान् वेदान् सेतिहासान् सपुराणान् सयुक्तिकान्'

(ब्रह्मसूत्रभाष्योदाहृतब्रह्मतर्कवचनम्)

इति श्रुतिः, ब्रह्मतर्कवचनं च कर्मकाण्डस्यापि सर्ववेदान्तर्गतत्वाज्जिज्ञास्यत्वं **दर्शयतीत्यर्थः**। चशब्दः सर्वत्र बाधकान्तरसमुच्चये द्रष्टव्यः।

शाङ्करभाष्ये पूर्वपादेन सङ्गतिप्रदर्शनमनुपपन्नम्

अत्रान्येषां भाष्ये, 'व्याख्यातं विज्ञेयस्य ब्रह्मणस्तत्त्वम्, इदानीं तु प्रतिवेदान्तं विज्ञानानि भिद्यन्ते न वेति विचार्यते' इति पूर्वसङ्गतिरुक्ता। तत्र प्रष्टव्यम्। किं पूर्वपादे विज्ञेयं ब्रह्म सगुणं निर्गुणमिति। आद्ये सगुणस्य प्रतिविशेषणं भिन्नत्वात् तद्विषयाणि विज्ञानानि भिन्नान्येवेत्यस्य को विचारयिता[१] ?

'न स्थानतोऽपीत्यस्मात् प्राक् त्वम्पदार्थो विधित्सितः।
तत्पदार्थस्ततः पश्चाद् यावत्पादः समाप्यते ॥'

इति कल्पतरूक्त्या तत्पदार्थस्य निर्गुणस्यैव विज्ञेयत्वावगमाच्च। सगुणमपि तत्र प्रकृतमिति चेन्न । असिद्धेः । सिद्धौ वा व्यवहितम् । अन्त्ये तु 'ननु विज्ञेयं ब्रह्म पूर्वापरादिभेदरहितमेकरसं सैन्धवघनवदवधारितम्' इत्यादिना भाष्योद्घाटितायाश्चिन्तानवकाशशङ्काया अनुद्धार एव । सगुणब्रह्मविषया

---

१. म. निवारयिता।

प्राणादिविषया चेयं विज्ञानभेदाभेदचिन्तेत्यदोष इति भाष्योक्तसमाधानस्य सगुणस्य पूर्वपादार्थत्व एव सम्भवेऽपि निर्गुणस्य तथात्वेऽसम्भवाच्च। साधनाध्यायत्वादुपासनायां सङ्गतिवद् विज्ञानाभेदे सङ्गत्यभावाच्च।

अत्र कल्पतरूक्तस्य समाधानस्य निरासः

अत्रोक्तं कल्पतरौ - 'द्वितीये पादे तत्त्वम्पदार्थौ शोधितौ। इदानीमपुनरुक्तापेक्षिततत्पदार्थोपसंहारेण निर्गुणब्रह्मवाक्यानामर्थोऽवधार्यते' इति। तन्न। 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इत्यादावेव निर्गुणवाक्यानामर्थोऽवधारित एवेति पादवैयर्थ्यात्। तत्त्वम्पदार्थशोधनस्येहोपयोगादर्शनाच्च। तत्पदार्थोपसंहारेण वाक्यार्थावधारणार्थमुपयुक्तमेवेति चेन्न। त्वन्मते वाक्यार्थो हि न विशेषणविशेष्यादिसंसर्गरूपः। किन्तु अखण्डचिन्मात्रमेव। तद्यदि 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इत्यादिना शोधितं तदैव वाक्यार्थोऽवधृत एव। यदि तु न, तदा कथं न स्वव्याहतिः। तत्पदार्थोपसंहारस्य वाक्यार्थावधारणरूपत्वादेव द्वारद्वारिभावानुपपत्तेश्च। सामान्यविशेषभावस्य चानङ्गीकारात्। अङ्गीकारे चाखण्डत्वमेव खण्डितम्।

किञ्चैतत्पादीयाधिकरणेषु बहुषु सगुणवाक्यानां विचारदर्शनान्निर्गुणवाक्यविचारस्यैतत्पादार्थत्वानुपपत्तिः। किञ्च निर्गुणवाक्यं हि निर्गुणप्रतिपादकवाक्यमेव नान्यदिति निर्गुणस्य चिन्मात्रत्वेन प्रतिपत्तिकर्मत्वानुपपत्तिः। 'अवचनेनैव प्रोवाच' (तै.उ.) इत्यादिना तस्य वाक्यार्थत्वनिराकरणाच्च। लक्षणया वाक्यार्थत्वसम्पादनायाः अवाच्ये लक्षणायोगेन दुराशामात्रत्वात्।

निर्गुणविद्योपयोगितया सगुणवाक्यार्थचिन्ता इति कल्पतरूक्तस्य निरासः

एतेन सगुणवाक्यार्थचिन्ता तु तद्विद्यानां सत्त्वशुद्धिद्वारा निर्गुणविद्योपयोगान्नायुक्तेति निरस्तम्। सगुणवाक्यार्थचिन्तया निर्गुणविद्याविरुद्धसगुणनिश्चयेन तत्त्वनिर्णयप्रतिबन्धकेनाऽक्रान्ततया चित्तस्य मलिनतया चित्त-

शुद्ध्यनुत्पादाच्च। अन्यथा चैत्यवन्दनादेरपि चित्तशुद्धिद्वारा धर्मोपयोगोऽस्तीति स्यात्। निर्गुणविद्यायां साक्षादेव भेदाभेदचिन्तायाः समुचिततया सगुणविद्यायां भेदाभेदचिन्तायोगाच्च। भेदापनोदार्थं सगुणविद्यायां भेदादिचिन्तनं, निर्गुणविद्यायां तु वेद्याभेदादैक्यं सिद्धमेवेति तन्न विचार्यत इति चेत्, तत् किं सगुणविद्यायां वेद्यभेदोऽभ्युपगम्यते। अद्धेति चेन्न। आरोपितवेद्यभेदस्य निर्गुणविद्यायामपि सम्भवेनानारोपितवेद्यभेदस्य सगुणविद्यायामप्यसम्भवेन वैषम्यायोगात्।

अद्वैतमतरीत्या एतदधिकरणपूर्वपक्षसिद्धान्तौ

यच्चास्याधिकरणस्य शरीरम्- किं विज्ञानानि प्रतिशाखं भिन्नान्युत नेति। तत्र भिन्नान्येव विज्ञानानीति युक्तम्। वेदान्तान्तरविहितेषु काठकं तैत्तिरीयकं कौथूमकमित्यादिनामभेदात्। अन्यथा 'एष ज्योतिरथैष विश्वज्योतिः' इत्यादावपि कर्मभेदो न स्यात्। द्युप्रभृतिपञ्चाग्निविद्यायाः पञ्चत्वषट्त्वाख्यरूपभेदात् प्राणसंवादे चतुष्ट्वपञ्चत्वरूपन्यूनाधिकभावाख्यरूपभेदाच्च। नह्येकस्यां विद्यायां रूपभेदो युज्यते। अन्यथा वाजिनाख्यरूपभेदादागमभेदो न स्यात्। आथर्वणिकानां शिरोव्रतं नान्येषामिति धर्मभेदाच्च। नहि विज्ञानैक्ये शिरोव्रतादयः धर्माः भिद्यन्ते। प्राणादिविद्याया समिदादिवच्छाखान्तरेषु पुनराम्नानाच्च। नहि विज्ञानैक्ये शाखान्तरेषु पुनर्विधानं युज्यते। अप्रवृत्तप्रवर्तनात्वाज्ञातज्ञापकत्वरूपविधिस्वभावव्याकोपापातात्।

किञ्च, यदि तच्छाखासु विहितानि विज्ञानानि न भिन्नानि, तदा तेषामुपसंहर्तुमशक्यता। सर्ववेदाध्ययनासामर्थ्यात्। किञ्च, केषाञ्चिच्छाखिनामोङ्कारसार्वात्म्यकथनेन समाप्तिः, केषाञ्चिदन्यथा। किञ्च, 'नैतदचीर्णव्रतोऽधीते' (मुं.उ. ३.२.११) इत्यचीर्णव्रतस्याध्ययननिषेधः क्वचिदचीर्णव्रतस्याध्ययनदर्शनं च विज्ञानभेदे लिङ्गम्। नह्येकमेव विज्ञानमचीर्णव्रतेन नाध्येतव्यमध्येतव्यं चेति युज्यते। तस्मादेतेभ्यो हेतुभ्यो विज्ञानभेद इति प्राप्ते-

अभिधीयते । प्राणविद्यादौ ज्येष्ठत्वश्रेष्ठत्वादिमत्प्राणप्राप्तिः फलं सर्वत्र सममेवावगम्यत इति न शाखान्तरोक्तानां प्राणविद्यादीनां भेदः । नहि विद्याभेदे फलैक्यं सम्भवति । किञ्च वेद्यं हि विद्याया रूपं कर्मणो द्रव्यदेवते इव । तच्च नानाशाखागतप्राणादिविद्यासु ज्येष्ठत्वश्रेष्ठत्वादिगुणकमेकमवसीयते । नहि विद्याभेदे वेद्यैक्यं युक्तम् ।

किञ्च, 'यो ह वै ज्येष्ठं च श्रेष्ठं च' (बृ.उ. ६.१.६, छा.उ. ५.१.१) इत्यादिविद्यानां नानाशाखोक्तानामपि प्राणविद्येत्याख्या विशिष्टा । नहि सञ्ज्ञिनां भेदे सञ्ज्ञैक्यमुपपद्यते । किञ्च, ज्येष्ठत्वश्रेष्ठत्वविषयवेदनावच्छिन्नः पुरुषप्रयत्नः प्राणादिविद्यायां यादृश एकत्र श्रूयते तादृश एव सर्वत्र विधीयते- 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद' (छा.उ. ५.१.१) इत्यादि । तस्मात् सर्वत्र विद्यैक्यम्[1] ।

'नामादिभेदाद् विद्याभेदः' इति शङ्काया निरासः

यत्तु नामादिभेदाद् भेद इति, तन्न । कठादिप्रवचननिमित्तानां काठकादि-सञ्ज्ञानां ग्रन्थविषयत्वात्, प्रवचनस्य ग्रन्थविषयत्वेन विद्यास्वसम्भवात् ग्रन्थ-समाख्यानां विद्यासु लाक्षणिकः प्रयोगः । ज्योतिरादिनाम च न कर्मण्यमुख्यमिति वैषम्यम् । द्युप्रभृतिपञ्चाग्निविद्यायां च वाजसनेयिनामपि छन्दोगानामिव पञ्चत्वसङ्ख्यैव, न षट्त्वसङ्ख्या । येन रूपभेदाद् विद्याभेदः । परन्तु वाजसनेयिनां शाखायां षष्ठोऽग्निः सम्पाद्यत्वाभावायानूद्यते । नतु विधीयते । वैश्वदेव्यां तूत्पत्तावामिक्षा विधीयमाना वाजिनमनवकाशयतीति वैषम्यम् । धर्मविशेषोऽप्य-न्यथासिद्धः । 'शिरोव्रतं वेदव्रतेन व्याख्यातम्' इति वचनात् तस्य ग्रन्थसम्बन्धित्वेन यैराथर्वणिकग्रन्थद्वारा विद्याऽधिगन्तव्या तेषामेव शिरोव्रतपूर्वकाध्ययन-प्राप्तग्रन्थसम्बोधिता विद्या फलं प्रयच्छति । अन्येषां तु छन्दोगादीनामचीर्ण-

१. म. विज्ञानैक्यम् ।

शिरोव्रतानामपि फलप्रदेत्युपपत्तेः । एतेन 'नैतदचीर्णव्रतोऽधीते' (मु.उ. ३.२.११) इति लिङ्गदर्शनमपि व्याख्यातम् ।

पुनरुक्तेः विद्याभेदहेतुत्वनिरासः

एवमभ्यासाख्यं पुनराम्नानमपि न विद्यां भिनत्ति । शाखान्तरेष्वध्येतृ-भेदात् पुनराम्नानस्य प्रयोजनवत्त्वेनौत्सर्गिकस्याज्ञातज्ञापनाऽप्रवृत्तप्रवर्तना-रूपविधित्वस्य व्याकोपप्रसङ्गेन भेदकत्वायोगात् । अशक्तिरपि न विद्याभेद-हेतुः । शाखान्तरगतार्थानां तदध्येतृसर्वज्ञमन्वादिप्रणीतग्रन्थेभ्योऽधिगम्योपसंहर्तुं शक्तेः । नच शाखान्तराध्ययनवैयर्थ्यम् । 'स्वाध्यायोऽध्येतव्यः' (तै.आ.२.१५) इति स्वशाखाध्ययनस्यैव नियमितत्वेन परशाखाध्ययनानपेक्षणात् । समाप्ति-वचनभेदोऽपि न भेदहेतुः । तत्तच्छाखावगम्ये पदार्थे समाप्तेऽपि, यजुर्वेदे आध्वर्यवे कर्मणि समाप्ते 'ज्योतिष्टोमः समाप्तः' इति व्यपदेशवदुपपत्तेः ।

'छान्दोग्यबृहदारण्यकोक्तप्राणविद्ययोः सन्निध्यभावाद् विद्याभेदः' इत्याशङ्काया निरासः

एतेन, छान्दोग्योक्तप्राणविद्यायाः बृहदारण्यकोक्तप्राणविद्यायाः सन्निधानाभावात् प्रकरणान्तरन्यायेन विद्याभेद इति निरस्तम् । तत्तद्गुणविशिष्टाया विद्यायाः शाखान्तरे प्रत्यभिज्ञानाद् बुद्धिसन्निधानोपपत्तेरिति ।

पूर्वमीमांसायाम् एतन्न्यायैरेव विद्यैक्यस्य समर्थनात् पुनरेतस्मिन् शास्त्रे तदारम्भायोग इति शाङ्करभाष्योक्तैतदधिकरणसिद्धान्तनिरासः

तन्न । शाबरभाष्ये शाखान्तरेऽप्याम्नातेषु ज्योतिष्टोमाग्निहोत्रादिषु किं परस्परं भेदोऽस्ति नेति सन्दिह्य, काठकशाक्यायन[1] कौथूमकादिनामभेदः प्रसिद्धः । एवं दर्शपूर्णमासयोः प्रकरणे कस्याञ्चिच्छाखायाम् अग्नीषोमीय एकादशकपाल

१. क. शाट्यायन ।

आम्नातः। कस्याश्चिद् द्वादशकपालः। एवं कारीर्यादियागोऽश्वमेधादिरग्न्यध्ययनादिश्च कस्याश्चिच्छाखायां भूभोजनाश्वघासदानोदकुम्भाहरणादिधर्मविशेषवानाम्नायते। नान्येषाम्। एवमग्निहोत्रादीनामविशेषपुनःश्रुतिरूपाभ्यासात्मकपुनरुक्तिः स्पष्टैव। एवं 'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्। दिवा कीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिः' इत्यनुदितहोमनिन्दा, 'यथाऽतिथये प्रद्रुतायान्नमाहरेयुः तादृक् तद्यदुदिते जुह्वति' इत्युदितहोमनिन्दा च श्रूयते। एवमुदयात् पूर्वहोमे कस्याश्चिच्छाखायां प्रायश्चित्तमाम्नायते। कस्याश्चिदुदयानन्तरहोमे। एवमशक्तिः- सर्वशाखोदितसकलाङ्गग्रहणार्थं तावच्छाखाध्ययनाशक्तिः। एवं मैत्रायणीयानामन्वारोहसञ्ज्ञिकेषु स्थलारोहणमन्त्रेष्वग्निवचनस्य समाप्तिः, अन्यत्रान्येषामिति समाप्तिभेदः।

एवं यदि पुरा दीक्षाणाः स्युर्बृहत्सामानमतिरात्रमुपेयुरुपेतं ह्येषां रथन्तरं यद्यदीक्षाणा रथन्तरसामानमतिरात्रमुपेयुरित्यनिष्टप्रथमयज्ञानां द्वादशाहदर्शनं शाखाभेदेन ज्योतिष्टोमभेदेऽन्यार्थदर्शनरूपं लिङ्गम्। तत्र द्वादशाहाधिकारिणोऽनिष्टप्रथमयज्ञत्वं ज्योतिष्टोमभेदे च कल्प्यते[१], नान्यथा। 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन यजते गर्तपत्यमेव तत्' इति काठके ज्योतिष्टोमपूर्वक एव सर्वयज्ञेष्वधिकारो दर्शितः। ततोऽन्योऽप्यस्ति ज्योतिष्टोमः यद्रहितस्य द्वादशाहाधिकार इति गम्यते। तथाचैतानि नामादीनि कर्मभेदं विनाऽनुपपन्नानीति शाखान्तरोदितकर्मणां भेद एव। अन्यथा 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिः' इत्यादौ 'तप्ते पयसि दध्यानयति', 'सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनाम्' इत्यादौ 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इत्यादौ च कर्मभेदो न

१. क. ज्योतिष्टोमभेदेऽवकल्प्यते।

स्यादिति 'नामरूपधर्मविशेषपुनरुक्तिनिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरे कर्मभेदः स्यात्' इति सूत्रेण पूर्वपक्षमभिधाय, न तावन्नामभेदः[१]। काठकादिनाम्नां प्रवचनाधिकारविहितप्रत्ययान्ततत्वेन ग्रन्थविषयत्वेऽपि कर्मविषयत्वाभावात्। व्यवहारस्तु ग्रन्थद्वारा तत्प्रतिपाद्ये कर्मणि लाक्षणिकः। 'अथैष ज्योतिः' इत्यादौ तु ज्योतिरादिसञ्ज्ञानां कर्मणि मुख्यतैव। एवं रूपभेदोऽपि न कर्मभेदहेतुः। शाखाद्वयस्यापि तुल्यबलत्वेनैकादशकपालद्वादशकपालत्वयोरेकस्मिन्नपि कर्मणि विकल्पसम्भवात्। एवं धर्मविशेषोऽपि भूभोजनादिग्रन्थाध्ययनस्यैव धर्मो न कर्मणः। पुनरुक्तिश्च न साक्षात् कर्मभेदिका समिदादिष्वपि। किन्तु वैयर्थ्यापादकतयैव। एकस्यामपि शाखायामविशेषपुनःश्रवणे प्रयोजनादर्शनात्। नचेह शाखान्तरे पुनःश्रुतिरनर्थिका। अनध्येतृपुरुषं प्रति तत्सार्थक्योपपत्तेः। निन्दा च न भेदहेतुः। उदितानुदितहोमान्यतरदारभ्य पुनस्तत्परित्यागे निन्दोपपत्तेः। एवं प्रायश्चित्तमपि व्याख्यातम्। तपःप्रभावावगतसकलवेदार्थाप[२]स्तम्भादिमुनिप्रणीतकल्पसूत्राध्ययनमात्रेण सकलाङ्गोपसंहारसम्भवेन नाशक्तिरपि भेदहेतुः। आध्वर्यवादिसमाप्तिभेद इव कर्मैक्येऽप्युपपत्तेर्न समाप्तिर्भेदहेतुः। लिङ्गदर्शनमपि द्वादशाहेनादीक्षितविषयम्। ये द्वादशाहेन दीक्षितास्ते बृहत्सामानमतिरात्रमुपेयुः, द्वादशाहेनादीक्षितास्तु रथन्तरसामानमिति। ततश्च सर्वयज्ञान् प्रति ज्योतिष्टोमप्राथम्यस्याभङ्गान्न ज्योतिष्टोमभेद इति 'एकस्य तु लिङ्गभेदात् प्रयोजनमुच्येतैकत्वं गुणवाक्यत्वात्' (पूर्वमीमांसा) इत्यादिना सूत्रेण सिद्धान्ताभिधानादिहापि तन्न्यायेनैव विद्यैक्यसिद्धेः पुनरारम्भायोगात्। विषयभेदमात्रेण पुनरारम्भे शास्त्रापर्यवसानप्रसङ्गः।

अत्र भामत्युक्तः परिहारः तन्निरासश्च

अत्रोक्तं भामत्यां- युक्तं यदग्नीषोमीयस्योत्पन्नस्य पश्चादेकादशकपाल-

२. क. नाम्ना भेदः। १. म. पदार्थ।

त्वादिसम्बन्धेऽप्यभेद इति। यथोत्पन्नस्य निर्वाणस्य[1] तस्य सर्वत्र प्रत्यभिज्ञायमानत्वात्। इह त्वग्निषूत्पत्तिगत एव गुणभेद इति कथं वैश्वदेवीवन्न भेदक इति विशेषाशङ्कायाः 'तथोत्थानविसर्जने', 'अत एव प्राणः' (ब्र.सू. १.१.२३) इत्यादाविव पुनरुत्थानान्नैष दोष इति। तद्युक्तम्। वेदान्ते सिद्धब्रह्मस्वरूपमात्रप्रतिपादनेनापि चारितार्थ्यात्, उत्पत्तिपरत्वस्याऽवश्यकत्वनिर्बन्धाभावेन पञ्चत्वषट्त्वरूपगुणद्वयस्याप्युत्पत्तिशिष्टत्वशङ्काया अनुदयात्। 'अग्नीषोमीयमेकादशकपालम्' इत्यादिरूपेणैवाग्नीषोमीयोत्पत्तिवाक्यस्य पाठमङ्गीकृत्य द्वादशाध्याय्यां मीमांसायां विचारस्य प्रवृत्तत्वेऽपि निर्गुणकर्मोत्पत्तिवाक्याङ्गीकारेण वैषम्यकथनायोगाच्च। नूनमेवमप्रसिद्धवाक्यकल्पनेनाप्यधिकरणार्थमनुवदतां मीमांसकम्मन्यानां तदभिज्ञत्वप्रख्यापकमदृष्टमस्तीति वयं प्रतिजानीमः। 'वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना' (ब्र.सू.भा. उदाहृतस्मृतिः), 'सर्वैश्च वेदैः परमो हि देव : जिज्ञास्योऽसौ नाल्पवेदैः प्रसिद्ध्येत्', 'तस्मादेनं[2] सर्ववेदानधीत्य' (ब्र.सू.भा. उदाहृतचतुर्वेदशिखाश्रुतिः), 'सर्वान् वेदान् सेतिहासान्' (ब्र.सू.भा. उदाहृतब्रह्मतर्कवचनम्) इत्यादिवचनविरोधेन स्वत्वस्य विवक्षणायोगेन[3] परशाखाध्येतृभिः शाखान्तरगतार्थानधिगम्योपसंहर्तुमशक्यत्वादित्यशक्तिबाधकोद्धारस्यायुक्तत्वाच्च। अध्ययनं विना लिपिपाठादिना[4]ऽर्थावगमे दोषोक्तेश्च। स्वशाखाध्येतृभ्यः स्वशाखोक्तानामर्थानामप्यधिगमसम्भवेन स्वशाखाया अप्यध्ययनाभावप्रसङ्गाच्च।

स्वमतेनाशक्त्यादिबाधकोद्धारः

मन्मते तु सर्वशाखाध्येतृतमाधिकारिधौरेयाणां पुरुषविशेषाणामङ्गीकारेणाशक्तिरूपबाधकोद्धारः सुशक एव। एवं पौनरुक्त्यदोषपरिहारोऽप्यधिकारिभेदेन

१. म. निर्गुणस्य। २. म. एवम्। ३. म. विवक्षायोगेन।
४. क. अपपाठादिना।

सुकर एव। तथाहि। अर्थभेदे निश्चिते न पौनरुक्त्यदोषः। प्रत्युत तदभाव एव दोषाय भवति। निश्चिते त्वर्थाभेदे दाढर्यार्थमभ्यासतया पौनरुक्त्यमेव युक्तम्। गतार्थता तु नास्त्येव। नहि मन्मते त्वन्मत इव नामरूपादिभेदेन तत्तच्छाखोक्तार्थमात्रगोचरोपास्तिभेदशङ्का। येन तवेव ममापि गतार्थत्वं न स्यात्। किन्तु श्रवणाद्यङ्गतत्तच्छाखाध्ययननैयत्येन सर्वशाखागोचरश्रवणाद्यकर्तव्यत्वशङ्का, तन्नैयत्यदूषणेन तत्समाधानमित्यङ्गीकारात्।

परमते विद्याभेदस्यैव स्वीकार्यत्वेन विद्यानामभेदसमर्थनपरसिद्धान्तानुपपत्तिः

किञ्च, त्वन्मते सगुणविद्यायां विशिष्टस्य वेद्यताङ्गीकारात्, तस्य च विशेषणविशेष्यतत्सम्बन्धातिरिक्तत्वपक्षे तदात्मकत्वपक्षे च भेदावश्यम्भावाद् वेद्यभेदेन विद्याभेदस्यैव स्वीकार्यतया सिद्धान्तानुपपत्तिः। विद्यैक्यसाधने प्रयोजनालाभश्च। शाखान्तरोक्तगुणानामुपसंहृतिः प्रयोजनमिति चेन्न। शाखान्तराध्ययनाभावे यथा न काचित् क्षतिस्तथा तदुक्तगुणोपसंहाराभावेऽपीति वक्तुं शक्यत्वात्। यैराथर्वणिकग्रन्थद्वारा विद्याऽधिगन्तव्या तेषामेव शिरोव्रतपूर्वकाध्ययनप्राप्तग्रन्थसम्बोधिता विद्या फलं प्रयच्छति, अन्येषां तु छन्दोगादीनामचीर्णशिरोव्रतानामपीति व्यवस्थाश्रयणेन यथा धर्मविशेषः समाहितः तथा 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३.९.३४), 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१) इति शाखाद्वयोक्तविद्यैक्येऽपि तत्तच्छाखाध्ययनपूर्वकग्रन्थसम्पादिता गुणोपसंहृतिस्तत्तच्छाखिनामेव फलं प्रयच्छति, अन्येषां तु शाखान्तरोक्तगुणोपसंहृतिरेवेति व्यवस्थाश्रयणसम्भवेन शाखान्तरोक्तगुणोपसंहृतिसिद्धिरपि न प्रयोजनमित्यापाताच्च।

शाङ्करभाष्योक्तप्रथमसूत्रार्थानुवादः तन्निरासश्च

एतेन, सर्ववेदान्तप्रमाणानि विज्ञानानि यान्येकस्मिन् वेदान्ते तान्येव वेदान्तान्तरेष्वपि। चोद्यप्रयत्नफलसंयोगरूपाख्यानामविशेषादिति प्रथमसूत्रस्यार्थ

इति निरस्तम्। प्रत्ययशब्दस्य प्रमाणे प्रयोगादर्शनात्। अत्र विज्ञानमात्रस्य पक्षत्वे कर्मकाण्डे भिन्नशाखोक्ताग्निहोत्रादिविषयकस्य, वेदान्तेऽपि सत्यज्ञानादिविषयस्य स्वाभिन्नस्य गुणान्तरविशिष्टज्ञानस्यापि प्राप्त्या तत्रैकत्वसाधनस्य सिद्धविषयत्वापत्त्या सर्ववेदान्तप्रत्ययत्वरूपविशेषणस्यापेक्षिततया तस्य साध्यपरत्वायोगेनावश्यवक्तव्यसाध्यस्यैवाध्याहारापाताच्च। विज्ञानपदाध्याहाराच्च। सर्ववेदान्तैर्जायमानः प्रत्यय इति लिङ्गव्यत्ययेन योजनायां, 'सर्ववेदान्तप्रत्ययानि विज्ञानानि' इति भाष्यविरोधः। प्रधानतया पूर्वप्रकृतब्रह्मपरत्वसम्भवेऽप्रकृतोपसर्जनविज्ञानपरत्वायोगाच्च। सर्ववेदोक्तविद्यानामप्यैक्यस्य सिषाधयिषितत्वेनान्तपदवैयर्थ्याच्च। मन्मते त्वन्तशब्दस्य निर्णयेऽपि प्रयोगदर्शनात् सर्ववेदानामन्तो य उक्तन्यायैस्तात्पर्यनिर्णयः तेन प्रत्येतव्यं ब्रह्मेति योजनायां न वैयर्थ्यशङ्कावकाशः। कृत्स्नोपनिषन्मात्रप्रत्ययमिति योजनायां, सर्वविधिवाक्यार्थवादयाज्यापुरोनुवाक्यास्तुतशस्त्रयजुर्निगदमन्त्राद्यप्रतिपाद्यत्वापत्त्या 'यज्ञो वै विष्णुः', 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' (भ.गी. ९.२४) इत्यादौ प्रमितं यज्ञत्वं सर्वयज्ञोपभोक्तृत्वं च 'सर्वे वेदा यत्पदम्' (कठ. २.१५), 'वेदैश्च सर्वैरहमेव वेद्यः' (भ.गी. १५.१५), 'एकैव व्याहृतिः' (ऐ.उ.), 'मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहम्। इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चन॥' (भाग. ११.२१.४३) इति सर्ववेदवेद्यत्वोक्तिश्च न स्यात्। चोदनाशब्दस्य विधौ रूढत्वेन प्रयत्नपरत्वायोगाच्च। यागादिविषयकप्रयत्नस्य तदनुकूलपरिस्पन्दादिनाऽनुमेयत्वेऽपीह विद्याविषयकप्रयत्नस्यानुमापकाभावाच्च।

भेदान्नेति द्वितीयसूत्रार्थानुवादः

यच्च, 'भेदान्नेति चेन्नैकस्यामपि' इति द्वितीयनञ्प्रक्षेपेणापपाठ्य सूत्रस्य व्याख्यानं- स्यादेतत्, सर्ववेदान्तप्रत्ययत्वं विज्ञानानां गुणभेदान्नोपपद्यते। तथा हि। वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमग्निमामनन्ति 'तस्याग्निरेवाग्निर्भवति' इत्यादिना। छन्दोगास्तु तन्नाऽमनन्ति। पञ्चसङ्ख्ययैव च तमुपसंहरन्ति 'अथ ह य एतान् पञ्चाग्नीन् वेद' इति। येषां च स गुणो नास्ति येषां चास्ति कथमुभयेषामेका विद्योपपद्येत। नचात्र गुणोपसंहारः शक्यते प्रत्येतुम्। पञ्चसङ्ख्याविरोधात्। तथा प्राणसंवादे श्रेष्ठादन्यांश्चतुरः प्राणान् वाक्चक्षुःश्रोत्रमनांसि छन्दोगा आमनन्ति। वाजसनेयिनस्तु पञ्चममप्यामनन्ति। 'रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद' इति। आवापोद्वापभेदाच्च वेद्यभेदो भवति। वेद्यभेदाच्च विद्याभेदः। द्रव्यदेवताभेदादिव यागस्येति चेत्। नैष दोषः। यत एकस्यामपि विद्यायामेवञ्जातीयको गुणभेद उपपद्यते। यद्यपि षष्ठस्याग्नेरुपसंहारो न सम्भवति। तथाऽपि द्युप्रभृतीनां पञ्चानामग्नीनामुभयत्र प्रत्यभिज्ञायमानत्वान्न तद्विद्याभेदो भवितुमर्हति। नहि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यते। पठ्यतेऽपि च षष्ठोऽग्निश्छन्दोगैः 'तं प्रेतं दिष्टमितोऽग्नये हरन्ति'[1] इति। वाजसनेयिनस्तु साम्पादिकेषु पञ्चसु अग्निष्वनुवृत्तायाः समिद्धूमादिकल्पनाया निवृत्तये 'तस्याग्निरेवाग्निर्भवति समित् समित्' इत्यादि समामनन्ति, स नित्यानुवादः। अथाप्युपासनार्थ एष वादः तथाऽपि स गुणः शक्यते छन्दोगैरुपसंहर्तुम्। न चात्र पञ्चसङ्ख्याविरोधः। साम्पादिकाग्न्यभिप्राया ह्येषा पञ्चसङ्ख्या नित्यानुवादभूता न विधिसमवायिनीत्यदोषः। एवं प्राणसंवादेष्वप्यधिकस्य गुणस्येतरत्रोपसंहारो न विरुद्ध्यते। नचाऽवापोद्वापभेदाद् वेद्यभेदो विद्याभेदश्च। कस्यचिद् वेद्यांशस्याऽवापोद्वापयोरपि भूयसो वेद्यराशेरभेदावगमादैकविद्यमेवेति।

तन्निरासः

तदयुक्तम्। गतार्थतापरिहाराय ह्यधिकाशङ्कोद्भाव्यते। 'तमिमं विशेषमभिप्रेत्याऽऽशङ्कते सूत्रकारः' इति भामतीवचनात्। 'इहापि कश्चिद्विशेषमाशङ्क्य

[1] क. अग्नय एवं हरन्ति।

परिहरति' इत्येतत्सूत्रावतारभाष्याच्च। तथाच विरुद्धधर्मद्वयसम्बन्धनिबन्धनायाः शङ्कायाः षोडशिग्रहणाग्रहणयवव्रीहिदधिपयःप्रभृतीनां वैकल्पिकत्वसमर्थनेन पूर्वकाण्ड एव परिहृतत्वेनेह पुनरनवकाशात्। आवापोद्वापभेदाद् वेद्यभेद-शङ्कनमप्यग्निहोत्रादीनामनुष्ठानकालेऽग्निसूर्यादिपदावापोद्वापाभ्यां सायम्प्रातः-कालनिमित्ताभ्यां भेदाभावस्य पूर्वकाण्ड एव साधितत्वादयुक्तम्। उपास्येषु पञ्चस्वग्निष्विव षष्ठेऽप्यग्नौ समिद्धूमादिभावनाया अपि कर्तव्यत्वसम्भवे तत्र तन्निवृत्तये नित्यानुवादत्वकल्पनायोगाच्च। प्रत्युत 'नच रमन्त्यहोऽसदुपासन-याऽऽत्महनः' (भाग.) इति मिथ्योपासनाया अनर्थोक्तेः प्रसिद्धसमिद्धूमादिष्वेव समिद्धूमादिभावनायाः फलवत्त्वाश्रयेण विधित्वकल्पनौचित्याच्च। नहि सम्भवति यत्र द्युपर्जन्यादिषु समिद्धोमादिभावो नास्ति तत्र तत्कल्पनाया फलम्। यत्र तु प्रसिद्ध एवाग्निधूमादौ तद्भावोऽस्ति, न तत्र तदुपासनेन फलम् इति। आवापो-द्वापयोर्वेद्ये वस्तुन्यंशभेदेन दृश्यमानयोरपि भूयसो वेद्यराशेरभेदावगमादिति समाधानं निरंशे ब्रह्मण्ययुक्तम्। सगुणस्य सांशत्वेऽपि यस्मिन्नंशे आवापोद्वापौ तस्मिन्नंशे वेद्यभेदाद् विद्यैक्यभङ्ग एव। भूयसो वेद्यराशेर्विद्यैक्यावगमात् तत्सह-पाठेनान्यत्रापि तदवगम इति चेन्न। एकस्यां शाखायां कर्मब्रह्मणोः सहपाठेऽपि तद्दर्शनेन सहपाठस्याप्रयोजकत्वात्। यत्र तु विरोधिप्रमाणं नास्ति तत्रैव सहपाठस्य प्रयोजकत्वम्। इह तु विरोधिधर्मदर्शनरूपं विरोधिप्रमाणमस्त्येव।

स्वाध्यायस्येति तृतीयसूत्रार्थानुवादनिरासौ

यदपि 'स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च', 'सलिलवच्च तन्नियमः' इति तृतीयचतुर्थयोरैक्यं, सलिलवदित्यत्र 'सववत्' इत्यपपाठं च विधाय यदप्युक्तमाथर्वणिकानां विद्यां प्रति शिरोव्रताद्यपेक्षणात्, अन्येषां तदनपेक्षणाद् विद्याभेद इति, तत् प्रत्युच्यते। स्वाध्यायस्यैष धर्मो, न विद्यायाः। कथमिदमवगम्यते? यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरे

ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन व्याख्यातमिति समामनन्ति। 'नैतदचीर्ण-व्रतोऽधीते' (मु.उ. ३.२.११) इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष निर्धार्यते। यथा च सवाः सप्तसौर्यादयः शतौदन-पर्यन्ताः वेदान्तरोदितत्रेताग्न्यनभिसम्बन्धादाथर्वणोदितैकाग्निसम्बन्धाच्चाऽ-थर्वणिकानामेव नियम्यते, तथैवायमपि धर्मः स्वाध्यायविशेषसम्बन्धात् तत्रैव नियम्यत इति व्याख्यानं, तदप्ययुक्तम्। एकस्मिन्नेव दर्शपूर्णमासादिके कर्मण्य-विकलाङ्गानां विष्णुक्रमणादिनियमापेक्षणा, विकलाङ्गानां तु तदनपेक्षणेतिवद् विद्यैक्येऽप्यधिकारिभेदेन शिरोव्रतापेक्षानपेक्षयोः सम्भवेन [1]शङ्कायोगात्। 'तेषा-मेवैतां ब्रह्मविद्यां वदेत' इति स्पष्टं विद्यासंयोगश्रवणादयुक्तश्चायं परिहारः।

वाचस्पतिमतानुवादनिरासौ

अत्रोक्तं वाचस्पतिना- 'एताम्' इति प्रकृतपरामर्शिना सर्वनाम्नाऽध्ययन-सम्बन्धाविरोधायाऽथर्वणविहितैव विद्योच्यत इति। तन्न। तथाऽपि विरोधापरि-हारात्। नहि सम्भवति साक्षाच्छ्रुतो विद्यासम्बन्धोऽकिञ्चित्करः, अर्थप्राप्त-स्वाध्यायसम्बन्धस्तु प्रयोजक इति। 'नैतदचीर्णव्रतोऽधीते' (मु.उ. ३.२.११) इत्यध्ययनसम्बन्धस्य स्पष्टत्वान्नैवमिति चेन्न। विद्यासंयोगस्यापि स्पष्टत्वात्।

एतेन 'अधिकाराच्च' इति सूत्रांशस्य 'नैतदचीर्णव्रतोऽधीते' (मु.उ. ३.२.११) इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष निर्धार्यत इति व्याख्यानं निरस्तम्। 'स्ववेदव्रतयुक्तस्य सर्ववेदगतास्वपि। अधि-कारोऽस्ति विद्यासु नावेदव्रतिनः क्वचित्॥' इति वचनाद् वेदव्रतत्वेन प्रसिद्धशिरो-व्रतादेरुपनिषन्मात्राध्ययनव्रतत्वोक्त्ययोगाच्च। कैमुतिकन्यायसूचकस्य सर्ववेदोक्त-कर्मसमाचारेऽधिकारदर्शनादिति व्याख्यानेनैकवाक्यतोपपत्तौ ग्रन्थविशेष-नामत्वेन भिन्नवाक्यतयाऽध्याहारेण च व्याख्यानानुपपत्तेश्च। सप्तानां सर्वहोमाना-

[1] म. शङ्काया एवायोगात्।

माथर्वणिकत्वप्रापकैकाग्निसम्बन्धस्य प्रसिद्धस्येवात्राऽथर्वणाध्ययनसम्बन्धित्वप्रापकपदार्थविशेषसम्बन्धस्य प्रसिद्धस्याभावात् 'सववच्च' इत्येतद्वृत्तिर्दुर्वृत्तिरेव। तस्मात् सम्प्रदायपरम्परागतपाठविरोधचिकीर्षया सूत्रकृद्द्रोहाचरणान्नान्यदुपलभामहे निमित्तं द्वितीयव्याख्यानस्य।

'दर्शयति च' इति सूत्रार्थानुवादस्तन्निरासश्च

यच्चान्तिमस्य दर्शयति च वेदो विद्यैकत्वं, सर्ववेदान्तेषु वेद्यैकत्वोपदेशात्। 'सर्वे वेदा यत्पदमामनन्ति' (भ.गी.) इति। तथा 'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते' इति च[१]। तथा 'महद् भयं वज्रमुद्यतम्' इति काठकोक्तस्येश्वरगुणस्य भयहेतुत्वस्य तैत्तिरीयके भेददर्शननिन्दायै परामर्शो दृश्यते- 'यदा ह्येवैषः' इत्यादि। तथा वाजसनेयके प्रादेशमात्रसम्पादितस्य वैश्वानरस्य छांन्दोग्ये सिद्धवदुपादानम् 'यस्त्वेतमेवं प्रादेशमात्रम्' (छा.उ.)इत्यादीति। तदप्यनुपपन्नम्। 'सर्वे वेदा यत्पदम्' इत्यादीनां सर्ववेदवेद्यैकत्वपरत्वस्य त्वन्मतेऽनङ्गीकारेणैतद्वाक्योदाहरणासङ्गतेः। वेदान्तेष्वेवमुपदेशाद् वेदान्तवेद्यस्यैवैक्यमभिप्रेतमिति चेन्न। 'सर्वे वेदाः' इति सामान्योक्तिविरोधात्। सर्ववेदपदं सर्ववेदान्तोपलक्षणमिति चेन्न। 'तपांसि सर्वाणि च यद् वदन्ति' इत्युत्तरवाक्यविरोधात्। 'एतं ह्येव बह्वृचा महत्युक्थे' इत्यादिनोक्थाग्निमहाव्रतेष्वैक्योक्त्या उक्थादीनां च कर्मकाण्ड एव सद्भावेन तद्विरोधाच्च। कर्मकाण्डोक्तस्यैव प्रमेयस्य स्वर्गसाधनत्वादेः प्रसङ्गाद् दृष्टान्ताभिप्रायेण परामर्शसिद्धवदुपादानयोर्बहुलमुपलम्भेऽपि कर्मब्रह्मकाण्डयोस्त्वन्मते वेद्यैक्यानङ्गीकारेण तयोस्तत्राप्रयोजकत्वाच्च।

किञ्च 'सर्वे वेदा यत्पदम्' इत्यादिवाक्यं वेद्यैक्यद्वारेण विद्यैक्यप्रदर्शकं निर्गुणब्रह्मविषयमेव, न सगुणविषयमिति हि त्वत्सिद्धान्तरहस्यम्। तथाच तेन निर्गुणविद्यैक्यसिद्धावपि कथं सगुणविद्यैक्यसिद्धिः।

१. म. वा।

अत्रोक्तं भामत्याम्- यत्रापि सगुणब्रह्मविद्यानां न साक्षाद् वेद एकत्वमाह तासामपि तत्प्रायपठितानां तत्प्रायदर्शनादेकत्वमेव। तथाहि- अग्र्यप्राये लिखितं दृष्ट्वा 'भवेदयमग्र्यः' इति बुद्धिरिति। तन्न। यदि निर्गुणविद्या नाम काचनासङ्कीर्णा वेदेषु दृश्येत स्यात् तदा तत्सन्निधिपठितानां सगुणब्रह्मविद्यानामप्येकत्वम्। 'साक्षी चेता केवलो निर्गुणश्च' (ब्र.सू.भा.उ. १.१.१०) इति निर्गुणविद्या दृश्यत इति चेन्न। साक्षित्वचेतृत्वादिगुणानां तत्रैवोपलम्भात्। चिन्मात्रलक्षणया तत्परत्वे सगुणविद्यानामपि तथात्वापत्त्या विद्याद्वैविध्यमसङ्गतं स्यात्। निर्गुणस्य तद्विद्यावेद्यत्वावेद्यत्वाभ्यां व्याघाताच्च।

विशिष्टाद्वैत्यभ्युपगताधिकरणशरीरम्

केचित्तु 'उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च' [१]इत्यन्तिमसूत्रमत्राधिकरणेऽन्तर्भाव्यैतदन्तां षट्सूत्रीं तद्वदेवापपाठेनैक्येन च पञ्चसूत्रीं विधाय, स्वाध्यायसूत्रे तृतीयान्तं सप्तम्यन्तं पठित्वा क्वचित् क्वचिदन्यथा व्याचख्युः।

तत्र स्वाध्यायसूत्रव्याख्यापरीक्षा

तथा हि स्वध्यायसूत्रव्याख्यानम्- शिरोव्रतं न विद्याङ्गम्। अपि तु स्वाध्यायस्य। तथाहि- तज्जन्यसंस्कारभाक्त्वे हि तन्नियमः। 'नैतदचीर्णव्रतोऽधीते' (मु.उ. ३.२.११)इत्यध्ययनसम्बन्धादित्यादि। तन्न। तथात्व इति सप्तम्यन्तस्य तज्जन्यसंस्कारभाक्त्वे हीति व्याख्याने तच्छब्देन शङ्काग्रन्थे प्रकृतशिरोव्रतोपदेशनियमरूपधर्मस्य परामर्शसम्भवेऽपि तज्जन्यसंस्कारभाक्त्वपरामर्शानुपपत्तेः। स्वाध्यायधर्मत्वेन समाचारग्रन्थे आम्नानादित्युक्तिसौकर्याय स्वरसायाः सम्प्रदायपाठागतायास्तृतीयायास्त्यागेन तादर्थ्यसप्तमीं प्रक्षिप्य तन्नियम इत्यादेरावृत्त्या च कुसृष्टिव्याख्यानस्यायुक्तत्वाच्च।

१. म. इत्यग्रिमसूत्रम्।

दर्शयतिसूत्रव्याख्यानपरीक्षा

दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम् । तथाहि- छान्दोग्ये 'तस्मिन् यदन्तस्तदन्वेष्टव्यम्' इत्युक्त्वा 'किं तदत्र विद्यते' इति प्रश्नपूर्वकमपहतपाप्मत्वादिगुणाष्टकविशिष्टः परमात्मा तस्मिन्नुपास्य इत्युक्तम् । तैत्तिरीयके तु छान्दोग्यस्थप्रतिनिर्देशमुपजीव्य 'तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्' (म.ना.उ.) इति गुणाष्टकविशिष्टस्य परमात्मनः उपासनमुच्यते । तदुभयत्र विद्यैकत्वेन गुणोपसंहारादेवोपपद्यत इति पञ्चमस्य व्याख्यानं, तदप्ययुक्तम् । तैत्तिरीयके गुणाष्टकविशिष्टपरमात्माप्रतीतेः । प्रतीतौ वा कर्मकाण्डप्रमेयमुपजीव्य ब्रह्मकाण्डप्रवृत्तेस्तयोर्विद्यैक्यं स्यात् ।

'विंशतिलक्षणमेकं शास्त्रम्' इति वदतामस्माकं नेदमनिष्टमिति चेन्न । शास्त्रैक्येऽपि विद्यैक्यासम्भवात् । नहि वेद्यैक्यनिबन्धनं विद्यैक्यं शास्त्रैक्यमात्रेणाभ्युपगन्तुं शक्यम् । एकस्मिन्नपि शास्त्रे प्रकरणभेदेन वेद्यभेदस्वीकारात् । अन्यथा कर्मणः कर्मकाण्डप्रमेयत्वाभावेनाकर्तव्यत्वमेव स्यात्[1] । षट्प्रश्नादिवेदान्तेषु मुख्यप्राणविद्यामुक्त्वा तदुपजीवनेन परमात्मविद्यायाः, परमात्मविद्यामुक्त्वा प्राणविद्यायाश्च प्रवर्तनात् तयोरप्यैक्यापत्तेश्च । साक्षाद् विद्यैक्यप्रदर्शनाभावेन 'दर्शयति च' इति सूत्रास्वारस्याच्च ।

उपसंहारसूत्रव्याख्यापरीक्षा

यच्च 'तदेवं शाखान्तराधिकरणान्तरन्यायसिद्धं विद्यैक्यं स्थिरीकृत्य तत्प्रयोजनमाह' इत्यन्तिमं सूत्रमवतार्यैवं सर्ववेदान्तेषूपासने समाने सति वेदान्तान्तराम्नातानां गुणानां वेदान्तान्तर उपसंहारः कर्तव्यः । विधिशेषवदर्थाभेदात् । यथैकस्मिन् वेदान्ते श्रुतो वैश्वानरदहरादिविधिशेषो गुणस्तद्विद्यासम्बन्धात्

१. क. कर्तव्यत्वमेव न स्यात् ।

तदुपकाररूपप्रयोजनसिद्ध्यर्थमनुष्ठीयते तथैव वेदान्तान्तरोदितोऽपि तद्विद्यासम्बन्धित्वेन तदुपकाराविशेषादुपसंहर्तव्य इत्यर्थ इति व्याख्यानं, तदपि न । तथा सति वेदान्तान्तरोदितगुणानां वेदान्तान्तर उपसंहारो नाम तदुक्तप्रमेयालिङ्गिततयैतदुक्तगुणानामेकबुद्ध्यावारोह एव । स च वेदान्तान्तरोक्तगुणज्ञानमपेक्षते । तच्च नाध्ययनमन्तरा सम्भवतीति शाखान्तराणामप्यध्ययनमापन्नम् । शाखान्तराध्येतृभ्योऽध्ययनमन्तराऽपि तदुक्तगुणज्ञानं सम्पाद्यत इति चेत्, तर्हि स्वशाखाध्ययनमपि न प्राप्तमेवेत्युक्तमेव । शास्त्रभेदवादिनः[1] शाखान्तरोक्तप्रमेयस्य स्थिरीकरणार्थं प्रयोजनादिप्रतिपिपादयिषया शास्त्रान्तरेऽनुवादसम्भवेन कथञ्चिच्छाखान्तराधिकरणापौनरुक्त्यसम्भवेऽपि 'विंशतिलक्षणमेकं शास्त्रम्' इति वदतस्तव मते तदपरिहारात् । एकस्मिन्नपि शास्त्रे बहुव्यवधानादविस्मरणाद्यर्थं पुनरुक्तिः यद्यपि तत्र तत्र दृष्टा । तथाऽपीह तथाऽऽश्रयणमगतिकागतित्वान्न सुचेतसां हृदयङ्गमम् । प्रयोजनसूचकत्वेऽपि अस्य प्रमेयभेदादधिकरणान्तरत्वस्यैव न्याय्यतयाऽधिकरणशेषत्वायोगाच्च । तस्मान्महामुनिकृतः सूत्रसन्दर्भादिः साम्प्रदायिकैरेवावसेय इति नार्वाचीनैरन्यथयितुं शक्यत इति मद्भाष्यरीतिरेव युक्ता ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - **सैव प्रथमाधिकरणे विधीयत इति** ।। शास्त्राभ्यासात्मकस्य श्रवणस्य मननस्य च ज्ञानात्मकत्वेऽपि ज्ञानेच्छयोरविधेयत्वस्यान्यत्र दूषितत्वेन विधानं युज्यत इति भावः। तयोरविधेयत्वपक्षेऽपि विधीयते प्रत्याय्यत इत्यर्थोऽनुसन्धेयः ।। **शास्त्रस्य सर्वोपादेयताभावप्रसङ्गादिति** ।। अनेन परपक्षे स्वस्वशाखाश्रवणमननाभ्यामेवोपासनासिद्धेरङ्गीकृतत्वाच्छाखान्तराणामध्येतव्यत्वनियमाभावेन शाखान्तराध्येतृभ्यस्तत्तदर्थावगमसिद्धेरनधीतानां च शाखान्तराणामर्थनिर्णयार्थं विनेयस्य प्रवृत्त्यनुपपत्तेरनन्तशाखार्थनिर्णायकस्यास्य शास्त्रस्य

१. क. वादिनाम् ।

तं प्रति उपयोगादर्शनेनास्य शास्त्रस्य सर्वोपादेयत्वं न प्राप्नोति, नास्माकं मत इति सूचयति।

अत्र तृतीयपादीयन्यायमाला।

पृथग्दृष्टिरशक्यत्वमनिर्णीतिः समुच्चयः।
विशेषदर्शनं कार्यलोपो नानोक्तिराशुता॥

विभ्रमोऽपाकृतिर्लिङ्गमनवस्थाऽविशेषिता।
अप्रयोजनता चातिप्रसङ्गोऽदूरसंश्रयः॥

[१]विशिष्टकारणं चेष्टा दृष्टवैरूप्य[२]मुन्नतिः।
अनुक्तिरप्रयत्नत्वं दृढबन्धपराभवौ॥

पुंसाम्यं प्राप्तसन्त्यागः कारणानिर्णयो भ्रमः।
विशेषदर्शिताऽऽलापो गुणसाम्यं पृथग्दृशिः॥

अगम्यवर्त्म सन्धानमिष्टं फलमकल्पना।
शुक्ल[३]वैरूप्यमङ्गत्वमविशेषदृशिः क्रिया॥

युक्तयः पूर्वपक्षस्थाः सुज्ञेयत्वं विधिक्रिया।
माहात्म्यमल्पशक्तित्वं यथायोग्यफलं भवः॥

फलसाम्यं विशेषत्वं[४] गुणाधिक्यं प्रधानता।
यथाशक्तिक्रिया सन्धिः प्रमाणबलमानतिः॥

कारणं कार्यवैशेष्यं स्वभावो वस्तुदूषणम्।
प्रतिक्रियाविरोधश्च प्रतिसन्धिरनूनता॥

---

१. म. विशेषकारणम्। २. क. दृष्टिवैरूप्यम्।
३. म. शुद्धवैरूप्यम्। ४. हृ. विशेषश्च।

संस्कारपाटवं स्वेच्छानियतिर्वस्तुवैभवम्।
विशेषोक्तिरमानत्वं प्राधान्यं प्रीतिरागमः॥

सुस्थिरत्वं कृतप्राप्तिरनादिगुणविस्तरः।
साधनोत्तमता नानादृष्टिसृष्टिरनूनता॥

अविघ्नत्वाविरोधौ च गुणवैशेष्यमागमः।
सिद्धान्तनिर्णया ह्येता युक्तयोऽव्याहताः सदा॥ इति।

टीकायां पूर्वपक्षीयपृथग्दृष्टिन्यायविवरणव्याख्यानम्

अत्र पृथग्दृष्टिन्यायं सम्बन्धिसाध्ययोः प्रदर्शनपूर्वकमेतदधिकरणसङ्गतत्वेन विवृण्वत् **'नच प्रतिशाखमुच्यमानानामर्थानां पृथक्त्वात् तत्तच्छाखिभिरेव तत्र तत्रोक्तं ज्ञेयमिति नियमः'** (न्या.वि.) इति वाक्यं वस्तुतोऽर्थानां पृथक्त्वाभावात् पृथक्त्वादिति पञ्चम्यन्तं तत्प्रकारकदर्शनोपलक्षणमिति भावेन व्याचष्टे- **प्रतिशाखमुच्यमानानामिति ॥** पृथक्त्वेन दर्शनमप्रयोजकमिति शङ्काऽप्यनेनैव परिहरणीयेति भावेन तत्सूचितानुकूलतर्काकारं दर्शयति- **अन्यथेति ॥ पूर्वोत्तरविरुद्धमिति मन्वान इति ॥** सर्ववेदान्तेषु विद्यैक्यमाद्ये सूत्रे प्रतिपाद्य 'दर्शयति' इत्युत्तरसूत्रे 'सर्वे वेदा यत्पदमामनन्ति' (भ.गी.), 'एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते' इत्यादिना सर्ववेदवेद्यैक्यप्रतिपादनात् पूर्वोत्तरविरुद्धमित्यर्थः। यद्वा, 'गतिसामान्यात्' (ब्र.सू. १.१.१०) इति ज्ञानस्य सर्ववेदेष्वप्येकविषयत्वमुक्त्वाऽधुना वेदान्तमात्रे तदुक्तौ सूत्रकारोक्त्योरेव विरोध इत्यर्थः।

टीकायां सुज्ञेयत्वाख्यसिद्धान्तन्यायविवरणस्य यथाटीकं व्याख्यानम्

सुज्ञेयत्वन्यायमेतदधिकरणसिद्धान्तसङ्गतत्वेन विवृण्वत् **' "नानावेदैरितिहासैः पुराणैः सुज्ञेय एको भगवान् युक्तिभिश्च"** इति श्रुतेः सुष्ठु ज्ञेयत्वाद्

विष्णोः' इति वाक्यं सूत्रयोजनात्मकमपि भवतीति मन्वानो भाष्येण सह सूत्रं व्याचष्टे- **पूर्वसूत्रे पूर्वपदोदितं ब्रह्मेत्यादिना** ॥ स्वस्य परशाखाध्ययनाभावेऽपि तत्तच्छाखाध्येतृभ्यो निर्णीय ब्रह्मज्ञानसम्पादनसम्भवान्न सर्वशाखाध्ययनादि-प्राप्तिरित्याशयेन पृच्छति- **किमुक्तं भवतीति** ॥ उक्तमाह- **ध्यानार्थिने-त्यादि** ॥ अनेन विवरणे सुज्ञेय इत्यन्तेन सर्ववेदान्तप्रत्ययमित्येतद् व्याख्या-तम्। युक्तिभिरित्यनेनाऽदिशब्दः, चशब्देन चोदनेति च विवेक्तव्यमिति सूचितं भवति।

सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यवर्णनम्

'सर्वरूपेष्वभेदवान्' इति सङ्क्षेपभाष्यं, परमेश्वरः सर्वशाखाप्रतिपाद्यमानः सर्वरूपेष्वभेदवान्; तथाचार्थभेदाभावात् सर्वशाखिभिरपि सामर्थ्ये सति ब्रह्मज्ञानं सम्पादनीयमित्येतदधिकरणसङ्गतत्वेनापि व्याख्येयम्।

॥ इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

॥ उपसंहाराधिकरणम् ॥ २ ॥

॥ सूत्रभाष्यम् ॥

सर्वैर्वेदैर्ज्ञेयो नोपास्योऽशक्यत्वादित्यत आह -

॥ॐ उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च ॐ ॥
॥ ३-३-६ ॥

सर्ववेदोक्तान् गुणान् दोषाभावांश्चोपसंहृत्यैव परमात्मोपास्यः।

'उपास्य एकः परतः परो यो वेदैश्च सर्वैः सह चेतिहासैः।
सपञ्चरात्रैः सपुराणैश्च देवः सर्वैर्गुणैस्तत्र तत्र प्रतीतैः॥'
इति भाल्लवेयश्रुतिः[१]।

आग्नेये च -

'विधिशेषाणि कर्माणि सर्ववेदोदितान्यपि।
यथा कार्याणि सर्वैश्च सर्वाण्येवाविशेषतः।
एवं सर्वगुणान् सर्वदोषाभावांश्च[२] यत्नतः।
योजयित्वैव भगवानुपास्यो नान्यथा क्वचित्॥' इति।

समानविषये चोपसंहारः। न तु 'सोऽरोदीत्' (तै.सं १-५-१) इत्यादी-नाम्।

'गुणैरेव स तूपास्यो नैव दोषैः कथञ्चन।
गुणैरपि न तूपास्यो ये पूर्णत्वविरोधिनः॥' इति बृहत्तन्त्रे[३] ॥६॥

---

१. ह. इति हि भाल्लवेयश्रुतिः। २. ह. सर्वैर्दोषाभावांश्च।
३. ह. इति हि बृहत्तन्त्रे।

॥ ॐ अन्यथात्वं च शब्दादिति[1] चेन्नाविशेषात् ॐ ॥
॥ ३-३-७ ॥

'आत्मेत्येवोपासीत' (बृ.उ.३-४-७) इति शब्दादुपसंहारस्यान्यथात्वमिति चेन्न। एते गुणा नोपास्या इति विशेषवचनाभावात्।

'सर्वैर्गुणैरेक एवेशिताऽसावुपासितव्यो न तु दोषैः कदाचित्' इति विशेषवचनाच्च। 'आत्मेत्येव' इत्यवधारणमनात्मत्वनिवृत्त्यर्थम्॥ ७॥

॥ ॐ नवा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॐ ॥
॥ ३-३-८ ॥

प्रकरणभेदान्न वोपसंहारः कार्यः। परोवरीयस्त्वादिषु तावदेव ह्युक्तम् ॥ ८॥

॥ ॐ सञ्ज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॐ ॥ ३-३-९॥

सर्वविद्या उक्त्वा 'सोऽहं नामविदेवास्मि नाऽत्मवित्' (छा.उ.७-१-३) इति वचनात् सर्वस्य ब्रह्मनामत्वात् तदुपसंहारः[2] कार्यः।

'नामत्वात् सर्वविद्यानां गुणानामुपसंहृतिः।
कार्यैव ब्रह्मणि परे नात्र कार्या विचारणा॥' इति च ब्रह्मतर्के।

इति चेत्, सत्यम्। उक्तो ह्युपसंहारः। तत्प्रमाणमप्यस्त्येव।

'नाम वा एता ब्रह्मणः सर्वविद्यास्तस्मादेकः सर्वगुणैर्विचिन्त्यः' इति कौण्डिन्यश्रुतौ॥ ९॥

॥ इत्युपसंहाराधिकरणम्॥ २॥

---

१. ह्. अन्यथात्वं शब्दादिति। २. नामत्वादुपसंहारः।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनोपासनाय सार्वत्रिकगुणोपसंहारसमर्थनादस्ति शास्त्रादिसङ्गतिः। तदभावे सर्वज्ञानस्य वैयर्थ्यप्रसङ्गात् समर्थनीय एव। यद्ध्यानाङ्गत्वेन सर्वज्ञानमुक्तं स परमात्मैव विषयः। किं सर्ववेदोक्तगुणानुपसंहृत्य ध्यातव्योऽन्यथा वेति सन्देहः। ध्यानविधेरुभयथाऽपि पर्यवसानं सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **सर्वैरिति**॥ ईश्वरः सर्ववेदोक्तप्रकारेण ज्ञातव्य एव, न तु सर्वगुणानुपसंहृत्य ध्यातव्यः। तथाविधध्यानस्य कर्तुमशक्यत्वात्। ज्ञानं तु क्रमभावित्वाच्छक्यमेव। अतः सर्ववेदोक्तप्रकारेण ध्यानायोगात् तदर्थमुक्तं सर्वज्ञानं व्यर्थमिति भावः।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत इति**॥ सर्ववेदार्थभूतानामानन्दादिगुणानामपहतपाप्मत्वादिदोषाभावानां चाभेदादविभागेनैवोपसंहारः कर्तव्यः। तथोपसंहृत्यैव परमात्मा ध्यातव्यः। कुतः ? यथा विधिप्राप्तत्वात् सन्ध्यावन्दनादि कर्तव्यमेव, अन्यथा प्रत्यवायात्, तथा सर्वगुणोपसंहारेण परमात्मध्यानस्य 'उपास्य एकः' इति श्रुतौ विहितत्वात् तत् कर्तव्यमेव। अन्यथा विहितक्रियालोपेनानर्थप्राप्तेरिति भावः। तथाच श्रुतिः- 'सर्वे गुणाः सर्वदैव ह्युपास्यास्तेनैव विद्वान् विधिकृन्नान्यथा स्यात्' इति। अत्र गुणा इति विधिमुखवेद्या वेदोक्तधर्माः। दोषाभावा इति निषेधमुखवेद्याः। वेदैरित्यस्य विवरणम्- **सर्वैरिति**॥ अत्रैव स्मृतिमाह- **आग्नेये चेति**॥ सर्ववेदोक्तगुणोपसंहारमुक्त्वा तदपवादमाह-**समानेति**॥ यद्यपि सामान्यत उक्तं सर्वे विधिमुखवेद्या वेदोक्तधर्मा उपसंहर्तव्या इति। तथाऽपि ये समाना

भगवति योग्याः पूर्णत्वाविरोधिनस्त एवोपसंहर्तव्याः, न त्वयोग्या रोदनादयः। अयोग्योपासनस्यानर्थफलत्वादिति भावः। अत्र स्मृतिमाह- **गुणैरिति**॥ तथाच साङ्कर्षणसूत्रम्- 'अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्याम्' इति॥ ६॥

पूर्वोक्तसर्वगुणोपसंहारकर्तव्यत्वाक्षेपेण तत्परिहारः

उक्तमाक्षिप्य समादधत् सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे- **अन्यथात्वमिति**॥ यदुक्तं सर्वगुणोपसंहारस्य कर्तव्यत्वं तदयुक्तम्। 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इत्युपसंहारवदनुपसंहारस्यापि विहितत्वात्। अतः सर्वगुणोपसंहारे विहितक्रियालोपप्रसङ्गात् तस्याकर्तव्यत्वमिति भावः। परिहारांशं व्याचष्टे- **नेति**॥ न सर्वगुणोपसंहाराभावः। तथाहि। किमसौ प्रामाणिकत्वादङ्गीक्रियते, सर्वगुणोपसंहारे प्रमाणाभावाद् वा। नाऽद्यः। एते गुणा नोपसंहर्तव्या इति विशेषप्रमाणाभावात्। नापि द्वितीयः। 'सर्वैर्गुणैः' इति श्रुतेरेव विद्यमानत्वादिति भावः। नन्वात्मत्वावधारणादेवैतदन्ये गुणा नोपास्या इति सिद्ध्यतीत्यत आह- **आत्मेति**॥ निरवकाशश्रुतिविरोधात् सावकाशावधारणस्य नान्ययोगव्यवच्छेदकत्वमिति भावः॥ ७॥

पूर्वोक्तसर्वगुणोपसंहाराशक्यताभ्युपगमेन तत्परिहारः

नायं सर्वगुणोपसंहारो युक्तोऽशक्यत्वादित्याशङ्कामभ्युपगमेन परिहरत् सूत्रं पठित्वा व्याचष्टे- **न वेति**॥ एवमुपसंहारः कर्तव्यतयोक्तः, न चासौ कर्तव्यः। परोवरीयोवैश्वानरादिप्रकरणभेदात्। यद्येकैकस्य सर्वगुणोपासनं स्यात्र तर्हि प्रकरणानि भिद्येरन्। कारणाभावादिति भावः। नन्वेकस्मिन्नेव प्रकरणे सर्वगुणोक्तिसम्भवात् प्रकरणभेदेऽपि सर्वगुणोपासनोपपत्तिरित्यत

आह- **परोवरीयस्त्वादिष्विति**॥ 'स एष परोवरीयानुद्गीथः स एषोऽनन्तः' (छा.उ. १.७.२) इत्यादिप्रकरणेषु परोवरीयस्त्वाद्येवोपास्यमुक्तं, न सर्वगुणा इत्यर्थः॥ ८॥

सर्वविद्यानां भगवन्नामत्वेन तद्गुणाभिधानद्वारा तद्गुणोपसंहारे चारितार्थ्यकथनम्

उक्तमाक्षिप्य समादधत् सूत्रमुपन्यस्याऽक्षेपांशं तावद् व्याचष्टे- **सञ्ज्ञात इति**॥ कर्तव्य एव सर्ववेदोक्तगुणोपसंहारः। सर्वविद्यानां ब्रह्मनामत्वेन तद्गुणाभिधायकत्वात्। गुणाभिधानस्य चोपसंहारार्थत्वात्। सर्वविद्यानां ब्रह्मनामत्वं च 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्' (छा.उ. ७.१.२) इति नारदेनाऽत्मनः सर्वविद्यावेदित्वमुक्त्वा सोऽहं सर्वविद्यावेत्ताऽऽत्मनामविदेव तन्निर्णयाज्ञानान्नाऽत्मविदित्युक्तत्वादवगम्यत इति भावः। 'यद् वै किञ्चिदध्यगीष्ट नामैवैतत्' (छा.उ. ७.१.३) इत्युत्तरवाक्यानुगुण्यान्मन्त्रविदित्यस्याप्ययमेवार्थः। श्रुत्यन्तरमेवैतत्।

अभ्युपगमरूपं समाधानांशं व्याचष्टे- **सत्यमिति**॥ सर्वविद्यानां भगवन्नामत्वेन तद्गुणाभिधायकत्वाद् गुणाभिधानस्य चोपसंहारार्थत्वात् कर्तव्यः सर्वगुणोपसंहार इति यत् तत् सत्यं युक्तमेव नास्माकं विरोधि। कथम्? अस्माभिरप्युपसंहारस्य कर्तव्यत्वेनोक्तत्वादस्यास्मदिष्टत्वादिति भावः। न केवलं गुणाभिधानस्योपसंहारार्थत्वयुक्त्या नामत्वाद् विद्यानां सर्वगुणोपसंहारसिद्धिः, किन्तु श्रुत्याऽपीत्याह- **तदिति**॥अतः सर्वगुणोपसंहारस्य कर्तव्यत्वात् सार्थकमेव सर्वपरिज्ञानमिति सिद्धम्॥ ९॥

॥ इत्युपसंहाराधिकरणम्॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च ॐ ॥
॥ ३-३-६ ॥

अनन्तरसङ्गतिः

ननु पूर्वोक्तमशेषशाखाध्ययनपूर्वकं श्रवणमननयोः कर्तव्यत्वं साधितमपि सर्ववेदार्थानां युगपद् बुद्धावारोपणरूपस्य समूहालम्बनात्मकोपसंहारस्य कर्तुमशक्यतया तद्द्वारकस्य ध्यानस्य, कृष्णलादिषु द्वारलोपादवघातस्येव लोपात् सर्वार्थगोचरं ध्यानं निष्फलमेवेति नाङ्गीकारार्हमिति वा; युक्तं पूर्वत्र सर्वज्ञानं सम्पाद्यमित्युक्तं, क्रमभाविनां ज्ञानानां क्रमेण सम्पादयितुं शक्तेः। उपसंहारस्तु द्वारतयाऽवश्यमपेक्षणीयो यौगपद्यघटितमूर्तित्वान्न सर्वथाऽपि कर्तुं शक्यः। एकैकशाखासमर्पितगुणावलम्बनेऽपरशाखोक्तगुणस्मृतिप्रमोषेण बुद्धेरशक्यसर्वगुणावगाहित्वात्। तद्गुणमात्रावलम्बने तु न सर्वगुणगोचरं ध्यानमिति राद्धान्तसिद्धिः । ततश्च सुतरां युगपन्निखिलशाखासमर्पितगुणगणावगाहिध्यानं न युक्तमिति वा शङ्कनात्, 'तस्मादेनं सर्ववेदानधीत्य विचार्य च ज्ञातुमिच्छेन्मुमुक्षुः' (ब्र.सू.भा.उदा. चतुर्वेदशिखाश्रुतिः) इत्यादौ यथा सर्वशब्दोऽसङ्कुचितवृत्तिस्तथा 'वेदैश्च सर्वैः सह चेतिहासैः' (ब्र.सू.भा.उदा. भाल्लवेयश्रुतिः) इत्यादावपीत्यतिदेशनाद् वाऽनन्तरसङ्गतिः। अत्राऽद्यद्वितीये टीकातत्त्वप्रदीपोक्ते। तृतीया तु सुधोक्तेति ज्ञातव्यम्।

विषयः चिन्ताक्रमश्च

ध्यानाङ्गत्वेनोपस्थित उपसंहारो विषयः। स किं सर्ववेदार्थगोचरः कर्तव्यः उत स्वशाखोक्तमात्रगोचरः[१] । तदर्थं सर्वशाखानां बुद्धावारोपणे कस्यापि

१. म. विषयः।

शक्तिर्नास्ति, उतास्ति केषाञ्चिदिति चिन्तनीयम्। टीकायां ध्यानपर्यन्तं चिन्ताप्रदर्शनं तु सर्ववेदप्रत्ययस्य परमसाध्यस्य प्रतिक्षेपार्थं ज्ञातव्यम्।

पूर्वपक्षः

तत्र -

अशक्तेरेवकाराच्च प्रक्रियान्तरतोऽपि च।
सर्वशब्दस्य सङ्कोचान्न कार्या सर्वसंहृतिः॥

सार्वत्रिकगुणोपसंहारो हि सर्ववेदोक्तगुणानां युगपद् बुद्धावारोहः। स च न कस्यापि कृतिसाध्यः। एवंविधस्यापि विधाने 'सागरं तरेत्' इत्यादिवदप्रामाण्यापत्तेः। तथाच 'उपास्य एकः परतः परो यो वेदैश्च सर्वैः सह चेतिहासैः' (ब्र.सू.भा.उदा. भाल्लवेयश्रुतिः) इत्यादौ सर्वशब्दः सङ्कुचतीत्येव न्याय्यम्, 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ', 'स सर्वविद् भजति' (भ.गी. १५.१९) इत्यादाविव। अन्यथा 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इति श्रुत्यन्तरेऽन्ययोगव्यवच्छेदकैवकारविरोधात्।

किञ्चास्ति परोवरीयोविद्या, वैश्वानरविद्या, शाण्डिल्यविद्या, पञ्चाग्निविद्येत्याद्यध्यापकप्रसिद्धिव्यवस्थया प्रकरणभेदः। स च सर्वशब्दस्य सङ्कुचितत्वे तत्तदधिकारिमात्रोपसंहार्यत्वेन शक्योपपादनः। तदभावे तु प्रकरणभेदनियामकस्यान्यस्याभावादनुपपन्नः स्यात्।

किञ्च यद्ययं सर्वशब्दोऽसङ्कुचितस्तर्हि रोदनादिधर्माणामपि ग्रहणापत्त्या तेषामुपसंहार्यध्यातव्यत्वप्रसङ्गः। नचेष्टापत्तिः। सिद्धान्तेऽसतोऽनुपास्यत्वात्। रोदनादेश्च दुःखोद्रेककार्यत्वेन भगवति तदभावेन तस्यानुपपत्तेः। यदि रोदनादौ सङ्कुचति, कुतो नान्यत्र ? ततो न युक्तैव सर्वगुणोपसंहृतिरिति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

विधानादेवकारस्य योगनैयत्यवाक्त्वतः।
उपसंहर्तृभेदेन प्रक्रिया न विरुद्ध्यते ॥

यथा खलु 'सन्ध्यामुपासीत' इति विधानादकरणे प्रत्यवायाच्च कर्तव्यमेव सन्ध्यादि तथा भाष्योदाहृतश्रुतिस्मृतिभिः सर्वोपसंहारस्य विधानात् स कर्तव्य एव। नच तद्गतः सर्वशब्दः दर्शपूर्णमासवाक्यस्थ इव सङ्कुचति। बाधकाभावात्। 'आत्मा' इति श्रुतावेवकारस्यायोगव्यवच्छेदकत्वेनाप्युपपत्तेः। प्रकरणभेदस्य वक्ष्यमाणरीत्योपसंहर्तृभेदेन तावन्मात्रोपासकविवक्षयोपपत्तेः। सर्वेषां स्वाधीतयावच्छास्त्रोपन्यासस्याशक्यत्वेऽपि कुशलबुद्धीनां तच्छक्तिवत् सर्वगुणोपसंहारेऽपि तत्सम्भवाच्च। अन्यथा स्वस्वशाखोक्तानामप्यर्थानां बहुत्वेन तदुपसंहारेऽपि तदसम्भवः स्यात्। नच सर्वेषां तदभावेनासर्वगुणोपासकानां प्रत्यवायापत्तिः। अशक्तानां सर्वगुणोपसंहारेण[१] कर्माकरण इवेहापि तदभावोपपत्तेः।

नन्वेवं सर्वशब्दसङ्कोच एवाभ्युपगत इति चेत्। अशक्तविवक्षया यावन्त उपास्याः क्लृप्तास्तावतां सर्वेषामसङ्कोचेनैव सर्वशब्देन ग्रहणात्। नह्येवमपि सर्वशब्दः सङ्कुचति। 'घटस्थं जलं सर्वं पीतम्' इत्यत्रापि घटान्तरस्थजलापानात् सर्वशब्दः सङ्कुचेत्। सर्वशब्दविवक्षितैतद्घटस्थजलेषु सङ्कोचाभावान्नैवमिति चेत्। तथेहापि तत्तद्योग्याताभिज्ञगुरूपदिष्टगुणजातेषु सङ्कोचाभावात्। अत एव बहुभोक्तृपुरुषवदल्पभोक्तृपुरुषेऽपि 'सम्यग् भुक्तवान्' इत्यादिव्यवहारः। अन्यथा तत्रापि सम्यक्त्वं सङ्कुचितमेव स्यात्। अत एव तत्तद्योग्यसर्वार्थावगाहिज्ञानादेव वसिष्ठाद्या इन्द्राद्या ब्रह्माद्याश्च सर्वज्ञा अभिधीयन्ते। यदि चात्रापि

१. म. सर्वाङ्गोपसंहारेण।

सर्वशब्दः सङ्कुचितः, क तर्ह्यसङ्कुचितः? ब्रह्मणीति चेन्न। तत्राप्यसतो ज्ञानाभावेन तद्व्यतिरिक्तविषयत्वात् सङ्कोचावश्यम्भावात्। सर्वशब्दो वस्तुमात्रवाचकः। असच्च न वस्तु। ततो न सङ्कोच इति चेत्, न। 'सर्वं ज्ञेयमभिधेयं च' इत्यादावसतोऽपि वाच्यत्वदर्शनात्। तथाऽपीह सर्वशब्देनाविवक्षणान्नासौ सर्वशब्दार्थ इति चेत्, तथा प्रकृतेऽपि तदुपासनायोग्यानां तान् प्रति सर्वशब्दार्थत्वेन विवक्षणान्न सङ्कोचः।

यद्वा, सर्वशब्दः सर्वदा सर्वान् प्रत्यपि सङ्कुचित आपाद्यते उत कांश्चित् प्रति। नाऽद्यः। युगपत् स्वभुजवत् स्पष्टप्रतिभासमानवेदोक्ताशेषगुणगणावगाहिबुद्धिविशेषवतामधिकारिधौरेयाणामङ्गीकारेण तान् प्रत्यशक्त्यभावेन सङ्कोचे प्रमाणाभावात्। ये तु नैवम्भूतास्तान् प्रति इष्ट एव सङ्कोच इति नान्त्योऽपि युज्यते।

उपसंहारोऽर्थाभेदादित्यादिप्रथमसूत्रार्थः

सूत्रार्थस्तु - सर्ववेदोक्तगुणानाम् **उपसंहारः**- युगपद् बुद्धावारोहः सम्पादनीयः। तत्रेत्थम्भावमाह- **अर्थाभेदादिति**॥ ल्यब्लोपनिमित्ता पञ्चमी। सर्ववेदार्थानामभेदं विधायाविभागेनेति यावत्। अनेन सर्वगुणोपसंहारः पूर्वपक्षिणाऽपि विशकलिततयाऽङ्गीकृत इति निरस्तम्। ततश्च निरन्तरानुचिन्तनरूपं ध्यानं सम्पादनीयमिति शेषः। अशक्तिं तूत्तराधिकरणे परिहरिष्याम इति भावः। श्रवणमननयोरुपसंहारनिदिध्यासनयोश्चार्थस्य विषयस्याभेदात्। सङ्कोचकविशेषप्रमाणाभावे पूर्ववृत्तश्रवणमननाभ्यां निदिध्यासनादेरभिन्नविषयत्वस्योचितत्वात्। सर्वशाखोक्तध्यानादेः कर्तव्यत्वेऽङ्गीकृते सर्ववेदार्थश्रवणमननरूपध्यानहेतोस्तत्कार्यस्य ध्यानस्य च हेतुहेतुमतोरौत्सर्गिकमेकविषयत्वमनुगृहीतं भवति, नान्यथेति युक्तिरनेन सूच्यत इति केचित्। **विधिशेषवत्**। शिष्यत इति शेषः शिष्टः, विधिविहितज्योतिष्टोमसन्ध्यावन्दनादिवत्।

यद्वा, विधीयते प्राधान्येन फलसाधनतया इति विधिर्दर्शपूर्णमासादि प्रधानं

कर्म, तच्छेषः प्रयाजादिस्तद्वत्। यथैकैकस्यां शाखायां कतिपयाङ्गयुक्ततया विहिते कर्मण्यवशिष्टान्यपरशाखास्वपि तदङ्गतया विहितानि प्रयाजादीनि 'सर्वशाखाप्रत्ययमेकं कर्म' इति न्यायेनोपसंहर्तव्यानि एवं गुणा अपीत्यर्थः। अन्यथा तद्वदेव प्रत्यवायः स्यादिति भावः।

नन्वेवं दुःखाज्ञानादीनामप्युपास्यत्वप्राप्तिः। अन्यथा पूर्वोक्तमयुक्तं स्यात्। रोदनादिघटितवाक्यानां समन्वयश्च न सिद्ध्येत्। तत्राऽह- **समाने**। सुखज्ञानादिभिर्योग्यत्वेन समाने बलशक्त्यादिगुणजात एवोपसंहारो युक्तः। नतु विजातीये तत्रायोग्ये दुःखादौ। समन्वयस्तु तदधीनत्वन्यायसिद्धः।

यद्वा, सत्यज्ञानानन्दादिभिरुपादेयत्वेन समाने सत्यसङ्कल्पादिगुणजाते एवायमुपसंहारः, नतु हेयतया तद्विजातीयरोदनस्ववपोत्खननादिष्वपि। ननु पित्राज्ञात्यक्तसाम्राज्यत्वादिकमपि परमात्मनि योग्यतयोपादेयतया च सुखसत्यज्ञानादिसमानं गुणजातमुपास्यं प्राप्नोति। तत्र चाऽह- **समान इति**॥ उपादेयत्वादिना समाने गुणेऽपि पूर्णत्वाविरोधिगुणविषय एवायं नियमः। नतु पूर्णत्वविरोधिन्यपि। किन्तु तत्रापि पित्राज्ञां व्याजीकृत्य निरवधिकमुक्तामुक्तसकलसम्राट्तया स्वसङ्कल्पितचिकीर्षया न तदपेक्षयेति पूर्णत्वाविरोधेनैवोपास्यः।

अन्यथात्वं चेत्यादिद्वितीयसूत्रार्थः

ननु 'आत्मेत्येवोपासीत' इत्यत्रैवशब्दादेतावदेवोपासीत नाधिकं सर्वसद्गुणजातमित्यवगमात् सर्वशब्दः सङ्कुचित इति चेन्न। आत्मत्वभिन्ना एते गुणा नोपास्या इति विशिष्य निषेधवचनाभावात्। प्रत्युत 'सर्वैर्गुणैरेक एवेशिताऽसौ उपासितव्यो न तु दोषैः कदाचित्' (ब्र.सू.भा. उदाहृतप्रमाणवचनम् ३.३.७) इत्याद्यविशेषवचनाच्च न सङ्कोचः।

न वा प्रकरणभेदादित्यादितृतीयसूत्रार्थः

न वाऽसौ सर्वोपसंहारः कार्यः। तत्तद्गुणसमर्पकाणां वाक्यानां भिन्नभिन्न-

प्रकरणत्वात्। यद्येकैकस्य सर्वगणोपसंहारः स्यात्र तर्हि प्रकरणानि भिद्येरन्। एकस्मिन्नपि प्रकरणे सर्वगुणोक्तिसम्भवशङ्का न कार्या। **परोवरीयस्त्वादिवत्**। परोवरीयस्त्वादिप्रकरणेषु परोवरीयस्त्वादि कियदेव गुणजातमुपास्यमुक्तम्। 'परोवरीयसो ह लोकान् जयति' (छा.उ. २.७.२) इत्यादिना तावन्मात्रज्ञानेनैव फलश्रवणात्। तथाच परोवरीयस्त्वादिप्रकरणे यथा सर्वगुणोक्तिशङ्का न कार्या, तथाऽन्येष्वपि प्रकरणेष्विति भावः।

सञ्ज्ञातश्चेदित्याद्यन्तिमसूत्रार्थः

प्रकरणभेदमाक्षिपति। **सञ्ज्ञातः** सञ्ज्ञात्वतः। सर्वविद्यानां ब्रह्मनामत्वात् प्रकरणभेदोऽनुपपन्नोऽनुपसंहारश्च। प्रत्युत सर्वगुणोपसंहारः कर्तव्य एव। अन्यथा भगवन्नामत्वनिर्वाहायाङ्गीकृतस्य गुणाभिधानस्योपसंहारं विना प्रयोजनाभावेन वैयर्थ्यप्रसङ्गात्।

किञ्च प्रकरणभेदेन हि तत्तत्प्रकरणस्थानां गुणानां पृथक् पृथगुपास्यत्वमुक्तम्। नानापदार्थसंसर्गरूपभिन्नभिन्नैकरूपवाक्यार्थप्रतिपादकत्व एव प्रकरणभेदः। भगवद्गुणपुरस्कारेणावान्तरवाक्यार्थान्वयानादरेणाप्रवृत्ततया चैकशब्दतावगतौ तु क नानासंसर्गार्पकनानाप्रकरणत्वम्? प्रमातृबुद्ध्यनुसारेण नानासंसर्गार्पणदशायां तु प्रकरणभेदोऽप्यनुज्ञायत इति भावः। **तदुक्त**मिति परिहारः। **तत्** त्वदुक्तं प्रमेयं युक्तमेव नास्मद्विरोधि। कथं प्रतिपक्षोऽङ्गीक्रियते? तत्रापीदमेवोत्तरम्। **तत्** सर्वोपसंहरणमधस्ताद**उक्त**मेव। अतो नास्माकं प्रतिपक्षः। तर्हि पूर्वपक्षसिद्धान्तभावः कथमिति चेत्। **तत्** तत्रापि [१]चोद्ये तत्र भविष्यत्पर्वणि **उक्तं** समाधानमिति शेषः। प्रमाणाधीना प्रमेयसिद्धिः कथं वाङ्मात्रेण भविष्यति? कौण्डिन्यश्रुतिलक्षणं प्रमाणम् **अस्त्येव**। यावच्छक्त्यप्रयत्नेनोपसंहारे फलाधिक्यद्योतनार्थत्वात् प्रमाणोपन्यासस्य 'विधिशेषवत्' इत्याद्यनुमानाद्युपन्यासेऽपीह पुनरुपन्यासो न दोषायेति द्रष्टव्यम्।

१. चोद्यते।

अद्वैत्यभ्युपगताधिकरणपूर्वपक्षः

अत्रान्ये तु -आद्यं सूत्रमेकमधिकरणं व्याचक्षते। पूर्वनिरूपितविद्यैक्यप्रयोजनगुणोपसंहारनिरूपणात् सङ्गतिः। प्राणविद्यायामधिको गुणो रेतआख्यः वाजसनेयशाखायां श्रुतः- 'रेतो होच्चक्राम' (बृ.उ. ६.१.१२) इति। नासौ छान्दोग्ये प्राणविद्यायां श्रुतः। एवं तत्र तत्रान्येऽपि गुणाः कचिच्छ्रुता अपि कचिन्न श्रुताः। तत्रैकविद्यागता अपहतपात्मत्वादयः शाखान्तरगतायां तस्यामेव विद्यायां उपसंहर्तव्या न वेति संशयः। तत्र -

विध्यभावाद् विधेयत्वे सति कोपात् क्रमस्य च।
शाखान्तरोक्तिधर्माणां नान्यशाखासु सङ्गतिः॥

भवतु सर्वशाखाप्रत्ययमेकं विज्ञानम्। तथाऽपि न शाखान्तरोक्तगुणानां शाखान्तरोक्ते तस्मिन्नेव विज्ञाने उपसंहारः कर्तव्यः। तत्र तेषामश्रुतत्वात्। साकाङ्क्षस्य हि प्रयोगविधेर्नानुष्ठापकत्वमिति सर्वशाखासु सर्वमङ्गजातं श्रोतव्यम्। ततः श्रोतव्यत्वे सत्यश्रवणाद् यावन्मात्रमेकस्यां शाखायां विहितमङ्गजातं तावन्मात्रेण विद्याया उपकारसिद्धेर्नाधिकापेक्षा। अधिकगुणोपसंहारे च श्रुतगुणक्रमभङ्गप्रसङ्गः। यथैकस्यां शाण्डिल्यविद्यायां 'मनोमयोऽयं पुरुषो भाः' (बृ.उ. ५.६.१) इत्यादिवाजसनेयके, छान्दोग्ये च 'मनोमयः प्राणशरीरो भारूपः' (छा.उ. ३.१४.२) इति। नच तस्यामेव विद्यायां शाखान्तरे श्रुतस्य कस्यचिदङ्गस्याननुष्ठानेऽखण्डकरणोपकारासिद्धेरनुपकृता विद्या स्यादिति वाच्यम्। सकलाङ्गवति विहिते नित्यकर्मण्यशक्तौ यावच्छक्यमङ्गमनुष्ठातुं तावन्मात्रेणाप्युपकारपूर्तेर्दर्शनात्। गृहमेधीये च विकृतावतिदेशात् सर्वाङ्गप्राप्तावाज्यभागौ यजतीति पुनर्विधानादाज्यभागाभ्यामेव सकलाङ्गसाध्योपकारसम्पत्तेरिष्टत्वात्।

तत्सिद्धान्तः

एवं प्राप्तेऽभिधीयते -

वाक्यात् क्रमस्य दौर्बल्यात् काम्ये सर्वाङ्गसङ्गमात्।
अप्राप्ताङ्गविधिर्विद्या सर्वैरङ्गैः प्रयुज्यते॥

एकस्यां शाखायां विद्याङ्गत्वेन विधीयमाना गुणाः गुणिद्वारेण वाक्याच्छाखान्तरेऽपि गच्छन्तो न क्रमविरोधभयेन त्यक्तुं युज्यन्ते। क्रमस्य वाक्याद् दुर्बलत्वात्। नित्ये तु यावज्जीवादिनियतनिमित्तवशात् प्रधानस्यावश्यकर्तव्यत्वमवगतम्। सर्वाङ्गोपसंहारश्च सर्वदा पुंसा न शक्यः। तत्र शक्यमात्राङ्गानुष्ठानादेव सकलाङ्गसाध्योपकारसिद्धिरिति कल्प्यते।

उपासनास्तु काम्यत्वात् कार्याः सर्वाङ्गसम्पदः।
नोपसंहरणाशक्तिरशक्तेः प्राङ्निषेधतः॥

गृहमेधीयेऽप्यतिदेशतः सर्वाङ्गप्राप्तावाज्यभागे पुनः श्रुतेरङ्गान्तरसाध्योपकारोऽप्याज्यभागमात्रजन्यो विज्ञायते। इह त्वेकशाखागतगुणविधीनामप्राप्तगुणविधात्वेन पर्यवसानान्न शाखान्तरीयगुणसाध्योपकारस्य स्वविधेयगुणमात्रजन्यत्वकल्पकत्वमिति।

तन्निरासः

तन्न। शाखान्तरोक्तानां रेतस्त्वादिगुणान्तराणां[१] शाखान्तरोक्तविद्यायामश्रुतत्वान्नोपसंहार इति पूर्वपक्षस्य दुर्बलत्वात्। नह्युपसंहार्यमङ्गजातं विकृतौ श्रुतमस्ति। अतिदेशतः प्राप्तत्वाच्छ्रुतप्रायमिति चेन्न। इहापि शाखान्तरोक्तयोर्विद्ययोरेकत्वप्रत्यभिज्ञानेन सुतरां श्रुतप्रायत्वात्। नापि क्रमभङ्गयुक्तिर्बलवती। क्रमस्य पदार्थधर्मत्वेन दौर्बल्यस्य शिष्टाकोपनये प्रतिपादनात्। नित्ये कर्मणि शक्यमात्राङ्गानुष्ठानेनैवोपकारपूर्तिसिद्धिवदिहापि तत्तच्छाखोक्तगुण-

१. क. रेतआदिगुणान्तराणाम्।

मात्रोपसंहारेणैव रेतआद्यधिकगुणानुपसंहारेऽपि तदुपकारपूर्तिसिद्धेः सिद्धान्तोऽप्ययुक्तः।

यदत्रोक्तं- 'नित्ये तु यावज्जीव' इत्यादि, तन्न। इहाप्युपासनानां[1] यावज्जीव-निमित्तत्वात्। प्रधानस्यावश्यकर्तव्यत्वावगमात्। सर्वगुणोपसंहारश्च सर्वदा पुंसामशक्यः। एकैकशाखासमर्पितगुणावलम्बने परशाखोक्तगुणस्मृतिप्रमोषेण बुद्धेरशक्यसर्वगुणावगाहित्वादिति शक्यमात्रगुणोपसंहारेणैव सकलगुणोपसंहार-साध्योपकारसिद्धिकल्पनात्। वक्ष्यति चोपासनानामपि यावज्जीवादिनियत-निमित्तत्वं 'आवृत्तिरसकृदुपदेशात्' (ब्र.सू. ४-१-१) इति सूत्रकृदेव। 'श्रवणादि विना नैव क्षणं तिष्ठेदपि क्वचित्' (अनुव्याख्यानम्) इत्यादि च भाष्यकृदपि। यद्यपि काम्या अप्युपासनाः सन्ति। तथाऽपि न ता मुमुक्षुभिः कार्या इति 'काम्यास्तु समुच्चीयेरन्न वा पूर्वहेत्वभावात्' (ब्र.सू. ३-३-६२) इति सूत्रकृदेव वक्ष्यति।

किञ्च, गृहमेधीयेष्टावाज्यभागमात्रानुष्ठानेनैव सकलाङ्गसाध्योपकारसम्पत्ति-वदिहाप्येकत्रोक्तगुणोपसंहारमात्रेणैव सकलगुणोपसंहारसाध्योपकारसम्पत्तिः कुतो न स्यात्।

यदत्रोक्तम् - गृहमेधीयेऽप्यतिदेशतः सर्वाङ्गप्राप्तावित्यादि वैषम्यं, तदप्ययुक्तम्। वाजसनेयोक्तप्राणविद्यायामुपदिष्टानां 'चक्षुर्होच्चक्राम' (बृ.उ. ६.१.९) इत्यादि 'रेतो होच्चक्राम' इत्याद्यन्तानां गुणानां छान्दोग्योक्तप्राण-विद्यायामप्यतिदेशेन[2] प्राप्तिसम्भवेऽपि 'चक्षुर्होच्चक्राम' (छा.उ. ५.१.९) इत्यादि छान्दोग्ये पुनः श्रवणात्। छान्दोग्योक्तप्राणविद्यायां तदुक्तगुण-मात्रोपसंहारेण वाजसनेयोक्तप्राणविद्यागतयावद्गुणोपसंहारजन्योपकार-सिद्धिकल्पने बाधकाभावात्।

१. क. उपासनायाः। २. क. नामातिदेशेन।

वाचस्पतिमतानुवादनिरासौ

अत्रोक्तं वाचस्पतिना। कर्मैक्ये गृहमेधीयन्यायो न प्रवर्तते। नहि तदेव कर्म तान्यङ्गान्येवापेक्षते, नापेक्षत इति[1] च युज्यते। तथा विद्यैक्येऽपि न प्रवर्तत इति। तन्न। एकस्यैव कर्मण आद्यानाद्यभेदेन[2] दक्षिणादिसङ्ख्याभेदर्शनेनैकत्व-स्याप्रयोजकत्वात्।

पराभिमतसूत्रार्थनिरासः

एतेन, अन्यत्रोदितानां गुणानामन्यत्रापि समाने विज्ञाने उपसंहारो भवति। अर्थाभेदादुपकाराभेदात्। यथा विधिशेषाणामग्निहोत्रादिधर्माणामिति सूत्रार्थो निरस्तः। उक्तरीत्याऽयुक्तस्य सूत्रार्थत्वासम्भवात्। सत्यत्वादिगुणेन समाने गुणजात एवायमुपसंहारनियमो नतु दोषेष्वित्यवश्यप्रतिपाद्यप्रमेयपरत्वसम्भवे, समानशब्दस्य विज्ञानपरत्वासम्भवात्। चशब्दवैयर्थ्याच्च। विद्यैक्यप्रयोजनस्य 'सर्वाभेदात्' इत्यादौ वक्ष्यमाणत्वेनात्र पुनर्वक्तव्यत्वायोगाच्च। प्रपञ्चस्त्वगतिका-गतिकः।

- पराभिमतसूत्रार्थस्य अद्वैतप्रतिकूलत्ववर्णनम्

किञ्च, मायिमते शास्त्रस्य निर्विशेषवस्तुनिष्ठत्वाद्, गुणोपसंहारस्य च तद्विरुद्धत्वात् सूत्रार्थकथनमद्वैतप्रतिकूलमेव। गुणानामतात्त्विकत्वान्नैवमिति चेत्। अत एव ह्यसङ्गतिः। नहि तत्त्वप्रधानशास्त्रस्यातात्त्विकगुणपरत्वं युक्तम्। क्रममुक्त्युपायत्वात् तत्प्रतिपादनं युक्तमिति चेन्न। क्रममुक्तिर्नाम सगुणप्राप्ति-पूर्विका निर्गुणप्राप्तिरुत सगुणोपासनेन निर्गुणविद्योत्पत्त्या मुक्तिः। नाऽद्यः। प्रमाणाभावात्। यतः सगुणोपासनेन परञ्ज्योतिःप्राप्तिरूपत्वाभिमतनिर्गुणमुक्तिः, तत्प्राप्तस्य च निरङ्कुशैश्वर्यं च श्रूयते। न द्वितीयः। सगुणोपासनस्य विपरीतवासना-जनकत्वेन निर्गुणविद्योत्पादप्रत्यनीकत्वात्। अदृष्टद्वारा तदुत्पादकत्वमिति

१. क. चेति। २. क. आढ्यानाढ्यभेदेन।

चेन्न। सगुणोपसनस्यैव परब्रह्मप्राप्तिं प्रति अव्यवहितोपायत्वे सम्भवति, सति च तत्प्रतिपादकेऽप्यागमे तद्विरोधेन मध्येऽदृष्टकल्पनायोगात्। आनन्दादीनां सर्वत्रानुवृत्तेर्निर्गुणविद्याया अभावाच्च। एतन्न्यायेन समस्तोऽप्ययं पादोऽद्वैत-प्रतिकूल एवेत्यूह्यः।

रामानुजमतनिरासः

अत एव केषाञ्चिन्मते पूर्वशेषत्वमाश्रित्यैकाधिकरणत्वमुक्तमयुक्तम्। मद्रीत्याऽवश्यवक्तव्यप्रमेयप्रतिपादकतयाऽधिकरणान्तरत्वे सम्भवति शाखान्तराधिकरणोक्तप्रमेयस्मारकत्वेनोपयोगकथनस्यायोगात्।

अन्यथेत्यादित्रिसूत्री 'एकमधिकरणम्' इति मन्यमानानां मते विषयसंशयौ

यदत्रोभयेऽपि 'अन्यथात्वम्' इत्यादिसूत्रत्रयमेकमधिकरणमाहुः- चोदनाद्य-विशेषाद् विद्यैक्यमुक्तम्। तत्राऽख्याया अपवाद इह क्रियते। अपोदितायां चाऽख्यायां विद्याभेदादनन्तराधिकरणोक्तगुणोपसंहारप्रयोजनमप्यपोदितं भवति। वाजसनेयके- 'ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति, ते ह वाचमूचुस्त्वं न उद्गाय' (बृ.उ. १.३.२) इति प्रक्रम्य वागादीन् प्राणानसुर-पाप्मविद्धत्वेन निन्दित्वा मुख्यप्राणपरिग्रहः पठ्यते- 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति। तथेति तेभ्य एष प्राण उदगायत्' (बृ.उ. १.३.७) इति। तथा छान्दोग्येऽपि- 'तद्ध देवा उद्गीथमाजह्रुः। अनेनैनानभिभविष्यामः' (छा.उ. १.२.१) इति प्रक्रम्येतरान् प्राणानसुरपाप्मविद्धत्वादिना निन्दित्वा तथैव मुख्यप्राणपरिग्रहः पठ्यते- 'अथ ह य एवायं मुख्यप्राणस्तमुद्गीथ-मुपासाञ्चक्रिरे' (छा.उ. १.२.७) इति। उभयत्रापि च प्रशंसया प्राणविद्या-विधिरध्यवसीयते। तत्र संशयः। किमत्र विद्याभेदः स्यादाहोस्विद् विद्यैक-त्वमिति।

तन्मतानुसारेण पूर्वपक्षः

तत्र

वागाद्यासुर[1]वेधादि बहुधर्मविशेषतः[2]।
एकत्वाच्च समाख्योक्तेर्गानकर्तरि लक्षणा॥

देवासुरसङ्ग्रमाख्यायिकोपक्रमे वागादीनामसुरपाप्मभिर्वेधः, तेषां मुख्यप्राणं प्रति गुणभावोपगमः, प्राणवीर्याच्चासुरजय इत्यादिबहुधर्मसाम्यात् प्राण-विद्येत्यादिसमाख्यैक्याच्च विद्यैक्येऽवधृते, छान्दोग्ये 'तमुद्गीथमुपासाञ्चक्रिरे' (छा.उ. १.२.७) इत्यत्रोद्गानकर्ता लक्षणीयः। 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१) इत्यत्र चोद्गीथैकदेशप्राणावयविन्यु[3]द्गीथभक्तिर्लक्ष्यते। ततश्चोद्गातरि ऋत्विज्युद्गानकर्तृप्राणदृष्टिर्विधीयत इति प्राप्ते ब्रूमः -

तत्सिद्धान्तः

उपक्रमश्रुतोपास्यरूपभेदादुपासना।
भिन्नार्थवादसारूप्यमभेदे न प्रयोजकम्॥

एकस्मिन् वाक्ये उपक्रमाधीनत्वादुपसंहारस्य शाखाद्वये चोपक्रमे एकत्रोद्गीथोपास्तिकर्मत्वनिर्देशात्, अन्यत्रोद्गानकर्तुरुपास्यत्वावगमात्, एकत्र भक्त्यैकदेशस्य प्रणवस्यान्यत्र च सकलभक्तेरुपास्यत्वावगमात्, विद्याभेदे सति न प्राणसंवादादिरूपार्थवादसाम्याच्चरमावगताद् विद्यैक्यमिति।

तन्निरासः

तन्न। लक्षणाश्रयणं किं मुख्यार्थे बाधकसद्भावादुत तात्पर्यग्राहकप्रमाण-वशात्। नोभयमपि युज्यते। तदसिद्धेः। विद्याभेदस्याद्याप्यसिद्धेस्तदनुप-पत्तेर्बाधकत्वायोगात्। उपक्रमप्राबल्यस्य प्रागेव साधितत्वेन दुर्बलोपसंहार-

१. म. असुर। २. म. बहुधर्माविशेषतः। ३. म. प्रभावावयविनि।

धर्मसाम्येन पूर्वपक्षानुत्थानात्। उत्थाने वा, कर्तृत्वकर्मत्वादिरूपभेदाद् विद्याभेद-सिद्धान्तस्यानुत्थानात्। नहि पूर्वपक्षी रूपभेदमङ्गीकरोति। 'उद्गीथमुपाञ्चक्रिरे' (छा.उ. १.२.७) इत्यत्रोद्गानकर्तरि लक्षणाङ्गीकारात्। नच जघन्यवृत्त्याश्रयणमेव दोष इति वाच्यम्। देवासुरसङ्ग्रामाख्यायिकोपक्रमादीनां बहूनामनुग्रहाय तस्य न्याय्यत्वात्।

'रूपभेदो नासिद्धः' इति पूर्वोक्तस्य निरासः

एतेनैकत्र भक्त्यैकदेशस्य प्रणवस्यान्यत्र सकलभक्तेर्निर्देशाद् रूपभेदो नासिद्ध इति निरस्तम्। तत्रापि सकलभक्तिलक्षकत्वाङ्गीकारात्। अन्यथा प्राणसंवादविद्यानां छान्दोग्यवाजसनेयकैतरेयादिशाखागतानामप्यभेदो न स्यात्। तत्रापि 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः। भगवन् कोनु श्रेष्ठः' (छा.उ. ५.१.७) इति छन्दोगशाखायां, 'ते हेमे प्राणाः श्रेयसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः' (बृ.उ. ६.१.७) इति वाजसनेयशाखायां 'ता अहिंसन्ताहमुक्थमस्मि अहमुक्थमस्मि, ता अब्रुवन् हन्तास्माच्छरीरादुत्क्रामत[1]' (ऐ.उ. १.४.३) इत्यैतरेयशाखायामुपक्रम एव धर्मभेदश्रवणात् छान्दोग्ये प्रजापतिवचनान्निर्णयं चक्रुरिति। अन्यत्र नपुंसकब्रह्मशब्दात् परब्रह्मवचनादन्यत्र चान्योन्यसम्मत्येत्येवं श्रेयस्त्वविषयिणीति प्रतीतेः। नचेष्टापत्तिः। 'रेतो होच्चक्राम' (बृ.उ. ६.१.१२) इत्यादिनोक्तरेतआख्यगुणोपसंहारस्य छान्दोग्योक्तप्राणविद्यायां पूर्वाधिकरणोक्तस्याभावापत्तेः। विद्यैक्यनिबन्धनत्वादुपसंहारस्य। तस्मात् प्रजापतिब्रह्मादिशब्दानामुक्थश्रेयश्शब्दयोश्चान्योन्यलक्षणाद्याश्रयणेनोपक्रमेषु रूपभेदाभाववदिहापि लक्षणाद्याश्रयणेन रूपभेदोऽसिद्ध एव।

१. क. उत्क्रामाम।

सत्यपि उपक्रमभेदे न विद्याभेदसिद्धिः

अस्तु वोपक्रमे रूपभेदः। तथाऽपि विद्याभेदः कुतः? न ह्युपक्रमस्थवाक्यमात्रपर्यालोचनया विद्याभेदाभेदनिर्णयः। तथा सति काण्वमाध्यन्दिनशाखयोरन्तर्यामिविद्याया अपि भेदः स्यात्। तत्रापि 'य आत्मनि तिष्ठन्' (श.प. १४.५.३०) 'यो विज्ञाने तिष्ठन्' (बृ.उ. ५.७.२२) इति चोपक्रमभेदात्, 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१), 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३.९.३४) इति चोपक्रमभेदाद् विद्याभेदः स्यात्। तथा 'असावादित्यो न व्यरोचत' इत्यादिबहुस्थलेषूपक्रमात् कर्मभेदो न स्यात्। किन्तु यावत्प्रकरणस्थवाक्यपर्यालोचनयैव। ततश्चानयोः शाखयोर्विद्योपक्रमयोरैकरूप्याभावेऽपि मध्ययोरुपसंहारयोश्चैकरूपस्य सत्त्वात् कथं विद्याभेदः? उपक्रमरूपभेदस्तु विद्यैक्येऽपि विकल्पेन भविष्यति। नन्वभ्युदयवाक्ये पशुकामवाक्ये च, ये मध्यमा ये[1] स्वनिष्ठा इत्यादिनिर्देशसाम्येऽपि 'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति' इति, 'यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्' इति चोपक्रमभेदादभ्युदयवाक्ये देवतापनयोऽध्यवसितः। पशुकामवाक्ये तु यागविधिरित्युपक्रमभेदः प्रयोजको दृष्ट इति चेन्न। निर्देशसाम्याभावादेवाभ्युदयपशुकामवाक्ययोर्भिन्नविषयत्वोपपत्तेरुपक्रमभेदस्याप्रयोजकत्वात्। तथाहि निर्देशभेदः। 'विवा एवं[2] प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान् विभजेद् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्[3]। ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम्' इति अभ्युदयेष्टिनिर्देशः। 'यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्। ये स्थविष्ठास्तानग्नये सनिमते[4]ऽष्टाकपालं निर्वपेत्। ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते

१. म. स्थविष्ठाः। २. क. एतम्।
३. 'निर्वपेत्' इति भामत्याम्। ४. क. सनिविदे।

चरुम्। ये क्षोदिष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम्' इति च पशुकामाधिकारि-निर्देश[1] इति।

किञ्च, 'सर्वाभेदादन्यत्रेमे' (ब्र.सू. ३.३.११) इत्यधिकरणे प्राण-संवादादिसारूप्यादभेदे च विज्ञानस्य कथमिमे गुणाः कश्चिदुक्ता अन्यत्रापि नाऽख्येरन्निति त्वद्भाष्येऽपि निर्देशसाम्यस्यैव विद्यैक्यप्रयोजकत्वमुक्तम्।

अन्यथात्वमिति प्रथमसूत्रस्य पराभिमतार्थनिरासः

एतेनान्यथात्वं विद्यैक्यमेव स्वीकर्तव्यम्। शब्दात् प्रक्रमभेदात्। कस्याश्चित् शाखायां प्राणस्योद्गीथकर्तृत्वेनान्यस्यां चोद्गीथत्वादिनोपक्रमान्न विद्यैक्यमिति चेन्नैष दोषः। अविशेषस्यापि बहुतरं प्रतीयमानत्वादित्याद्यस्य सूत्रस्य पूर्वपक्ष-परतया व्याख्यानं निरस्तम्। अन्यथात्वशब्दस्य विद्यैकत्वे सामार्थ्याभावात्। 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३.३.६) इति पूर्वसूत्रोक्तानामन्यतमस्यैवा-न्यथात्वे तस्य शक्तेः। 'शब्दात्' इत्यस्य प्रक्रमभेदादिति व्याख्यानं त्वदृष्ट-चरम्। तदर्थं 'शब्दभेदात्' इति पाठकल्पने तदेव दोषः। शब्दभेदस्य हेतुत्वाय न युज्यत इति साध्याध्याहारप्रसङ्गाच्च। 'अविशेषात्' इत्यस्य प्रतीतिलक्षणा-प्रसङ्गाच्च।

नवेत्यादिद्वितीयसूत्रस्य पराभिमतार्थनिरासः

प्रकरणभेदात् प्रक्रमभेदाद्वा नवा विद्यैकत्वं, परोवरीयस्त्वादिवद् विद्याभेद एवेति द्वितीयस्य सिद्धान्तसूत्रतया व्याख्यानं चायुक्तम्। अप्रसिद्धार्थत्वात्। नशब्देनैव पक्षव्यावृत्तिसम्भवेन वाशब्दवैयर्थ्याच्च। पूर्वसूत्रे शब्दादिति पदेनोक्तस्य हेतोरेवात्रोपादानेन 'तदुक्तम्' इत्यादिलघुना पदेनैव तत्प्रतिपादनसम्भवे गुरुपद-प्रयोगायोगाच्च। दृष्टान्तोऽपि पक्षसमः।

---

१. पशुकामाधिकारे निर्देशः।

'सञ्ज्ञातः' इति तृतीयसूत्रस्य पराभिमतार्थनिरासः

सञ्ज्ञातः सञ्ज्ञैक्याद् विद्यैक्यमिति चेत् तत् तत्र प्रकरणभेदादिति समा-धानमुक्तम्। तत् सञ्ज्ञैक्यं प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेष्वस्ति। अतस्तदैक्यप्रयोजकं न भवति इत्यर्थ इति तृतीयस्य व्याख्यानं चायुक्तम्। सञ्ज्ञाशब्दस्य तदैक्ये लक्षणापातात्। तदपीति नपुंसकशब्देन परामर्शायो-गाच्च। दृष्टान्तोऽपि पक्षसमः। परोवरीयस्त्वाद्युपासनस्योक्तरीत्यैक्यस्यापि शङ्कनाच्चेत्यादिदूषणमूह्यम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - उपासनाप्रकरणत्वाच्चित्तस्थं निदिध्यासनं परिमितशाखार्थ-गोचरमेव उताखिलशाखार्थगोचरमपीति केचित् सन्देहमूचुः। तेषाम् 'उपास्य एकः परतः परो यो वेदैश्च सर्वैः सह चेतिहासैः' (ब्र.सू.भा.उदाहृतभाल्लवेय-श्रुतिः) इति भाल्लवेयश्रुत्यनुसारेण प्रवृत्ते 'उपसंहृत्यैव परमात्मोपास्यः' इति भाष्ये परमात्मप्राधान्येनैवोपसंहारपूर्वकध्यानस्यैव विचार्यत्वावगमादुपसंहारस्य त्यागेन निदिध्यासनमात्रस्य विचार्यत्वे भाष्यादिविरोधः स्यादिति मन्वानः स्वमतेनाधिकरणशरीरं दर्शयति- **यद्ध्यानाङ्गत्वेन सर्वज्ञानमुक्तमित्यादिना॥**

टीकायां पूर्वपक्षन्यायविवरणभाष्ययोर्व्याख्यानम्

न्यायमालोक्तमशक्यत्वन्यायं साध्यप्रदर्शनपूर्वकं विवृण्वत् 'नचाशक्यतया कस्यापि गुणोपसंहारो नास्ति' (न्या.वि.) इति वाक्यं 'नोपास्योऽशक्यत्वात्' इति भाष्येण विरोधं परिहरन्नेवोपसंहारध्यानयोर्द्वारद्वारिभावं स्फोरयन् व्याचष्टे- **न तु सर्वगुणानुपसंहृत्य ध्यातव्य इति॥** अनेन सर्वेषां सर्वगुणोपसंहारो न सिद्धान्तिनोऽप्यभिमतः। यस्य कस्यापि सर्वगुणोपसंहारस्त्वशक्यत्वान्मया निराकृतः। ततश्च तथा ध्यानमपीति विवरणाभिप्रायो द्रष्टव्यः। 'सर्वे गुणाः

सर्वदैव ह्युपास्याः' इत्याद्युत्तरविवरणे श्रवणाद् गुणपदं सर्वगुणपरमिति सूचितं भवति।

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

न्यायमालागतेन विधिक्रियापदेन, विधीयत इति विहितपरं विधिपदं क्रिया करणमिति, विहितकरणमुच्यते। ततश्च सर्वे गुणा अप्युपास्या एव। तथात्वेन वेदविहितत्वात् इत्यनुमानमभिसन्धाय तत्रानुकूलतर्कप्रदर्शनपरमेतदिति लोपप्रसङ्गशब्दं पञ्चम्यन्तमध्याहृत्य विधिक्रियापदं योज्यतामित्यभिसन्धिना हेत्वसिद्धिवारणाय श्रुत्युदाहरणपूर्वकं विवृण्वत् '' **'सर्वे गुणाः सर्वदैव ह्युपास्यास्तेनैव विद्वान् विधिकृन्नान्यथा स्यात्' इति श्रुतेर्विहितक्रियालोपप्रसङ्गात्''** (न्या.वि.) इति वाक्यं विहितक्रियालोपमपीष्टम्मन्यमानं प्रत्यनर्थप्राप्तिपर्यन्तं योज्यमित्यभिप्रेत्य भाष्योक्तहेत्वनुकूलतर्कपरत्वेन भाष्येणैकवाक्यतां नयन् व्याचष्टे- **तथा सर्वगुणोपसंहारेणेति**॥ भाल्लवेयश्रुतौ वेदैरुपास्यत्वं त्र्यादिभिरपि सम्भवतीत्यत आह- **वेदैरित्यस्येति**॥

यद्वा, 'वेदैरुपासनमयुक्तम्। तदुक्तगुणैरेवोपास्यत्वस्योचितत्वादित्यत आह- **वेदैरित्यस्येति**॥ 'सर्वैर्गुणैस्तत्र तत्र प्रतीतैः' इत्येतदित्यर्थः। वेदशब्दः प्रत्यायकमात्रपर इति भावः। अत्र 'अर्थभेदात्' इत्युक्त्या तदुपसंहारः कर्तुं न शक्य इति सूचनादशक्यत्वन्यायोऽत्र पूर्वपक्षेऽभिप्रेतः। एवं 'विधिशेषवत्' इति दृष्टान्तोक्त्या विहितत्वरूपविधिक्रियाख्यसिद्धान्तन्यायोऽपि सूचित एवेति तयोर्न्यायमालायां सङ्ग्रहो विज्ञातव्यः।

एतदधिकरणसङ्गतत्वेन सङ्क्षेपभाष्यव्याख्यानम्

अनेन

१. क. वेदादिभिः।

'सर्वरूपेष्वभेदवान्।
सर्वदेशेषु कालेषु स एकः परमेश्वरः।
तद्भक्तितारतम्येन तारतम्यं विमुक्तिदम्॥'

इत्यनेन- न सर्ववेदोक्तप्रकारेण भगवानुपसंहरणीयः। सर्वत्र तत्र तत्रोदितानां नारायणानिरुद्धादिरूपाणां शुक्लनीलपीतादिरूपाणां श्वेतद्वीपानन्तासनादिदेशानां कृतत्रेताद्वापरादिकालानां च भिन्नभिन्नत्वाद् विरुद्धानामेवैतेषाम्[1] एकस्मिन्नुपसंहर्तुमशक्यत्वादिति न मन्तव्यम्। यतः सर्वरूपेष्वभेदवान् सर्वमूर्तिविशेषेषु नीलपीतादिरूपोपलक्षितानन्तगुणेषु च भेदरहितोऽङ्गीक्रियते। सर्वदेशकालेष्वपि परमैश्वर्ययोगेनैक एवावस्थाताऽङ्गीक्रियते। अतो नाशक्यता। तर्हि सर्वान् प्रत्यप्येवंरूप एव भगवानिति सर्वेषामपि सर्वोपसंहारप्रसङ्गः।

तत्रोच्यते। तद्भक्तितारतम्येन पूर्वपादोक्तरीत्याऽधिकारिणां भक्तितारतम्यमनुसृत्योपसंहारेऽपि तारतम्यमङ्गीकार्यम्। अन्यथा भक्तितारतम्यसाधनमप्रयोजकं स्यात्। तदुपसंहारे तारतम्याङ्गीकार एव तत्तारतम्यं तत्तद्योग्यताभेदेन विविधमुक्तिदं स्यात्। अन्यथा विविधमुक्तिराकस्मिकी स्यादिति भाव इति योजनयैतधिकरणतात्पर्यनिरूपणमपि कृतमिति ज्ञातव्यम्।

॥ इत्युपसंहाराधिकरणम्॥ २॥

१. म. विरुद्धानामेतेषाम्।

॥ अथ प्राप्त्यधिकरणम् ॥ ३ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ प्राप्तेश्च समञ्जसम् ॐ ॥ ३-३-१० ॥

युज्यते चोपसंहारोऽनुपसंहारश्च योग्यताविशेषात्।

'गुणैस्सर्वैरुपास्योऽसौ ब्रह्मणा परमेश्वरः।
अन्यैर्यथाक्रमं चैव मानुषैः कैश्चिदेव तु॥'
इति भविष्यत्पर्वणि॥१०॥

॥ इति प्राप्त्यधिकरणम् ॥ ३ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासने गुणोपसंहारानुपसंहारयोः कर्तव्यतासमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोक्तबाधप्रसङ्गात् तौ समर्थनीयौ। प्रकृतौ गुणोपसंहारानुपसंहारौ विषयः। युज्येते न वेति सन्देहः। प्रतिपादनं विरोधश्च सन्देहबीजम्।

पूर्वपक्षः

न युज्येते इति पूर्वः पक्षः। तथाहि। किं तौ द्वावप्येकस्यैव पुरुषस्योत पुरुषभेदेन। नाऽद्यः। विरोधात्। नापि द्वितीयः। अनेनोपसंहारः कर्तव्यो नानेनेति निर्णयाभावात्। अतः प्रकारद्वयेऽपि तदनुपपत्तेरुक्तमनुपपन्नमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- प्राप्तेश्चेति॥ युक्तावुपसंहारानुपसंहारौ पुरुषभेदेन। नच निर्णयाभावः।

**'यस्य यावद्गुणाः स्पष्टं प्रतिभासन्त्युपासने।
युगपत् स्वभुजौ यद्वद् ध्यायेत् तावत एव सः॥'**

इति श्रुतेर्युगपत् प्रतीत्यादियोग्यताविशेषेण निर्णयोपपत्तेरिति भावः। एतदेव भृङ्गग्राहिकया स्मृत्या दर्शयति- गुणैरिति॥ कैश्चिदानन्दादिगुणैरित्यर्थः। युगपत् सर्वगुणप्रतीतिर्ब्रह्मण इत्यादि ज्ञातव्यम्। अतो गुणोपसंहारानुपसंहारयोः सामञ्जस्याद् युक्तं पूर्वोक्तमिति सिद्धम्॥१०॥

॥ इति प्राप्त्यधिकरणम् ॥

॥ शेषतात्पर्यचन्द्रिका ॥

अनन्तरपेटिकासङ्गती

सर्वानुपसंहार एव बह्वनुग्रहाय प्रकरणभेदनिर्वाहाय चाङ्गीकर्तव्यः। न तु सर्वोपसंहारः। अशक्यत्वात् प्रकरणभेदानुपपत्तेश्चेति शङ्कनात्, उपसंहारानुपसंहारयोरप्यङ्गीकारे कथं नामाविरोध इति शङ्कनाद् वाऽनन्तरसङ्गतिः। उपसंहारस्याप्यत्र विचार्यत्वादुपसंहारपेटिकासङ्गतिश्च।

चिन्ताक्रमः

तत्र 'उपसंहारोऽर्थभेदात्' इति 'न वा प्रकरण' इति सूत्राभ्यामुक्तावुपसंहारानुपसंहारौ कर्तव्यौ न वा। तदर्थमधिकारिभेदेनापि कर्तुं शक्यौ न वा। तदर्थमधिकारिभेदनिर्णीतिरस्ति न वेत्यादि चिन्तनीयम्। तत्र -

पूर्वपक्षः

केषाञ्चिदुपसंहारः सामस्त्येन भवेद् यदि ।
सर्वेषामविशेषात् स्यान्न चेत् कस्यापि नैव सः ॥

किञ्च, न कर्तव्यावेवोपसंहारानुपसंहारौ । परस्पराभावरूपत्वेन युगपत् कर्तुमशक्यत्वात् । 'स्रुवेणावद्यति हस्तेनावद्यति स्वधीतिनाऽवद्यत्यञ्जलिना जुहोति' इत्यादौ विशेषानुपादानेऽपि यद् येन कर्तुं शक्यं तत् तेन कर्तव्यमितिवत् [1]स्वशक्त्यनुसारेणोभावपि कर्तव्याविति चेन्न। स्रुवादेर्द्रवद्द्रव्याद्यवदाने सामर्थ्यस्य प्रत्यक्षसिद्धत्वेन तत्र तथा कल्पनेऽपीह तत्सामर्थ्यस्याप्रत्यक्षत्वेन तथाऽकल्पनात्। वस्तुनि विकल्पासम्भवेन तयोर्युगपदनुष्ठातुमशक्यत्वेन स्रुवादिवैषम्याच्च। प्रयोगभेदेन विकल्पो भविष्यतीति चेत्। किमधिकारिभेदमाश्रित्येदमुच्यते उत एकस्यैव पुंसः । नाऽद्यः । तस्य दुर्ज्ञानत्वात् । नह्येतावत्येवाहमधिकारी नातोऽधिक इत्येतद्विज्ञानं प्राक् सम्भावितम् । तद्योग्यताया अपि दुर्ज्ञानत्वाच्च। तत्तदभिज्ञगुरोरुपदेशेन तत्तद् भविष्यतीति चेत्। तादृशगुरोर्गवेषणेऽप्यलाभात् । यदोपलभ्यते तदोपासनं भविष्यतीति चेत्। तर्हीदानीं तूष्णीम्भावः प्राप्नोति। स च 'श्रवणादि विना नैव' (ब्र.सू.भा. उदाहृतस्मृतिः) इति निषिद्धः। मुक्तौ सम्यक्ताया विप्रतिषिद्धत्वेन मुक्तिफलसाम्ये व्यर्थायासायोगेन सर्वोपसंहारप्रयोगस्य निरधिकारित्वप्रसङ्गाच्च। सर्वगुणोक्तेर्ज्ञानमात्रेण चारितार्थ्याच्च।

एतेन द्वितीयो निरस्तः । यदोपसंहारानुष्ठानं तदा फलाधिक्यसद्भावे न विकल्पः। यत्र ह्येकफले समयोः साधनयोर्निपातस्तत्रैव विकल्पः, नान्यत्र । तथा सति भूतिस्वर्गसाधनयोरपि तत् स्यात्। तदसद्भावे तु उपसंहारे बह्वायाससाध्ये न कदाऽपि प्रवृत्तिरिति कथं विकल्पः। 'विकल्पो विशिष्टफलत्वात्' (ब्र.सू. ३-३-६१) इत्यादौ दुरितादिनिवृत्तिलक्षणफलभेदेऽपि नृसिंहाद्युपासने विकल्पो दृष्ट इति चेत्। दुरितादिनिवृत्तेर्द्वारमात्रत्वेन तत्रापि फलस्यैकत्वादिति पूर्वः पक्षः।

१. म. स्वस्वशक्त्यनुसारेण।

सिद्धान्तः

स्पष्टप्रतीतितस्तेषां गुणानां योग्यतागतेः ।
अधिकारिविभेदस्य सुज्ञेयत्वाद् व्यवस्थितिः ॥

यद्यपि तेषां तेषामधिकारिणां सामर्थ्यं योग्यता वा नाध्यक्षीकर्तुं शक्यते । तथाऽपि स्वभुजवत् स्पष्टप्रतिभासादिना 'ममेयन्तो गुणा योग्यास्तेषु सामर्थ्यं च' इत्यनुमानं सम्भवति। स्पष्टप्रतिभासस्योपसंहारपूर्वभावित्वेऽपि तत्तद्योग्यताभिज्ञगुरूपदेशेन प्रवृत्तौ स्पष्टतरप्रतिभासेन योग्यतानिश्चयो दृढीभवतीत्यदोषः। गुरुलाभपर्यन्तं तूष्णीम्भावशङ्का तु 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३-३-१२) इति वक्ष्यमाणन्यायेन सर्वमुमुक्षुसाधारण्येन चतुर्णां गुणानां सङ्ख्यानिर्देशाभ्यां क्लृप्ततया तावत्पर्यन्तमेतदुपासनस्यावर्जनीयतया परिहरिष्यते। तेषु विवक्षितगुरुलाभानपेक्षणात् । तथाच सर्वसाधारणगुणोपास्त्यावर्तनेन प्रसन्नो भगवांस्तदभिज्ञगूरूंश्च घटयित्वा ततस्तद्योग्यगुणान् ज्ञापयित्वा तत्तदधिकारिणा[1] तथोपासितः तत्तत्फलं ददातीत्यङ्गीकारे न किञ्चिदनुपपन्नम्। तस्मात् तत्तन्मुक्तेर्भिन्नभिन्नत्वेन तत्साधनानामन्योन्यं चारितार्थ्याभावात् तत्तदधिकारिभेदेनोभयोः करणं नायुक्तम्। अन्यथा फलतारतम्यस्यानिर्वाहादिति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु - उपसंहरणमनुपसंहरणं च **समञ्जसं** युक्तमेव। **प्राप्तेर्योग्यतावशाद्** यथा फलप्राप्तिर्योग्यताभेदमिति यावत्। तथाच तेषां ब्रह्मादीनां मेधोद्योगाद्यतिशयशालित्वेन सर्वविद्यासु प्रतिवाक्यं प्रतिप्रकरणं संसर्गविधया जन्मादिकर्तृत्वादिगुणगणज्ञातृत्वेऽपि प्रत्यक्षरं प्रतिपदं प्रतिस्वरं भगवद्गुणपरतया नामत्वावगत्या प्रकरणभेदाभावस्तेषां सर्वगुणोपसंहारः। येषां तु देवर्षिपितृचक्रवर्तिमानुषोत्तमानां[2] क्रमेण विद्वदविद्वद्रूढिभ्यां प्रसिद्धपदार्थाविरोधेनैव संसर्गमर्यादया

१. म. अधिकारिणः। २. म. मानुषान्तानाम्।

भगवन्माहात्म्यपरत्वनिर्णयः[१] तेषां तत्तत्प्रकरणस्थानेकवाक्यैकवाक्यतापन्न-वाक्यसमर्पितगुणजातस्यैव क्रमेण पूर्वपूर्वस्मान्न्यूनतयोपसंहरणं न सर्वेषा-मित्यधिकारिभेदेन तदुभयमविरुद्धं समञ्जसं चेति भावः ।

शाङ्करभाष्योक्तौ एतदधिकरणसंशयपूर्वपक्षौ

अत्र सूत्रं 'व्याप्तेश्च समञ्जसम्' इत्यपपाठेन पठित्वाऽन्यैर्व्याख्यातम्। 'ॐ इत्येतदक्षरमुद्गीथमुपासीत' इत्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्यं दृष्टि-विरुद्धमुतापवादार्थं किं वैकत्वविध्यर्थमाहोस्विद् विशेषणविशेष्यभावनिबन्धन-मिति संशये -

अबाध्येनापवादः स्यान्नापर्यायार्थ एकता।
न विशेषणता वाक्यभेदाद् दृष्टिस्तु शक्यते[२] ॥

न तावदक्षरे उद्गीथदृष्ट्याऽक्षरमपवदितुं शक्यम्। व्यावहारिकप्रमाणसिद्ध-त्वात्। नचावयवस्यावयवित्वम्। वैपरीत्यात्। नचापर्यायशब्दवाच्ययोरक्ष-रोद्गीथयोरेकत्वसम्भवः। विज्ञानानन्दपदयोर्लक्ष्यमभिन्नं न वाच्यम्। नचात्र लक्ष्यैकत्वसम्भवः। लक्ष्यमाणयोरोङ्कारोद्गीथयो[३]र्भेदात्। व्याख्यानार्थं तु करिसिन्धुरपदयोः सहप्रयोगः। नचात्र व्याख्यानापेक्षा। 'तस्योपव्याख्यानम्' इत्यादिना निगदव्याख्यानत्वात्। नचात्र सर्ववेदसाधारणमोङ्कारमुद्गीथत्वेन विशेष्य तत्र प्राणाद्युपास्तिर्विधेया। तथा सति 'ॐ इत्येतदक्षरमुपासीत' तच्चोद्गीथत्व-विशिष्टमिति विशिष्टोद्देशेन विध्यावृत्त्या वाक्यभेदापत्तेः। तस्मादक्षरे उद्गीथ-दृष्ट्यध्यास[४] इति प्राप्तेऽभिधीयते -

१. म. माहात्म्यनिर्णयः।
२. म. शिष्यते।
३. क. ओङ्कारोद्गीथव्यक्त्योः।
४. क. उद्गीथदृष्ट्यभ्यासः।

तत्सिद्धान्तः

फलकल्पनतो गौण्या लक्षणाप्रबलत्वतः।
विशिष्टविधिनेष्टेश्च स्यादुद्गीथो विशेषणम्॥

अध्यासे हि फलं कल्प्यम्। [१]तत्र फलस्याश्रुतत्वात्। 'आपयिता ह वै कामानां भवति' इत्यादेराप्त्यादिगुणकप्रणवोपास्तिफलत्वात्। उद्गीथत्वविशिष्ट-प्रणवोपासनाफलत्वाभावात्। यदा तूद्गीथत्वविशिष्टप्रणवोपासनाविधिपरं[२] वाक्यं, तदा विशेषणस्य विशिष्टप्रणवप्रतिपत्त्यर्थत्वेन पारार्थ्यान्न तत्फलकल्पना।

अपि च गौण्या वृत्तेर्लक्षणावृत्तिर्बलीयसी। लक्षणायां हि लक्षणीयपरत्वं पदस्य। 'गङ्गायां घोषः' इत्यत्र लक्षणीयस्यैव वाक्यार्थेऽन्तर्भावात्। 'सिंहो देवदत्तः' इत्यत्र तु सिंहशब्दस्य न लक्षणीयसिंहसम्बन्धिशौर्यादिपरत्वम्। अपि तु तन्मूलशौर्यादियुक्तदेवदत्तपरत्वमिति अर्थविप्रकर्षाद् गौणी वृत्तिर्दुर्बला। भवतूद्गीथदृष्टिविषयत्वगुणयोगादक्षरे गौण उद्गीथशब्दः, मम त्ववयवि-वचनोऽवयवे लाक्षणिक इति। नच विशेषणपक्षे विशिष्टोद्देशनाद् वाक्यभेदः। उद्गीथावयवत्वविशिष्टतत्तद्गुणकप्रणवविशिष्टोपास्तेरेकत्वेन तद्विधायक-वाक्यस्याप्येकत्वादिति।

तत्पूर्वपक्षोऽयुक्तः

तन्न। आख्यायामपोदितायां पुनर्विद्याभेदाभेदविचारस्यैव सङ्गततया सामानाधिकरण्यस्य दृष्ट्यर्थत्वादिचिन्तायाः सङ्गत्यभावात्। 'पूर्वत्रोद्गीथेन विशेषणमोङ्कारस्यैतद्वाक्यार्थ इति सिद्धवत्कृत्योद्गीथावयवोपास्यत्वप्रक्रमभेदाद् विद्याभेदो दर्शितः। इदानीं स एवार्थश्चिन्त्यते' इति अमलानन्दोक्तसङ्गतिस्त्व-युक्ता। उद्गीथेन विशेषणमोङ्कारस्येत्यस्य प्रमेयस्योपजीवनं विनाऽप्येकत्र कर्मत्वेनान्यत्र कर्तृत्वेन प्रक्रमभेदाद् विद्याभेदसिद्धेः पूर्वाधिकरणे सम्भवात्।

१. म. तस्य।
२. क. तूद्गीथावयवप्रणवोपासनाविधिपरम्।

अक्षरे उद्गीथत्वाभावस्याक्षरोद्गीथस्वरूपभेदग्राहिव्यावहारिकप्रमाणसिद्धत्वादक्षरे उद्गीथत्वदृष्टिविध्यनुपपत्त्या 'दृष्टिस्तु शिष्यते' इति पूर्वपक्षनिर्धारणायोगाच्च। अन्यथाऽक्षरत्वस्य व्यावहारिकप्रमाणसिद्धत्वेऽप्यपवदितुं शक्यत्वेऽपवादपक्ष-निर्धारणापातात्। उद्गीथत्वदृष्टिविधानं नोद्गीथत्वारोपविधानं, येनोद्गीथत्वाभावस्य व्यावहारिकप्रमाणसिद्धत्वेन तत्र तद्दृष्टिविधानानुपपत्तिः। किन्तु 'गौणी बुद्धिरध्यासः। यथा माणवकेऽनिवृत्तायामेव माणवकबुद्धिव्यपदेशवृत्तौ सिंहबुद्धिव्यपदेशवृत्तिः सिंहो माणवक इति' इति भामतीरीत्या गौण्या बुद्धेर्विधानमेवेति चेन्न। तथा सत्यक्षरे उद्गीथसादृश्यबुद्धिर्विधेयेति पर्यवसानाद् विशेषणत्वपक्षानतिरेकात्। नहि 'सिंहो माणवकः' इत्यत्र सिंहपदं[१] माणवकस्य विशेषणम्। अन्यथा लाक्षणिकत्वेऽपि विशेषणत्वाभावप्रसङ्गात्। 'अन्यतम-निर्धारणकारणाभावादनिर्धारणप्राप्ताविदमुच्यते', 'अनध्यवसायलक्षणपूर्वपक्षं गृह्णाति', 'अतोऽक्षरस्य चतुर्धा सन्देहे इदमेवेत्यत्र नाध्यवसायहेतुः। नियामक-स्याभावादिति प्राप्ते ब्रूमः' इति भाष्यभामतीभारतीतीर्थवचनैरनध्यवसाय-पूर्वपक्षप्रतीतेर्दृष्ट्यध्यासनिर्धारणपूर्वपक्षस्वीकारे तद्विरोधापाताच्च।

ॐइत्युक्ते वस्तुनि जडत्वसमानाधिकरणवर्णत्वात्मकमक्षरत्वमुच्चैर्गीयमा-नत्वरूपोद्गीथत्वेनापोदितुं शक्यमेव। न ह्योंशब्दाभिधेये ब्रह्मण्यक्षरत्वं व्याव-हारिकप्रमाणसिद्धम्। जडनिष्ठधर्मस्य चेतनेऽसत्त्वात्। एवं च सत्यपवादपक्षे शक्यपरिहारदोषेऽप्यध्यासपक्षकक्षीकरणायोगाच्च। एवमेकत्वपक्षविशेषणत्व-पक्षयोरप्यनुपपत्तिपरिहारावूह्याविति[२] पूर्वपक्षोऽयुक्तः[३]।

सिद्धान्तोऽप्ययुक्तः

उद्गीथसादृश्यविशिष्टप्रणवप्रतिपत्त्यर्थत्वेन पारार्थ्यान्न फलकल्पनाक्लेशः। नहि

१. म. अत्र 'न' इत्यधिकः पाठः। २. म. अनुपपत्तिपरिहार ऊह्यः।
३. क. पूर्वपक्षोऽप्ययुक्तः।

सिंहसादृश्यविशिष्टमाणवकप्रतिपत्तिपरे 'सिंहो माणवकः' इति वाक्ये फल-कल्पनाक्लेशोऽस्ति। अन्यथोद्गीथावयवत्वविशिष्टप्रणवप्रतिपत्तिपरत्वेऽपि[१] फल-कल्पनाप्रसङ्गानिवारणान्न लक्षणया विशेषणत्वपक्षस्वीकारोऽपि न युक्त इति सिद्धान्तस्याप्ययोगाच्च।

यच्च, अपि चेत्याद्युक्तं, तन्न। लक्षणायाः सम्बन्धसामान्यघटितत्वेन विशेष-स्वरूपगवेषणे मान्द्यात्। गौण्यास्तु सादृश्यरूपसम्बन्धविशेषघटितत्वेन शीघ्रप्रतीतिकत्वाद् गौण्या एव ज्यायस्त्वात्। एतेन 'गङ्गायां घोषः' इत्यत्र लक्ष्यतीरस्यैव वाक्यार्थेऽन्तर्भावाल्लक्षणीयपरत्वम्। 'सिंहो देवदत्तः' इत्यत्र तु सिंहशब्दस्य न लक्षणीयसिंहसम्बन्धिशौर्यादिपरत्वम्,[२] अपि तु तन्मूलशौर्यादि-युक्तदेवदत्तपरत्वमित्यर्थविप्रकर्षाद् गौणी वृत्तिर्दुर्बलेति निरस्तम्। सिंहशब्दस्यापि सिंहसादृश्याद् देवदत्तपरत्वसम्भवेनार्थविप्रकर्षाभावात्। अत एव 'सिंहो देवदत्तः' इत्युक्ते सिंहसदृशोऽयमित्येव प्रतीतिर्न तु सिंहाभिन्नोऽयमिति। अन्यथा प्रतीतेर्भ्रमत्वापातात्।

पराभिमतसूत्रार्थनिरासः

एतेन व्याप्तेर्हेतोरोमित्येतदक्षरमित्यस्योद्गीथमित्येतद् विशेषणमिति निरवद्यमिति सूत्रव्याख्यानं निरस्तम्। व्याप्तेरोङ्कारगतायाः समञ्जसत्वे हेतुत्वा-योगात्। सर्ववेदसाधारण्यं व्याप्तिशब्दार्थः। प्रत्यनुवाकं प्रत्यृचमुपक्रमे च समाप्तौ चोङ्कारस्य सर्ववेदव्याप्तत्वात्[३] किन्नत ॐकार इहोपास्य इति सन्देहात् तद्व्या-वृत्त्यर्थं विशेषणमावश्यकमिति योजना भविष्यतीति चेन्न। विशेषणप्रयोजनोक्ति-लाभेऽपि विशेषणपक्षसामञ्जस्येऽवश्यवक्तव्यस्य हेतोः पक्षान्तरे बाधकस्यानुक्तत्वाद्। बह्वध्याहारप्रसङ्गाच्च।

१,२. क. परत्वेन। ३. म. वेदव्यापित्वात्।

शैवाभिमतसूत्रार्थनिरासः

एतेनैव छान्दोग्ये प्रथमपाठके[१] 'ॐइत्येतदक्षरमुद्गीथमुपासीत। ॐइत्युद्गायति[२]। तस्योपव्याख्यानम्' (छा.उ. १.१.१) इति उपक्रमे खलु एतस्यैवाक्षरस्योपव्याख्यानं भवतीति उत्तरत्रापि प्रणवस्योपास्यत्वव्याप्तेरुद्गीथेन प्रणवो विशेष्यते[३]। न पुनः प्रणवेनोद्गीथमिति प्रणवविषयत्वमेवोपासनस्य समञ्जसमित्येवं सूत्रव्याख्यानं निरस्तम्। 'ॐ इत्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१), 'उद्गीथमुपासाञ्चक्रिरे' (छा.उ. १.२.१), 'उद्गीथम्' (छा.उ. १.१.३) इत्यादीनां बहुषु स्थलेषूद्गीथस्यापि व्याप्तेः प्रणवेनोद्गीथं विशेष्यत इत्यस्यापि पक्षस्य सामञ्जस्यसम्भवात्।

रामानुजाभिमतसूत्रार्थनिरासः

एतेनैवास्य पूर्वाधिकरणशेषतामेवाऽश्रित्य प्रथमप्रपाठके उपक्रमवदुत्तरास्वपि उद्गीथविद्याश्रुतोद्गीथावयवस्य प्रणवस्यैवोपास्यत्वव्याप्तेर्मध्यगतस्य 'तद्ध देवा उद्गीथमाजह्नुः' (छा.उ. १.२.१) इत्युद्गीथशब्दस्य प्रणवविषयत्वमेव समञ्जसमिति केषाञ्चिद् व्याख्यानमयुक्तम्। मद्रीत्या प्राप्तिशब्दोक्तयोग्यताया उपासनासहकारित्वरूपस्यार्थस्यावश्यवक्तव्यस्य प्रतिपादनायाधिकरणान्तरत्वे सम्भवति पूर्वशेषतायोगात्। चशब्दस्वारस्यं तु मन्मतेऽप्युक्तमेवेति यथाभाष्यमेव सूत्रार्थोऽनुसन्धेय इति।

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु - अनिर्णीतिन्यायं तत्साध्यं तदाकारं च प्रदर्श्य विवृण्वत् 'केषाञ्चित् सर्वगुणोपसंहारस्य कर्तव्यत्वे सर्वेषामपि तथा स्यात्। अनेनोपसंहर्तव्या अनेन नोपसंहर्तव्या इत्यनिर्णीतिरिति न मन्तव्यम्' (न्या.वि.) इति वाक्यमधिकारिभेदावलम्बने भवत्वयं दोषः। तदनवलम्बने तु को दोष इत्यतः स्वयमध्या-

१. क. प्रथमप्रपाठे। २. ह्. ॐ इति ह्युद्गायति। ३. क. विशिष्यते।

हृत्य व्याचष्टे- **किन्तु द्वावपीति**॥ अनेन तदाऽप्युपसंहारानुपसंहारयोः पुरुषभेदेन कर्तव्यत्वकल्पनम्। यद्यतिप्रसङ्गो नास्ति, येषां चेह सर्वगुणानुपसंहारः कल्प्यते, तेषामपि सर्वगुणोपसंहारप्राप्तेः[१]। येषां च तद्वैपरीत्यं, तेषां सर्वोपसंहारस्यापि प्राप्तेः[२]।

एवं न्यायसाम्येन पूर्वार्धं योजयित्वोपसंहारानुपसंहारयोर्भिन्नभिन्ना एवाधिकारिणः सङ्ख्यानिर्देशाभ्यां क्लृप्ताः सन्तीत्यतो नातिप्रसङ्ग इति शङ्कायां तथा निर्णायकप्रमाणाभावादेवानिर्णीतिरिति नाधिकारिभेदकल्पनं युज्यत इत्युत्तरार्धं योज्यमित्युक्तं भवति। योग्यताविशेषपरसौत्रप्राप्तिपदेनानिर्णीतियुक्तेः सूचनान्न्यायमालायां तद्ग्रथनमिति ध्येयम्।

सिद्धान्तन्यायविवरणव्याख्यानम्

माहात्म्यन्यायं प्रमाणाद्युक्तिपूर्वकं विवृण्वत्-

' ''यस्य यावद्गुणाः स्पष्टं प्रतिभासन्त्युपासने।
युगपत् स्वभुजौ यद्वद् ध्यायेत् तावत एव सः॥
युगपद् ब्रह्मणः सर्वे भासन्ते हि गुणा हरेः।
तदन्येषां यथायोग्यं स्वमाहात्म्यानुसारतः॥''

इति श्रुतेर्युगपद् गुणप्रतीत्यादि[३]माहात्म्यान्निर्णयोपपत्तेः' (न्या.वि.) इति वाक्यं तत्तदधिकारिणां सर्वगुणोपसंहारादौ किं निर्णायकप्रमाणमिति शङ्कने तत्तदुपासनाधिकारिस्वरूपमात्रप्रमाणोपन्यासस्यानवसरप्राप्तत्वाद् भाष्यं न प्रथमतो योज्यम्[४]। किन्तु न्यायविवरणस्थप्रथमश्लोकः साक्षात्सङ्गतत्वेन योज्य इत्यभिप्रेत्यावतार्य व्याचष्टे- **न च निर्णयाभाव इति**॥ तर्हि भाष्यस्थं भविष्यत्पर्ववचनं कथं सङ्गमयितव्यम्? तत्राऽह- **एतदेवेति**॥ युगपत् स्पष्टप्रति-

१,२. क. प्राप्तिः। ३. म. प्रतिपत्त्यादि। ४. क. योजनीयम्।

भासनमन्यस्य, ब्रह्मणस्तु सर्वैर्गुणैरुपासनमित्येतत् कथं युज्यते । ब्रह्मणः सर्वगुणोपासनं चेत्, सर्वगुणा अपि स्पष्टं प्रतिभासेरन् । न च तथा प्रमाणमस्तीतीदं शङ्काद्वयं 'युगपद् ब्रह्मणः सर्वे' इत्यादिद्वितीयश्लोकेन निरसनीयमित्यादि तस्य तात्पर्यमाह- **युगपत् सर्वगुणप्रतीतिर्ब्रह्मण इत्यादीति** ॥ तथाच ब्रह्मणः युगपत् सर्वगुणप्रतीतिलक्षणमाहात्म्यातिशयात् सर्वगुणोपसंहारः, देवानां तु तथा सर्वेषां गुणानां स्पष्टप्रतिभासाभावात् ततः किञ्चिन्यूनगुणानामेव प्रतिभानाच्च तावतामेवोपसंहारः । न तु ब्रह्मण इव सर्वेषां गुणानाम् । एवं पितृमनुष्येष्वपि ज्ञातव्यम् । माहात्म्यनिर्णयरूपयुक्तिः सूत्रस्थप्राप्तिपदेनैवोच्यत इति युक्तं न्यायमालायां तत्सङ्ग्रहणम् ।

एतदधिकरणपरत्वेन सङ्क्षेपभाष्यव्याख्यानम्

एवं यद्यपि 'सर्वदेशेषु कालेषु' 'सर्वरूपेष्वभेदवान्' (अणुभाष्यम् ३.२,३) परमेश्वरः सर्वानधिकारिणः प्रत्यविशिष्टः, तथाऽप्युक्तयोग्यताविशेषात् तदनुसारेणैव प्रतिभासते, नतु सर्वान् प्रति सर्वप्रकारेण । तथाच तथोपासनमेव युक्तम् । तदेवम्भूतमेव ब्रह्मोपासनं भक्तितारतम्येन स्पष्टप्रतिभानादिप्रयोजकस्नेहतारतम्येन विमुक्तिदं- विविधमुक्तिकारणम् । तेन च मुक्तितारतम्यं च भवति । अतो न सर्वोपसंहर्तॄणामायासो विफल इति सर्वं समञ्जसमिति भङ्ग्या 'सर्वरूपेष्वभेदवान्' (अणुभाष्यम् ३.३) इत्यादिसङ्क्षेपभाष्यमेतदधिकरणतात्पर्यपरमपि व्याख्येयम् ।

॥ इति प्राप्तिनयः[1] ॥ ३ ॥

---

१. क. इति प्राप्त्यधिकरणम् ।

॥ अथ सर्वाभेदाधिकरणम् ॥ ४ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ सर्वाभेदादन्यत्रेमे ॐ ॥ ३-३-११ ॥

सर्वगुणयुक्तत्वेनोपासनादन्यत्रैव फले ब्रह्मादयो भवन्ति ।

'सम्पूर्णोपासनाद् ब्रह्मा सम्पूर्णानन्दभाग् भवेत् ।
इतरे तु यथायोगं सम्यङ्मुक्तौ भवन्ति हि ॥ '

इति पाद्मे ॥

॥ इति सर्वाभेदाधिकरणम् ॥ ४ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्रेश्वरदर्शनसाधनोपासने बहुगुणोपसंहारस्य कर्तव्यतासमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथोक्तानुपपत्तेः समर्थनीय एव । प्रकृतो बहुगुणोपसंहारो विषयः । कर्तव्यो न वेति सन्देहः । उभयविधक्रियादर्शनं सन्देहबीजम् ।

पूर्वपक्षः

न कर्तव्य इति पूर्वः पक्षः । तथाहि । अल्पगुणोपसंहारकेभ्यः बहुगुणोपसंहर्तॄणां फलातिशयोऽस्ति न वा । नाऽद्यः । प्रमाणाभावेन फलातिशयनिर्णयाभावात् । न द्वितीयः । व्यर्थायासस्य बुद्धिमदुपादित्साऽगोचरत्वात् । अतः फलानिर्णीतेरुपसंहारस्याकर्तव्यत्वादुक्तमयुक्तमिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- सर्वेति ॥ युक्त एव ब्रह्मादीनां बहुगुणोपसंहारः । बहुगुणोपसंहारेण तेषामनुपसंहर्तृभ्यो विलक्षणफलसद्भावात् । न च फलानिर्णयः । तेषां सर्वगुणोपसंहारेणोपासकानां महत्त्वादेव महत् फलमिति निर्णयोपपत्तेः । नहि वेदोक्तमहोपासनावतामतिशयितफलाभावः सम्भवतीति भावः । स्मृत्या चायं निर्णय इति तामुदाहरति- सम्पूर्णेति ॥ सम्यग् भवन्त्यतिशयवन्तो भवन्तीत्यर्थः । अतो बहुगुणोपसंहर्तॄणां फलविशेषभावादुपसंहारो युक्त एवेति सिद्धम् ॥ ११ ॥

॥ इति सर्वाभेदाधिकरणम् ॥

॥ शेषतात्पर्यचन्द्रिका ॥

सङ्गतिः

अस्तु योग्यताभेद उपासने । तथाऽपि न बहुगुणोपासनार्थमुपसंहारः कार्यः । फलातिशयाभावे व्यर्थायासस्यायोगादित्युत्थानात् सङ्गतिः ।

पूर्वपक्षः

योग्यतातिशयस्येह प्रमितत्वात् तथाऽस्तु नः[१] ।
फलातिशयनिर्णीतौ मानं नाद्यापि सूचितम् ॥

तत्तद्योग्यतानुसारेणोपासनं कर्तव्यमिति प्रमाणेन साधितम् । न तु तेन फलातिशयोऽस्तीति । तत्र स्पष्टप्रमाणानुपन्यासात्, वृथायासस्य बुद्धिमदुपादित्साऽगोचरत्वात् फलातिशयो भविष्यतीति सम्भावनामात्रस्य निर्णायकत्वायोगादिति पूर्वः पक्षः ।

१. म. सः ।

सिद्धान्तः

सिद्धान्तस्तु -

उपासकानां माहात्म्यात् फलातिशयनिर्णयः ।
पाद्माच्च ज्ञायतेऽतो हि न युक्तं चोद्यमत्र तत् ॥

सूत्रार्थः

सूत्रार्थस्तु - **सर्वाभेदाद्** भेदः सङ्कोचः, सर्वेषु गुणेष्वसङ्कोचात् । उपासनायां कृतायामिति शेषः । **अन्यत्र** सङ्कोचेनोपासनाफलतोऽन्यत्र विलक्षणे आनन्दादौ फले **इमे** सर्वगुणोपासका ब्रह्मादयो भवन्तीति शेष इति ।

अद्वैतमतानुवादः

अत्रान्ये, वाजिनां छन्दोगानां च प्राणसंवादे ज्यैष्ठ्यश्रैष्ठ्यगुणवतः प्राणस्योपासनमुक्तम् । वसिष्ठत्वादयो गुणा उक्ताः। कौषीतकिप्रभृतीनां तु अस्तु[१] ज्यैष्ठ्यश्रैष्ठ्यगुणवतः प्राणस्योपासनं, न तु वसिष्ठत्वादिगुणजातं श्रुतम् । तत्र सन्देहः । किं शाखान्तरोक्तं वसिष्ठत्वादिकं कौषीतकिप्राणे उपास्यं न वेति । तत्र-

वक्ति सन्निहितं ह्येवं शब्दः शाब्दश्च सन्निधिः ।
शब्दमानोपयोगीति[२] नापेक्षानुमितैर्गुणैः ॥

नाशब्दं शाब्दे व्यवहारेऽन्वेति । तद्यथा त्रय आगताः, कठकौण्डिन्यावित्युक्ते प्रत्यक्षदृष्टेन माठरेण न वाक्यार्थमुपपादयन्ति । किन्तु माठरश्चेति चशब्दोपात्तमाठरेणैव तदुपपादनम् । तदिह कौषीतकिशाखायाम् 'य एवं विद्वान् प्राणे निश्रेयसं विदित्वा' (कौ. २.१४) इत्यत्र एवंशब्देन सन्निहितप्रकारवाचिना शब्दोपात्तज्यैष्ठ्यश्रैष्ठ्यगुणमात्रं परामृश्यते । यत्तु कौषीतकिवाक्यं वसिष्ठत्वादिमत्प्राण-

१. क. अस्ति । २. क. शब्दमात्रोपयोगी ।

विषयं श्रैष्ठ्यादिगुणकप्राणोपास्तिविषयत्वाद् वाजसनेयवाक्यवदिति अनुमानप्राप्तं गुणजातं न तदत्र परामृश्यते। शब्दाप्रापितत्वादिति प्राप्तेऽभिधीयते -

एवंशब्दो विशेषेण वक्ति सन्निहितं ततः।
धर्मिद्वारेण बुद्धिस्थप्राणस्याप्यस्ति[१] शाब्दता॥

सत्यं, शाब्दस्यैव वाक्यार्थेऽन्तर्भावः। तदिहैवंशब्दस्य शाब्दाशाब्दसाधारणसन्निहितमात्रवाचिनः श्रुतश्रेष्ठप्राणरूपधर्माविनाभावेन बुद्धिस्थवसिष्ठत्वादिगुणजातमभिधेयमिति भवति शाब्दम्। ततश्च वाक्यार्थेऽन्तर्भावोऽपीत्याहुः।

तन्निरासः

तन्न। सञ्ज्ञापवादो हि पूर्वत्र प्रकृतः। इह पुनर्विद्यैक्यप्रतिपादनस्य सङ्गत्यदर्शनात्। द्वितीयनयेऽर्थाभेदाच्छाखान्तरोक्तगुणोपसंहारस्य निर्णीतत्वेनेह पुनस्तत्प्रतिपादनवैयर्थ्याच्च। एवंशब्दस्य सन्निहितमात्रवाचित्वाद् वसिष्ठत्वादीनां चासन्निहितत्वान्नोपसंहार इत्यधिकाशङ्कया पुनः प्रवृत्तिरिति चेन्न। एवमेव विद्वानिति श्रवणाभावाद् गुणान्तरोपसंहारे विरोधाभावात्। कौषीतकिशाखोक्तगुणजातस्य फलविशेषसम्बन्धप्रतिपादनाय--------[२] अनुवादोपपत्तेश्च। कथञ्चिदाशङ्कायामप्यस्य तदानन्तर्येण तृतीयत्वापत्तेश्च। पूर्वत्र सर्वत्र प्रणवप्राप्तावुद्गीथमिति विशेषणादन्यव्यावृत्तिरुक्ता। तद्वदिहाप्येवंशब्दात् सन्निहितावलम्बनादसन्निहितस्य विद्यैक्यद्वाराऽनुमानात् प्राप्नुवतो वसिष्ठत्वादेः व्यावृत्तिः स्यादिति पूर्वन्यायेन प्रवर्तनाददोष इति चेन्न। उद्गीथपदमात्रस्योक्तरीत्या व्यावर्तकत्वासिद्धेः। अत एव पूर्वपक्षोऽप्यतिमन्दः।

सिद्धान्तोऽपि न युक्तः। धर्मिद्वारेण गुणजातस्य बुद्धिस्थितताया अप्रयोज-

---

१. म. गुणस्याप्यस्ति।
२. अत्र पत्रं त्रुटितम्। 'श्रुत्या' इति पाठेन भाव्यमिति भाति।

कत्वात्। यतः शाखाद्वयेऽपि प्राणशब्देनोपस्थितप्राणरूपधर्मिद्वारा वागादिप्राणानामसुरपाप्मविद्धत्वाद्युपक्रमाद्यैक्यानुसन्धानेन चोपस्थितानामुद्गीथत्वादीनां गुणानां सन्निधिः, 'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३-३-७) इत्यादौ त्वयैव प्रयोजकीकृतः। विरुद्धगुणानां सन्निधिर्बुद्धावप्रयोजको न त्वविरुद्धानाम्। ज्यैष्ठ्यश्रैष्ठ्यादयो वसिष्ठत्वादयश्चाविरुद्धा इति चेन्न। उद्गीथत्वोङ्कारत्वयोरप्यविरोधसम्भवात्। न ह्युच्चैर्गीयमानत्वमोमित्याक्रियमाणत्वं च विरुद्धमिति शक्यते वक्तुम्। अन्यथा ज्येष्ठस्य[१] प्रसिद्धवसिष्ठमुन्याद्यात्मकत्वाभावेन विरोधस्यापरिहारात्। उपासनाया वस्तुपारतन्त्र्याभावान्न विरोध इति तु समम्। यद्यपि कौषीतकिब्राह्मणगतेनैवंशब्देन वाजिब्राह्मणगतं गुणजातम् असंशब्दितमसन्निहितत्वात्। तथाऽपि बुद्धौ सन्निधिमात्रेण वाक्यार्थेऽन्तर्भावोपपत्तिरिति भाष्योक्तं समाधानं तु शब्दाध्याहारविरोधादुपेक्षणीयम्। नचासावयुक्त इति वाच्यम्। 'व्यतिहारो विशिंषन्ति हीतरवत्' (ब्र.सू. ३-३-३८) इति सूत्रकृतैव शब्दाध्याहारस्याऽश्रितत्वात्।

पराभिमतसूत्रार्थनिरासः

एतेन- अन्यत्र कौषीतकिशाखायामप्येवमेव वसिष्ठत्वादयो गुणा अस्येरन् प्रक्षिप्योपासनीया इति यावत्। सर्वाभेदात् सर्वशाखासु गुणवतः प्राणस्य भेदाभावात्। अभेदश्च प्राणसंवादादिसारूप्यात्। नहि देवदत्तः शौर्यादिगुणत्वेन[२] स्वदेशप्रसिद्धो देशान्तरगतस्तद्देशीयैरविभावितशौर्यादिगुणोऽप्यतद्गुणो भवति। यथा च तत्र परिचयविशेषाद् देशान्तरेऽपि देवदत्तगुणा विभाव्यन्ते एवमभियोगविशेषाच्छाखान्तरेऽपि उपास्या गुणा इति सूत्रार्थकथनं निरस्तम्। वसिष्ठत्वादयो गुणा शाखान्तरेऽप्युपास्याः सर्वत्र गुणिनो भेदाभावादिति हेतुसाध्ययोर्वैयधिकरण्यात्। 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३.३.६) इत्यनेनैकार्थत्वप्रसङ्ग-

---

१. म. ज्यैष्ठ्यस्य। २. क. शौर्यादिगुणवत्त्वेन।

स्योक्तत्वात्। अवश्यवक्तव्यफलभेदादेरवचनप्रसङ्गाच्च। नचेदमप्यवश्यं वक्तव्यम्। पूर्वतन्त्रे शाखान्तराधिकरणेनैव सिद्धत्वात्। नहि शाखान्तरसिद्धं प्रमेयं बहुभिस्सूत्रैरधिकरणैश्चोपपादितं दृष्टचरमिति।

किञ्चाभेदश्च प्राणसंवादादिसारूप्यादिति न सूत्रारूढम्। किञ्चात्राभेदशब्दो भेदाभावपर उत सारूप्यपरः। नाऽद्यः। असिद्धेः। नहि कौषीतकिशाखाया-मन्यत्रोक्तगुणजातमनुपास्यमिति वदन् पूर्वपक्षी वेद्यप्राणभेदाभावमङ्गीकरोति। तथा सति 'अभेदश्च प्राणसंवादादिसारूप्यात्' इत्युपपादकोक्तिर्भाष्ये न स्यात्। नान्त्यः। सर्वसारूप्यस्यासम्भवित्वात्। यत्किञ्चित्सारूप्यस्यातिप्रसङ्गित्वादपदार्थत्वाच्च।

विशिष्टाद्वैत्यभ्युपगताधिकरणशरीरम्

केचित्तु, छान्दोग्यकौषीतकिप्राणविद्ययोर्भेदोऽस्ति न वेति संशये, रूपभेदाद् विद्याभेद इति प्राप्तेऽन्यत्र कौषीतकिप्राणविद्याया[१]मिमे वसिष्ठत्वादयः सन्त्येव। सर्वाभेदात्- प्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य सर्वस्य तत्राप्यभेदात् इति सिद्धान्त इत्याहुः।

तन्निरासः

तन्न। सन्त्येवेत्यस्य यथाश्रुतत्वेऽसिद्धेः। नहि वसिष्ठत्वादीनामपि कौषीतकिप्राणविद्यायां सत्त्वे विवादस्यावकाशोऽस्ति। अध्याहार्या इत्यर्थत्वे उपपादनप्रकारस्याभेदो न हेतुः। अप्रयोजकत्वात्। नहि 'न वा प्रकरणभेदात्' (ब्र.सू. ३-३-८) इत्यत्र असुरपाप्माविद्धत्वाद्युपपादनप्रकाराभेदेऽपि प्राणविद्यैक्यमङ्गीकृतम्। कर्मत्वकर्तृत्वादिना सर्वेषामुपपादनप्रकाराणां तत्राभेदो नास्तीति चेन्न। प्रकृतेऽप्यभावात्।

ननु प्राणज्यैष्ठ्यादिकं प्राणस्य वागादिगतस्थितिलक्षणकार्यसामर्थ्यरूप-

१. म. कौषीतकिप्राणादिविद्यायाम्।

वसिष्ठत्वादिसम्बन्धं विनाऽनुपपन्नमिति श्रैष्ठ्याद्युपपादनप्रकथनेनैव वसिष्ठत्वादिप्रकारोऽपि कथित एवेति प्राणज्यैष्ठ्याद्युपपादनप्रकारस्य सर्वस्यात्राभेदोऽस्तीति चेन्न। प्राणस्य सम्प्रदायप्रवर्तकत्वेन स्वकर्मकोद्गानकर्तृत्वस्यान्यकर्तृकस्वकर्मकोद्गानकर्मत्वोपपादकतया सर्वोपपादनप्रकाराभेदस्य तत्रापि सम्भवादिति सर्वगुणोपासकानां न्यूनगुणोपासकेभ्यः साक्षात्कारानन्दयोरतिशयितत्वशिक्षणार्थमेवेदं सूत्रमित्येव युक्तम्।

टीकाक्षरार्थः

अनिर्णीतिमाहात्म्यन्याययोरेतदधिकरणसङ्गतत्वेनापि व्याख्यानम्

टीकाक्षरार्थस्तु - **प्रकृत इति**॥ सौत्रप्राप्तिपदसूचिते भविष्यत्पर्ववचन इति शेषः। अनिर्णीतिन्यायमेव सम्बन्धिप्रदर्शनपूर्वकमावृत्त्यैतदधिकरणसङ्गतत्वेनापि विवृण्वत् 'नच फलानिर्णीतिः' (न्या.वि.) इति वाक्यमल्पगुणोपासकेभ्यः बहुगुणोपासकानां फलातिशयाभावेन न कर्तव्य एवासाविति पूर्वपक्षे, फलनिर्णयस्य तदनिर्णयस्योपयोगादर्शनेन[१] फलपदं तदतिशयोपलक्षकमिति मन्वानो व्याचष्टे- **प्रमाणाभावेनेति**॥ आवृत्त्या माहात्म्यन्यायमेतदधिकरणसङ्गतत्वेनापि साध्यप्रदर्शनपूर्वकं विवृण्वत् 'माहात्म्येनैवान्यत् फलं महतामिति निर्णयोपपत्तेः।' (न्या.वि.) इति वाक्यमनुमानाख्यनिर्णायकप्रमाणाभिधानपरमिति मन्वानो व्याचष्टे- **तेषां सर्वगुणोपसंहारेणेति**॥ तेन माहात्म्येन सर्वगुणोपासकत्वलक्षणेन महता[२] हेतुगर्भमेतदिति व्याख्यातं भवति। ततश्चायं प्रयोगः। विमताः बहुगुणोपासकाः महाफलवन्तः। महत्त्वात्। सम्मतवत्। विमताः महान्तः। बहुगुणोपासनयोग्यत्वरूपमाहात्म्यवत्त्वादिति।

१. क. फलनिर्णयस्य चोपयोगादर्शनेन।

२. 'महतामिति' इति पाठेन भाव्यमिति भाति।

सङ्क्षेपभाष्यस्यैतदधिकरणसङ्गतत्वेन व्याख्यानम्

एवं तदित्यावर्तनीयम्। तत् तत्र हरौ भक्तिर्येषां ते तद्भक्तयः ब्रह्मादयः। तेषां तारतम्येन तद्भगवदुपासनं विमुक्तिदम्[२]। तेनैव तत् तारतम्यं च भवतीति 'तद्भक्तितारतम्येन तारतम्यं विमुक्तिदम्' (अणुभाष्यम्.३) इति सङ्क्षेप-भाष्यमपि व्याख्यातं वेदितव्यम्।

॥ इति सर्वाभेदाधिकरणम्॥ ४॥

२. क. विमुक्तिगम्।

॥ अथ आनन्दाद्यधिकरणम्॥ ५॥

॥ सूत्रभाष्यम् ॥

सर्वेषां मुमुक्षूणां कियन्नियमेनोपास्यमित्यत[१] आह -

॥ ॐ आनन्दादयः प्रधानस्य ॐ ॥ ३-३-१२ ॥

प्रधानफलस्य मोक्षस्यार्थे आनन्दो ज्ञानं सदात्मेत्युपास्य एव।

'सच्चिदानन्द आत्मेति ब्रह्मोपासा विनिश्चिता।
सर्वेषां च मुमुक्षूणां फलसाम्यादपेक्षिता॥'

इति ब्रह्मतर्के॥ १२॥

॥ इत्यानन्दाद्यधिकरणम्॥ ५॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनाशेषमुमुक्षुसाधारणगुणोपासनस्य निर्णीयमान-त्वादस्ति शास्त्रादिसङ्गतिः। अनिर्णये तूपासनामात्रोच्छेदप्रसङ्गात् तन्निर्णेत-व्यम्। प्रकृतभगवद्गुणा एव विषयः। किं सर्वमुमुक्षूपास्याः सङ्ख्यानिर्देशाभ्यां क्लृप्ताः पृथक् सन्ति न वेति सन्देहः। पूर्वोक्तिर्विशेषानुक्तिश्च सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **सर्वेषामिति**॥ न सर्वमुमुक्षूपास्याः सङ्ख्यानिर्देशाभ्यां क्लृप्ता गुणाः पृथक् सन्ति। यदि भवेयुस्तर्हि ते के कियन्तश्चेति वक्तव्याः। यदि

१. ह. इत्याह।

चतुःपञ्चषा आनन्दादय इत्युच्यन्ते, तर्हि केषाञ्चित् समुच्चयेऽन्येषामपि समुच्चय-प्रसङ्गेन नियमासम्भवात्। एवं न निर्देशक्लृप्तिः, नैतेऽन्य एवेत्यपि वक्तुं शक्य-त्वात्। अतः सर्वैर्मुमुक्षुभिर्नियमेनोपास्यगुणानिर्णयान्न कस्याप्युपासनोप-पत्तिरिति भावः।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- अत आहेति ॥ सन्ति सङ्ख्यानिर्देशाभ्यां क्लृप्ताः सर्वमुमुक्षुभिः सर्वथोपास्या गुणा आनन्दायश्चत्वारो न त्वधिकाः। सर्वमुमुक्षूणां तदधिकोपासनेऽसमर्थत्वात्। न च निर्देशविपर्ययः। उपासनस्याऽनन्दादिरूपमोक्षार्थत्वात्। अपेक्षितफलानुसारेणैवेश्वर-स्योपास्यत्वात्। 'तं यथा यथोपासते तदेव भवति' इति श्रुतेरिति भावः। अत्र स्मृतिं चाऽह- सच्चिदिति ॥ सत्त्वं निर्दोषत्वम्। तच्च ज्ञानानन्दौ च सर्वापेक्षितं फलम्। आत्मपदोदितस्वामित्वं तु स्वसम्बन्धानुस्मरणस्य भगवत्प्रीतिसाधनत्वादुपास्यम्। तच्च चतुर्थे वक्ष्यत इति। अतः सर्वोपास्य-गुणनिर्णयाद् युक्तमुपासनमिति सिद्धम्॥१२॥

॥ इत्यानन्दाद्यधिकरणम्॥ ५॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ आनन्दादयः प्रधानस्य ॐ ॥ ३-३-१२ ॥

सर्ववेदार्थपरिज्ञानम्, उपसंहारोऽनुपसंहारः, तयोरधिकारभेदेना[1]विरोधः, उपसंहरणप्रयोजकफलातिशयश्च चतुर्भिरधिकरणैः प्रागुक्ताः। ते च, [2]पश्चाधि-करण्योक्तं गुणपूर्णत्वजगत्कारणत्वाशेषागमसमन्वयादिकं प्रथमद्वितीयाभ्या-

१. म. अधिकारिभेदेन। २. म. पश्चाधिकरणोक्तम्।

मध्यायाभ्यां, तृतीयस्य द्वितीयादिना च यथा विवरणमपेक्षन्ते, तथा च सामा-न्यतोऽशत्रययुक्ता भावना लिङादिना प्रतीता अपि प्राकरणिकाङ्गवाक्य-जातैस्तथा विवरणमपेक्षन्ते। अविवृतानां च तेषां सम्यक्प्रवृत्त्यनौपयिकत्वेना-नुक्तप्रायत्वात्। 'सङ्क्षेपविस्तराभ्यां च कथयन्ति मनीषिणः' (भा.ता. स्क.११) इत्यादिनाऽऽचारफलाधिक्ययोः सूचनाच्च। तदिदं विवरणमापादं क्रियत इति तावदेका पेटिका। तत्तदधिकरणानां सङ्गतिर्विवरणप्रकारश्च तत्तदधिकरणेषु प्रदर्शयिष्यते।

सङ्गतिः चिन्ताक्रमश्च

तत्रास्याधिकरणस्य पूर्वेण का सङ्गतिः? पूर्वपेटिकोक्तं स्वस्वयोग्यतानुसारेण सर्वोपसंहारतदभावबहुगुणोपसंहारादिकमयुक्तम्। स्यात् तदा युक्तं, यदि सर्व-साधारणगुणाः सङ्ख्यानिर्देशाभ्यां क्लृप्ताः स्युः। योग्यतानिर्णयात् पूर्वं तेषा-मुपास्यत्वसम्भवात्। नच तथा क्लृप्ता इति शङ्कनात्, प्राप्तिनयविवक्षितभवि-ष्यत्पर्ववचनोक्तं 'मानुषैः कैश्चिदेव तु' (म.भा.भविष्यत्पर्व) इत्येतद्युक्तम्। यावद्विशेषशून्यस्य सामान्यस्यालीकत्वादिति शङ्कनाद्वाऽऽक्षेपिकीति गृहाण। अत एव प्रकृता मनुष्योपास्या गुणाः किं सङ्ख्यानिर्देशाभ्यां क्लृप्ता न वा, तदर्थं क्लृप्तौ नियामकमस्ति न वा, तदर्थं किं मोक्षः निर्दोषज्ञानानन्दाभिव्यक्तिरूप उतानेवंरूप इति चिन्तनीयम्।

पूर्वपक्षः

तत्र साधारणा ह्येत इति काप्यविधानतः।
क्लृप्तिर्नैवोपपद्येत मुक्तित्वं त्वन्यथोच्यते॥

यद्येकस्मिन् वाक्ये प्रकरणे वा मालारूपेण साधारण्येन केनचिज्ज्ञापक-विशेषेण प्रज्ञाप्यमानाः केचिद् गुणा उपलभ्येरन् तदा निर्णयः सुशकः स्यात्। नैतदस्ति। इह विवक्षितानां गुणानां नानाप्रकरणादिस्थत्वात्। तथाऽपि मुक्तौ

सर्वसाधारण्येनानुभूयमानानां दुःखादिदोषाभावानन्दादीनां[१] तथोपासनामन्तराऽयोगेन विक्षिप्योक्तानामपि फलसाम्यसिद्ध्यर्थं त्रयाणामेषां तावत् सर्वसाधारण्यप्रतिपत्तिरिति चेन्न। मुक्तेरनेवंविधत्वात्। अन्यथाऽपुरुषार्थतापातात्। बुद्धिसुखादीनां गुणानामत्यन्तोच्छित्तेरेवानर्थहानित्वेन मुक्तित्वात्। सुखे हि दुःखं दुर्वारम्। सुखदुःखयोरितरेतरव्याप्तत्वात्।

किञ्चादृष्टनिमित्तानां बुद्ध्यादीनां विशिष्टज्ञानयोगेनादृष्टोच्छेदादुच्छित्तिरेवाऽश्रयितुं न्याय्या। नच सुखानुभवाभावे तत्र प्रवृत्त्यनुपपत्तिः। दुःखनिवृत्त्यर्थं तदुपपत्तेः। तथाच- मोक्षः सुखहीनः। दुःखहीनत्वात्। वैधर्म्येण संसारवत्। दुःखाभावस्य मोक्षे सम्भवात् फलसाम्याय तावन्मात्रोपासनस्य युक्तत्वेऽपीतरेषां तदयोगाच्च। आत्मपदोक्तस्य स्वामित्वस्य मुक्तौ प्रसक्त्यभावेन तदुपासनायाः कथञ्चिदप्यनिर्वाहाच्च। अस्तु वा दुःखनिवृत्तिः सुखानुभवश्च मोक्षे, तथाऽपि तदुपासनस्य स्वतो जडत्वेनाप्रयोजकत्वात्। गुणान्तरोपासनया प्रसन्नो भगवानेव दुःखं निवर्तयति, सुखं च भोजयतीत्युपपत्तौ किमनेन गुणविशेषणान्वेषणेन? फलसाम्यात् तदावश्यकमिति चेन्न। मुक्तावसतः स्वामित्वस्योपासनाङ्गीकारात्। सुषुप्तिप्रलयवद् दुःखनिवृत्त्याऽऽनन्दानुभवादेरुपासनामन्तरेणापि सम्भवेनोपासनामुक्त्योः साध्यसाधनभावस्यैवानुपपत्तेश्चेति पूर्वः पक्षः।

सिद्धान्तः

मुक्तौ सन्ति सुखाद्यास्तु गुणाः सर्वेषु चेतृषु।
अन्यथा मुक्तिरेव स्यात् पुंसामाकाङ्क्षितोज्झिता॥

न तावत् सुखज्ञानादीनामभावो मोक्षे मन्तव्यः। तदभ्युपगमे बाधकाभावात्। तदसत्त्वे प्रमाणाभावाच्च। यच्चानुमानमुत्प्रेक्षितं तदीश्वरेऽनैकान्तम्। 'आनन्दं ब्रह्मणो विद्वान्' (तै.उ. २.४), 'आनन्दो ब्रह्मेति व्यजानात्' (तै.उ. ३.६), 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ३.९.३४) इत्यादिश्रुतेः पूर्णानन्दत्वादीश्वरस्य। 'निरनिष्टो निरवद्यः', 'अपहतपाप्मा विजरो विमृत्युः विशोकः योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' (छा.उ. ८.७.१३) इत्यादेर्निर्दुःखत्वाच्च। सुखदुःखयोरितरेतरव्याप्तिरित्यस्य वाङ्मात्रत्वात्। 'ब्रह्मेति यद् विदुरजस्रसुखं विशोकम्' इति वचनाच्च। 'यत्र कामा निकामाश्च', 'यत्राऽनन्दाश्च मोदाश्च', 'सर्वे नन्दन्ति', 'दुःखाद् विमुक्त आनन्दीभवति', 'तरति शोकमात्मवित्' (छा.उ. ७.१.३) इत्यादिश्रुतिभ्यो मोक्षे निर्दुःखसुखाधिगमाच्च बाधः। अप्रवृत्तिश्चान्यथा। पुरुषार्थत्वाभावात्। दुःखनिवृत्तिः पुरुषार्थ इति चेत्। सत्यम्। अनुभूयमाना दुःखनिवृत्तिः पुरुषार्थः, न तु स्वरूपसती। अन्यथा शिलादिवदचेतनत्वं स्यात्। नह्यचेतनत्वप्राप्तिः पुरुषार्थ इति मतिमन्तो मन्येरन्। 'मग्नस्य हि परेऽज्ञाने किं नु दुःखतरं भवेत्' (म.भा. मोक्षधर्मवचनम्) इति ज्ञानाभावनिन्दाश्रवणाच्च। दुःखनिवृत्तिरेव पुरुषार्थः। न तु तज्ज्ञानपर्यन्तमपि। दुःखनिवृत्तिमात्रस्येच्छाविषयत्वात्। अत एवेच्छन्ति दुःखं सोढुमक्षमाः दुःखनिवृत्त्युपायं सुप्त्यादिकमिति चेन्न। सुखानुभवार्थत्वात् सुप्तीच्छायाः। अत एव च सुप्त्युत्थितेन 'सुखमहमस्वाप्सम्' इति सुखानुभवोऽनुस्मर्यते। तथाच दुःखनिवृत्तेरिच्छाविषयत्वाभावान्न पुरुषार्थत्वम्। 'सुखमहमस्वाप्सम्' इति दुःखनिवृत्तौ सुखव्यवहारमात्रम्। भारार्तानां तदवरोहणेन दुःखनिवृत्तावपि 'सुखीदानीं संवृत्तोऽस्मि' इत्यादिवदिति चेत्। तर्हि सुप्तौ दुःखनिवृत्त्यनुभवः स्वयमेव स्वीकृतः। अन्यथाऽननुभूयमानायां दुःखनिवृत्तौ सुखव्यवहारस्याप्ययोगात्। तथाचाऽगतं दुःखनिवृत्त्यनुभवपर्यन्तत्वं पुरुषार्थत्वस्य।

नच दुःखाभाव एव सुखमिति वक्तुं शक्यम्। प्रतियोग्यनिरूप्यत्वात्।

१. म. दुःखादिदोषाभावानन्दज्ञानानाम्।

सुखाभाव एव दुःखमित्यापाताच्च। तस्मात् सुखानुभवाभावे प्रवृत्त्यप्रसङ्गाच्छ्रुतिबलाच्च मोक्षे सुखानुभवोऽभ्युपगन्तव्यः । दुःखाभावः पुरुषार्थ एवेति त्वयैवाभ्युपगतम्। ततश्च मोक्षे निर्दुःखसुखानुभवसिद्ध्यर्थ[१]मानन्दादयश्चत्वारो गुणा उपास्या एव। निर्दोषत्वं च सत्त्वमेव। नहि सुखानुभवमात्रं मोक्ष उच्यते। संसारे तत्सम्भवात्। किन्तु निर्दोषसुखानुभवो मोक्षः। स च 'तं यथा यथोपासते', 'प्रतिमुखस्य यथा मुखश्रीः' (भाग. ७.९.११) इत्यादिना तथोपास्तिर्लभ्यत इति फलसाम्यसिद्ध्यर्थं चतुष्कमप्युपासनीयम्।

तथाऽपि निर्दोषत्वमानन्दो ज्ञानं चेति त्रिकमेवोपास्यं युक्तम्। मानुषादिब्रह्मान्तानां निर्दोषसुखानुभवस्वीकारात्। स्वामित्वं तु कथमुपास्यम्? तस्य मुक्तौ 'स्वकीयावरयन्तृता' इत्यादिनाऽधिकारिविशेषनिष्ठत्वावगमेन सर्वसाधारण्याभावात्। तथाच तस्य साधारणमुक्त्यप्रवेशेन तदुपासने वैयर्थ्यप्रसङ्गः। उच्यते। यद्यपि त्रिकमेव साधारणम्। तथाऽपीश्वरप्रसादेनैव तल्लभ्यम्। न पुनः साधनशतोपनिपातेनापीत्युक्तम्। वक्ष्यते च। स च प्रसादः स्वकृतोपकारानुस्मर्तरि राज्ञ इव भगवतोऽप्युपासके भवतीत्युपगन्तव्यम्। स्मर्यते च वाराहे पुराणे क्षेत्रखण्डे कृतज्ञताया महाधर्मत्वं कृतघ्नतायाश्चाधर्मत्वम्।

'नेतोऽधिका सुकृतात्माऽस्ति लक्ष्मीः
महात्मनां या कृतज्ञत्वरूपा।
तथा नैतदधिका पातकश्रीः
कृतहत्या कुधियां या च देवाः॥' (वराहपुराणम्)

इति देवान् प्रति सरस्वतीवचनात्। महात्मनां सम्बन्धिनी या कृतज्ञत्वाख्या सुकृतात्मा लक्ष्मीः सुकृताभिमानिनी रमा, नेतोऽधिका सुकृतात्मा लक्ष्मीर्नास्त्येव। कृतज्ञत्वादधिकं सुकृतं नास्तीति यावत्। तथा या कुधियां कृतहत्या

१. क. निर्दोषसुखानुभवसिद्ध्यर्थम्।

कृतघ्नताश्रीः कृतघ्नताभिमानिनी चालक्ष्मीः, ततोऽधिका पातकश्रीः पातकाभिमानिनी अलक्ष्मीर्नास्त्येव। कृतघ्नत्वादधिकं पातकं नास्तीत्यर्थः। तथाऽन्यत्रापि -

'कीदृशः स विधिर्ब्रह्मन् येनाऽसीत्नः कृतघ्नता।
यद्वा कृतघ्नशास्त्रत्वं शास्त्राणां कीदृशं मतम्॥' (स्कान्दपुराणम्)

इति स्वहतगोनिर्मातृद्विजपृष्टस्य गौतमस्य,

'इन्द्रियाणीन्द्रियार्थाश्च कृता येन महात्मना।
तस्मै ताननिवेद्यैभिर्यदात्मसुखगृध्नुता॥

स विधिर्दुष्कृतात्मोक्तो येन देवप्रकोपतः।
जातया वस्त्वनावृष्ट्या वृत्तमागमनं त्विह॥

इहाऽगतानामपि वस्तेनैव विधिना द्विजाः।
जातेन्द्रियैकरतता तदासीद् वः[१] कृतघ्नता॥

यो वै करोत्यवत्येतज्जगद् विश्रमयिष्यति।
तदर्चा लुप्यते येषु सा शास्त्रेषु कृतघ्नता॥

तृष्णाहम्ममतार्हेषु तज्जयाल्पतया परे।
ये चाहंममताबुद्धिं तज्ज्ञा एव वितन्वते॥

प्रजापतिः पशुपतिरहं वाचस्पतिस्त्विति।
ते कृतघ्नास्तदर्चाढ्यं तत् कृतघ्नानुशासनम्॥' (स्कान्दपुराणम्)

इत्यादिवचनं कृतज्ञतायाः कृतघ्नतायाश्च महापुण्यापुण्यत्वमाह। भगवत्प्रेरितैरिन्द्रियैः सुखं मम [२]भवतीत्यननुसन्धाय स्वात्मप्रेरितैरेव मम सुखं भवतीत्य-

१. म. वा।   २. म. अनुभवति।

नुसन्धानमात्मगृध्नुता। येन दुष्कृतेन विधिसञ्ज्ञेन तु जातेन भगवत्प्रकोपतः जातयाऽनावृष्ट्या इन्द्रियैकरतता इन्द्रियाण्यस्य वश्यान्येवेति बुद्धिमत्ता। यो भगवानेव तज्जगत् करोत्यवति विश्रमयिष्यति च तस्य पूजनं येषु शास्त्रेषु न कर्तव्यमित्युच्यते सा शास्त्रेषु कृतघ्नता। ये जनाः भगवज्जन्यत्वात् तत्पाल्यतया च परमेश्वरस्य तृष्णाहम्ममतार्हेष्विच्छादिविषयेषु स्वात्मदेहगेहादिषु स्वयं च भगवज्जाता एव सन्तः प्रजापतिः पशुपतिर्वाचस्पतिरहमित्यादि ममताबुद्धिं स्वात्मस्वामिताबुद्धिं कुर्वते ते कृतघ्नाः। प्रजापत्यादिपूजाविधायकं यच्च शास्त्रं तत् कृतघ्नशास्त्रमित्यर्थः। तथाच साक्षान्मोक्षसाधनप्रसादस्यान्तरङ्गत्वात् स्वामित्वमप्युपास्यमेव। नच जगत्कर्तृत्वादिकमपि स्मर्तव्यम्। उपकारस्मृति-रूपत्वादिति वाच्यम्। प्रियशिरस्त्वादिन्यायेन स्वामित्व एवान्तर्भावात्। सुषुप्तिप्रलयादौ तथोपास्त्यभावेऽपि निर्दोषसुखानुभवदर्शनान्न तथोपास्त्यधीनत्वं फलस्येति चेन्न। सांसारिकादनन्तगुणत्वान्मौक्तिकस्यास्पष्टतयाऽनुभवस्य सुप्त्यादौ तदधीनत्वादर्शनेऽपि स्पष्टस्य तदधीनत्वावश्यम्भावात्। यद्यपि भगवद्दर्शनं तत्सम्बन्धश्च सुप्त्यादावस्ति। तथाऽपि सभक्तिकत्वाभावेन तस्या-प्रयोजकत्वादिति सिद्धान्तः।

सूत्रार्थः

प्रधानस्य मोक्षस्य सिद्ध्ये **आनन्दादयः** चत्वारोऽप्युपास्या इत्यनुमान-प्रमाणोपन्यासपरतया सूत्रार्थष्टीकायामेव व्यक्तोऽनुसन्धेयः।

टीकाक्षरार्थः

समुच्चयन्यायस्य यथाटीकं व्याख्यानम्

टीकाक्षरार्थस्तु - **समुच्चय** इत्युक्तन्यायमापाद्यापादकोक्तिपरतया विवृण्वत् **'आनन्दादीनां केषाञ्चित् समुच्चये प्राप्ते सर्वगुणसमुच्चयः सर्वेषां स्यादिति न मन्तव्यम्'** (न्या.वि. ३.५) इति वाक्यं साक्षादिह पूर्वपक्षे सङ्गतं न भवति।

तथाच भाष्योक्तकक्ष्यां साक्षात् सङ्गतत्वेनाऽदावभिधाय ततः सिद्धान्तकक्ष्यां चाध्याहृत्य तदुत्तरत्वेन विवरणं योज्यतामिति मन्वानः पूर्वपक्षं रचयति - **न सर्वमुमुक्षूपास्याः सङ्ख्येति ॥** अनेन केषाञ्चिदधिकारिणामानन्दादीनां चतुःपञ्चषाणां समुच्चयेऽङ्गीकृते सर्वेषामप्यधिकारिणां चतुर्मुखवत् सर्वेऽपि गुणाः समुच्चयेनोपास्या भवेरन्। तथाच चतुःपञ्चषा इति आनन्दादय इति च सङ्ख्यानिर्देशाभ्यां नियमासम्भवात्, सर्वमुमुक्षूपास्याः न सङ्ख्यानिर्देशाभ्यां क्लृप्ता इति भाष्येणैकवाक्यतया विवरणव्याख्यानं सूचितम्।

अल्पशक्तित्वन्यायस्य व्याख्यानम्

अल्पशक्तित्वन्यायं सम्बन्धिप्रदर्शनपूर्वकं विवृण्वत् **'अल्पशक्तित्वात् तेषां पुंसाम्'** (न्या.वि. ३.५) इति वाक्यं **'आनन्दो ज्ञानं सदात्मेत्युपास्या एव'** (ब्र.सू.माध्वभाष्यम् ३.५) इति भाष्यं योजयित्वा ततो योज्यमित्यभिसन्धिः। सिद्धान्तमाह- **सन्ति सङ्ख्येति ॥** सर्वथोपास्या इत्यनेनैवकारः स्वस्थानतो व्याख्यातः। चत्वारो न त्वधिका इति भिन्नक्रमोऽपि व्याख्यातः। तत्र हेतुसमर्पकत्वेन विवरणं योजयति- **सर्वमुमुक्षूणां तदधिकोपासनासमर्थत्वा-दिति ॥** अनेन चतुर्मुखेतरेषां पुंसां सर्वगुणसमुच्चयप्रापकसर्वशक्तेरभावेनाऽ-पादकाभावान्नेदमापादनं युज्यते। कतिपयगुणसमुच्चयस्य कतिपयराज्याधि-कारिणि सर्वराज्याधिकारादर्शनेन सर्वगुणसमुच्चयं प्रत्यप्रयोजकत्वेन तस्य तदनापादकत्वादिति व्याख्यातं भवति। सौत्रप्रधानस्येति पदवैयर्थ्यपरिजिहीर्षया तन्निवर्त्याशङ्कामाह- **नच निर्देशविपर्यय इति ॥**

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

अत्र सङ्क्षेपभाष्यम् -

'सच्चिदानन्द आत्मेति मानुषैस्तु सुरेश्वरैः।
यथाक्रमं बहुगुणैर्ब्रह्मणा त्वखिलैर्गुणैः॥

उपास्यः सर्ववेदैश्च सर्वैरपि यथाबलम् ।
ज्ञेयो विष्णुर्विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम् ॥'
(अणुभाष्यम् ३.५-६) इति ।

तत्र तुशब्दः एवार्थः इतिशब्देन सम्बद्ध्यते । सच्चिदानन्द आत्मेत्येवोपास्यो न त्वधिकैर्गुणैः । सर्वेषां महाशक्त्यभावात् । विरिञ्चेतरेषामल्पशक्तित्वाच्च । तर्हि बहुगुणोपासनलोप आपद्येत । ततस्तत्राधिकारिविशेषमाह-**मानुषैरिति ॥** अनेन विवरणमपि मनुष्यविषयं व्याख्यातम् । ननु कुतोऽयं सङ्कोचः? अल्पशक्तित्वाविशेषात् । मनुष्येतरेषामपि चतुर्गुणा एवोपास्याः किं न स्युस्तत्राऽऽह- **सुरेश्वरैर्यथाक्रमं बहुगुणैरिति ॥** तस्यार्थः- यतो विष्णुः 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०)इति स्वस्वयोग्यतानुसारेण बहुगुणैरुपास्योऽभिहितः, अतस्तद्विरोधपरिहाराय मानुषैरेवेति सङ्कोचः कार्य इति भावः । तर्हि चतुर्मुखस्यापि सुरेश्वरत्वाद् बहुगुणोपासनमेव, न सर्वगुणोपासनम् । तथाचोपसंहारनयविरोधस्तत्राऽऽह- **ब्रह्मणा त्वखिलैर्गुणैरिति ॥** सुरेश्वरेष्वपि चतुर्मुखस्य विशेषस्तुशब्दार्थः । बहुभिरेव गुणैः सुरेश्वरैरुपास्यो, न त्वखिलैर्गुणैरित्यवधारणार्थो वा । तर्हि विष्णोः परिच्छिन्नत्वमापन्नम् । तत्राऽऽह- **सर्ववेदैश्चेति ॥** सर्ववेदोक्तैरखिलैरेव गुणैर्ब्रह्मणोपास्यः । न तु निर्मर्यादाखिलैर्गुणैरिति तस्यार्थः । वेदानामप्यनन्तत्वात् तदुक्तानामशेषाणां गुणानां कथं चतुर्मुखोपास्यत्वमिति शङ्कां कैमुतिकन्यायेन परिहरति- **सर्ववेदैश्च सर्वैरपि यथाबलं ज्ञेय इति ॥** विरिञ्चेतरसर्वेऽपि यथाबलं यथायोग्यं सर्ववेदैरुक्तगुणगणान् जानन्तीति सर्ववेदाधिकरणे प्रतिपादितम् । 'अशक्योत्तारणत्वेऽपि ह्यागमापारवारिधेः' इत्यादिनाऽन्यत्र भगवत्प्रणीतनिर्णायकशास्त्रानुसारेण सर्वेषामपि सर्ववेदार्थज्ञानं सुसम्पाद्यम् । यथाबलमित्युक्तम् । तदा महाबलस्य ब्रह्मणस्तदनुसारेणानन्तानामपि वेदानामर्थं उपासितुं योग्यो भवतीति किमु वक्तव्यमिति तस्यार्थः ।

तर्हि विरिञ्चेतरेषां सर्वज्ञानवत् सर्वोपास्तिरपि किं न स्यात् ? तत्राऽऽह- **विशेषस्तु ज्ञाने स्यादुत्तरोत्तरमिति ॥** स्पष्टत्वास्पष्टत्वाख्यो विशेष उत्तरोत्तरं ज्ञानेऽङ्गीकर्तव्यः । उपसंहारश्च स्पष्टप्रतिभासमन्तरा नोपपद्यत इत्युक्तम् । तत्रैषां विशिष्टबुद्ध्यादिमतां निर्णायकशास्त्रात् सर्ववेदार्थज्ञानसमये स्पष्टप्रतिभानं, तेषामेवोपसंहारः प्राप्नोति, न त्वितरेषाम् । ब्रह्मणस्तु सर्वेऽपि गुणाः वेदोक्ताः स्पष्टं प्रतिभासन्त इति तस्यैव तत्प्राप्तिर्नान्येषामिति व्याख्यानेनैतदधिकरणतात्पर्यं प्रसङ्गादुक्त्वाऽऽवृत्त्या पूर्वाधिकरणानां च तात्पर्यं कथितमपि स्पष्टमत्रापि कथितमिति ज्ञातव्यम् ।

एतधिकरणफलितम्

अत्र 'सर्वाभेदादन्यत्रेमे' (ब्र.सू. ३.३.११) इति सूत्रे सर्वमुमुक्षुसाधारणमुक्तिरूपफलाद् विलक्षणेऽधिकफले ब्रह्मादयो भवन्तीत्युक्तविलक्षणफलमेव तद्वैलक्षण्यप्रतियोगिनिरूपणेन विवृतमिति वा, 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०) इति सूत्रोक्तप्राप्तिरेवाधिकारिविशेषालिङ्गितत्वप्रदर्शनेन विवृतेति वा फलितम् । अत्र 'प्रधानस्य' इत्युक्त्या मानुषाणामितरगुणैः समुच्चयो नोपपद्यते । अन्यथा मुक्तावपि गुणान्तरानुभवस्य समुच्चयः स्यात् । नच तत् सम्भवति । अल्पशक्तित्वादिति युक्तिसूचनेन समुच्चयन्यायोऽल्पशक्तित्वन्यायश्च सूचित इति युक्तः न्यायमालायां तयोः सङ्ग्रह इत्यादिकमूह्यम् ।

॥ इत्यानन्दाद्यधिकरणम् ॥ ५ ॥

॥ अथ प्रियशिरस्त्वाधिकरणम् ॥ ६ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॐ ॥
॥ ३-३-१३ ॥

फलभेदार्थमुपचयापचययोर्भावान्न सर्वेषां प्रियशिरस्त्वादिगुणोपासाप्राप्तिः।

'नैव सर्वगुणाः सर्वैरुपास्या मुक्तिभेदतः।
विरिञ्चस्यैव यन्मुक्तावानन्दस्य सुपूर्णता॥'
इति वाराहे[1] ॥ १३ ॥

॥ इति प्रियशिरस्त्वाधिकरणम् ॥ ६ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासने प्रियशिरस्त्वादिगुणानां साधारण्यनिरासादस्ति शास्त्रादिसङ्गतिः। साधारण्ये तूक्तबाधप्रसङ्गान्निरसनीयमेतत्। भगवद्गुणान्तर्गताः प्रियशिरस्त्वादिगुणाः श्रूयन्ते- 'तस्य प्रियमेव शिरः' (तै.उ. २.९) इत्यादौ। त एवात्र विषयः। किं सर्वमुमुक्षूपास्या न वेति सन्देहः। द्विविधगुणप्रतीतिः सन्देहबीजम्।

पूर्वपक्षः

सर्वोपास्या इति पूर्वः पक्षः। प्रियशिरस्त्वादीनामानन्दादिविशेषत्वा-

१. ह्. इति हि वाराहे।

दानन्दादीनां च सर्वोपास्यत्वात्। अन्यथाऽऽनन्दादेः सम्यगनुपासनेनामुक्तिप्रसङ्गात्। अतः प्रियशिरस्त्वादीनां सर्वोपास्यत्वान्न चत्वार एवेति नियम इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **प्रियेति ॥** नाऽनन्दादिविशेषत्वेन सर्वेषां प्रियशिरस्त्वादिगुणोपासनयोग्यता वक्तव्या। विशेषावलम्बनेनोपासने सर्वेषां सर्वगुणोपास्तिप्रसङ्गात्। सर्वगुणानामपि गुणचतुष्टयविशेषत्वस्य वक्तुं शक्यत्वात्। नच सर्वेषां सर्वगुणोपास्तिरस्त्विति वाच्यम्। आनन्दश्रुतिसिद्धफलभेदसिद्ध्यर्थं गुणोपासनेऽपि तारतम्यस्यापेक्षितत्वादिति भावः। अत्रैव स्मृतिमाह- **नैवेति ॥** नच प्रियशिरस्त्वाद्यनुपासने मोक्षाभावः।

'यथायोग्यं गुणपूगानुपास्य फलं भवेन्मुक्तिगं नैव चान्यत्।
नित्यैकाग्र्यव्यङ्ग्यताहेतुतश्च साक्षाद् दृशिर्नो तद्विशेषैः स्मृतेश्च॥'

इति (न्या.वि.उदा.) श्रुतेर्विशेषानुपासनेऽपि योग्यगुणोपासनेनैव फलप्राप्तेः। अतः प्रियशिरस्त्वादीनामसाधारण्याच्चत्वार एव सर्वोपास्या इति सिद्धम्॥१३॥

॥ इति प्रियशिरस्त्वाधिकरणम् ॥ ६ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॐ ॥
॥ ३-३-१३॥

आपवादिकी अथवा आक्षेपकी सङ्गतिः, पेटिकासङ्गतिश्च

साधारण्यमुत्सृष्टमिति[1] अपोद्यत इति आपवादिकी वा प्रियशिरस्त्वादी-

१. म. उत्सर्जनमिति।

नामानन्दप्रभेदत्वेन निर्दोषानन्दानुभवरूपे मानुषफलेऽन्तर्भावात् प्रधानस्य फलस्य सिद्धयर्थं तदुपसर्जनभूतोपासनस्यापि तद्विषयत्वावश्यम्भावेन तेषामप्युपासनं स्यादिति पूर्वसिद्धप्रधानसाम्ययुक्तिमुपजीव्य प्रवर्तनादाक्षेपिकी सङ्गतिः । अन्यत्रेत्युक्तवैलक्षण्यप्रतियोगिमानुषमुक्तिस्वरूपादिविवेचनाच्च विवरण-पेटिकासङ्गतिरपि।

चिन्ताक्रमः

तत्र प्रियशिरस्त्वादिकं सर्वसाधारणं न वा। तदर्थं तदुपासनेन फले उप-चयोऽस्ति न वा । तदर्थमुपचितफलभोगे योग्यता साधारणी न वेत्यादि चिन्तनीयम्।

पूर्वपक्षः

आनन्दादिविशेषत्वात् प्रियादीनामुपासना।
कर्तव्यैवान्यथाऽऽनन्दोपास्तिः सम्यङ् न सिद्धयति॥

नात्र पूर्वाधिकरणोक्तं गुणचतुष्टयं यथाकथञ्चिदुपास्यं साधारणम्। 'भूम्नः क्रतुवज्ज्यायस्त्वम्' (३-३-५९) इति वक्ष्यमाणन्यायविरोधात्। किन्तु 'पूर्णानन्दः पूर्णज्ञानः' इत्यादिना पूर्णत्वादिविशेषणविशिष्टतयैवाभिप्रेतम्। तस्य पूर्णस्याऽनन्दमयस्य विशेषा उच्यन्ते। 'तस्य प्रियमेव शिरः' (तै.उ. २.९) इत्यादितैत्तिरीयाणामाम्नानात्। तेऽपि चतुर्णां गुणानां साकल्येनोपासनीय-त्वादुपसंहर्तव्या एव। अन्यथा सम्यगनुपासनात् ततोऽपि मुक्तिरप्यसम्यगेव स्यात्। नच तथोपासनं निष्फलम्। आनन्दोपचयसद्भावात्। अन्यथा कस्यापि न तदुपासनं प्राप्येतेति तदेकफलं तदाम्नानं व्यर्थं स्यात्। नचोपचयः सर्वेषां नाऽकाङ्क्षितः, विशिष्टफलत्वादिति पूर्वः पक्षः।

सिद्धान्तः

प्रियाद्युपासनायां न सर्वेषामधिकारिता।
यतस्तत्फलमन्येषामयोग्यं श्रुतिचोदनात्॥

यद्यपि विशिष्टफलत्वान्मौक्तिकानन्दोपचये सर्वेषामाकाङ्क्षा सम्भाविता। तथाऽपि 'अयोग्यमिच्छन् पुरुषः पतत्येव न संशयः' इत्यागममावर्तयतां सात्त्वि-कानां कथं तत्रेच्छोत्पत्तुमर्हति। अन्यथा सर्वेषामपि सर्वेषु फलेष्वाकाङ्क्षोदयेन तत्सिद्धये सर्वगुणोपसंहारोऽपि स्यात्। तदेव तेषां सम्यगुपासनमिति मुक्ता-वभावाच्च स्यादेव ततः सम्यङ्मुक्तिः। ततो युक्तमुक्तं चतुर्गुणा एव साधारणा इति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु - 'आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा' (तै.उ. २.९) इति सर्वोपास्यानन्द-सहाम्नातानां **प्रियशिरस्त्व**मोददक्षिणपक्षत्वप्रमोदोत्तरपक्ष-त्वादीनामानन्दाद्युपासनायामवर्जनीयत्वेऽपि साधारण्येन **अप्राप्तिरेव** युक्ता। **हि** यस्मात् भिद्यत इति **भेदः** फलम्। उपासनायां प्रियादिप्राप्त्यप्राप्तिभ्यां तत्फले **उपचयापचयौ** वृद्ध्यवृद्धी भवेताम्। मनुष्याणां चोपचयायोग्यत्वात् तत्फलको-पासनाद्यप्राप्तिः, तद्योग्यानामेव तत्प्राप्तिरिति।

यद्वा, एकैकस्मिन्नपि गुणे विशेषाणां प्रियादीनामुपचयापचयौ, **भेदे** फले भवतः। फलतारतम्यार्थं भवत इति यावत्। अपचयः फलमात्राय भवति, न फलाभावाय। उपचयस्त्वधिकफलाय भवति। अवराणां फलमात्रसद्भावेऽपि अधिकफलाभावान्नाऽनन्दविशेषोपास्तिः प्राप्यत इति।

टीकायां विशेषदर्शनाख्यपूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु - विशेषदर्शनन्यायं सम्बन्धिसाध्यप्रदर्शनाभ्यां भावप्राधान्येन विवृण्वत् **'प्रियशिरस्त्वादीनामानन्दविशेषत्वेनैव दर्शनात् तेषामपि सर्वोप-संहार्यत्वमिति न मन्तव्यम्'** (न्या.वि.) इति वाक्यं व्याचष्टे- **प्रियशिरस्त्वा-दीनामिति**॥ तथा दर्शनं तत्र प्रमाणमिति भावः। तेषामपीत्यादि व्याचष्टे - **अन्यथाऽऽनन्दादेरिति**॥

टीकायां यथायोग्यफलाख्यसिद्धान्तन्यायविवरणव्याख्यानम्

यथायोग्यफलमित्युक्तन्यायं यदत्र पूर्वपक्षिणा स्वपरपक्षयोः साधकं बाधकं चोक्तं, तत्र भाष्ये सूत्रव्याख्यानेन साधकं दूषितम्। बाधकमनेनोद्ध्रियत इत्यभिप्रेत्य सप्रमाणं विवृण्वत्

'' **"यथायोग्यान् गुणपूगानुपास्य फलं भवेन्मुक्तिगं नान्यथा स्यात्।**
नित्यैकाग्र्यं व्यङ्ग्यताहेतुतश्च साक्षाद् दृशिस्तद्विशेषैः स्मृतेश्च॥"
इति स्वयोग्यगुणैरेव फलभावात्' (न्या.वि.)

इति वाक्यं व्याकर्तुमवतारयति- **नच प्रियेति॥ फलप्राप्तेरिति॥** विवरणे- **भावः** प्राप्तिः। अभिप्रेयत इति भावः। अत्र यथायोग्यं गुणपूगान् आनन्दादीनुपास्य स्थितस्य यथायोग्यं हरेर्दशिरिति भवेत्। ततश्च यथायोग्यं मुक्तिगं फलमुपचयादिशून्यमानन्दभोजनं भवति। नान्यथाऽनुपास्य स्थितस्य स्यात्। अतो न साधारणमप्यनुपासनं प्राप्नोति।

यद्वा, साक्षाद् दृशिर्नान्यथा स्यात् न प्रियशिरस्त्वादिविशेषगुणविशिष्टतया स्यात्। [१]प्रियशिरस्त्वादीनामपि तदानीं स्मरणसम्भवमात्रेण तथा भगवान् कुतो न साक्षात्क्रियते? तत्राऽह- **नित्यैकाग्र्येति॥** नित्यमनन्यमनस्कत्वेनैव व्यङ्ग्यत्वादभिव्यक्त्यर्हत्वाद् भगवतः। कदाचित् स्मृतैरपि तद्विशेषैर्विशिष्टतया साक्षाद् दृशिर्भगवतो नो भवति नैव भवति। ततः तथाऽऽनन्दादिगुणोपचयविशिष्टतयाऽपरोक्षाभावान्मुक्तिगमपि फलं न तदुपचयविशिष्टं भवति। उपासनादृष्टिमौक्तिकानुभवरूपफलानां विषयैक्यनियमस्य दृढत्वात्।

यद्वा, 'नान्यथा स्यात्' यथायोग्यगुणोपासनेऽपि फलभावो न स्यादिति सर्वप्रमेयसिद्ध्यर्थं व्याख्येयम्। आनन्दादेरुपचयोऽपचयश्च फले दृश्यत

१. म. प्रियादीनाम्।

इत्युक्तोपचयशब्दोक्तप्रियादीनामानन्दविशेषत्वसूचनात्। फलभेदोक्त्या यथायोग्यफलप्राप्तेरपि सूचनात् तयोर्न्यायमालायां ग्रहणमुपपन्नम्।

सङ्क्षेपभाष्यव्याख्यानम्

एतदधिकरणतात्पर्यमप्युक्तं सङ्क्षेपभाष्ये- सच्चिदानन्द आत्मेत्येवोपास्यो मानुषैर्न तु प्रियशिरस्त्वादिभिरिति। अनेन मानुषमुक्तावुपचयाभावसिद्धेरन्यत्रेत्युक्तवैलक्षण्यप्रतियोगिविवरणं फलितम्।

॥ इति प्रियशिरस्त्वनयः॥ ६॥

॥ अथ इतराधिकरणम् ॥ ७ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ इतरे त्वर्थसामान्यात् ॐ ॥ ३-३-१४ ॥

इतरे गुणाः फलसाम्यापेक्षयोपसंहर्तव्याः ॥ १४ ॥

॥ इतीतराधिकरणम् (फलसाम्याधिकरणम्) ॥ ७ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्रेश्वरसाक्षात्कारसाधनोपासने देवादीनां बहुगुणोपासनसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोपसंहारोक्त्यनुपपत्तिप्रसङ्गात् तत् समर्थनीयम्। प्रकृतभगवद्गुणेषु चतुर्गुणाधिका विषयः। देवादिभिरुपास्या न वेति सन्देहः। फलाधिक्यं विशेषहेत्वदर्शनं च सन्देहबीजम्।

पूर्वपक्षः

चत्वार एव विरिञ्चेतरदेवादिभिरुपास्या, नाधिका इति पूर्वः पक्षः। योग्या एव खलु गुणा उपास्याः। अयोग्योपासनस्यानर्थफलत्वात्। तत्र युज्यते चतुर्मुखस्य सर्वगुणोपासनम्। सर्वमुमुक्षूणां च चतुर्गुणोपासनयोग्यताया एव निर्णीतत्वात्। नच तथा मध्यमगुणेष्वस्यैतावन्तोऽस्यैतावन्त इति योग्यता-नियमः शक्यते ज्ञातुं, येनोपासनं स्यात्। नचोपासनाभ्यासे सति यस्य यावन्तो गुणा युगपत् प्रतीयन्ते तस्य तावन्त इति योग्यतानियमो ज्ञातुं शक्यत इति वाच्यम्। प्रागेव योग्यतानियमाज्ञानेऽयोग्योपासनप्रयत्नप्रसङ्गेनानर्थप्राप्तेः। अतो मध्यमगुणानामनुपास्यत्वात् तदुपसंहारविधानानुपपत्तिरिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **इतरे त्विति** ॥ चतुर्भ्यः सर्वेभ्यश्चेतरे मध्यमगुणा देवादिभिरुपसंहर्तव्या एव। नच योग्यताऽनिर्णीतिः। तत्तत्प्राप्य-फलमपेक्ष्योपासने योग्यतानिर्णयोपपत्तेः। फलोपासनयोः साम्यात्। नच वाच्यं भविष्यत्फलानिर्णयेनोपास्तियोग्यताऽनिर्णयः। तेषां भाव्युत्कर्षं ज्ञात्वा ब्रह्मणोऽन्यस्य वा सर्वज्ञस्य गुरोस्तदनुसारिगुणनियमोपदेशोपपत्तेरिति भावः। तथाच श्रुतिः-

'यो यो भावो देवतानां विमुक्तौ तत्तत्प्राप्तौ सद्गुणा[1] नीशितुश्च।
ब्रह्मा दिशत्यथ तांस्ते विचिन्त्य तत्तद्भावं प्राप्नुवन्त्यात्मशक्त्या ॥' इति।

अतो मध्यमगुणानामपि देवाद्युपास्यत्वाद् युक्तं तदुपसंहाराभिधानमिति सिद्धम् ॥ १४ ॥

॥ इतीतराधिकरणम् ॥ ७ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ इतरे त्वर्थसामान्यात् ॐ ॥ ३-३-१४ ॥

प्राप्तिसर्वाभेदनयाभ्यां गतार्थत्वशङ्का तत्परिहारश्च

यद्यपि 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०) इत्यनेनेदं गतार्थं प्रति-भाति। तथाऽपि विरिञ्चेतरेषां बहुगुणोपासनमत्र समर्थ्यते तत्र सिद्धमेव विरिञ्चस्य सर्वगुणोपासनमङ्गीकृत्य प्राप्तिनये तु विरिञ्चस्यापि तदनङ्गीकार इति वा, तस्यैव प्रपञ्चनाद् वा न दोषः। अत एव सर्वाभेदनयेनापि न चारितार्थ्यम्। तत्र चतुर्मुख-

१. प. सुगुणान्।

साधारण्येन बहुगुणोपसंहारस्य कर्तव्यत्वसमर्थनेऽपि विरिञ्चेतरेषामिह तत्समर्थनात्।

सङ्गतिः

यथा प्रियशिरस्त्वादीनां मनुष्योपास्यत्वे प्रधानसाम्यं विरुद्धचेतेति मनुष्येतरोपास्यमेव प्रियादि तथा तदितरेऽपि गुणा इत्यतिदेशनाद्वा, युक्तं पूर्वत्र प्रियाद्युपासनाजन्यानन्दोपचयवत्त्वाद् देवानां तदुपासनम्। इतरेषां गुणानां नोपास्यत्वे बीजमस्तीति पूर्वाधिकरणवैषम्येण शङ्कनाद्वा सङ्गतिः। अत एवान्यत्रेत्युक्तफलवैलक्षण्यप्रतियोगिविवरणानन्तरं तत्पूर्वनयोक्तं प्राप्तिसामञ्जस्यमाक्षेपसमाधिभ्यां दृढीकरणेन विव्रियत इति पेटिकासङ्गतिः।

संशयः

चतुर्भ्यः सर्वेभ्यश्चेतरे गुणा विरिञ्चमानुषेतरैः देवादिभिरुपास्या न वा ? तदर्थमुपासनातः प्राग् योग्यतानियमो ज्ञातुं शक्यते न वेति सन्देहः।

पूर्वपक्षः

सर्वेषां वा चतुर्णां वा गुणानामुपसंहृतिः।
मध्यमानां तु नैव स्याद् योग्यताऽनिर्णयोक्तितः॥

यद्यपि स्पष्टप्रतिभानं योग्यतानिर्णायकमुक्तं प्राप्तिनये। तथाऽपि तदुपासनायामभ्यस्यमानायां ज्ञातव्यं, न ततःपूर्वम्। पूर्वमेवानिर्णये तु उपासने न प्रवर्तेतैव। प्रवर्तमानोऽपि वाऽयोग्योपासनप्रयत्नेन प्रत्यवायात्। नच विरिञ्चमानुषयोरिव प्रवृत्तिः। विरिञ्चस्य सर्वगुणोपासकत्वेनैव मनुष्याणां चतुर्गुणोपासकत्वेनैवोपासनात् प्राङ् निर्णयात्। इह तदभावात्।

विरिञ्चमानुषाभ्यामपि स्वयोग्यता निर्णेतुं न शक्यत इत्याक्षेपः

अत्रेदं शङ्क्यते। विरिञ्चमानुषयोरपि सर्वेषु चतुर्षु च गुणेषूपासनयोग्यता न

ताभ्यां निर्णेतुं शक्यते। उपासनाकालीनस्पष्टप्रतिभानैकसमधिगम्याया योग्यताया उपासनाप्रवृत्तेः पूर्वं दुर्ज्ञेयत्वात्। नहि विरिञ्चो मानुषोऽपि वा 'अहं विरिञ्च एवातो मे सर्वगुणा योग्या एव', 'अहं मानुष एवातो मे चत्वार एव योग्याः' इति निश्चेतुं शक्नोति। 'युगपत् स्वभुजौ यद्वत्' इत्यादिविरोधाच्च। आगमादितरो जनः विरिञ्चं सर्वगुणोपासकं मानुषं च चतुर्गुणोपासकं निश्चिनोतीति चेत्। किं ततः? प्रवर्तमानस्य तदभावात्। देवादीनामपि बहुगुणोपासनमितरो जन आगमादेव निश्चिनोतीति वैषम्यानुपपत्तेश्च। योग्यतानिश्चयादुपासनायां प्रवृत्तिः, प्रवृत्तौ च स्पष्टप्रतिभानेन योग्यतानिश्चय इत्यन्योन्याश्रयादिकं सममेव।

तत्परिहारः पूर्वपक्षोपसंहारश्च

अत्रोच्यते। विरिञ्चस्यानादितः सार्वज्ञ्यादुपासनात् पूर्वं न स्वयोग्यतानिश्चयानुपपत्तिः। अनालोचनदशायां तु सिद्धान्ताभिज्ञाप्तवचनात् सामान्यतः योग्यतानिश्चयः। ततः उपासनायां प्रवृत्तौ ततो विशेषनिश्चयः। नच प्रत्यवायः। सर्वमुमुक्षुसाधारण्येन क्लृप्तगुणोपासनेन क्रमेणाभ्यस्यमानेन सर्वेषां च गुणानां गुणचतुष्टयविशेषरूपत्वात् स्पष्टप्रतिभाने तन्निर्णयोपपत्तौ सर्वगुणोपासनप्रवृत्तिसम्भवः। एवमेव मनुष्याणामपि प्रवृत्त्युपपत्तिः। देवादीनां तु विचित्राणां योग्यतानामृजुत्वादिवदेकधर्मेण क्रोडीकारायोगेन तत्र साम्प्रदायिकवचनस्य सामान्यतः प्रवर्तयितुमशक्यत्वेन सामान्यतोऽपि तन्निश्चयायोगेनोपासनायां प्रवृत्तेरनुपपत्त्यैवेति वैषम्यमिति पूर्वः पक्षः।

सिद्धान्तः

शिष्याणां भाविमाहात्म्यं जानन् दैशिक आदिशेत्।
ततः प्रवृत्तिरेतेन नान्योन्याश्रयता भवेत्॥

नच तादृशगुरोर्लाभात् प्राक् तूष्णीम्भाव आपद्येत। साधारण्येन चतुर्णां गुणानां क्लृप्तत्वात् तेष्वेवोपासनायामभ्यस्यमानायां तत्रान्तर्भाविना उपासिषोप-

निबद्धा यावन्तो गुणाः स्पष्टं प्रतिभासन्ते तावतामुपासनमित्येवं क्रमेण बहुगुणोपासनोपपत्तेः। नचायोग्योपासनात् प्रत्यवायः। योग्यतासंशयेन प्रवृत्तौ तदभावात्। अन्यथा प्रवृत्तिमात्रोच्छेदप्रसङ्गः। प्रत्यवायस्त्वयोग्यतानिश्चया-नन्तरमपि प्रवृत्तौ। नच देवादीनां प्रागयोग्यतानिश्चयः। कारणाभावात्। नच गुरूपदेशवैयर्थ्यम्। सङ्ख्यानिर्देशाभ्यां इयन्त एव योग्या नेमे इत्यादिनिश्चयस्य तत्साध्यत्वादिति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु, सर्वेभ्यश्चतुर्भ्यश्च **इतरे** पञ्चषट्सप्तादयो गुणाः 'विरिञ्चमनुष्येतरैः-मध्यमदेवादिभिरुपास्याः' इति शेषः। **अर्थस्य** आनन्दस्य फलस्य **साम्यात्,** स्वस्वयोग्यं हि फलं यावद्गुणोपासनया भवति तावतां गुणानामुपास्यत्वादिति भाव इति।

पराभ्युपगतमधिकरणम्

'आनन्दादयः' (ब्र.सू. ३.३.१२) इत्यादिसूत्रत्रयमेकमधिकरणम्। यथैकस्यैव ब्रह्मण उपकोसलोक्ताः संयद्वामत्वादयः दहरविद्योक्ताः सत्य-कामत्वादयश्च गुणा अन्योन्यविद्यायां सङ्कीर्यन्ते, एवं तैत्तिरीयोक्ता आनन्द-विज्ञानत्वादयोऽपि प्रदेशान्तरोक्तैर्विभुत्वनित्यत्वादिगुणैर्न सङ्कीर्येरन्। तत्सङ्करे संयद्वामत्वादयोऽपि सत्यकामत्वादिभिः सङ्कीर्येरन्। नहि ब्रह्मणो धर्मिणस्सत्त्वे कश्चिद् विशेष इति पूर्वः पक्षः।

सिद्धान्तस्तु, वास्तवविधेययोर्वस्तुधर्मतया अनुष्ठेयतया व्यवस्थाव्यवस्थे व्यवतिष्ठेते। वस्तुधर्मो हि यावद्वस्तु व्यवतिष्ठते। नासावेकत्रोक्तोऽन्यत्रानुक्तो नास्तीति शक्यं वक्तुम्। विधेयस्तु गुणः पुरुषप्रयत्नतन्त्रः। पुरुषप्रयत्नश्च यो यत्र यावद्गुणविशिष्टे चोदितस्तावत्यवतिष्ठते। नाविहितमपि गुणं गोचरीकर्तु-मर्हति। तस्य विधितन्त्रत्वात्। विधेश्च व्यवस्थानात्। तस्मादानन्दविज्ञानादयो

ब्रह्मतत्त्वात्मकतयोक्ताः, यत्र यत्र ब्रह्म श्रूयते तत्र तत्रानुक्ता अपि लभ्यन्ते। संयद्वामत्वादयश्चोपासनाप्रयत्नविधिविषया[1] यथाविध्यनुतिष्ठन्ते, न यथावस्तु सर्वत्र सङ्कीर्येरन्निति सिद्धमित्यन्ये व्याचख्युः।

तन्निरासः

तन्न। अधस्ताद् वेद्यैक्यात् तद्विद्यैक्यमुक्तम्। वेद्यं चोपकोसलदहर-विद्ययोरेकमेव ब्रह्मेति विद्यैक्यमपि तेनैव न्यायेन सिद्धमित्यन्योन्यत्र विद्यायां संयद्वामत्वादीनां साङ्कर्यस्यौचित्यात् तद्दृष्टान्तेनाऽऽनन्दादीनां विभुत्वादिभिः साङ्कर्याभावपूर्वपक्षायोगात्। धर्माणां वास्तवत्वविधेयत्वाभ्यां द्वैराश्यकल्प-नेनाऽऽनन्दादीनां संयद्वामत्वादीनां च वैषम्येण सिद्धान्तायोगाच्च। नच निर्गुणे ब्रह्मणि कश्चन वास्तवधर्मस्तन्मतेऽस्ति। निर्धर्मकत्वव्याघातात्। आनन्दादयो न धर्माः, किन्तु धर्म्येवेति चेन्न। पदान्तरवैयर्थ्यप्रसङ्गात्। सत्यज्ञानानन्दाद्या पदार्था इतरेतरविशेषणविशेष्यभूताः ब्रह्मण्यनृतजडदुःखित्वादिभ्रान्तिं व्याव-र्तयन्तः सत्त्वादिपरापरसामान्याधाररूपामेकामानन्दव्यक्तिं लक्षयन्ति। सद् द्रव्यं कुम्भ इति पदानीव कुम्भव्यक्तिम्। अनन्तपदं तु लक्षणत्वेन स्वीकृतसामान्य-व्यक्तिभेदमपि तत्त्वतो निषेधति। 'आत्मन आकाशः सम्भूतः' (तै.उ. २.१.१, योगचूडामणि.उ. ७२) इत्यत्राऽऽत्मपदं त्वेवम्भूतस्य ब्रह्मणः परत्वं निषे-धति। एवम्भूतबुद्धिश्च नैकस्मात् पदाद् भवति। एकभ्रमनिवृत्तावपि इतर-भ्रमानिवृत्तेरिति कल्पतरूक्तवैयर्थ्यसमाधानं त्वयुक्तम्। सत्यपदेनानृतव्यावृत्ति-बोधवद् जडादिव्यावृत्तिबोधनस्यापि सम्भवेन वैयर्थ्यानिस्तारात्। नच तस्य तत्राशक्तिः। जगद्व्यावृत्तेर्ब्रह्मस्वरूपतया तत्तद्बोधनाशक्तस्यानृतव्यावृत्त-ब्रह्मस्वरूपबोधनेऽप्यशक्तेः सत्यपदस्यापि वैयर्थ्यापातात्।

किञ्च ब्रह्मण्यनृतादिव्यावृत्त्यवच्छेदकधर्मस्वीकारेऽधर्मकत्वहानिः,

---

१. म. उपासनापन्नविधिविषयाः।

तदस्वीकारेऽनृतादिव्यावृत्तिबोधकत्वायोगः । अन्यथा घटादावपि सत्यादिपदप्रयोगापत्तिः। अनृतत्वादेस्तद्विरोधिधर्मस्य तत्र सत्त्वान्नैवमिति वाच्यम् । तस्य मिथ्यात्वस्वीकाराद् ब्रह्मण्यारोपितस्यानृतत्वादेः सम्भवात् ।

के चेमे धर्माणां वास्तवत्वविधेयत्वे यावद्वस्तुभावित्वतच्छून्यत्वे इति चेन्न । संयद्वामत्वादीनामपि यावद्वस्तुभावित्वात् । पदार्थान्तरघटितत्वतदघटितत्वे इति वचनं साम्प्रतम्[1] । सत्यत्वस्यापि सद्भावव्यापकत्वनिषेधाप्रतियोगित्वादिरूपस्य पदार्थान्तरघटितत्वात् । अत एवाखण्डत्वसखण्डत्वे इति च निरस्तम् । अनन्तादिपदेषु सखण्डत्वेन तद्बोध्यस्य विधेयत्वापत्तेश्च । नापि पुरुषप्रयत्नागोचरत्वगोचरत्वे । संयद्वामत्वादेरपि पुरुषप्रयत्नगोचरत्वाभावात् । तत्रोपासनाविधिसद्भावाद् तद्गोचरत्वमस्तीति चेन्न । तत्तदुपासनायाः प्रयत्नगोचरत्वप्राप्तावपि संयद्वामत्वादेस्तदसिद्धेः । अन्यथाऽऽनन्दादेरपि[2] तत्प्रसङ्गात् । आनन्दादेरुपासनाविधिर्नास्तीति चेन्न । 'तद् ब्रह्मेत्युपासीत' (तै.उ. ३.१०.४) इत्याद्युपासनाप्रकरणगतत्वात् । अन्यथा ध्यानादिना विना प्रयोजनान्तरस्य निराकृतत्वात् तदुक्तिवैयर्थ्यप्रसङ्गात् । नापि ब्रह्मस्वरूपतदतिरिक्तत्वे । संयद्वामत्वादेरपि ब्रह्मस्वरूपत्वस्याङ्गीकर्तव्यत्वात्[3] । अन्यथा तत्प्रतिपादकवेदभागस्यातत्त्वावेदकत्वप्रसङ्गात् । उपासनापराणां तदिष्टमिति तु निरस्तम् । आनन्दादिवाक्येऽपि तत्प्रसङ्गाच्च ।

आनन्देति सूत्रस्य पराभिमतार्थनिरासः

एतेनाऽद्यस्य सूत्रस्य, प्रधानस्य ब्रह्मणो धर्माः आनन्दादयः सर्वे सर्वत्र प्रतिपत्तव्याः, सर्वाभेदादेवेति पूर्वानुवृत्त्या व्याख्यानं निरस्तम् । अवश्यवक्तव्यस्य हेतोः साध्यस्य चेहावचनाच्च । आनन्दादीनामन्यधर्मत्वाभावेन व्यावृत्त्यप्रसिद्ध्या

---

१. अत्र 'न साम्प्रतम्' इति पाठेन भाव्यमिति भाति ।

२. म. अनन्तादेः ।

३. म. अङ्गीकार्यत्वात् ।

'प्रधानस्य' इत्यस्य वैयर्थ्याच्च । धर्मिण एकत्वेन कौषीतकिविद्यायां वसिष्ठत्वादीनामिवाऽनन्दादीनां सर्वत्रोपसंहारसिद्धेः समग्रसूत्रानर्थक्यप्रसङ्गाच्च । प्राणस्य सविशेषत्वाद् युक्तः शाखान्तरीयवसिष्ठत्वाद्युपसंहारः । ब्रह्मणस्तु निर्विशेषत्वात् स्वशाखाधर्मेणैव प्रमितिसिद्धौ न शाखान्तरगतानन्दाद्युपसंहार इत्यधिकाशङ्क्या प्रवृत्तेर्न सूत्रानर्थक्यमित्यमलानन्दो मन्यते । तत्र वक्तव्यं- कथमस्याः परिहार इति । निर्विशेषत्वेऽपि ब्रह्मण आनन्दादीनां भिन्नधर्मत्वाभावात् सर्वत्रोपसंहार इति चेन्न । संयद्वामत्वादेरपि भेदाभावस्योक्तत्वात् । ब्रह्मणस्तु निर्विशेषत्वादित्यादिव्याहतशङ्काया अनुदयश्च ।

किञ्चात्र 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१), 'आनन्दो ब्रह्म' (तै.उ. ३.६) , 'आत्मन आकाशः सम्भूतः' (तै.उ. २.१.१) इत्यादितैत्तिरीयवाक्यममलानन्दरीत्या विषयश्चेत् तदनुसारेण सत्यादय इति सूत्रयितव्यम् । 'आनन्दरूपत्वं विज्ञानघनत्वं सर्वगतत्वं सर्वात्मत्वमित्येवञ्जातीयकाः ब्रह्मणो धर्माः क्वचित् केचिच्छ्रूयन्ते' इत्यादिभाष्यात् 'आनन्दरूपमजरं यद् विभाति' (मुण्ड.उ. २.२.७), 'विज्ञानघन एवैतेभ्यः भूतेभ्यः' (बृ.उ. २.४.१२), 'सर्वेषु भूतेष्वेतमेव' (ऐ.उ. २.३.४) , 'सर्वं खल्विदं ब्रह्म' (त्रिपाद्विभूतिमहानारायणोपनिषत् १.३, गन्धर्व.उ. ६) इत्यादिशाखान्तरगतानेकवाक्यविषयतावगमात् तद्विरोधश्च ।

भारतीतीर्थीयव्याख्यानप्रत्याख्यानम्

एतेन 'आनन्दो ब्रह्म' (तै.उ. ३.६) इति तैत्तिरीयवाक्यमादौ पठित्वा सौत्रानन्दादिनिर्देशस्वारस्यकथनं भारतीतीर्थीयं निरस्तम् । स्वाभाविकपाठक्रमं विहायाऽरोपितपाठक्रमानुसारेण सूत्रव्याख्यानस्यायुक्तत्वाच्च ।

प्रियशिरस्त्वादीति सूत्रस्य पराभिमतार्थनिरासः

आनन्दादयः सर्वे धर्माः सर्वत्र प्रतिपत्तव्या इत्यपवादः । प्रियशिरस्त्वादीनां

धर्माणां तैत्तिरीयके आम्नातानां नास्त्यत्र प्राप्तिः। यतस्तेषां प्रियं मोदः प्रमोद आनन्द इत्युक्तानां प्रियशिरस्त्वादीनां परस्परापेक्षया चोपचयापचयावुपलभ्येते। उपचयापचयौ हि भेदे सत्येव सम्भवतो न त्वभेदे। ब्रह्म तु निर्भेदमिति द्वितीयव्याख्यानमप्ययुक्तम्। कौ चात्रोपचयापचयौ? वृद्धिक्षयाविति चेन्न। प्रियमोदप्रमोदादीनां ब्रह्मधर्मादीनामानन्दादीनामिव वृद्धिक्षययोरसम्भवात्। 'उपकारजन्यं प्रियम्' इत्यादिनिर्वचनात् प्रियत्वादीनां न ब्रह्मधर्मत्वमिति चेन्न। अपवादोक्त्यसम्भवात्। ब्रह्मात्मकधर्मा ब्रह्मधर्मा इति पक्षेऽपि प्रियशिरस्त्वादीनां ब्रह्मात्मकत्वाङ्गीकारस्याऽवश्यकत्वाच्च। अन्यथाऽपवादासम्भवात्।

किञ्च, प्रियमोदादीनामानन्दविशेषत्वेनाऽनन्दस्य वृत्तिरूपस्य त्वन्मतेऽभावेन ब्रह्मात्मकत्वे उपचयापचयवर्णनस्यासम्भव एव। आनन्दादेः प्रियादेश्च मात्रया वैषम्यानुपलम्भात्। प्रियशिरस्त्वादयो न ब्रह्मधर्माः, किन्त्वानन्दमयस्याब्रह्मत्वेन कोशत्वात् तद्धर्मा एव ते, आनन्दादयस्तु ब्रह्मधर्मा एवेति वैषम्यमस्तीति चेन्न। अपवादासम्भवोक्तत्वात् ब्रह्मधर्मास्त्वेतान् कृत्वा न्यायमात्रमिदं सूत्रकृताऽऽचार्येण प्रदर्शितम्। तेन संयद्वामत्वादिष्वप्राप्तिः फलिष्यतीति भाष्योक्तमप्ययुक्तम्। संयद्वामत्वाद्यप्राप्तिरिति सूत्रयितव्येऽप्येवं सूत्रणस्य प्रयोजनाभावात्। आनन्दमयस्याब्रह्मत्वे 'आनन्दमयोऽभ्यासात्' (ब्र.सू. १.१.१२) इति सूत्रविरोधाच्च। श्रुतिविरोधेन सूत्रस्यान्यार्थकल्पनमिति चेन्न। मयडादीनां प्राचुर्यार्थस्योक्तत्वात्। विस्तरस्त्वानन्दमयाधिकरणचन्द्रिकादौ द्रष्टव्यः।

'ब्रह्मणि चित्तावतारोपायमात्रत्वेनैते प्रियशिरस्त्वादयः परिकल्प्यन्ते। न द्रष्टव्यत्वेन। आनन्दादयस्तु नैवम्' इति भाष्योक्तं वैषम्यान्तरमप्ययुक्तम्। परिकल्पनमारोप उत चिन्तनमात्रम्? नाऽद्यः। विदितवेदान्तस्य प्रियशिरस्त्वादीनां ब्रह्मण्यारोपासम्भवात्। सम्भवे वाऽनिवृत्तिप्रसङ्गात्। अनारोपितधर्मैरेव

चित्तावतरणोपपत्तेश्च। अन्यथाऽनारोपितानन्दादिगुणाः न श्रूयेरन्। गुणश्रवणस्य चित्तावतरणान्यप्रयोजनासम्भवात्। द्रष्टव्यत्वेनोपदिष्टानामानन्दादीनां श्रवणं दर्शनार्थमिति चेन्न। ब्रह्मण आनन्दत्वेन दर्शनं प्रयोजनं, अथाऽनन्दित्वेन। पक्षद्वयमप्यनुपपन्नम्। दर्शनात्मकस्य ब्रह्मणस्तत्कर्मत्वायोगात्। न द्वितीयः। उपासनस्य दर्शनार्थत्वेन तयोश्चैकविषयत्वस्वाभाव्यात् प्रियशिरस्त्वादीनामपि द्रष्टव्यत्वापत्त्याऽऽनन्दादिवैषम्योक्त्ययोगात्। प्रियशिरस्त्वादीनां सर्वमुमुक्षुसाधारण्यनिषेधस्यावश्यकर्तव्यत्वसमर्थनाय पृथगधिकरणत्वसम्भवे गुणसूत्रत्वाश्रयणायोगाच्च।

'इतरे त्वर्थसामान्यात्' इति सूत्रस्य पराभिमतार्थनिरासः

एतेनैव, इतरे तु आनन्दादयो धर्माः ब्रह्मस्वरूपप्रतिपादनायैवोच्यमाना अर्थसामान्यात् प्रतिपाद्यस्य ब्रह्मणो धर्मिण एकत्वात् सर्वत्र प्रतीयेरन्निति वैषम्योक्तिपरतया तृतीयव्याख्यानं निरस्तम्। ब्रह्मस्वरूपप्रतिपादनायैवोच्यमाना इति कोऽर्थः? चित्तावताराय अनूच्यमाना इति, उत धर्मधर्मिभावमनपेक्ष्योच्यमाना इति। नाऽद्यः। ब्रह्मण्यानन्दादिप्रतिपादनेन स्वतस्सुन्दरत्वप्रतिपत्त्या चित्तावतारस्यानुभूयमानत्वात्। अन्यथा प्रियशिरस्त्वादावपि तादर्थ्यं न स्यात्। न द्वितीयः। 'आनन्दं ब्रह्मणः' (तै.उ. २.४, शरभ.उ. १८, नारायणोत्तरतापिन्युपिषत् १.१) इत्यादौ तदसिद्धेः। कथञ्चित् प्रियशिरस्त्वादीनां कोशधर्मतया त्वया स्वीकृतानां ब्रह्मस्वरूपप्रतिपादनायोच्यमानत्वाभावेऽपि सूत्रतात्पर्यविषयतया भाषितसंयद्वामत्वादीनां ब्रह्मप्रकरणाम्नानेन तत्सम्भवात्।

शैवमतनिरासः

एतेन, 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१), 'आनन्दो ब्रह्म' (तै.उ. ३.६), 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' (म.ना.उ.) (वनदुर्गोप-

निषत्), 'आकाशशरीरं ब्रह्म' (तै.उ. १.६.३), 'सत्यात्मप्राणारामं मन आनन्दम्', 'शान्तिसमृद्धममृतम्' (तै.उ. १.६.४) इत्यादिष्वानन्दादयो गुणाः परविद्यासु प्रधानस्य ब्रह्मणः श्रूयन्ते। सर्वासु परविद्यासूपसंहार्यास्ते न वेति संशये, नोपसंहार्याः । ब्रह्मण एकस्याऽनन्दाद्यनेकगुणविशिष्टत्वेऽनेकत्व-प्रसङ्गात्। विशेषणानां च विशेष्यभेदकत्वादिति प्राप्ते नीलधवलादिविरुद्ध-धर्माणामेव धर्मिभेदावहत्वं, न तु 'नीलं सुगन्धि महदुत्पलम्' इत्यत्र नीलिमादी-नामिति शैवोक्तमधिकरणं निरस्तम्। सूत्राक्षरानारूढत्वात्। नच विशेषणस्य भेदकत्वाशङ्कायां प्रधानस्य ब्रह्मणोऽभेदादिति परिहारः सङ्गतः। किञ्चाऽनन्दा-दीनां सर्वासु [1]परविद्यासूपसंहार्यता पूर्वपक्षिणाऽऽक्षिप्यते उत यत्र ते श्रुता-स्तत्रैव। नान्त्यः। तच्छ्रवणवैयर्थ्यात्। नाऽद्यः। यत्र ते श्रुतास्तत्र तेषामुपसंहा-राङ्गीकारे भेदकत्वाभावादन्यत्रापि तदुपपत्तेः।

प्रियशिरस्त्वादीति द्वितीयसूत्रस्याधिकरणान्तरत्वेन व्याख्याननिरासः

प्रियशिरस्त्वादीनामपि सत्यसङ्कल्पत्वादिवदुपसंहारे प्राप्ते प्रियशिरस्त्वा-दीनां सत्यसङ्कल्पत्वादिवत् परविद्यास्वप्राप्तिरनुपसंहार एव। अन्यथा ब्रह्मणः सावयवत्वप्रसक्त्योपचयापचयौ प्रसज्येते इति द्वितीयस्याधिकरणान्तरत्वमुपेत्य व्याख्यानमयुक्तम्। सत्यसङ्कल्पत्वादीनामपि स्वाभाविकत्वे सङ्कल्पादीनां चित्तकार्यतया तदङ्गीकारे सावयवत्वप्राप्त्योपचयापचयप्रसक्तेरनिवारणात्।

विशिष्टाद्वैताभिमततैदधिकरणसूत्रार्थविमर्शः

'आनन्दादयः प्रधानस्य' इति सूत्रार्थविमर्शश्च

एतेन प्रधानस्य गुणिनो ब्रह्मणः सर्वेषूपासनेष्वभेदाद् गुण्यपृथग्भावाद् गुणानां सर्वत्राऽनन्दादयस्तद्गुणा उपसंहर्तव्या इति केषाञ्चिद् व्याख्यानं प्रत्युक्तम्। 'आनन्दं ब्रह्मणः' (तै.उ. २.४) इत्यादिश्रौतनिर्देशबलेनाऽ-

१. म. विद्यासु।

नन्दादीनां भेदस्यैव सिद्धत्वाद् गुण्यपृथक्त्वासिद्धेः। सिद्धौ वा प्रियशिरस्त्वा-दीनामपि ब्रह्मगुणत्वापृथक्त्वयोरविशेषात् सर्वत्रोपसंहार्यता स्यात्।

प्रियशिरस्त्वादीति सूत्रव्याख्याविमर्शः

प्रियशिरस्त्वादीनामप्राप्तिस्तेषामब्रह्मगुणत्वात्। ब्रह्मणः पुरुषविधत्व-रूपमात्रान्तर्गतत्वात्। अन्यथा शिरःपक्षपुच्छाद्यवयवभेदे सति ब्रह्मणोऽ-प्युपचयापचयौ प्रसज्येतामिति प्रियशिरस्त्वादीनामब्रह्मगुणत्वसाधनपरतया द्वितीयं सूत्रं व्याख्यातम्। तत्र प्रियशिरस्त्वादीनामब्रह्मगुणत्वमन्येषामिव कोशगुणत्वमाश्रित्योच्यते, उत गुणिपृथग्भावमाश्रित्य। नाऽद्यः। त्वन्मते आनन्दमयस्य ब्रह्मत्वेन तत्प्रकरणपठितानां 'तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः' (तै.उ. २.५) इत्युक्तानां प्रियशिरस्त्वादीनां ब्रह्मगुणत्वाव-श्यम्भावात्। न द्वितीयः। आनन्दादीनामिव गुण्यपृथग्भावे बाधकाभावात्। [1]शिरआद्यवयवत्वाङ्गीकारे ब्रह्मण उपचयापचयादिप्रसङ्गो बाधक इति चेन्न। कल्याणगुणात्मकविग्रहस्य 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इत्याद्यधि-करणेषु त्वयैव स्वीकृतत्वेनानित्यविग्रहाभावादेव वृद्धिक्षयादिरूपोपचयाप-चयादेरप्राप्तेः।

किञ्चैषां गुणिपृथग्भावे प्रमाणं पुरुषविधत्वरूपणमात्रान्तर्गतत्वमिति चेन्न। पुरुषविधत्वरूपणमात्रं नामोत्प्रेक्षामात्रं, न तु वस्तुस्थितिकथनमिति यद्यर्थस्तदा तद्भागस्यासदर्थपरतया प्रामाण्यं न स्यात्। नह्यतत्त्वावेदकं प्रमाणं तवेष्टम्। उपासनामात्रपरमिति यद्यर्थस्तदा मिथ्योपासनस्य निषिद्धत्वात् प्रियशिरस्त्वादीनामपि वास्तवत्वं दुर्वारम्।

किञ्च प्रियशिरस्त्वादीनां शिरःपक्षाद्यवयवभेदापादकतया[2] ब्रह्मस्वरूप-गुणत्वाप्राप्तावप्यैश्वर्यगाम्भीर्यौदार्यकारुण्यादीनां गुणानां तदभावेन ब्रह्मस्वरूप-

१. भ. शिरआद्यवयवाङ्गीकारे। २. म. शिरःपुच्छाद्यवयवभेदापादकतया।

गुणत्वाध्यवसायसम्भवेन तेषामपि सर्वत्रोपसंहार्यताप्रसङ्गः। नचाऽनन्दादीनामेवेति नियमः।

'इतरे त्वर्थसामान्यात्' इति सूत्रार्थनिरासः

इतरे आनन्दादय एव सर्वत्रोपसंहर्तव्याः। अर्थसामान्यात् अर्थसमानत्वात्, अर्थो धर्मी तत्समानत्वात् तत्प्रतीत्यनुबन्धित्वात्। न त्वैश्वर्यादयः ब्रह्मस्वरूपभूतगुणा अपि, तत्प्रतीत्यनुबन्धित्वाभावादिति वैषम्योक्तिपरतया तृतीयव्याख्यानमप्ययुक्तम्। अर्थसमानत्वस्यैश्वर्यादेरप्यविशेषात्। नहि 'एष सर्वेश्वरः' (बृ.उ. ४.४.२१) इत्याद्यनुक्तावैश्वर्यादिविशिष्टब्रह्मस्वरूपप्रतिपत्तिः सम्भवति।

नच धर्मिमात्रप्रतीत्यनुकूलत्वमैश्वर्यादीनां नास्तीति वाच्यम्। आनन्दादीनामप्यभावात्। नहि 'आनन्दो ब्रह्म' (तै.उ. ३.६) इत्युक्तानन्दादीनां धर्मिमात्रप्रतीत्यनुकूलत्वं सम्भवति। तथा सति ब्रह्मसत्यज्ञानादिप्रतिपादकतया प्रत्येकमेकैकाधिकरणमिति ब्रह्मसत्यज्ञानादिपदवैयर्थ्यापातात्। शब्दनिर्विकल्पकाभावाच्च। तस्माद् भाष्योक्तदिशा 'आनन्दादयः' (ब्र.सू. ३.३.१२) इत्यादिसूत्रत्रयमवश्यवक्तव्यार्थप्रतिपादकतया प्रत्येकमेकैकाधिकरणमिति प्रधानसूत्राण्येवैतानीति सिद्धम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु -॥ **चतुर्गुणाधिकारविषय इति** ॥ पञ्चषट्सप्तादयः सर्वपर्यन्ता इत्यर्थः ॥ **देवादिभिरिति** ॥ विरिञ्चेतरदेवादिभिरित्यर्थः। **फलाधिक्यम्** यथायोग्यान् गुणपूगानुपास्य यथायोग्यं फलं भवेदिति फलाधिक्योक्तिः ॥ **विशेषहेत्वदर्शनम्** 'अस्यैतावन्तो योग्याः' इत्यादिनिर्णायकविशेषहेतोरयोग्योपासनप्रयत्नप्रसङ्गनिवारकस्यादर्शनमित्यर्थः।

टीकायां कार्यलोपाख्यपूर्वपक्षन्यायविवरणव्याख्यानम्

कार्यलोपन्यायं सम्बन्धिहेतुप्रदर्शनेन विवृण्वत् 'तर्हि ब्रह्मणोऽन्येषां देवादीनामपि बहुगुणोपासनया[1] कार्यं नास्ति। मध्ये नियमासिद्धेरिति न मन्तव्यम्' (न्या.वि.) इति वाक्यं व्याचष्टे- **चत्वार इति** ॥ मध्ये नियमेत्यस्य तात्पर्यमाह- **योग्या एव खल्विति** ॥ अनेन, तर्हि स्वयोग्यगुणैरेव फलभावस्तर्हि ब्रह्मणो मानुषाणां च सर्वोपासकत्वचतुर्गुणोपासकत्वाभ्यां निर्णीतत्वेन तथोपासनया कार्यसद्भावेऽपि ब्रह्मणोऽन्येषां देवादीनामपि बहुगुणोपासनया **कार्यं नास्ति** प्रयोजनं नास्ति। मध्ये नियमासिद्धेः विरिञ्चमानुषयोर्मध्ये स्थितानां देवादीनां योग्यतानिर्णयासिद्धेः। सर्वोपासकत्वचतुर्गुणोपासकत्ववदेकावच्छेदकानिर्णयादिति यावत्।

यद्वा, षष्ठ्यास्तृतीयादेशः 'सुपां सुपः' इत्यादिवचनात्। कार्यमिति भावप्रधानः। बहुगुणोपासनायाः कार्यत्वं कर्तव्यत्वं नास्ति। मध्ये नियमाभावात्। यद्वा, इत्थम्भूतलक्षणे तृतीया, भावप्राधान्यं च। उपासनाख्यं कार्यं नास्तीति फलितम्। कार्यस्य लोपः कर्तव्यत्वाभाव इति न्यायविवरणपर्यवसानम्। यद्यपि मध्ये नियमासिद्धेरेव न्यायो न युक्तः। न तु कार्यलोपस्तस्य साध्यत्वात्। तथाऽपि पूर्वाधिकरणोक्तमयुक्तमिति साध्यान्तरमपेक्ष्य न्यायत्वमप्यस्तीति ज्ञातव्यमिति सूचितं भवति।

टीकायां भवाख्यसिद्धान्तन्यायविवरणव्याख्यानम्

भवत्यनेनेत्युपपत्तिर्भवः। तत्र चोपदेशः योग्यत्वात् सम्बद्ध्यत इति मनसि निधाय न्यायमालोक्तं भवन्यायमुपदेशविषयसमर्पणपूर्वकं विवृण्वत् **'तेषां भाव्युत्कर्षं ज्ञात्वा तदभिज्ञस्य ब्रह्मण एव गुणनियमोपदेशोपपत्तेः।**

[1] ह. बहुगुणोपासनायाः

**"यो यो भावो देवतानां विमुक्तौ तत्तत्प्राप्तौ सद्गुणा[1] नीशितुश्च।
ब्रह्मा दिशत्यथ तांस्ते विचिन्त्य तत्तद्भावं प्राप्नुवन्त्यात्मशक्त्या॥"**
(न्या.वि.उदाहृतश्रुतिः ३.३.१४)

इति श्रुतेः' (न्या.वि.) इति वाक्यम् 'इतरे गुणाः न फलसाम्यापेक्षयोपसंहर्तव्याः' इति भाष्योक्तकक्ष्यायामाक्षेपसमाधानार्थं व्याकर्तुं भाष्यमादौ योजयितुं सूत्रार्थं भाष्याक्षरयोजनापूर्वमाह- **चतुर्भ्यः सर्वेभ्यश्चेति**॥ 'अर्थसामान्यात्' इत्यस्य व्यावर्त्याशङ्कामाह- **नचेति**॥ फलसाम्यापेक्षयेत्यतः परमध्याहार्यमाह- **उपासने योग्यतानिर्णयोपपत्तेरिति**॥ फलनिर्णयस्य तद्योग्यतानिर्णयं प्रत्यप्रयोजकतां निराह- **फलोपासनयोः साम्यादिति**॥ प्रस्तुतं वाक्यं सङ्गमयितुमाशङ्क्य निराकरोति- **नच वाच्यमिति**॥ स्यादिदं भाष्योक्तं योग्यतानिर्णीतिसमाधानं, यदि भविष्यत्फलनिर्णयः सुकरः स्यात्। नचैवमिति शङ्कितुर्हृदयम्। तत्र हेतुसमर्पकत्वेन विवरणं सङ्गमयति- **तेषां भाव्युत्कर्षमिति**॥

अन्ये तु, यथायोगं यथा ह्याचार्या आचक्षते 'तेषां विशेषमाचार्यो वेत्ति सर्वज्ञतां गतः' इत्यागमाद् ब्रह्मण इत्युपलक्षणमित्याह- **अन्यस्य वा सर्वज्ञस्येति**॥ उत्तरार्धं योजयति- **तथाच श्रुतिरिति**॥ न केवलं वयमेव, श्रुतिरपि तथा वक्तीत्यर्थः। ततश्च तेषां मध्यमानां देवादीनां भाविफले मौक्तिकानन्दादावुत्कर्षमाधिक्यं ज्ञात्वा स्थितस्यात एव तत्तत्फलसाधनगुणोपासनयोग्यताभिज्ञस्य ब्रह्मणः सकाशादेव एवं ह्येषैवहीतिवत्[2] शिष्याणामुपासकानां तवैवम्भूतं फलं भावि तदर्थमेतावन्तो गुणास्त्वयोपास्या, नाधिका नापि न्यूना इत्येवं नियमशब्दितगुणक्लृप्त्युपदेशस्योपपत्तेर्योग्यताक्लृप्तिसिद्धेरिति न मन्तव्यमिति सम्बन्धः। देवतानां विरिञ्चमानुषमध्यस्थदेवतानां सात्त्विकप्रकृतीनां विमुक्तौ यो यो भावः यद्यत् फलं यादृशं फलमिति यावत्। तत्तत्प्राप्तौ। तादर्थ्ये सप्तमी। तादृशफलप्राप्त्यर्थं

१. प. सुगुणान्। २. म. एवं एवाह्येवैवाहीतिवत्।

पर्याप्तानीशितुः[1] सद्गुणान् तत्तदुपासनयोग्यान् गुणान्। **सुगुणान्** इति पाठेऽप्ययमेवार्थः। ब्रह्मा दिशत्यथ ते तान् ब्रह्मोपदिष्टान् पञ्चषट्सप्तादीनुपास्य तत्तद्योग्यं फलं प्राप्नुवन्तीति श्रुत्यर्थ इति ज्ञातव्यम्। अत्र सामान्यादिति योग्यतानिर्णायकोक्तिबलादेव कार्यलोपः भवशब्दितोपपत्तिश्च पूर्वपक्षसिद्धान्तयोर्न्यायः सूचित इति युक्तं तयोर्न्यायमालायां ग्रहणम्। विरिञ्चमानुषयोरेव यथायोग्यमुपासनमिति न। किन्तु मध्यमानामपीत्युक्त्या प्राप्तिसामञ्जस्यविवरणं फलितम्।

सङ्क्षेभाष्यस्यैतदधिकरणतात्पर्यपरतया व्याख्यानम्

एतदधिकरणतात्पर्यमप्युक्तम् - 'सुरेश्वरैर्यथाक्रमं बहुगुणैः उपास्यः' इति।

॥ इतीतराधिकरणम् ॥ ७ ॥

१. म. तद्गुणान्।

॥ अथाऽध्यानाधिकरणम् ॥ ८ ॥

॥ सूत्रभाष्यम् ॥

उपसंहारानुपसंहारप्रमाणमाह -

॥ ॐ आध्यानाय प्रयोजनाभावात् ॐ ॥

॥ ३-३-१५ ॥

आध्यानार्थं हि सर्वे गुणा उच्यन्ते प्रयोजनान्तराभावात्।

'ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा[१]।
ज्ञातव्याश्चैव ध्यातव्या गुणास्सर्वेऽप्यतो हरेः॥
नान्यत् प्रयोजनं ज्ञानाद् ध्यानात् कर्मकृतेरपि।
श्रवणाच्चाथ पाठाद् वा विद्याभिः किञ्चिदिष्यते॥'

इति परमसंहितायाम्।

'गुणास्सर्वेऽपि वेत्तव्या ध्यातव्याश्च न संशयः।
नान्यत् प्रयोजनं मुख्यं गुणानां कथने भवेत्॥
ज्ञानध्यानसमायोगाद् गुणानां सर्वशः फलम्।
मुख्यं भवेन्न चान्येन फलं मुख्यं क्वचिद् भवेत्॥'

इति बृहत्तन्त्रे॥ १५॥

॥ ॐ आत्मशब्दाच्च ॐ ॥ ३-३-१६ ॥

'आत्मेत्येवोपासीत' (बृ.उ.३-४-७) इत्यनुपसंहारे प्रमाणम्[२]॥१६॥

॥ इत्याध्यानाधिकरणम्॥ ८॥

---

१. ह. समुदीरणात्। २. ह. अनुपसंहारप्रमाणम्।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र परमात्मज्ञानसाधनोपासने गुणोपसंहारानुपसंहारसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोक्तमयुक्तं स्यादिति समर्थनीयौ। प्रागुक्तौ गुणोपसंहारानुपसंहारौ विषयः। कर्तव्यौ न वेति सन्देहः। क्रियाद्वैविध्यदर्शनं सन्देहबीजम्।

पूर्वपक्षः

न कर्तव्याविति पूर्वः पक्षः। प्रमाणाभावात्। नच सर्वगुणोपसंहारे विधिरस्तीत्युक्तमिति। अनुपसंहारेऽपि मोक्षप्राप्तेरुक्तत्वात्। फलान्तरस्य चानपेक्षितत्वाद् व्यर्थविधेश्चानवधेयत्वात्। यदप्युक्तं सर्वविद्यानां भगवद्गुणाभिधायकत्वात् तदुपसंहारः कर्तव्य इति। तन्न। गुणानां नानास्थानेषूक्तत्वेन तदभिधानस्योपसंहारार्थत्वाभावात्। गुणाभिधानस्योपसंहारार्थत्वे वा सर्वेऽप्येकत्रैवोच्येरन्। उक्तं च वैफल्यम्। यदपि प्रकरणभेदादनुपसंहार इति तदप्ययुक्तम्। प्रकरणेष्वेतावदेवोपास्यमित्युक्त्यभावात्। अतः सर्वगुणोपसंहारानुपसंहारयोरयोगान्नोपासनं युक्तमिति।

सिद्धान्तः

सिद्धान्तयन्नधिकरणतात्पर्यमाह- **उपसंहारेति**॥ सर्वगुणोपसंहारानुपसंहारयोः कर्तव्यत्वे प्रमाणमाहास्मिन्नधिकरणे सूत्रकृदित्यर्थः। तत्रोपसंहारप्रमाणदर्शनार्थं सूत्रं पठित्वा व्याचष्टे - **आध्यानायेति**॥ कर्तव्यस्तावदुपसंहारः। सर्वविद्यानां भगवन्नामत्वेन तद्गुणाभिधायकत्वाद्, गुणाभिधानस्य चाशेषगुणोपसंहारपूर्वकध्यानार्थत्वादिति भावः। गुणाभिधानस्य

ध्यानार्थत्वं कुत इत्यत आह- **प्रयोजनेति** ॥ नच गुणोपसंहारो निष्फलः। विप्रकीर्णगुणानुपसंहृत्योपासकस्य तदनुसारिमुक्त्यानन्दातिशयलक्षण-फलसद्भावात्। 'यावत्सेवा परे तत्त्वे तावत्सुखविशेषता।' (ब्र.सू.भा.उदा.) इति स्मृतेः। अत एव विशेषफलस्य दौर्लभ्याय नानास्थानेषूक्तिरुपपन्नेति। गुणाभिधानस्य ध्यानार्थत्वे स्मृतिं चाऽह- **ज्ञानार्थमिति** ॥ **विद्याभिः** ब्रह्मकर्मविद्याभिः । एवं च गुणाभिधानस्य श्रवणपाठावपि प्रयोजनं न ध्यानमेवेत्यत आह- **गुणा इति** ॥ श्रवणादेर्ज्ञानाद्यर्थत्वेन न तद्गुणकथनस्य मुख्यं प्रयोजनमिति भावः। तथाऽपि ज्ञानस्य प्रयोजनत्वान्न ध्यानमेवेत्यत आह-**ज्ञानेति** ॥ ज्ञानमपि ध्यानोपयोगितया प्रयोजनं न मुख्यमिति भावः। **अन्येन** ज्ञानमात्रेण। यद्यपि श्रवणादेर्जनलोकादिफलस्य प्रयोजनत्वसम्भ-वस्तथाऽपि महाफलज्ञानसाधनत्वेन विहितस्य न तत्फलमिति ॥ १९ ॥

सप्रमाणमनुपसंहारसमर्थनम्

एवं सर्वगुणोपसंहारं प्रमाणेन समर्थ्यानुपसंहारं च समर्थयत् सूत्रं पठित्वा व्याचष्टे- **आत्मेति** ॥ गुणान्तरव्यावृत्तिपूर्वकमात्मत्वस्योपासनाविधा-नादनुपसंहारोऽपि सिद्ध्यतीति भावः। नन्ववधारणस्यायोगव्यवच्छेदकत्वे-नोक्तत्वात् कथमन्ययोगव्यवच्छेदकत्वमिति। 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०) इति न्यायेनाविरोधात्। अतो युक्तत्वादुपसंहारानुपसंहार-योरुपपन्नमुपासनमिति सिद्धम्॥ १६ ॥

॥ इत्याध्यानाधिकरणम्॥ ८॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ आध्यानाय प्रयोजनाभावात् ॐ ॥ ३-३-१९ ॥

सङ्गतिः

प्राप्तिनयोक्तविवरणानन्तरम् 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३.३.६), 'न वा प्रकरणभेदात्' (ब्र.सू. ३.३.८) इति तत्पूर्वनयोक्तमुपसंहरणमनुपसंहरणं च विशेषहेतुभिराक्षिप्य दृढीक्रियत इति पेटिकासङ्गतिः टीकायामेवोक्ता। अस्तु तर्हि योग्यतानिश्चायकस्य गुरूपदेशस्य प्रमितत्वाद् बहुगुणोपसंहारः । तत्र प्राप्तशङ्कानां परिहारात् । उपसंहारानुपसंहारौ तु न युक्तौ । निरवकाश-प्रमाणानुपन्यासात्। 'सञ्ज्ञातश्चेत्' (ब्र.सू. ३.३.९), 'न वा प्रकरणभेदात्' (ब्र.सू. ३.३.८) इत्यादिनोक्तानां टीकोक्तदिशा सावकाशत्वात्। नहीदं साधितमपि तत्राऽपतितशङ्कोन्मूलनमन्तरा कस्यचिन्निर्णयस्येष्ट इति शङ्कनादनन्तरसङ्गतिः।

विषयः

यद्यपीदमुपसंहारानन्तरमेव युक्तं प्रतिभाति। तथाऽपि बहुगुणोपसंहारेऽपि शङ्कोन्मूलनलाभाय व्यवधानं युक्तम्। अत एवात्र सर्वोपसंहारोऽल्पगुणोपसंहारश्च विषयः। 'सर्वगुणोपसंहारोऽल्पगुणोपसंहारश्च प्रमाणेन साधितौ, विषयविवेकेन चाविरोधं नीतौ। तयोस्तात्पर्यतः प्रमाणमाह' इति तत्त्वप्रदीपोक्तेः।

चिन्ताक्रमः, पूर्वपक्षश्च

'सर्वगुणोपसंहारानुपसंहारौ विषयः' इति टीकायामल्पगुणोपसंहार एवाभि-प्रेतः। तौ कर्तव्यौ न वा । तदर्थं निरवकाशप्रमाणमस्ति न वेत्यादि चिन्त-नीयम्। कृतः पूर्वःपक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

गुणाम्नानस्य वेदेषु ध्यानान्नान्यत् प्रयोजनम्।
एवकारादात्मशब्दे तन्मात्रस्य विधानतः ॥
सर्वेषामथवाऽल्पानां गुणानामुपसंहृतिः।
कार्याऽन्यथा तु वैयर्थ्यमाम्नानैर्वाऽर्थयोर्भवेत् ॥
अल्पानामेव चेद् ध्यानं सर्वाम्नानमनर्थकम्।
सर्वेषामेव चेद् ध्यानमेवकारो विरुद्ध्यते ॥
अतस्तयोर्विकल्पः स्यात् सोऽपि ज्ञेयो व्यवस्थितः।
फलानां च व्यवस्थित्या साधनेष्वपि सा भवेत् ॥

आध्यानायेति प्रथमसूत्रार्थः

सूत्रार्थस्तु - आङ् अभिविधौ। सर्वे गुणाः श्रोतव्याः मन्तव्या निदिध्यासितव्याश्च, वेदैराम्नातत्वादिति पक्षसाध्यहेतूनामध्याहारः। नचाप्रयोजको हेतुः । वेदे सर्वगुणाम्नानं हि **आध्यानाय** ध्यानान्तानां श्रवणमनननिदिध्यासनानामर्थे भवेत्। प्रयोजनान्तराभावात्। अन्यथा सर्वगुणाम्नानमेवोच्छिद्येतेति हृदयम्। यद्वा, आकारेणाऽऽस्वेत्येषोऽर्थो लभ्यते। आस्वा धिया ध्यानार्थं हि सर्वे गुणा उच्यन्त इति।

आत्मशब्दाच्चेति द्वितीयसूत्रार्थः

क्व तर्हि सर्वानुपसंहारः ? चोऽप्यर्थः। अनुपसंहार इत्यध्याहृतेन सम्बद्ध्यते। अनुपसंहारोऽपि कर्तव्यः। आत्मशब्दादेवसहितात्। अन्यथैवसहितात्मशब्दो न श्रूयेतेति हृदयम्। 'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३.३.७) इत्यनेनेदं दूषितमिति चेन्न। सर्वगुणोपासकं प्रत्यविशेषेऽल्पगुणोपासकं प्रति तदभावात्।

परमतीयाधिकरणानुवादः

अन्ये तु, काठके पठ्यते - 'इन्द्रियेभ्यः परा ह्यर्थाः इत्यारभ्य 'अव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ॥' (कठ.उ. ३.१०) इति। तत्र संशयः। किं प्रत्येकमर्थादीनां परत्वं विवक्षितमुत पुरुषेन्द्रियादिभ्यः सर्वेभ्यः परः प्रतिपाद्यते। तादर्थ्येनैवार्थादिपरत्वं कीर्त्यत इति। तत्र-

श्रुतं परत्वमर्थादेस्तज्ज्ञानाच्च फलं स्मृतम्।
वाक्यभेदो न दोषाय प्रमाणप्रमितत्वतः ॥

अर्थादिपरत्वश्रवणस्य तत्त्वपरत्वसम्भवे सति नान्यार्थत्वम्। नच प्रयोजनाभावादन्यार्थता। तथाऽऽध्यानस्य फलवत्त्वस्मृतेः।

'दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रं चाऽभिमानिकाः ॥
बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः।
पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते ॥'

(भामत्युदाहृतस्मृतिः)

इत्येवं फलवतामाध्यानानां प्रधानत्वात् तत्प्रतिपादकवाक्यानां भेदोऽपि प्रामाणिकत्वादेष्टव्य इति प्रत्येकमर्थादिपरत्वविवक्षायां प्राप्तायामभिधीयते -

दृष्टे महाफले लभ्ये पुरुषस्य निवेदनात्।
अदृष्टं फलमल्पं च न स्यादर्थादिचिन्तनात् ॥

पुरुषपरत्ववेदनेन हि दृश्यते फलमविद्यानिवृत्तिपरमानन्दाविर्भावरूपम्। श्रूयते च -

'विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम् ॥'

(कठ.उ. ३.९)

इति। तल्लाभेऽर्थादिपरत्वध्यानानामदृष्टकतिपयकालनिर्दुःखावस्थानरूपफलं न गृह्यते । तस्माद् वाक्यभेदे निरवद्यप्रयोजनाभावादर्थादिपरत्वप्रतिपादनं पुरुषादिपरत्वप्रतिपादनोपयोगितया तदेकवाक्यतां प्रतिपद्यत इति व्याचख्युः।

तन्निरासः

तन्न । विद्याभेदाभेदादिप्रसङ्गेऽर्थादिपरत्वप्रतिपादनपरत्वादिचिन्तनस्य पादसङ्गत्यदर्शनात्। 'विद्याभेदाभेदप्रसङ्गाद् वाक्यभेदाभेदचिन्ता। ततस्तन्निबन्धनविद्याभेदाभेदचिन्तनात् पादसङ्गतिः' इति कल्पतरूक्तेर्नासङ्गतिरिति चेन्न। मद्रीत्या साक्षात्सङ्गतिसम्भवे प्रासङ्गिकग्रहणायोगात्।

किञ्च, वाजिच्छान्दोग्यशाखयोरन्यूनानतिरिक्तविषयतया श्रुता पञ्चाग्निविद्येति तावत् सिद्धम् । षट्पञ्चत्वयोः पक्षभेदेनोभयत्राऽग्नानाङ्गीकारात् । नचात्र परस्परगुणोपसंहारोऽस्ति । शाखाद्वयस्यापि समगुणत्वात्। तत एव शाखान्तरस्थाग्निहोत्रादिवाक्यवद् भिन्नवाक्यत्वाच्च। तद्वदेव नाभ्यासन्यायावतार इति स्फुटं विद्यैकत्वमपीति कथं वाक्यभेदस्य विद्याभेदप्रयोजकत्वम् ? अनन्तरातीताधिकरणसङ्गत्यभावाच्च। 'ब्रह्मस्वभाव[1]भूतोपसंहार्यानन्दादिधर्मचिन्तनानन्तरमस्वभावस्यानुपसंहार्यस्यार्थादिपरत्वरूपधर्मस्य ब्रह्मप्रतिपत्त्युपायत्वचिन्तनादधिकरणसङ्गतिः' इति कल्पतरूक्तेर्नैष दोष इति चेन्न। अर्थादिपरत्वधर्मस्याप्यानन्दादिवद् ब्रह्मस्वभावत्वस्यैव न्याय्यत्वात्। अन्यथा " 'इन्द्रियेभ्यः परा ह्यर्थाः' (कठ.उ. ३.१०) इत्येष तावत् सन्दर्भो वस्तुतत्त्वप्रतिपादनपरः प्रतीयते" इति भामत्युक्तिविरोधाच्च । ब्रह्मणोऽर्थादिपरत्वस्वभावाभाव-

१. म. स्वरूप।

प्रसङ्गाच्च। आनन्दादीनामप्येवमस्वभावधर्मत्वप्रसङ्गाच्च। काठकस्योपक्रमोपसंहारादिभिर्ब्रह्मण्येकवाक्यतायाः निश्चितत्वेन तद्भङ्गेन पूर्वपक्षानुदयाच्च। उदये वा परिहारासङ्गतेश्च । 'दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः' (भामत्युदाहृतस्मृतिः) इत्यादिफलवाक्यवैयर्थ्यापत्त्या तत्राप्यवान्तरतात्पर्यस्य वक्तव्यतया तत्परत्वप्रतिषेधायोगात्। 'सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम्' (कठ.उ. ३.९) इत्युक्तेः, किं तदध्वनः पारं विष्णोः परमं पदम् इत्यस्यामाकाङ्क्षायामिन्द्रियाद्यनुक्रमणात् परमपदप्रतिपत्त्यर्थं ऐवायमायास इत्यध्यवसीयत इति तद्भाष्येऽप्यमुख्यतात्पर्याङ्गीकारप्रतीतेश्च। नच तत्र मुख्यं तात्पर्यं प्रतिषिध्यत इति वाच्यम्। त्वन्मते पुरुषपरत्वस्यापि मिथ्यात्वेन तत्रापि मुख्यत्वाभावात्।

यच्च दृष्टादृष्टफलत्वेन वैषम्यवर्णनं, तच्चायुक्तम्। पुरुषपरत्ववेदनस्य त्वन्मते निर्गुणपरत्ववेदनविरोधित्वेनाविद्यानिवृत्तिरूपदृष्टफलासम्भवात् । सम्भवे वाऽर्थादिपरत्ववेदनेऽपि साम्यात्। 'तद् विष्णोः परमं पदम्' (कठ.उ. ३.९) इति विष्णुपदप्राप्तेः सगुणप्राप्तिरूपत्वेन महाफलत्वायोगाच्च।

आध्यानायेति सूत्रस्य पराभिमतार्थनिरासः

एतेन, 'इन्द्रियेभ्यः परा ह्यर्थाः' (कठ.उ. ३.१०) इत्यस्य वाक्यस्य पुरुषपरत्वप्रतिपादन एव तात्पर्यम्। कुतः? आध्यानाय आध्यानपूर्वकसम्यग्दर्शनाय सम्यग्दर्शनसाधनत्वादिति यावत् । न त्वर्थादिपरत्वप्रतिपादने तात्पर्यम् । प्रयोजनाभावात्। नहि इतरेषु परत्वेन प्रतिपन्नेष्वर्थादिषु किञ्चित् प्रयोजनं दृश्यते श्रूयते वा- इति सूत्राक्षरव्याख्यानं निरस्तम्। बह्वध्याहारप्रसङ्गाच्च। अर्थादिपरत्ववेदनस्याप्याध्यानपूर्वकार्थादिसम्यग्दर्शनहेतुत्वाच्च। सम्यग्ब्रह्मदर्शनहेतुत्वं तत्र नास्तीति चेन्न। अर्थदर्शनद्वारा ब्रह्मदर्शनं प्रत्यपि हेतुत्वात्। आध्यानपदस्य कथञ्चित् तज्जन्यसम्यग्दर्शनोपलक्षकत्वेऽपि वैषम्यालाभाच्च।

'आत्मशब्दाच्च' इति सूत्रस्य परकृतव्याख्यानं तन्निरसनं च

यस्मात् 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' (कठ.उ. ३.१२) इति प्रकृतं पुरुषमात्मेत्याह। अतश्च नाऽत्मत्वमितरेषां विवक्षितमिति गम्यत इति 'आत्मशब्दाच्च' (ब्र.सू. ३.३.१६) इति द्वितीयसूत्रव्याख्यानं तु पूर्वासङ्गतम्। नहि पुरुषेतरेषामिन्द्रियादीनामात्मत्वमाक्षिप्तम्। नचाऽत्मन्येव श्रुतीनां तात्पर्यं नान्यत्रेत्यद्यापि निश्चितम्।

शैवमतनिरासः

एतेन, अन्नमयाद्याम्नानस्याऽनन्दमयविषयकध्यानार्थत्वेनान्नमयाद्यनुसन्धानक्रममन्तरेण तदन्तरत्वेनाऽनन्दमयस्यानुसन्धानायोगात् ध्यानपर्यन्तमन्नमयादीनामनुसन्धानस्य कर्तव्यत्वेऽपि न ध्यानकालेऽपि तेषामनुसन्धानं कर्तव्यं, प्रयोजनाभावात्। आनन्दमयब्रह्मसिद्धिर्हि प्रयोजनम्। अतस्तत्सिद्धिपर्यन्तमेवान्नमयादीनामनुसन्धानं, न ध्यानकालेऽपि। 'शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य' (अथर्वशिखोपनिषत्.३) इति शिवव्यतिरिक्तानां मुमुक्षुध्येयत्वनिषेधादिति 'आध्यानाय प्रयोजनाभावात्' (ब्र.सू. ३.३.१५) इति सूत्रार्थे स्थिते, 'अन्नमयमात्मानमुपसङ्क्रम्य' (तै.उ.व.३) इत्यादिषु प्रत्येकमात्मशब्दादन्नमयादीनामन्नाद्यधिष्ठातृचेतनत्वमवगम्यत इति द्वितीयस्य व्याख्यानं कालकण्ठीयं निरस्तम्। अन्नमयाद्यन्तरत्वेनाऽनन्दमयस्य ध्यानं नान्नमयादिध्यानं विनोपपद्यत इत्यस्य चोद्यस्य परिहारादर्शनात्।

यच्च, अन्नमयादीनां ध्याने 'शिव एको ध्येयः' (अथर्वशिखोपनिषत्.३) इति श्रुतौ निषेधायोग इत्युक्तं, तत् किमत्र प्राधान्येनान्यध्याननिषेध उत सर्वथाऽपि। नाऽद्यः। पूर्वपक्ष्यपि ध्यानकालेऽप्यन्नमयादीनां ध्यानावश्यकतामाह, न तु मुख्यतया ध्यानमिति तं प्रति निषेधानुपपत्तेरभावात्। न द्वितीयः। तदाम्नानविरोधात्। अन्नमयादीनामन्नाद्यधिष्ठातृचेतनत्वसाधनं त्वत्यन्ता-

सङ्गतम्। जडत्वेऽपि 'सर्वमन्यत् परित्यज्य' (अथर्वशिखोपनिषत्.३) इति निषेधेन तस्य ध्येयत्वाभावोपपत्तेः।

सूत्रद्वयस्य रामानुजाभिमतार्थनिरासः

एतेन यद्येवं प्रियशिरस्त्वादयो ब्रह्मणः पुरुषविधत्वरूपणमात्रार्थाः, न तु ब्रह्मगुणाः, तर्ह्यतथारूपस्य ब्रह्मणः प्रियशिरस्त्वादिना रूपणं किमर्थं क्रियते? अतो बलाद् ब्रह्मगुणत्वं प्रियशिरस्त्वादीनामिति तु प्रागेव निरस्तम्। चोद्यपरिहाराय प्रयोजनान्तराभावादाध्यानायायं रूपणोपदेशः। आध्यानमित्यनुचिन्तनमुपासनमुच्यते इति पूर्वशेषतास्थितौ, 'अन्योऽन्तर आत्माऽऽनन्दमयः' (तै.उ. ५.२) इत्यात्मशब्देन निर्देशात्, आत्मनश्च शिरःपक्षपुच्छासम्भवात्, प्रियशिरस्त्वादयस्तस्य सुखप्रतिपत्त्यर्थं रूपणमात्रमिति गम्यत इति 'आत्मशब्दाच्च' (ब्र.सू. ३.३.१६) इत्यस्यार्थ इति सूत्रद्वयव्याख्यानं केषाञ्चिन्निरस्तम्। आनन्दादीनामपि ध्यानव्यतिरिक्तप्रयोजनाभावेन तेषामपि रूपणमात्रत्वप्रसङ्गत्वात्। धर्मिस्वरूपप्रतिपत्त्यर्थत्वं तेषामिति तु प्रागेव निरस्तम्।

किञ्च, कोऽयं रूपणोपदेशो नाम ? यदि चित्तावतारायाविद्यमानगुणोपदेशस्तर्हि तत्प्रतिपादकवेदस्याप्रामाण्यम्। यदि च बुद्ध्यारोहाय सादृश्योपदेशस्तर्हि शिरआदिसादृश्यस्य ब्रह्मणि सत्त्वेन ब्रह्मगुणत्वप्राप्तिः। किञ्चोपासनमपि विद्यमानस्यैव, न तु विपरीतस्येत्युक्तत्वात् प्रियशिरस्त्वादीनामविद्यमानत्वेन तदुपासनस्यासम्भवात् बलादानन्दादिवदेव प्रियशिरस्त्वादीनामपि ब्रह्मगुणत्वमङ्गीकार्यम्। आत्मन एव 'शिरो नारायणः पक्षो दक्षिणः सव्य एव च' (ब्र.सू.भा. १.१.१५) इत्यादिवचनादवयवावयविभावेन क्रीडोपपत्तेः। अन्यथा तवापि मते कल्याणगुणात्मकविग्रहस्वीकारो न स्यादित्युक्तमेवेत्यलम्।

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

टीकाक्षरार्थस्तु - नानोक्तिन्यायं साध्यप्रदर्शनेन विवृण्वत् 'नच नाना-

स्थानेषूक्तगुणानामनुपासनार्थत्वम्' (न्या.वि.) इति वाक्यमर्थक्रमस्य बलीयस्त्वादनुपासनार्थतेत्यंशं प्रथमतो व्याचष्टे- **न कर्तव्याविति** ॥ चशब्दः 'उपसंहारोऽर्थाभेदाद् विधिशेषवत्' (ब्र.सू. ३.३.६) इत्यनेन गतार्थतां निराहेति मन्वानः प्राथम्यात् तत्प्रकारं दर्शयन् व्याचष्टे- **नच सर्वगुणोपसंहार इति** ॥ चशब्दसूचितां युक्तिमाह- **अनुपसंहारेऽपीति** ॥ मोक्षप्राप्तेः 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्यादावुक्तत्वादिति। 'सञ्ज्ञातश्चेत् तदुक्तम्' (ब्र.सू. ३.३.९) इत्यनेन गतार्थतानिराकरणमपि चशब्दसूचितं मत्वाऽऽह- **यदप्युक्तमिति** ॥ 'नानास्थानेषूक्तगुणानाम्' इत्येतद् व्याचष्टे- **गुणानां नानास्थानेषूक्तत्वेनेति**॥ 'नानास्थानेषु' इत्युक्तिस्वारस्यं व्यञ्जयन् अप्रयोजकतां निराह- **गुणाभिधानस्येति**॥ अनुपसंहारसमर्थनांशेऽपि 'न वा प्रकरणभेदात्' (ब्र.सू. ३.३.८) इत्यनेन गतार्थतापरिहारोऽपि चशब्देनैव सूचित इति हृदि निधाय गतार्थतामनूद्य दूषयति- **यदपि प्रकरणभेदादिति**॥

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

फलसाम्यन्यायं तत्साधनोक्त्या प्राप्तिपर्यन्तत्वज्ञापनेन च विवृण्वत् 'विप्रकीर्णगुणान् पिण्डीकृत्योपास्त्या तत्सदृश[1]फलप्राप्तेस्तथा ध्यानार्थमेव गुणानामुक्तिरित्युपपत्तिः' (न्या.वि.) इति वाक्यं, तत्र प्राप्तेरित्यन्तं तत्साध्याध्याहारेण व्याचष्टे- **नच गुणोपसंहारो निष्फल इति**॥ प्राप्तेरित्यनेन सूचितं प्रमाणं पठति- **यावत्सेवेति**॥ तथा ध्यानार्थमेवेत्युत्तरार्धं व्याचष्टे- **अत एव विशेषेति**॥ अनेन विप्रकीर्णगुणान् नानास्थानेषूक्तान् गुणान् पिण्डीकृत्य उपसंहृत्योपास्त्या तत्सदृशफलप्राप्तेर्विप्रकीर्णगुणोपसंहारपूर्वकोपासनासदृशफलस्य मुक्तावानन्दातिशयलक्षणस्य प्राप्तेः 'यावत्सेवा परे तत्त्वे' (तत्त्वप्रकाशिकोदाहृतस्मृतिः) इत्यादिना प्रमितत्वान्न सर्वगुणोपसंहारो निष्फलः। नापि वेदोक्तानां

---

१. ब. उपासितुस्तादृश

गुणानामनुपासनार्थता। नानास्थानेषूक्तेः अन्यथासिद्धेरित्युच्यते। तथाशब्दो सकृदावर्तते। आद्योऽत एव इत्यर्थे। यत एवं फलाधिक्यं प्रमितमत एव तथा ध्यानार्थं विप्रकीर्णगुणानुपसंहृत्य ध्यानार्थं गुणानां तथोक्तिः विप्रकीर्णतयोक्तिरपि युक्तेति। तथोपपत्तिर्नानास्थानेषूक्तेरन्यथोपपत्तिरिति विवरणार्थ उक्तो भवति।

यद्यप्यत्राधिकरणे 'आत्मशब्दाच्च' (ब्र.सू. ३.३.१६) इति गुणसूत्रोक्तमनुपसंहारप्रमाणमपि न्यायमालायां फलसाम्यपदेनैव सङ्गृहीतमिति तथा विवरणीयम्। तथाऽपि 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्युक्तत्वात् स्फुटत्वाच्च न विवृतमित्यनुसन्धेयम्। अत्र 'प्रयोजनान्तराभावात्' इत्युक्त्या ध्यानार्थत्वेनोक्तिर्न स्यादिति पूर्वपक्षयुक्तिसूचनात्, ध्यानार्थत्वोक्त्यैव फलसाम्ययुक्तेरपि स्मरणात् तयोरपि सूत्रसूचितत्वं ज्ञातव्यम्।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

न कोऽपि सर्वगुणोपसंहारेऽधिकारी दृश्यत इत्यतः शृङ्गग्राहेण दर्शयितुं 'ब्रह्मणा त्वखिलैर्गुणैः। उपास्यः सर्ववेदैश्च' इत्याह। तुशब्देन ब्रह्मणस्तादृशं सामर्थ्यं सूचयति। सर्वेषां सर्वगुणोपसंहारयोग्यत्वान्न 'आत्मशब्दाच्च' (ब्र.सू. ३.३.१६) इत्युक्तमनुपसंहारप्रमाणं युक्तम्। तत्रोच्यते- सच्चिदानन्द आत्मेति मानुषैरेवोपास्यः। यथाक्रमं सुरेश्वरैर्बहुगुणत्वेनोपास्य इति यतो व्यवस्थाऽङ्गीकृता अतो न सर्वेषां सर्वोपास्तिरस्तीति योजनयैतदधिकरणतात्पर्यमपि सञ्चिक्षेप भगवानाचार्यः।

॥ इत्याध्यानाधिकरणम्॥ ८॥

॥ अथाऽत्मगृहीत्यधिकरणम् ॥ ९ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ॥

॥ ३-३-१७ ॥

नच 'आनन्दादयः प्रधानस्य' इत्युक्तिविरोधः। यतः 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ.२.१.), 'विज्ञानमानन्दं ब्रह्म' (बृ.उ.५.९.२८.) इतिवदेवाऽत्मशब्दगृहीतिः।'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ.३-४-७) इत्युत्तरात्।

' आनन्दानुभवत्वाच्च निर्दोषत्वाच्च भण्यते।
नित्यत्वाच्च तथाऽऽत्मेति वेदवादिभिरीश्वरः॥'

इति बृहत्तन्त्रे[1] ॥ १७ ॥

॥ इत्यात्मगृहीत्यधिकरणम् ॥ ९ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादिं

अत्रेश्वरापरोक्षज्ञानसाधनोपासनायामानन्दादिनियतिसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोक्तानुपपत्तिप्रसङ्गात् सा समर्थनीया। प्रकृता भगवद्गुणा विषयः। किमानन्दादयश्चत्वारोऽपि सर्वमुमुक्षूपास्या उताऽत्मत्वमेवेति सन्देहः। उभयथोक्तिः सन्देहबीजम्।

पूर्वपक्षः

आत्मत्वमेव सर्वोपास्यमिति पूर्वः पक्षः। 'आत्मेत्येवोपासीत' (बृ.उ.

१. ह्. इति हि बृहत्तन्त्रे।

३.४.७) इति सावधारणश्रुतेः। आनन्दादित्रयलोपेनाऽत्मत्वमात्रेणोपासनस्य सुशक्यत्वात्। ईश्वरापरोक्ष्यसिद्धिगुणलाभाच्च। अत आत्मत्वस्यैव सर्वोपास्यत्वात् 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्युक्तं श्रुत्यादिविरोधादयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **आत्मेति** ॥ 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इति सावधारणश्रुतिबलेनाऽत्मत्वस्यैवावश्योपास्यत्वमभ्युपेत्य 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्युक्तेः श्रुतिविरोधाभिधानं न युक्तम्। किं नाम? आनन्दादयश्चत्वारोऽप्युपास्या एव। कुतः? भवेदेतद् यदि श्रौतोऽयमात्मशब्दः स्वामित्वमात्रं वक्ति। नैतदस्ति। तेनाऽनन्दादीनामपि गृहीतत्वात् सत्यज्ञानादिवाक्यवदेवेत्यर्थः। कुतोऽयमात्मशब्द आनन्दाद्यभिधायको, न स्वामित्वमात्रवचन इत्यत आह- **अत्रेति** ॥ **अत्र** आत्मत्वे। सर्वेऽप्यानन्दादयो गुणा अन्तर्भवन्तीत्यर्थः। आत्मशब्दस्य स्वामित्वमात्रानभिधायकत्वे स्मृतिं चाऽह- **आनन्देति** ॥ अतो युक्तत्वाच्चतुर्गुणोपासनस्योक्तं युक्तमिति सिद्धम् ॥ १७ ॥

॥ इत्यात्मगृहीत्यधिकरणम् ॥ ९ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ आत्मगृहीतिरितरवदुत्तरात् ॐ ॥ ३.३.१७ ॥

पेटिकासङ्गतिरनन्तरसङ्गतिश्च

'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्युक्तार्थस्यैव बाधकपरिहारेण दृढीकरणेन विवेचनाद् विवरणपेटिकासङ्गतिः। स्यादेतत्। यदि 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इत्येतद्बलादनुपसंहारावधृतिस्तर्हि

तद्बलादात्मत्वस्यैवोपसंहारः स्यात्। यावतैक एव गुणस्तस्मिन् प्रतीयते। तथाच 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्यानन्दादेः सर्वसाधारणोपास्यत्वोक्तिविरोध इत्युत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

आत्मत्वमेव सर्वेषामुपास्यं नान्यदिष्यते।
सुशकत्वादाशुभावादेवकारश्रुतेस्तथा॥

यद्यपीदमानन्दाधिकरणे फलसाम्ययुक्त्या परिहृतम्। तथाऽप्येवकारबलादनुपसंहारप्रमाणत्वोक्त्या सुशकत्वाशुत्वाभ्यां च पुनरुज्जीवितमिति न गतार्थता।

सिद्धान्तः

सिद्धान्तस्तु -

स्यादेवं यदि चाऽत्मत्वं स्वामित्वं नान्यदिष्यते।
नचैवमात्मशब्दोऽयं ब्रवीत्यपि चतुष्टयम्॥

अत्रास्ति[१] दर्शनभेदः। आत्मशब्दः स्वामित्वमात्रस्य वाचकः। 'त्रितयं[२] त्वात्मेत्येवोपासीत' इति वाक्ये विवक्षितमेव, लक्षितमिति यावत्। अत एव 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१), 'विज्ञानमानन्दं ब्रह्म' (बृ.उ. ५.९.२८) इत्यादिवचनेषु नानाशाखाम्नातेषु न विज्ञानादिशब्दवाच्यगुणमात्रगृहीतिः। किन्तु शाखान्तराधिकरणन्यायेन विज्ञानादिपदैर्लक्षणया सत्यत्वादेः, सत्यादिपदैश्च लक्षणयाऽऽनन्दादेश्च गृहीतिरित्यन्योन्योक्तेतरगुणयुक्तत्वेनैव यथा गृहीतिरेवमानन्दादयोऽपि गुणा आत्मशब्देन लक्षणीयाः। यत्तु बृहत्तन्त्रवचनं तत्तु तत्र तात्पर्यमात्मशब्दस्य निश्चाययति लक्षणाबीज-

१. म. अत्रापि। २. म. तृतीयम्।

सिद्ध्यर्थम्। अत एव 'आत्मगृहीतिः' इत्येव सूत्रम्। न त्वात्मशक्तिरिति। 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. ३.४.७) इति वचनोदाहरणमपि त्रिष्वेव लक्षणासिद्ध्यर्थमित्येकं दर्शनम्। स्वामित्ववदेवाऽनन्दज्ञानसत्यत्वान्यपि आत्मशब्दवाच्यान्येव। यथा सत्यज्ञानानन्दादिशब्दा आत्मशब्दादितरे आनन्दज्ञानसत्यत्वानां सम्भूय वाचका एव एवमात्मशब्दोऽपि स्वामित्वानन्दज्ञानसत्यत्वानां वाचक एवेति 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. ३.४.७) इति वाक्ये प्रतिपादनात्।

आनन्दरूपत्वाद् आः। अनुभवरूपत्वाद् अत्, 'अत सातत्यगमने'। माशब्दो ह्यभाववाची। योग्यतया दोषाः सम्बद्ध्यन्ते। निर्दोषत्वात् मा। नित्यत्वादिति लुप्तनकारार्थ इति निर्वचनसम्भवेन बृहत्तन्त्रवचनस्य तात्पर्यग्राहकत्वम्। अन्यथा सर्वत्रापि तत्प्रसङ्गात्। 'आत्मगृहीतिः' इति सूत्रे (ब्र.सू. ३.३.१७) सत्यज्ञानादिपदानां सम्भूय गुणचतुष्टयवाचकत्वेऽपि प्रातिस्विकरूपेण तदवाचकत्वमिति वैषम्यं निवारयितुं नाऽत्मशब्दवाच्यतेत्येव सूत्रितम्। न त्वात्मशब्दस्य तदवाचकत्वादिति द्वितीयं दर्शनम्।

तत्राऽद्यम् 'आनन्दादयो गुणा विवक्षिता एवाऽत्मशब्देनेत्यर्थः' इति तत्त्वप्रदीपोक्तम्। द्वितीयं 'कुतोऽयमात्मशब्द आनन्दाद्यभिधायकः' इत्यादिनेह टीकायामुक्तम्।

ननु 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. १.४.७) इति सर्वेषामपि गुणानामात्मशब्द-वाच्यत्वोक्तेश्चतुर्णामेव गुणानां कुत उपासनानिर्बन्धः। यदि चाऽत्मशब्दवाच्ये स्वामित्वेऽन्तर्भावात् तथेत्युच्यते तर्हि प्रियशिरस्त्वादीनामपि तद्वाच्ये आनन्देऽन्तर्भावादुपास्यत्वमापद्येत। मैवम्। सर्वशब्दो हि प्रकृतस्य सर्वस्य परामर्शकः। न समस्तस्य गुणजातस्य। 'सर्वेभ्यः कामेभ्यः दर्शपूर्णमासौ' इत्यादौ तथा दर्शनात्। प्रकृताश्च 'प्राणन्नेव प्राणो भवति, वदन् वाक्, शृण्वन्

श्रोत्रं, मन्वानो मनः' इति पूर्ववाक्योक्ताः स्वामित्वानन्दज्ञानसत्यत्वरूपाः गुणा एव, न त्वधिकाः। अत्र 'णश्च निर्वृतिवाचकः' प्रकर्षेण आसमन्तात् आनन्दरूपः। 'प्राणः प्रणयनादेषः' इति सकलजगत्प्रणयनरूपस्वामित्वात् प्रकर्षेणाऽनन्दरूपत्वं च निर्दोषत्वेनैवेति वा प्रगतो दोषेभ्य इति निर्दोषत्वं प्रशब्दस्यार्थः। आनन्दरूपत्वमाशब्दस्यार्थः, चेष्टकत्वरूपस्वामित्वमन-शब्दस्येति वा प्राणशब्देन निर्दोषत्वानन्दस्वामित्वानां 'वदन् वाक् पश्यन् चक्षुः' इत्यादिना ज्ञानरूपत्वस्य चाभिधानात्। वचनस्य ज्ञानपूर्वकत्वनियमात्।

'न चाऽश्वापरोक्ष्याय' इति पूर्वपक्षन्यायविवरणस्य यथाटीकं व्याख्यानम्

टीकाक्षरार्थस्तु - आशुतान्यायं धर्मिसाध्यप्रदर्शनाभ्यां विवृण्वत् 'नचाऽश्वापरोक्ष्यायाऽनन्दादीनामपि लोपेनाऽत्मेत्येतावता पूर्यते' (न्या.वि.) इति वाक्यमर्थप्राधान्याद् व्युत्क्रमेण व्याख्याति- **आत्मत्वमेव सर्वेति**॥ 'आत्मगृहीतिः' (ब्र.सू. ३.३.१७) इत्यनेन सूत्रेण 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इत्यनुपसंहारप्रमाणम्। नच 'आनन्दादयः प्रधानस्य' इत्युक्तिविरोध इति भाष्यविन्यासेन च सूचितां युक्तिं साक्षात् सङ्गतत्वेनाऽदौ योजयति- **आत्मेत्येवेति**॥ 'आनन्दादीनामपि लोपेन' इति सूचितां युक्तिमाह- **आनन्दादित्रयेति**॥ 'आश्वापरोक्ष्याय' इति तादर्थ्यचतुर्थीसूचितां युक्तिमाह- [1]**ईश्वरापरोक्ष्यसिद्धीति**॥ अनेन गुणान्तरविषयमनोवृत्तिनैरन्तर्यस्य प्रयत्नोत्कर्षेण दुःशकत्वेन बहुकालविलम्बेन फलजनकत्वेन चाऽत्मत्वमात्रोपासनस्य प्रयत्नगौरवाभावेन सुशकत्वात् तेन शीघ्रमेवाऽपरोक्ष्यार्थम् आश्वापरोक्ष्यसिद्धिरूपगुणभावादिति यावत् प्रियशिरस्त्वादीनामिवाऽनन्दादीनामपि त्रयाणां लोपेन कृतेनाऽत्मेत्येतावतोपासनेन पूर्यतेऽयमधिकारी फलाय। आत्मत्वमेव सर्वोपास्यमिति यावदिति विवरणयोजना सूच्यते।

१. म. आश्वापरोक्ष्यसिद्धीति॥

'आत्मशब्दार्थविशेषत्वादानन्दादीनाम्' इति सिद्धान्तन्यायविवरणस्य यथाटीकं व्याख्यानम्

विशेषन्यायं भावप्रधानत्वेन विवृण्वत् 'आत्मशब्दार्थविशेषत्वादानन्दादीनाम्' (न्या.वि.) इति वाक्यं सूचनया व्याचष्टे- **तेनाऽनन्दादीनामपीति**॥ तेनाऽनन्दादीनामानन्दज्ञानसत्यत्वानामपि 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. १.४.७) इत्युत्तरवाक्ये आत्मशब्दार्थविशेषत्वादात्मशब्देन ग्रहणं सम्भवति। अतोऽनात्मशब्दार्थव्यवस्थिति[1]परेणैवकारेण न विरोधः। सुशकत्वं शीघ्रत्वं च साधनफलयोः साम्यनियमेन फले दुःशकत्वातिचिरत्वयोरेव दर्शने न गुणः, प्रत्युत दोष एवेति भाव इति विवरणं व्याख्येयम्। अत्राऽत्मगृहीतिरित्यनेनाऽत्मशब्दार्थविशेषाणामानन्दादीनां ग्रहणमित्यर्थकेन बहूनामर्थानामनुसन्धाने विलम्बावश्यम्भावेन स्वामित्वमात्रोपासने आशुत्वमात्मशब्दार्थविशेषत्वं च सूचितमिति आशुताविशेषयोर्न्याययोर्युक्तः सङ्ग्रहः।

सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यसूचनम्

एतदधिकरणतात्पर्यमपि 'सच्चिदानन्द आत्मा' इत्यादिना 'उपास्यः' इत्यन्तेनोक्तं वेदितव्यम्। तस्यैवं योजना। मानुषैः चतुर्गुणोपासकैः आत्मशब्दात् सच्चिदानन्द आत्मेति ज्ञात्वोपास्यः, न तु स्वामित्वमात्रम्। सुरेश्वरैस्तु यथाक्रमम् आत्मशब्दोक्तैर्बहुगुणैरुपास्यः। आत्मशब्दस्तान् प्रति पञ्चषट्सप्तादीन् बहुगुणान् वक्ति। न तु, मानुषान् प्रतीव चतुर एव गुणानिति यावत्। ब्रह्मणा त्वखिलैर्गुणैरात्मशब्दोदितैरुपास्यः। आत्मशब्दस्तं प्रति सर्ववेदोक्तान् गुणान् ब्रवीति। न तु सुरेश्वरान् प्रतीव बहूनेवेति। तथाच 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इति विधावात्मशब्देन यान् प्रति येषां गुणानां गृहीतिः, [2]यान् अधिकारिणः

१. म. व्यवच्छित्ति। २. म. यावदधिकारिणः।

प्रति यानेव गुणान् ब्रवीतीति यावत्, त एव तैरुपास्या इत्यर्थलाभात्, सर्व-मुमुक्षून् प्रति चायमात्मशब्दश्चतुरोऽपि गुणान् वक्तीति तददतिरिक्तगुणस्य सर्वानुपास्यत्वेऽपि एवकारव्यावर्त्यलाभान्नाऽनन्दादीनां त्रयाणां व्यावृत्तिरिति भावः।

॥ इत्यात्मगृहीत्यधिकरणम् ॥ ९ ॥

॥ अथान्वयाधिकरणम् ॥ १० ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ अन्वयादिति चेत् स्यादवधारणात् ॐ ॥
॥ ३-३-१८ ॥

सर्वगुणानामन्वय आत्मशब्दे भवति। 'आप्तव्याप्तेरात्मशब्दः परमस्य प्रयुज्यते' इति वचनादिति चेत्, सत्यम्। स्याच्चैवम्। 'आत्मेत्येव' (बृ.उ.३-४-७) इत्यवधारणात्। अन्यथा सर्वोपसंहारवचनविरोधात्॥ १८॥

॥ इत्यन्वयाधिकरणम् ॥ १० ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनात्मशब्दोक्तगुणोपासनस्य सर्वैः कर्तव्यत्व-साधनादस्ति शास्त्रादिसङ्गतिः। अन्यथाऽनुपसंहारप्रमाणोक्तिर्व्याहन्यत इति साधनीयम्। प्रकृतात्मशब्दोक्तगुणा एवात्र विषयः। सर्वोपास्या न वेति सन्देहः। गुणद्वैविध्यदर्शनं सन्देहबीजम्। पूर्वपक्षस्य सूत्र एवोक्तत्वात् तदुपन्यस्य पूर्वपक्षांशं तावद् व्याचष्टे- **अन्वयादिति ॥**

पूर्वपक्षः

आत्मशब्दोक्तगुणाः न सर्वोपास्याः। 'आप्तव्याप्तेः' इति तस्य सर्व-गुणाभिधायकत्वोक्तेः। तथाचायं श्रुतचतुर्गुणोपासनस्य पुंसो विभ्रमकरो भवति। न त्वेवमुपासनं कार्यमिति निश्चायकः। न ह्युभयथा श्रुतवतोऽन्य-तरस्मिन्नर्थे निश्चयो भवति। नच वाच्यं तस्य सर्वगुणाभिधायकत्वेऽपि स्वयोग्यं

तदुक्तमुपास्यमिति। तथा सत्यवधारणविरोधात्। अत आत्मशब्दोक्तगुणानां सर्वोपास्यत्वाभावादनुपसंहारप्रमाणत्वानुपपत्तिरिति भावः।

सिद्धान्तः

सिद्धान्तांशं व्याचष्टे- **सत्यमिति** ॥ कथं परेणोक्तमभ्युपगम्यत इत्यत आह- **स्यादिति** ॥ सर्वगुणाभिधायकत्वमात्मशब्दस्य यत् परेणोक्तं तत् तथा स्यादेवातो नाभ्युपगमो दोषाय। इयांस्तु विशेषः। सर्वगुणांश्चाऽत्मशब्दो वदन् ब्रह्मादीन् प्रत्येव वदति नान्यान् प्रति। तथाऽनुभवात्। अतस्तस्याविभ्रमकरत्वात् तदुक्तोपासनं सर्वेषां युक्तमिति भावः।

ननु ब्रह्मादीनामात्मशब्दः सर्वगुणान् ज्ञापयतीति कुतः? अन्यान् प्रतीव ब्रह्मादीन् प्रत्यल्पगुणाभिधायकः किं न स्यादित्यत आह- **आत्मेति** ॥ अवधारणेऽपि किमायातमित्यत आह- **अन्यथेति** ॥ अन्ययोगव्यवच्छेदकावधारणयुक्तात्मशब्दो ब्रह्मादीनधिकरोति, ततस्तैरपि तदुक्तमेवोपास्यम्। तथाच यद्यसौ न तान् प्रति सर्वगुणानभिधत्ते तर्हि 'सर्वैर्गुणैरुपास्योऽसौ ब्रह्मणा परमेश्वरः।' (ब्र.सू.भा.उ.भविष्यत्पर्ववचनम्) इत्यादिसर्वोपसंहारवचनविरोधः स्यात्। अतोऽसौ तेषां सर्वगुणाभिधायक इति भावः। तस्मादात्मशब्दोक्तगुणोपासनं सर्वेषामस्तीत्युक्तमुपपन्नमिति सिद्धम्॥ १८ ॥

॥ इत्यन्वयाधिकरणम्॥ १० ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ अन्वयादिति चेत् स्यादवधारणात् ॐ ॥ ३.३.१८ ॥

एतदधिकरणप्रतिपाद्यविषयः

अत्राऽत्मशब्दोक्तगुणोपासनस्य सर्वैः कर्तव्यत्वं समर्थ्यत इति पादसङ्गतिः। नन्वत्र सूत्रभाष्यपर्यालोचनयाऽऽत्मशब्दस्य कृत्स्नगुणवाचकत्वशङ्का, तदभ्युपगमेन समाधानं च प्रतीयते। न त्वात्मशब्दोक्तानां गुणानां सर्वोपास्यत्वमिति चेन्न। गुणाधिकानामधिकारिणां भगवद्गुणानधिकान् प्रकाशयतीत्यवधारणोपपत्तेरिति विवरणे गुणाननधिकानन्यूनानेव गुणान् प्रकाशयतीत्यर्थपर्यवसानेन चतुर्मुखं प्रति सर्वेषां गुणानां, चतुर्मुखेतरोत्तमाधिकारिणः प्रति तन्न्यूनानां बहूनां गुणानां , अधमाधिकारिणः प्रति तन्न्यूनानां चतुर्णां गुणानां चेति तत्तदुपासनायोग्यानां सर्वेषां गुणानामात्मशब्देनैवोक्ततयाऽयोगव्यवच्छेदकावधारणेन च सर्वेषामात्मशब्दोक्तानां गुणानामुपासनाभावे पुरुषार्थाभावप्रतीतेस्तदधिकारिणः प्रति तत्तद्योग्यतानुसारेणाऽत्मशब्दोक्तगुणानां सर्वोपास्यत्वसिद्धेः।

सङ्गतिसंशयौ

ननु 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. १.४.७) इति वचनाद् यद्यात्मशब्देनाऽनन्दादिचतुर्गुणगृहीतिस्तर्हि 'आप्तव्याप्तेः' इत्यादिवचनात् सर्वगुणगृहीतौ सत्यां सर्वेषां सर्वगुणोपासनेऽनधिकारादात्मशब्दोक्तगुणानां सर्वोपास्यता च न स्यादिति शङ्कनादनन्तरसङ्गतिः। अत एव 'आत्मशब्दाच' (ब्र.सू. ३.३.१६) इत्यत्र प्रकृतात्मशब्दोक्ता गुणा न सर्वोपास्या उत सर्वोपास्या इति। तदर्थमयमात्मशब्दः किं सर्वान् प्रति सर्वान् गुणान् ब्रवीति उत कांश्चिदेव प्रति। तदन्यांस्तांस्तान् प्रति तु तत्तद्योग्यान् गुणानेव ब्रवीति न त्वधिकानिति सन्देहः।

पूर्वपक्षः

न सर्वोपास्या इति पूर्वः पक्षः। तथाहि। आत्मशब्दस्तावन्निरङ्कुशतया सर्वगुणानां वाचकः। 'आप्तव्याप्तेरात्मशब्दः' इति वचनात्। नच 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. १.४.७) इति श्रुत्याऽयमात्मशब्द आनन्दादिगुण-

चतुष्टयवाचक इत्यभिलापकः शब्दोऽस्ति। नच सर्वगुणाभिधायकत्वेन प्रसिद्धे आत्मशब्दे आनन्दादिचतुष्टयाभिधायकत्ववचनं व्यर्थम्। शते पञ्चाशन्न्याये-नैवानुक्तिसिद्धेरिति वाच्यम्। आत्मशब्दस्तु स्तुत्यर्थमेव इत्यनुवाद इत्युपपत्तेः।

एतेन

'आनन्दानुभवत्वाच्च निर्दोषत्वाच्च भण्यते ।
नित्यत्वाच्च तथाऽऽत्मेति वेदवादिभिरीश्वरः ॥'

(ब्र.सू.भाष्योदाहृतबृहत्तन्त्रवचनम्)

इति वचनेन 'अत सातत्यगमने' इति धातुमूलेनेहाप्यक्षरानुगतिदर्शनाद् 'वेदवादिभिर्भण्यते' इत्युक्तविद्वद्रूढिरपि 'परमस्य प्रयुज्यते' इत्युक्तविद्वद्रूढ्या समैव। किञ्च, यद्ययमात्मशब्दः सर्वगुणाभिधायको न स्यात्, तर्हि केषाञ्चिदपि सर्वगुणोपासकत्वं न स्यात्। 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इत्यत्रान्ययोगव्यवच्छेदकेनैवकारेणाऽत्मशब्दानुक्तगुणस्योपासनानिषेधात्। इष्यते च ब्रह्मादीनां सर्वगुणोपासनम्। नचायोगव्यवच्छेदार्थत्वमेवकारस्येति वाच्यम्। अन्ययोगव्यवच्छेदार्थत्वस्यापि स्वीकारात्। अन्यथा 'आत्मशब्दाच्च' (ब्र.सू. ३.३.१६) इति सूत्रेऽनुपसंहारप्रमाणत्वोक्तिविरोधः। गुणान्तर-व्यावृत्तिपूर्वकमात्मत्वस्योपासनाविधावेव तत्सम्भवात्। तथाचाऽत्मशब्दो निरङ्कुशं सर्वगुणाभिधायक एवेति न कतिपया एव गुणा आत्मशब्दोक्ताः। सर्वेषां सर्वगुणोपासनेऽधिकाराभावस्य च प्राप्तिनये सिद्धत्वान्न सर्वैरात्मशब्दोक्त-गुणानामुपास्यत्वम्।

नन्वस्तु सर्वेऽपि गुणा आत्मशब्दोक्ता इति। तथाऽपि

'यस्य यावद् गुणाः स्पष्टं प्रतिभासन्त्युपासने।
युगपत् स्वभुजौ यद्वद् ध्यायेत् तावत एव सः ॥'

(तत्त्वप्रकाशिकोदाहृतवचनम्)

इत्युक्तन्यायेनाऽत्मशब्दोक्तानां मध्ये स्पष्टप्रतिभासविषयाणां गुणानामुपासनं कुतो न स्यात्। अत एवावधारणविरोधोऽपि नास्ति। मैवम्। अवधारणस्यायोग-व्यवच्छेदार्थत्वेन तद्विरोधापातात्। तदा ह्ययमर्थो भवति- आत्मशब्दोक्ता गुणा उपास्या एव। आत्मशब्दोक्तगुणानुपासने नाभीष्टसिद्धिरिति। ततः कथमव-धारणविरोधाभावः? आत्मशब्दोक्तानां सर्वगुणानां सर्वायोग्यतया तदनुपासन-स्यावर्जनीयत्वात्। न वाऽन्ययोगव्यावर्तक एवैवकारः। 'आत्मैव' इत्यवधारण-मनात्मत्वनिवृत्त्यर्थमित्युक्तत्वात्। नच सर्वगुणोपासकान् प्रति अयोग-व्यवच्छेदपरः, इतरांस्तु प्रत्यन्ययोगव्यवच्छेदपरः, अन्यथा विरोधापरिहारादिति वाच्यम्। सर्वान् प्रत्यर्थद्वयस्याप्यङ्गीकार्यत्वाद् विरोधस्य प्राप्तिनयेन परिहृत-त्वात्। अत 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इति विधिः 'आप्तव्याप्तेः' (ब्र.सू.भाष्योदाहृतवचनम्) इति वचनानुसारेण सर्वेऽप्यात्मशब्दोक्ताः, ते चोपास्या एव, न त्वात्मशब्दानुक्ता एवोपास्या इत्यर्थपर्यवसानाच्चतुर्मुखस्यैव सर्ववेदोक्तगुणोपासनाधिकारित्वेन तस्य तत्र प्रवृत्तिकरोऽप्यन्येषां चतुर्गुणो-पासकादीनां चतुःपञ्चषादिगुणा एवास्माकमुपास्या एव, न त्वधिका इति प्राप्तिनयादिश्रवणेन विजानतां संशयाधायकत्वाद् विभ्रमकर एव स्यात्। नत्वेवमस्माभिः प्रवर्तितव्यमिति निश्चायकः।

ननु चतुर्मुखं प्रति सर्वगुणाभिधायकोऽप्यात्मशब्दः नास्मान् प्रति तथा। किन्त्वस्मदादियोग्यसर्वगुणानेवाभिधत्त इति कुतो न निश्चायक इति चेन्न। नह्ययमात्मशब्दश्चेतनः। येन तत्तद्योग्यतामालोच्य तत्तद्योग्यानेव सर्वगुणानभिधत्त इति स्यात्। नचात्र प्रमाणमस्ति। येन हि वचनस्यातिभारोऽस्तीति विश्वसनीय-मेतत् स्यात्। तस्मादात्मशब्दस्य सर्वगुणवाचकत्वेन विभ्रमकरत्वात् सर्वगुणो-पासने सर्वेषामधिकाराभावाच्चाऽत्मशब्दोक्तगुणानां सर्वोपास्यत्वाभावे सिद्धेऽस्य वचनस्यानुपसंहर्तृविषयत्वाभावेन पूर्वोक्तानुपसंहारप्रमाणत्वानुपपत्तिः। सङ्ग्रहश्च-

सर्वान् प्रति च सर्वेषां गुणानामभिधायकः ।
आत्मशब्दोऽनुपहृतौ प्रमाणं न भवेत् कचित् ॥ इति ।

सिद्धान्तः

सिद्धान्तस्तु -

तत्तद्योग्यगुणानेव तांस्तान् प्रति वदेदयम् ।
नानार्थं वदतोऽस्त्वस्यानुपसंहारमानता ॥

युक्तमेवाऽत्मशब्दोक्तगुणानां सर्वोपास्यत्वं, तस्यानुपसंहारप्रमाणत्वं च । नहि वयमात्मशब्दः सर्वान् प्रत्यपि निरङ्कुशं सर्वान् गुणानभिधत्त इति वदामः । किन्तु तत्तद्योग्यतानुसारेण तत्तद्योग्यानेव सर्वान् गुणानिति । नचाचेतनत्वेनोक्तदोषः । नानार्थ इवाचेतनोऽपि शक्तिग्रहमनुसृत्यानेकशक्तिभिश्चतुर्मुखं प्रति सर्वान् गुणान् प्रत्याययति । तदनभिज्ञान् प्रति तु यथाशक्तिग्रहमल्पानेव गुणान् प्रकाशयतीत्युभयोपपत्तेः । नच सर्वान् प्रत्यपि प्रत्यायकतैकरूपैवाङ्गीकर्तुं शक्यते । सा हि सर्वगुणप्रत्यायकत्वपक्षाश्रयणेन वाऽल्पगुणप्रत्यायकत्वपक्षाश्रयणेन वा स्यात् । तत्राऽद्यः पक्षः 'सत्यो ज्ञानः' (ब्र.सू.भा.उदाहृतकमठश्रुतिः) इत्यादिप्रमाणविरोधाद्, बहुबाधस्यान्याय्यत्वाच्चायुक्तः । द्वितीयस्त्वन्ययोगव्यवच्छेदकावधारणयुक्तात्मशब्दबलादात्मशब्दोक्तमेव गुणजातमुपासीतेति ब्रह्मादीनपि प्रत्याययतीति निश्चयेनाऽत्मशब्दोक्तं गुणजातं यदि तान् प्रत्यल्पमेव स्यात्, तर्हि न तेषामपि सर्वोपसंहारः प्राप्नोति । तथाच 'सर्वैर्गुणैरुपास्योऽसौ' इति प्रतीतसर्वोपसंहारविरोध इत्ययुक्त इति । वचनं चात्र 'सर्वान् गुणानात्मशब्दो ब्रवीति ब्रह्मादीनामितरेषां न चैव' (ब्र.सू.भा.उदाहृतभाल्लवेयश्रुतिः) इति त्रयोदशे सूत्रकृदेव वक्ष्यतीति सर्वमतिचतुरस्रम् ।

अत्रान्याभिमतमधिकरणशरीरम्

अत्र सूत्रद्वयमेकाधिकरणमन्यैर्व्याख्यातम् । ऐतरेयके श्रूयते - 'आत्मा वा

इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत् स ईक्षत लोकान्नु सृजै' इति । 'स इमान् लोकानसृजत' (ऐ.उ. २.१.१) इति । तत्र संशयः । किमात्मशब्देन हिरण्यगर्भोऽभिधीयते उत परमात्मेति । तत्र -

आमहाभूतसृष्ट्युक्तेः प्रजापतिपरा श्रुतिः ।
आत्मैवेदमग्र आसीदिति वाजसनेयवत् ॥

पारमेश्वरसृष्टिः आकाशादिका । यथा - 'आत्मन आकाशः सम्भूतः' (तै.उ. २.१.१) इति । इह तु लोकपालाद्यग्न्यादिसृष्टिर्न तथा । नचात्र भूतानि श्रुतानि । यथा वाजसनेयके- 'आत्मैवेदमग्र आसीत् पुरुषविधः' (बृ.उ. १.४.१, १७) इत्युपक्रम्य 'अग्निमसृजत' इत्यादिभौतिकसृष्टिरुच्यमाना हिरण्यगर्भकर्तृका, एवमेषामपि । तथाच विमतमैतरेयवाक्यं हिरण्यगर्भविषयम्, महाभूतसृष्ट्यविषयत्वे सत्यग्न्यादि-सृष्टिविषयत्वात्, वाजसनेयवाक्यवदिति प्राप्तेऽभिधीयते -

प्रतिष्ठितं पृथिव्यादि ब्रह्मणीत्युपसंहृतेः[1] ।
उपक्रमेऽपि लोकानां कर्तृ ब्रह्मेति गम्यते ॥

उपरिष्टाद्धि 'पृथिवी वायुराकाश आपो ज्योतींषि' (ऐ.उ. १.१) इत्यादिना सह महाभूतैः सर्वं कार्यजातमनूद्य 'सर्वं तत् प्रज्ञानेत्रं प्रज्ञानेतृकं ज्ञाने प्रतिष्ठितम्' (ऐ.उ. ५.३) इत्युक्त्वा 'प्रज्ञानं ब्रह्म' (ऐ.उ. ५.३, आत्मप्रबोधोपनिषत्-१) इति श्रावयिष्यति । तेनोपक्रमस्योपसंहाराद् ब्रह्मपरत्वं निर्णीयत इति ।

तन्निरासः

तन्न । पादसङ्गत्यभावात् । महाभूतसृष्ट्यनुक्तिमात्रेण प्राप्तस्य निर्दलपूर्वपक्षस्य निराकरणायाधिकरणान्तरारम्भायोगाच्च । 'आत्मैवेदमग्र आसीत् पुरुषविधः' (बृ.उ. १.४.१,१७) इत्यादिवाजसनेयवाक्यस्य हिरण्यगर्भविषयत्वासम्प्रति-

१. म. ब्रह्मणेत्युपसंहृतेः ।

पत्तेश्च । अन्यथा जन्मादिसूत्रोक्तलक्षणस्यातिव्याप्तिप्रसङ्गात् । वाजसनेयके ईश्वरप्रेरितस्य हिरण्यगर्भस्य कारणत्वप्रतिपादनेऽपि न लक्षणातिव्याप्तिरिति चेन्न। तर्हि तत एव प्रकृतवाक्यस्य हिरण्यगर्भविषयत्वेऽपि दोषाभावात् तन्निराकरणायाधिकरणारम्भो व्यर्थ एव। उपक्रमस्योपसंहाराद् ब्रह्मपरत्वं निर्णीयत इति सिद्धान्तोऽप्यपसिद्धान्तग्रस्तः । यत उपक्रमस्य प्राबल्यं त्वत्सिद्धान्तः । उपक्रमस्य सन्दिग्धत्वाद् दौर्बल्यमिति चेन्न। आत्मशब्दस्य जीवे रूढतया 'आत्मा विरिञ्चिः सुमनाः सुधौतश्चेति कथ्यते' (अ.को.)इति हिरण्यगर्भे रूढतया चोपक्रमस्यासन्दिग्धत्वात्। उपसंहारे पृथिव्यादिकार्यजातमनूद्य ब्रह्माधीनत्वमेवोच्यत इति पृथिव्यादीनां सृष्ट्यनुक्तेश्च। अयुक्तश्चानयोरुपक्रमोपसंहारभावनिश्चयः। अध्यायान्तरगतत्वेन 'पृथिवी वायुराकाश आपो ज्योतींषि' (ऐ.उ. ३.१.१) इत्यादेर्विद्यान्तरत्वोपपत्तेः। अन्यथा 'अथातो रेतसः सृष्टिः' (ऐ.उ. १.३.१) इति प्रजापत्युपक्रमोऽपि 'पृथिवी वायुः' (ऐ.उ. ३.१.१) इत्युपसंहाराद् ब्रह्मपरत्वेन निर्णयसम्भवाद् हिरण्यगर्भविषयो न स्यात्। तथाच 'ऐतरेयिणोऽपि "अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः" (ऐ.उ. १.३.१) इत्यत्र पूर्वस्मिन् प्रकरणे प्रजापतिकर्तृकां विचित्रां सृष्टिमामनन्ति' इत्यादित्वद्भाष्यविरोधः।

'आत्मगृहीतिः' इति सूत्रस्य 'अन्वयात्' इति सूत्रस्य च पराभिप्रेतार्थनिरासः

एतेन 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ.उ. २.१.१) इत्यत्राऽत्मपदेन परमात्मनो गृहीतिः इतरवत् 'आत्मन आकाशः सम्भूतः' (तै.उ. २.१.१, यो.चू.उ. ७२) इत्यत्रेव, उत्तरात् 'पृथिवी वायुराकाशः' (ऐ.उ. ३.१.१) इत्याद्युत्तरवाक्यादिति सूत्रयोजनं निरस्तम् । इन्द्रियादिपरत्वतात्पर्यकत्वे वाक्यान्वयादर्शनवदिह हिरण्यगर्भपरत्वे वाक्यान्वयाद्, वाक्यभेदाभावादिति यावत्, अनुपपन्नं परमात्मग्रहणमिति चेत्, आत्मैवेत्युपपत्तेः। प्रागेकत्वाव-

धारणाद्धिरण्यगर्भग्रहणे एकत्वावधारणममुख्यं स्यादिति द्वितीयव्याख्यानं चायुक्तम्। बह्वध्याहारप्रसङ्गात्। अन्वयादित्यस्य स्वार्थत्यागाच्च।

'आत्मगृहीतिः' इति सूत्रस्य अद्वैतिभिः कृते व्याख्यानान्तरे विषयसंशयौ

अत्र पादसङ्गत्यर्थं वर्णकान्तरमुक्तम्। तथाहि। वाजसनेयके 'कतम आत्मा इति योऽयं विज्ञानमयः पुरुषः' (बृ.उ. ४.६.७) इत्यात्मशब्देनोपक्रम्य 'स वा एष महानज आत्माऽजरोऽमृतो ब्रह्म' (बृ.उ. ४.४.२५) इति ब्रह्मात्मत्वमुपसंह्रियते । छान्दोग्ये तु 'सदेव सौम्य' (छा.उ. ६.२.१) इत्युपक्रम्य 'तत्त्वमसि' (छा.उ. ६.८.७, ६.९.४, ६.१४.३) इति सच्छब्दार्थस्याऽत्मतादात्म्यमुपसंह्रियते। तत्र संशयः। विद्यैकत्वं नानात्वं वेति।

पूर्वपक्षः

सत्त्वेनोपक्रमे सत्त्व आत्मदृष्टिर्विधीयते।
आत्मनो ब्रह्मता बोध्या यत्राऽत्मोपक्रमे श्रुतः॥

सच्छब्दस्याऽत्मानात्मसाधारणसत्तासामान्यवाचित्वात्, तस्य चोपक्रमश्रुतस्यैकस्मिन् वाक्ये बलीयस्त्वात् 'तत्त्वमसि' (छा.उ. ६.८.७) इति वाक्यस्योपसंहारस्थप्रकृतसच्छब्दार्थं तच्छब्देन परामृश्य तदेकवाक्यतापन्नस्य तदनुरोधेन सत्तासामान्ये परमात्मदृष्टिविध्यर्थत्वम्। त्वंशब्देनात्र जीववाचिना तदभिन्नपरमात्मोपलक्षणीयः। नहि जीवोपासनं कस्यचित् फलाय कल्प्यत इति। वाजसनेयवाक्ये तु जीवस्य ब्रह्मैक्यं प्रतिपाद्यत इति।

तत्र सिद्धान्तः

तत्रोत्तरम् -

साधारणार्थः सच्छब्दो वाक्यशेषादिनाऽऽत्मनि।
निर्णीयते न च ब्रह्म मुक्त्वाऽन्यस्यास्ति सत्यता॥

सच्छब्दस्य जातिवाचित्वेन प्रतिव्यक्तिवृत्तेः आत्मा वाऽनात्मा वा सन्निति सन्देहे सति, 'स आत्मा तत्त्वमसि' (छा.उ. ६.८.७) इति निर्देशादात्मैव सच्छब्दार्थ इति निर्णीयते। अपि च सच्छब्देनापि प्राक्तनेनैकविज्ञानेनाऽत्माद्वैतावगमात् सच्छब्दस्याऽत्मपरत्वनिर्णयः । नच सच्छब्दो जातिवचनः । येनाऽत्मत्वानात्मत्वार्थसन्देहः स्यात्। किन्तु आकाशादिशब्दवद् व्यक्तिवचनः। सन्मात्रार्थः आत्मन एव स्यात्। अन्यस्य मिथ्यात्वात्। एवं चोपक्रम एव निर्णीतार्थ इति।

तत्र पूर्वपक्षस्तावदयुक्तः

तत्र छान्दोग्ये सदुपक्रमो वाजसनेयके आत्मोपक्रम इत्युपक्रमभेदाद् विद्याभेद इति पूर्वपक्षस्तावदयुक्तः। बहुतररूपैक्यप्रत्यभिज्ञानेनाल्परूपभेदस्यान्वयितव्यत्वस्य पूर्वत्र प्रतिपादितत्वात्। अस्ति चानयोर्विद्ययोरैक्योपसंहाराभ्यासापूर्वतार्थवादोपपत्तीनामेकरूपता । नास्ति चात्रोपक्रमभेदः । सदात्मशब्दयोस्त्वन्मते शुद्धचैतन्यरूपाधिष्ठानब्रह्मपरत्वेन प्रसिद्धत्वात् ।

सिद्धान्तोऽप्ययुक्तः

उपसंहारेण सिद्धान्तो हि 'अन्यथात्वं चशब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३.३.७) इत्यधिकरणसिद्धान्तविरुद्धः[1]। तत्र हि 'न वा प्रकरणभेदात्' (ब्र.सू. ३.३.८) इति सिद्धान्तसूत्रेण प्रकरणशब्दितोपक्रमभेदाद् विद्याभेद आश्रितः। अत्राऽत्मन एव सत्त्वादन्यस्य मिथ्यात्वात् सच्छब्द आत्मपर्याय इत्युपक्रमभेद एवाप्रसिद्ध[2] इत्युच्यत इति चेन्न। तत्रापि लक्षणयैकार्थ्यसम्भवेनोपक्रमभेदासिद्धेः। नह्युद्गीथावयववाचकोङ्कारशब्दस्य तदवयव्युद्गीथलक्षणयोद्गीथशब्दस्य तदवयवोङ्कार-लक्षणयैकार्थे सम्पादिते उपक्रमो भिद्येत इति शक्यं वदितुम्। अन्यथा 'सदेव सोम्येदमग्र आसीत्' (छा.उ. ६.४.१) इति छान्दोग्ये 'असद्

१. म. अधिकरणसिद्धसिद्धान्तविरुद्धः। २. म. असिद्धः।

वा इदमग्र आसीत्' (तै.उ. २.७) इति तैत्तिरीयके चोपक्रमभेदाद् विद्याभेदापत्तिः। यदि 'तदैक्षत। बहु स्यां प्रजायेय' (छा.उ. ६.२-३) इति च 'तदात्मानं स्वयमकुरुत' (तै.उ. २.७) इति चोभयत्राप्युपरि लक्षणादिनैकार्थ्यमाश्रित्य तत्रोपक्रमभेदनिराकरणं, तदा तत्र सुतरां तदस्तु। नह्यवयवावयविभावादिरूपप्रसिद्धशक्यसम्बन्धवतोरोङ्कारोद्गीथशब्दयोर्लक्षणयाऽनैकार्थ्यसम्पादनं सुशकं, विरुद्धार्थयोः सदसच्छब्दयोस्तत् सुशकमिति युक्तम्।

सूत्रार्थनिराकरणम्

अत एवास्मिन् वर्णके सूत्रार्थोऽप्ययुक्तः। इतरवत्- यथा वाजिनामात्मशब्दगृहीतिरेवं छन्दोगानामप्यात्मगृहीतिः। उत्तरात् तादात्म्योपदेशादिति हि प्रथमस्यार्थः। तत्र वाजिनां 'कतम आत्मा' (बृ.उ. ४.६.७) इत्यात्मशब्दो जीवपर इत्यङ्गीकार उत ब्रह्मपर इति। नाऽद्यः। छान्दोग्ये सच्छब्दस्य जीवपरत्वप्राप्त्या 'स आत्मा तत्त्वमसि' (छा.उ. ६.८.७) इति वाक्ये त्वंशब्दितजीवेन सच्छब्दितस्य जीवस्याभेदोपदेश इत्यापत्त्या वाक्यनैष्फल्यापातात्। सच्छब्दार्थस्य तत्र श्रुतस्रष्टृत्वादिमाहात्म्यस्य, सर्वविज्ञानान्यथानुपपत्त्या सिद्धस्योपादानत्वादेश्चायोगाच्च। न द्वितीयः। 'योऽयं विज्ञानमयः पुरुषः' इत्यादिजीवलिङ्गविरोधात् 'अजरोऽमृतो ब्रह्म' (बृ.उ. ४.४.२५) इति ब्रह्मत्वविधानवैयर्थ्याच्च। सच्छब्दोदितस्यैव वाजिनां ग्रहणेऽप्यर्थैक्यनिबन्धनविद्यैक्योपपत्तावप्यात्मग्रहणनिर्बन्धे कारणाभावेन ब्रह्मविद्यात्वसिद्ध्यर्थं लाघवाय च 'सद्गृहीतिरितरवदुत्तरात्' इति सूत्रविन्यासापाताच्च। एकत्र सच्छब्दितस्य ब्रह्मणो जीवैक्यमुच्यते। आत्मशब्दितस्य जीवस्य ब्रह्मैक्यमपरत्रोच्यत इति प्रतियोग्यनुयोगिनिर्देशव्यत्ययेऽपि तादात्म्योपदेशोपपत्तेः छान्दोग्येऽप्यात्मत्वसिद्ध्यनपेक्षत्वेन हेतोरप्रयोजकत्वाद् विरुद्धत्वाच्च।

'अन्वयादिति चेत् स्यादवधरणात्' इति सूत्रस्य अद्वैत्यभिमतार्थनिरासः

अन्वयादिति चेद् उपक्रमान्वयाद् उपक्रमे चाऽत्मशब्दश्रवणाभावान्नाऽत्मगृहीतिरिति चेत्, इति चासङ्गतम्। अशब्दान्वितं च। **अवधारणात्** 'येनाश्रुतं श्रुतं भवति' (छा.उ. ६.१.३) इत्याद्यवधारणादिति हेतुव्याख्यानमयुक्तम्। अन्वयादित्यत्राभिसंहिते उपक्रमे आत्मशब्दश्रवणाभावादिति चोद्ये परिहारादर्शनात्। एकविज्ञानेन सर्वविज्ञानान्यथानुपपत्त्योपक्रमस्थसच्छब्दो बाध्यत इति परिहारोऽत्राभिप्रेत इति चेन्न। उत्तरादित्यनेनैव चारितार्थ्यात्। 'येनाश्रुतं श्रुतं भवति' (छा.उ. ६.१.३) इत्यादाववधारणाभावाच्च। अत्रापि गृहीतस्याऽत्मनो जीवत्वे तज्ज्ञानात् सर्वविज्ञानानुपपत्तेश्च। उपक्रमप्राबल्यसिद्धान्तहानेश्च। सत्तासामान्यवाचितयोपक्रमः सन्दिग्ध इति चेन्न। आत्मान्यस्य सर्वस्य मिथ्यात्वेन सच्छब्दस्याऽत्मानात्मसाधारण्यायोगाच्च।

सूत्रद्वयस्य शैवाभिमतव्याख्यानिरासः

'अन्योऽन्तर आत्माऽऽनन्दमयः' (तै.उ. २.५) इत्यात्मशब्दादन्नमयाद्यधिष्ठातुरब्रह्मत्ववन्नाऽनन्दमयस्याब्रह्मत्वं मन्तव्यम्। यत आनन्दमयप्रकरणे आत्मगृहीतिः परमात्मविषया न प्रत्यगात्मविषया। यथा 'आत्मन आकाशः सम्भूतः' (तै.उ. २.१.१) इत्यत्राऽत्मगृहीतिः। कुतः? 'आनन्दमयमात्मानमुपसङ्क्रम्य' (तै.उ. ३.१०.५) इत्युत्तराद् वाक्यात्।

नन्वेवमन्नमयादीनामप्यात्मशब्दान्वयात् परमात्मत्वेन तेषामप्युपासनं स्यादिति चेन्न। 'अन्योऽन्तर आत्माऽऽनन्दमयः' (तै.उ. २.५) इत्यानन्दमयस्य परमात्मनः शिवस्यान्नमयादिभ्यो भिन्नत्वावगमात्। 'शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य' (अथर्वशिखोपनिषत् ३) इति सकलेतरपरित्यागपूर्वकं शिवस्यैकस्यैव ध्येयत्वावधारणात् आनन्दमयः शिव एक एवानुसन्धेयः इति शैवोक्तं सूत्रद्वयव्याख्यानमप्ययुक्तम्। सूत्राक्षरानारूढत्वात्।

बह्वध्याहारप्रसङ्गाच्च। 'आत्मगृहीतिः' इत्यनेन शङ्कितव्यभिचारापरिहारात्। 'उत्तरात्' इत्युक्तहेतोरन्नमयादिषु व्यभिचाराच्च। 'अन्नमयमात्मानमुपसङ्क्रम्य' (तै.उ. ३.१०.५) इत्युत्तरस्य तत्रापि सत्त्वात्। अधिकरणान्तरत्वसम्भवे पूर्वशेषताऽयोगाच्च। सूत्रद्वयस्य केषाञ्चिद् व्याख्यानं शैवव्याख्यानान्नातीव भिद्यत इति न पुनस्तन्निरासे प्रयतितव्यम्।

'उपसंहारः' इत्यारभ्य 'अन्वयात्' इत्यन्तं त्रयोदशसूत्रात्मकमेकमधिकरणमिति वादिनां मतनिरासः

टीकाक्षरार्थस्तु- अत्र 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३.३.६) इत्यारभ्यैतदन्तायां त्रयोदशसूत्र्यां समर्थनीयप्रमेयभेदपर्यालोचनमसहमाना उत्तरोत्तरं पूर्वपूर्वाक्षेपेणैव सूत्रजातमवतारयन्तः 'अन्वयात्' (ब्र.सू. ३.३.१८) इति सूत्रमप्यात्मगृहीतिसूत्रोक्तन्यायाक्षेपेणावतार्याऽत्मशब्दस्यानुपसंहारप्रमाणत्वसमर्थनपरत्वेन व्याख्यायैकाभिधेयत्वाच्चैतावदेकमेवाधिकरणमिति केचिद् व्याचख्युः।

तन्न युक्तम्। न्यायमालायां सङ्गृहीतानां न्यायानां, विवरणे च विवृतानां, सम्बन्धदीपिकायां च तत्तदधिकरणसङ्गतत्वेन पृथक् प्रदर्शितानामधिकरणेषु समर्थनीयप्रमेयभेदस्यावश्यमङ्गीकार्यत्वात्। अन्यथाऽधिकरणान्तरेष्वपि पूर्वसङ्गतिसिद्धये पूर्वसूत्राक्षेपादिना प्रवृत्तेरवश्यं वक्तव्यतया तत्रापि प्रमेयैक्येनाधिकरणभेदो न स्यात्। समर्थनीयार्थस्य निष्कृष्योद्धर्तुमसामर्थ्यमात्रेणाधिकरणभेदापलापायोगादिति मन्वानः स्वयमेतदधिकरणप्रमेयं निष्कृष्योद्धरति- **अत्र भगवद्दर्शनसाधनेत्यादिना ॥** आत्मशब्दोक्तगुणानां मनुष्योपास्यत्वदेवाद्युपास्यत्वचतुर्मुखोपास्यत्वैस्त्रैराश्यमापन्नानां[1] मानुषैर्देवादिभिश्चतुर्मुखेन चेत्येवं सर्वैरुपास्यत्वसमर्थनादित्यर्थः।

१. म. मनुष्योपास्यत्वचतुर्मुखोपास्यत्वैर्द्वैराश्यमापन्नानाम्।

टीकायां पूर्वपक्षीयविभ्रमन्यायस्य व्याख्यानम्

विभ्रमन्यायं विभ्रामयतीत्यन्तर्णीतण्यर्थाद् भ्राम्यतेः कर्तरि पचाद्यच्, भावप्रधानश्च निर्देश इत्यभिप्रेत्य कर्तृत्वादि विवृण्वत् 'न चाऽत्मशब्दो विभ्रमकरः' इति वाक्यं भाष्योक्तहेतोः साध्यप्रदर्शनपरमिति व्याचष्टे- **तथाचायं श्रुतचतुर्गुणेति** ॥ एवं तर्हि कथमेतदधिकरणन्यायः स्यादित्यत आह- **अत इति** ॥ आत्मशब्दविभ्रमकरत्वादित्यर्थः । 'स्याच्चैवम्' इति भाष्यं पूर्वसङ्गतं न प्रतीयत इत्यतोऽवतारयति- **कथं परेणोक्तमिति** ॥ अनेन भाष्ये सत्यमित्येतदभ्युपगम्यत इति व्याख्यातव्यमिति सूचयति । एवंचशब्दार्थावाह- **तथा स्यादेवेति** ॥ नहि परोक्तमित्येतावतैवाभ्युपगमानर्हम् । येनाभ्युपगमो दोषाय स्यात् । किन्तु वस्तुनोऽतथात्वे । नचैवं प्रकृते । 'आप्तव्याप्तेरात्मशब्दः' इत्यादिप्रमाणेन सर्वगुणाभिधायकत्वस्य स्थितत्वादिति भावः ।

टीकायां सिद्धान्तीयगुणाधिक्यन्यायस्य व्याख्यानम्

गुणाधिक्यन्यायं साध्यप्रदर्शनेन विवृण्वत् **'गुणाधिकानामधिकारिणां भगवद्गुणानधिकान् प्रकाशयतीत्यवधारणोपपत्तेः'** (न्या.वि.) इति वाक्यं 'विभ्रमकरः' इत्युक्तदोषपरिहारकत्वेन व्याख्याति- **इयांस्तु विशेष इति** ॥ **तथाऽनुभवादिति** ॥ अचेतनस्यापि शब्दस्य नानार्थस्थलादौ शक्त्यन्तरग्रहणरूपगुणाधिक्याद् बह्वर्थप्रत्यायकत्वस्यानुभूयमानत्वादित्यर्थः । 'अवधारणोपपत्तेः' इत्येतत् साध्यप्रदर्शनपूर्वं[1] व्याचष्टे- **अतस्तस्याविभ्रमकरत्वादिति** ॥ अनेन निश्चयोपपत्तेरित्यर्थ उक्तो भवति । 'आत्मैवेत्यवधारणात्' इति भाष्यमवतार्य व्याख्याति-**ननु ब्रह्मादीनामिति** ॥ शब्दान्तरेऽनुभवस्तु प्रयोजक एवेति भावः। अन्यथेति वाक्यमवशिष्टमित्याशङ्क्य तत्राप्यप्रयोजकतां निराकर्तुं तदिति भावेनावतारयति- **अवधारणेऽपीति** ॥ 'सोपस्कराणि वाक्यानि' इत्यादा-

१. म. साध्यप्रदर्शनपूर्वकम् ।

वध्याहार्यं भागमाह- **अन्ययोगव्यवच्छेदकेति** ॥ प्रस्तुतवाक्यमन्यथाशब्दार्थं विवृण्वन् व्याचष्टे- **यद्यसौ न तान् प्रतीति** ॥ सूत्रार्थः स्पष्टः ।

एतदधिकरणतात्पर्यपरतया सङ्क्षेपभाष्यव्याख्यानम्

एतदधिकरणतात्पर्यमाह- **सच्चिदानन्द आत्मेति** ॥ सच्चिदानन्द आत्मेति गुणचतुष्टयेनैव, आत्मशब्दोक्तेनेति शेषः, मनुष्यैरुपास्यो विष्णुः । सुरेश्वरैस्तु यथाक्रममात्मशब्दोक्तैर्बहुगुणैर्मध्यगुणैरुपास्यः । ब्रह्मणा त्वात्मशब्दोक्तैरखिलैर्गुणैरुपास्यः । आत्मशब्दोऽयं मनुष्यान् प्रति गुणचतुष्टयमेव, सुरेश्वरान् प्रति बहूनेव गुणान्, चतुर्मुखं प्रति तु सर्वानपि गुणान् यथाक्रमं वदतीति तात्पर्यमिति सङ्क्षेपभाष्यमपि व्याख्येयम् । 'अन्वयात्' (ब्र.सू. ३.३.१८) इत्याक्षिप्तप्रमेयाङ्गीकारेण विभ्रमकरत्वम्, अवधारणादित्युक्त्या च गुणाधिकानामप्यधिकारसूचनाद् गुणाधिक्यं सूचितमिति युक्तस्तयोर्न्यायमालायां सङ्ग्रह इत्याद्यूह्यम् ।

॥ इत्यन्वयाधिकरणम् ॥ १० ॥

॥ अथ कार्याख्यानाधिकरणम् ॥ ११ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ कार्याख्यानादपूर्वम् ॐ ॥ ३-३-१९ ॥

'अलौकिकास्तस्य गुणा ह्युपास्या अलौकिकं मुक्तिकार्यं यतोऽस्य' इति कार्याख्यानादन्यत्रादृष्टा एव गुणा उपास्याः॥१९॥

॥ इति कार्याख्यानाधिकरणम् ॥ ११ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मदर्शनसाधनोपासनायामलौकिकगुणोपसंहारसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथोक्तालौकिकत्वासिद्धेः समर्थनीयः । प्रकृत-भगवद्गुणा एव विषयः । किमलौकिका ध्येया लौकिका वेति सन्देहः । पूर्वोक्तिर्लोकदृष्टिश्च सन्देहबीजम् ।

पूर्वपक्षः

लौकिका एव ध्यातव्या इति पूर्वः पक्षः । लौकिकानामध्याने ध्यानाभाव-प्रसक्तेः । अलौकिकानामननुभूतत्वेन ध्यानकालेऽप्रतीतेः । कर्तव्यं चेदं ध्यानम् । अतो लौकिका एव ध्यातव्याः । नचाविद्यमानं युक्तं ध्यातुमिति लौकिका एव ते, ध्यानान्यथानुपपत्तेरिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **कार्येति** ॥ अलौकिका एव गुणा

ध्यातव्याः । तथा ध्यानेनैव मोक्षसम्भवात् । [1]ध्यानकार्यमोक्षस्यालौकिक-त्वाख्यानात् । फलानुसारिध्यानस्य कर्तव्यतानियमादिति भावः । नचालौकिकगुणाप्रतीतिर्दोषः। इन्द्रादाविवोपदेशोपपत्तेः । अतोऽलौकिकत्वेन ध्यातव्या इति युक्तं पूर्वोक्तमिति सिद्धम् ॥ १९ ॥

॥ इति कार्याख्यानाधिकरणम् ॥ ११ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ कार्याख्यानादपूर्वम् ॐ ॥ ३-३-१९ ॥

सेतून्मानाधिकरणेन गतार्थताशङ्का

नन्विदं[2] शक्यमवक्तुम् । 'परमतः सेतून्मान' (ब्र.सू. ३.२.३२) इति नयेन सेतुत्वादिभिर्भगवदीयगुणानामलौकिकत्वसिद्धेः । 'परमतः' इत्यत्र भगवद्गुणा-नामलौकिकत्वमात्रसमर्थनम् । तावतैव निरतिशयभक्त्युपपत्तेः । इह तु तेषामेवोपसंहार्यत्वसमर्थनमिति न दोष इति चेन्न । 'लौकिका एव ते ध्याना-न्यथानुपपत्तेः' इतीह पूर्वपक्षोपसंहारे गुणालौकिकत्वस्यापि प्रतिक्षेपात् । न लौकिकानामेव[3] गुणानां भगवति तदधिकरणे दृढं सत्त्वप्रतीतावविद्यमानध्यानस्य निषिद्धत्वादेव तथाविधानामेवोपसंहार्यत्वं च बलादापतितम् ।

यत्त्वत्र स्वयूथ्यैरुक्तम् । गुणास्तावद् द्विविधाः। लौकिका अलौकिकाश्च । इतरसाधारणा अनितरसाधारणा भगवदेकनिष्ठाश्चेति यावत् । ते च मनःक्लेशना-द्यापादकाः दयादाक्षिण्यादयः, पुराणेषूक्ताः जन्माद्यष्टकर्तृत्वादयश्च । तत्र कर्तृत्वादयोऽलौकिका यथोपास्यास्तथा लौकिका अपि दयादाक्षिण्या-दयोऽप्युपास्याः । अन्यथा सर्वोपसंहारस्त्यक्तः स्यादिति शङ्का, भगवदन्यत्रा-

१. प. ध्यानकार्यस्य। २. म. एवम्। ३. म. अलौकिकानामेव।

दृष्टचरगुणावगाह्येवोपासनमपूर्वं कर्तव्यं, फलस्याप्यपूर्वत्वादिति समाधानं चात्र क्रियत इति, तदयुक्तम्। दयादाक्षिण्यादीनां कर्तृत्वादीनामिव भगवदात्मकत्वात्तेषामितरसाधारण्यासम्भवात्। नच ते न तदात्मकाः, मनःक्लेशनाद्यापादकत्वादिति वाच्यम्। तर्हि स्रष्टृत्वादयोऽपि ममताद्यापादका एवेति तेषामपि तदात्मकता न स्यात्। अन्यत्र तदापादका अपि निरवद्ये भगवति न तानापादयन्तीति च समम्। उपसंहारनये 'समाने च' (ब्र.सू. ३.३.६) इति सूत्रखण्डेन दुःखाद्यापादकानां रोदनादीनामनुपसंहार्यत्वस्य सिद्धत्वाच्चेति।

गतार्थताशङ्कानिरासः सङ्गतिश्च

अत्रोच्यते -

अलौकिकत्वं पूर्वोक्तं तत्त्वेनैवोपसंहृतिम्।
दृढीकुर्मो वयं तेन न पूर्वेण गतार्थता॥

अत एव परनयोक्तालौकिकत्वस्यैवाऽक्षेपसमाधानाभ्यां दृढीकरणद्वारेह विवरणात् पेटिकासङ्गतिः। अत एव च फलानुसारिध्यानस्य कर्तव्यतयाऽऽनन्दनयोक्तस्याप्रतीतिदोषेणापोदितस्येह पुनर्विशेषयुक्त्या प्रतिप्रसूयमानतया न तेनापि गतार्थता। अत एव चाऽत्मशब्दश्चतुर्मुखं प्रति सर्वान् गुणान् ब्रवीतीत्युक्तमयुक्तम्। शक्तिग्रहसौकर्याय लौकिका एव ते नोच्येरन्। तथाच लौकिकानामेव ध्यानमापद्येत। नत्वलौकिकानाम्। प्रतीत्यनवगाहनात्। ततश्च पूर्वोक्तं गुणानामलौकिकत्वं चानुपपन्नम्। ध्यानान्यथानुपपत्त्या लौकिकत्वस्यैव न्याय्यत्वात्। नच फलस्यालौकिकत्वादानन्दादिनयरीत्याऽलौकिकानेव सर्वान् गुणान् ब्रवीतीति युक्तम्। शक्तिग्रहणानुपपत्तेः। सर्वतो बलवती ह्यन्यथानुपपत्तिरित्यनन्तरसङ्गतिश्च। यथाऽवधारणान्यथानुपपत्त्या ब्रह्मादीनामयमात्मशब्दः सर्वगुणार्पकस्तथा ध्यानान्यथानुपपत्त्या लौकिकगुणानामेवार्पकः स्यादित्युत्थानाद्वाऽनन्तरसङ्गतिः। कृतःपूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

फलानुसारिध्यानस्य कर्तव्यत्वादलौकिकाः।
उपदेशेन तज्ज्ञानमिन्द्रादाविव सम्भवि॥

नचैवं तत्र लौकिकशब्दप्रयोगानुपपत्तिः। इन्द्रादिशब्दप्रयोगवदुपपत्तेः। 'बुद्ध्यर्थः पादवत्' (ब्र.सू. ३-२-३४) इति समाधानाच्च। नचैवं सति तेनैव गतार्थता। अलौकिकत्वेन ध्यातव्यत्वस्य तत्राप्राप्तेः। श्रवणमनननिदिध्यासनानां समानविषयत्वस्वाभाव्याद् ध्यानेऽपि तथात्वमङ्गीक्रियत इति न किञ्चिदनुपपन्नम्।

अद्वैतविशिष्टाद्वैतमतविमर्शः

उभये तु, छन्दोगा वाजसनेयिनश्च श्वादिमर्यादं प्राणस्यान्नमाम्नाय तस्यैवापो वास आमनन्ति। छन्दोगाः 'तस्माद् वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति' (छा.उ. ५.२.२) इति। वाजसनेयिनस्तु - 'तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाऽचामन्ति [1]'एतदेव तदनमनग्नं कुर्वन्तो मन्यन्ते' (बृ.उ.), 'तस्मादेवंविदशिष्यन्नाऽचामेदशित्वा चाऽचामेदेतमेव तदनमनग्नं कुरुते' (बृ.उ.) इति तत्राऽचमनमनग्नताचिन्तनं च प्रतीयते। तत्र संशयः। किमाचमनं विधीयते उताचमनीयास्वप्सु वासोदृष्टिरिति।

प्राप्तं पुनः क्रतौ यद् यच्चोद्यतेऽनृतवर्जनम्।
प्राणोपास्तेर्विधीयेत तथैवाऽचमनक्रिया॥

यद्यपि प्रायत्यर्थं स्मृतावाचमनं विहितम्। तथाऽपि प्राणविद्याङ्गत्वेनाविहितमिति तदङ्गतया प्राणोपासनप्रकरणे तद्विधानमर्थवत्। यथा स्मृतावनृत-

१. म. एतमेव।

वचनप्रतिषेधे सत्यपि ज्योतिष्टोमप्रकरणे तदङ्गतया 'नानृतं वदेत्' इति प्रतिषेधोऽर्थवानिति प्राप्तेऽभिधीयते -

पुनरुक्तं पुमर्थेन क्रतौ नानृतवर्जनम्।
सर्वार्थाचमनं प्राप्तं प्राणोपास्तौ स्मृतेरिह॥

'द्विजो नित्यमुपस्पृशेत्' इति सर्वकर्मसु स्मृत्या विहितमाचमनं प्राणविद्यायामपि प्राप्तम्। स्मृतिमूलसामान्यश्रुतिसिद्धं प्राणविद्यायां श्रुत्याऽनूद्याऽचमनीयास्वप्सु वासोदृष्टिर्विधीयते। क्रत्वर्थपुरुषार्थयोरनृतवचननिषेधयोर्युक्तमपौनरुक्त्यम्। इह तु स्मार्तमाचमनं सकलकर्माङ्गतया विहितं प्राणोपासनाङ्गमपीति व्याप्तेन स्मार्तेनाऽचमनविधिना[१] पुनरुक्तत्वादनर्थकमित्याहुः।

तन्न। पादसङ्गत्यभावात्। नह्याचमने तदन्यस्मिन् वा विधीयमानेऽस्ति कश्चिद् विद्याभेदाभेदोपयोगः। अन्यत्रोपसंहारसिद्ध्यर्थं प्राणविद्यायां धर्मविशेषश्चिन्त्यत इति तु न युक्तम्। आचमनस्य विधेयत्वेऽप्यन्यत्रोपसंहारसम्भवात्। आत्मगृहीत्यधिकरणे पूर्वस्मिन् सदुपक्रमविद्याया आत्मोपक्रमविद्यातोऽभेदेऽभिहिते पुनरिहाऽचमनस्य विधेयत्वनिराकरणे पूर्वानन्तर्यायोगाच्च।

ननु पूर्वत्र सन्दिग्धसदुपक्रमस्य वाक्यशेषान्निर्णयश्चेदिहाप्यशिष्यन्त आचामन्तीत्यादेर्वर्तमानापदेशस्य विधित्वसन्देहे 'अशित्वाऽऽचामेत्' (बृ.उ.) इत्यादिवाक्यशेषाद् विधित्वनिर्णयः स्यादिति शङ्कनाददोष इति चेन्न। तादृशशङ्कायाः परिहारावसराभावात्। 'द्विजो नित्यमुपस्पृशेत्' इति स्मार्तस्याऽचमनस्य प्रत्यवायपरिहारार्थत्वेन पुरुषार्थत्वसम्भवेनानृतवचनप्रतिषेधवत् क्रत्वर्थतया विधानोपपत्तौ विधिविभक्त्यस्वारस्यायोगाच्च। आचमनीयास्वप्सु वासस्त्वस्याभावात् तत्र तद्दृष्टिविधाने वचनस्याप्रामाण्यप्राप्तेश्च।

१. म. विधिषु।

'नाविद्यमानं ब्रुवते वेदा ध्यातुं न वैदिकाः।' इति वचनात् 'योषितमग्निं ध्यायीत' (छा.उ.) इत्यादिनिदर्शनायोगात्। अत एव दृष्टिचोदनासाहचर्याद् दृष्टिचोदनैव न्याय्या। यथा हि श्वादिमर्यादस्थान्नस्यात्तुमशक्यत्वादन्नत्वदृष्टिश्चोद्यत एवमिहाप्यपां परिधानासम्भवात् तद्दृष्टिरेव चोद्यत इति निरस्तम्। इन्द्रियैः सह पाठेऽपि प्राणस्य प्राधान्यदर्शनेन सहपाठस्याप्रयोजकत्वाच्च। किञ्च मन्यन्त इति वर्तमानापदेशान्न विधित्वं, प्रत्युताऽचामेदिति लिङ्निर्देशादाचमनस्यैव विधिरिति युक्तम्।

वाचस्पतिमतविमर्शः

अत्रोक्तं वाचस्पतिना - छन्दोगानां वाजसनेयिनां चाऽचमने प्रायेणाऽचामन्तीति वर्तमानापदेशः, एवं यत्रापि विधिविभक्तिस्तत्रापि 'जर्तिलयवाग्वा वा जुहुयात्' इतिवद् विधित्वमविवक्षितम्। मन्यन्त इति त्वप्राप्तार्थत्वात् 'समिधो यजति' (तै.सं. २.६.१.१) इत्यादिवद् विधिरेवेति। तन्न। अनृतवचनप्रतिषेधवत् क्रत्वर्थतया प्राप्त्यभावेन विधानोपपत्तेरुक्तत्वात्।

शङ्कररामानुजाभिमतसूत्रार्थविमर्शः

एतेन, नाऽचामेदिति विधिः। **कार्यस्य** प्रायत्यर्थं स्मृतिप्राप्तस्याऽचमनस्यात्र **आख्यानात्** अनुवादात्। किन्तु 'एतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते' इति प्राणस्यानग्नताकरणसङ्कल्पनम् **अपूर्वं** विधीयत इति सूत्रार्थो निरस्तः। बह्वध्याहारप्रसङ्गाच्च। प्राप्ताप्राप्तविवेकेनाप्राप्तांशे विधिव्यापार इत्यस्य पूर्वतन्त्रप्रसिद्धस्येह सूत्रार्थतया वर्णनायुक्तेश्च। एतेन **अपूर्वं** अप्राप्तमपां प्राणवासस्त्वानुसन्धानं विधेयम्। न पुनः प्राप्तमाचमनं। कुतः? **कार्याख्यानात्** अप्राप्ताख्यानस्वभावत्वाच्छास्त्रस्येति केषाञ्चित् सूत्रार्थवर्णनमप्युपेक्षणीयम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - **अलौकिकगुणोपसंहारसमर्थनादिति**॥ अलौकिक-

गुणानामुपसंहारस्य समर्थनादित्यर्थः ॥ **उक्तालौकिकत्वासिद्धेरिति** ॥ परनयोक्तालौकिकत्वदाढ्यसिद्धिरित्यर्थः। उक्ते सर्वोपसंहारे लौकिका अप्युपसंहार्या न वेति न्यायरत्नावल्युक्तं पूर्वोक्तदिशा युक्तमिति स्वयं विषय-संशयौ दर्शयति- **प्रकृता भगवद्गुणा एवेति** ॥ प्रकृतात्मशब्दोक्तभगवद्गुणा एव, नतु सर्वोपसंहारो **विषय इति** ॥ **किमलौकिका ध्येया इति** ॥ अलौकि-कत्वेनेत्यर्थः।

अपाकृतिन्यायस्य व्याख्यानम्

अपाकृतिन्यायं ध्यानान्यथानुपपत्त्युपपादकत्वेन विवृण्वत् 'अलौकिक-गुणानामप्रतीतेर्लौकिकगुणाध्याने तदपाकृतिरेव भवतीति न मन्तव्यम्' (न्या.वि.) इति वाक्यमर्थक्रमेण व्याचष्टे- **लौकिकानामध्यान इति** ॥ अनेनापाकृतिरभावः। अप्रतीतिरस्मृतिरित्युक्तं भवति।

प्रधानतान्यायस्य व्याख्यानम्

प्रधानतान्यायं सम्बन्धिप्रदर्शनेन विवृण्वत् 'लौकिकविलक्षणा अत्युत्तमा इति ध्यानस्यैव प्राधान्यात्' (न्या.वि.) इति वाक्यं तात्पर्यतो व्याचष्टे- **अलौकिका एव गुणा इति** ॥ अनेनालौकिकत्वं लौकिकविलक्षणत्वम्। नत्वनितरसाधारण्यम्। तत्सदृशस्य गुणजातस्य ज्ञानादेरितरत्राप्यङ्गीकार्यत्वात्। अत एव लौकिक-विलक्षणत्वं सान्तत्वसातिशयत्वादिराहित्येनात्युत्तमत्वमेव। इतिशब्दः प्रकारवचनः। अत्युत्तमत्वप्रकारेण ध्यानस्यैव प्राधान्याद् अत्युत्तमत्वात्। अत्युत्तमं फलं साधयितुं तदेव समर्थं नान्यदिति विवरणार्थो द्रष्टव्यः।

सूत्रार्थः

अनेन, अपूर्वमित्यावर्तते। द्वितीयं भावप्रधानं सद् बुद्ध्या विविक्तेनाऽख्यान-पदेन सम्बद्ध्यते। योग्यत्वात् प्रकृतत्वाच्च ध्यानं पूर्वत्र सम्बद्ध्यते। ध्यान**कार्यस्य** मोक्षस्य **अपूर्वत्वाख्यानात्** अलौकिकत्वाख्यानात् **अपूर्वमेव** अलौकिक-

मेवेति सूत्रार्थो ज्ञातव्यः। ब्रह्मगुणजातम् **अपूर्वम्** अलौकिकम्। कुतः? तद्गुणोपासना**कार्यस्य** मोक्षस्यालौकिकत्वाख्यानादित्यन्ये।

एतदधिकरणपरत्वेन सङ्क्षेपभाष्यव्याख्यानम्

अत्र सङ्क्षेपभाष्ये 'सर्ववेदैश्च' इत्येतत्, चोऽवधारणे। वेदैरेवोक्तैरलौकिकैरिति यावत्। लौकिकानां प्रमाणान्तरेणोक्तिसम्भवात्। निखिलैर्गुणैर्विष्णुरुपास्य इत्युक्तावृत्त्यैतदधिकरणसङ्गतत्वेनापि व्याख्येयम्।

॥ इति कार्याख्यानाधिकरणम्[१] ॥ ११ ॥

१. म. अपूर्वनयः।

॥ अथ समानाधिकरणम् ॥ १२ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ समान एवञ्चाभेदात् ॐ ॥ ३-३-२० ॥

अपूर्वत्वेऽपि समानानामेवोपसंहारः । नतु त्रिविक्रमत्वादीनां कादाचित्कानां पृथक्त्वेन । नित्यविक्रान्त्यादिष्वन्तर्भावात् ॥ २० ॥

॥ ॐ सम्बन्धादेवमन्यत्रापि ॐ ॥ ३-३-२१ ॥

परमात्मसम्बन्धित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यते।

'गुणास्त्रैविक्रमाद्यास्तु[१] संहर्तव्या न संशयः ।
विरिञ्चस्यैव नान्येषां स हि सर्वगुणाधिकः ॥ '
इति बृहत्तन्त्रे[२] ॥ २१ ॥

॥ इति समानाधिकरणम् ॥ १२ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनोपासनस्य स्वसदृशफलप्रदत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथाऽर्थसामान्यादित्युक्तोपासनानुपपत्तेस्तत् समर्थनीयम् । प्रकृतगुणोपासनं विषयः । किं स्वानुसारिफलप्रदं न वेति सन्देहः । कृष्यादिक्रियासूभयथा दृष्टिः सन्देहबीजम् ।

१. हृ. त्रैविक्रमाद्याश्च । २. हृ. इति हि बृहत्तन्त्रे ।

पूर्वपक्षः

नोपासनं स्वानुसारिफलप्रदमिति पूर्वः पक्षः। ब्रह्माणीब्रह्मणोरुपासनस्य तदभावात् । तयोर्हि समं विषमं वोपासनं सम्भवति । नच फलं तादृशम् । स्थानैक्यस्य गुणतारतम्यस्य च सद्भावेन फलस्य समविषमत्वात् । नचोपासनमपि तादृगस्त्विति वाच्यम् । समविषमोपासनस्य विरुद्धत्वेनायुक्तत्वात् । अतो यथोपासनं फलाभावात् 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्युक्तमयुक्तमिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **समान इति** ॥ नोक्तलिङ्गेनोपासनस्य स्वानुसारिफलप्रदत्वाभावः । ब्रह्माणीब्रह्मणोः फलवदुपासनस्यापि समविषमत्वात् । ब्रह्माण्या हि सर्वगुणोपसंहारः क्रियासु च सामान्यक्रियोपसंहारोऽस्ति हिरण्यगर्भवत् । नतु तद्वत् त्रिविक्रमत्वादि । कदाचिदभिव्यक्तक्रियोपसंहारः सदा पृथक्त्वेनास्ति । किन्तु नित्यविक्रान्त्यादिसामान्यक्रियास्वन्तर्भाव एवेति । नच वाच्यं त्रिविक्रमत्वादिक्रियाणां लोकविलक्षणत्वेनात्याश्चर्यत्वात् कथं तदुपासनं ब्रह्माणी हास्यतीति । तासामपूर्वत्वेऽपि योग्यस्यैवोपास्यत्वात् । ब्रह्माण्याश्च नित्यं तदुपास्तियोग्यताऽभावादिति भावः ॥२०॥

हिरण्यगर्भस्य त्रिविक्रमत्वादिक्रियोपसंहारानुपपत्तिशङ्का तत्परिहारश्च

भवेदेतद् ब्रह्माणीब्रह्मणोः समविषमोपासनम् । यदि ब्रह्मणः सदा त्रिविक्रमत्वादिक्रियोपसंहारो भवेत् । नचासौ युज्यते । तासामनित्यत्वेन ध्यानकालेऽभावात् । अविद्यमानध्यानस्य चायोगादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **सम्बन्धादिति** ॥ युज्यते त्रिविक्रमत्वादिविषयेऽप्युपसंहारो हिरण्यगर्भस्य सर्वदा । 'गुणक्रियादयो विष्णोः स्वरूपं नान्यदिष्यते' इत्यादेस्त्रिविक्रमत्वादीनां परमात्मैक्येन नित्यत्वादिति भावः । सम्बन्ध-

स्तादात्म्यम्। अत्र स्मृतिं चाऽह- **गुणा इति** ॥ अतो यथोपासनं मुक्तौ फलमित्यस्याविरुद्धत्वादुक्तं युक्तमिति सिद्धम्॥२१॥

॥ इति समानाधिकरणम्॥ १२॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ समान एवञ्चाभेदात् ॐ ॥ ३-३-२० ॥

सङ्गतिः

अत्र यदुक्तं पूर्वनये उपासनस्य स्वानुसारिफलदत्वनियमाल्लौकिकत्वेनोपासने लौकिकमेव फलं स्यान्नत्वलौकिकमिति अलौकिकत्वेनोपास्यमिति तदयुक्तम्। तादृशनियमस्यैवायोगात्। ब्रह्मब्रह्माण्योरुपासनायां व्यभिचारादिति वा, यदि मुक्तेरलौकिकत्वादलौकिकमेव गुणजातं सर्वैरुपास्यमङ्गीक्रियते, तर्हि ब्रह्माण्या अपि ब्रह्मण इव कादाचित्कमपि त्रिविक्रमत्वादिकमुपास्यं स्यादिति वा शङ्कनात्, आत्मशब्दस्य सर्वोपास्यगुणाभिधायकत्वं बह्वर्थत्वाद् भेदवाक्यानामनेकार्थकश्लिष्टादिस्थल इव योजनाभेदेनोक्तम्, इत्थम्भावश्चोक्तोऽपूर्वनये, इदानीं भगवदीयक्रियाविषयावान्तरोपासनाप्रकारं दर्शयतीति वा सङ्गतिः। तत्राऽद्या 'ब्रह्माणीब्रह्मणोरुपासनस्य तदभावात्' इतीह टीकया सूच्यते। द्वितीया तु 'अपूर्वत्वेऽपि' इति भाष्येणापूर्वत्वेऽपि योग्यस्यैवोपास्यत्वादिति सिद्धान्तटीकया च। तृतीया तु 'नतु त्रिविक्रमत्वादीनां कादाचित्कानां पृथक्त्वेन' इति भाष्ये सूचिता तत्त्वप्रदीपे स्फुटोक्ता। 'अर्थसामान्यात्' (ब्र.सू. ३.३.१४), 'प्रधानस्य' (ब्र.सू. ३.३.१२) इति सूत्रांशाभ्यां सूचितस्य फलसाधनयोरैकरूप्यस्य प्राप्तिसूत्रसूचितयोग्यताविशेषस्य चाऽक्षेपपूर्वं दृढीकरणेन विवरणात् पेटिकासङ्गतिः। इयं च 'अन्यथाऽर्थसामान्य' इत्याद्यत्रत्यटीकया सूचिता, तामेव योग्यतां विवृणोतीति सुधायां स्पष्टमुक्ता।

नन्वेवं सति दम्पत्योर्योग्यताविचार एव फलितः। तथाच सति 'विद्यैव तु निर्धारणात्' (३-३-४८) इत्यनन्तरमेवैतत् स्यात्। युक्तं च तत्। तेनोपासनायाः कर्तव्यतायां सिद्धायामेव तदितिकर्तव्यतारूपयोग्यताविचारस्योचितत्वात्। अत एव 'उपासनस्य कर्तव्यत्वसमर्थनात्' इति तत्र टीकोपक्रमः। अत एव च सुधायां 'प्रकरणशुद्धौ प्रमेयं सुग्रहम्' इत्युपक्रम्य 'उपासनास्वरूपानिश्चये न कोऽपि विचारोऽवकाशं लभते' इति तत्स्वरूपमादौ दर्शितम्। ततस्तस्य कर्तव्यता समर्थिता। अनन्तरं तदितिकर्तव्यताजिज्ञासायां योग्यताविचार इति 'अनुबन्धादिभ्यः'(३-३-५१), 'विद्यैव तु निर्धारणात्'(३-३-४८), 'समान एवं चाभेदात्'(३-३-२०) इति सूत्रत्रयक्रम उक्त इति चेत्, सत्यम्। 'आनन्दमयोऽभ्यासात्' (ब्र.सू. १.१.१२) इत्यादौ वक्ष्यमाणसमन्वयसिद्ध्यर्थं पञ्चाधिकरण्यां गुणपूर्णत्वादिविचारवदिहापि वक्ष्यमाणोपासनाकर्तव्यतासिद्ध्ये योग्यता-विचारस्य सम्भवात्। तत्र निश्चितायामुपासनायां काऽस्यां योग्यतेति जिज्ञासावदिहानिश्चितायां योग्यतायां तद्विषयभूताया उपासनायाः कथं कर्तव्येति जिज्ञासाया अपि सम्भवेनादोषत्वात्। सुधायां तु सूत्रस्य विश्वतोमुखत्वज्ञापनाय तथाविधजिज्ञासुविवक्षया प्रवृत्तस्यानुव्याख्यानस्य स्वारस्यमुक्तम्। नत्विह तदसङ्गतमिति। यद्यपि चोपासनस्य स्वानुसारिफलदत्वमन्ते वक्तव्यम्। 'काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्' (३-३-६२) इत्यादौ -

'यस्य यस्य हि यः कामस्तस्य तस्य ह्युपासनम्।
तादृशानां गुणानां च समाहारं प्रकल्पयेत्॥'

इत्युक्तप्रमेयाक्षेपेण तत्र सङ्गतत्वात्। तथाऽपि 'आनन्दादयः प्रधानस्य' (३-३-१२) इत्यादिपूर्वोक्तप्रमेयाक्षेपस्यापि सम्भवेनात्रापि सङ्गतत्वाददोषः।

पूर्वपक्षः

तत्र त्रिविक्रमत्वाद्या अपूर्वत्वात् क्रिया अपि।
ब्रह्माण्या सर्वदोपास्या वैकल्प्यं त्वन्यथा भवेत्॥

त्रिविक्रमत्वादिकं न सर्वैरनुपास्यमेव। तदुक्तिवैयर्थ्यात्। किन्तु कैश्चिदुपास्यमेव। कस्यचिदेवोपास्यमिति तु न साम्प्रतम्। ब्रह्माण्या अप्युपासनासम्भवात्। निर्निमित्तं त्यागे उपासनावैकल्यप्रसङ्गात्। किञ्च, सा कुतो जहातीति वक्तव्यम्। विक्रान्त्यादेर्दुर्व्याप्त्यादिवदतिशयितत्वाभावात् उत स्वायोग्यत्वात्। नाऽद्यः। लोकविलक्षणत्वेनाऽश्चर्यत्वादतिशयितत्वात्। न द्वितीयः। तत्र क्रियाभिव्यक्तिदशायामपि तदनुपासनप्रसङ्गात्। ब्रह्माणीप्राप्यफलस्य मौक्तिकस्य सायुज्यादिरूपस्थानस्य चतुर्मुखप्राप्यस्थानेनैकत्वेन साम्यं, शतगुणोनज्ञानादितारतम्यस्य च श्रुतत्वेन चतुर्मुखप्राप्यवैषम्यं चास्ति। ततस्तयोः फले समविषमत्वनिर्वाहाय तयोः साधनेऽपि विषमत्वं किमपि कल्पनीयमिति चेन्न। साधनफलयोर्वैसादृश्यस्यापि कृषितत्फलादौ बहुलमुपलम्भात्। तथाच यथोपासनायां वैकल्यप्रसङ्गेन तत्परिजिहीर्षयाऽलौकिकत्वेनोपासनं कार्यम्। तथा ब्रह्माण्याऽप्युपासनावैकल्याय त्रिविक्रमत्वादयोऽप्युपास्या एवेति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

अपूर्वमपि योग्यं यत् तदेवोपास्यमञ्जसा।
अन्यथा सर्वमप्येवमिति स्यात् सर्वसङ्करः॥

यद्युपासनायां लौल्यादाश्चर्यत्वाच्च तदयोग्यकादाचित्कविक्रान्त्यादेरपि ब्रह्माण्योपासनमङ्गीक्रियते तर्हि वेदानुक्तानामपि गुणानां तदुपास्यत्वप्रसङ्गः। ततो योग्यतैव नियामिका। ब्रह्माण्याश्च सदातनत्वेन प्रमितज्ञानानन्दादिगुणसदृशक्रियाया व्यक्त्यात्मनाऽपि नित्यायास्सदोपासनायोग्यत्वेऽप्युपास्यत्वेऽपि च शक्त्यात्मना नित्याया अपि व्यक्त्यात्मना कादाचित्क्याः क्रियाया अपि न सदोपास्तियोग्यता। नच ब्रह्मणोऽपि कथमेवम्भूतायाः सर्वदोपास्तियोग्यता ? अविद्यमानोपासनस्य निषिद्धत्वादिति वाच्यम्। शक्त्यात्मना

सत्त्वात्। स्वायोग्यतया हि ब्रह्माणी नित्यामपि क्रियां व्यक्त्यात्मना कादाचित्कीं त्रिविक्रमत्वाद्यां नित्यव्यक्तसार्वकालिकज्ञानानन्दादिगुणैः सहैकध्यानगोचरतां विशेषतो नेतुमशक्नुवन्ती नित्यविक्रान्त्यादिक्रियासामान्येनैवोपास्ते। न तु पार्थक्येन। तथाच त्रिविक्रमत्वादीनामलौकिकत्वेनालौकिकमोक्षानन्दाभिव्यक्तिहेतुत्वसम्भवेऽप्यशक्यैकध्यानविषयतया सलिलन्यायेन शक्त्यनुरोधप्रवृत्तायाः सर्वोपासनश्रुतेरेतदविषयत्वात् तत्त्यागेऽपि नोपासनावैकल्यं चतुर्गुणोपासकानामिव। चतुर्मुखस्तु नित्यविक्रमक्रियाविशेषाणां परमात्माभेदेन सदातनत्वं ज्ञानानन्दादिवदेवास्तीति तैः सहैकध्यानविषयतां नेतुं भार्यातोऽधिकशक्तित्वादेव शक्नुवन्नित्यविक्रमक्रियासामान्याकारमात्रानालिङ्गनेन पृथगेव विशेषाकारेणैव क्रिया उपास्ते। तथाच चतुर्मुखः वेदोक्तैः सर्वैर्ज्ञानानन्दादिगुणैस्त्रिविक्रमत्वादिक्रियाभिश्चोपेतानि सर्वाण्यपि भगवतो रूपाणि त्रिविक्रमणकंसहननादिव्यापारानभिव्यक्तिदशायामपि तद्विशिष्टतयोपासितुं योग्यः। तद्भार्या तु सर्वगुणैः क्रियाभिश्च सह रूपाण्युपासितुं योग्याऽपि सर्वदा सर्वक्रियाभिरुपासितुं न योग्या। रुद्रस्तु सर्वरूपोपासनयोग्योऽपि, सर्वगुणक्रियाभिः सर्वदोपासितुं ब्रह्माणीवन्न योग्यः। किन्तु केषाञ्चिद् गुणानां कर्मणां चान्यत्रान्तर्भावादिना सामान्याकारालिङ्गनेनैव। शक्रादयस्तु सर्वेषां गुणानां कर्मणां रूपाणां च सामान्याकारालिङ्गनेनैव, केषाञ्चिद् रूपाणां विशेषालिङ्गनेन योग्या इत्यादिविशेषस्त्वनुव्याख्यानसुधयोरवगम्यते।

अत्र पराभ्युपगतमधिकरणम्

यत्तूक्तमुभाभ्यां- वाजसनेयशाखायामग्निरहस्ये शाण्डिल्यविद्या पठ्यते। तत्र गुणा बहुतराः श्रूयन्ते- 'आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं सत्यसङ्कल्पं सत्यधृतिं सर्वगन्धं सर्वरसं सर्वा दिशोऽनुसम्भूतं सर्वमिदमभ्यात्तमवाक्यमनादरम्' इत्यादयः। तस्यामेव शाखायां

बृहदारण्यके पुनः पठ्यते- 'स्तोको मनसो मनोमयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च' इत्यादि। तत्र संशयः। किं भिन्ने विद्ये उतैके इति।

अधिकोक्तेः समोक्तेश्च गुणार्थत्वे निवारिते।
विद्यानानात्वमभ्यासात् समिधो यजतीतिवत्॥

द्वयोर्विद्ययोरेकशाखागतयोरानर्थक्यं मा भूदिति समिधादिकर्मभेदवद् विद्याभेदः। उभयत्र सर्वगुणत्वादग्निहोत्रदधिवाक्ययोरिवावधारणायोगः। कामरूपत्वादेः सर्वेश्वरत्वादेश्च पुनरुक्तगुणस्योभयत्रापि पाठादिति प्राप्तेऽभिधीयते -

भूयस्त्वं यत्र धर्माणां तत्र विद्या विधीयते।
प्रत्यभिज्ञानदार्ढ्यार्थं समानगुणकीर्तनम्॥

उभयत्रापि मनोमयत्वादिगुणविशिष्टा शाण्डिल्यनामाङ्किता तावद् विद्या प्रत्यभिज्ञायते। तत्र विद्यानानात्वकल्पनायां गौरवम्। नचाभ्यासवैयर्थ्यम्। एकत्रोत्पत्तेरन्यत्र विशिष्टगुण्यनुवादेन गुणविधानात्। नच गुणिमात्रानुवादेनाभिधानादेव प्रत्यभिज्ञासिद्धौ गुणानां पृथगुक्तिवैयर्थ्यम्। तस्याः प्रत्यभिज्ञानदार्ढ्यार्थत्वात्। नचाविनिगमः। यत्र भूयांसो गुणा विधीयन्ते तत्र विधिकल्पनात्। यथा यत्र करितुरगपदातिप्रचयस्तत्र राजेति।

तद्विमर्शः

तन्न। अनन्तरसङ्गत्यभावात्। पूर्वत्र प्राप्ताचमनानुवादेनानग्नताचिन्तनं विधेयमित्युक्तम्। इह तु वाक्ययोर्मध्ये कस्य विधित्वं कस्य वाऽनुवादत्वमिति चिन्त्यत इति सङ्गतिरस्तीति चेन्न। पूर्वतन्त्रेण गतार्थत्वात्। यतोऽत्र भूयस्त्वेनोभयश्रुतीत्याद्यसूत्रयद् भगवान् जैमिनिराचार्यः। स एव न्यायोऽत्र स्मर्यते[1] इति चेन्न। अपर्यवसानप्रसङ्गात्। आख्यापवादनयविरोधाच्च। तत्र ह्युपक्रमभेदाद् विद्याभेद उक्तः। इहापि द्वितीयान्त उपक्रमोऽग्निरहस्ये, प्रथमान्तस्तु बृहदारण्यके इति तद्भेदस्य स्फुटत्वात्। विरुद्धार्थोपक्रमाभावान्नैवमिति चेन्न। 'आकाशात्मानम्' इति व्यापकत्वोक्तेः 'स्तोको मनसो यथा व्रीहिर्यवः' इत्यादिनेहापि विरोधादैक्यं न स्यात्। यदि चाऽकाशशब्देन स्वच्छत्वादिकमेव विवक्षितं तदोच्चैर्गानविषयत्वादुद्गीथशब्देनोङ्कार एव विवक्षित इति साम्यम्। निष्फला चेयं चिन्ता। परस्परगुणोपसंहारः प्रयोजनमिति चेन्न। 'उपसंहारोऽर्थभेदात्' (ब्र.सू. ३.३.६) इति न्यायेनैव तत्सिद्धेः। शाखान्तराधिकरणन्यायेन गतार्थत्वाच्च। एकस्यामेव वाजसनेयशाखायां[2] चिन्तनाददोष इति चेन्न। समानन्यायत्वेऽस्याप्रयोजकत्वात्। युक्तं शाखान्तरे तस्यैव कर्मण आम्नानम्। तदनध्येतृपुरुषं प्रत्यर्थवत्त्वादेकस्यामपि[3] शाखायां पुनराम्नानवैयर्थ्यमित्यधिकाशङ्क्योत्थानाददोष इति चेन्न। एकस्यामपि शाखायामग्निरहस्यबृहदारण्यकयोरन्यतराध्ययनाभावसम्भवात्। नहि समस्ता अपि शाखाः सर्वेणाप्यध्येतव्या इत्यस्ति नियमः। तथा सति तदवान्तरभेदो न स्यात्।

समानेति सूत्रस्य पराभिमतार्थनिरासः

एतेन, यथा भिन्नासु शाखासु समाने वेद्ये सति विद्यैकत्वं गुणोपसंहारश्च एवं तथैकस्यामपि शाखायां भवितुमर्हति। उपास्याभेदात्। मनोमयत्वादिके समाने सति विद्यैक्यम्। एवं चाभेदाद् वसिष्ठत्वादिगुणेनाप्यभेदात् इति सूत्रयोजने निरस्ते। अभेदादित्यस्य वैयर्थ्यात्। वसिष्ठत्वादिगुणेन सत्यसङ्कल्पादेरभेदस्य बाधितत्वाच्च। वसिष्ठत्वादिर्हि सत्यसङ्कल्पत्ववितितिरिति चाप्रामाणिकम्।

---

१. म. स्मार्यते। २. म. वाजसनेयिशाखायाम्।
३. म. एकस्यामेव।

अन्यथाऽतिप्रसङ्गात्। एवं सत्याद्यनयानन्तर्यप्रसङ्गाच्च। एकस्यां शाखायां विद्याभेदनिरासपूर्वकं भिन्नशाखागतविद्याविचारस्य युक्तत्वेन तद्वैपरीत्यायोगाच्च। मद्रीत्याऽवश्यवक्तव्यप्रमेयान्तरपरतया योजनासम्भवेऽपि कथञ्चित् सङ्गतिमापाद्यानवश्यवक्तव्यार्थपरतया व्याख्यानायोगाच्च।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - **भगवद्दर्शनसाधनेति**॥ यद्यपि 'कार्याख्यानात्' इति सूत्रस्य 'फलानुसारिध्यानस्य कर्तव्यतानियमादिति' तट्टीकायाश्चानुसारात् 'फलस्य स्वसदृशसाधनसाध्यत्वनियमसमर्थनात्' इति वक्तुं युक्तम्। सङ्गतिगवेषणक्लेशोऽपि न भविष्यति। तथाऽपि फलाध्याये सङ्गतिः स्यान्नेहोपासनापादे। तस्मादुपासनाया उपसर्जनत्वेन प्राप्तावपि विचारधर्मित्वेन फलस्यैव प्राप्तेरेवमुक्तमिति ध्येयम्॥ **अन्यथेति**॥ इत्युक्तमध्यमगुणाद्युपासनानुपपत्तेरित्यर्थः।

पूर्वपक्षीयलिङ्गन्यायस्य व्याख्यानम्

लिङ्गमित्युक्तन्यायं तत्स्वरूपं तद्व्यापकव्यञ्जनपूर्वं विवृण्वत् **'ब्रह्मणश्च ब्रह्माण्याश्च[१] स्थानैक्यं गुणतारतम्यं च यथागुणोपासनं मुक्तावाधिक्यं न भवतीत्यत्र लिङ्गम्, समविषमोपासनायुक्तेरिति न मन्तव्यम्'** (न्या.वि.) इति वाक्यं यवागून्यायेन व्याख्यातुं व्यभिचारोद्भावनस्य प्रयोजनप्रदर्शनपरं 'यथागुणोपासनम्' इति मध्यमवाक्यमादौ तात्पर्यतो व्याचष्टे - **नोपासनं स्वानुसारिफलप्रदमिति**॥ अन्तिमं व्याख्यातुमाह- **ब्रह्माणीब्रह्मणोरिति**॥ व्याख्याति- **तयोरिति**॥ **न सम्भवतीति**॥ अनेनायुक्तेरित्येतदसिद्धेरिति व्याख्यातम्। व्यापकाभावप्रदर्शकमाद्यं व्याख्याति- **नचेति**॥ कुतोऽसिद्धि-

१. ह. ब्रह्मण्याः

रित्यन्तिममेव वाक्यमावृत्त्या हेत्वध्याहारेण च व्याख्याति- **नचोपासनमपीत्यादिना**॥ तथाचायमत्र विवरणवाक्यार्थः:- पूर्वनये उपासनस्य स्वानुसारिफलदत्वमनुमानेनाभिलषता तन्मूलभूता 'यत्रासमविषमोपासनं तत्रासमविषमफलम्' इति व्याप्तिर्विवक्षणीया[१]। नचासौ शक्यते रक्षितुम्। ब्रह्माणीब्रह्मणोर्व्यभिचारादिति वक्तुं तयोर्व्यापकाभावं तावदुपपादयति- **ब्रह्मणश्चेति**॥ स्थानैक्यमिति साम्यं, गुणतारतम्यमिति फलवैषम्यं दर्शितम्। तथाच तयोः समविषमं च फलमिति तयोर्व्यापकाभावः सिद्ध इति शेषः। समविषमोपासनाऽयुक्तेरुपासनायामेकस्मिन्नेव विषयेऽधिकारिणि काले च समत्वविषमत्वयोर्विरुद्धत्वेनायोगात्। असमविषमोपासनाख्यं व्याप्यमस्तीति शेषः। व्यापकाभाववति व्याप्यस्य वृत्तिरेव हि व्यभिचार इति भावः। इति व्यभिचारदर्शनं यथागुणोपासनं मुक्तावाधिक्यं न भवति न युज्यत इत्यत्र लिङ्गमेतत्प्रमेयस्य ज्ञापकमिति।

यद्वा, मौक्तिकमाधिक्यं, मुक्तिलक्षणं फलमिति यावत्, नोपासनानुसारि, उपासनाननुसारित्वेनान्यत्र प्रमितत्वात्। यद् यथा प्रमितं तत् तथैवेति सामान्यतो दृष्टानुमानेन पूर्वोक्तप्रमेयमाक्षिपन् हेत्वसिद्धिवारणाय हेतुमुपपादयति- **ब्रह्मणश्चेति**॥ ब्रह्मणश्च ब्रह्माण्याश्च समविषमोपासनाया विरोधेनायुक्तेर्न समविषमोपासना तावदङ्गीकर्तुं शक्यते। तयोः फलं स्थानैक्यं गुणतारतम्यं च प्रमितम्। ततः समविषममेव तदिति प्रमितम्। तथाचान्यत्रोपासनाननुसारित्वं प्रमितमिति हेतुर्नासिद्ध इत्यन्यत्र प्रमित एवोपासनायाः समविषमत्वाभावः स्थानैक्यं गुणतारतम्यं चोक्तरीत्या फलस्य तदननुसारित्वे लिङ्गमित्यर्थः।

सिद्धान्तीययथाशक्तिक्रियान्यायस्य व्याख्यानम्

'यथाशक्तिक्रिया' (न्या.वि.) इत्युक्तन्यायं तच्छक्तिप्रमापणेन सम्बन्धि-

१. म. व्याप्ती रक्षणीया।

प्रदर्शनेन विवृण्वत्

"'**यथाशक्ति स्मृतान् धात्रा गुणान् विष्णोः सरस्वती।**
स्मरेत् त्रैविक्रमाद्यांस्तु नित्यविक्रान्तिपूर्वकैः॥
कदाचिल्लोपयेद् देवी स्थानैक्यं न गुणैस्ततः।
साम्यं तयोर्यथा विष्णोर्गुणोपासाफलं भवेत्॥'

इत्यध्यात्मवचनाद् यथाशक्ति क्रिया देव्याः'' (न्या.वि.) इति वाक्यं भाष्येण सह तात्पर्यतो व्याचष्टे- **ब्रह्माण्या हीत्यादिनाऽन्तर्भाव एवेत्यन्तेन॥** ततश्च सरस्वती **धात्रा** स्वनियतगुरुणा हिरण्यगर्भेण **यथाशक्ति** स्वशक्तिमालोच्य **स्मृतान्** स्मारितान् उपदिष्टान् **विष्णोर्गुणान्** सर्ववेदोक्तान् ज्ञानानन्दादींस्त्रिविक्रमणकंसहननादिक्रियाः मत्स्यादिरूपाणि च **स्मरेत्** उपसंहरति। तुशब्दोऽत्रापवादमाह। तमेवाऽह- **त्रैविक्रमाद्यानिति॥** नित्यविक्रान्तिपूर्वकैर्गुणैरन्तर्भावितानिति शेषः। त्रैविक्रमाद्यान् गुणानुपसंहरेत्, नतु सर्वशः पृथक्त्वेन। तुरावृत्तौ विशेषं द्योतयति। क्रियाः शक्तिदशायां पार्थक्येनाप्युपसंहरति। कथं तर्ह्युक्तं घटनीयम्? आह- **कदाचिल्लोपयेत्** अन्तर्भावयेत्। यत एवं तयोरुपासने वैषम्यं साम्यं चास्ति, यतश्च विष्णोर्गुणोपासा यथा येन प्रकारेण कृता तथा फलमपि भवेदिति नियमः, अत इति शेषः, **तयोः** सरस्वतीधात्रोः **स्थानैक्यं** सायुज्यभाजोर्भगवच्छरीरलक्षणस्थानमेकमेव। **गुणैर्न साम्यम्।** साम्याभावश्चोपपद्यत इति विवरणार्थः सूचितः।

सूत्रार्थः

सूत्रार्थस्तु - एवंशब्दश्चशब्दश्चाऽवर्तते। आवृत्तश्चोऽप्यर्थः। नतु कादाचित्कक्रियास्वित्यध्याहारः। **एवं** अपूर्वत्वाविशेषेऽपि समाने सावधारणमेतत्। सत्यज्ञानानन्दादिगुणैः सदातनत्वेन **समाने** सदृश एव गुणजाते नित्यक्रियादावुपसंहारः। योग्यतया ब्रह्माण्या इति लभ्यते। नतु कादाचित्कत्रिविक्रमत्वादि-

क्रियासु विशेषोपसंहारः। तर्हि तदुपसंहार एव लुप्यते। एवं च सामान्याकारेणोपास्यत्वमप्यस्ति। भगवदीयनित्यक्रियाया अनित्यक्रियाया एवम् **अभेदात्** अन्तर्भावलक्षणाभेदस्य सद्भावात्। त्रिविक्रमत्वादिक्रियासु महाफलभोगाधिकारिणा चतुर्मुखेनैव सर्वदोपसंहारः। कुतः? उपासनातज्जन्यफलयोरभेदात्। फलस्य साधनानुसारित्वादिति यावदिति केचित्। तर्हि किं ब्रह्मणोऽपि विशेषाकारेणोपास्यत्वं नास्ति, नेत्युच्यते, **'सम्बन्धादेवमन्यत्रापि'** (ब्र.सू. ३.३.२१) कादाचित्कक्रियाणां भगवता तादात्म्यलक्षण**सम्बन्धाद् अन्यत्रापि** अनित्यक्रियास्वपि **एवं** सत्यज्ञानादिवत् सदातनत्वमस्ति। तथाच तस्य योग्यताधिक्यात् तैः सह युगपद् बुद्ध्यारोहेण एवं विशेषाकारेणोपसंहारोऽप्यस्तीति पूर्वोक्तप्रमेयाक्षेपेण प्रवर्तनादस्य द्वितीयत्वमिति सूत्रक्रमोऽप्यनुसन्धेयः।

सङ्क्षेपभाष्यव्याख्यानम्

एतदधिकरणतात्पर्यमप्युक्तम्- **'ब्रह्मणा त्वखिलैर्गुणैः' इति॥** ब्रह्मणेति ब्रह्मपदयोग्यचेतन उच्यते। तेन ब्रह्माण्या अपि सङ्ग्रहः। तुशब्देन तयोरप्युक्तरीत्योपासनायां समविषमत्वमस्तीत्यर्थः। लिङ्गयथाशक्तिक्रियाख्यौ न्यायावुपलक्षणया सूत्रसूचितावेवेति युक्तं तयोर्न्यायमालायां सङ्ग्रहणम्।

अधिकरणस्वरूपविषये सिद्धान्ते मतभेदाः

अत्र त्रयः पक्षाः। 'दर्शयति च' (ब्र.सू. ३.३.२३) इत्यन्तं सूत्रचतुष्टयमेकमधिकरणमेकाभिधेयत्वादित्येकः पक्षः। अयं च न्यायरत्नावलीकारस्य सम्मतः। तत्राऽद्यमेकमधिकरणम्। द्वितीयं तु द्वितीयम्। तृतीयं चतुर्थं[1] त्वेकमधिकरणमित्यधिकरणत्रयमित्यन्यः। अयं च पक्षः लिङ्गयथाशक्तिक्रिययोः न्यायमालायां सङ्गृहीतयोः स्वान्यपक्षन्याययोरावृत्त्या 'सम्बन्धादेवमन्य-

१. म. तृतीयचतुर्थे।

त्रापि'(ब्र.सू. ३.३.२१) इति द्वितीयसूत्रसम्बन्धितया व्याकुर्वतः सम्बन्धदीपिकाकारस्य । सूत्रद्विकद्विकमेकैकमधिकरणमित्येकः । अयं चेह टीकायामभिप्रेतः ।

पक्षत्रयसाधुताविवेचनम्

अत्राऽद्यः पक्षोऽनवस्था सन्धिरिति न्यायमालायामविशेषाधिकरणस्वीयान्यपक्षन्याययोः सङ्ग्रहात्, विवरणे च 'नचाऽत्मशब्देनास्य पुरुषस्य' (न्या.वि.) इत्यादिना विवरणाच्चायुक्त एव । द्वितीयस्तु न्यायावृत्त्या विषयसङ्गत्याद्यूहया च युक्त एव । तथाहि । समानसूत्रोक्ते त्रिविक्रमत्वादिकादाचित्कक्रियाविशेषे ब्रह्मज्ञानसाधनोपासनाविषये विशेषाकारेणोपसंहारस्य समर्थनादस्ति शास्त्रादिसङ्गतिः । उभयविधानां प्रियशिरस्त्वादीनामानन्दादीनां चोपास्तीनां दर्शनात् सन्देहबीजात् त्रिविक्रमत्वादिक्रिया विशेषाकारेणोपास्या न वेति सन्देहः । न विशेषत उपास्या इति पूर्वः पक्षः । तथोपास्तेर्निष्फलत्वात् । नच सायुज्यमेव फलमिति वाच्यम् । सरस्वत्यास्तदभावेऽपि सायुज्यदर्शनात् ।

किञ्च कादाचित्कानां त्रिविक्रमत्वादीनां सर्वदा पार्थक्येनोपासनमसुकरम् । योग्यताविशेषात् सुकरमिति चेत् । सायुज्यभाजो विशेषे प्रमाणाभावात् । भावे वा कादाचित्कानां त्रिविक्रमत्वादीनां सदाऽभिव्यक्त्यभावेन नित्यव्यक्तचिदानन्दादिवदुपासने मिथ्योपासनत्वापत्त्या हेयत्वाच्च । तस्मान्न तेषां विशेषत उपासनं युक्तम् । किन्तु सरस्वतीवदेव सामान्यत एव । आनन्दाधिक्यं च प्रमितं चतुर्मुखस्य । तदेवोपासनस्य स्वानुसारिफलदत्वं नास्तीत्यत्र लिङ्गं भविष्यतीति न युक्तं स्वानुसारिफलदत्वमिति ।

सिद्धान्तस्तु - परमात्मसम्बन्धित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यत एव । व्यक्त्यात्मना कादाचित्कत्वेऽपि शक्त्यात्मना नित्यत्वात् नित्यव्यक्तचिदानन्दादिवदेवोपास्तौ मिथ्योपास्तित्वायोगात् । तर्हि सरस्वत्या

अप्युपसंहार्यत्वमिति चेत्, सामान्यतश्चेदिष्टमेव । उक्तं च तदेव पूर्वसूत्रे । विशेषतश्चेदयोग्यत्वान्नेति ब्रूमः । सायुज्यभाजोरपि

'गुणास्त्रैविक्रमाद्याश्च संहर्तव्या न संशयः ।
विरिञ्चस्यैव नान्येषां स हि सर्वगुणाधिकः ॥'

(ब्र.सू.भा.उदाहृतबृहत्तन्त्रवचनम्)

इत्यादिवचनेन हेतुपूर्वं योग्यताविशेषस्योक्तत्वात् । समानानामेवोपसंहार इत्युक्तिस्तु अशक्तविषया । न ब्रह्मविषया । तस्याधिकशक्तित्वेन यथाशक्ति उपासनाया अकृतौ विधिलङ्घनेन प्रत्यवायापत्त्या यथाशक्ति क्रियाया उपास्यत्वे सिद्धे विशेषाकारोपासनाशक्तिमालोच्य न तथोपास्त इत्युक्तौ बाधकाभावात् । ब्रह्माणीब्रह्मणोरुपासनाभेदे समविषमोपासनत्वं सिद्धमिति तस्य स्वानुसारिफलप्रदत्वं सिद्धमित्यधिकरणरचनसम्भवात् । नच न्यायविवरणे एतयोर्न्याययोः पुनरविवरणान्नाधिकरणान्तरत्वं युक्तम् । 'ज्योतिश्चरणाभिधानात्'(१-१-२४), 'समाकर्षात्'(२-४-१६), 'चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः' (२-४-११) इत्यादिषु पृथगधिकरणत्वेन व्याख्यातेष्विवेहाप्युपपत्तेः । नहि सम्भवति, अनुव्याख्याने

'विरोधिसर्वबाहुल्यकारणस्त्रीनिषेधिनाम्'

इति प्रथमचतुर्थपादीयाधिकरणोपाध्युक्तिदशायां पृथगुपाध्यनुक्तौ,

तथा

'सर्वमानैर्विरोधश्च व्युत्पत्तेरप्यशक्यता ।
परस्परविरोधश्च विरोधः कार्यतद्वतोः ।
स्त्रीलिङ्गत्वं निषेधश्च पूर्वपक्षेषु युक्तयः ॥
दोषात्यस्पृष्टिनियमः शब्दार्थानेकता तथा ।
बहुरूपत्वमीशस्य व्यक्त्यव्यक्तिविशेषता ।

उत्पादनं स्वदेहाच्च दुर्जनाव्यक्तता तथा।
इत्याद्या युक्तयः साक्षात् सिद्धान्तस्थापिका इह॥'

इति पूर्वपक्षसिद्धान्तयुक्तिसङ्ग्रहदशायामपि पृथगनुक्तत्वेऽपि, भाष्ये समन्वेतव्यशब्दान्तरानुपदर्शनेऽपि, तत्त्वप्रदीपादावपि अधिकरणान्तरत्व-ज्ञापकाभावेऽपि च 'समाकर्षात्' (ब्र.सू. २.४.१६) इत्यादिसूत्राष्टकस्य 'साक्षादप्यविरोधं जैमिनिः' (१-२-१८) इत्यादीनां वैश्वानराधिकरणशेष-तोपपत्तावपि[१] अधिकरणान्तरत्वमेव। इह तु भाष्ये पुनरुपसंहारपदश्रवणेऽपि न न्यायावृत्त्याऽधिकरणान्तरत्वमिति। यदि च पूर्वतन्त्रे हेतुरदर्शनाच्चेति सूत्रस्य विरोधाधिकरणशेषत्वेऽपि पृथक् न्यायसूचकत्वमिव समाकर्षस्यापि पृथङ् न्यायसूचकत्वमस्तीति दर्शयितुं टीकायां तत्राधिकरणान्तरं कृतमिति तदा प्रकृतेऽपि पृथङ्न्यायसूचनायाधिकरणान्तरत्वस्यैव युक्तत्वात्। अतो द्वितीयः पक्षो युक्तः। इहाधिकरणान्तराकरणेऽपि समाकर्षन्यायोक्तदिशा पृथङ्न्यायस्तूत्प्रेक्ष्य एवेत्यधिकरणशेषत्वे सम्भवति तत्पार्थक्यमङ्गीकृत्य विषयादिगवेषणक्लेशो न युक्त इति तृतीयोऽपि युक्ततर एवेति स एव टीकाकृताऽऽश्रित इति सर्वं समञ्जसम्।

॥ इति समानाधिकरणम्[२] ॥ १२ ॥

१. म. वैश्वानराधिकरणशेषतावत् पूर्वाधिकरणशेषतोपपत्तौ।
२. म. समाननयः।

॥ अथ विशेषाधिकरणम् ॥ १३ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ न वा विशेषात् ॐ ॥ ३-३-२२ ॥

न वाऽऽत्मशब्देन सर्वगुणगृहीतिः। अधिकारिविशेषात्॥ २२॥

॥ ॐ दर्शयति च ॐ ॥ ३-३-२३ ॥

'सर्वान् गुणानात्मशब्दो ब्रवीति ब्रह्मादीनामितरेषां नचैव' इति भाल्लवेयश्रुतिः[१] ॥ २३ ॥

॥ इति विशेषाधिकरणम् ॥ १३ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्रेश्वरदर्शनसाधनात्मशब्दोक्तगुणोपासनस्य सर्वैः कर्तव्यतासमर्थना-दस्ति शास्त्रादिसङ्गतिः। अन्यथोक्तमयुक्तं स्यादतः समर्थनीया। प्रकृतात्म-शब्दोक्तगुणा एव विषयः। सर्वोपास्या न वेति सन्देहः। गुणद्वैविध्यमेव सन्देहबीजम्।

पूर्वपक्षः

नाऽऽत्मशब्दोक्तगुणाः सर्वोपास्या इति पूर्वः पक्षः। आत्मशब्दस्य सर्व-गुणाभिधायकत्वात्। उक्तमत्रोत्तमाधिकारिणः प्रत्येव सर्वगुणाभिधायको न सर्वान् प्रतीति। सत्यम्। तथाऽप्यस्यैतावन्त एवोच्यन्त इति प्रातिस्विक-

१. ह. इति च भाल्लवेयश्रुतिः।

नियमाभावेनोपासनाऽसम्भवात्। नच सम्भवति हि कदाचिद् बहुगुणान् कदाचिदल्पानपि बोधयतीति। अत आत्मशब्दोक्तगुणानां सर्वोपास्यत्वाभावादनुपसंहारप्रमाणत्वोक्तिरयुक्तेति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **न वेति ॥** युक्तमेव सर्वेषामात्मशब्दोक्तगुणोपासनम्। तस्य सर्वान् प्रति सर्वगुणाभिधायकत्वाभावात्। कुतः? तस्य सर्वगुणाभिधानशक्तावप्यधिकारिसामर्थ्यविशेषात् तत्तद्योग्याभिधायकत्वात्। न्यूनाधिकोक्तिसम्भवेन प्रातिस्विकनियमाभावादुपासनानुपपत्तिरिति न वाच्यम्। यस्य यावन्तो गुणा आत्मशब्देन युगपत् प्रतीयन्ते तेन तावन्तो ध्यातव्या इति व्यवस्थोपपत्तेः। आत्मशब्देन गुणप्रतीतिरियमेवाभिसंहितेत्ययोग्यप्रतीतिर्न प्रतीतिरिति भावः॥ २२॥

पूर्वोक्तप्रमेयस्य श्रुत्या समर्थनम्

युक्तिसिद्धार्थं श्रुत्याऽपि समर्थयत् सूत्रं पठित्वा तां श्रुतिमुदाहरति- **दर्शयति चेति ॥** सर्वान् स्वयोग्यान् बहून् ब्रवीतीत्यस्य युगपत् प्रकाशयतीत्यर्थः। तस्मादात्मशब्दोक्तगुणानां सर्वोपास्यत्वादुक्तं युक्तमिति सिद्धम्॥ २३॥

॥ इति विशेषाधिकरणम्॥ १३॥

॥ शेषतात्पर्यचन्द्रिका ॥

एतदधिकरणप्रतिपाद्यविषयः पूर्वपक्षश्च

अत्रान्वयनयोक्तमात्मशब्दोक्तगुणोपासनस्य सर्वैः कर्तव्यत्वं विवरणीयम्। अन्यथा वक्ष्यमाणरीत्या व्यवस्थित्यसम्भवेन सर्वेभ्यश्चतुर्भ्यश्चान्ये मध्यमगुणा आत्मशब्दानुक्ता एव प्रसज्येरन्। अत इह विवरणप्रसङ्गादिह

सङ्गतिलाभाच्च विव्रियते। तथाहि। यत् पूर्वोक्तं वाण्यास्त्रिविक्रमत्वाद्युपसंहारो नास्तीति, तदयुक्तम्। तथाहि। त्रिविक्रमत्वादिकानात्मशब्दस्तान् प्रति ब्रवीति, न वा? आद्ये आत्मशब्दोक्तस्यावधारणान्यथानुपपत्त्या सर्वोपास्यत्वम् 'अन्वयादिति चेत्' (ब्र.सू. ३.३.१८) इत्यत्रोक्तमयुक्तं स्यात्। नच त्रिविक्रमत्वाद्ययोग्यगुणाभिधायकत्वेऽपि तद्योग्यगुणानभिधायकत्वम् 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्युक्तन्यायेन भविष्यतीति वाच्यम्। तत्र नियतगुरूपदेशेन भाव्युत्कर्षज्ञानेन फलानुसारिगुणोपसंहार्यत्वव्यवस्थितिसम्भवेऽपीह तदयोगात्। आत्मशब्दोक्तत्वे हि व्युत्पत्तिग्रहोऽपेक्षितः। ननु योग्यतानिश्चयः स्वस्य। तथा सति 'सागरं तर', 'यजेत स्वर्गकामः' इत्यादिकं गृहीतसङ्गतिकान् यत्यादीन् प्रत्यबोधकं स्यात्। सङ्गतिग्राहकं प्रमाणं तु 'आप्तव्याप्तेरात्मशब्दः' (ब्र.सू.भाष्योदाहृतवचनम्) इत्यादिकं त्रिविक्रमत्वादावप्यविशिष्टमेव। अत एव न द्वितीयः। अविशेषादेवेतरगुणानामप्यभिधायकश्च न स्यात्। अथापि यदि नियमोऽङ्गीक्रियते तर्हि द्विधैव सोऽङ्गीकर्तुमुचितः। कांश्चित् सर्वगुणानेव 'अत्र ह्येते सर्व एकीभवन्ति' (बृ.उ. ३.४.७) इत्याद्यनुशासनात् कांश्चित् चतुर एव गुणान् इति। ननु मध्ये पञ्चषट्सप्तादिसर्ववेदोक्तं गुणजातं तत्तद्योग्यतानुसारेणाऽत्मशब्दो ब्रवीतीति। तथा सत्यस्य पुरुषस्यैतावन्तो गुणा उच्यन्ते, अस्य पुरुषस्यैतावन्त इति प्रातिस्विकयोग्यतानियामकप्रमाणाभावेन व्यवस्थित्यभावेनानवस्थाप्रसङ्गः। तथाचाऽत्मशब्दः सर्वेषां गुणानां प्रत्यायक एव स्यात्। चतुर्णामेव वा प्रत्यायकः स्यात्। व्युत्पत्तिग्रहभेदात्। तथाच वाण्यादीनां सार्वत्रिकव्युत्पत्तिग्रहे त्रिविक्रमत्वादिप्रतीतिः स्यादेव। तथाऽपि तदनुपासने 'आत्मेत्येव' (बृ.उ. ३.४.७) इत्ययोगव्यवच्छेदकावधारणव्याहतिः। सार्वत्रिकव्युत्पत्त्यग्रहे तु गुणचतुष्टयप्रतीतिरेव स्यात्। तथाच मध्यमगुणा अनुपास्या एवेति 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्युक्तिभङ्ग इति विशेषाशङ्कया पुनरुत्थानात् समाननयाक्षेपेण प्रवृत्तेश्च 'इतरे त्वर्थसामान्यात्'

(ब्र.सू. ३.३.१४) इत्यनेन न गतार्थत्वम्। न वा 'अन्वयादिति चेत्' (ब्र.सू. ३.३.१८) इति सूत्रानन्तर्यं वाऽपद्यते। कृतः पूर्वःपक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

प्रतीतिरात्मशब्देन सर्वेषामस्ति सर्वशः।
गुणानां किन्त्वयोग्यत्वाद् युगपत् प्रत्ययो न हि॥

'आप्तव्याप्तेरात्मशब्दः' (ब्र.सू.भाष्योदाहृतवचनम्) इति सङ्गतिग्राहक-प्रमाणस्य सर्वेषामविशिष्टत्वेन सर्वप्रतीतिसम्भवेऽपीहोपसंहारोपयुक्ताया युगपदात्मशब्दात् तत्प्रतीतेर्योग्यताविशेषापेक्षत्वेन प्रमितत्वात्। तत्तद्योग्यता-नुसारेणाऽत्मशब्दाद् यस्य यावन्तो गुणा युगपद् भासन्ते तावत्स्वेव तस्योपसंहार इति व्यवस्थितिसम्भवेन 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्युक्त-न्यायेनैव तावद्गुणोपसंहारोपपत्तेरुक्तमुपपन्नमिति।

अद्वैतविशिष्टाद्वैतमतरीत्याऽधिकरणशरीरम्

अत्र 'सम्बन्धादेवम्' (ब्र.सू. ३.३.२१) इति सूत्रत्रयमेकमधिकरण-मुभयेऽप्याहुः। बृहदारण्यके 'सत्यं ब्रह्म' (बृ.उ. ५.५.१) इत्युपक्रम्य, ब्रह्मण आयतनभेदेन द्वे नामनी आदिश्येते। 'तद् यत् सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषस्तस्योपनिषदहरित्यधिदैवतम्। अथाध्यात्मम्, यश्चायं दक्षिणेऽक्षन् पुरुषस्तस्योपनिषदहमिति' (बृ.उ. ५.५.२,३) इति। तत्र संशयः। किमुभे अप्युपनिषदौ उभयत्र ध्यातव्ये उताधिदैवतमेकाऽध्यात्ममेका इति।

सत्यस्यैव प्रधानस्य तच्छब्देनाभिधानतः।
तस्यैक्यादुभयत्रापि नामद्वयमुपास्यताम्॥

यद्यप्यध्यात्माधिदैवतस्थानविशिष्टः पुरुषोऽनन्तरनिर्दिष्टः। तथाऽपि स्थानद्वयं तद्वैशिष्ट्यं वा पुरुषं प्रत्युपसर्जनीभूतं न तच्छब्देन परामृश्यते। अपि तु

प्रधानपुरुष एव सत्यशब्दवाच्यः। स चोभयत्राप्येक इति तद्धर्मभूतयोरुपनिषदोः सङ्कर इति प्राप्तेऽभिधीयते-

एकस्थानविशिष्टस्य यो धर्मो विगतः स न।
स्थानान्तरविशिष्टस्य तस्मान्नाम्नो व्यवस्थितिः॥

सत्यम्। न गुणभूतं स्थानमात्रं तच्छब्देन परामृश्यते। नापि तद्वैशिष्ट्यम्। किन्तु स्थानविशिष्टं ब्रह्म। 'य एष एतस्मिन् मण्डले पुरुषः' (बृ.उ. ५.५.३) इति तस्यैव प्रकृतत्वात्। तथाच विशिष्टस्य विशिष्टान्तराननुगमान्नोभय-त्रोभयानुचिन्तनमिति।

तन्निरासः

तन्न। 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' (छा.उ. १.७.५) इति श्रुत्याऽऽदित्यपुरुषगताहर्नाम्नोऽक्षिगतपुरुषे स्वयमेवोपसंहारप्रतिपादनादधिदैवतमेकाऽध्यात्ममेकोपनिषद् ध्यातव्येति सिद्धान्तायोगात्। नच 'यन्नाम तन्नाम' (छा.उ. १.७.५) इत्यस्य सामान्य-वचनत्वादहर्नामातिरिक्तनाम्न एवात्रातिदेशेन न तद्विरोध इति वाच्यम्। बाधकं विना सङ्कोचायोगात्। नचात्र विद्याभेद एव बाधकः। तस्यैवासिद्धेः। अधिदैवताध्यात्मरूपस्थानभेदात् तत्सिद्धिरिति चेन्न। 'तावन्योन्यस्मिन् प्रतिष्ठितौ' इति श्रुत्यैव स्थानैक्यप्रतिपादनात्। आकाशहृदयस्थानभेदेऽप्यग्नि-रहस्यबृहदारण्यकयोराम्नातायाः शाण्डिल्यविद्याया अभेदाङ्गीकारेण तस्य तत्राप्रयोजकत्वाच्च।

एतेनैकगुणविशिष्टस्य गुणान्तरविशिष्टेनाननुगमाद् भेदसिद्ध्या वेद्यभेदाद् विद्याभेद इति निरस्तम्। विशिष्टाननुगमस्य वेद्यभेदाप्रयोजकत्वात्। अन्यथोभयत्र शाण्डिल्यविद्यायामन्योन्यधर्मोपसंहारः पूर्वाधिकरणोक्तो न स्यात्। तत्राप्यग्नि-रहस्ये 'आकाशात्मानं कामरूपिणम्' इत्याकाशपरिमाणस्य, बृहदारण्यके 'तस्मिन्नन्तर्हृदये व्रीहिर्वा यवो वा' (बृ.उ.) इति व्रीह्यादिपरिमाणस्य चाऽम्नानाद्

विशिष्टस्य विशिष्टान्तराननुगमाद् वेद्यभेदापत्तेः। 'सैव हि सत्यादयः' (ब्र.सू. ३-३-३९) इत्यत्र विद्यैक्यस्य त्वयैव वक्ष्यमाणत्वाच्च।

अस्तु वा विद्याभेदः। तथाऽपि विशेष्यस्य सत्याख्यस्य ब्रह्मणः एकत्वान्नाम्नोः साङ्कर्येणोपासनं किं न स्यात्। ननु यदेकस्याप्याचार्यस्य शयानस्य पादसंवहनाद्युपासनमुक्तं, तन्न तिष्ठतो भवति। यच्च तिष्ठत उक्तं पादुकादानाद्युपासनं, न तच्छयानस्येति दर्शनादेकस्यापि ब्रह्मणोऽवस्थाभेदादुपासना भिद्यत इति चेन्न।

आनन्दादीनां गुणानां सर्वब्रह्मविद्यास्ववस्थाविशेषेऽपि विशेष्यैक्यमात्रेण 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३-३-१२) इत्यादावुपसंहाराङ्गीकारेणोपासनाभेदाभावात्। यदेकस्योपाध्यायस्य यौवने नमनस्तवनाद्युपासनं तदेव वृद्धत्वेऽपि दृष्टमिति विपरीतदृष्टान्तस्यापि सम्भवाच्च। नच नमनादि स्वरूपानुबन्धीति वैषम्यम्। आयतनस्य व्यपाश्रयत्वेन श्रूयमाणयोरपि नाम्नोस्त्रिविक्रमत्वादेरिवाऽनन्दादिवत् स्वरूपानुबन्धित्वाङ्गीकारात्। नामोपासनैक्येऽपि गुणान्तरोपासनाभेदेन विद्याभेदोपपत्तेश्च।

सम्बन्धादिति सूत्रस्य पराभिमतार्थविमर्शः

एतेन, यथा विभागेनाप्यधीतायां शाण्डिल्यविद्यायां गुणोपसंहार उक्तः एवमत्राप्येवञ्जातीयके विषये भवितुमर्हति, एकविद्यासम्बन्धादिति, यथा मनोमयत्वादिगुणविशिष्टस्यैकस्यैवोपास्यत्वेनोभयत्र विद्यैक्यम् एवमन्यत्र [1]स्यादित्यध्याहारस्याप्येकस्यैव सत्यस्य ब्रह्मणः स्थानद्वयसम्बन्धान्न रूपभेद इति विद्यैक्याद् द्वे नामनी अनियते इति च सूत्रयोजने निरस्ते। बहुकल्पनाप्रसङ्गात्। मद्रीत्याऽवश्यवक्तव्यप्रमेयार्पकतया सिद्धान्तसूत्रत्वे सम्भवति पूर्वपक्षसूत्रत्वेन व्याख्यानायोगाच्च।

१. 'अक्ष्यादित्यस्थस्याप्येकस्यैव' इति पाठेन भाव्यमिति भाति।

'न वा विशेषात्' इति सूत्रस्य पराभिमतार्थविमर्शः

नचोभयोरुभयत्र प्राप्तिः। विशेषात् उपासनस्थानविशेषसम्बन्धादिति, नचैतदस्ति यद्विद्यैक्यादुभयत्रोभे नामनी इति। कुतः? विशेषात्। उभयत्र हि रूपं विशिष्यते। एकत्राऽदित्यस्थानसम्बन्धीतरत्राक्षिस्थानसम्बन्धि ब्रह्मेति रूपभेद इति नियते नामनी इति च 'न वा विशेषात्' (ब्र.सू. ३.३.२२) इति सूत्रव्याख्याने चायुक्ते। आकाशस्य हृदयस्य च स्थानभेदेऽपि धर्मसाङ्कर्यस्य शाण्डिल्यविद्यायामङ्गीकारादेव।

'दर्शयति च' इति सूत्रस्य पराभिमतार्थविमर्शः

एतेनैव 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम' (छा.उ. १.७.५) इति श्रुतिरेवञ्जातीयकानां धर्माणां व्यवस्थितिं दर्शयति च। अन्यथाऽऽदित्यगतानां रूपादीनामक्षिपुरुषे उपसंहारस्य स्वतःसिद्धेरतिदेशानुपपत्तेरिति तृतीयव्याख्यानमपि निरस्तम्।

शैवमतानुवादः

शैवस्तु पूर्ववदेव आद्येन पूर्वपक्षिते, द्वितीयेन सिद्धान्तमाख्याय सूत्रद्वयमेकमधिकरणं विधाय 'दर्शयति च' (ब्र.सू. ३.३.२३) इति तृतीयं सूत्रमधिकरणान्तरं व्याचख्यौ। छान्दोग्ये 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते। हिरण्यश्मश्रुः हिरण्यकेशः आप्रणस्वात् सर्व एष सुवर्णः' (छा.उ.) इत्यादिमण्डलविद्या श्रूयते। तैत्तिरीयके च 'एषोऽन्तरादित्ये हिरण्मयः पुरुषः' (म.ना.उ.) इति हिरण्मयं पुरुषं प्रस्तुत्य तस्योपसंहारे 'सर्वो वै रुद्रः' (म.ना.उ. १०.११) इत्यारभ्य 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतये उमापतये नमो नमः' (म.ना.उ.) इत्यन्तेनाऽम्नायते मण्डलविद्या। सैका, भिन्ना वेति संशये सर्वाङ्गसुवर्णत्वबाहुमात्रसुवर्णत्वसर्वात्मकत्व[1]सर्वाधिपतित्वादिरूपभेदाद्

१. म. सर्वाङ्गत्व।

भेद इति प्राप्तेऽन्तरादित्य इति स्थानैक्यमेव विद्यैक्यं दर्शयतीति।

तन्निरासः

तन्न। 'समान एवं चाभेदात्' (ब्र.सू. ३.३.२०) इत्यत्र हृदयविद्यामाश्रित्यैकत्राऽकाशात्मकत्वे महत्त्वे, इतरत्र यवसाद्दश्येनाल्पत्वे अत एव धर्मभेदे प्रतीतेऽप्युभयत्र मनोमयत्वादेः प्रतीतेराकाशात्मानमित्यादेश्चाऽकाशवत् स्वच्छतापरत्वेन माहात्म्यपरतायाः स्तावकत्वेनैवोपपत्तेः। वशित्वादेश्च सत्यसङ्कल्पत्वादिविततिरूपत्वेन तदभेदाद् विद्यैक्यम्, अत एव धर्माणामुभयोपसंहारः प्रतिपादितः। 'सम्बन्धादेवमन्यत्रापि' (ब्र.सू. ३-३-२१) इत्यत्र स्थानभेदादपोदित इतीह मण्डलविद्यायाः स्थानभेदाभावादपवादविषयत्वाभावेन पूर्वन्यायेनैव विद्यैक्यादिसिद्धेः पुनरिह संशयायोगेनाधिकरणान्तरवैयर्थ्यात्। कर्त्रध्याहारस्य दर्शयतीति शब्दानानुगुण्यात्, चशब्दवैयर्थ्याच्च।

टीकायां पूर्वपक्षीयानवस्थान्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु - **कर्तव्यतासमर्थनादिति**॥ विशेषाशङ्कया प्राप्तपूर्वपक्षनिराकरणेन तत्समर्थनद्वारा विवरणादित्यर्थः। अनवस्थेत्युक्तन्यायं प्रतियोगिस्वरूपविवरणेन विवृण्वत् 'नचाऽत्मशब्देनास्य पुरुषस्यैतावन्तो गुणा उच्यन्त इति व्यवस्थित्यभावः' (न्या.वि.) इति वाक्यमिहाप्राप्तविशेषाशङ्कापरतया व्याख्याति- **सत्यम्। तथाऽप्यस्यैतावन्त इति**॥

टीकायां सिद्धान्तीयसन्धिन्यायस्य व्याख्यानम्

सन्धिरित्युक्तन्यायमभिसन्धिपरतया तदाकारप्रदर्शनपूर्वकं विवृण्वत् 'यस्य यावन्तोऽर्था युगपद् ध्यातुं शक्यन्ते तस्य तावन्त इति सन्धेः' (न्या.वि.) इति वाक्यमभ्यधिकशङ्कानिरासपरतयेतिकरणात् पूर्वं ध्यातव्या इति शब्दं चाध्याहरन् व्याचष्टे- **यस्य यावन्त इति**॥

नन्वात्मशब्दे सर्वगुणशक्तिः सर्वैर्गृह्यते न वा। आद्ये सर्वगुणप्रतीतिरनिवार्या। अन्ते तु शक्तिग्रहसामग्र्याः सत्त्वेन तदभावायोग इत्यतः सम्बन्धिपदतात्पर्यमाह- **आत्मशब्देन गुणप्रतीतिरिति**॥ तथाचास्त्येव सर्वेषां शक्तिग्रहः। तथाऽप्ययोग्यस्य न सर्वेषां युगपत् प्रतीतिः। युगपत् प्रतीतिरेवेहोपसंहारोपयुक्ततया विवक्षिता, नतु प्रतीतिमात्रमिति भावः। सूत्रवैयर्थ्यं परिहरन्नवतारयति- **युक्तिसिद्धार्थमिति**॥ सर्वेषां शक्तिग्रहसद्भावेन सर्वगुणप्रतीत्यनुपपत्तिः। शब्दस्य करणत्वेन कर्तृप्रत्ययानुपपत्तिश्च। अत आह- **युगपत् प्रकाशयतीत्यर्थ इति**॥

सूत्रार्थः

सूत्रार्थस्तु - अन्यत्रापि त्रिविक्रमत्वादावप्युक्तमुपसंहार्यत्वं **न वाऽस्तु** न वाऽङ्गीक्रियते। नन्वेवं कथं न विरोधः। विकल्पाङ्गीकारात्। वस्तुनि विकल्पासम्भवेन पुनर्विरोध एव। तत्रोच्यते- **विशेषात्** आत्मशब्देन युगपद् गुणप्रकाशनयोग्यताविशेषात्। नह्येवमपि विरोधो भवति। षोडशिग्रहणाग्रहणादावपि तत्प्रसङ्गात्। अत एवात्र वाशब्दो व्यवस्थितविकल्पे व्याख्यायते। विरिञ्चस्यैवाऽत्मशब्दः सर्वगुणप्रकाशकः, मानुषाणां चतुर्गुणप्रकाशकोऽपि, मध्यमदेवानां मध्यमगुणप्रकाशकोऽपीति।

सङ्क्षेपभाष्यस्यैतदधिकरणपरतया व्याख्यानम्

एतदधिकरणतात्पर्यमप्युक्तम्- 'सर्ववेदैश्च सर्वैरपि यथाबलम्। ज्ञेयो विष्णुर्विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम्' इति। **सर्ववेदैश्च** वेदेषु पठ्यमानैः आत्मशब्दैः **यथाबलम्** यथाशक्तिग्रहानुसारेण **सर्वैर्ज्ञेयो** यद्यपि भवति। तथाऽपि उपसंहारोपयुक्ते आत्मशब्दार्थज्ञाने आत्मशब्दार्थस्य युगपत् प्रतीत्यात्मके विशेषो वर्तत एव। स तु सर्वेषां नास्तीति।

॥ इति विशेषाधिकरणम्[1] ॥ १३ ॥

१. म. इति विशेषनयः।

॥ अथ सम्भृत्यधिकरणम् ॥ १४ ॥

॥ सूत्रभाष्यम् ॥

॥ॐ सम्भृतिद्युव्याप्त्यपि चातः ॐ ॥ ३-३-२४ ॥

सम्भृतिद्युव्याप्ती अपि देवादीनामुपसंहर्तव्ये नान्येषाम् । अत एव योग्यताविशेषात्।

'देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः ।
आनन्दाद्यास्तु सर्वेषामन्यथाऽनर्थकृद् भवेत् ॥'

इति ब्रह्मतर्के[१] ॥२४॥

॥ इति सम्भृत्यधिकरणम् ॥ १४ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मदर्शनसाधनोपासने सर्वेषां सम्भृत्यादिगुणोपासननिवारणादस्ति शास्त्रादिसङ्गतिः। अन्यथा चतुर्गुणनियमभङ्गप्रसङ्गान्निवारणीयं तत्। 'उक्षा स द्यावापृथिवी बिभर्ति', 'एष हि सर्वेषु लोकेषु भाति' (छा.उ. ४.१५.४) इत्यादौ प्रतीते प्रकृतभगवद्गुणान्तर्गते सम्भृतिद्युव्याप्ती विषयः । किं सर्वमुमुक्षूपास्ये उत नेति सन्देहः । द्विविधगुणप्रतीतिरेव सन्देहबीजम्।

पूर्वपक्षः

सर्वोपास्ये इति पूर्वः पक्षः । सर्वेषां मुमुक्षुत्वसाम्यात् । मोक्षे च

१. ह. इति च ब्रह्मतर्के ।

स्वाधमभरणस्य प्रकाशव्याप्तेश्च सर्वापेक्षितत्वात् । फलं चोपासनानुसार्येव भवति । 'यादृशो भावितस्त्वीशस्तादृशो जीव आभवेत् ।' इत्यादेः । नचैवं सर्वगुणोपास्तिः । सर्वेषां सर्वगुणापेक्षाभावात् । अतः सम्भृतिद्युव्याप्त्योः सर्वोपास्यत्वाच्चतुर्गुणोपास्तिनियमो न युक्त इति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **सम्भृतीति ॥** अपिपदात्रत्रः समाकर्षः । चशब्द एवार्थः। सम्भृतिद्युव्याप्ती न सर्वोपास्ये, किन्तु देवाद्युपास्ये एव । अधिकारियोग्यतायां विशेषसद्भावात् । देवादीनामेव तदुपास्तियोग्यता नान्येषामिति योग्यतैवोपास्तिनियमप्रयोजिका, न फलापेक्षेति भावः । यच्च प्रकाशादिमात्रमपेक्षितं तच्च भगवद्रूपप्रतीत्यविनाभूतप्रकाशादिनैव लभ्यते ।

ननु सम्भृत्यादिगुणोपास्तिर्देवादीनामेव योग्येति कुतः? अन्येषामयोग्यतायामप्युपासने को विरोधः? फलसिद्धेरित्यत आह- **देवादीनामिति ॥** अतः सर्वेषां सम्भृत्यादिगुणोपासाभाऽवान्नोक्तनियमभङ्ग इति सिद्धम् ॥२४॥

॥ इति सम्भृत्यधिकरणम् ॥ १४ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ॐ सम्भृतिद्युव्याप्त्यपि चातः ॐ ॥ ३-३-२४॥

पेटिकासङ्गतिः

यद्यप्यानन्दनयोक्तम् 'आत्मगृहीतिः' (ब्र.सू. ३.३.१७) इत्यादौ, प्राप्तिनयोक्तं च 'इतरे त्वर्थसामान्यात् (ब्र.सू. ३.३.१४) इत्यादौ विवृतम् । तथाऽपि न सम्यगिव । वक्ष्यमाणरीत्या सम्भृतिद्युव्याप्त्योरात्मशब्देन ग्रहणेऽग्रहणे वा पूर्वनयद्वयोक्तप्रमेयासिद्धेस्तद्द्वयं विवरणीयम् । तदत्र क्रियत इति पेटिकासङ्गतिः । यत एवमात्मशब्दस्याधिकारियोग्यताविशेषानुसारेण गुणाभिधायि-

त्वमुक्तमत एव सम्भृत्यादयोऽपि न मनुष्योपास्याः । किन्तु देवाद्युपास्या एवेत्यतिदेशनात्।

अनन्तरसङ्गतिः पूर्वपक्षश्च

ननु योग्यताविशेषाद् यस्य यावन्तो गुणा युगपत् प्रतिभासन्ते तावन्तोऽपि गुणा उपास्या इति यद्यङ्गीक्रियते तर्हि सम्भृतिद्युव्याप्त्यादयोऽपि मनुष्यान् प्रति युगपत् प्रकाशन्त आत्मशब्देनेति तेऽप्युपास्याः स्युः । नच तेषां तथा योग्यताविशेषो नास्तीति वाच्यम् । मुमुक्षुत्वाभावप्रसङ्गात् । अन्यथाऽऽनन्दादयोऽपि चत्वारो नैव भासेरन् । आनन्दादीनां सर्वापेक्षितत्वाद् भानं यदि तर्हि स्वाधमभरणप्रकाशव्याप्त्यादेश्च सर्वापेक्षितत्वादेव भानोपपत्तिः । स्वाधमभरणप्रकाशव्याप्त्योर्मुक्तावभावेऽपुरुषार्थत्वप्रसङ्गः । तस्मादात्मशब्देन सर्वमुमुक्षुसाधारण्येन गुणचतुष्टयाधिकगुणानां युगपत् प्रकाशावश्यम्भावेनैवम्भूतानां चोक्तन्यायेनोपसंहारनियमेनाऽनन्दनयोक्तं प्रमेयमनुपपन्नम् । यदि च सम्भृतिद्युव्याप्त्योरानन्दादिवत् फलेषु प्राधान्येऽपि मानुषाणां तदनपेक्षामङ्गीकृत्याऽत्मशब्दो न तान् प्रत्यप्यधिकान् गुणान् ब्रवीतीत्यङ्गीक्रियेत तर्हि देवादीनामपि सम्भृतिद्युव्याप्त्यादावपेक्षाभावादात्मशब्दो न तान् प्रत्यधिकान् गुणान् प्रकाशयेत् । तथाच सम्भृत्यादिकं पूर्वोक्तं प्रियशिरस्त्वादिकं चानुपास्यमेव स्यादिति 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्युक्तं प्रमेयमनुपपन्नं स्यात् ।

द्युतिव्याप्तिः सम्भृतिश्च मानुषैस्तदपेक्षिभिः ।
उपास्यैवार्थसामान्यान्न चेत् केनापि नो भवेत् ॥

इति पूर्वपक्षोत्थानाद् वाऽनन्तरसङ्गतिः ।

सिद्धान्तः

उपास्तौ न फलापेक्षा योग्यतैव प्रयोजिका ।
प्रकाशादिफलं यत्तु सर्वेषामन्यथैव तत् ॥

तथाहि । प्रियशिरस्त्वादिकमानन्दविशेषतया सर्वापेक्षितमपि सर्वेषामयोग्यमेव । उपचयापचययोः सर्वेषामभावात् । तथेदं सम्भृत्यादिकमपि । आत्मशब्दोक्तस्वामित्वविशेषरूपभरणस्य स्वाधमनियामकत्वात्मत्वात् तस्य च 'मुक्तस्वकीयावरयन्तृता च' इत्यादिना देवष्वेव प्रमितत्वात् । द्युव्याप्तेश्च चिच्छब्दोक्तज्ञानविशेषरूपायाः सार्वज्ञ्यरूपत्वात् तस्य 'देवादीनां तु विज्ञानम्' (गी.भा.) इत्यादिना देवेष्वेव प्रमितत्वात् ।

यत्तु सामान्यं प्रकाशरूपं स्वाधमपूज्यत्वमात्रं च, तद् भगवत्प्रीत्यविनाभूतप्रकाशादिनैव लभ्यते । प्रकाशादिफलस्य चिदुपास्तिसाध्यत्वात् । स्वाधमपूज्यत्वस्य च स्वामित्वोपास्तिसाध्यत्वाच्च । 'यादृशो भावितस्त्वीशः' इत्यादिवचनाद् ज्ञानात्मत्वेनोपासितः प्रकाशादि दास्यतीति किं प्रातिस्विकोपासनेन? देवादीनां तु तथोपासनया तद्योग्यफलातिशयस्य प्रमितत्वात् तेऽप्युपास्याः, नत्वानन्दादय एवेति न पूर्वनयद्वयोक्तमनुपपन्नमिति सिद्धान्तः ।

अद्वैतविशिष्टाद्वैतमतरीत्याऽधिकरणशरीरम्

अत्रोभाभ्यां व्याख्यातम् - तैत्तिरीयके, राणायनीयानां खिलेषु च ब्रह्मणो विभूतयोऽनारभ्यैव कामपि विद्यां पठ्यन्ते । 'ब्रह्मज्येष्ठा वीर्या[1] सम्भृतानि ब्रह्माऽग्रे ज्येष्ठं दिवमाततान । ब्रह्मा देवानां प्रथमोऽत[2] जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः' (तै.सं. १.८.७,२६) इति । तेषामेवोपनिषदि शाण्डिल्यविद्यादहरविद्यावैश्वानरविद्याप्रभृतयः ब्रह्मविद्याः पठ्यन्ते । तासु ता विभूतय उपसंहार्या न वेति संशये पूर्ववत् स्थानभेदान्न धर्मोपसंहार इत्यतिदिश्यते । अभ्यधिकशङ्का तु-

आधिदैविकभूतीनां शाण्डिल्याद्यासु साम्यतः ।
कचिच्चाऽयतनाभावाद् ब्रह्मैक्यादुपसंहृतिः ॥

१. म. विद्या । २. 'ब्रह्म भूतानां प्रथमं तु' इति तु भामत्याम् ।

'ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः' (छा.उ. ३.१४.३), 'एष उ एव भामनिः। एष हि सर्वेषु लोकेषु भाति' (छा.उ. ४.१५.४), 'यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः। उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' (छा.उ. ८.१.३) इत्यादिनाऽऽधिदैविकभूतिः शाण्डिल्यविद्यासु सम्भृत्यादिविद्याभिः समैव। षोडशकलादिविद्यानां चाऽयतनमेव नास्ति। ब्रह्मसम्बन्धप्रत्यभिज्ञानं चाविशिष्टं शिष्टोपदेशात्मकखिलग्रन्थशिष्टत्वाच्चोपनिषदुदितविद्याशेषत्वमिति।

अत्राभिधीयते -

ब्रह्मतद्गुणमात्रैक्यं विद्यैक्येऽतिप्रसञ्जकम्।
असाधारणधर्मैक्यं नास्ति विद्यैकता यतः॥

न तावदत्र ब्रह्मैक्यमाधिदैविकविभूत्या साधारणधर्मैक्यं वा विद्यैक्यमवगमयितुमलम्। वैश्वानरषोडशकलादिविद्यानामप्यभेदप्रसङ्गात्। ये त्वसाधारणवीर्यसम्भरणादयः सम्भृत्यादिविद्यासु, ये च शाण्डिल्यादिविद्यासु मनोमयत्वादयस्तेषां नेतरेतरप्रत्यभिज्ञा। अतो न विद्यैक्यम्। एवं च खिलोक्तायामश्रुतविधिकायामपि सम्भृत्यादिविद्यायां विधिं कल्पयित्वा विद्याभेदोऽङ्गीकार्यः। ततश्च सम्भृत्यादयो नान्यत्रोपसंहर्तव्या इति।

तन्निरासः

तन्न। सत्याख्यब्रह्मणः 'तस्य भूरिति शिरः' (बृ.उ. ५.५.३,४) इत्याद्युक्तगुणानां चैक्यप्रत्यभिज्ञानेऽप्यायतनभेदेन नाम्नोः पूर्वाधिकरणे व्यवस्थाङ्गीकारेण ब्रह्मतद्धर्मैक्यप्रत्यभिज्ञानस्याप्रयोजकत्वनिश्चयात् तेन पुनरिह शङ्कानुदयात्। अव्यवहितवाक्योक्तनाम्नोऽनुपसंहारोक्तौ संहितोक्तगुणानामारण्यकोक्तविद्यासूपसंहारशङ्कायाः सुतरामनुदयाच्च। उदये च तत्परिहारायोगाच्च।

'ज्यायान् दिवः ज्यायानेभ्यो लोकेभ्यः' (छा.उ. ३.१४.३) इत्यादिनोक्ताः द्युव्याप्त्यादयः 'ब्रह्म ज्येष्ठं दिवमाततान' (तै.ब्रा. १.८.७.२६) इत्युक्ताऽधिदैविकविभूत्यात्मका यद्यपि प्रत्यभिज्ञायन्ते। तथाऽपि ते गुणा नासाधारणाः, किन्तु साधारणा एवेति त्वयुक्तम्। ब्रह्मधर्मत्वानुपपत्तेः। नच ब्रह्मधर्मत्वाविशेषेऽपि सर्वविद्यानुगतितदभावाभ्यां साधारण्यासाधारण्यव्यपदेशोपपत्तिरिति वाच्यम्। असम्भवात्। नह्यनन्तासु विद्यासु कस्यापि गुणस्यानुस्यूतिर्नेति वक्तुं शक्यते। त्वया साधारणत्वेनाभ्युपगतानां मनोमयत्वादीनां बहुशो विद्यान्तरेषु श्रूयमाणत्वाच्च। खिलग्रन्थोक्तिविरोधस्यापरिहाराच्च। नहि तत्रापि विधिकल्पने खिलग्रन्थेषु पाठो युज्यते। अवशिष्टाङ्गोपदेशात्मकत्वात् खिलग्रन्थस्य। अनारभ्याधीतग्रौवाज्यादेः सर्वकर्माङ्गत्ववदिह सम्भृतिद्युव्याप्त्यादेरनारभ्याधीतस्य सर्वविद्याङ्गत्वौचित्याच्च।

ननु शाण्डिल्यादिविद्यासु हृदयाद्यल्पस्थानोक्तेस्तद्विरुद्धस्य द्युव्याप्त्यादिरूपस्य गुणजातस्यानारभ्याधीतस्याप्युपसंहारायोग इति चेन्न। एकस्यामेव विद्यायां युगपदनुपसंहार्याणामणुत्वमहत्त्वदूरत्वान्तिकत्वादीनामाम्नानवदुपपत्तेः। विरुद्धस्य द्युव्याप्त्यादिकस्योपसंहाराभावेऽपि मुण्डितत्वपश्चशिखित्वादिविरुद्धधर्मत्यागेनाविरुद्धसर्वकर्मोपसंहारवदिह तन्मात्रत्यागेन सम्भृत्यादीनामुपसंहारोपपत्तेश्च। अनुपसंहरणीयगुणसाहचर्यात् सम्भृत्यादिरपि तथेति चेन्न। अनुसंहरणीयाणुत्वमहत्त्वादिगुणसाहचर्यात् 'आत्मा जन्तोर्निहितो गुहायाम्' (म.ना.उ.) इत्याद्युक्तगुणानामप्युपसंहारो न स्यात्।

सम्भृतिसूत्रस्य रामानुजाभिमतसूत्रार्थविमर्शः

एतेन, सम्भृतिद्युव्याप्तीति समाहारद्वन्द्वैकवद्भावः। सम्भृतिगुणजातमप्यत एव स्थानविशेषसम्बन्धनियमान्नियतं, न सर्वत्रोपसंहार्यमिति सूत्रव्याख्यानं निरस्तम्। स्थानविशेषसम्बन्धनियमस्य, वाजसनेयशाखागतयोरग्निरहस्य-

बृहदारण्यकयोराम्नातायां शाण्डिल्यविद्यायां मनोमयशब्देन मनआयतनत्वस्य, 'एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति' इत्यादिना सर्वायतनत्वस्य च प्रतीतावपि तत्र परस्परधर्मोपसंहार एवाङ्गीकृत इत्यप्रयोजकत्वाच्च।

टीकायां पूर्वपक्षीयाविशेषितान्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु - अविशेषितेत्युक्तन्यायं तदाकारतत्साध्यप्रदर्शनपूर्वकं विवृण्वत् 'नच मुमुक्षव इत्यविशेषाद् भरणस्य द्युतेश्च सर्वेषामपेक्षितत्वाच्च सम्भृतिद्युव्याप्ती अपि सामान्ये' (न्या.वि.) इति वाक्यं यवागून्यायेन व्याचष्टे- **सर्वोपास्ये इति पूर्वः पक्ष इत्यादिना** ॥ अनेन मुमुक्षव इत्यपि अविशेषान्मुमुक्षव इत्यपिशब्दाभिधेयताविशेषात्[1] सर्वेषां मुमुक्षुत्वसाम्यादिति यावत्। अविशेषादित्यावर्तते। भरणस्य द्युतेश्च सर्वेषामविशेषात्। तस्य तात्पर्यम् अपेक्षितत्वाच्चेति। सम्भृतिद्युव्याप्ती अपि सामान्ये आनन्दादिगुणेन समे सर्वोपास्ये इति यावद्- इति व्याख्यातं भवति।

टीकायां सिद्धान्तीयप्रमाणबलन्यायस्य व्याख्यानम्

प्रमाणबलमित्युक्तन्यायं तदाकारप्रदर्शनेन विवृण्वत् -

' "**सत्यो ज्ञानः परमानन्दरूप आत्मेत्येवं नित्यदोपासनं स्यात्।**
नान्यत् किञ्चित् समुपासीत धीरः सर्वैर्गुणैर्देवगणा उपासते॥"

"**गुण्याकारस्मृतेरेव द्युतिमात्रं प्रतीयते।**
न व्याप्तिर्जगदस्मृत्या नानाशक्तिर्यतो मता (मिता)॥
देवानां युगपद् ज्ञानं मानुषाणां तथा न तु।
पर्यायेणापि सत्याः स्युर्नैवान्येषां कथञ्चन॥"

१. 'अनेन, मुमुक्षव इत्यविशेषात् मुमुक्षव इति शब्दाभिधेयताऽविशेषात्' इति पाठेन भाव्यमिति भाति।

इत्यादिप्रमाणबलात्' (न्या.वि.) इति वाक्यमेतदधिकरणोत्थितिमूलाभ्यधिकशङ्कानिवर्तकत्वेन तात्पर्यतो व्याचष्टे- **यच्च प्रकाशादिमात्रमिति** ॥ अयमर्थः। यदुच्यते, मुक्तौ सर्वैरपि प्रकाशव्याप्तिस्वाधमभरणे अनुभूयेते। नचैते आकस्मिके भवितुमर्हतः। अतिप्रसङ्गात्। अतस्तन्नियामकतया तथोपासनसिद्ध्यर्थं सर्वेषां तत्र योग्यता कल्प्यत इति तत्र वदामः। किं मुक्तौ सर्वैः प्रकाशमात्रं स्वाधमस्वामितामात्रं चानुभूयत इत्युच्यते उत जगद्व्याप्तिस्वाधमनियन्तृत्वरूपतद्विशेषोऽपीति। आद्यस्योत्तरम्- **गुणीति**॥ यतः ज्ञानस्वामित्वादिगुणशालिनो भगवत आकारस्य रूपविशेषस्य स्मृतेरुपासनादेव द्युतिमात्रं प्रकाशसामान्यम्, उपलक्षणमेतत्, स्वामित्वसामान्यं च प्रतीयते, मुक्तौ प्रतिभास्यति, अतस्तदन्यथासिद्धमेवेति न विशेषाकारोपासनं योजयति। 'यक्षानुरूपो बलिः' इति न्यायात्। द्वितीयस्योत्तरम्- **नेति** ॥ मानुषाणां व्याप्तिः, प्रकाशस्य बह्वर्थविषयता नास्त्येव, येन तेषां तथोपासनं भविष्यति। तत्र युक्तिः- **जगदस्मृत्येति** ॥ मतेर्मानुषाणां कृत्स्नविषयत्वाभावात्। देवानां ज्ञानं तु युगपत् सर्वार्थविषयम्। मानुषाणां तु ज्ञानं न तथा। कुत एतत्? मतेर्ज्ञानस्य नानाशक्तिरकृत्स्नविषयत्वशक्तिर्यतः प्रमाणेषु प्रमिता तत इदमुपपन्नम्। 'नानाशक्तिर्यतो मता' इति पाठे तु देवानां नानाशक्तिर्यतो मताऽतस्तेषां ज्ञानं युगपत् सर्वार्थविषयमित्यर्थः। मानुषाणां युगपत् सर्वार्थविषयत्वाभावेऽपि क्रमेण तद् भविष्यति। नेत्युच्यते- **पर्यायेणापीति** ॥ अन्येषां मानुषाणां कथञ्चन पर्यायेणापि इति तस्यैवार्थः। प्रतीतयः **सत्या न स्युः**। सर्वविषयाः इत्युपलक्षणमेतत्। स्वाधमनियन्तृता मनुष्याणां निषिद्धेति प्रमाणबलान्मौक्तिकप्रकाशादेः सर्वविषयत्वाद्यतिशयसिद्ध्यर्थं न तदुपासनयोग्यता मानुषाणां कल्प्यत इति।

एतदधिकरणपरत्वेन सङ्क्षेपभाष्यव्याख्यानम्

एतदधिकरणस्यापि सर्वैर्मानुषैर्यथाबलम् सामान्याकारेणैव ज्ञेयो, नतु सर्व-

प्रकारेणापीति उत्तरोत्तरं ज्ञाने विशेषोऽप्यङ्गीक्रियत इति, न तदर्थं सर्वेषां तथोपासने योग्यता कल्पनीयेति योजनया सङ्क्षेपभाष्येण तात्पर्यमुक्तं वेदितव्यम्।

सूत्रार्थः

सूत्रार्थस्तु - यथा प्रियशिरस्त्वादि न सर्वोपास्यं तथा **सम्भृतिद्युव्याप्ती अपि** न सर्वोपास्ये। चशब्द एवार्थः। योग्यतया देवाद्युपास्ये इत्यध्याहृतेन सम्बद्ध्यते। अत इत्यनेन श्रुतेन सम्बन्धे तु, अत एव पूर्वोक्तयोग्यताविशेषादेवेति। सम्भृद्दिद्युव्याप्त्यपीति कथम्? ईदन्तद्विवचनत्वात्। 'मणीवादेर्न' इति निषेधाद् भविष्यति। कथं तर्हि भाष्येण निषेधः। निषेधस्य वैकल्पिकत्वाश्रयणेन। अपिशब्दो वीर्यशौर्यादिगुणान्तरसमुच्चायकः। 'भृतिद्युव्याप्त्यादयो गुणाः' (ब्र.सू.भा. उदाहृतब्रह्मतर्कवचनम्) इति वचनात्। द्वित्वमात्रव्यावृत्त्यर्थमेवात्र प्रगृह्य-सूत्रणम्। सम्भृतिद्युव्याप्त्यादयो गुणार्देवादिभिरुपास्याः, नाऽनन्दादयश्चत्वार एवेत्यध्याहारेणैवात्र चशब्दसम्बन्ध इति प्राञ्चः प्राहुः।

॥ इति सम्भृत्यधिकरणम्॥ १४॥

॥ अथ पुरुषविद्याधिकरणम्॥ १५॥

॥ सूत्रभाष्यम्॥

यस्यां विद्यायां महागुणा उच्यन्ते सोत्तमानामितराऽन्येषा[१]मिति चेत्, न -

॥ ॐ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॐ ॥

॥ ३-३-२५ ॥

पुरुषसूक्तोक्तविद्यायामपि केषाञ्चिद् गुणानामनाम्नानात्।

'सर्वतः पौरुषे सूक्ते गुणा विष्णोरुदीरिताः।
तत्रापि नैव सर्वेऽपि तस्मात् कार्योपसंहृतिः॥'

इति ब्रह्मतर्के॥ २५॥

॥ इति पुरुषविद्याधिकरणम्॥ १५॥

॥ तत्त्वप्रकाशिका॥

सङ्गत्यादि

अत्रेश्वरसाक्षात्कारसाधनोपासने सर्वतो गुणोपसंहारसमर्थनादस्ति शास्त्रादिसङ्गतिः। अनुपसंहारे सर्वज्ञानवैयर्थ्यप्रसङ्गात् समर्थनीयोऽसौ। प्रकृतसार्वत्रिकगुणोपसंहारो विषयः। कर्तव्यो न वेति सन्देहः। क्रिया-द्वैविध्यदर्शनं सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति - यस्यामिति ॥ न सर्वतो गुणोपसंहारः कर्तव्यः।

---

१. ह्. 'इतरा अन्येषाम्' इति। अत्र 'इतराः' इति बहुवचनम्।

व्यर्थत्वात्। नच स्वस्वयोग्यगुणोपासनाय सर्वत उपसंहार इति वाच्यम्। सार्वत्रिकगुणोपसंहारमन्तरेणापि तत्सम्भवात्। ये हि बहुगुणोपासनयोग्यास्तेषां बहुगुणाभिधायकैकविद्योपास्तिः सम्भवति। ये चाल्पगुणोपास्तियोग्यास्तेषां तादृग्विद्याभिरुपास्तिरुपपद्यते। अत उपसंहारवैयर्थ्यान्न सर्वज्ञानोपयोग इति भावः।

सिद्धान्तः

पूर्वपक्षं प्रतिषेधति- **नेति**॥ हेतुतया सूत्रं पठित्वा व्याचष्टे- **पुरुषेति**॥ कर्तव्य एव सर्वतो गुणोपसंहारः। सर्वगुणोपास्तियोग्यानामप्यधिकारिणां भावात्। एकस्यामेव विद्यायां सर्वगुणानामनुक्तत्वात्। सर्वविद्योत्तमायामपि पुरुषसूक्तमित्युक्तविद्यायां केषाञ्चिदेव गुणानां पठितत्वात् केषाञ्चिदपठितत्वादिति भावः। भवेदुपसंहारस्य कर्तव्यता, यदि स्यात् पुरुषसूक्तस्य सर्वविद्योत्तमत्वम्। तत्रापि केषाञ्चिद् गुणानामनुक्तत्वम्। तदेव कुत इत्यत आह- **सर्वत इति**॥ नच वाच्यमेकस्यामेव विद्यायां सर्वगुणानुक्तेरस्तु चतुर्मुखस्य सर्वगुणोपसंहारः। अन्येषां तु महदल्पगुणाभिधायकविद्याभिरेवोपास्तिसम्भवादुपसंहारो व्यर्थ इति। सङ्ख्यासाम्यसम्भवेऽप्येकस्यामेव विद्यायां स्वापेक्षितगुणोक्तिनियमाभावात्। अतः सर्वतो गुणोपसंहारस्य कर्तव्यत्वादुक्तमुपपन्नमिति सिद्धम्॥ २५॥

॥ इति पुरुषविद्याधिकरणम्॥ १५॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ॐ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॐ ॥३-३-२५॥

एवं चतुरधिकरणीप्रमेयं, व्युत्क्रमेण तत्प्रसक्तानुप्रसक्तं च प्रमेयं विवृतम्।

अधुनाऽऽद्याधिकरणप्रमेयं सर्वविज्ञानं तत्र प्राप्तवैयर्थ्यादिशङ्कानिरासपूर्वं पुनर्विवरणीयम्। ननु द्वितीयाधिकरणे सार्वत्रिकगुणोपसंहारसमर्थनेन वैयर्थ्यं परिहृतं सर्वविज्ञानस्य। सत्यम्। अशक्त्याक्षिप्तसार्वत्रिकगुणोपसंहारः समर्थितः। तद्द्वारा वैयर्थ्यं च परिहृतम्। तथाऽप्यस्तु सार्वत्रिकगुणोपसंहारः। सर्वगुणोपासकत्वाच्चतुर्मुखस्य। तदर्थं सर्वशाखाध्ययनं सर्वज्ञानादि च। तदितरेषां तु सर्वगुणोपासकत्वाभावात्, तदर्थं सर्वाध्ययनज्ञानादिसम्पादनस्य वृथायासत्वापत्त्या न सम्पादनीयत्वमेवेत्याद्याशङ्कायाः को निवारयिता ?

एतदधिकरणस्य उपसंहारनयानन्तर्यशङ्कानिरासपूर्वकं पेटिकासङ्गतिकथनम्

नन्वेवमस्य द्वितीयानन्तर्यमेव स्यात्। न स्यात्। वक्ष्यमाणरीत्याऽत्रापि सङ्गतत्वात्। विस्मृतप्रमेयस्य पुनः स्मरणलक्षणगुणलाभाच्च। तथाच सार्वत्रिकगुणोपसंहारो यः प्रागुक्तः स न केवलमनन्तशाखोक्तानां सर्वेषामुपसंहार एव। किन्तु तत्तदधिकारियोग्यतानुसारेण सर्ववेदानधीत्य ज्ञात्वा च स्वयोग्यानां तत्रोक्तानां विक्षिप्तानामपि सर्वत आहरणात्मकैकचित्तावगाहनरूपोऽपि। 'सर्वस्वं ददाति' इत्यादौ तत्तद्योग्यपदार्थमात्रेऽपि सर्वशब्दवृत्तिदर्शनात्। स चायं यद्यकर्तव्यः सर्वतस्तदा सर्वज्ञानसम्पादनं व्यर्थमेवेति तत्समर्थनमावश्यकम्। ततस्तद्विवरणमत्र क्रियत इति पेटिकासङ्गतिः। अत एवात्र टीका 'सर्वतो गुणोपसंहारसमर्थनात्' (तत्त्वप्रका. ३.३.२५) इत्युपक्रम्य 'सार्वत्रिकगुणोपसंहारो विषयः' इति। उपसंहारनये तु 'सार्वत्रिकगुणोपसंहारसमर्थनात्' (तत्त्वप्रका. ३.३.६) इत्युपक्रम्य 'सर्ववेदोक्तगुणानुपसंहृत्य ध्यातव्योऽन्यथा वा' इति टीकायां सन्देहप्रदर्शनम्।

उपसंहारनयेन गतार्थताशङ्कापरिहारपूर्वकम् अनन्तरसङ्गतिप्रदर्शनं, पूर्वपक्षश्च

तथाचोपसंहारनयसमर्थितसार्वत्रिकगुणोपसंहारश्चतुर्मुखविषयः। इह समर्थ्यमानस्तु सार्वत्रिकगुणोपसंहारो मुमुक्षुमात्रसाधारण इति नान्योन्येना-

न्योन्यस्य गतार्थता । यदि च तत्तद्योग्यताविशेषात् सम्भृतिद्युव्याप्त्यादीनां सर्वोपास्यता न स्यात् तर्हि तत्तद्योग्यताविशेषादेव तत्तदुपासनायोग्यगुणानामेकस्यामेव विद्यायां मालारूपेण ग्रथनात् स्वस्वयोग्यगुणावगाहिविद्याभागमात्राध्ययनेन तन्मात्रश्रवणमननादिनाऽपि ध्यानसम्भवेन विद्यान्तरध्यानादेर्वैयर्थ्यमेव । सुतरां वेदान्तराध्ययनादेः । सुतमां च शाखान्तराध्ययनादेः । तस्यार्थज्ञानद्वारा ध्यानपर्यन्तत्वात् । ध्यानस्य चायोग्यत्वात् । तथाचाऽद्योक्तं सर्वपरिज्ञानं न सर्वैः सम्पादनीयमेव ।

स्वयोग्यगुणजातस्य ग्रथनं यत्र विद्यते ।
तामेवाऽवर्तयेन्नान्यां वैयर्थ्यं प्राप्यते यतः ॥

इति पूर्वाधिकरणप्रमेयमुपजीव्य पूर्वपक्षोत्थानादनन्तरसङ्गतिः ।

सिद्धान्तः

एकत्र तत्तद्योग्यानां गुणानां ग्रथनं न हि ।
तत्तद्योग्यगुणा यस्माद् विक्षिप्ताः सर्वशोऽखिलाः ॥

स्यादेतत् । यदि बह्वल्पादिगुणाभिधायकैकविद्या स्यात् । नचैवम् । अन्यथा सर्वगुणोपासकचतुर्मुखयोग्यसर्वगुणाभिधायकैकविद्याङ्गीकारापातात् । नचेष्टापत्तिः । सर्वगुणानां मालारूपेण ग्रथनं पुरुषसूक्ते सम्भावितम् । महाविद्यात्वात् । नच तत्रापि योग्यसर्वगुणाम्नानमस्ति । एवं सति ब्रह्मणश्च सर्वगुणोपासकत्वात् सर्वेषां गुणानां पुरुषसूक्तेऽनाम्नानाद् विद्यान्तरं शाखान्तरं च तेनाध्येयमेव । एवं तदितरेषां देवानां ये ये योग्यास्ते ते गुणा एकस्यामन्यस्यां विद्यायां न ग्रथिता इति कैमुतिकन्यायसिद्धमेव । अल्पानां गुणानामप्येकस्यामपि विद्यायामानुपूर्व्येण न वर्णनम् । किन्तु विक्षिप्यैव । तथाचाल्पगुणोपासकेनापि तत्र तत्र विक्षिप्योक्तगुणान्वेषणाय तत्तच्छाखा अध्येतव्या एव । तत्रापि

स्वशक्त्याऽन्वेषणे स्वयोग्यगुणो यदि न लभ्यते तदा गुणचतुष्टयस्य सङ्ख्यानिर्देशाभ्यां क्लृप्तस्योपासनमभ्यसतो गुणान्तरेषु स्वशक्त्योपासनमभ्यसतः 'युगपत् स्वभुजौ यद्वत्' (ब्र.सू.भा.उदा.) इत्यादिन्यायेन नियतगुरूपदेशेन वा स्वयोग्यगुणनिष्कर्षसिद्धेः सर्वदा[1] गुणानामुपसंहृतिः कार्यैवेति सिद्धान्तः।

परमतानुवादः

अत्रोभयेऽप्याहुः - छन्दोगानां पुरुषविद्या- 'पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनमथ यानि चतुश्चत्वारिंशद् वर्षाणि तन्माध्यन्दिनं सवनमथ यान्यष्टचत्वारिंशद् वर्षाणि तत् तृतीयं सवनमिति । यदशिषति यत् पिपासति यन्न रमते ता अस्य दीक्षा । अथ यदश्नाति[2] यज्जक्षति तत् स्तुतशस्त्रमिति दीक्षाकल्पना । तं चेदेतस्मिन् वयसि किञ्चित् व्याध्याद्युपतपेत् स ब्रूयात् प्राणा वा वसव इदं मे प्रातस्सवनं माध्यन्दिनं सवनमनुसन्तनुतेत्यादिराशीः । सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येत । अक्षितमसि अच्युतमसि प्राणसंशितमसि' (छा.उ. ३.१६.१) इति मन्त्रप्रयोगश्च विहितः । तैत्तिरीयके तु पठ्यते- 'तस्यैवं विदुषो यज्ञस्याऽत्मा यजमानः श्रद्धा पत्नी' (म.ना.उ. १८.१) इत्यादि । तत्र किं विद्यैक्यमुत नेति संशये -

निषादस्थपतिन्यायात् सामानाधिकरण्यतः ।
षष्ठ्योः सम्पाद्यते पुंसि यज्ञत्वं तैत्तिरीयके ॥

छान्दोग्ये तावत् स्पष्टमेव पुरुषे यज्ञत्वसम्पादनं 'पुरुषो वाव यज्ञः' (छा.उ. ३.१६.१) इति प्रतीयते । तैत्तिरीयके तु- 'विदुषो यज्ञस्य' (म.ना.उ. १८.१) इति षष्ठ्यौ समानाधिकरणे । निषादस्थपतिवत्, नतु विदुषो यो यज्ञस्तस्येति । व्यधिकरणे सम्बन्धकल्पनायां गौरवप्रसङ्गात् । ततश्च पुरुषयज्ञत्वमुभयत्रा-

१. म. सर्वशः । २. म. 'यद्धसति' इत्यधिकः पाठः ।

विशिष्टम्। नच यज्ञत्वेन निरूपितस्य विदुष आत्मा यजमान इति यजमानत्व-निरूपणविरोधः। स्वरूपवचनेनाऽत्मशब्देन यज्ञस्वरूपस्यैवाभिधानात्। अन्यस्य हि यज्ञस्यातिरिक्तो यजमानः, पुरुषत्वेन सम्पादितस्य तु यज्ञस्य स्वरूपमेव यजमान इत्युक्तं भवति। तथा मरणावभृथत्वाद्यवसानमपीति विद्यैक्ये प्राप्तेऽभिधीयते -

मुख्यसम्बन्ध एवास्तु गौणैकाधिकरण्यतः।
बहुना रूपभेदेन किञ्चित् साम्यं हि बाध्यते॥

षष्ठ्योः सामानाधिकरण्येऽपि विदुषो यज्ञत्वममुख्यमिति यज्ञपदं सादृश्येन यज्ञदृष्टिविध्यर्थे गौणं स्यात्। विदुष इति षष्ठ्याः सम्बन्धार्थत्वे तु विद्वत्सम्बन्धिनो यज्ञस्याऽत्मादीनां यजमानादित्वकल्पनान्मुख्यार्थत्वादात्मशब्दश्च न यज्ञस्वरूपं वक्ति। मुख्ययजमानत्वविरोधादेव। अपि च तव विदुषो यज्ञभावस्तं प्रति चाऽत्मयजमानत्वादिकं च विधेयमिति वाक्यं भिद्येत। मम विद्वत्सम्बन्धि-यज्ञानुवादेनाऽत्मादीनां यजमानादिभावस्यैव विधानान्नैष दोषः। अत्र च यजमानादिदृष्टिमालोच्य श्रुत्या तदर्थसमूहे यज्ञशब्दः प्रयुक्तः। नचैवं विद्वत्सम्बन्धियज्ञोद्देशेन वाक्यभेदः। यतो यज्ञमात्रमुद्देश्यम्। तस्य विद्वत्सम्बन्धः प्रकरणप्राप्तोऽनूद्यत[1] इति बहुवैषम्ये च मरणावभृथत्वादिसाम्यं बाध्यते। पत्न्यादिकल्पना ह्येकत्र, नान्यत्र। पुरुषायुषं सवनत्रयं कल्पितमेकत्रान्यत्र तु प्रातरादिकालः। आयुर्वृद्धिः फलमेकस्यान्यस्य तु ब्रह्मविद्याशेषत्वमिति।

तन्निरासः

तन्न। वेद्यभेदाभावे विद्याभेदाभावस्यासकृदुक्तत्वेन पुनरेतदधिकरणा-रम्भायोगात्। वेद्यभेदश्चासिद्धः। छन्दोगे पुरुषस्यैव यज्ञत्वं, तैत्तिरीयके तु

१. म. अनूच्यते।

पुनरात्मश्रद्धादिसमुदायस्य पुरुषसम्बन्धिनो यज्ञत्वं वेद्यमिति भेदोऽस्तीति चेन्न। विशेषात्। निषादस्थपतिन्यायेन षष्ठ्योः सामानाधिकरण्येन तैत्तिरीयेऽपि पुरुषस्य यज्ञत्वं वेद्यमित्युक्तत्वात्। षष्ठ्योः सम्बन्धार्थत्वे विद्वत्सम्बन्धिनो यज्ञस्याऽत्मश्रद्धादीनां यजमानपत्न्यादित्वकल्पनान्मुख्यार्थत्वम्। सामाधिकरण्ये तु विदुषो यज्ञत्वमसम्भवीति यज्ञपदममुख्यार्थमित्युक्तमिति चेन्न। आत्मादिपदोदितशरीरादीनां यजमानादित्वकल्पनं नाम तेषु तदारोपो वा तत्सादृश्यानुसन्धानं वा? नाऽद्यः। विद्वत्सम्बन्धियज्ञे शरीरश्रद्धादीनां जडानां यष्टृत्वपत्नीत्वादेर्वस्तुतोऽभावेन मुख्यार्थत्वानुपपत्तेः।

न द्वितीयः। कर्मकर्त्रोरभेदानुपपत्तावपि कर्मणि कर्तरि च भगवत्प्रीत्यास्पद-त्वादिसादृश्यस्य सामानाधिकरण्यपक्षेऽपि सम्भवेन मुख्यार्थत्वापातात्। शरीरेन्द्रियमनोबुद्ध्यादिसहितस्य चेतनस्य विद्वच्छब्दार्थत्वेन तदेकदेशस्याऽ-त्मादिशब्दोदितचेतनादेर्यजमानादिसादृश्यसम्भवेन विरोधाभावाच्च। यदप्यत्र वाक्यभेददूषणं तद् व्यधिकरणषष्ठीपरिग्रहेऽपि समम्। आत्मादीनां यजमानादि-भावस्यानेकस्यैव विधानाङ्गीकारात्। प्रतिविधेयं विध्यनुवादावृत्तेरावश्य-कत्वात्।

किञ्चात्र 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१) इत्यादिवत् प्रतिगुणं वाक्यसमाप्तेः कथं वाक्यभेदो दोषः? किञ्च विद्वत्सम्बन्धियज्ञस्य पुरुषात्मक-त्वाभावेन तैत्तिरीये पुरुषसम्बन्धियज्ञविद्याम्नानसन्देहेनापि पुरुषात्मकयज्ञविद्या-म्नाननिश्चयान्निश्चितछन्दोगोक्तपुरुषात्मकविद्याप्रतिद्वन्द्वितया सन्दिग्धतैत्ति-रीयोक्तविद्योदाहरणानुपपत्तिः। पुरुषपदघटितत्वमात्रेणोदाहरणत्वे 'वेदाहमेतं पुरुषम्' (श्वेता.उ. ३.७) इत्यादेरपीहोदाहरणत्वं स्यात्।

यच्चोक्तं बहुवैषम्ये मरणावभृथत्वादि बाध्यत इति, तन्न। उपसंहारानु-सारित्वस्य प्रथमनये त्वयाऽपि स्वीकृतत्वात्। मरणावभृथत्वादेश्चोपसंहारे श्रुतस्य

बाधायोगात्। बहोरपि वैषम्यस्यासिद्धेश्च। तथाहि। पत्न्यादिकल्पना छान्दोग्ये न तावदस्ति। उक्तरीत्या विद्यैक्यवादिनः पत्न्यादिकल्पनानामपि उपसंहाराधिकरणन्यायेन तत्र श्रुतप्रायत्वात्। अन्यथा वाजसनेयशाखास्थप्राणविद्यायां 'रेतो होच्चक्राम' (बृ.उ. ६.१.१२) इत्यादिश्रुतस्य रेतसः छान्दोग्यस्थप्राणविद्यायामभावात्, एवं तत्र तत्र शाखान्तरे श्रुतानां भूयसां शाखान्तरे श्रवणाभावेन बहुवैषम्याद् विद्यैक्यं न स्यात्। एकत्र पुरुषायुषस्य सवनत्रयत्वकल्पनमन्यत्र प्रातरादिकालस्येति तु न वैषम्यम्। पुरुषायुषप्रभेदत्वात् प्रातरादिकालस्य। फलभेदस्तु ब्रह्मविद्याशेषत्वमशेषविद्यानामङ्गीकृतमिति नास्त्येव। यत्त्वायुर्वृद्ध्यादिश्रवणं तदवान्तरफलश्रवणमिति न दोषः।

अद्वैतिविशिष्टाद्वैत्यभिमतसूत्रार्थनिरासः

एतेन छन्दोगानां पुरुषविद्यायामिवेतरेषां तैत्तिरीयाणामनाम्नानाद् विद्याभेद इत्यपपाठेन केषाञ्चित् सूत्रव्याख्यानं निरस्तम्। छन्दोगानां प्राणादिविद्यायामिव वाजिनां प्राणादिविद्यायामनाम्नानेऽपि विद्याभेदाभावेन व्यभिचाराच्च।

एतेन पुरुषविद्यायामप्युभयत्र रूपभेदाद् विद्याभेदः। इतरेषामनाम्नानात्। [१]इतरशाखोचितानामितरशाखानामनाम्नानात्- इति केषाञ्चित् सूत्रव्याख्यानं निरस्तम्। पुरुषविद्याशब्देन पुरुषस्य विद्येति विग्रहे छान्दोग्योक्तविद्याया असङ्ग्रहापातात्। पुरुष एव विद्येति विग्रहे तैत्तिरीयोक्तविद्याग्रहानुपपत्तेश्च।

टीकायां पूर्वपक्षीयाप्रयोजनतान्यायव्याख्यानम्

टीकाक्षरार्थस्तु - अप्रयोजनतेत्युक्तन्यायं हेतुपूर्वं विवृण्वत् 'नच कचिद् बहुगुणाः कचिदल्पगुणाः श्रुतिष्वेवोच्यन्त इत्युपसंहारस्याप्रयोजनतेति वाच्यम्' (न्या.वि.) इति वाक्यं भाष्येण तात्पर्यतो व्याचष्टे- **न सर्वगुणेति**॥ तथाच

१. 'इतरशाखोक्तानामितरशाखास्वनाम्नानात्' इति पाठेन भाव्यमिति भाति।

'उच्यन्ते' इत्यतः परं 'तथाच यस्यां विद्यायां महागुणा उच्यन्ते, ''बहुगुणा उच्यन्त इत्यर्थः'' स्वोत्तमानामितराऽन्येषाम्' इति भाष्यं विवरणशेषतया संयोज्य इति हेतोरुपसंहारस्याप्रयोजनता' इति विवरणं व्याख्येयमित्युक्तं भवति।

टीकायां सिद्धान्तीयाऽनतिन्यायव्याख्यानम्

आनतिरित्युक्तन्यायमानतिः प्राप्तिरिति तात्पर्यतो विवृण्वत् ' ''**गुणाः सर्वे ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैः**'' **इति श्रुतेः सर्वगुणोपासकस्याप्यधिकारिणो भावादेकत्र पृथक् सर्वगुणानुक्तेश्च बलादुपसंहारोपपत्तेः**' (न्या.वि.) इति वाक्यम्। तत्र सर्वगुणोपासकस्याप्यधिकारिणो भावादित्यंशमादौ व्याचष्टे- **सर्वगुणोपास्तीति**॥ ब्रह्मवायुसरस्वतीवाणीनां भावादित्यर्थः। तदुत्तरवाक्यं व्याचष्टे- **एकस्यामेवेति**॥ 'एकत्र पृथक् सर्वगुणानुक्तेः' इति वाक्यमेव पुनरावृत्त्या व्याख्यातुमवतारयति- **नच वाच्यमिति**॥ **सङ्ख्यासाम्यसम्भवेऽपीति**॥ एकत्रेत्यस्यार्थः- **एकस्यां विद्यायामिति**॥ पृथगित्यस्यार्थः- **स्वापेक्षितेति**॥ ततश्च सर्वानुक्तेरित्यस्यार्थो- **गुणोक्तिनियमाभावादिति**॥ ततश्च सर्वे गुणा ब्रह्मणैव ह्युपास्याः। अन्यैः सर्वैरपि देवैः सर्वे गुणा नोपास्याः। मनुष्यैर्नोपास्या इति किमु? इति सर्वमध्यमचतुर्गुणोपासकरूपाधिकारिणां सद्भावादिति श्रुतेरर्थः। ततश्च सर्वगुणोपासकस्याप्यधिकारिणश्चतुर्मुखस्य भावात् प्रमितत्वाद् एकत्र सर्वविद्योत्तमत्वेन प्रमितायां पुरुषसूक्ताख्यविद्यायां पृथक् स्वातन्त्र्येण सर्वगुणानुक्तेः सर्वगुणानामपठितत्वात् सर्वगुणानां च स्वातन्त्र्येण ज्ञानाद्यर्थं सर्वत उपसंहारः ब्रह्मणस्तावत् सार्थक एव। इतरेषां महदल्पगुणाभिधायकविद्याभिरेवोपास्तिसम्भवादुपसंहारो व्यर्थः स्यादित्यत्रापीदमेवोत्तरम्- **एकत्र पृथक् सर्वगुणानुक्तेरिति**॥ एकत्रैकस्यां विद्यायां महदल्पगुणाभिधायिन्यां पृथक् सङ्ख्यानिर्देशाभ्यां तत्तदधिकार्यपेक्षितानां गुणानां

मालारूपेण क्वचिदुक्तिसम्भवेऽपि तथोक्तिनियमाभावेन गुणान्तरगवेषणार्थं [१]बलादेवोपसंहारोपपत्तेः। उपसंहारनतेरित्यर्थ इति सूचितं भवति।

सङ्क्षेपभाष्येणैतदधिकरणतात्पर्यसूचनम्

एतदधिकरणतात्पर्यमप्याह- **सर्ववेदैश्च सर्वैरपि यथाबलम्। ज्ञेयो विष्णुरिति ॥ सर्वैः** ब्रह्ममध्यमदेवादिमानुषान्तैरधिकारिभिरपि **सर्ववेदैः**रितस्ततः प्रकीर्णपठितान् गुणान् **यथाबलं** यथाशक्त्याहृत्य **विष्णुर्ज्ञेयः** श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेति तस्यार्थः।

सूत्रार्थः

सूत्रार्थस्तु - अपिः कैमुतिकन्यायद्योतकः। **पुरुषसूक्ताख्यविद्यायामपि इतरेषां** सहस्रशीर्षत्वादिव्यतिरिक्तानां चतुर्मुखोपास्तियोग्यानां सर्वेषां गुणानाम्[२] अपाठादुपसंहारः प्रसिद्धः, किम्वितरविद्यासु तत्तद्योग्यगुणानामपाठे वक्तव्यमिति।

॥ इति पुरुषविद्याधिकरणम् ॥ १५ ॥

१. 'बलादेवोपसंहारोपपत्तेरिति उपसंहारानतेरित्यस्यार्थः' इति पाठेन भाव्यमिति भाति। २. अनाम्नानात् इति शब्देन भाव्यमिति भाति।

॥ अथ वेधाद्यधिकरणम् ॥ १६ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ वेधाद्यर्थभेदात् ॐ ॥ ३-३-२६ ॥

'भिन्धि विद्धि शृणीहीति फलभेदेन सर्वशः।
यत्यादीनां तेष्वयोगान्नाधिकारैकता भवेत्।
अयोग्योपासनादीयुरनर्थं चार्थनाशनम् ॥'

इति बृहत्तन्त्रे ॥२६॥

॥ इति वेधाद्यधिकरणम् ॥ १६ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गतिः

अत्रेश्वरसाक्षात्कारसाधनोपासने भेदनादिगुणानां सर्वोपसंहार्यत्वनिरासादस्ति शास्त्रादिसङ्गतिः। तेषां सर्वोपसंहार्यत्वे प्रागुक्तनियमभङ्गप्रसङ्गात् तन्निरसनीयमेव। 'अग्ने त्वचं यातुधानस्य भिन्धि। तं प्रत्यञ्चमार्चिषा विध्य मर्मन्। पराशृणीहि तमसा यातुधानान्' इत्यादौ श्रुता भेदनादयो गुणा विषयः। सर्वोपास्या न वेति सन्देहः। गुणद्वैविध्यदर्शनं सन्देहबीजम्।

पूर्वपक्षः

वेधादि सर्वोपास्यमिति पूर्वः पक्षः। दुष्टजननिग्रहफलत्वात्। तस्य च सर्वसज्जनापेक्षितत्वात्। 'प्राणस्त्वा वंशो हास्यतीत्येनं ब्रूयात्' (ऐ.उ. १.४.१), 'आततायिनमायान्तं हन्यादेवाविचारयन्' (म.भा.शान्तिपर्व. १५.१५) इति श्रुतिस्मृत्योर्विधानाच्च। अतो वेधादीनां सर्वोपास्यत्वान्न चतुर्गुणोपासननियम इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठति- वेधादीति ॥ न वेधादीनां सर्वोपास्यत्वम्। यत्याद्युपास्यत्वाभावात्। वेधाद्युपासनफलस्य हिंसाया यत्यादियोग्यफलाद् विलक्षणत्वात्। अयोग्योपासनस्य चानर्थफलत्वादिति सूत्रार्थः। अत्र स्मृतिं चाऽह- **भिन्धीति ॥** शृणीहि जहि। भिन्धि विद्धि शृणीहीत्येवंरूपेषूपासनेषु सर्वशो नाधिकारसाम्यं भवेत्। एतदुपासनं सर्वाधिकारिसमं न भवेदित्यर्थः। कुतः? यत्यादीनां तेषूपासनेष्वयोग्यत्वात्। कस्मात्? एतदुपासनफलानां यत्यादिफलाद् विलक्षणत्वात्। अयोग्योपासनाच्चानर्थादिप्राप्तेरित्यर्थः। 'प्राणस्त्वा' इत्यादिवचनान्यन्याधिकारिविषयाणीति ज्ञातव्यम्। अतो वेधादीनां सर्वोपास्यत्वाभावान्नाभिहितनियमो भज्यत इति सिद्धम्॥२६॥

॥ इति वेधाद्यधिकरणम् ॥ १६ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ वेधाद्यर्थभेदात् ॐ ॥ ३-३-२५॥

एतदधिकरणस्य पूर्वाधिकरणशेषताशङ्कानिरासपूर्वकं सङ्गतिप्रदर्शनम्

नन्वत्र न्यायमालाविवरणसम्बन्धदीपिकादौ स्वीयान्यपक्षन्यायसङ्ग्रहाद्यभावेन पूर्वाधिकरणशेषतैवास्य युक्ता। स्वीयान्यपक्षन्यायादेर्भाष्येऽपि सूचनाभावाच्च सम्भृत्यधिकरणानन्तर्यमेवास्य युक्तम्[१]। आनन्दाधिकरणोक्तनियमभङ्गनिवारणेन सङ्गतत्वात्। नचैवं फलैक्यात् तदधिकरणशेषता विज्ञायते। कुतो मा विज्ञायि? न्यायावृत्तिक्लेशश्च न भविष्यति।

अत्र ब्रूमः। यदीदं पूर्वस्य तत्पूर्वस्य वाऽधिकरणस्य शेषः स्यात् तदैतदुक्तं

१. 'वा युक्तम्' इति पाठेन भाव्यमिति भाति।

प्रमेयं प्राधान्येन न विज्ञायेत। यतिभिश्च मनसाऽपि हिंस्रो व्यापारो नानुष्ठेय इति विज्ञापनार्थं प्राधान्यं ज्ञापनीयमेव। तदर्थमेवाधिकरणान्तरत्वमुपपन्नमेव। दृश्यते च 'ब्रह्मजिज्ञासा' (ब्र.सू. १.१.१) इत्यत्रोपसर्जनत्वं मा विज्ञायीति ब्रह्मणो लक्षणमाहेत्यादिना प्राधान्यज्ञप्त्यर्थं द्वितीयसूत्रस्याधिकरणान्तरत्वेन व्याख्यानम्। अन्यथा तत्रापि स्वीयान्यपक्षन्यायाभिधानक्लेशमालोच्य पूर्वशेषतयैव व्याख्यायेत। सम्भृतिनयानन्तर्ये न्यायावृत्तिसाङ्कर्येऽपि[१] पुरुषनयाक्षेपस्यापि समाधानाय चैतदानन्तर्यम्। अत एवाऽनन्दनयोक्तप्रमेयस्य सम्भृत्यादिद्वाराऽऽक्षेपायोगेऽपि वेधादिद्वारा पुरुषनयोक्तमुपजीव्याऽऽक्षेपसम्भवेन तत्समाधानेन च विवरणात् पेटिकासङ्गतिः।

ननु ज्ञानार्थमानन्दवैचित्र्यार्थं च मानुषादिभिः कर्माणि तावत् कर्तव्यानि। तेषु क्रियमाणेषु तत्सन्निकृष्टस्तुतशस्त्रयाज्यापुरोनुवाक्यादिसमर्पितगुणशालितयाऽप्युपास्यो हरिरिति च प्राप्नोति। अन्यथा कर्मसु तदङ्गमन्त्रार्थतयाऽननुसन्धीयमानं भगवन्तमुद्दिश्य तत्तद्धविस्त्यागलक्षणयागायोगात्। नच 'आत्मेत्येवोपासीत' (बृ.उ. ३.४.७) इत्यनेन विरोधः। अन्वयनयन्यायेनैषामप्यात्मशब्देन गृहीतेः। तथाच कर्माङ्गभूतैः 'अग्ने त्वचं यातुधानस्य भिन्धि' इत्यादिमन्त्रैः समर्पितगुणशालितया सर्वैरप्युपास्य एव। तथा यतिभिरप्युपास्य एव। तत्फलदुष्टनिग्रहानन्दातिशयादेः सर्वसज्जनापेक्षितत्वात्। अन्यथा 'प्रधानस्य' इत्युक्तयुक्तेरत्रैव व्यभिचारापत्तेश्च।

ननु तथाऽपि यतिप्रकरणाम्नातासु विद्यासु वेधादीनामपाठात् तेषां कर्माधिकाराभावाच्च कथं प्राप्तिः? अपेक्षामात्रस्य च सम्भृतिनयेऽप्रयोजकीकृतत्वादिति चेन्मैवम्। पूर्वनये कैमुतिकन्यायेन तत्तद्योग्यगुणानामेकविद्याम्नानस्य दूषितत्वात्। 'प्राणस्त्वा वंशः' (ऐ.उ. १.४.१) इत्यादिना विशेषतो विधानाच्च।

१. 'न्यायावृत्तिसौकर्येऽपि' इति पाठो युक्त इति भाति।

तथाऽपि तत्स्वीकारे सर्वशः गुणोपसंहारोऽप्रयोजनो न कर्तव्यः स्यात्, इत्युभयाक्षेपेण पूर्वपक्षस्य सार्वत्रिकगुणोपसंहारोक्तावेव प्रवृत्तेरनन्तरसङ्गतिः।

पूर्वपक्षः

प्राणस्त्वा वंश इत्यादिवचनाद् यतिभिश्च ते।
वेधादयोऽप्युपास्याः स्युः दुष्टनिग्रहणेच्छया॥ इति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

यागाङ्गहिंसया दोषो नेति यद्यपि सम्मतम्।
तथाऽपि न्यासिनां तेषु नाधिकारोऽस्त्यनग्नितः॥

सत्यम्। अस्ति मनुष्यादीनां कर्माङ्गतया कर्मपरिपन्थिरक्षोभेदकत्वादि-गुणोपासनाप्रसक्तिः। किन्तु गृहस्थानामेव। यज्ञपरिपन्थिरक्षोवेधादिना निर्बाधं यागसिद्ध्या मोक्षोपयोगात्। नतु यत्यादीनामपि। तेषामनग्नित्वेन क्रतुष्वधि-काराभावात्। तेन क्रतुद्वारा मोक्षफलकत्वासम्भवेन क्रत्वनङ्गहिंसैव तथोपासनया स्यात्। सा च 'न हिंस्यात्' इति निषिद्धा।

ननु जपध्यानादिपरिपन्थिरक्षोवेधादेरपि जपादिद्वारा मोक्षोपयोगः समान इति चेन्न। हिंसागर्भसु कर्मसु गृहस्थानामिव यतीनामधिकारादर्शनात्। प्रत्युत निषेधाच्च। तेन तथोपासनातः जायमानाद् गृहस्थानां रक्षोनिर्हरणेन निर्वृत्तिद्वारा[१] परम्पराफलभूतान्मुक्तिरूपार्थाद् यतीनां यागनिर्वृत्त्यद्वारकमुक्तेर्भेदान्मुक्ता-वुपयोगादर्शनेन यतीनां न तथोपासनम्। मुक्तावानन्दाद्यभिवृद्धिस्तु हिंसाविनिर्मुक्तयत्याश्रमोचितकर्मभिर्भविष्यति। 'प्राणस्त्वा' (ऐ.उ. १.४.१) इत्यादिविधिस्त्वन्यविषय इत्यन्यत्रोक्तमिति न किञ्चिदनुपपन्नम्।

१. म. यागनिर्वृत्तिद्वारा।

अद्वैत्यभ्युपगतमधिकरणशरीरम्

यच्चेदमुच्यते, 'वेधाद्यर्थभेदात्' इत्येकमधिकरणम्। आथर्वणिकानामुप-निषदारम्भे 'सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृज्य शिरोऽभिप्रवृज्य त्रिधा विपृक्तः' इत्यादिमन्त्रा आम्नायन्ते। तथा ताण्डिनामुपनिषदारम्भे 'देव सवितः प्रसुव' 'यज्ञम्' इत्यादिः। शाठ्यायनिनाम् - 'श्वेताश्वो हरितनीलोऽसि' इत्यादिः। कठानां तैत्तिरीयाणां च - 'शं नो मित्रः शं वरुणः' इत्यादिः। वाजसनेयिनां तूपनिषदारम्भे प्रवर्ग्यब्राह्मणं पठ्यते - 'देवा हवै सत्रं निषेदुः' इत्यादि। कौषीतकिनामप्यग्निष्टोमब्राह्मणम् - 'ब्रह्म वा अग्निष्टोमो ब्रह्मैव तदहर्ब्रह्मणैव ते ब्रह्मोपयन्ति तेऽमृतत्वमाप्नुवन्ति य एतदहरुपयन्ति' इति। ते मन्त्रास्तानि च कर्माणि तत्तद्विद्यासन्निधानाम्नातानि तासु तासु विद्यासूपसंहर्तव्यानि उत नेति संशये, तत्र रक्तपटन्यायादाकाङ्क्षोत्थापनक्रमात् 'विद्यायां निरपेक्षायामङ्गं मन्त्रादि सन्निधेः।' फलवद्विद्यासन्निधिपठितस्याफलस्य मन्त्रादेस्तदङ्गत्वम्। तत्र यद्यपि विद्यायाः स्वाङ्गैरैव निराकाङ्क्षत्वम्। तथाऽपि मन्त्रकर्माणि फलाकाङ्क्षाणि सन्निहितविद्यान्वयमाकाङ्क्षन्ति इति सन्निधानाद् विद्याङ्गतां प्रतिपद्यन्त इति प्राप्तेऽभिधीयते -

शीघ्रं कर्मान्वये जाते मन्त्रादेर्वाक्यलिङ्गतः।
विद्ययाऽपि न सम्बन्धः सन्निधानाद् विलम्बितात्॥

यावद्विद्यायाः सन्निधानादिना वाक्यं कल्प्यते, तावत् [१]मन्त्रत्वाभिचारे लिङ्ग-कल्पितश्रुत्या विनियोगः क्रियते। यावच्च प्रवर्ग्यस्यापि विद्यायां प्रकरणकल्पिताद् वाक्यलिङ्गं कल्प्यते तावत् प्रवर्ग्यस्य ज्योतिष्टोमे लिङ्गकल्पितश्रुत्या विनियोग इति मन्त्राणां स्वाध्यायविधिग्रहणस्य प्रवर्ग्यस्य च परिग्रहस्योपपत्तौ विद्यायां वाक्यलिङ्गश्रुतिविनियोगाः कल्प्यमाना लूनमूलत्वादमूलसस्यवद् विशीर्यन्त इति।

१. 'मन्त्राणामभिचारे' इति पाठो युक्त इति भाति।

तन्निरासः

तन्न। अस्याश्चिन्तायाः पादासङ्गतत्वात्। विद्याभेदाभेदविचारस्येह पादे प्रस्तुतत्वेन शेषशेषिभावस्याप्रस्तुतत्वात्। ननु विद्याभेदादिविचारोऽप्युपसंहारानुपसंहारफलकतया[1] एवेह प्रस्तूयते। मन्त्राणां कर्मणां च विद्याङ्गत्वे उपसंहारः, विपरीते विपर्यय इति फलैक्यान्नासङ्गतिरिति चेन्न। अङ्गत्वपक्षेऽपि मन्त्रकर्मणोरुपसंहारायोगात्। नहि विद्याशब्दिते उपासनामन्त्राणां कर्मणां चैकबुद्ध्यावारोहात्मक उपसंहारो दृष्टचरः। 'भूः प्रपद्येऽमुनाऽमुना' इत्यादिमन्त्र उपासनेषु विनियुक्तः श्रूयत इति चेन्न। उपासनाकाले चित्तैकाग्रताविरोधिनां मन्त्रावृत्त्यादीनां कर्तव्यताऽसम्मतेः। प्रवर्ग्यादिकर्मणां चोपासनाकाले कर्तव्यत्वे चित्तैकाग्रताविलोपादुपासनमेव लुप्येत।

ननु शेषत्वे मन्त्रस्य तदर्थं उपासनाकाले उपसंहार्यो भविष्यतीति चेन्न। मन्त्रस्य शेषत्वेऽपि तदर्थस्य कर्मणि पर्वतभेदनादेरिव विद्यायामुपसंहारायोगात्। तस्माद् व्यर्थेयं चिन्ता। पूर्वपक्षश्चातिदुर्बलः। नहि पूर्वतन्त्रे लिङ्गवाक्यादितोऽतिदुर्बलत्वेन प्रसिद्धस्य सन्निधेर्विनियोजकत्वं शङ्कार्हम्। नापि 'सर्वं प्रविध्य हृदयं प्रविध्य' इत्यादिमन्त्रेषूपासनोपयुक्तहृदयमात्रप्रकाशनेन विद्याङ्गत्वं सम्भवति। प्रवर्ग्यादीनां च सर्वसामर्थ्यमुत्प्रेक्षितुमपि न शक्यम्। येन लिङ्गादिना विनियोग आशङ्क्येत। सिद्धान्तोऽपि, मन्त्रकर्मणोः सर्वथा विद्याशेषत्वं नास्तीति मतमाश्रित्य प्रवर्तते उत तत्काले उपसंहार्यत्वाभाव इति। नाऽद्यः। उपासनापेक्षितचित्तशुद्धिनिर्वर्तकत्वेन मन्त्रकर्मणोस्तच्छेषत्वावश्यम्भावात्। यदा त्वसन्निहितानां कर्मणां विद्याशेषतां 'कर्मणा ज्ञानमातनोति' इति श्रुतिरेव स्पष्टं श्रावयति तदा सन्निहितानाममीषां कर्मणां मन्त्राणां च सुतरां तत्सिद्धेश्च। न द्वितीयः। उपनिषदारम्भे आम्नातानां प्रवर्ग्यादिविद्यानां च भेदाभावे उपसंहारस्यैव सिद्धेः। भेदे तु तत एवोपसंहारसिद्धेरधिकरणारम्भायोगात्।

१. म. उपसंहारफलकतया।

किञ्चाऽरण्यकपठितयोर्मन्त्रकर्मणोः सर्वथा सन्निध्यभावेनाऽभिचारिकादौ कथं लिङ्गमात्रेण विनियोगः। 'अग्निर्मूर्धा' (ऋ.सं.) इत्यादिमन्त्रस्याऽग्नेयकर्ममात्रे तु लिङ्गदर्शनेऽपि सन्निहितदार्शपौर्णमासिकाग्नेयकर्मण्येव विनियोगदर्शनात्। अन्यथा पूषानुमन्त्रणमन्त्रस्यापि सन्निध्यनपेक्षलिङ्गमात्रेणैव पौष्णे कर्मणि विनियोगसम्भवेन सन्निधिसम्पादनाय दार्शपौर्णमासिकप्रकरणादुत्कृष्य पौष्णप्रकरणे निवेशायासो विफलः स्यादित्युत्कर्षवार्तोच्छेदप्रसङ्गः।

नन्वत्रापि मन्त्रकर्मणोर्विद्याप्रकरणादुत्कृष्टयोराभिचारिकादिप्रकरणनिवेशनेन तद्वदेव तत्सन्निधिरपि सम्पाद्यते। अत एव 'आकाशस्तल्लिङ्गात्' (ब्र.सू. १.१.२२) इत्यत्रोद्गीथो-पासनाप्रकरणस्थस्य 'स एषोऽनन्तः' इत्यादिना श्रुतानन्तत्वादेरपि भूताकाशेऽप्युपासनामात्रार्थत्वे सुवचत्वेन अनन्तत्वादिलिङ्गैर्ब्रह्मत्वसिद्धान्तायोगेनानन्तादिवाक्यस्य 'ॐइत्येतदक्षरमुद्गीथमुपासीत' (छा.उ.) इत्यस्मादुपास्तिप्रकरणादुत्कर्षोऽभ्युपगत इति चेत्, तर्ह्युपासनाप्रकरणस्थानामपि सत्यकामत्वादीनां तत्प्रकरणादुत्कर्षे उपास्यत्वाभावेन तद्वाक्यानां स्वार्थे तात्पर्यनिश्चयेन प्रबलतया निर्गुणवाक्यबाधकत्वं, सगुणसन्निधौ श्रुतस्य निर्गुणवाक्यस्यैवान्यत्रोत्कर्षेण सगुणवाक्यबाधकत्वाभावश्च स्यादिति सगुणवाक्येन ब्रह्मणः सगुणत्वापत्त्या निर्गुणसिद्धान्तो न स्यात्।

अद्वैत्यभिमतसूत्रार्थनिरासः

एतेन 'हृदयं प्रविध्य' इत्यादिमन्त्राणां येऽर्थाः हृदयवेधादयस्तेषां भेदाद् उपनिषदुदिताभिर्विद्याभिः सम्बन्धाभावाद् हृदयवेधादि नोपसंहार्यमिति सूत्रार्थकथनं निरस्तम्। बह्वध्याहारप्रसङ्गात्। भेदशब्दस्य सम्बन्धाभावेऽव्युत्पन्नत्वाच्च। शत्रुहृदयवेधादीनां भगवत्कृतत्वोपासने विषयविषयिभावसम्बन्धस्य सत्त्वाच्च। विद्याभिर्हृदयवेधादीनां सन्निधानत्वलक्षणसम्बन्धस्य सत्त्वाच्च। एतेन -

'एकद्वित्रिचतुःपञ्चवस्त्वन्तरयकारितम्।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनां प्रतीयते॥
बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा।
मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया॥'

इत्यभियुक्तोक्तेः सन्निधानं दुर्बलमिति निरस्तम्। दुष्टनिग्रहार्थोपास्य-गुणप्रकाशनरूपसामर्थ्याख्येन मन्त्रलिङ्गेन तच्छेषत्वाङ्गीकारादिति।

रामानुजमतानुवादः

केचिदिह पूर्वपक्षं दुर्बलं मत्वा 'शं नो मित्रः शं वरुणः', 'सह नाववतु' (तै.उ.) इति द्वावेव मन्त्रावुदाहृत्य किमनयोर्विद्याङ्गत्वमस्त्युत नेति सन्दिह्य सन्निधानाद् विद्याङ्गतां प्रापय्य 'ऋतं वदिष्यामि। सत्यं वदिष्यामि। तेजस्वि नावधीतमस्तु' (तै.उ.) इति मन्त्रसामर्थ्यादध्ययने विनियोग इति न सन्निधानेन विद्याङ्गत्वमिति सिद्धान्तयन्ति।

तन्निरासः

तन्न। पूर्वमते हृदयादीनामुपासनाङ्गतया सुखादिमन्त्रस्य तदङ्गत्वशङ्कायाः सम्भावितत्वेऽपीह मते आपाततोऽपि तदसम्भवात्। सुखादीनामुपास्यानामत्र श्रवणाल्लिङ्गात् तदङ्गत्वं शङ्क्यत इति चेन्न। तर्हि सिद्धान्तानुपपत्तिः। नहि लिङ्गेन पूर्वपक्षे तेनैव सिद्धान्तो युज्यते। योगे वा 'हृदयं प्रविध्य' इत्यादिमन्त्रस्यो-दाहरणत्वत्यागे कारणाभावाच्च। वेधाद्यर्थभेदवत् 'सत्यं वदिष्यामि', 'तेजस्वि नावधीतमस्तु' (तै.उ.) इति, शंनोमित्रादेर्मन्त्रस्याप्यध्ययनसम्बन्धरूपार्थभेदान्न विद्याङ्गत्वमिति सूत्रव्याख्यानं च न तदक्षरारूढमिति स्वेनैवाङ्गीकृतम्। 'हृदयं प्रविध्य' इत्यादेः सन्दिग्धस्य दृष्टान्तत्वोक्तिविरोधश्च। हृदयवेधादीनामाभि-चारिके कर्मणि प्रसिद्धत्वात् यदि न तत्र सन्देहोत्पादस्तर्हि विद्यारम्भे शंनो मित्रादेर्नियमेन पठनान्न तत्रापीति समम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - सम्भृतिनयोक्ताविशेषितप्रमाणबलन्याययोर्मण्डूक-प्लुत्याऽऽवृत्त्यैतदधिकरणसम्बन्धे तत्रस्थन्यायविवरणोक्तदिशैतत्सम्बन्धित्वेनापि तावेव न्यायौ शिष्यैरेव योजयितुं शक्याविर्त्युपेक्षिताविति मन्वानो अविशेषितन्यायं तावत् स्वयं योजयति- **तस्य च सर्वसज्जनापेक्षितत्वादिति**॥ प्रमाणबलन्यायं भाष्यमवतारयन्नेव सूचनया विवृणोति- **अत्र स्मृतिं चाऽहेति**॥

सङ्क्षेपभाष्येणैतदधिकरणतात्पर्यसूचनम्

एतदधिकरणतात्पर्यमप्याह- **'ब्रह्मणा त्वखिलैर्गुणैः'** इत्यादिना॥ **अखिलैः** वेधादिभिर्युक्तो विष्णुः **ब्रह्मणैव** उपास्यः। तदतिरिक्तैः **तु** यथाक्रमं यथाबलं च तत्तदाश्रमयोग्यं गुणजातमुपसंहृत्यैव विष्णुरुपास्य इत्यर्थः।

सूत्रार्थः

सूत्रार्थस्तु - 'न वा विशेषात्' (ब्र.सू. ३.३.२२) इत्यतो नेत्यनुवर्तते। सर्वोपास्यमित्यध्याहारः। **वेधादि** न सर्वोपास्यम्। **अर्थस्य** वेधाद्युपासनफलस्य हिंसायाः यत्यादियोग्यात् फलाद्[१] विलक्षणत्वादिति।

॥ इति वेधाद्यधिकरणम्॥ १६॥

---

१. 'भेदात्' इति शब्देन भाव्यमिति भाति।

॥ अथ हान्यधिकरणम्॥ १७॥

॥ सूत्रभाष्यम् ॥

मुक्तस्योपासना कर्तव्या न वेत्यतो ब्रवीति[१] -

॥ ॐ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् ॐ ॥ ३-३-२७ ॥

नियतस्वाध्यायानन्तरं स्वेच्छया कुशग्रहणस्तुत्युपगानवदेव मोक्ष उपासनादि[२]। 'ब्रह्मविदाप्नोति परम्' (तै.उ.३-१०) इति मोक्षवाक्यशेषत्वादितरेषाम्। तच्चोक्तम् - 'एतत् साम गायन्नास्ते' (तै.उ.३-१०) इत्यादि। ब्रह्मतर्के च -

'मुक्ता अपि हि कुर्वन्ति स्वेच्छयोपासनं हरेः।
नियमानन्तरं विप्राः कुशाद्यैरप्यधीयते॥' इति।
'कृष्णो मुक्तैरिज्यते वीतमोहैः' इति च भारते॥ २७॥

॥ ॐ साम्पराये तर्तव्याभावात् तथा ह्यन्ये ॐ ॥ ३-३-२८ ॥

स्वेच्छया (एव)[३] इत्यङ्गीकर्तव्यम्। मुक्तस्य तीर्णत्वात्। 'तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति' (बृ.उ.६-३-२२) इति ह्यन्ये पठन्ति। वायुप्रोक्ते च -

'स्थितप्रज्ञत्वमाप्ता ये ज्ञानेन परमात्मनः।
ब्रह्मलोकं गताः सर्वे ब्रह्मणा च परं गताः।
तीर्णतर्तव्यभागाश्च स्वेच्छयोपासते परम्॥' इति॥ २८॥

॥ इति हान्यधिकरणम्॥ १७॥

---

१. ह. अब्रवीत्। २. ह. उपासनादिः। ३. अधिकपाठोऽयम्

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासनस्य मुक्तावप्यनुवृत्तिसमर्थनादस्ति शास्त्रादिसङ्गतिः। मुक्तावुपासनसिद्धौ तस्य प्रागतिशयेन कर्तव्यतासिद्धेस्तत् समर्थनीयम्। तत्र विषयसंशयौ दर्शयति- **मुक्तस्येति**॥ प्रकृतोपासना विषयः। मुक्तेन क्रियते न वेति सन्देहः। प्राप्तफलत्वं क्रियान्तरश्रुतिश्च सन्देहबीजमिति भावः। मुक्तस्येत्यनेनैव पूर्वपक्षोऽपि सूच्यते।

पूर्वपक्षः

न मुक्तेनोपासना क्रियते। तथाहि। किं मुक्तस्योपासना कर्तव्या न वा। नोभावपि कल्पौ। फलप्राप्तिप्रसङ्गात्। तथाचापूर्णताप्रसक्तेः। आद्ये विधिबद्धत्वेन मुक्तेः संसारसमानधर्मतापत्तेश्च। द्वितीयेऽविहितत्वादेव करणं च नोपपद्यते। अतः सोपाधिकमेवोपासनमिति भक्तिर्व्यर्थेति भावः।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत इति**॥ अस्त्येव मोक्षे भगवदुपासना। नच विधिबद्धत्वेन संसारसमानधर्मत्वं मुक्तेः। विनाऽपि विधिं स्वेच्छयोपासनाभ्युपगमात्। नचैवं तत्करणस्यानुपपत्तिः। नियतब्रह्मयज्ञानन्तरमपि कुशैराच्छन्देन स्वेच्छयैव द्विजन्मनां मन्त्रसामाध्ययनादिदर्शनादिति भावः। अस्ति चेदुपासनं मुक्तानां तत् कुतः? स्वेच्छया। विधित एव किं न स्यादित्यत आह- **ब्रह्मेति**॥ न मुक्तस्योपासनं विधिनिबन्धनम्। सर्वोपासनाविधीनां मोक्षवाक्यशेषत्वात्। ब्रह्मज्ञानेन मोक्ष इत्युक्ते तत्कथं भवेदित्यपेक्षायां तादर्थ्येन उपासनाविधयः प्रवृत्ताः। मोक्षसिद्ध्यर्थं प्रवृत्ता विधयः कथं मुक्तविषया भवेयुरिति भावः। भवेदियं चिन्ता यदि मुक्तस्योपासनमेव स्यात्। तदेव कुत इत्यत आह- **तच्चेति**॥ तच्चोपासनं

स्वेच्छयेत्यत्र स्मृतिमाह- **ब्रह्मतर्के चेति** ॥ किञ्च मुक्तानां यज्ञादिकर्माप्यस्ति किमुतोपासनमिति भावेनाऽह- **कृष्ण इति** ॥ २७॥

अनिष्टपरिहारार्थं मुक्तस्योपासनमिति शङ्कापरिहारः

माऽस्तु मुक्तस्य विधिनिबन्धनोपासनम्। तथाऽपि न स्वेच्छया। मोक्षे तदा तदा प्राप्तानिष्टपरिहारार्थत्वोपपत्तेः। नहि निष्फलां स्वेच्छयैव प्रवृत्तिं पश्यामः। किञ्चोपासानाविधीनां मोक्षार्थत्वं मुक्तावनिष्टपरिहारार्थत्वं च किं न स्यादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- **साम्पराय इति** ॥ मुक्तस्योपासनं स्वेच्छयैवेत्यङ्गीकार्यम्। नत्वनिष्टपरिहारार्थम्। 'तीर्णो हि' (बृ.उ. ६.३.२२) इति श्रुतेस्तस्य तर्तव्यानिष्टस्यैवाभावात्। फलाभावेऽपि क्रियेश्वरक्रियावदुपपद्यत इति भावः। सर्वहृद्गतस्य विष्णोः शेषभूतो भवतीत्यर्थः। अत्र स्मृतिं चाऽह- **वायुप्रोक्ते चेति** ॥ स्थितप्रज्ञत्वमपरोक्षज्ञानित्वम्। ज्ञानेन परोक्षेण। अतो मुक्तावप्युपासनानुवृत्तेर्निरुपाधिकं तत् संसारे कर्तव्यमेवेति सिद्धम्॥ २८॥

॥ इति हान्यधिकरणम्॥ १७॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् ॐ ॥

॥ ३-३-२७ ॥

सङ्गतिः

पूर्वत्रोपसंहारोऽनुपसंहारश्च कर्तव्यौ[1] इत्युक्त्वा 'आनन्दादयः' (ब्र.सू. ३.३.१२) इत्यादिना फलसादृश्याद्युक्त्वा 'वेधाद्यर्थभेदात्' (ब्र.सू.

१. म. कर्तव्यः।

३.३.२६), 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्यादिना च तत्तद्योग्यफलावाप्तये स्वस्वयोग्यगुणजातमेवोपास्यं नान्यदिति सपरिकरं विवृतम्। तत्रेदं शान्तिके कर्मणि वेतालोत्थानमिवाऽपन्नम्। फलावाप्त्यर्थमेवोपासनीयो विष्णुः फलार्थोपासनाविषय एव। नतु सुखरूपोपासनाविषयत्वरूपकल्याणगुणशाली। जारिणीभिरुपास्यो जार इवार्थलुब्धाभिरिति। ततस्तस्याभिप्रायवर्णनेनोक्तं विवरणीयम्। पूर्वपादोक्ता भक्तिर्निरुपाधिकैव, नतु सोपाधिकेति च विवरणीयम्। तदस्यां पेटिकायां सङ्गतमित्यत्र क्रियते।

नन्विदमादौ वक्तव्यं सर्वान्ते वा। सर्वप्रमेयानुबन्धत्वात्। मैवम्। वेधनयानन्तर्ये सङ्गतिवदन्यत्र तदभावात्। तथाहि। यथा 'अयोग्योपासनादीयुरनर्थं वाऽर्थनाशनम्' (ब्र.सू.भा. उदाहृतबृहत्तन्त्रवचनम् - ३.३.२६) इति वचनादयोग्यं वेधादि यत्यादिभिर्नोपास्यमङ्गीक्रियते तथा मुक्तानां सर्वेषामपि किमप्युपासनमयोग्यमेवेति मुक्तैस्तदपि न क्रियत इत्यङ्गीकार्यम्। मुक्तानामुपासनं कथं योग्यमिति प्रष्टव्यम्। विहितत्वादिति चेत्, उपासनाविधीनां फलार्थत्वेन प्राप्तफलानां मुक्तानां विधिविषयत्वायोग्यत्वात्। तथाहि। विधिस्तावत् त्रिविधः। काम्यो नित्यो नैमित्तिकश्चेति। न तावन्मुक्तानां काम्योपासनाविधिर्युक्तः। आप्तकामत्वात्। नापि नित्यविधिः। तदकरणे प्रत्यवायापत्त्या मुक्तत्वव्याहतेः। नैमित्तिकोऽपि द्विविधः। निमित्ते सति चोदितस्तर्तव्यतारकश्चेति। न तावन्मुक्तानामुपासाविधिरुपरागस्नानादिवत् केवलनैमित्तिकः। अकरणे प्रत्यवायापत्तेः। प्रायश्चित्तवत् तर्तव्यतारकोऽपि न। 'भिद्यते हृदयग्रन्थिः' (मुण्ड. २.२.८) इत्यादौ मुक्तैस्तर्तव्यदुष्कर्मणां तीर्णत्वात्। अनन्तरं तु दुरदृष्टप्रसक्तेः। ततः फलपर्यन्तमेवोपासनम्, न[1] तदुत्तरमपीति सोपाधिकमेवोपासनम्। ततः पूर्वमपि नेतरसङ्कोचेन 'श्रवणादि विना नैव क्षणं तिष्ठेत्' (अनुव्याख्यानम् ३.३.७५)

१. म. न तु।

इति पूर्वोक्तं न सिद्ध्यति। सुखोपासनाविषयत्वरूपकल्याणगुणशालित्वाभावाच्च न तत्र पूर्वपादोक्ता भक्तिर्निरुपाधिका कर्तव्येति सिद्ध्यति। तदर्थं यदि फलमनपेक्ष्यैवोपासनमित्युच्यते तर्हि वेधनयोक्तमनुपपन्नमिति पूर्वाक्षेपेण प्रवर्तनादनन्तरसङ्गतिः।

पूर्वपक्षः

नोपास्ते मुक्तिगो विष्णुं फलाभावात् कथञ्चन।
अन्यथा व्याहता मुक्तिः स्यादेवात्र निवारिता॥

इति पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु -

उपास्ते मुक्तिगो विष्णुं स्वेच्छयैव न चान्यथा।
संस्कारान्नियमान्तेऽपि कुशग्रहणरीतितः॥

नचैतावता मुक्तत्वव्याघातः। अविधिबद्धत्वाङ्गीकारात्। नच तदीयोपासनस्य फलभावेऽपूर्णत्वापत्तिः, तदभावे तु तत्करणानुपपत्तिः। 'एतत् साम गायन्नास्ते' (तै.उ. ३.१०) इत्यादिना [1]वायुप्रोक्तवचनेन मुक्तावप्युपासनानुवृत्तेरवश्यमेतदेवमङ्गीकार्यम्। विधिबद्ध एव कुतो न करोतीति चेन्न। त्वदुक्तबाधकादेव। अतः स्वेच्छया स्वतः सुखरूपैवोपासनेत्यङ्गीकार्यम्। तथाच यथायोग्यफलावाप्तये तत्तद्योग्योपासनायामुक्तायामपि मुक्तौ तस्याः स्वतः फलरूपत्वेन ततः प्रागप्यतिशयेन कर्तव्यत्वसिद्धेर्नैवौपाधिकत्वापत्तिस्तद्भजनस्येति सर्वमनवद्यम्।

परमतीयाधिकरणानुवादः

यच्चोक्तं 'हानौ तु' इत्येकमधिकरणम्। ताण्डिनो निर्गुणविद्यामुपक्रम्याधीयते-

१. म. वायुप्रोक्तोक्तवचनेन च।

'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि' (छा.उ. ८.१३.१) इति। कौषीतकिनस्तु सगुणायां पर्यङ्कविद्यायां 'तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतम्' (कौषीतकी.उ. १.४) इति। तत्र संशयः। निर्गुणविद्यायामुपायनं सन्निपतेन्न वेति।

तत्र -

ऋतेऽप्युपायनाद्धानसम्भवात् सगुणे श्रुतम्।
निर्गुणेनोपसंहार्यं सुकृतादेरुपायनम्॥

न तावद् 'विधूय पापम्' (छा.उ. ८.३.१) इत्यादिहानवाक्येषु उपायनं श्रुतम्। नच पर्यङ्कविद्यायां हानसन्निधावुपायनश्रवणादत्रापि हानवदुपसंहारः। पर्यङ्कविद्यायाः सगुणत्वात्। 'अश्व इव रोमाणि' (छा.उ. ८.३.१) इत्यस्य निर्गुणविद्याविषयत्वात्। नचोपासनमन्तरेण हानानुपपत्तिः। [1]येन विद्यान्तरगतमानेतव्यम्। परैरस्वीकृतयोरपि पुण्यपापयोर्विद्यया पापस्येव प्रायश्चित्तेन हानसम्भवादिति प्राप्तेऽभिधीयते -

विद्याभेदेऽपि सिद्धस्य स्तुत्यर्थं सङ्क्रमाद् भवेत्।
अश्वरोमादिवत् त्यक्तकर्मणोऽन्यैरुपायनम्॥

विद्यान्तरविहितं विद्यान्तरे नोपसंह्रियते। विधिप्रमाणकृतत्वादङ्गभावस्य। विद्यान्तरे च विध्यभावात्। यत् पुनर्न विधीयते, किन्तु स्तुत्यर्थं सिद्धतया सङ्कीर्त्यते तदर्थवादसामर्थ्याद् विद्यान्तरेऽप्यसति बाधके देवताधिकरणन्यायेन प्रतीयमानं न परित्यक्तुं शक्यते। तर्हि पर्यङ्कविद्यायां[2] हानमुपायनशब्दसन्निहित-

१. म. तेन। २. म. विद्यायाम्।

मवगतम्। ताण्ड्यादिशाखायामपि निर्गुणविद्यायां सुकृतादेस्त्यागोऽश्वरोम-दृष्टान्तेनाऽम्नातः। अश्वरोम्णां च त्यक्तानां न नाशः। किन्त्वन्यत्रावस्थानम्। एवं ताण्ड्यादिकेऽपि विदुषा परित्यक्तसुकृतादेरन्यत्रावस्थानं प्रतीयते। न प्रायश्चित्तादिवत् तन्नाशः। तदुपपादयितुमपेक्षमाणं परैरुपायनमुपसंहर्तव्यम्। तत्र पराश्रितस्य कर्मणः स्वरूपेण परत्र सञ्चाराभावात् फलं सञ्चरति। फल-सञ्चारोत्तरकालं च कर्मस्वरूपक्षयः 'क्षीयन्ते चास्य कर्माणि' (मुण्ड. २.२.८) इत्यादिश्रुतिभिरवगम्यते। नच परकृतकर्मफलस्य परत्र सञ्चारासम्भवः। पित्रादि-कृतवैश्वानरेष्ट्यादिफलस्य पुत्रादिगामित्वाम्नानात्। तस्मान्निर्गुणविद्या हानोपायनाभ्यां स्तोतव्येति।

तन्निरासः

तन्न। उपायनं सन्निपतेन्न वेति विचारस्येह सङ्गत्यभावात्। यथा विद्यासन्निधौ श्रुतस्यापि मन्त्रादेर्विद्यायामसामर्थ्यादनुपसंहार उक्त एवं हानसन्निधौ श्रुतस्याप्युपायनस्य तदन्तरेणापि हानसम्भवेन हानोपादानासामर्थ्याभावाद् अनुपसंहार इत्याक्षेपात् सङ्गतिरिति चेन्न। तथाऽपि पादसङ्गत्यभावात्। विद्या-भेदाभेदविचारात्मत्वादस्य पादस्य। सङ्गत्यर्थमभिहितायाः शङ्कायाः लिङ्गमूलत्वेन प्रबलतया दुर्बलसमाख्यामात्रेण परिहारायोगाच्च। उपायनस्य परैरुपादानात्मकस्य सुकृतादिधर्मतया ब्रह्मधर्मत्वाभावेनोपसंहार्यत्वासम्भवाच्च। नचैतादृशसुकृत-दुष्कृतहानोपादानजनकज्ञानविषयत्वं[१] ब्रह्मधर्म एवेति वाच्यम्। तस्यैवाश्रव-णात्[२]। विवक्षायामपि ब्रह्मणो ज्ञानात्मकतया क्रियाकर्मभावविरोधेन विषयत्वा-नङ्गीकाराच्च। मायिकं तदस्तीति चेन्न। निर्गुणविद्याविषयत्वानुपपत्तेः। अन्यथा सगुणनिर्गुणविद्ययोर्भेदो न स्यात्। एतेन सगुणायां पर्यङ्कविद्यायामुपायनस्य

१. म. हानोपादानकज्ञानविषयत्वम्।	२. म. तस्येहाश्रवणात्।

स्तुत्यर्थं कीर्तनमिति[१] निर्गुणायामपि स्तुत्यर्थं तत्सङ्कीर्तनीयम् इत्युच्यत इति निरस्तम्।

किञ्च किमिदं सङ्कीर्तनम्? तद्वाचकपदाध्याहारः, किं वा तदर्थस्यात्रानु-सन्धानम्। नाऽद्यः। निर्गुणविद्यागतपदानां विशिष्टार्थानभिधायित्वेन निराकाङ्क्ष-त्वात्। रक्तपटन्यायेनाऽऽकाङ्क्षोत्थापने च कारणाभावः। नच पर्यङ्कविद्यायां हानोपायनशब्दसन्निहितमित्येतदेव तत्कारणं भवितुमर्हति। 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन। य एवं वेद नास्याब्रह्मवित् कुले भवति' इत्यादयोऽपि पर्यङ्कविद्यायां हानसन्निहिता इति निर्गुणायामपि स्युरिति बहुविप्लवापातात्। भानब्रह्मवर्चसादेर्निर्गुणविद्याफलत्वायोगेन बाधकेन तेषां निर्गुणायां प्राप्तिरिति चेन्न। 'ब्रह्मलोकमभिसम्भवामि' (छा.उ. ८.१३.१) इत्यादेर्निर्गुणविद्यायामपि श्रवणात्।

एतेन द्वितीयोऽपि निरस्तः। दृष्टान्तवैगुण्याय निर्गुणविद्यायां परैरुपायनमुप-संहर्तव्यमिति ज्ञायत इति चायुक्तम्। दृष्टान्ते सर्वसाम्यायोगात्। अन्यथा विधूतानां रोम्णामश्वाद् विश्लेषभावेन सुकृतदुष्कृतयोरपि विदुषो विश्लेषापातात्। यदि चात्रोपायनमुपतिष्ठेत तर्हि 'क्षीयन्ते चास्य कर्माणि' (मुण्ड. २.२.८) इति दर्शनात् स्वरूपस्यैव प्रायश्चित्तादिविनाशः श्रूयमाणो न स्यात्। [२]अन्यथा तत्फल-सञ्चारानन्तरभाविकर्मक्षयोऽत्रोच्यत इति च न युक्तम्। फलनिष्पत्तिसमनन्तर-भाविविनाशस्याज्ञानिकर्मसाधारण्येन ज्ञानफलत्वोक्त्ययोगात्। न स्याच्च निर्गुणविद्यास्तुतिः। नहि बन्धकं कर्म स्वरूपतयैव क्षपयति। निर्गुण-विद्येत्युक्तादप्यन्यत्र यापयतीत्युक्तौ स्तुतिबुद्धिरुपजायते। प्रत्युत निर्गुणविद्यायाः कर्मस्वरूपक्षपणे सामर्थ्याभावप्रतीतेः।

१. म. कीर्तनमपि।	२. म. अन्यत्र।

रामानुजमताभिमतमधिकरणस्वरूपं तन्निरासश्च

एतेन केवलहानचिन्तनकेवलोपायनचिन्तनोभयचिन्तनानि तत्र तत्र श्रुतानि तथा तथाऽऽम्नानस्यार्थवत्त्वाय विकल्प्यन्त इति प्राप्ते पुण्यपापप्रवेशस्य विमोचनापेक्षत्वेन शाखान्तरस्थस्यापि प्रवेशवाक्यस्य शाखान्तरस्थविमोचनवाक्यशेषत्वाद् वाक्यद्वयेनैकार्थविधानात् समुच्चय इति केषाञ्चिदधिकरणं निरस्तम्। केवलोपायनस्य हानसापेक्षत्वेन तत्र समुच्चयस्य सिद्धतया सन्देहाभावात् तेन केवलहानचिन्तनमेवोदाहृत्योपायनचिन्तनं समुच्चीयते न वेत्येतावदेव चिन्तनीयम्। तत्र च हेत्वभावात् सिद्धान्तासिद्धिः। उपायनमन्तरेणापि हानसम्भवात्। शाखान्तरस्थविमोचनवाक्यशेषत्वादेश्चोक्तरीत्याऽतिप्रसक्तत्वात्। उक्तरीत्या सर्वत्र समुच्चयसम्भवे क्वचिदुभयचिन्तनश्रवणस्य वैयर्थ्यप्रसङ्गाच्च। एकस्यां शाखायामुभयविधानं प्रतिपत्तृभेदेनेति समाधानं तु क्लिष्टतरम्। उदाहृतवाक्ये तु हानोपायनयोरेव श्रवणेन तच्चिन्तनस्याश्रुतत्वाच्च[१]। एवमितः प्रेत्याभिसम्भविताऽस्मीति यस्यादितीति[२]करणश्रवणात् तत्कल्पनं तु साक्षादुदाहृतवाक्ये श्रवणाभावान्न साम्प्रतम्। उपायनानुसन्धानस्योक्तरीत्या विद्यापकर्षहेतुत्वाच्च।

पराभिमतसूत्रार्थनिरासः

एतेन हानौ त्वेकस्यां केवलायामपि श्रूयमाणायामुपायनं सन्निपतेत्। उपायनशब्दशेषत्वादुपायनशब्दस्य हानशब्दशेषत्वात्। यथा भाल्लविनां 'कुशा वानस्पत्याः' (शा.भा. उदाहृतभाल्लवेयश्रुतिः ३.३.२६) इत्यस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वश्रवणे [३]शाट्यायनिनाम् 'औदुम्बर्यः कुशाः' इति वाक्यं तच्छेषः, यथा च 'देवासुराणां छन्दोभिः' इति प्रदेशान्तरस्थस्य

१. म. तच्चिन्तनत्वाश्रुतत्वात्। २. म. यस्यापीति।
३. म. शाक्यायनिनाम्

वाक्यस्य 'देव च्छन्दांसि पूर्वाणि' इति पैङ्ग्याम्नानं शेषः, यथा वा षोडशिस्तोत्रे 'हिरण्ये न षोडशिनस्तोत्रमुपाकरोति' इति प्रदेशान्तरस्थस्य 'समयाध्युषिते[१] सूर्ये षोडशिनः स्तोत्रम्' इति प्रदेशान्तरस्थमाम्नानं, यथा वा 'ऋत्विज उपगायन्ति' इति प्रदेशान्तरस्थस्य 'नाध्वर्युरुपगायेत्' इति प्रदेशान्तरस्थं वाक्यम्, इत्युभयोः सूत्रव्याख्यानमयुक्तम्। व्यधिकरणत्वात्। नहि हानोपायनचिन्तनमुपायनशब्दस्य हानशब्दशेषत्वेन शक्यसाधनम्।

किञ्चेहोपायनशब्दस्य शेषत्वं पारार्थ्यमुत तदनन्तरभावित्वं, तदर्थाविनाभूतार्थत्वं वा। नाऽद्यः। उपायनशब्दस्य हानशब्दार्थत्वायोगात्। अपौरुषेये नित्ये च शब्दे तन्निर्वर्तकत्वगर्भस्य तादर्थ्यस्यायोगात्। न वा यागनिर्वर्तकेषु पुरोडाशेष्विवोपायने हाननिर्वर्तकत्वमस्ति, येनार्थद्वारा तच्छब्दयोः शेषशेषिभावः सम्भाव्येत। शब्दपदानर्थक्यं शब्दं समुच्चारयन् स्तुत्यर्थायामेव हानोपायनानुवृत्तिं सूचयतीति भाषितं सार्थक्यं चोक्तरीत्या स्तुतिविघातकत्वादनुपपन्नम्। कुशादिवाक्येषु तादर्थ्याभावेन दृष्टान्तासिद्धेश्च। न द्वितीयः। ताण्डिशाखायां 'तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति' (कौषीतकी.उ. १.४.) इत्युपायनवाक्यस्यैवाभावेन तदसिद्धेः। कुशादिदृष्टान्तासिद्धेश्च। नहि प्रदेशान्तरस्थवाक्यं प्रदेशान्तरस्थवाक्यस्यानन्तरभावीति वक्तुं शक्यम्। न तृतीयः। असिद्धेः। नह्युपायनाविनाभूतं हानम्। उपादातुरन्यस्याभावे प्रायश्चित्तादिना पापादेर्हानिदर्शनात्। प्रत्युत हानाविनाभूतत्वादुपायनस्यैव वैपरीत्यौचित्याच्च। नापि तदेकदेशत्वं तच्छेषत्वमिति साम्प्रतम्। असिद्धेः। नहि शाखान्तरस्थवाक्यस्य शाखान्तरस्थं वाक्यमेकदेश इति पूर्ववादी मन्यते। चतुर्ष्वपि कुशादिवाक्येषु वानस्पत्यछन्दस्तुत्युपगानशब्दानां सामान्यवाचितया निर्विशेषस्य सामान्यस्यालीकत्वेनानुष्ठातुमशक्यतया तद्विशेषाणामाकाङ्क्षितानां समर्पणेन शाखान्तरस्थवाक्यानां 'औदुम्बर्यः कुशाः' इत्येवमादीनां 'तेजो वै घृतम्'

१. 'समयाविषिते' इति क्वचित् पाठः

इत्यादिवत् तच्छेषत्वेऽपि इहोदाहृतोपायनवाक्यस्य तच्छेषत्वे नियामकाभावेन दृष्टान्तदार्ष्टान्तिकभावानुपपत्तेश्च। वानस्पत्यादित्वेन [1]सूत्रेणास्यैवोचितत्वेन यथाश्रुतस्यानुचितत्वापाताच्च।

'तदुक्तम्' इति सूत्रान्त्यपदस्य रामानुजोक्तव्याख्यानिरासः

यच्चैवमुपायनवाक्यस्य हानवाक्यशेषतया सम्भवन्त्यां गतौ न विकल्पो युक्तः। 'तदुक्तं पूर्वस्मिन् काण्डे अपि तु वाक्यशेषत्वादन्याय्यत्वाद् विकल्पस्य' इत्यादिनेति सूत्रान्त्यपदव्याख्यानं तदपि न समञ्जसम्। 'यजतिषु येयजामहं करोति नानुयाजेषु' इति सन्निधानाम्नानात् तदेकदेशतानिश्चयेन प्रतीतैकवाक्यतारक्षणाय विकल्पानाश्रयणेऽपीह सन्निधानाम्नानाभावेन[2] विकल्पनिरासस्यायोगात्। योगे वा पूर्वतन्त्रेणैवैतदधिकरणप्रत्याख्यानापाताच्च।

एतत्सूत्रस्य अद्वैताभिमतव्याख्यानान्तरम्

यच्चात्र वर्णकान्तरम्- 'अश्व इव रोमाणि विधूय पापम्' (छा.उ. ८.३.१) इत्यादौ किं विधूननं सुकृतदुष्कृतयोश्चालनं किं वा हानमिति संशयः। तत्र -

कर्मणः स्वाश्रयत्यागपरसञ्चारलक्षणात्।
फलितश्चालनं लक्ष्यं लाघवेन धुनोतिना॥

न हानमत्र विधूननं, 'धूञ् कम्पने' इति स्मरणात्। स्वाश्रयत्यागात्मकस्य हानस्य चालनात्मककम्पनत्वाभावात् इति प्राप्तेऽभिधीयते -

उपायनसमीपस्थो त्यागो लक्ष्यो विधूननात्।
स एव केवलाल्लक्ष्यश्चालनानुपपत्तितः॥

अत्यक्तयोः सुकृतदुष्कृतयोः परैरुपायनानुपपत्तेरुपायनसन्निधौ श्रुतधुनोतिना

१. 'सूत्रणस्यैव' इति पाठ इति भाति।
२. म. सन्निध्याम्नानाभावेन।

तावत् त्यागो लक्षयितव्यः। तथाचोपायनसन्निधिरहितकेवलधुनोतिश्रवणेऽपि तेन स एव लक्षयितव्य इति धुनोतेर्हानमेवार्थ इति।

तन्निरासः

तन्न। सङ्गतिलेशस्याप्यदर्शनात्। नहीदं शास्त्रं शब्दानुशासनपरम्। 'अश्व इव रोमाणि विधूय पापम्' (छा.उ. ८.१३.१) इत्यत्र धूञः कम्पनार्थस्यामूर्तयोः पुण्यपापयोर्मुख्यतो वृत्त्यसम्भवात्, स्वफलारम्भाच्चालनमेव तेन स्वफलनमेव लक्षयितव्यमिति हानपरत्वस्य लक्षणापत्त्या निराकरणायोगेन पूर्वपक्षस्यायोगाच्च। नच हानशब्दितः स्वाश्रयत्याग उपायनशब्दित आश्रयान्तरसञ्चारश्च धुनोतिना लक्षयितव्य इति सिद्धान्ते लक्षणाद्वयं पूर्वपक्षे त्वेकत्रैव लक्षणेति युक्तम्। उपायनसन्निधिरहिते विधूननवाक्ये स्वाश्रयत्यागात्मकहानस्यैव लक्ष्यतयाऽर्थद्वये लक्षणानङ्गीकारात्। 'तस्माद्धानार्थ एवात्र' इति वाचस्पत्युक्तेः। 'क्षीयन्ते चास्य कर्माणि' (मुण्ड. २.२.८), 'यथेषीकातूलमग्नौ प्रोतं प्रदूयत एवम्' (छा.उ. ५.२४.३), 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते' (भ.गी. ४.३७) इत्यादिषु स्वरूपध्वंसस्यैवोक्तेस्तदन्यत्रापि संयोगाच्च। अन्यथा हृदयग्रन्थिशब्दिताज्ञानादेरपि स्वाश्रयत्यागाश्रयान्तसञ्चारादिरेव स्यात्।

किञ्चात्र धुनोतेर्हानमर्थ इत्याश्रित्य सिद्धान्तः प्रवर्तते, उत हानोपायने उभे अप्यर्थ इति। नाऽद्यः। गौरवप्रसक्त्या सिद्धान्तदूषणेन चालनमात्रमर्थ इति पूर्वपक्षायोगात्। योगे वोभयत्र लक्षणामङ्गीकृत्य गौरवस्य प्रामाणिकत्वेनादोषत्वाभिधानायोगात्। न द्वितीयः। हान्युपायनयोरिति सूत्रपाठापातादिति दिक्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - केचिदिदमधिकरणं साक्षात् सङ्गतिमपश्यन्तः प्रासङ्गिकमित्याहुः। सति सम्भवे तदयुक्तमिति मन्वानः स्वयं साक्षात् सङ्गतिमाह - **अत्र**

ब्रह्मज्ञानसाधनेति ॥ ननु 'मुक्तस्योपासना कर्तव्या न वेत्यतोऽब्रवीत्' इतीह-भाष्येण तत्त्वप्रदीपेन च मुक्तोपासनस्य कर्तव्यतासमर्थनमेव प्रतीयते, नानुवृत्तिमात्रसमर्थनम्। मैवम्। तथा सति मुक्तत्वव्याघातापरिहारात्। 'मोक्षे तूपासना स्वेच्छया क्रियते, न कर्तव्यत्वात्' इति तत्त्वप्रदीपोक्तिविरोधाच्च। भाष्यं तु तदर्थ-संशयप्रदर्शनपरम् इति द्रष्टव्यम्। **तस्य प्रागतिशयेन कर्तव्यतासिद्धेरिति ।** मुक्तावनुवृत्त्यसाधने प्रागादरेण कर्तव्यत्वासिद्धेरित्यर्थः। नतु कर्मणोऽतिशयेनेत्यर्थः। तथा सति मुक्तानां यज्ञादिकर्माप्यस्ति किमुतोपासनमित्युत्तर-टीकाविरोधात्। उत्तराधिकरणप्रमेयत्वाच्च तस्येति ध्येयम्। संशयमाह- **मुक्तेन क्रियते न वेति ॥** [1]तदर्थमिदं चिन्त्यते। उपासना मुक्तं प्रति विहिता न वेत्येवंरूपेण भाष्यं योजनीयमिति तद्विवरणं प्रतिजानीते- **तथाहीति ॥ कर्तव्या नवेति ॥** विहिता न वेत्यर्थः।

पूर्वपक्षीयातिप्रसङ्गन्यायविवरणव्याख्यानम्

अतिप्रसङ्गन्यायमापादकोक्त्या विवृण्वत् **'नच मुक्तानामुपासनभावे[2] फलादिकमपि स्यादित्यतिप्रसङ्गः'** (न्या.वि.) इति वाक्योक्तं[3] भाष्योक्तकल्प-द्वयदूषणपरतया व्याचष्टे- **फलप्राप्तिप्रसङ्गादिति ॥** विहितत्वपक्षे फलाभावे तदनुपपत्तिः। अविहितत्वपक्षेऽपि कृष्यादेस्तद्विधिविषयपुरुषानुष्ठितस्य धान्यादि-फलकत्वदर्शनात् फलप्राप्तिर्दुर्वारेति भावः। तत्रेष्टापत्तिपरिहाराय प्राप्तमित्यति-प्रसङ्ग इति पदं व्याचष्टे- **तथाचेति ॥** इतिकरणस्यार्थः- **तथा चेति ॥** अतिप्रसङ्ग इत्यस्यार्थः- **अपूर्णता-प्रसक्तेरिति ॥** आद्यकल्पमात्रदूषणपरत्वेनापि समग्रं वाक्यं योजयति- **आद्ये विधिबद्धत्वेनेति ॥** उपासनभावे फलं स्यात्। तथाच फलोद्देश-प्रवृत्तिविषयत्वरूपविधिविषयत्वं स्यात्। तेन च मुक्तेः संसारसमानधर्मत्वापत्ति-रूपोऽतिप्रसङ्ग इति व्याख्यातम्। अपिशब्द उपासनाभावपक्षकक्षीकरणार्थः,

---

१. म. तदर्थमेवेदम्। २. ह.म. उपासनाभावे।
३. वाक्यमिति साधु स्यात्।

आदिशब्दः करणवाचक इति मनसि निधाय द्वितीयकल्पनिरासकत्वेन योजयति- **द्वितीय इति ॥** चशब्दान्नियमेन करणं सुतरां नोपपद्यते कारणाभावादित्यर्थः। ततश्च अस्मिन् पक्षे इत्यतिप्रसङ्ग इति पदं व्याचष्टे- **अतः सोपाधिकमेवेति ॥** भक्तिवैयर्थ्यरूपातिप्रसङ्ग इत्यर्थः। ततश्च मुक्तानामुपासनाभावे [1]विहितत्वेऽपि-शब्दात् तदभावेन च फलं स्यादेवेति। तथाचापूर्णताप्रसक्तिरूपातिप्रसङ्गः।

किञ्च मुक्तानामुपासनपक्षे फलं स्यात्। तथाच विधिबद्धत्वमित्यध्याहार इति। तेन विधिबद्धत्वेन मुक्तेः संसारसमानधर्मत्वापत्तिरूपातिप्रसङ्गः। किञ्चाप्यु-पासनाभावपक्षे फलादिकं स्यादकरणमेव स्यादित्यतः सोपाधिकमेवोपासनमिति भक्तिवैयर्थ्यरूपातिप्रसङ्ग इति समग्रवाक्ययोजना द्रष्टव्या।

सिद्धान्तीयकारणन्यायविवरणव्याख्यानम्

कारणमित्युक्तन्यायं तदाकारप्रदर्शनेन सत्त्वोपलक्षणतया विवृण्वत् ''उपासनायाः संस्काराख्यकारणस्य सत्त्वात्। 'न हीयते यत्र गत्वा यत्र गत्वा न वर्धते' इत्यवृद्धिप्रमाणभावाच्च।'' (न्या.वि.) इति वाक्यं; 'स्तुत्युपगानवदेव मोक्षे उपासनादि' इति भाष्यं न तत्र कारणान्तरगवेषणप्रयासः। यतः स्तुत्युप-गानादौ प्रसिद्धसंस्कार एव मोक्षेऽप्युपासनादेः कारणं स्फुटं प्रतीयत इति विवरितुं प्रवृत्तमिति मन्वानः ऐक्यार्थ्याद् भाष्येण सहैव सूत्रार्थकथनेन सूचनया व्याचष्टे- **अस्त्येव मोक्षे भगवदुपासनमिति ॥** एवेति नियम उक्तः। द्विजन्मनामित्येतदध्य-यनाभ्याससहित[2]संस्कारवतामित्येत्परम्। तेन चास्य व्याख्यानं सूचयति। तद्वदेवेहाप्युपासनायाः संस्काराख्यकारणस्य सत्त्वान्नियमेन करणमुपपन्नमिति शेषः। मण्डूकप्लुतिन्यायेन सम्भृतिनयोक्तप्रमाणबलन्यायोऽत्रापि सिद्धान्त-साधकत्वेन योजनीयः। एवमन्यत्रापीति ज्ञापयितुं तत्स्वरूपप्रदर्शनेन विवृण्वन् युक्त्यन्तरमाह- **न हीयत इति ॥**

---

१. 'विहिते' इति पाठः समीचीन इति भाति। २. इति म. आहित।

यद्वा, फलसाम्यं विशेषश्चेत्यतः पूर्वस्मात् कारणं कार्यवैशेष्यम् इत्यत्रापि चशब्दोऽनुवर्तत इत्यभिसन्धिः। तत्सङ्गृहीतन्यायान्तरमेवमन्यत्रापि इति दर्शयितुं व्याचष्टे- **न हीयत इति** ॥ यद्वा कारणशब्दः प्रमाणाख्यकारणपर इति प्रकारान्तरेण व्याख्यायते- **न हीयत इति** ॥ यद्वा, संस्काराख्यकारणेनेति कुतः? फलवृद्धिप्रतिबन्धकदुरदृष्टादिपरिहारार्थत्वं किं न स्यादित्याशङ्क्य गुरुसूत्राभिमतयुक्तिमेवाऽह- **न हीयत इति** ॥ चशब्दो बाधकपरिहारसमुचितस्य संस्काराख्यकारणस्यैव सिद्धान्तसाधकत्वं सूचयति। यद्यप्यत्र भाष्ये उपासनादीत्यादिशब्दोऽयुक्तः। उपासनस्यैवेह विचिकित्सितत्वात्। नियमेन कृतिविषयत्वाच्च। तथाऽप्युत्तराधिकरणसङ्गत्यर्थं कर्मापि ग्राह्यमिति सूचयितुं युक्तमेव। तथाऽप्यत्र कर्म कथं सङ्गमयितव्यमित्यतः कैमुतिकन्यायसूचनेनेति मन्वानः 'कृष्णो मुक्तैरिज्यते' (म.भा.) इति भारतवचनोदाहरणस्य सङ्गतिं करोति- **किञ्चेति** ॥

सूत्रार्थः

सूत्रार्थस्तु- **तु**शब्द इदानीन्तनप्रवृत्तौ विशेषं दर्शयति । स एव सूच्यते छन्दशब्देन । यद्वाऽवधारणार्थस्तुशब्दः । **हानौ** संसारहानौ उपासनं क्रियत एवेत्यध्याहारः । परन्तु छन्दत इत्याकृष्यते । तेनैव सम्बन्धः स्वेच्छयैव नतु फलापेक्षयेति लभ्यते। न वा विधित इति च कुतः? **उपायनशब्दशेषत्वात्।** उप समीपेऽयनं गमनं सामीप्यादिरूपमोक्ष इति यावत् । तत्प्रतिपादकं वाक्यम् 'आप्नोति परम्' (तै.उ. २.१) इत्यादिरूपम्। तं प्रति शेषत्वात् 'ब्रह्मवित्' (तै.उ. २.१) इत्याद्युपासनावाक्यानामिति शेषः । नह्युपायावाप्त्यनन्तरमपि उपेयानुष्ठानं विधितः सम्भवतीति भावः। नचैतददृष्टचरम्। **कुशाच्छन्दस्तुत्युपगानवत्।** कुशाः दर्भाः, छन्दः इच्छा । आकार एवार्थः। आदानोपलक्षणार्थो वा। स्तुतिर्मन्त्रः उपगानं साम कुशादानेन स्वेच्छयैव मन्त्रसामाध्ययनं द्विजन्मनां यथेत्यर्थः । 'एतत् साम गायन्नास्ते' (तै.उ. ३.१०) इत्यादिनोपासनमुक्तं

प्रमितम्। गुणिनिष्ठगुणाभिधानपूर्वकगीतिरूपत्वात् साम्नः 'मुक्ता अपि हि कुर्वन्ति' (ब्र.सू.भा. उदाहृतब्रह्मतर्कवचनम् ३.३.२७) इति स्पष्टं प्रमितत्वाच्च। अत्र विप्रा इति प्रकृष्टजन्मवतां त्रयाणामपि ग्रहणम् । कुशाद्यैरित्यादिशब्देन प्राङ्मुखत्वादिनियमविशेषा गृह्यन्ते। हानिशब्दोक्तोऽपि मोक्षः विप्रतिपत्तेस्तत्स्वरूपप्रदर्शनायोपायनशब्देन विवृतः। स्वेच्छयेत्यङ्गीकर्तव्यमित्यध्याहारः। उपासनमिति च। परः परमात्मा। तं प्रत्यायो गमनम्। सम्यक् पुनरावृत्तिं विना परायः सम्परायः। सम्पराय एव **साम्परायः**, तस्मिन् मोक्षे **तर्तव्यभागाभावात्** तन्निवृत्त्यर्थमुपासनाऽसम्भवेन स्वेच्छयेत्यङ्गीकर्तव्यम्। अत्रोक्तो हेतुर्नासिद्धः। 'तीर्णो हि' (बृ.उ. ६.३.२२) इत्यादिनैके शाखिनस्तर्तव्यभागशून्यतया पठन्ति। अत्र हानिशब्दोक्तः उपायनशब्दविवृतोऽपि मोक्षः सुप्त्यादिव्यावृत्तये पुनः साम्परायशब्देनापि विवृत इत्यदोषः।

केचित्तु, 'कुशास्तरणस्तुत्युपगानवदेव मोक्षे उपासनादि' इति क्वचिद् भाष्यं दृष्ट्वा यथा यज्ञेषु कुशास्तरण्यं[१] कुशादिभिः शङ्कुभिरास्तरणेनेति कुशाच्छन्देत्यस्यार्थः। 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१) इति विहितं ब्रह्मज्ञानलक्षणं मोक्षसाधनमुपायत्वादुपायनशब्देनोच्यते। प्रतियोगे द्वितीयागर्भमेतत्। शब्दपदं च मोक्षरूपतत्फलप्रतिपादकवाक्यपरम्। उपासनावाक्यानां च ब्रह्मज्ञानापेक्षिततत्साधनभूतोपासनासमर्पकतयोपासनाविधीनां तच्छेषत्वात्। ब्रह्मप्राप्तिरूपमोक्षप्रतिपादकवाक्यं प्रति तत्साक्षात्साधनब्रह्मज्ञानापेक्षितोपासनसमर्पकत्वादिति यावदित्युपासनाशब्दशेषत्वादित्यंशस्य चार्थ इत्याहुः। 'तर्तव्याभावात्' इति सूत्रे सूचितोऽतिप्रसङ्गन्यायः छन्दस्तुत्युपगानसूचितः कारणन्याय इति न्यायमालायां तयोः सङ्ग्रहोऽपि नायुक्तः।[२]

॥ **इति हान्यधिकरणम्** ॥ १७ ॥

---

१. म. कुशास्तरण्याम्। २. अधिकरणेऽस्मिन् सङ्क्षेपभाष्यव्याख्यानं मातृकायामनुपलब्धम्।?

॥ अथ छन्दाधिकरणम् ॥ १८ ॥

॥ सूत्रभाष्यम् ॥

कर्मापि कुर्वन्ति न वेत्यत आह[१]-

॥ ॐ छन्दत उभयाविरोधात् ॐ ॥ ३-३-२९ ॥

स्वेच्छया कुर्वन्ति न वा। बन्धप्रत्यवाययोरभावात्॥ २९ ॥

॥ ॐ गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॐ ॥
॥ ३-३-३० ॥

बन्धप्रत्यवायाभावे हि मोक्षस्यार्थवत्त्वम् । अन्यथा मोक्षत्वमेव न स्यात्॥

'कदाचित् कर्म कुर्वन्ति कदाचिन्नैव कुर्वते।
नित्यज्ञानस्वरूपत्वान्नित्यं ध्यायन्ति केशवम्॥
तीर्णतर्तव्यभागा ये प्राप्तानन्दाः परात्मनः।
प्रत्यवायस्य बन्धस्याप्यभावात् स्वेच्छया भवेत्॥'
इति ब्रह्माण्डे[२] ॥ ३० ॥

॥ ॐ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॐ ॥
॥ ३-३-३१ ॥

उपपन्नश्चैवम्भावः। प्राप्तत्वात् तल्लक्षणस्य फलस्य। यथा लोके विध्यर्थत्वेन विष्णुक्रमणादिकं कृत्वा समाप्तकर्मेच्छया करोति न करोति च॥ ३१ ॥

॥ इति छन्दाधिकरणम्॥ १८॥

१. ह. नवेति? आह।　　२. ह. इति हि ब्रह्माण्डे।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र मुक्तानां भगवत्कर्मणि नियमाभावसाधनादस्ति शास्त्रादिसङ्गतिः। अन्यथा कर्मोपासनयोर्नियमे नोपासनस्य प्रागाधिक्यं सिद्ध्येदतोऽसौ वारणीयः । प्रासङ्गिकत्वान्नाध्यायादिसङ्गतिः । विषयसंशयौ दर्शयति- **कर्मेति** ॥ प्रकृता मुक्ता एव विषयः। किमुपासनावन्नियमेन कर्म कुर्वन्ति न वेति सन्देहः। उभयथाऽपि विरोधादर्शनं सन्देहबीजमिति भावः।

पूर्वपक्षः

नियमेन कर्म कुर्वन्तीति पूर्वः पक्षः। कर्मणोऽपि भगवत्पूजारूपत्वात्। तेषां च कर्मकरणशक्तेः सद्भावात्। शक्तिसद्भावेऽपि भगवत्पूजात्मककर्मनियमाभावश्चेदुपासनेऽप्यनियमः स्यादविशेषात्। अतो मुक्तानां कर्मोपासनयोः साम्यात् प्रागपि न कर्मणोऽतिशयेनोपासनं कार्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **आहेति** ॥ न मुक्तानां कर्मणि नियमः। कर्मकरणशक्तावपि स्वेच्छानुसारेण कदाचित् कर्म कुर्वन्ति कदाचिन्न कुर्वन्ति, कुतः? अवश्यकरणे विधिबन्धाभावात्। अकरणे च प्रत्यवायाभावादिति भावः॥ २९ ॥

मुक्तानां विधिबन्धप्रत्यवायाभावशङ्कानिरासपूर्वकं कर्मानियमसमर्थनम्

ननु मुक्तानां विधिबन्धप्रत्यवायाभाव एव कुतः? येन कर्मानियमः स्यादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **गतेरिति** ॥ न मुक्तानां विधिबन्धप्रत्यवायौ विद्येते। विधिबन्धप्रत्यवायाभावेनैव मुक्तेः पुरुषार्थत्वात्। अन्यथा संसारसमानधर्मत्वेन मोक्षत्वविरोधादिति भावः। नच वैलक्षण्यान्तरेण मोक्ष-

त्वोपपत्तिः। संसारसद्भावे तद्वैलक्षण्यस्य व्याहतत्वात्। मुक्तानां कर्मण्यनियमश्चेदुपासनेऽपि तथा स्यादविशेषादित्याशङ्कां परिहर्तुमुक्तार्थे स्मृतिं चाऽह- **कदाचिदिति** ॥ विध्याद्यभावेऽप्यनिष्टनिवृत्त्यर्थमानन्दप्राप्त्यर्थं वा कर्मनियमः किं न स्यादित्यत आह- **तीर्णेति** ॥ ३० ॥

विध्याद्यभावस्य कर्मानियमसम्भावकतैव, नोपपादकता इत्याशङ्कानिरासः

ननु विध्याद्यभावो मुक्तानां कर्मानियमसम्भावनायैव भवति नोपपादनाय। ईश्वरकर्मणि व्यभिचारात्। अतस्तदुपपादकाभावादनुपपन्नोऽसावित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **उपपन्न इति** ॥ कदाचित् कुर्वन्ति न वेत्ययं भावो मुक्तानामुपपन्नश्च। परम्परया कर्मफलस्य मोक्षस्य प्राप्तत्वात्। फलस्य च स्वप्राप्त्यनन्तरं स्वसाधननियमनिवारणलक्षणत्वात्। यथा यागविधिपूर्तिफलसाधनविष्णुक्रमणादिनियमो न पूर्त्यनन्तरमपीति भावः।

इदमुक्तं भवति। मुक्ता न कर्मनियमवन्तः। विशेषहेत्वभावे सति प्राप्ततत्फलत्वाद् यजमानवदिति। अतो मुक्तस्य कर्मनियमाभावात् संसारेऽप्युपासनमाधिक्येन कर्तव्यमिति सिद्धम्॥ ३१ ॥

॥ इति छन्दाधिकरणम्॥ १८ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ छन्दत उभयाविरोधात् ॐ ॥

॥ ३-३-२९ ॥

सङ्गतिः

ननु यदुक्तं मुक्तावुपासनस्यानुवर्तमानत्वात् संसारदशायामत्यादरेण निरुपाधिकमेव तत् कर्तव्यमिति। तन्न। कर्मणोऽपि मुक्तावनुवर्तमानत्वात् तदप्यादरेणैव

कर्तव्यमिति प्राप्त्योपासनस्य[1] कर्मणोऽतिशयाभावप्रसङ्गात्। नचेष्टापत्तिः। उपासनासाध्यज्ञानस्य कर्मतोऽतिशयस्य चतुर्थे वर्णनानुपपत्तेरित्युत्थानात् सङ्गतिः।

विषयसंशयौ

पूर्वाधिकरणे उपासनाकर्तृत्वेन प्रकृता मुक्ता एव विषयः। 'कृष्णो मुक्तैरिज्यते वीतमोहैः' (ब्र.सू.भा. उदाहृतभारतवचनम् ब्र.सू. ३.३.२७) ति वचनाद् यज्ञादिकर्म कुर्वन्तीति तावत् सिद्धमेव। परन्तु नियमेन कुर्वन्ति न वेति सन्देहः।

पूर्वपक्षः

नियमात् कर्म कुर्वन्ति शक्तिमत्त्वात् परं गताः।
अन्यथोपासनमपि न कुर्युरविशेषतः॥

नच मुक्तानां कर्मकरणशक्तिर्नास्तीति वक्तुं शक्यम्। मुक्तत्वव्याघातात्। नच काम्यनित्यनैमित्तिकतर्तव्यतारकाणां कर्मणां बन्धकत्वात् प्रत्यवायापादकत्वात् कारणाभावाच्च सम्भवक्रियात्वान्न मुक्तास्तानि कुर्वन्तीति वाच्यम्। विधिबद्धत्वेन तत्करणे हि बन्धप्रत्यवायाद्यापत्तिर्नतु स्वेच्छयैव करणे। संस्काराख्यकारणसद्भावाच्च। नच संस्कारस्य मनोधर्मत्वान्मुक्तानां च मनसो दग्धत्वात् तदनुपपत्तिरिति वाच्यम्। अचिद्रूपस्य तस्यायोगेऽपि चिद्रूपस्य तस्य युक्तत्वात्। 'आजन्ममरणं स्मृत्वा मुक्ता हर्षमवाप्नुयुः' इत्यादेः स्मृतिप्रयोजकस्य संस्कारस्यावश्याङ्गीकार्यत्वाच्च। नच कर्माणि कुर्वन्तोऽप्युपासनवन्नियमेन [2]कुर्वन्तीत्यत्र विशेषहेतुरस्तीति पूर्वः पक्षः।

सिद्धान्तः

सिद्धान्तस्तु - यथा ह्युपासनायां स्यान्नित्यसंस्कारलक्षणम्।
कारणं न तथाऽत्र स्यात् कर्मणोऽनियतिस्ततः॥

---

१. म. प्राप्योपासनस्य। २. 'न कुर्वन्ति' इति पाठेन भाव्यमिति भाति।

यद्यपि संस्कारमात्रमस्ति। तथाऽपि न तादृशं नियमसाधकम्। किन्तु संस्कारपाटवं ज्ञानस्वरूपत्वं च। नहि तथा संस्कारपाटवमस्ति। यथोपासने श्रवणादि विना क्षणमप्यवस्थाननिषेधस्येव कर्मणा विना तदभावात्। यद्यपि संसारदशायामनवरतश्रवणाद्यनुष्ठानाज्जातः पटुसंस्कारो मुक्तौ नास्ति। तथाऽपि प्रागापादितपटुतरसंस्कारेणैव मुक्तावपि स्वरूपसंस्कारः पटुरेवाभिव्यज्यते उपासनांशे। न तथा कर्मांश इति कारणाभावः सिद्धः। उपासनस्य ज्ञान-स्वरूपत्वान्नियमेन करणं युक्तम्। कर्मणस्तु तदभावात् तद्वैपरीत्यम्। तथाच कर्मोपासनयोर्मुक्तावनुवृत्तिसाम्येऽपि नियत्यनियतिभ्यां विशेषोपपत्तेरुक्तं युक्तमिति।

अद्वैतिविशिष्टाद्वैत्यभिमताधिकरणस्वरूपम्

यच्चोक्तमुभाभ्यां 'साम्पराये' इत्यादि द्विसूत्र्यैकमधिकरणम्। देवयानेन पथा पर्यङ्कस्थं ब्रह्माभिप्रस्थितस्यार्धपथे[१] सुकृतदुष्कृतयोर्वियोगं पर्यङ्कविद्यायां कौषीतकिनः समामनन्ति- 'स एतं देवयानं पन्थानमासाद्याग्निमागच्छति[२]' (कौषीतकी.उ. १.३) इत्युपक्रम्य 'स आगच्छति विरजां नदीं तां मनसैवात्येति तत् सुकृतदुष्कृते विधूनते' (कौषीतकी.उ. १.४) इति। तत्र संशयः। विरजानद्यतिक्रमानन्तरं सुकृतदुष्कृतक्षयः किं वा देहान्निर्याणात् प्रागेवेति।

तच्छब्देन परामृष्टो विरजानद्यतिक्रमः।
तस्मादर्थेन हेतुः स्यात् पुण्यपापविधूनने॥

'तत् सुकृतदुष्कृते' (कौषीतकी.उ. १.४) इति तस्मादित्यर्थकतच्छब्दश्रुतेः प्रकृतस्य विरजानद्यतिक्रमस्य कर्मक्षयं प्रति हेतुत्वमवगम्यते। ताण्डयश्रुतौ तु 'अश्व इव रोमाणि विधूय पापम्' (छा.उ. ८.१३.१) इति विधूननस्य ब्रह्मलोकप्राप्तिप्राक्कालत्वमुक्तम्, नतु देहान्निर्याणात् प्रागेव। तच्चार्धपथे

१. म. व्यध्वनि। २. म. अग्निलोकमागच्छति।

विधूननपक्षेऽप्युपपन्नमिति न तद्विरोधोऽपीत्येवं प्राप्तेऽभिधीयते-

प्रधानां प्रकृतां विद्यां परामृशति तच्छ्रुतिः।
अर्थात् पाठश्च बाध्येत यवागूपाकहोमवत्॥

यमाद्यनुष्ठानसहिताया विद्याया उत्तरेण मार्गेण पर्यङ्कस्थब्रह्मप्राप्त्युपायत्वं कौषीतकिशाखायां श्रूयते। नचाप्रक्षीणपाप्मन उत्तरमार्गप्राप्तिस्तद्वारा ब्रह्मलोक-प्राप्तिश्च सम्भवति। तेन विद्यायाः पापक्षयहेतोरुत्तरमार्गप्रापकत्वे सिद्धेऽर्थ-क्रमान्मार्गमध्ये पठ्यमानोऽपि पापक्षयः 'आसाद्य' इति वाक्यात् पूर्वं द्रष्टव्यः। अन्यथा 'विधूनुते' इत्यनेन स्वतन्त्रपुरुषव्यापाराभिधानात् तस्य च देहं विहाय देवयानेन पथा विरजानदीपर्यन्तं प्राप्ते प्रेतेऽसम्भवात्। नहि प्रेतस्यास्ति स्वातन्त्र्यमित्यत्र प्रामाण्यं स्यादिति सिद्धान्त इति।

तन्निरासः

तन्न। कर्मक्षयस्य मोक्षैकदेशत्वेन तद्विचारस्य तुरीये सङ्गतत्वेऽपीह पादेऽधिकरणेन च सङ्गत्यभावात्। पूर्वत्र विद्यायाः कर्मक्षयहेतुत्वं सिद्धं कृत्वा [१]हानसन्निधावुपायनोपसंहार उक्तः। इदानीं तु तदेवासिद्धं, मार्गमध्ये श्रूयमाणस्य कर्मक्षयस्य विद्याहेतुकत्वाभावादित्याशङ्क्यत इति न पूर्वसङ्गत्यभाव इति चेन्न। कर्मक्षयस्य विद्याहेतुकत्वाभावेऽपि केवलहाने श्रुते उपायनमप्यनुसन्धेयं न वेति चिन्ताया अनुपपत्त्यभावात्। मार्गमध्ये श्रूयमाणस्यापि कर्मक्षयस्य विद्या-जन्यत्वसम्भवाच्च। नहि व्यवधानेन कार्यं कुर्वदकारणं भवति। 'तत् सुकृतदुष्कृते विधूनते' (कौषीतकी.उ. १.४.) इत्यस्य तस्माद् विरजानद्यतिक्रमात् सुकृतदुष्कृते जहातीत्यर्थाङ्गीकारेण विरजानद्यतिक्रमजन्यत्वमेव कर्मक्षयस्य प्रतीयत इति चेन्न। ततः तदनन्तरमित्यर्थोपपत्तेः। नच कारणानन्तर्योक्ति-

१. म. हानिसन्निधौ।

वैयर्थ्यम्। विद्याजन्यानां कार्याणां क्रमप्रतिपादने तात्पर्यसम्भवात्। 'स्वोदयात् फलदं ज्ञानम्' इति न्यायेन विद्या स्वयमुत्पन्ना यावत् पर्यङ्कस्थब्रह्म-प्राप्तिकार्यजातमान्तरालिकं तावदपि जनयतीत्यङ्गीकारात् । नहि 'एह्येहीति तमाहुतयः सूर्यस्य रश्मिभिर्यजमानं वहन्ति' इत्यादिना सूर्यरश्मिप्रवेशादि-कार्यजातं मध्ये श्रूयत इत्येतावता स्थानविशेषप्राप्तिः, तत्र वनितादिसम्भोगो वाऽऽहुतेः कार्यं नाभ्युपगम्यते। तस्माच्छङ्कैवानुपपन्ना।

तत्कृतपरिहारस्य असामञ्जस्योपपादनम्

परिहारश्चायुक्तः। विनाऽपि कर्मक्षयमुत्तरायणमार्गगमनसम्भवात्। अन्यथा प्रागेव सुकृतस्यापि प्रक्षीणत्वात् तत्साध्याग्निलोकविरजानदीप्राप्त्यादि न स्यात्। नच तत् कर्मायोग्यमिति वाच्यम्।

'प्रारब्धकर्मशेषस्तु विरजातरणावधिः'

इति वचनविरोधात्। [१]विद्यायाः पुण्यपापविधूननं न सर्वात्मनाऽप्येकदैव। किन्तु क्रमेण, अतो न विरोध इति चेन्न। तर्हि तत एवाक्षीणकर्मणोऽप्युत्त-रायणमार्गः सम्भवतीति किमनुपपन्नम्। प्रारब्धेतरपुण्यपापयोरुत्तरायणादि-प्राप्तिप्रतिबन्धकताश्रयणाददोष इति चेन्न। 'दृष्टो हि लोके चिरगते पुंसि गत एव भवान्न पुनरावर्तते' इत्यादिप्रतिषेधाधिकरणभाष्यरीत्या[२] त्वन्मतेऽर्चिरादिप्राप्तेरपि पुनरावृत्तिमत्त्वेन स्वर्गादिप्राप्तिवदप्रारब्धप्रतिबध्यताया अयोगात्। स्पष्टयिष्यते चायमर्थश्चतुर्थे।

किञ्च 'यवागूं पचति', 'अग्निहोत्रं जुहोति' इत्यनयोः पाठक्रमभेदेनार्थानु-सारेण यवागूपाकहोमयोः पूर्वतन्त्रे व्यवस्थोक्तेतीह पुनस्तन्निरूपणेऽवश्य-वक्तव्यार्थत्वाभावेन सूत्रत्वव्याघातः। 'तत् सुकृतदुष्कृते विधूनुते' (कौषीतकी.उ.

१. म. विद्यया। २. इदं भाष्यवाक्यं मृग्यम्।

१.४.)इति तस्मादित्यर्थकेन तच्छब्देन विरजानद्यतिक्रमानन्तरभावित्वावगमात्र पाठक्रममात्रेणाऽऽक्षेपः, येन यवागून्यायेन गतार्थता स्यादिति चेन्न। 'सुकृतदुष्कृते विधूनुते' (कौषीतकी.उ. १.३.) इत्यर्थप्रत्यायनसम्भवेन तस्मादित्यर्थ-कत्वायोगादित्युक्तत्वात् अभ्यधिकशङ्काया अभावात्। भावे वा परिहर्तु-मशक्यत्वात्। नच नद्यतिक्रमस्याप्राधान्यमात्रेण प्रकृतत्वेऽप्यपरामर्शः शक्यते वक्तुम्। जगतोऽप्रधानत्वेऽपीदंशब्देन 'जन्माद्यस्य' (ब्र.सू. १.१.२) इत्यत्र परामर्शदर्शनात्।

यदा च, शब्दतो प्रकृतस्याप्रधानस्यापि जगतः कथञ्चिद् बुद्धौ प्रकृतत्वमापाद्य प्रकृतपरामर्शिनिदंशब्देन परामर्शमनुमन्यामहे तदेहापि शब्दत एव साक्षात् प्रकृतस्य नद्यतिक्रमस्य तच्छब्देन परामर्शं कुतो न मन्यामहे ?

साम्परायेत्यादिसूत्रद्वयस्य अद्वैत्यभिमतार्थनिरासः

एतेन, साम्पराये, गमनवत् सुकृतदुष्कृतहानं भवतीति शेषः, तर्तव्याभावात् सम्परेतस्य विद्यया ब्रह्म [१]सम्प्रेप्सतोऽन्तरा सुकृतदुष्कृताभ्यां कस्यचित् प्राप्तव्यस्य प्रयोजनस्याभावात्। अन्ये शाखिनस्ताण्डिनः निर्याणात् प्रागेव 'अश्व इव रोमाणि विधूय पापम्' (छा.उ. ८.१३.१) इत्यादिना सुकृतदुष्कृतहान-मुपयन्तीति[२] सूत्रव्याख्यानं निरस्तम्। अपदार्थत्वात्। उक्तरीत्या विरजा-तरणादेरान्तरालिकस्य प्रयोजनस्य सत्त्वाद्धेत्वसिद्धेश्च। 'विधूय पापम्' (छा.उ. ८.१३.१)इत्यत्र सर्वात्मना पापविधूननस्यानभिप्रेतत्वात् समाख्याऽसिद्धेश्च।

'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यते' (छा.उ. ६.१४.२) 'अशरीरं वाव सन्तं न प्रियाप्रिये उपस्पृशतः' (छा.उ. ८.१२.१) इति देहयोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण तरितव्यभोगाभावमन्ये शाखिन अधीयत इति

१. म. सम्प्रेप्सोः। २. '....हानमामनन्ति' इति पाठः साधुरिति भाति।

सूत्रखण्डस्य केषाञ्चिदर्थान्तरकथनं चायुक्तम्। आद्यश्रुतेः कर्मक्षयविषयत्वाद् द्वितीयायाश्च भग्नलिङ्गविषयत्वात्। यतो देहवियोगात् पूर्वमेव यमनियम-विद्याभ्यासात्मकस्य पुरुषप्रयत्नस्य छन्दतः इच्छातः अनुष्ठानं सम्भावितम्। कुतः? उभयाविरोधात्। निमित्तनैमित्तिकयोः छन्दतो यमाद्यनुष्ठानकर्मक्षययोरुभयोरुपपत्तिर्भवति। अन्यथा तयोरुभयोर्निमित्तनैमित्तकभावविरोधः। यद्वा, उभयोस्ताण्डिशाट्यायन[१]श्रुत्योरविरोधः। अन्यथा तयोर्विरोध इति द्वितीयव्याख्यानमयुक्तम्। पूर्वसूत्रसङ्गत्यदर्शनात्। दूषणान्तरमनेनोच्यत इति चेन्न। चशब्दाद्यभावात्। पूर्वसूत्रे विरजानदीतरणपर्यन्तं कर्मावस्थाने साधकाभावमुक्त्वा बाधकाभाव अनेनोच्यत इति चेन्न। बाधकस्यानुपलम्भात्। तावत्पर्यन्तं स्थितस्य कर्मण क्षयहेतुर्नास्तीति चेन्न। तद्धेतुत्वेन त्वदभिमतस्य पुरुषप्रयत्नस्य सत्त्वात्। नच देहाभावात् तदनुपपत्तिरिति वाच्यम्। अग्निलोकादि-गन्तृदिव्यदेहाङ्गीकारात्। अन्यथा 'समागच्छति[२] विरजानदीम्' (कौषीतकी.उ. १.४.) इति श्रुतिरनुपपन्ना स्यात्। नहि शरीरं विना गमनं युज्यते। अस्तु वा तदा शरीराभावः। तथाऽपि विद्यासामर्थ्यादेव कर्मक्षयोपपत्तेः।

छन्दत इति सूत्रस्य रामानुजाभिमतार्थनिरासः

एतेन 'तत् सुकृतदुष्कृते विधूनुते' (कौ.उ. १.४.) इति वाक्यखण्डः 'अश्व इव रोमाणि विधूय पापं धूत्वा शरीरम्' (छा.उ. ८.१३.१), 'तस्य तावदेव चिरम्' (छा.उ. ६.१४.२) इत्युभयश्रुत्यविरोधाय छन्दतो नेयः 'एतं देवयानं[३] पन्थानमासाद्य' (कौ.उ. १.३) इति श्रुतिखण्डात् प्रागनुगमयितव्य इत्यर्थ इति केषाञ्चिद् व्याख्यानं निरस्तम्। 'तत्सुकृतदुष्कृते' इत्यादेः श्रुतिखण्डस्य स्वस्थानादुत्कृष्टस्य यत्र कुत्रचिदनियमादपकर्षः उत

---

१. म. शाक्यायन २. म.'स आगच्छति। ३. म. एतद्देवयानम्।

स्थलविशेषनियमः। आद्ये 'अग्निलोकमागच्छति' (कौ.उ. १.३.) इत्यस्मात् प्रागपि सः स्यात्। न द्वितीयः। छन्दत इति विरोधात्। नहि नियमे ऐच्छिकोऽपकर्षः सम्भवतीति ज्ञानदरिद्राणां व्याख्यानमनादरणीयमेव।

गतेरर्थवत्त्वमित्यादिसूत्रद्वयमेकमधिकरणमिति वादिनामद्वैतिनामाशयः

गतेरर्थवत्त्वमित्यादिसूत्रद्वयं द्वितीयमधिकरणम्। क्वचित् पर्यङ्कविद्यादौ पुण्यपापहानसन्निधौ देवयानः पन्थाः श्रूयते। क्वचिन्निर्गुणविद्यायां 'पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' (मुण्ड.उ. ३.१.३) इति देवयानः पन्था न श्रूयते। तत्र संशयः- किं सर्वत्र देवयानः सन्निपतेन्न वेति।

विमतो गतिमान् विद्वत्पुण्यपापक्षयत्वतः।
पर्यङ्कब्रह्मविद्यास्थपुण्यपापक्षयो यथा॥

नच 'निरञ्जनः परमं साम्यमुपैति' (मुण्ड.उ. ३.१.३) इत्यनेन विरोधः। पुण्यपापक्षयानन्तरं देवयानेन पथा ब्रह्मलोकप्राप्त्या निरञ्जनस्यापि परम-साम्योपपत्तेरिति प्राप्तेऽभिधीयते -

बोधादबोधे विध्वस्ते सिद्धब्रह्मत्वलाभतः।
बोधस्य चेह निष्पत्तेर्ब्रह्मलोकगतिर्वृथा॥

ब्रह्मप्राप्त्यर्थं वा ब्रह्मलोकगतिः ब्रह्मविद्यार्थं वा। नाऽद्यः। अज्ञातब्रह्मभावस्य ज्ञानादज्ञानहानादिहैव प्राप्तेः। न द्वितीयः। यमनियमादिमतः श्रवणादिभिरिहैव ज्ञानोत्पत्तेरिति।

तन्निरासः

तन्न। सङ्गत्यभावात्। विद्योदयसमनन्तरक्षण एव कर्महानमिति प्रसङ्गादागतं निरूप्य गुणोपसंहारानुपसंहारचिन्तैवात्र क्रियत इति चेन्न। देवयानस्य

ब्रह्मगुणत्वाभावेन तदयोगात्। मार्गस्य देवयानो गुण इति चेत्। किं तावताऽपि? मार्गोऽपि ब्रह्मवच्चिन्तनीय एवेति चेत्। न। सगुणविद्यायां तथात्वेऽपि निर्गुण-विद्यायां तदयोगात्।

अस्तु वा कथञ्चित् पादसङ्गतिः। तथाऽपि नाधिकरणसङ्गतिर्लभ्यते। 'हानौ तु' (ब्र.सू. ३.३.२७) इत्यधिकरणे कचिद्धानसन्निधौ उक्तमुपायनं केवल-हानश्रवणेऽप्युपसंहर्तव्यमित्युक्तम्। एवं तर्हि कचित् पुण्यपापहानसन्निधावुक्ता गतिः केवलपुण्यपापहानश्रवणेऽप्युपसंहर्तव्येत्याशङ्क्यात्रापोद्यत इति चेन्न। किमनयोः सगुणनिर्गुणविद्ययोरैक्यमङ्गीकृत्य शङ्क्यते अनङ्गीकृत्यैव? नाऽद्यः। परस्परगुणोपसंहारमन्तरेणैक्यस्यैवायोगेन शङ्काया अपरिहार्यत्वप्रसङ्गात्। सगुणत्वनिर्गुणत्वव्यवस्थाव्याघाताच्च। न द्वितीयः। ओङ्कारोद्गीथविद्ययोरुक्त-गुणानां परस्परानुपसंहारस्य 'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३-३-७) इत्यादावेव सिद्धतया पुनरिह शङ्कानुदयात्। तदुदये वा परिहर्तु-मशक्यत्वात्। निर्गुणविद्यायां प्रयोजनाभावात्। ब्रह्मलोकगतिर्नोपसंहर्तव्या इत्यस्ति परिहार इति चेन्न। केवलहानश्रवणे उपायनोपसंहारस्यापि प्रयोजनाभावेन कर्तव्यतापातात्। तत्र ब्रह्मप्राप्तेः फलत्वेऽन्यत्रापि तथात्वोपपत्तेश्चाज्ञातब्रह्म-भावस्य ज्ञानादज्ञाननिवृत्तौ ब्रह्मप्राप्तेः स्वतःसिद्धत्वेन तत्फलत्वायोग इति चेन्न। यस्मात् कस्माचिद् ज्ञानादज्ञाननिवृत्तावतिप्रसङ्गात्। विवक्षितब्रह्मज्ञाना-देव तद्धानेर्वक्तव्यतयोपसंहृतब्रह्मलोकगतिकनिर्गुणविद्याजनितज्ञानादेव तद्धानिरिति स्वीकारेण तद्द्वारा ब्रह्मप्राप्तेरेव फलत्वोपपत्तेश्च। अन्यथा सगुणविद्याजनितज्ञानादप्यज्ञानहानादिहैव ब्रह्मप्राप्तेः श्रवणादिभिश्चेहैव विद्योत्पत्तेः ब्रह्मप्राप्त्यर्थं ब्रह्मविद्याप्राप्त्यर्थं वा गतेरनपेक्षणात् सगुणविद्यायामपि तच्छ्रवणं व्यर्थं स्यात्।

किञ्च ज्ञानमुत्पन्नमपि देशकालादिकमपेक्ष्यैव ब्रह्मप्रापकं ज्योतिष्टोमादि-

वदेव। ततश्च निर्गुणविद्याजनितमपि ज्ञानं ब्रह्मलोकगत्यादिकमपेक्ष्यैव ब्रह्मप्रापकं स्यादिति कथं गतेर्निष्फलत्वम्।

एतदुपरि वाचस्पत्युक्ताक्षेपः तत्परिहारश्च

यदत्रोक्तं वाचस्पतिना - 'भ्रमनिबन्धनो ह्यक्षेमः याथात्म्यज्ञानलक्षणया विद्यया निवर्तनीयः। नासौ देशविशेषमपेक्षते। नहि जातु रज्जौ सर्पभ्रमनिवृत्तये समुत्पन्नं रज्जुतत्त्वज्ञानं देशविशेषमपेक्षते। विद्योत्पादस्यैव स्वविरोध्यविद्या-निवृत्तिरूपत्वात्' इति। तन्न। कर्मबन्धादिरूपस्याक्षेमस्याज्ञानात्मकत्वाभावेन ज्ञानेनाज्ञाननिवृत्तौ देशविशेषानपेक्षणेऽप्यक्षेमनिवृत्तौ तदपेक्षणावश्यम्भा-वात्। अन्यथा प्रारब्धकार्यकर्मक्षपणाय शरीरपाताद्यवध्यपेक्षा जीवन्मुक्त्यवस्था च न स्यात्।

'गतेरर्थवत्त्वम्' इति सूत्रस्य पराभिमतार्थनिरासः

एतेन गतेर्देवयानस्य पथः कचिदर्थवान् कचिन्नेत्युभयथा विभागेनैवार्थवत्त्वं, नत्वविशेषेण सर्वत्रार्थवत्त्वम्; अन्यथा हि 'पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' (मुण्ड.उ. ३.१.३) इति श्रुतिविरोधः- इति सूत्रव्याख्यानं निरस्तम्। गतिशब्दस्य देवयानेऽव्युत्पन्नत्वात्। कचिदेवार्थवत्त्वमित्यस्योभयथा अर्थवत्त्वमित्यनेनालाभात्। प्रत्युतोभयत्रापि प्रयोजनवत्त्वमिति विरुद्धार्थस्य लाभाच्च। 'पुण्यपापे विधूय निरञ्जनः' (मुण्ड.उ. ३.१.३)इति वाक्येऽग्न्यादि-लोकगतिप्रणाडीनिषेधासम्भवेन विरोधाभावाच्च। अन्यथा 'आत्मन आकाशः सम्भूतः' (तै.उ. २.१.१), 'तेजोऽसृजत' (छा.उ. ६.२.३) इत्यनयोरपि विरोधापातात्।

'गतेरर्थवत्त्वम्' इति सूत्रस्य केचित्तुकाराभिमतार्थः

केचित्तु, पूर्वसूत्रोक्तं- कर्मक्षयः शरीरपातात् प्रागेव। नतु तदनन्तरमर्धेऽध्वनि

इति प्रमेयं नोपपद्यते । किन्तु गतेः गतिप्रतिपादकदेवयानश्रुतेः अर्थवत्त्वम् उपपन्नत्वम् उभयथा देहयोगकालेऽध्वनि च कर्मक्षयो भवतीत्यङ्गीकार एव । अन्यथा प्रागेव सर्वकर्मक्षयेऽङ्गीक्रियमाणे देहयोगकाले सर्वकर्मक्षये सति सूक्ष्मशरीरस्याप्यारम्भकनाशेन स्थित्यनुपपत्तेर्विरोध एवेति पूर्वाक्षेपपरतया व्याचख्युः ।

तन्निरासः

तन्न। अनेकपदलक्षणादोषात्। अधिकरणान्तरत्वेन सिद्धान्तसूत्रत्वे सम्भवति पूर्वोक्ताक्षेपपरत्वायोगाच्च। पर्यङ्कविद्यायामप्येवं गतेरर्थवत्त्वं न स्यादिति प्रतिबन्दीं मोचयति। तल्लक्षणस्य गतिकारणस्य पर्यङ्कारोहणपर्यङ्कस्थब्रह्मसंवादनविशिष्ट-गन्धादिरूपार्थस्य सगुणोपासनेषूपलब्धेः । उपपन्नश्चायमुभयथाभावः लोक-वत्। यथा लोके ग्रामप्राप्तौ देशान्तरप्रापणः[१] पन्था अपेक्ष्यते, नाऽरोग्यप्राप्तौ इति द्वितीयस्य व्याख्यानं चायुक्तम्। आरोग्यप्राप्तौ......[२] मूलिकाद्याहरणार्थं देशान्तरप्रापणः पन्था अपेक्षित एवेति वैषम्यानुपलम्भात्।

किञ्च सगुणोपासनमपि सम्यग्दर्शनसाधनं न वा। आद्ये आत्मैकत्व-दर्शनरूपसम्यग्ज्ञानमाप्तानामाप्तकामाना[३]मिहैव दग्धाशेषक्लेशबीजाना-मनारब्धभोगकर्माशयक्षपणव्यतिरेकेणापेक्षितव्यस्य पर्यङ्कविद्यादिष्वप्य-नुपलम्भात्। अन्यथा निर्गुणोपासनाजन्यसम्यग्ज्ञानानामपि तत् स्यात्। यत्तु पर्यङ्कारोहणादि तत्तु न गतेः फलम्। किन्तु प्ररोचनमात्रमित्युपपत्तेः। नान्त्यः। तज्जनितज्ञानेन कर्मक्षयाभावप्रसङ्गात् । नहि मिथ्याज्ञानं कर्माणि क्षपयतीति युक्तम्।

किञ्चेयं सगुणविद्या नासौ इति निर्णेतुमशक्यम्। कर्मक्षयादेरुभयत्र श्रव-

१. म. देशान्तरगतः। २. अत्र पत्रं त्रुटितम्।
३. म. अत्र 'इव' इत्यधिकः पाठः ।

णाद्। भोगादेश्च 'परमं साम्यमुपैति' (मुण्ड.उ. ३.१.३) इति निर्गुण-विद्यायामपि श्रवणात् । अन्यथा ब्रह्मसाम्यानुपपत्तेः । नच निर्भोगं ब्रह्मेति युक्तम्। तत्साम्यप्राप्तेरपुरुषार्थतापातात्।

'उपपन्नः' इति सूत्रस्य रामानुजाभिमतार्थनिरासः

केचित्तु, सूक्ष्मशरीरस्यापि स्थित्यनुपपत्तेः देवयानगतिश्रुतिरनुपपन्नेत्येतच्छङ्का समाधीयते। सर्वकर्मक्षयेऽप्युपपन्नो देवयानस्तल्लक्षणस्य तज्जातीयस्य कर्मलभ्यस्य देहरूपस्यार्थस्योपलब्धेः। 'स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति' (छा.उ. ७.२५.२) इत्यादिश्रुतिषु दर्शनात्। लोकवत्। यथा लोके राजान-मुपासीनानामतिरमणीयानेकार्थसंसिद्धिरित्यर्थ इत्याहुः। तदपि न। 'प्रारब्ध-कर्मशेषस्तु विरजातरणावधिः' इति ततः प्राक् सर्वकर्मक्षयस्यैवा-भावोक्तेर्देवयानगमनकालीनशरीरस्याकर्मलभ्यत्वेन तत्त्यागानुपपत्तेः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - अधिकरणप्रतिपाद्यमाह- **कर्मणि नियमाभावेति॥** यद्यपि मुक्तानां भगवदुपासने नियमसमर्थनमिह युक्तं प्रतिभाति । पादसङ्गतिश्च भविष्यति। ततः कुतः प्रासङ्गिकत्वमाश्रयणीयम्? तथाऽपि कर्मणि तादृशनियमः किं न स्यादिति शङ्कायाः परिहर्ता नोपलभ्यते । कुशाच्छन्दस्तुत्युपगान-शब्दसन्निधापितं कर्मात्र सूत्रे विशेषतः कर्मत्वेनान्वेति इति चेतसि कृत्वा 'कर्मापि कुर्वन्ति न वेत्यत आह' इति भाष्ये कर्मण एव विषयत्वप्रतीतेश्च प्रासङ्गिकत्वं युक्तमिति भावः। 'कर्मापि कुर्वन्ति न वा' इति भाष्यं संशयप्रदर्शकत्वसिद्ध्यर्थं नियमेनेत्यध्याहृत्य योज्यमिति मन्वानो व्याचष्टे- **विषयसंशयौ दर्शयतीत्या-दिना॥** अधिकरणतात्पर्यमनेनोच्यत इति केचित्।

अदूरसंश्रयन्यायस्य व्याख्यानम्

अदूरसंश्रयन्यायमदूरपदं भावप्रधानं, बुद्ध्या विवेकेन हेतुसमर्पकम्। संश्रयपदं

च तन्नियमोपलक्षकम् । प्रकृतत्वात् कर्मैव संश्रयसम्बन्धीत्यदूरत्वसम्बन्धि-प्रदर्शन- पूर्वकं विवृण्वत् 'नच कर्मकरणशक्तेरप्यदूरत्वात् तत्संश्रयनियमः' (न्या.वि.) इति वाक्यं व्युत्क्रमेण व्याचष्टे- **नियमेन कर्म कुर्वन्तीति** ॥ 'कर्म-करणशक्तेरदूरत्वात्' इत्यंशं व्याख्यातुं शक्तिसद्भावस्यातिप्रसङ्गित्वान्मध्येऽ-ध्याहार्यं प्रमेयमाह- **कर्मणोऽपि भगवत्पूजारूपत्वादिति** ॥ अपिशब्दस्वारस्यं व्यञ्जयन् सङ्गतिं सूचयति- **शक्तिसद्भावेऽपीति** ॥ तथाच कर्मकरणशक्तेरदूर-त्वात् सद्भावादिति यावत् । तत्संश्रयनियमः कर्मकरणनियमः इति विवरणं व्याख्यातम् ।

कार्यवैशेष्यन्यायस्य व्याख्यानम्

कार्यवैशेष्यन्यायं कार्यविषये संस्कारस्य वैशेष्यमिति विग्रहेण विवृण्वत् 'उपासनाख्यकार्ये नित्यकृतिसंस्कारो न तथा कर्मणीति कार्यवैशेष्यात्' (न्या.वि.) इति वाक्यं संस्कारपाटवाख्यवैशेष्यप्रतिपादकं ज्ञानस्वरूपत्वादिति वैशेष्यान्तरस्योपलक्षकमिति ब्रह्माण्डवचनमुदाहरता भाष्यकृतैव विवृतमिति मन्वानस्तद्वचनोदाहरणमवतारयति- **मुक्तानां कर्मण्यनियमश्चेदिति** ॥ **स्मृतिं चाऽहेति** ॥ विवरणोक्तं संस्कारपाटवं च समुच्चिनोति । तथाच यथोपासनाख्यकार्ये विषये नित्यकृतिसंस्कारः नियमेनानुष्ठानजन्यः संस्कारः मुक्तावस्ति न तथा कर्मविषयेऽस्तीति कार्ये संस्कारस्य वैशेष्यादिति व्याख्यानं सूचितम् । स्वेच्छयैव करोतीत्युक्त्या कर्मकरणशक्तिरस्तीति सूचितम् । 'उपपन्नस्तल्लक्षण' इति तृतीये उपपन्नपदेन कार्यवैशेष्यमपि सूचितमिति युक्तस्तयोर्न्यायमालायां सङ्ग्रहः ।

सङ्क्षेपभाष्ये एतदधिकरणतात्पर्यनिरूपणम्

एतदधिकरणतात्पर्यमप्युवाच सङ्ग्रहकृत् - **विशेषस्तु ज्ञाने स्यादिति** ॥ ज्ञानात्मके उपासने संस्कारपाटवाख्यो विशेषोऽस्ति । तुरवधारणे । न तथा कर्मणीत्यर्थ इति योजनीयम् ।

सूत्रार्थः

सूत्रार्थस्तु - कर्मापि कुर्वन्ति न वेत्यध्याहारः । विरुद्ध्यते भावेनेति विरोधोऽभावः । **अविरोधो** भावः । 'मातरि वर्तितव्यम्', 'पितरि वर्तितव्यम्' इत्यादाविव स्वेति लभ्यते । उभयेति तन्त्रम् । **स्वच्छन्दतः** स्वेच्छयैव मुक्ताः कर्म कुर्वन्ति न वा । उभयस्मिन्नपि पक्षे उभययोर्बन्धप्रत्यवाययोरभावात् । **उभयथा** बन्धाभावप्रत्यवायाभावरूपोभयवत्त्वेऽङ्गीकृत एव **गतेः** मुक्तेः **अर्थवत्त्वं** स्वार्थे मतुप् । अर्थशब्दो भावप्रधानः । पुरुषार्थत्वं भवेत् । **अन्यथा** तदनङ्गीकारे **विरोधः** मोक्षत्वविरोधः । पुरुषार्थत्वाभाव आपद्येत । विशेषबलादर्थस्याप्यर्थ-वत्त्वमप्यस्तीति सूचनाय वक्रोक्तिरुपपन्ना । मुक्तानां कर्मविकल्प इति शेषः । युक्त एव **तल्लक्षणस्य** स्वोत्पत्त्यनन्तरं स्वसाधननियमनिवारणस्वभावस्या**र्थस्य** परम्परया कर्मफलस्य मोक्षस्य **उपलब्धेः** प्राप्तत्वात् । **लोकवत्** षष्ठ्यर्थे वतिः, विष्णुक्रमणादेरिव । यद्यपि सोऽप्यलौकिक एव । तथाऽपि प्रत्यक्षसिद्धत्वात् तथोक्तिरिति ज्ञातव्यम् । प्रथमे सम्भावकोक्तिः । द्वितीयेऽसिद्ध्युद्धारः । तृतीये निश्चायकोक्तिरिति सूत्रक्रमोऽपि टीकायां व्यक्तः ।

॥ इति छन्दाधिकरणम् ॥ १८ ॥

॥ अथ अनियमाधिकरणम् ॥ १९ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्याम् ॐ ॥
॥ ३-३-३२ ॥

प्राप्तज्ञानानामपि केषाञ्चिन्मुक्तिप्राप्तिः, केषाञ्चिन्न, यथोपसंहारनियम इति न मन्तव्यम्।

'सर्वे गुणा ब्रह्मणैव ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैः' इत्युपसंहारे विरोधादन्यत्राविरोधात्[१]। 'न कश्चिद् ब्रह्मवित् सृतिमनुभवति मुक्तो ह्येव भवति तस्मादाहुः सृतिहेति' इति कौण्डिन्यश्रुतेश्च। यथा केषाञ्चिन्मोक्ष एवमन्येषामित्यनुमानाच्च॥ ३२॥

॥ इत्यनियमाधिकरणम् ॥ १९ ॥

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्रेश्वरदर्शनसाधनोपास्तिमतामुत्पन्नज्ञानानां मोक्षनियमसाधनादस्ति शास्त्रादिसङ्गतिः। अन्यथोपासने निःशङ्कप्रवृत्त्यभावप्रसङ्गात् समर्थनीयः। प्रकृतो मोक्ष एव विषयः। किमनियमेन सर्वज्ञानिप्राप्य उत केषाञ्चिदस्ति केषाञ्चिन्नेति सन्देहः। फलद्वैविध्यदर्शनं सन्देहबीजम्।

पूर्वपक्षः

नियम इति पूर्वः पक्षः। ज्ञानिष्वपि केषाञ्चिन्मुक्त्ययोग्यत्वसम्भवात्।

१. ह्. उपसंहारविरोधादत्राविरोधात्।

अयोग्यानां तत्प्राप्त्ययोगात्। यथा खलूपासकेष्वपि योग्यानामेव सर्वगुणोपसंहारो नायोग्यानामिति नियमः। अतः सर्वेषां ज्ञानिनां मोक्षाभावान्न निःशङ्कोपासनं कर्तव्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **अनियम इति**॥ प्राप्तज्ञानानामपि केषाञ्चिन्मोक्षः, केषाञ्चिन्नेत्युपासनवन्नियमो नास्ति। किन्तु सर्वेषामपि प्राप्तज्ञानानामस्ति मोक्षः। उपसंहारे निषेधेन नियमोपपत्तेः। अत्र पुनस्तदभावेन नियमायोगादिति भावः। निषेधाभावेऽपि साधकाभावान्नियम एवेत्यत आह- **नेति**॥ विप्रतिपन्ना ज्ञानिनो नियतमोक्षाः। ज्ञानित्वात्। सम्प्रतिपन्नवत् इति भावः। नचैतदुपसंहारानुमानसमानयोगक्षेममिति वाच्यम्। बाधकशून्यत्वाच्छ्रुतिमूलत्वाच्च। नच केषाञ्चिन्मुक्त्ययोग्यत्वसम्भवान्नियम इति युक्तम्। साधकबाधकभावाभावाभ्यां ज्ञानिनां कस्यापि मोक्षायोग्यताभावावगमात्। अतो ज्ञानिनां मोक्षस्य नियतत्वान्निःशङ्कमुपासनं कर्तव्यमिति सिद्धम्॥ ३२॥

॥ इत्यनियमाधिकरणम् ॥ १९ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ अनियमः सर्वेषामविरोधाच्छब्दानुमानाभ्याम् ॐ ॥
॥ ३-३-३२ ॥

अनन्तरसङ्गतिः

अत्र पूर्वाधिकरणोक्तनियमाभावस्यापवादनात्, पूर्वाधिकरणोक्ताविरोधन्यायस्यैवातिदेशनाद्, यथा कार्यवैशेष्यादनियमस्तथा योग्यताख्यकारणवैशेष्यादनियमोऽपि स्यादिति वा पूर्वन्यायोपजीवनेन प्रवर्तनादनन्तरसङ्गतिः।

अत्राऽद्या 'उत्पन्नज्ञानानां मोक्षनियमसाधनात्' इत्यत्रत्यटीकया सूचिता। द्वितीया तु सूत्रेणाविरोधपदेन सूचिता। तृतीया तु न्यायविवरणोक्ता ज्ञातव्या। अत्रापि ज्ञानिनां मोक्षनियमसाधनात् प्रासङ्गिकत्वं यद्यपि वक्तुं युक्तम्। तथाऽपि साक्षात् सङ्गतिसम्भवे तत्त्यागायोगेन 'यथोपसंहारनियमः' इति भाष्येऽध्याय-पादसङ्गत्योः सूचनाच्च न दोषः।

सन्देहः पूर्वपक्षश्च

'गतेरर्थवत्त्वम्' (ब्र.सू. ३.३.३०) इति सूत्रे गतिशब्दोक्तो मोक्षो ज्ञानिनां केषाञ्चिदेव भवति केषाञ्चिन्न भवतीति नियम उतानियम इति सन्देहे, पूर्वत्र भगवत्कर्मणि संस्कारस्य वैशेष्यात् क्रियत एवेत्येवंरूपो नियमो नाङ्गीक्रियते, यदि, तर्हि तैनैव न्यायेन योग्यताख्यकारणवैशेष्यात् केषाञ्चिदेव मुक्तिर्नान्येषा-मिति नियमोऽपि स्यात्। यदि विशेषहेतुस्तद्भावप्रयोजकस्तर्हि पूर्वोक्तोऽप्यनियमो भज्येत। नचानियमेऽविरोधादेवानियमः सेत्स्यतीति वाच्यम्। बाधकाभाव-मात्रस्यार्थसाधकत्वाभावात्। मुक्तेः पुरुषार्थत्वान्यथानुपपत्तिप्राप्तफलवत्त्वा-न्यथानुपपत्त्यादिवदिह साधकप्रमाणादर्शनात्। तथाच ज्ञानिनामपि मध्ये केषाञ्चिन्मोक्षानिच्छातो मोक्षाभावोपपत्तिः। 'कामं भवेम वृजिनैर्निरयेषु नष्टाश्चेतोऽलिवद् यदिह ते पदयो रमेत' (भागवतम्) इत्यादिना मोक्षानिच्छू-नामपि प्रमितत्वात्। नच ज्ञानरूपसाधनसद्भावादनिच्छतोऽपि मोक्षो भव-त्येवेति वाच्यम्। अयोग्यत्वात्। नह्ययोग्यं साधनशतेनापि प्राप्यं भवति। यदि ह्ययोग्यानामपि फलप्राप्तिस्तर्ह्ययोग्यानां चतुर्मुखेतरेषां सर्वोपसंहारोऽपि स्यात्। तथाच 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०) इत्यत्रोक्तव्यवस्थाभङ्गः।

मुक्तानां कर्मणि यथा विशेषाद्धेतुतो भवेत्।
नियमाभाव एवं स्यान्मोक्षेऽपि नियमस्ततः॥

इति पूर्वः पक्षः।

सिद्धान्तः

न कश्चिद् ब्रह्मविद् दुःखमिति वाक्यात् तथाऽन्यतः।
नियमो नास्ति विदुषां मोक्षे बाधाद्यभावतः॥

इति सिद्धान्तः।

परमतीयाधिकरणानुवादः

अत्रान्यैरुक्तमधिकरणम्- सगुणासु विद्यासु गतिरर्थवती, न निर्गुणायां परमात्मविद्यायामित्युक्तम्। सगुणास्वपि विद्यासु पर्यङ्कोपकोसलपञ्चाग्नि-दहरविद्याख्यास्वर्चिरादिगतिः श्रूयते। नान्यासु मधुशाण्डिल्यषोडशकल-वैश्वानराख्यासु विद्यासु। तत्र संशयः। किं यत्र श्रुता गतिस्तत्रैव व्यवतिष्ठत उत सर्वसगुणविद्यासाधारणेति। तत्र -

प्रक्रियातो नियम्येत मार्गोऽतो व्यवतिष्ठते।
सर्वत्र च पथःप्राप्तौ द्विराम्नानमनर्थकम्॥

प्रकरणस्य धर्मानियामकत्वे दर्शपूर्णमासज्योतिष्टोमधर्माणामन्योन्यत्र सङ्करप्रसङ्गः। एकत्र श्रुतस्य च पथः सर्वत्र प्राप्तावेकस्यां शाखायां पञ्चाग्नि-विद्यायामुपकोसलविद्यायां च सम्पूर्णगतिमार्गो[1] नाभ्यस्येतेति प्राप्तेऽभिधीयते-

वाक्यात् प्रकरणं बाध्यमबाध्यं च नियामकम्।
मार्गाभ्यासोऽनुचिन्तार्थो विद्ययोरुभयोरपि॥

असति विरोधे प्रकरणस्य नियामकत्वमिष्यत एव। इह च 'ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति' (छा.उ. ५.१०.१) इति वाक्यं सर्वविद्यासु गतिसम्बन्धमवबोधयति। तद्विरोधे प्रकरणं गतिं न नियन्तुमर्हति। यद्यप्युपाध्युपहितं मिथ्या। तथाऽपि यस्य नोपाधिसम्बन्धः तत् सत्यं सत्य-शब्दार्थः।

१. म. पूर्वगतिमार्गः।

एतदुक्तं भवति। सत्यम्; ब्रह्मोपाधिनाऽवच्छिद्योपासत इति। गत्यभ्यासस्तु पञ्चाग्न्युपकोसलविद्ययोरनुचिन्तनार्थः। तस्मात् क्वचिदुक्तगतेः सर्वब्रह्मोपास्तिषूपसंहार इति चेत्, न[1]।

तन्निरासः

पूर्वतन्त्रे प्रकरणवशाद् दर्शपूर्णमासाङ्गत्वेन व्यवस्थितानामपि प्रयाजादीनां तद्विकृतिषु सौर्यादिषु प्राप्तेः सिद्धतया पुनरिह संशयानुदयात्। अत्र प्रकृतिविकृतिभावान्नैवमिति चेन्न। चोदनासाम्यादेः बह्वङ्गोपदेशादेरेव तन्नियामकस्येहापि दर्शनात्। तथाऽप्युपदेशतोऽर्चिरादिगतिर्न लभ्यत इति चेत्, मा लाभि। किं ततः ? तत्र तदनुचिन्तनं यथाकथञ्चित् प्राप्तिमेवापेक्षते न तूपदेशतः। अन्यथाऽऽनन्दादीनां ब्रह्मधर्माणां सर्वविद्यास्वनुचिन्तनं न स्यात्। अत एव पूर्वपक्षो न युक्तः। सिद्धान्तोऽपि। सर्वविद्यासु गतिसम्बन्धावगमकवाक्ये सत्यशब्दस्वारस्येन निर्गुणविद्यासम्बन्धस्यैव प्रतीतेर्मध्वादिसगुणविद्यासम्बन्धालाभात्। सगुणविद्याफलस्य ब्रह्मविद्यादेः[2] गत्यपेक्षत्वलिङ्गात् सर्वासु सगुणविद्यास्वर्चिरादिमार्गो यद्युपसंह्रियते तर्हि 'परमं साम्यमुपैति' (मुण्ड.उ. ३.१३) इत्युक्तनिर्गुणविद्याफलस्य साम्यादेरर्चिरादिगत्यपेक्षत्वलिङ्गान्निर्गुणविद्यास्वपि गतिः कुतो नोपसंह्रियते। नच साम्यादेर्गत्यपेक्षत्वे मानाभावः। ब्रह्मलोकादेर्गत्यपेक्षत्वेऽपि साम्यात्। क्वचित् सगुणविद्यायां तदपेक्षत्वं श्रूयत इत्यन्यत्रापि तदनुमीयत इति चेन्न। ब्रह्मविद्याफलस्य क्वचिद् ब्रह्मलोकादेः गत्यपेक्षत्वश्रवणात् साम्यस्यापि ब्रह्मविद्याफलत्वेनैव गत्यपेक्षत्वानुमानसम्भवात्।

किञ्च सगुणविद्याफलं ब्रह्मलोकादिकमाप्तस्य पुनरावृत्तिरस्ति न वा। आद्येऽर्चिरादिना मार्गेण गतस्य

१. म. तन्त्र। २. क. ब्रह्मलोकादेः।

'शुक्लकृष्णे गती ह्येते जगतः शाश्वती मते।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः।।'

(भ.गी. ८.२६)

इत्यावृत्तिप्रतिषेधविरोधः। द्वितीये निर्गुणविद्याफलस्य साम्यादेरप्यपुनरावृत्त्या प्राप्यफलत्वात् कुतो न गत्यपेक्षा। अन्यथा 'एकया यात्यनावृत्तिम्' इत्यादिनिर्धारणानुपपत्तिः। अनावृत्तिफलमात्रस्यार्चिरादिमार्गसापेक्षतावगमात्।

अथ मतम् - अनावृत्तिफलं द्विविधम्। सगुणविद्याप्राप्यं निर्गुणविद्याप्राप्यं चेति। अत्र सगुणविद्याप्राप्यमेव निर्धार्यत इति। तन्न। विभागस्यैवाप्रामाणिकत्वात्। दुर्निर्णयत्वाच्च। लोकान्तरप्राप्त्यनपेक्षत्वे सत्यनावृत्तिफलत्वं निर्गुणविद्याफलत्वमित्यङ्गीकारे तु निर्गुणविद्याफले साम्येऽव्याप्तिः। समानधर्मत्वरूपसाम्यस्य लोकान्तरप्राप्त्यपेक्षत्वनियमात्।

किञ्च कथं तयोः विद्ययोः सगुणत्वनिर्गुणत्वाध्यवसायः? अध्यस्तानध्यस्तविषयतया भविष्यतीति चेत्। सैव कथं ज्ञातव्या। यस्यां विद्यायां धर्माः भेदो वा प्रतिपादितः साऽध्यस्तविषया। यस्यां न तथा केवलं धर्मधर्मिभावहीनं ब्रह्मस्वरूपमात्रं प्रतिपाद्यं साऽनध्यस्तविषयेति चेत्, न। 'यदा पश्यः पश्यते रुग्मवर्णम्' (मुण्ड.उ. ३.१.३) इत्यादिनिर्गुणविद्यायां रुग्मवर्णकर्तृत्वादिप्रमुखबहूनां गुणानां धर्मधर्मिभावादिसंसर्गस्य कर्तृकर्मणोर्जीवब्रह्मणोः भेदस्य च प्रतीतत्वात्। संसर्गहीनस्य ब्रह्मस्वरूपमात्रस्य शब्दप्रतिपाद्यत्वायोगेन निर्गुणविद्याया अलीकत्वप्रसङ्गाच्च।

एतेन, पूर्वत्र सगुणनिर्गुणविद्यासु गतिव्यवस्थोक्ता, तद्वत् सगुणास्वपि गतिव्यवस्थाप्राप्तौ तदपवादनात् सङ्गतिरिति निरस्तम्। सगुणत्वनिर्गुणत्वव्यवस्थाया एव दूषितत्वात्। नापि 'ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति' (बृ.उ. ८.२.१५) इत्यादिपञ्चाग्निविद्यायां वाक्यशेषात्

सर्वविद्यासु गतिसम्बन्धबोधकात् प्रकरणस्य बाध इति युक्तम् । कर्मिणा-मर्चिरादिगतिप्राप्तेः[१] सर्वब्रह्मविद्यास्वेव गतिसम्बन्धोऽनेन बोध्यत इति चेत्, 'ये पञ्चाग्निविदः ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति' (बृ.उ. ८.१२.१५)इति उभयसाधारण्येन ब्रह्मविद्याभिन्नपञ्चाग्निविद्यायामपि गतिसम्बन्धप्रतीतेः। पञ्चाग्निविद्यायास्त्वन्मते ब्रह्मविद्यात्वानङ्गीकारात् । 'श्रद्धां सत्यम्' (बृ.उ. ८.२.१५) इत्यास्तिक्यबुद्धिसत्यवचनयोरेव प्रतीतेश्च । नच सत्यवचनं ब्रह्मेतरत्वेन बाध्यत्वान्न सत्यपदस्य मुख्यमभिधेयम्। किन्त्वबाध्यत्वाद् ब्रह्मैवेति वाच्यम्। तस्य सर्वपदलक्ष्यत्वाङ्गीकारात्। तस्योपास्यत्वप्रतीत्याऽ-ध्यस्तत्वप्राप्त्या सत्यवचनादेरिव तात्कालिकसत्यस्य मुख्याभिधेयत्वायोगाच्च । उपास्यत्वविषेणोपाधिनाऽवच्छिन्नं ब्रह्म यद्यपि बाध्यम्। तथाऽपि ब्रह्मस्वरूपमात्रं सत्यमिति चेत्, सत्यवचनेऽपि तुल्यमेतत् । तत्रापि तदनुस्यूतचिन्मात्रस्य सत्यत्वात्।

किञ्च यदीदं वाक्यं सर्वविद्यासु गतिसम्बन्धमावेदयेत् तर्हि एकत्रैव गतिवर्णनं युक्तम्, नान्यासु शाखासु। अनेनैव सर्वत्र गतिसम्बन्धसिद्धेः। नचानध्येतृ-पुरुषोपकारकं तदिति वाच्यम्। एकस्यामेव शाखायां पञ्चाग्निविद्यायामुपकोसल-विद्यायां च तदाम्नानवैयर्थ्यात्। अत्र भाष्यम् - 'यत्पुनर्देवयानस्य पथो द्विराम्नानं तदुभयत्राप्यनुचिन्तनार्थम्' इति । तन्न । अनुचिन्तनं ह्युपसंहारो नान्यत् । उपसंहारश्चान्तरेणाप्याम्नानं विद्यैक्यादेव सिद्ध्यति। अन्यथा छान्दोग्योक्त-प्राणविद्यायामनाम्नातस्यापि रेतस उपसंहारो न स्यादिति 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३.३.६) इत्यधिकरणविरोधः। विद्यैक्यप्रत्यभिज्ञादार्ढ्यार्थं पुनराम्नानं भविष्यतीति चेन्न । अपर्यवसानप्रसङ्गात् । वाक्येन धर्मप्राप्तौ विद्यैक्य-प्रत्यभिज्ञानपेक्षणाच्च।

---

१. अत्र वाक्यं त्रुटितमिति भाति।

'अनियमः' इति सूत्रस्य परवादिकृतव्याख्यानिरासः

एतेन सर्वासामेवाभ्युदयप्राप्तिफलानां सगुणविद्यानामविशेषेणैषा देव-यानाख्या गतिर्भवति। शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यां 'ये चेमे अरण्ये श्रद्धां तपः' (छा.उ. ५.१०.१), 'शुक्लकृष्णगती ह्येते' (भ.गी. ८.२६) इत्यादि-रूपाभ्यां प्रकरणस्याविरोध इति 'अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्' (ब्र.सू. ३.३.३२) इत्यपपाठेन सूत्रव्याख्यानं निरस्तम् । लिङ्गविपर्यासा-दन्वयाभावाच्च । नहि गतिरित्यध्याहृतस्यानियम इत्यनेनान्वयः सम्भवति । बाधितत्वात् । 'अनियमः' इत्यस्याविशेषेणेति व्याख्यानं च लोकोत्तरप्रज्ञतां गमयति । श्रुतिस्मृतिभ्यां प्रकरणस्याबाध इति वक्तव्येऽविरोध इति वचन-स्वारस्याभावाच्च । अल्पाक्षरत्वेन श्रुतिस्मृतिभ्यामित्येव निर्देशापाताच्च । शब्दपदेनैव पौरुषेयापौरुषेयोभयग्रहणसम्भवेऽनुमानपदवैयर्थ्याच्च । तत्पदस्य स्मृतावव्युत्पन्नत्वाच्च। श्रद्धातपःपूर्वमिति पञ्चाग्निविद्योक्तप्रकरणेन, ये उपासते तेऽर्चिषमभिसम्भवन्ति- इत्येकवाक्यतया श्रुत्यर्थोपपत्तेश्च। स्मृतेश्चार्चिरादि-गतेरनावृत्तिमार्गत्वार्थत्वेन सर्वास्वपि विद्यासु गतिप्रापकत्वाभावाच्च। मार्गद्वित्वं तु मध्वादिविद्यानां कर्मविद्यानामिवाऽवृत्तिफलकत्वाङ्गीकारेणाप्युपपन्नम्।

शैवमतनिरासः

यदत्र कश्चिच्छैवश्च 'अनियमः' (ब्र.सू. ३.३.३२) इति सूत्रं 'यावदधिकारम्' (ब्र.सू. ३.३.३३) इति सूत्रानन्तरं पठित्वैषूपासनेषूप-कोसलादिष्वर्चिरादिगतिराम्नाता। किं तन्निष्ठानामेव तथा ब्रह्मप्राप्तिरुत सर्वेषां ब्रह्मोपासननिष्ठानामिति संशये, नेतरेषां तथा प्राप्तिः। प्रमाणाभावादिति प्राप्ते, सर्वेषामविशेषेण तयैव प्राप्तिः । तथा सत्येव श्रुतिस्मृतिभ्यामविरोध इति व्याचख्यौ। तदेतत् पूर्वमतान्नातिभिद्यत इत्युपेक्ष्यम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **मोक्षानियमसाधनादिति ॥** यद्यपि 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इति सूत्रानुसारादनियमसाधनादिति वक्तव्यम्। 'नियम इति पूर्वः पक्षः' इत्युत्तरवाक्याच्च। तथाऽपि पूर्वाधिकरणोक्तो नियमोऽत्रोपपाद्यत इति सङ्गतिसूचनायैवमुक्तिः। ज्ञानिनां मोक्षो भवत्येवेत्येवंरूपनियमसमर्थनादित्यर्थः।

पूर्वपक्षन्यायविवरणव्याख्यात्मकटीकावतारणम्

विशिष्टकारणमित्युक्तन्यायं तत्स्वरूपसाध्यप्रदर्शनपूर्वं विवृण्वत् 'नच योग्यताख्यविशिष्टकारणाज्ज्ञानिष्वपि केषाञ्चिन्मोक्षो न भवतीति नियमः' (न्या.वि.) इति वाक्यं 'प्राप्तज्ञानानामपि' इत्यादिपूर्वपक्षसूचकभाष्यादावेव योज्यमिति भावेन तात्पर्यतो व्याचष्टे- **ज्ञानिष्वपि केषाञ्चिन्मुक्त्ययोग्यत्वसम्भवादिति ॥** निश्चायकप्रमाणादर्शनादिति भावः। विशिष्टपदस्वारस्यं व्यञ्जयति- **अयोग्यानां तत्प्राप्त्ययोगादिति ॥** अत्र सङ्गतिं मन्वानो भाष्यं व्याचष्टे- **यथा खल्विति ॥** अन्यथोपसंहारेऽपि नियमो न स्यादित्ययोग्यतायाः प्रबलकारणत्वं सिद्धमिति भावः।

सिद्धान्तन्यायविवरणभाष्यव्याख्यात्मकटीकांशावतारणम्

स्वभाव इत्युक्तन्यायं तदाकारसम्बन्धिप्रदर्शनादिपूर्वकं विवृण्वत् 'ज्ञानिनां मोक्षं ददात्येवेति ईशस्वभावात्। अयोग्यानां ज्ञानस्यैवोत्पत्त्यनुपपत्तेः' (न्या.वि.) इति वाक्यं 'न कश्चिद् ब्रह्मवित् सृतिमनुभवति' (ब्र.सू.भा. उदाहृतकौण्डिन्यश्रुतिः) इति भाष्योदाहृतश्रुतौ हेतुसमर्पकमिति भावेन भाष्यमवतारयन्नेव तात्पर्यतो व्याचष्टे- **निषेधाभावेऽपीति ॥** 'ज्ञानिनां मोक्षं ददात्येव' इतीशस्वभावादेव कश्चिदपि ब्रह्मवित् सृतिं नानुभवतीति श्रुतिरध्याहारेण व्याख्यातव्येति भावः। उत्तरार्धं तात्पर्यतो व्याख्यातुमवतारयति- **नच केषाञ्चिदिति ॥** तथाच ज्ञानिनां

मोक्षं ददात्येवेतीशस्वभावादेव साधकादज्ञानिष्वपि केषाञ्चिन्मोक्षो भवतीति नियमो नचेति पूर्वेण सम्बन्धः। अयोग्यताख्यविशिष्टकारणरूपपरोक्तहेतुं दूषयति- **अयोग्यानामिति ॥** 'विमताः न मोक्षायोग्याः। ज्ञानित्वात्। सम्प्रतिपन्नवत्।' इत्यनुमानेन विशिष्टकारणमसिद्धमित्यादौ ग्राह्यम्। ज्ञानित्वेऽप्ययोग्यता किं न स्यादिति विपक्षे किं बाधकमिति चेत्। अयोग्यानां ज्ञानस्यैवोत्पत्त्यनुपपत्तेर्हेतूच्छित्तिरेवेति भावः। 'ज्ञानस्यैवोत्पत्त्यनुपपत्तेः' इत्युक्तानुत्पत्तिः शङ्कचेतेति वक्रोक्तिः इति विवरणव्याख्यानं द्रष्टव्यम्।

सङ्क्षेपभाष्येणैतदधिकरणतात्पर्यकथनम्

एतदधिकरणतात्पर्यमप्युक्तम् - **विशेषस्तु ज्ञाने स्यादिति ।** उत्पाद्यमाने ज्ञाने योग्यताख्यविशेषोऽङ्गीकर्तव्य एव। अन्यथा ज्ञानस्यैवानुत्पत्तेरिति भावः। इमौ च न्यायौ 'सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्यादिसौत्रपदसूचितावेव। ज्ञानिषु मोक्षायोग्यतानिराकरणेन प्राप्तिसूत्रोक्तमोक्षयोग्यतैव स्थिरीकरणेन विवृतेति फलितम्॥[1]

॥ इति अनियमाधिकरणम्॥ १९॥

---

१. अधिकरणेऽस्मिन् सूत्रार्थः मातृकायामनुपलब्धः।

॥ अथ यावदधिकाराधिकरणम् ॥ २० ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ॥
॥ ३-३-३३ ॥

यथा यथाऽधिकारो विशिष्यते एवं मुक्तावानन्दो विशिष्यते। 'मनुष्येभ्यो गन्धर्वाणां गन्धर्वेभ्य ऋषीणामृषिभ्यो देवानां देवेभ्य इन्द्रस्य इन्द्राद् रुद्रस्य रुद्राद् ब्रह्मण एष ह्येव शतानन्दः' इति चतुर्वेदशिखायाम्[1]।

अध्यात्मे च -

'ज्ञानं चोपासनं चैव मुक्तावानन्द एव च।
यथाधिकारं देवानां भवन्त्येवोत्तरोत्तरम्॥' इति॥ ३३॥

॥ ॐ अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम् ॐ ॥ ३-३-३४ ॥

नचासमत्वेन विरोधो भवति। ब्रह्मधीत्वाद्[2] दोषाभावसाम्यादुत्तमेभ्योऽन्येषां भावाच्च। औपसदवच्छिष्यवत्। उक्तं च तुरश्रुतौ -

'नानाविधा जीवसङ्घा[3] विमुक्तौ नचैव तेषां ब्रह्मधियां विरोधः।
दोषाभावाद् गुरुशिष्यादिभावाल्लोकेऽपि नासौ किमु तेषां विमुक्तेः॥'
इति॥ ३४॥

॥ इति यावदधिकाराधिकरणम्॥ २०॥

१. ह्. इति हि चतुर्वेदशिखायाम्। २. प. ब्रह्माधीनत्वात्।
३. ह्. देवसङ्घाः।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनोपासनाधिकारिणामुपासनेऽधिकारनियमसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा 'प्राप्तेश्च' (ब्र.सू. ३.३.२०) इत्यादेरनुपपत्तेरसौ समर्थनीयः। प्रकृतोपास्तिमन्तो विषयः। उपासनाधिकारनियतिमन्तो न वेति सन्देहः। पूर्वोक्तिर्लौकिकक्रियायामदृष्टिश्च सन्देहबीजम्।

पूर्वपक्षः

नोपासनावन्तोऽधिकारनियतिमन्त इति पूर्वः पक्षः। उपासनाधिकारनियमे प्रमाणाभावात्। नच मुक्तावानन्दतारतम्यमुपासनाधिकारनियमे प्रमाणमिति वाच्यम्। उपासनादिप्रयत्नतारतम्येनैव तस्योपपत्तेरुपासनाधिकारनियमाप्रयोजकत्वात्। अभ्युपगम्य चेदमुच्यते। मुक्तावानन्दतारतम्यमेवानुपपन्नम्। तथात्वे मुक्तानां द्वेषेर्ष्यादिदोषप्रसङ्गात्। नचात्र प्रमाणमस्ति। आनन्दश्रुतिस्तु संसारविषयतयोपपद्यते। अत उपास्त्यधिकारनियमाभावात् 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.२०) इत्याद्ययुक्तम्।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **यावदिति॥** अस्त्येवोपासनाधिकारे नियमो मुक्तावानन्दतारतम्यस्य भावात्। मुक्तावानन्दतारतम्यस्य चोपासनाधिकारनियमानुसारित्वादिति भावः। ननु मुक्तावानन्दतारतम्यमेव कुतः? येनोपासनाधिकारनियम इत्यत आह- **मनुष्येभ्य इति॥** मुक्तावानन्दतारतम्यमुपासनादिप्रयत्नेन सम्भवत्यतो नोपासनाऽधिकारनियमं प्रयोजयतीत्यत आह- **अध्यात्मे चेति॥** अधिकारनियमेनैव मुक्तावा-

१. ह्. उपासनायाः।

नन्दतारतम्यम्। नोपासनादिप्रयत्नेनैव। तस्याप्युपासनाधिकारनियमानुसारित्वादिति भावः। कथञ्चिदधिकाराधिकयत्ने विघ्नो भवति।

'अधिकाराधिको यत्नः प्रायशो नोपपद्यते।
कथञ्चिदधिके यत्ने दोषः कश्चित् समापतेत्॥' इति वचनात्॥ ३३॥

मुक्तानामसमत्वे प्राप्तानन्दतारतम्यानुपपत्तिशङ्कायाः शिष्यदृष्टान्तेन परिहारः

ननु मुक्तावानन्दतारतम्यमेव नोपपद्यते। असमत्वे मुक्तानां परस्परविरोधप्राप्तेः। लोके तथा दर्शनात्। श्रुतयस्तु संसारिविषया इत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **अक्षरेति॥** न मुक्तानामसमत्वेऽपि विरोधः। विरोधे विषयलम्पटत्वमत्सरादिदोषित्वानुपकारित्वानां प्रयोजकत्वात्। नचैतानि मुक्तेषु विद्यन्ते। तेषां ब्रह्मधीत्वान्निर्दोषत्वात् परस्परोपकारित्वाच्चेति भावः।

ननु विरोधिष्वसाम्यं विषयलम्पटत्वादि च दृश्यते, तत्कथं निश्चिनुमो दोषनिबन्धन एव विरोधो न त्वसाम्यनिमित्त इति तत्राऽह- **औपसदवदिति॥** दोषासमत्वयोः क्वचिद् विरोधिषु समावेशेऽपि दोषाणामेव विरोधप्रयोजकत्वनिश्चयो युज्यते। असमयोरपि गुरुशिष्ययोर्दोषाभावेन विरोधाभावदर्शनात्। अन्यथा तत्र व्यभिचार इति भावः। अत्र श्रुतिं चाऽह- **उक्तं चेति॥** अत एवाऽनन्दश्रुतेरमुक्तविषयत्ववर्णनं प्रत्युक्तम्। तथाच स्मृतिः - 'नरादिब्रह्मपर्यन्तं विमुक्तानां शतोच्छ्रयः। अप्यानन्दे मिथोऽप्युक्तस्त्वध्वर्यूणां श्रुतौ पृथक्॥' इति। तस्मादुपासनाधिकारे नियमादुक्तमुपपन्नमिति सिद्धम्॥ ३४॥

॥ इति यावदधिकाराधिकरणम्॥ २०॥

१. म. तत्रैव

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ यावदधिकारमवस्थितिराधिकारिकाणाम् ॐ ॥

॥ ३-३-३३ ॥

सङ्गतिपूर्वपक्षौ

मौक्तिकानन्दतारतम्यान्यथानुपपत्त्योपासनातारतम्यं तद्योग्यतातारतम्यं तदनुसारित्वं चोपासनादेः, तत उपासनायोग्यतानन्दादेः सामानाधिकरण्यं, तत्रापि चतुर्मुखादिपुरुषविशेषे पूर्णयोग्यतावत्येव शतानन्दादेस्तादृग्योग्यतासामानाधिकरण्यं, न त्वन्यत्र, तत उपसंहारोऽनुपसंहारश्च युज्यत एवेत्याद्यभिप्रायेण प्राप्तिनये वृद्धिनये च सङ्क्षेपत उक्तस्य प्रमेयजातस्य वक्ष्यमाणरीत्याऽधिकाशङ्क्याऽपोदितस्य विशेषयुक्त्याऽभ्यधिकशङ्कानिरासेन विवरणमपेक्षितमेव। तदत्र विवरणपेटिकायां सङ्गतमिति क्रियते। ज्ञानादावपि साधनान्तरे पुरुषविशेष एवाऽनन्दादिसामानाधिकरण्यं नान्यत्रेत्यादिप्रमेयजातं समानमिति प्रज्ञान्तरपृथक्त्वनयानन्तरमस्य सङ्गतत्वेऽपि वक्ष्यमाणसङ्गतिसौकर्यायात्रैव क्रियते। यद्यपि 'समान एवं चाभेदात्' (ब्र.सू. ३-३-२०) इत्यनन्तरमेवेदं सङ्गतम्। उपासनायाम्[१] इतिकर्तव्यताविशेषविचारात्मकत्वात्, अत एवानुव्याख्याने तदनन्तरमेव व्याख्यातम्। तथाऽप्यात्मशब्दस्योपसंहारानुपसंहारप्रमाणत्वसमर्थनाय 'कार्याख्यानादपूर्वम्' (ब्र.सू. ३.३.१९) इत्युक्त्याऽऽपतितशङ्कायाः समाननयेन परिहारेऽपि पुनर्विलम्बे कारणाभावात् 'न वा विशेषात्' (ब्र.सू. ३.३.२२)इत्यधिकरणस्यैव समाननयानन्तर्यं युक्तं, न त्वस्येति विवेक्तव्यम्।

ननु सर्वेषां ज्ञानिनां मुक्तिर्भवतीत्यनियमश्चेन्मुक्त्यंशेऽङ्गीक्रियते तर्हि सर्वोपसंहारांशेऽप्यनियमोऽङ्गीक्रियतामविशेषात्। नच 'सर्वे गुणा ब्रह्मणैव

१. म. उपासनायाः

ह्युपास्या नान्यैर्देवैः किमु सर्वैर्मनुष्यैः' (ब्र.सू.भा. उदाहृतश्रुतिः ३.३.३२) इति विशेष उक्त इति वाच्यम् । ब्रह्मण एव सर्वगुणोपसंहारतद्योग्यतादि, शतानन्दत्वं च नान्येषामित्यादिविवक्षितनियमे विशेषानुक्तेरुक्तवचनस्योपासनामात्रनियमपरत्वात् । सर्वोपसंहारयोग्यताभावेऽपि बहुतरप्रयत्नशालिनश्चतुर्मुखस्य सर्वोपासनोपपत्तेः । दृश्यते च वसिष्ठसाम्ययोग्यताविधुराणामपि माण्डव्यादीनां साम्ये प्रयत्नबाहुल्यम् । अत एव 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३.३.१०) इत्यादिसूत्राणां 'सम्पूर्णोपासनाद् ब्रह्मा सम्पूर्णानन्दः' इत्यादिवचनानां च सद्भावाद् वैषम्यमिति परास्तम् । यादृच्छिकसामानाधिकरण्यं चतुर्मुखे, न तु योग्यताविशेषनियतम् । उपासनाधिक्यस्याऽनन्दाधिक्यादिसामानाधिकरण्यं नियतम् । उपासनाधिक्यं च विनाऽपि योग्यतां प्रयत्नाधिक्येन भवति । तथाच सर्वोपासनायोग्यता चतुर्मुख एव । शतानन्दादिसामानाधिकरण्यं च तेनैव[1] इत्यत्राद्यापि प्रमाणानुपन्यासेन सामानाधिकरण्यनियममात्रेणापि चारिताथ्यात् । तस्मान्न सर्वगुणोपसंहारोपासना सर्वज्ञानशतानन्दादेर्ब्रह्मादिपुरुषनियमः । किन्तु चतुर्मुखः पूर्णं प्रयत्नं करोति । तत एवोपासनमपि पूर्णं प्राप्नोति । तत एव पूर्णानन्दं चेति । तेषां समाजश्चतुर्मुखे यादृच्छिकः । तेन रुद्रादिरपि तद्वदधिकं प्रयत्नं करोति चेत् सोऽप्येवमेवेति अधिकारांशेऽपि मुक्त्यंश इव नियमो न स्यात् । निर्निमित्तं नियमाङ्गीकारे च मुक्त्यंशेऽपि स्याद् । द्वेषेर्ष्यादिप्रसङ्गेन मुक्तावानन्दतारतम्यस्यैवायोगश्चेति पूर्वोक्तमयुक्तम् ।

प्रयत्नाधिक्यतो ह्यस्मिन् सुखाधिक्यं भविष्यति ।
इत्यार्थश्च समाजोऽयमधिकारो न मृग्यते ।।

इति पूर्वाधिकरणाक्षेपणसम्भवादनन्तरसङ्गतिः । कृतः पूर्वः पक्षः ।

---

१. म. तत्रैव ।

सिद्धान्तः

सिद्धान्तस्तु -

यथाधिकारं देवानां मुक्तावानन्द इष्यते ।
इत्येवमवकाशोक्तवाक्यान्नियमसम्भवः ।।

नचेदमपि पूर्ववत् सावकाशयितुं शक्यम् । 'यथाधिकारम्' (ब्र.सू.भा. उदाहृताध्यात्मवचनम्, ब्र.सू. ३.३.३३) इत्यादिविरोधात् । प्रयत्नस्य चाधिकारानुसारेणैव कार्यजनकत्वात् । अधिकारमुल्लङ्घ्य यजमानस्योपासनाख्यकार्यस्यैव प्रबलविघ्ननिहतत्वान्नार्थः समाजः शङ्कनीयः । द्वेषेर्ष्याप्रसङ्गपरिहारस्तु टीकायामेव स्पष्टः ।

परमतीयाधिकरणानुवादः

अत्र परोक्तमधिकरणम् - निर्गुणविद्यायां गतिं प्रतिषिध्य सगुणविद्यायां गतिप्रयोजकैश्वर्यदर्शनाद् गतिरर्थवतीत्युक्तम् । सगुणविद्यासु गतेः सार्वत्रिकत्वं वर्णितम् । इदानीं निर्गुणविद्याया अपि मोक्षहेतुत्वानुपपत्तेरैश्वर्यविशेषहेतुत्वम्, ऐश्वर्यविशेषश्च न गतिमन्तरेणेत्यभिहितव्यवस्थाक्षेपेण प्रत्यवस्थीयते ।

विद्यावतोऽपि व्यासादेरप्रवृत्तक्रियाकृतम् ।
अस्ति देहान्तरं तस्माद् विद्या मुक्तेर्न साधनम् ।।

व्यासस्य शरीरमपान्तरतमःशरीरारम्भककर्मातिरिक्तकर्मारब्धम् । अपान्तरतमःशरीरादन्यत्वे सति शरीरत्वात् । वसिष्ठशरीरवत् । तत उत्पन्नब्रह्मसाक्षात्कारस्याप्यनारब्धफलकर्मारब्धशरीरग्रहणदर्शनान्न ब्रह्मविद्यायाः मोक्षहेतुत्वमिति प्राप्तेऽभिधीयते -

नानादेहोपभोक्तव्यमीशोपासनयैकया ।
आरब्धं प्रतिबद्धं स्यादैश्वर्यं ब्रह्मसंविदः ।।

नहि हेतोरपि सति प्रतिबन्धे कार्यानुपजननं हेतुतां प्रतिक्षिपति । नहि सेतुप्रतिबन्धादापो न निम्नदेशं सर्पन्तीति सेतुभेदेऽपि न सर्पन्ति । तदिह प्रवृत्तकर्मफलसहितेश्वरोपासनया विरचितेन विद्याकर्माराधनसन्तुष्टेश्वरदत्तेन युगपत् क्रमेण[१] नानादेहोपभोग्यैश्वर्येण प्रतिबद्धा विद्या न फलं जनयति । भोगेन तत्क्षये च दास्यति । 'तस्य तावदेव चिरम्' (छा.उ. ६.१४.२) इत्यादि-श्रुतेर्व्यासादिष्वप्यविशेषात् । अनुमाने च[२] व्यासशरीरमपान्तरतमः-शरीरारम्भकत्वरहितकर्मारब्धं न भवति । व्यासापान्तरतमःशरीरादन्यत्वात्[३] । अपान्तरतमःशरीरवत्- इति सत्प्रतिपक्षतेति ।

तन्निरासः

तन्न । 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' (ब्र.सू. ४.४.१५) इत्यत्र ज्ञानिनां प्रारब्धेतरपुण्यपापयोः सर्वात्मना क्षयस्य प्रारब्धकर्मणोऽवशेष-प्रतिपादनद्वारा 'तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' (ब्र.सू. ४.१.१३) इति च साक्षादेव प्रतिपादनादिह पुनरुत्पन्नब्रह्मसाक्षात्कारस्याप्यनारब्धफल-कर्मारब्धशरीरग्रहणदर्शनान्न ब्रह्मविद्याया मोक्षसाधनत्वमिति शङ्कानुदयात् । तत्परिहारोऽपि नोपपद्यते । तथाहि । उत्पन्नब्रह्मसाक्षात्कारस्य ज्ञानेन मोक्षे जनयितव्ये ऐश्वर्यं प्रतिबन्धकमिति वदन् प्रष्टव्यः । किं तदैश्वर्यं सगुणोपा-सनयाऽऽरब्धमुत निर्गुणोपासनया । नाऽद्यः । सगुणोपासनारब्धैश्वर्यस्य प्रबल-निर्गुणोपासनाकार्यब्रह्मसाक्षात्कारेणोत्पत्स्यमानमोक्षप्रतिबन्धकत्वायोगात् । अन्यथा जीवन्मुक्तिदशायां पुनः सगुणोपासने तदारब्धैश्वर्येण प्रतिबन्धापा-तात् । उत्तरस्याश्लेषे पूर्वनाशोऽपि किं न स्यात् । त्वन्मते ज्ञानेनाज्ञाने निवर्तनीये प्रकाशेनान्धकार इव न देशकालाद्यपेक्षा । किन्तु यदैव तत्त्वज्ञानमुत्पन्नं तदैवाज्ञानं

१. वाशब्द अत्यावश्यक इति भाति । २. म. अनुमाने तु ।
३. 'शरीरादनन्यत्वात्' इति पाठो युक्त इति भाति ।

विनश्यति । अन्यथा 'नेदं रजतम्' इति तत्त्वज्ञानानन्तरमपि शुक्तितत्त्वाज्ञानं तत्कार्यभ्रमश्च निवर्तेत[१] इत्यङ्गीकारेण प्रारब्धकर्मणोऽज्ञानकार्यस्याज्ञान-निवृत्ताववस्थानानुपपत्तेश्च । तदनिवृत्तौ ज्ञानत्वव्याघाताच्च । यतोऽज्ञान-निवर्तकत्वमेव ज्ञानत्वम् । प्रारब्धान्यस्यैव ज्ञानेन निवृत्तिरिति नियमस्यापि ब्रह्मभिन्नत्वेनाज्ञानकार्यत्वाच्चावस्थानुपपत्तेः[२] ।

अत एव न द्वितीयः । निर्गुणोपासनाया ऐश्वर्यानारम्भकत्वाच्च । आरम्भकत्वेऽ-प्यर्चिरादिगतिघटितैश्वर्यस्याप्यारम्भसम्भवेन निर्गुणविद्यायां गतिप्रतिषेधा-नुपपत्तेश्च ।

यावदधिकारमिति सूत्रस्य परोक्तार्थनिरासः

एतेन लौकिकस्थितिहेतुषु वेदप्रवर्तनादिष्वधिकारेषु नियुक्तानामपान्तर-तमःप्रभृतीनामधिकारिणां यावदधिकारमिहैवावस्थितिरिति सूत्रार्थोक्तिरपि निरस्ता । अपान्तरतमस एव व्यासत्वे

'कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम्',
(भारतम्, वायुप्रोक्तं च)

'कृष्णद्वैपायनः साक्षाद् विष्णुरेव न संशयः ।
को ह्यन्यस्तु ततो रुद्रं वेत्ति तं परमेश्वरम् ॥',

'नमस्कुरुध्वं तमृषिं कृष्णं सत्यवतीसुतम् ।
पाराशर्यं महात्मानं योगिनां विष्णुमव्ययम् ॥',

'नमश्चकार तमृषिं कृष्णद्वैपायनं मुनिम् ।
सर्वज्ञं सर्वकर्तारं साक्षाद् विष्णुं सनातनम् ॥',

१. 'न निवर्तेत' इति पाठेन भाव्यमिति भाति ।
२. '....च्चावस्थानानुपपत्तेः' इति पाठः सम्भाव्यते ।

'अयं सत्यवतीसूनुः कृष्णद्वैपायनो मुनिः',
'व्यासः स्वयं हृषीकेशो येन वेदाः पृथक् कृताः',
'यस्य देवो महादेवः साक्षादेव पिनाकभृत्।
अंशांशेनाभवत् पुत्रो नाम्ना शुक इति प्रभुः ॥'

इत्यादिभगवदवतारत्वावेदकब्रह्मागमविरोधापातात्। अधिकारिव्यतिरिक्तानामपि विदुषां बहुलं देहान्तरोत्पत्तिदर्शनेन विशिष्योक्तौ कारणाभावाच्च। तेषामप्याधिकारिकत्वे विशेषणवैयर्थ्यात्।

रामानुजीयव्याख्याननिरासः

एतेनैव वसिष्ठादीनां त्वाधिकारिकाणां यावदधिकारसमाप्ति नार्चिरादिका गतिरस्ति। अपि त्वधिकारेऽवस्थितिरेवेति 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्येतत्सूत्रात् प्राक् पाठेन केषाञ्चिद् व्याख्यानं निरस्तम्। सति प्रारब्धेऽवस्थितिः क्षीणे तु तस्मिन्नर्चिरादिगतिरित्यस्य सर्वसाधारणत्वेनाधिकारिणामिति विशेषणवैयर्थ्यात् साम्प्रदायिकक्रमविरोधाच्चेति दिक्।

'अक्षरधियाम्' इति सूत्रस्य पृथगधिकरणत्वेन व्याख्यानं तन्निरासश्च

'अक्षरधियाम्' (ब्र.सू. ३.३.३४) इति गुणसूत्रमपि पृथगधिकरणं व्याचक्षते। वाजसनेयके श्रूयते- 'एतद् वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहम्' (बृ.उ. ३.८.८) इत्यादि। तथाऽऽथर्वणे- 'अथ परा यया तदक्षरमधिगम्यते। यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णम्' (मुण्ड.उ. १.१.५) इत्यादि। तथैवान्यत्रापि विशेषनिराकरणद्वारेणाक्षरं परं ब्रह्म श्राव्यते। तत्र तत्र कचिदतिरिक्ताः विशेषाः निराक्रियन्ते। तासां विशेषप्रतिषेधबुद्धीनां किं सर्वासां सर्वत्र प्राप्तिरुत व्यवस्थेति[1]

१. म. व्यवस्थितिरिति।

संशये श्रुतिविभागाद् व्यवस्थाप्राप्तावुच्यते- विशेषनिराकरणद्वारेण ब्रह्मप्रतिपादकत्वसाम्यात् सर्वत्र प्रतिपाद्यब्रह्मैक्यप्रत्यभिज्ञानाच्च किमित्यन्यत्र कृता बुद्धयोऽन्यत्र न स्युरिति सिद्धान्त इति।

तन्न। तथाहि। अन्यत्र कृता बुद्धयोऽन्यत्र कुतो न स्युरिति कोऽर्थः? अन्यत्रोत्पन्ना बुद्धय अन्यत्राप्युत्पद्यन्त इति उतान्यविषयिण्योऽप्यन्यविषयिण्यो भवन्तीति किं वाऽन्यत्रानुसन्धेयास्तदन्यत्राप्यनुसन्धातव्या इति। अथवाऽन्यत्र श्रुता अन्यत्राध्याहर्तव्या इति। नाऽद्यः। देवदत्ते उत्पन्नानां बुद्धीनां यज्ञदत्तेऽनुत्पत्तेः। साधनपौष्कल्ये तु सत्युत्पत्तेः प्रसिद्धतयोक्त्यनपेक्षणात्। न द्वितीयः। अस्थूलत्वादिविषयबुद्धीनामद्रेश्यत्वाग्राह्यविषयकत्वसाधनस्य बाधितत्वात्। न तृतीयः। विशेष्यैक्याभावेऽपि तत्साधनेऽतिप्रसक्तेः। विशेष्यैक्येऽपि[1] 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३.३.६) इत्यनेन 'अनियमः सर्वेषाम्' (ब्र.सू. ३.३.३२) इत्यनेन च गतार्थतापातात्। नान्त्यः। अपरिपूर्णे ह्यध्याहारः। नहीदं बृहदारण्यकमाथर्वणवाक्यं वाऽपरिपूर्णम्। विशिष्टार्थप्रतिपादनात्। पूर्वैर्गतार्थताऽनिस्ताराच्च।

विशेषाशङ्क्याऽधिकरणारम्भ इति कल्पतरूक्तं समाधानं तन्निरासश्च

अत्रोक्तं भाष्ये - तत्र विधिरूपाणि विशेषणानि चिन्तितानि, इह प्रतिषेधरूपाणीति। तन्न। न्यायभेदाभावेऽधिकरणारम्भायोगात्। प्रपञ्चनार्थं चेयं चिन्तेति तदीयं समाधानान्तरं चायुक्तम्। प्रयोजनाभावात्। ननु प्रयोजनं पुनरारम्भस्य विशेषाशङ्कानिराकरणम्। तथाह्यत्र विशेषाशङ्का -

भवेद् ब्रह्मस्वरूपत्वादानन्दाद्युपसंहृतिः।
निषेधानामनात्मत्वात् किमर्थमुपसंहृतिः ॥

१. क. विशिष्टैक्येऽपि।

नचास्वरूपाणामपि स्वरूपप्रतिपत्त्यर्थमुपसंहारः। यस्मात् -

आनन्त्येन निषेधानां तन्निषेधधियामपि।
असङ्ख्येयतयैकत्र कथं शक्योपसंहृतिः॥
स्थालीपुलाकवत् किञ्चिन्निषेधेनान्यलक्षणे।
यथाश्रुतेन तत्सिद्धेरुपसंहरणं वृथा॥

इति कल्पतरूक्तेरिति चेन्न। उपसंहारानुपसंहारयोर्ब्रह्मस्वरूपत्वास्वरूपत्वयोरप्रयोजकत्वात्। नहि ब्रह्मस्वरूपमात्रमेव गुणजातमुपसंहार्यं नान्यदित्यस्ति नियमः। तथा सति सर्वगतत्वादीनां सार्वज्ञ्यादिवन्मिथ्यार्थगर्भितानामस्वरूपाणामनुपसंहार्यत्वापातात्। 'स योऽतोऽश्रुतः' (ऐ.उ. २.४.८) इत्यादिना तच्छ्रवणवैयर्थ्याच्च। निषेधात्मनामस्थूलत्वादृश्यत्वादीनामुपसंहारे बाधकाभावाच्च। नच तेषामस्वरूपत्वम्। नियामकाभावात्। निषेधात्मत्वं तु दुःखव्यावृत्त्याद्यात्मत्वेनाऽऽनन्दादीनामप्यविशिष्टम्। अन्यथाऽऽनन्दादीनामपि धर्मत्वेन ब्रह्मनिर्धर्मकत्वव्याघातः। स्वरूपप्रतिपत्त्यर्थत्वं तु न स्वरूपत्वे नियामकम्। अस्थूलत्वादावस्य साम्यात्। न चाऽनन्त्यादुपसंहारासम्भवः। आनन्दादावपि साम्यात्। नच स्वरूपप्रश्नोत्तरप्रकरणे आम्नातानामानन्दादीनां सङ्ख्यानिर्देशाभ्यां कॢप्तत्वान्न दोषः। अक्षरब्रह्मप्रकरणे आम्नातानामस्थूलत्वादीनामपि सङ्ख्यानिर्देशाभ्यां कॢप्ततयाऽन्योन्येषामन्योन्यत्रोपसंहारे बाधकाभावात्। तस्मान्नाधिकशङ्कावकाशः।

कल्पतरूक्तः विशेषाशङ्कापरिहारोऽप्ययुक्तः

प्रतिषेधा अनात्मानोऽप्यात्मलक्षणतां गताः।
आत्मप्रमितिसिद्ध्यर्थं संयास्यन्त्यश्रुतस्थले॥

इति कल्पतरूक्तः परिहारोऽप्ययुक्तः। आनन्दादिसाम्याङ्गीकारेण चेत् परिहारस्तर्हि अनात्मनोऽपीति वैषम्योक्तिविरोधः। विधिनिषेधात्मकत्वेन तदयोगश्च। वैषम्याङ्गीकारेण चेच्छङ्काया अनिस्तार एव। विधिनिषेधात्मत्वेन वैषम्येऽप्यात्मस्वरूपज्ञापकत्वसाम्येनोपसंहारो भविष्यतीति चेन्न। प्राणविद्यादिगतधर्माणां प्राणाद्यात्मस्वरूपज्ञापकत्वसाम्यात् तेषामपि ब्रह्मविद्यायामनुपसंहारापपत्तेः। साक्षात् तज्ज्ञापकत्वविवक्षायां त्वितरव्यावृत्तिद्वारेण तज्ज्ञापकानामस्थौल्यादीनामप्यनुपसंहारप्रसङ्गात्। प्राणादिनिष्ठानामब्रह्मधर्मत्वेन वैषम्यमस्तीति चेत्। किं तावताऽपि? आत्मस्वरूपप्रतिपत्त्यर्थत्वेन साम्यस्यापि सम्भवात्। यदि चैतावताऽपि वैषम्येण प्राणधर्माणामप्युपसंहारनिराकरणं तर्हि ब्रह्मस्वरूपमात्रप्रश्नोत्तरप्रकरणपठितत्वादिवैषम्येणाप्यस्थौल्यादीनामपि तत् स्यात्।

अक्षरधियामिति सूत्रस्य परोक्तार्थनिरासः

एतेन 'अक्षरधियां त्ववरोधः' (ब्र.सू. ३.३.३४) इत्यपपाठ्याक्षरविषयाणां प्रतिषेधधियामवरोध उपसंहारः; प्रतिषेधसामान्यात्; अक्षरस्य तद्भावात् प्रत्यभिज्ञानाच्चेति सूत्रार्थकथनमयुक्तम्। अध्याहारप्रसङ्गात्। प्रतिषेधधियामिति वक्तव्ये अक्षरपदस्वारस्याभावात्। अवरोधतद्भावशब्दयोरुपसंहारप्रत्यभिज्ञानयोर्व्युत्पत्त्यभावाच्च। गुणानामेवोपसंहार्यत्वेन धियां तत्साधने बाधप्रसङ्गाच्च। प्रतिषेधसामान्यादिति हेतुश्च व्यधिकरणः। नहि धीषु प्रतिषेधात्मत्वमस्थूलत्वादिनिष्ठं सम्भावितम्। अक्षरस्य तद्भावोऽपि व्यधिकरणः। नह्यक्षरत्वस्येहोपसंहार्यत्वं साध्यते। किन्तु अस्थूलत्वादीनामेव। तद्भावेन विद्यैक्यसाधनद्वारा तत्साधने तु गतार्थताऽपरिहारः।

औपसदवत् तदुक्तमिति सूत्रखण्डस्य परकृतव्याख्यानिरासः

यच्च 'औपसदवत् तदुक्तम्' इति सूत्रखण्डस्य व्याख्यानम्- '' 'यथा

१. जामदग्न्येऽहीने इति शा. भाष्ये।

जामदग्न्या[१] हीने पुरोडाशिनीषूपनिषत्सु चोदितासु पुरोडाशप्रदानमन्त्राणाम् 'अग्नेर्वै होत्रं वेरध्वरम्' इत्येवमादीनामुद्गातृवेदोत्पन्नानामध्वर्युभिरभिसम्बन्धो भवति, अध्वर्युकर्तृकत्वात् पुरोडाशप्रदानस्य प्रधानतन्त्रत्वाच्चाङ्गानाम् एवमिहाप्यक्षरतन्त्रत्वात् तद्विशेषणानां यत्र कचिदुत्पन्नानामक्षरेण सर्वत्राभिसम्बन्ध इत्यर्थः। तदुक्तं प्रथमे काण्डे- 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' (जै.सू. ३.३.८) इत्यत्र'' इति। तदपि न। तच्छब्दपरामृष्टस्यैतत्सूत्रोक्तप्रमेयस्य सर्वत्र प्रतिषेधबुद्धीनामक्षरसम्बन्धस्य प्रथमकाण्डे प्रतिपादनाभावात्। अक्षरसम्बन्धव्युत्पादनाय यद् गुणानां प्रधानतन्त्रत्वमिहाभिप्रेतं तदेतत् प्रमेयं पूर्वकाण्डोक्तमित्यर्थ इति चेन्न। सामान्यतद्भावयोरेवाक्षरसम्बन्धे हेतूकरणेन गुणप्रधानन्यायस्यात्र विवक्षाऽप्रतीतेः। प्रतीतौ वा 'औपसदवत्' इत्यनेनैव चारितार्थ्यात् 'तदुक्तम्' इति व्यर्थम्।

किञ्च 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' (जै.सू. ३.३.८) इति पूर्वकाण्डस्थतार्तीयसूत्रस्य[१] गुणमुख्यव्यतिक्रमेऽङ्गप्रधानधर्मयोरग्न्याधानवारवन्तीयादिसामधर्मयोरुपांशुधर्मयोरुपांशुत्वोच्चैष्ट्वयोर्विरोधे सति मुख्येन मुख्यरोधेनाङ्गेषु वेदसंयोगः वैदिकस्वरसंयोगः स्यात्। न तु मुख्यधर्मस्याऽधानाङ्गोपांशुत्वस्य बाधेन गुणभूतवारवन्तीयसामधर्मोच्चैष्ट्वाख्यवैदिकस्वरसंयोगः स्यात्। कुतः? तदर्थत्वात्। अङ्गानां प्रधानार्थत्वेन प्रधानानुग्रहस्यैव न्याय्यत्वेन प्रधानाधानधर्मोपांशुत्वस्य बाधायोगादित्यर्थो भाष्यकारमते। वार्तिककारमते तु गुण उत्पत्तिविधिः। मुख्यो विनियोगविधिः। उत्पद्यमानस्य विनियुज्यमानार्थत्वात्। नह्युत्पत्तिमात्रेणैव कर्मणां प्रधानसम्बन्धः। किन्तु 'वारवन्तीयं साम गायति' इत्यादिविनियोजकवाक्येनैव। अन्यत्र च वारवन्तीयादिसाम्नामुत्पत्तिः सामवेदे। तत उच्चैष्ट्वं प्राप्यते। उच्चैः साम्नोऽपि विधानात्।

१. तृतीयसूत्रस्य।

विनियोगविधिस्तु याजुर्वेदिक इत्युपांशुत्वं प्राप्नोति। 'उपांशु यजुषा' इति विधानात्। एवं तयोर्व्यतिक्रमे वेदभेदेन समाम्नाने सति मुख्येन 'वारवन्तीयं साम गायति' इत्यादिविनियोगविध्यनुसारेणैव स्वरसंयोगः स्यात्। याजुर्वेदिकोपांशुस्वरसंयोग एव। न तु सामोत्पत्तिविधिवेदकृतोच्चैष्ट्वस्वरसंयोगः। कुतः? सर्वत्रोत्पत्तिविधेर्विनियोगविध्यर्थत्वात्। तथाच मतद्वयेऽपि प्रकृतानुगुण्याभावः। नह्यत्राङ्गप्रधानयोरस्थूलत्वाद्यक्षरयोस्तद्धर्मयोर्वा तदुपासनाभिधायकवेदयोर्विरोधोऽस्ति।

ननु प्रधानानुसारित्वमात्रेऽयं दृष्टान्तः। यथा प्रधानानुसारित्वं वारवन्तीयादिसाम्नां तथा च प्रधानाक्षरानुसारित्वमस्थूलत्वादीनामिति। नहि सर्वसाम्येन भवितव्यमित्यस्ति नियम इति चेन्न। विवक्षितप्रमेये साम्याभावे दृष्टान्तस्यावक्तव्यत्वात्। अन्यथाऽतिप्रसङ्गात्। इह च विवक्षितं प्रमेयं यत्राक्षरं श्रूयते तत्र बृहदारण्यकोक्तमस्थूलत्वादिकमाथर्वणोक्तमदृश्यत्वादिकं चोपतिष्ठत इत्येव। न त्वन्येनान्यस्य बाधः।

किञ्च द्वादशाध्याय्यां मीमांसायामन्विष्याप्येतदनुगुणं दृष्टान्तं न पश्यसि चेत् स्यात् तदैतस्यैव कथञ्चिद् दृष्टान्तत्वघटनाप्रयासः। नचैवम्। यतः 'अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात्' इति द्वितीयन्यायोऽस्ति। तथा हि- 'चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनातु' इति सर्वे निराकाङ्क्षा यजमानपावनार्थाः सत्यप्येकार्थत्वे 'त्रिभिः पावयति' इति वचनात् समुच्चीयन्ते। तेषामन्ते 'अच्छिद्रेण पवित्रेण' इति समाम्नातो मन्त्रः। स किं पूर्वयोरप्यनुषज्यते, तच्छेषश्च। किं वा नानुषज्यते? परस्यैव 'देवस्त्वा पुनातु' इत्यस्यैव शेष इति। तत्र शेषस्तावदेकेनैवानन्तरेण सम्बध्य निराकाङ्क्षः सम्पद्यते। शेषिणस्तु प्रागेव निराकाङ्क्षाः। तेन निष्प्रमाणकोऽनुषङ्ग इति प्राप्ते -

उच्यते। पुनातुशब्दैकवाक्यतामापन्नोऽयमच्छिद्रादिरच्छिद्रत्वाधिकरणद्वारेण यां पावनक्रियां प्रकाशयति सैव क्रिया पूर्वाभ्यामपि मन्त्राभ्यां प्रकाश्यते। तदर्थं वाक्यशेषः प्रधानवशात् तत्रानुकृष्यत इति। एवमिहापि बृहदारण्यके अक्षरवाक्यशेषतामापन्ना अस्थूलादिमन्त्रास्तद्विशिष्टोपासनकरणद्वारा यदक्षरं प्रकाशयन्ति तदेवाक्षरं 'यया तदक्षरमधिगम्यते' (मुण्ड.उ. १.१.५) इत्यादिनाऽऽथर्वणेऽपि प्रकाश्यत इति तदर्थमस्थूलादिवाक्यशेषः प्रधानवशात् तत्राप्यनुकृष्यत इति योजना च सम्भवति। अनुषज्यत इत्यनुषङ्गो वाक्यशेषः 'अच्छिद्रेण' [१]इत्यादिनाऽत्र 'अस्थूलमनणु' (बृ.उ. ३.३.८) इत्यादिः। वाक्यं समाप्यतेऽनेनेति वाक्यसमाप्तिः। 'चित्पतिस्त्वा पुनातु' इत्यादिवाक्यपूरक इव 'यत्तदद्रेश्यमग्राह्यम्' (मुण्ड.उ. १.१.५) इत्यादिवाक्यपूरको भवति। सर्वेषु विद्याविशेषेष्वक्षरस्य तुल्ययोगित्वात्। तत्सम्बन्धाविशेषादिति सूत्रयोजना चात्र स्पष्टैव। तस्मात् 'अनुषङ्गवत् तदुक्तम्' इत्येव सूत्रयितव्यम्। कुतश्च भाष्य-वार्तिककृद्भ्यामव्युत्पादितौपसदन्यायोऽपूर्वोऽवतारितो लोकोत्तरप्रज्ञेनेति वक्तव्यम्।

भामतीकाराणामाशयः

अत्रोक्तं भामत्याम्। यद्यप्यत्र शाबरमुदाहरणमस्त्यग्न्याधानं यजुर्वेदविहितं 'य एवं विद्वानग्निमाधत्ते' इति। तदङ्गत्वेन यजुर्वेद एव 'य एवं विद्वान् वारवन्तीयं गायते य एवं विद्वान् यज्ञायज्ञीयं गायते य एवं विद्वान् वामदेव्यं गायते' इति विहितम्। तानि च सामानि सामवेद उत्पन्नानि। तत्र सन्दिह्यते- किमेतानि यत्रोत्पद्यन्ते तत्रत्येनैवोच्चैष्ट्वेन स्वरेणाऽऽधाने प्रयोक्तव्यान्यथ यत्र विनियुज्यन्ते तत्रत्येनोपांशुना स्वरेणेति। तत्रोत्पत्तिवेदनिबन्धन एव स्वर इति प्राप्ते

१. 'अच्छिद्रेण' इत्यादिः। अत्र 'अस्थूलमनणु' इत्यादिः- इति पाठो युक्त इति भाति।

विनियोजकोत्पत्तिवेदयोः प्रधानगुणभावात् तदनयोर्व्यतिक्रमे विरोधे मुख्येन प्रधानेन विनियुज्यमानत्वेन रूपेण तस्य वारवन्तीयादेर्वेदसंयोगो ग्राह्यः। नोत्पद्यमानत्वेन गुणेन। कुतः? विनियुज्यमानत्वस्य मुख्यत्वेनोत्पद्यमानत्वस्य [१]तदनुगुणस्य विनियुज्यमानार्थत्वादुत्पद्यमानत्वस्येति[२] सिद्धान्त इति। तथाऽपि तुल्यन्यायतयैतदपि शक्यमुदाहर्तुमित्युदाहरणानन्तरं दर्शितं भाष्यकृतेति।

तन्निरासः

तत्र नायं यथाभाष्यानुवादः। याजुर्वेदिकमाधानं तस्य सामवेदे 'वारवन्तीयं गायति' इत्यङ्गविधिरिति भाष्यानुवादस्य नचोदाहरणमपि युक्तम्। 'वारवन्तीयं गायति' इत्यस्याङ्गविधेरपि याजुर्वेदिकत्वादिति दूषणस्य च वार्तिककृन्मतानु-सारिणा पार्थसारथिना कृतत्वात्। नापि वार्तिककारमतानुसारेण 'य एवं विद्वानग्निमाधत्ते' इत्यस्य त्वन्मतेऽपि[३] विधायकत्वानङ्गीकारात्, इत्याद्यनुवादा-चातुर्यं तिष्ठतु, तथाऽपि न्यायः कथमिह तुल्य इति वक्तव्यम्। नह्यत्र कयोश्चिद् विरोधो वा बाध्यबाधकभावो वाऽस्तीत्युक्तम्।

ननु पुरोडाशप्रदानस्य मन्त्रापेक्षया प्रधानत्वादङ्गानां च प्रधानानुसारित्व-नियमेन प्रधानस्याध्वर्युकर्तृकत्वान्मन्त्रस्यापि तत्कर्तृकत्वं यथा, तथा स्थूलत्वाद्यपेक्षयाऽक्षरस्य प्रधानत्वाद् वाक्यान्तरोक्तविद्यानामक्षर-विषयकत्वादस्थूलत्वादिविषयकत्वमिति न्यायसाम्यमिति चेन्न। उक्तरीत्या विवक्षितप्रमेयेऽत्यन्तसदृशेऽनुषङ्गादिन्यायान्तरे सति स्वकल्पितस्याप्रसिद्धस्य न्यायस्य छायामात्रेणोदाहरणायोगादित्युक्तत्वात्।

नापि पूर्वकाण्डे त्वत्कल्पितो न्यायो युक्तः। यतोऽध्वर्युप्रदातृकेऽप्याग्नेयादि-

१. 'तदनु' इति नावश्यकमिति भाति।
२. 'उत्पद्यमानस्य' इति पदमत्र नावश्यकमिति भाति।
३. म. तन्मते

पुरोडाशे होत्रा याज्यानुवाक्ये प्रयुज्येते न त्वध्वर्युणेति व्यवस्थापितम्। औपसद-होमानां दर्विहोमत्वात् तन्मन्त्राणामध्वर्युप्रयोज्यत्वमिति कल्पतरूक्तेर्नैष दोष इति चेन्न। 'अग्नेर्वै होत्रं वेरध्वरम्' इत्यादीनां दर्शपूर्णमासयोर्होतृकर्तृत्वेनैव निश्च-यात्। नानिष्टहोमवद्[१] दर्विहोमत्वाश्रयणे प्रमाणाभावात्। कथञ्चित् तदाश्रयणेऽपि बृहदारण्यकोक्तप्राणविद्यागतोद्गीथत्वादीनामपि प्राणापेक्षायाऽङ्गत्वाच्छान्दो-ग्योक्तविद्यायामपि प्रधानस्य प्राणस्य गतत्वादुद्गीथत्वादीनां संयद्वामत्वादीनां चान्यत्रोपसंहार्यत्वापत्त्या 'अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३.३.७) इत्यधिकरणविरोधेन समग्रसूत्रार्थस्यानुपपत्तेरित्यलं ज्ञानदरिद्रैः कलहेन।

अक्षरधियामिति सूत्रस्य रामानुजाभिमतव्याख्यानम्

केचित्त्विदमेव वाक्यद्वयमुदाहृत्य किमिमेऽक्षरशब्दनिर्दिष्टब्रह्मसम्बन्धितया श्रुता अस्थूलत्वादयः सर्वासु ब्रह्मविद्यास्वनुसन्धेया उत यत्र श्रुतास्तत्रैवेति सन्दिह्य विद्यान्तरस्य रूपभूतानां गुणानां विद्यान्तररूपत्वे प्रमाणाभावात्, ब्रह्मस्वरूप-त्वावगमोपायत्वाभावाच्च न सर्वविद्यास्वनुसन्धेया इति प्राप्य[२] सर्वासु ब्रह्मविद्यासु अस्थूलत्वादीनामवरोधो भवति। सर्वेषूपासनेषूपास्यस्य ब्रह्मणः सामान्यात् समानत्वाद् अस्थूलत्वादीनां तस्मिन् स्वरूपप्रत्यये उपयोगाभावच्चेति सिद्धान्तयन्ति।

तन्निरासः

तन्न। धर्मिमात्रसामान्यस्य संयद्वामत्वादौ व्यभिचारात्। उपास्यरूपेण सामान्यस्य च विद्याभेदाङ्गीकारेण धर्मव्यवस्थितिं वदन्तं प्रत्यसिद्धेः। आनन्दवद् ब्रह्मस्वरूपप्रतिपत्तावुपयोग[३]श्चासिद्धः। नहि सत्यज्ञानादिवाक्यैर्ब्रह्मावगताव-

१. क. अरिष्टहोमवत्। २. म. प्राप्य। ३. म. उपयोगसद्भावः।

स्थूलत्वादीनामस्ति कश्चिदुपयोगः। न केवलमानन्दादिर्ब्रह्मणो साधारणाकार-मुपस्थापयति। प्रत्यगात्मन्यप्यानन्दादेर्विद्यमानत्वादिति चेन्न। अप्रतिबन्धा-नन्दादेरेवेह लक्षणत्वात्। तस्य च प्रत्यगात्मन्यभावात्। अन्यथाऽस्थूल-त्वादीनामपि स्वतो हेयविरहिणि जीवेऽपि सत्त्वेन तैरपि ब्रह्मप्रतीतिर्न स्यात्। स्याच्च सर्वास्वपि ब्रह्मविद्यासु ब्रह्मणः प्रतिपत्त्यर्थं 'सर्वकर्मा सर्वगन्धः सर्वरसः' (छा.उ. ३.१४.४) इत्यादेर्गुणजातस्याप्यनुसन्धेयत्वम्। येन गुणजातेन विना ब्रह्मस्वरूपस्येतरव्यावृत्ततयाऽनुसन्धानं न सम्भवति तदेव सर्वत्रानुवर्तनीयं, नान्यत् सर्वकामत्वादीति चेन्न। आनन्दादीनामस्थूलत्वादीनां च स्वत आनन्दा-द्यात्मनि ईशे विरहेण हेयविरहिणि जीवे सत्त्वेन तदव्यावर्तकत्वात्, सर्व-कामत्वादेरेव तादृशत्वात्। नीलकण्ठीययोजना च नाऽभ्यामतीव भिद्यत इति न पृथङ् निराक्रियत इति।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - **अधिकारनियमसमर्थनादिति**॥ एतेषामित्युपासनेऽधिकारो नाधिके। ततस्तेषां तावदेवोपासनं फलं च। एतेषां तु ततोऽधिकेऽप्युपासनेऽधि-कारस्ततस्तेषामुपासनं फलं च महत्। नत्वर्थसमाजः कुत्रचित् कल्पनीय इत्येवंरूपो नियमः समर्थ्यत इत्यर्थः।

पूर्वपक्षीयचेष्टान्यायस्य व्याख्यानम्

चेष्टान्यायमत्र सङ्गतत्वेन विवृण्वत् 'नच प्रयत्नानुसारेण मुक्तावधिका-नन्दादयः' (न्या.वि.) इति वाक्यं वृद्धिनयेनास्य गतार्थतां परिहर्तुं प्रवृत्तमिति भावेन व्याचष्टे- **नच मुक्तावानन्दतारतम्यमिति**॥ तथाच विवरणे आदिशब्देन ज्ञानोपासादिसाधनमात्रं गृह्यते। चतुर्मुखस्य मुक्तावधिकानन्दः साधनदशाया-मधिकमुपासनं ज्ञानादि च प्रयत्नाधिक्येनैवार्थसमाजमहिम्नैवोपपन्नं नत्वधिकाराधिक्यं प्रयोजकं, विशेषप्रमाणाभावादिति भावो द्रष्टव्यः।

सिद्धान्तीयवस्तुदूषणन्यायस्य व्याख्यानम्

वस्तुदूषणन्यायमत्र सङ्गमयितुं किञ्चित् प्रमेयमध्याहृत्य विवृण्वत् **''अधिकारानुसारित्वात् प्रयत्नस्य। कथञ्चिदधिके यत्ने तत्साधनादिवस्तूनां दूषणप्राप्तेः।**

'स्वाधिकाराधिको यत्नः प्रायशो नोपपद्यते।
कथञ्चिदधिके यत्ने दोषः कश्चित् समापतेत्॥' (ब्र.सू.भा.)

इति वचनाच्च'' (न्या.वि.) इति वाक्यं भाष्योक्तयुक्त्यन्यथासिद्धिशङ्कापरिहारार्थत्वादनन्तरमेव योज्यमिति मन्वानो भाष्यमादौ व्याख्यातुमध्याहार्यं प्रमेयमाह- **अस्त्येवेति॥** तत्रासाङ्गत्यपरिहाराय 'यथा यथाऽधिकारो विशिष्यते एवं मुक्तावानन्दो विशिष्यते' इति भाष्यं भावोक्त्या व्याचष्टे - **मुक्तावानन्दतारतम्यस्य चेति॥** मुक्तावानन्दतारतम्यस्याधिकारितारतम्यव्याप्यत्वात् तदभावे तत्र स्यादिति तेन तत्साधनं नासङ्गतमिति भावः। यथा यथाऽधिकारोऽधिको भवति एवं तथा मुक्तावानन्दोऽपीति भाष्ययोजनया **आधिकारिकाणां** ब्रह्मादीनां **यावदधिकारम्** स्वस्वयोग्यतानुसारेणाभिव्यक्ताधिकानन्दाद्यात्मनाऽव**स्थितिः** इति सूत्रार्थोऽप्यनेनैवोक्तो वेदितव्यः। 'मनुष्येभ्यः' (ब्र.सू.भा. उदाहृतचतुर्वेदशिखावचनम् ३.३.३३) इति प्रमाणोदाहरणं व्यर्थम्। वक्तव्यस्य पूर्णत्वादित्यतः, विमतोऽधिकारतारतम्यवान् आनन्दतारतम्यवत्त्वात्- इति प्रयोगे हेत्वसिद्धिपरिहाराय सार्थकमिति भावेन व्याचष्टे- **ननु मुक्ताविति॥** 'मनुष्येभ्यो गन्धर्वाणाम्' (ब्र.सू.भा. उदाहृतचतुर्वेदशिखावचनम् ३.३.३३) इति प्रमाणवाक्ये 'मुक्तावानन्दो विशिष्यते' इति भाष्यांशाध्याहारेण सम्बन्धो द्रष्टव्यः।

केचित्तु 'यथा यथाऽधिकारो विशिष्यते' इत्येतदारभ्यैव प्रमाणवचनम्। ननु स्ववाक्येन सूत्रव्याख्यानं, प्रमाणोदाहरणेनैव तस्य व्याख्यातप्रायत्वात्। तथाच पूर्वार्धस्यैव विवरणमुत्तरार्धमित्याहुः। अध्यात्मवचनोदाहरणस्य कृत्यमाह-

मुक्तानामानन्दतारतम्यमिति॥ ततश्च हेत्वसिद्ध्यभावेऽप्यप्रयोजकताशङ्का स्यादेवेत्यर्थः। कथमध्यात्मवचनोदाहरणेनाप्रयोजकताशङ्का निराकार्येत्यतो यथाधिकारमिति पदस्वारस्यमनुरुध्य तदभिप्रायवर्णनाय 'अधिकारानुसारित्वात् प्रयत्नस्य' इत्यंशः प्रवृत्त इत्यभिप्रेत्य भावोक्त्या व्याचष्टे- **अधिकारितारतम्येनेति॥** अनेनाधिकारतारतम्येनैव मुक्तावानन्दतारतम्यं, नोपासनादिप्रयत्नेनेति सिद्धान्तोपक्रमेऽध्याहारः। तत्र हेत्वाकाङ्क्षायामुपासनादिप्रयत्नस्याप्यधिकारानुसारित्वादधिकाराभावेऽधिकप्रयत्नस्यैवायोगः। तदर्थमधिकारानुसारेणैतस्यैवाऽनन्दतारतम्यप्रयोजकताऽस्त्वित्यर्थो विवरणांशस्योक्तो भवति। 'कथञ्चिदधिके' इत्यादिविवरणांशं व्याचष्टे- **कथञ्चिदधिकाराधिकेति॥** अनेन कथञ्चिन्माण्डव्यादिवत् साहसाधिक्येन यत्ने स्वाधिकारादधिके क्रियमाणे तत्साधनादिवस्तूनां विघ्नाख्यदूषणप्राप्तेरधिकाराधिको यत्नः न कार्यकारीति शेषः। तथाचाधिकाराधिको यत्न एव नास्ति, कथञ्चिद् विद्यमानो न कार्यकारी, यमपाशादिना विघ्नदर्शनादिति समुदायार्थो द्रष्टव्यः।

भवेदेतत् प्रमेयद्वयं यदि प्रमितं स्यादित्यतोऽन्यत्र दर्शनेनानुमानमेकमागमं च प्रमाणमाह- **स्वाधिकाराधिको यत्न** इति विवरणवाक्ययोजना द्रष्टव्या। भाष्योदाहृताध्यात्मवचने च देवानां सात्त्विकानां जीवानां ज्ञानं चोपासनं च मुक्तावानन्दश्चेत्येते यथाधिकारमेव भवन्ति। न तु प्रयत्नानुसारेण। तच्चोपासनादिकमुत्तरोत्तराधिक्येनैव यथाधिकारमेव भवतीत्यादियोजना द्रष्टव्या।

अत्र केचित् 'अक्षरधियां त्वविरोधः' (ब्र.सू. ३.३.३४) इति सूत्रमधिकरणान्तरं मत्वाऽत्र मुक्तावानन्दतारतम्यं न सम्भवति, सम्भवति वेति चिन्तां प्रस्तुत्य व्याचक्षते। तेषामाशयः। 'ज्योतिश्चरणाभिधानात्' (ब्र.सू. १-१-२४), 'समाकर्षात्' (ब्र.सू. १-४-१६), 'वेधाद्यर्थभेदात्' (ब्र.सू. ३-३-२६) इत्यादौ न्यायसङ्ग्रहविवरणाद्यभावेऽप्युक्तन्यायानुवृत्त्याद्यूहनेनाधिकरणान्तरत्व-

वदिहाप्यधिकरणान्तरत्वमेव न्याय्यमिति। तद्युक्तम्। मुक्तावानन्दतारतम्यस्य वृद्धिनये स्पष्टं प्रतिपादनेनेह न्यायविवरणाद्यभावेऽपि तदूहक्लेशायोगात्। किन्तु मुक्तावानन्दतारतम्ये प्रागभिहिते विरोधमात्रं परिहरणीयम्। तदत्र सङ्गतत्वात् क्रियत इत्येतदधिकरणशेषत्वमेव युक्तमिति मन्वानः सूत्रमवतारयति- **ननु मुक्ताविति॥** अनेन तुश्चार्थः। स चाऽवर्तनीयः। नञश्च भिन्नक्रमेण सम्बन्धः। मुक्तावानन्दाधिक्यदर्शनेनेर्ष्यादिना संसारिवद् विरोधो न शङ्कनीयः, 'अक्षरधियाम्' इति हेतुगर्भम्, अक्षयगुणगणधाम्नि परमानन्दरूपे परमाश्चर्यरूपे यथानन्दभोजके भगवति स्थितधीत्वात्। संसारिषु विषयलम्पटत्वादधिकविषयालाभाद् ईर्ष्यासूयादिना विरोधसम्भवेऽपि भगवति स्थितधियां विषयलम्पटत्वं कथं स्यात्?

किञ्च सामान्यं समानानां भावः। योग्यतया दोषाभावोऽन्वेति। निर्दोषत्वसाम्याच्च। एतत्सिद्ध्यर्थमक्षरधियामित्यावृत्त्याऽत्रापि योज्यम्। अन्यथा ब्रह्मदर्शनमेव न स्यात्। रागमत्सरादिव्यपोहेन बहुजन्मसु निरन्तरोपासकानां हि तद् भवति। ननु निर्दोषत्वमात्रस्य विरोधाभावव्याप्यतायां सामान्यपदं[१] व्यर्थम्। अव्याप्यतायां तु 'ब्रह्मधीत्वान्निर्दोषत्वात् परस्परोपकारित्वाच्च' इति टीकायां सूत्रभाववर्णनमयुक्तम्।

मैवम्। निर्दोषत्वमेव व्याप्यम्। साम्यपदं तु सूत्रानुगतिप्रदर्शनाय भाष्ये प्रयुक्तम्। अत एवानुव्याख्याने 'न तावता विरोधोऽस्ति। निर्दोषत्वात्' इत्येवोक्तम्। ततश्च सौत्रसामान्यपदं निर्दोषत्वपरम्। भाष्ये साम्यपदं तु बुद्ध्या विवेकेन सर्वश इत्यर्थे वर्तमानं 'उत्तमेभ्योऽन्येषां भावात्' इत्युत्तरभाष्येण सम्बद्ध्यते। किञ्च **तद्भावः** तच्छब्द आवर्तते। पञ्चम्यन्तः षष्ठ्यन्तश्च। गुणक्रियादीनामित्यध्याहारः। यद्वा षष्ठ्यन्त एवाऽवृत्तो गुणक्रियादिपरः। तेभ्यः उत्तमेभ्यः,

१. म. सामीप्यपदम्।

तत्प्रसादादिति यावत्। तेषामन्येषाम्, अवराणामिति यावत्, गुणक्रियादीनां सद्भावः। यतोऽवराणां सर्वेऽपि गुणाः सर्वाः क्रिया अपि नियमेनैव पूर्वेषां सुप्रसादनिबन्धना अतश्च न विरोधः। नह्युपकारिणि विरोधो दृष्टः। सच्छिष्यस्य यथा गुरौ स्वोपकारिणि विरोधो नास्ति। तन्मुक्तावविरोधेनावस्थानं तुरश्रुतावुक्तं च। तत्र 'गुरुशिष्यादिभावात्' (ब्र.सू.भा. उदाहृततुरश्रुतिः ३.३.३४) इत्यनेनोपकार्योपकारकभावोऽपि विवक्षित इति सूत्रभाष्ययोर्योजनां सूचयति।

केचित्तु, विरोधो दोषनिबन्धनः। दोषश्च प्राकृतः स्वरूपभूतश्च। प्रकृतिबन्धवैलक्षण्यद्योतनार्थेन तुशब्देनाऽद्यस्याभावे हेतुरुच्यते। नहि प्रकृतिविकाराणां द्वेषेर्ष्यादीनां प्रकृतिबन्धरहिते सम्भवः। द्वितीयस्याभावे हेतुः- **अक्षरधियामिति॥** ब्रह्मधीत्वादित्यर्थः। अब्रह्मधियामयोग्यानां स्वरूपभूतदोषसद्भावेऽपि ब्रह्मधियां तदभावात्। अत एव सामान्यात् उत्तमानामिव दोषाभावसाम्यात्। तद्भावात् तेषामुत्तमेभ्योऽन्येषाम्, अवराणामिति यावत्, 'तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्' (तै.उ. २.१३) इत्यानन्दवल्युक्तापकृष्टानन्दवतामपि भावादिति सूत्रभाष्ये योजयन्ति।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकत्वम्

यथाक्रमं यथाधिकारं चतुर्भिर्बहुभिः सर्वैश्च गुणैस्तैस्तैरुपास्यो यतो विष्णुरत एव, **ज्ञाने** उपलक्षणमेतत्, ज्ञानानन्दादिरूपे मौक्तिके फले **विशेषः** तारतम्यं प्रसिद्धम्। अन्यथा तन्न स्यादिति सङ्क्षेपभाष्यमपि योजनीयम्।[१]

॥ इति यावदधिकारनयः ॥ २० ॥

१. अत्राप्यधिकरणे सूत्रार्थोऽनुपलब्धः।

॥ अथ इयदामननाधिकरणम् ॥ २१ ॥

॥ सूत्रभाष्यम् ॥

॥ ॐ इयदामननात् ॐ ॥ ३-३-३५॥

नामाद्यारभ्य प्राणान्तमुत्तरोत्तरमुत्तमत्वमुक्तम्। न प्राणात् किञ्चिद् भूय उक्तम्। तथाऽपि पूर्ववत् स्यादिति[1] न वाच्यम्। 'प्राणो वाव सर्वेभ्यो भूयान्न हि प्राणाद् भूयान् प्राणो ह्येव भूयांस्तस्माद् भूयान्नाम' इति कौण्ठरव्य-श्रुतेः ॥ ३५ ॥

॥ ॐ अन्तरा भूतग्रामवदिति चेत् तदुक्तम् ॐ ॥
॥ ३-३-३६ ॥

यथा भूतग्राम एकस्मादेक उत्तमोऽस्त्येव, एवं प्राणादपि परमात्मानमन्तरा विद्यत इति चेन्न। प्राणादुत्तमाभावे प्रमाणमुक्तम्। अन्यत्रोत्तमाभावे न प्रमाणम्। दृश्यते चान्यत्रोत्तमत्वम् ॥ ३६ ॥

॥ ॐ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ॐ ॥
॥ ३-३-३७ ॥

प्राणस्य सर्वोत्तमत्वे परमात्मना भेदानुपपत्तिरिति चेन्न। श्रुत्युपदिष्टवदुपपत्तेः। अन्येभ्यः प्राणस्योत्तमत्वं तस्मात् परमात्मनो ह्युपदिष्टम् ॥
॥ ३७ ॥

॥ इतीयदामननाधिकरणम् ॥ २१ ॥

१. ह. स्यदपीति।

॥ तत्त्वप्रकाशिका ॥

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासनाधिकारिणां प्राणावधित्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। निरवधिकत्वे ब्रह्मण एव सर्वगुणोपास्तियोग्यत्वं न स्यादतस्तत् समर्थनीयम्। ये भगवदुपासका प्रकृतास्त एव छन्दोगश्रुतौ नामादिप्राणपर्यन्तं तारतम्येनोक्ताः। प्राणादुत्तमो नोक्तः। त एवोपासनाधिकारिणो विषयः। किं प्राणावसाना न वेति सन्देहः। अनुक्तेरुभयथाऽपि दर्शनं सन्देहबीजम्।

पूर्वपक्षः

नाधिकारिणः प्राणावसाना इति पूर्वः पक्षः। नामादीनां सोत्तरत्वदर्शनात् प्राणादप्युत्तमाधिकारिसाधनसौलभ्यात्, प्राणः स्वोत्तमाधिकारियुक्तः अधिकारित्वात्, नामादिवत् इति। यद्यपि छन्दोगश्रुतौ नामाद्यारभ्य प्राणान्तमुत्तरोत्तरमाधिक्यमुक्त्वा प्राणादुत्तमो नोक्तः। तथाऽप्यनुमानेन प्राणादप्युत्तमाङ्गीकारे न दोषः। प्रमाणादनुक्तेर्दुर्बलत्वात्। अतोऽधिकारिणां प्राणावसानत्वाभावाद्धिरण्यगर्भ एव सर्वगुणोपास्तियोग्य इत्ययुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **इयदिति ॥** नामादिवत् प्राणादधिकोऽधिकारी न साध्यः। किं त्वियदेवाधिकारिणां प्राणावसानत्वमेव। 'प्राणो वाव सर्वेभ्यो भूयान्' इति श्रुतेरिति भावः ॥ ३५ ॥

भूतग्रामदृष्टान्तेन, नाधिकारिणां प्राणावसानत्वमिति शङ्का, तत्परिहारश्च

उक्तमाक्षिप्य समादधत् सूत्रं पठित्वाऽऽक्षेपांशं तावद् व्याचष्टे - **अन्तरेति ॥** न प्राणस्य सर्वाधिकार्युत्तमत्वं युक्तम्। भूतसमूहे नामादावेकस्मादेको

विशिष्टो दृष्ट एवेति तद्दृष्टान्तेन प्राणादप्युत्तमस्य साधयितुं शक्यत्वात्। नच विष्णोरुत्तमत्वेन सिद्धसाधनम्। परमात्मानं श्रियं च विनोत्तमस्य साध्यत्वात्। यद्येवमपि न प्राणादुत्तमस्तर्हि नामादिभ्योऽप्युत्तमो न स्यादिति भावः। परिहारांशं व्याचष्टे- **नेति** ॥ नानुमानेन प्राणादुत्तमः साध्यः। 'प्राणो वाव सर्वेभ्यो भूयान्' (ब्र.सू.भा. उदाहृतकौण्ठरव्यश्रुतिः ३.३.३५) इति प्राणादुत्तमाभावे प्रमाणस्योक्तत्वेनानुमानस्य बाधितविषयत्वादिति भावः। प्राणादुत्तमाभावे नामादेरप्युत्तमो न स्यादधिकारित्वाविशेषादित्यत आह- **अन्यत्रेति** ॥ न केवलमन्यत्रोत्तमाभावे प्रमाणाभावः, किन्तु 'वाग् वाव नाम्नो भूयसी' इत्याद्युत्तमसद्भावे प्रमाणं चास्तीत्याह- **दृश्यते चेति** ॥ ३६॥

प्राणादुत्तमाभावे प्राणपरमात्मनोर्भेदानुपपत्तिशङ्का, तत्परिहारश्च

उक्तमाक्षिप्य समादधत् सूत्रमुपन्यस्याऽऽक्षेपांशं तावद् व्याचष्टे- **अन्यथेति** ॥ यदुदितं 'प्राणो वाव सर्वेभ्यो भूयान्' (ब्र.सू.भा. उदाहृतकौण्ठरव्यश्रुतिः ३.३.३५) इति श्रुतेः प्राणादुत्तमोऽधिकारी नास्तीति तदयुक्तम्। तथाहि। किमयं सर्वशब्दो निरुपचरितसर्वार्थ उत सङ्कुचितार्थः। नाऽऽद्यः। तथा सति प्राणस्य निरुपचरितसर्वोत्तमत्वप्राप्तेः। तथा सति सर्वोत्तमद्वयायोगाद् यः प्राणपरमात्मनोः श्रुत्यादिसिद्धो भेदः सोऽनुपपन्नः स्यात्। नापि द्वितीयः। सर्वशब्दस्य सङ्कुचितार्थत्वे कतिपयाधिकारिव्यतिरिक्तसर्वार्थस्यापि वक्तुं शक्यत्वात्। अतो नैतच्छ्रुत्या प्राणादुत्तमाधिकारिणोऽभावः सिद्ध्यतीति भावः। परिहारांशं व्याचष्टे- **नेति** ॥

युक्तमेवैतच्छ्रुत्या प्राणादुत्तमाधिकार्यभावसाधनम्। सर्वशब्दस्य सङ्कुचितार्थत्वात्। न चोक्तदोषप्राप्तिः। श्रुत्युक्तप्रकारेणैव सङ्कोचोपपत्तेरिति भावः। किं तच्छ्रुत्युपदिष्टमित्यत आह- **अन्येभ्य इति** ॥ सर्वेभ्यः प्राणस्य,

तस्माच्च विष्णोरुत्तमत्वं छन्दोगश्रुतावुक्तमतो विष्णुव्यतिरिक्तसर्वार्थत्वं श्रुतेः स्यान्नान्यथेति भावः। अतोऽधिकारिणां प्राणावसानत्वात् स एव सर्वगुणोपास्तियोग्य इति सिद्धम्॥

॥ इतीयदामननाधिकरणम्॥ २१ ॥

॥ शेषतात्पर्यचन्द्रिका ॥

॥ ॐ इयदामननात् ॐ ॥ ३-३-३५॥

अनन्तरसङ्गतिः

साधनादिवस्तुदूषणप्राप्तेरधिकारानुसारित्वे उपासनाया अङ्गीक्रियमाणे दृष्टवैरूप्याख्यदूषणप्राप्तेर्मुक्त्यर्थोपासकेषु प्राणादप्युत्तमोऽङ्गीकार्य इत्यधिकारितारतम्यपरम्परायाः प्राणावसानत्वाभावेऽधिकारिणां मौक्तिकानन्दतारतम्यपरम्पराया अपि तदभाव इति पूर्वाक्षेपाद्, यथा चतुर्वेदशिखाबलान्मौक्तिकानन्दतारतम्यपरम्परा जीवेषु प्राणावसाना तथाऽधिकारितारतम्यपरम्पराऽपि इत्यतिदेशनाद् वाऽनन्तरसङ्गतिः।

पूर्वपक्षः

प्राणः सोत्तरजीवः स्याद् यथा नामादिरिष्यते।
उपासकत्वाच्छन्दोगश्रुत्यनुक्तिस्तु दुर्बला॥

सिद्धान्तः

अत्राभिधीयते प्राणो वावेत्यादिश्रुतेर्बलात्।
अनुमानबाधितः सर्वशब्दः सङ्कुचितोऽपि सन्॥
नात्यन्तं सङ्कुचेत् किन्तु यथामानं तथा सति।
अधिकार्युत्तमः प्राणः सर्वोच्चो हरिरिष्यताम्॥

इयदामननादिति सूत्रार्थः

सूत्रार्थस्तु-अधिकारिणामिति वर्तते। अत्र तारतम्यपारम्पर्यमित्यध्याहारः। एतदधिकरणविषयतया बुद्धिस्थे नामादिप्राणपर्यन्ते प्रकरणे उपासनाधिकारिणामाम्नातं तारतम्यपारम्पर्यं कौण्ठरव्यश्रुतौ **आमननात्** आम्नानात् **इयदेव** प्राणपर्यन्तमेव न ततोऽधिकं किञ्चित्।

'अन्तरा' इत्यादिसूत्रार्थः

शङ्कते। अन्तराशब्दो विनार्थः। नामादिसमूहे एकस्मादेको विशिष्टो दृष्ट एव। तथैव प्राणादपि कश्चिदुत्तमोऽङ्गीकार्यः।

ननु हरिः श्रीश्चाङ्गीक्रियत एव। मैवम्। हरिं श्रियं च विना शङ्कनात्। नामादिवदेवेत्येवोक्तावेकस्मादेक उत्तमो दृष्ट इति शङ्का नामादिदेवताया अतीन्द्रियत्वादयुक्तेति शङ्का स्यादिति 'भूतग्रामवत्' (ब्र.सू. ३.३.३६) इत्याह। अत्र नामादिवत् प्राणस्य सोत्तमजीवत्वं प्राणवन्नामादेस्तदभावो वा स्यादित्यापादनद्वयं षष्ठीगर्भेण तद्गतबहुव्रीहिणा वा विग्रहेण भूतग्रामवदित्यनेनोक्तम्। द्वयमप्येकोक्त्यैव निराह। तत् तत्र प्राणादप्युत्तमाभावे तत्प्रमाणमुक्तम्। तन्नामादेः सोत्तमत्वे तत्प्रमाणमुक्तम्।

'अन्यथा' इत्यादितृतीयसूत्रार्थः

आद्यचोद्यसमाधानं शङ्कते। 'प्राणो वाव सर्वेभ्यः' (ब्र.सू.भा. उदाहृतकौण्ठरव्यश्रुतिः ३.३.३५) इति प्रमाणमुत्तममात्रं न निषेधति। किन्तु कतिपयोत्तमत्वमेव वक्ति। अन्यथा सर्वोत्तमद्वयायोगेन परप्राणयोर्भेदानुपपत्तेः। अयमपि पक्षो न युज्यते। अन्यथा कतिपयोत्तमत्वे भेदानुपपत्तिरावयोः पक्षस्य। विष्णुव्यतिरिक्तोत्तमत्व इव रुद्रादिव्यतिरिक्तोत्तमत्वेऽपि प्रकृतश्रुत्युपपत्तेः।

प्रतिक्षिपति- नेयं शङ्का युक्ता। छन्दोगश्रुतौ हि विष्णुः प्राणादुत्तम उप-

दिष्टः। न रुद्रादिः तत उपदेशवद् विष्णुव्यतिरिक्तविषयत्वेन सङ्कोचस्य रुद्रादिव्यतिरिक्तविषयत्वेन तदभावस्य चोपपत्तेरिति।

परमतीयाधिकरणानुवादस्तन्निरासश्च

अत्र परैरित्थं व्याख्यातम् - 'द्वा सुपर्णा' (मुण्ड.उ. ३.१.१) इति मन्त्रमाथर्वणिका श्वेताश्वतराश्च पठन्ति। कठाश्च 'ऋतं पिबन्तौ' (कठ.उ. ३.१) इति मन्त्रम्। अत्र विद्याया एकत्वं न वेति संशयः।

एकत्र भोक्तृभोक्तारौ भोक्तारावपरत्र च।
गम्येते लक्षणा मुख्यसम्भवे न च युज्यते॥

नच 'पिबन्तौ' इत्यत्र छत्रिन्यायेन पिबदपिबतोर्लक्षणा। मुख्यार्थसम्भवे तदाश्रयणायोगात्। तस्मादेकत्र भोक्त्रभोक्त्रोर्वेद्यता। अन्यत्र भोक्त्रोरेवेति वेद्यभेदाद् विद्याभेद इति प्राप्तेऽभिधीयते -

उत्पन्ना द्वित्वविज्ञानात् साम्ये त्वौत्सर्गिके सति।
उपक्रमोपसंहारात् पिबत्ता बाध्यते द्वयोः॥

विद्योत्पत्तिसमय एव मन्त्रद्वयेऽपि द्वाविति पिबन्ताविति च द्वित्वप्रतिपत्तेः समानतौत्सौर्गिकतयोपक्रमोपसंहारसंवलिततया च पिबन्तावित्येतच्छत्रिन्यायेन पिबदपिबत्समुदायं प्रति समूहिनौ लक्षयतीति। तन्न। '' 'गुहां प्रविष्टावात्मानौ' (ब्र.सू. १.२.११) इत्यत्र सिद्धोऽप्यर्थः प्रपञ्च्यते'' इति भाष्यभामतीभ्यां[1] स्वयमेवार्थवैयर्थ्याङ्गीकारात्।

उक्तपूर्वपक्षानुपपत्तिः

अयुक्तश्चात्र पूर्वपक्षः। स किं 'ऋतं पिबन्तौ' (कठ.उ. ३.१) इति वाक्यस्य

१. म. भाष्यभामत्याम्।

जीवमात्रपरत्वाङ्गीकारेण प्रवर्तते, उत वस्त्वन्तरसहितजीवपरत्वाङ्गीकारेण। नाऽद्यः। द्विवचनानुपपत्तेः। जीवव्यक्त्यन्तरविवक्षायां तु पुनर्द्विवचनानुपपत्तिरेव। जीवव्यक्तीनां बहुत्वात्। एकस्मिञ्छरीरे जीवद्वयानुपपत्तेश्च। द्वितीयेऽपि तद्वस्त्वन्तरं न तावद् बुद्ध्यादिरूपं जडम्। सजातीयस्यैव द्वितीयस्येष्टत्वात्। नापि ब्रह्मचैतन्यम्। तस्य पातृत्वाभावेन पिबत्प्रातिपदिकस्वारस्यभङ्गात्। एकत्र भोक्त्रभोक्त्रोर्वेद्यताऽन्यत्र भोक्त्रोरेवेति वेद्यभेदाद् विद्याभेद इति पूर्वपक्षरचनानुपपत्तेश्च। किञ्च 'ऋतं पिबन्तौ' (कठ.उ. ३.१)इति वाक्यमुदाहृत्य छत्रिन्यायेन जीवब्रह्मपरत्वं व्यवस्थाप्य तन्न्यायेन 'द्वा सुपर्णा' (मुण्ड.उ. ३.१.१) इति वाक्यस्यापि जीवब्रह्मपरत्वातिदेशेन वेद्यैक्यस्य गुहाधिकरण एव साधितत्वेनेह पुनः पूर्वपक्षानुदयः।

ननु पूर्वत्र साधितोऽपि वेद्याभेदो न युक्तः। अशनानशनछायातपत्वादिधर्मभेदस्य स्फुटत्वादित्यभ्यधिकशङ्कोत्थानान्न दोष इति चेन्न। 'यः सेतुरीजानानामक्षरं ब्रह्म तत् परम्' (कठ.उ.३.२) इति वाक्यशेषेण ब्रह्मपरत्वे सिद्धे धर्मभेदस्य यथाकथञ्चिन्नेयत्वात्। ननु सन्देहे हि वाक्यशेषान्निर्णयो न त्वन्यतरपक्षनिर्धारणे। पिबत्प्रातिपदिकस्य जीवे मुख्यत्वेन ब्रह्मणि लाक्षणिकत्वेन च ब्रह्मपरत्वाभावः प्रधारितः। नच मुख्यलाक्षणिकग्रहणविषयो विशयः सम्भवति। तस्मादसन्दिग्धे वाक्यशेषस्यानिर्णायकत्वाद् भवति पुनराशङ्केति चेन्न। 'निषादस्थपतिं याजयेत्' इत्यादौ षष्ठीतत्पुरुषकर्मधारयविषयस्य 'रमणीयचरणा रमणीयां योनिमापद्यन्ते' इत्यादौ मुख्यपरम्परासम्बन्धविषयकस्य च विशयस्य दर्शनात्।

ननु त्रैवर्णिकानामेवाधिकार उत जात्यन्तरस्येति तत्र संशयः। नचायं मुख्ये लाक्षणिकग्रहणविषयः। परन्तु किमत्र षष्ठीतत्पुरुषः समास उत कर्मधारय इत्यादिस्तदर्थसंशयोऽस्ति। स तु न प्रधानसंशयः। एवं निश्शेषभुक्तकर्माण आयान्त्युत सशेषभुक्तकर्माण इत्येव संशयः। तदर्थं 'रमणीयचरणाः' इत्यत्र रमणीयं चरणं येषां ते इति विवक्षितविग्रहे मतुबर्थः परम्परासम्बन्धः साक्षात् सम्बन्धो वेति संशीयत इति चेन्न। तदर्थसंशयस्यापि तुल्यबलत्वाभावे उदयायोगात्। उदये वा प्रधानसंशयस्यापि तदुपपत्तेः। इहापि किमत्र विद्याया एकत्वं न वेत्यत्र संशयः। तदर्थं वेद्यभेदोऽस्ति न वा। तदर्थं पिबत्प्रातिपदिकं मुख्यं ग्राह्यमुत लाक्षणिकमित्यादिः संशय इत्यङ्गीकारोपपत्तेश्च। अन्यथा तवापि मते विशयस्याधिकरणाङ्गत्वेनावश्यमुपपादनीयतया गत्यभावप्रसङ्गात्।

सिद्धान्तोऽप्यनुपपन्नः

सिद्धान्तश्च 'ऋतं पिबन्तौ' (कठ.उ. ३.१) इति वाक्यस्य ब्रह्ममात्रपरत्वमाश्रित्य प्रवर्तत उत जीवब्रह्मोभयपरत्वम्। नाऽद्यः। पातृत्वानुपपत्तेः। द्विवचनानुपपत्तेश्च। नच बुद्धिसाहित्येन तदुपपत्तिः। 'द्वा सुपर्णा' (मुण्ड.उ. ३.११) इति विद्यायां जीवेश्वरयोर्वेद्यता। 'ऋतं पिबन्तौ' इति विद्यायां तु [१]ब्रह्मबुद्ध्योरिति वेद्यभेदापत्त्या विद्यैक्यासिद्धेश्च। नापि जीवसाहित्येन द्विवचनोपपत्तिः। द्वितीयपक्षान्तर्भावात्। नहि मन्मत इव त्वन्मतेऽखण्डवादविरोधेन ब्रह्मणो रूपद्वयमङ्गीकर्तुं शक्यते। येनैकस्मिञ्छरीरेऽपि रूपभेदविवक्षया द्विवचनाद्युपपत्तिः स्यात्। एतेन ब्रह्मणः पातृत्वाभावमुपेत्य पिबत्प्रातिपदिकस्य लक्षणाङ्गीकारेण सिद्धान्तवर्णनं च निरस्तम्।

किञ्च लक्षणाश्रयणस्योभयत्राप्यविशेषात् जीवबुद्धिपरत्वपूर्वपक्षस्य कथं निराकरणम्? अत एव न द्वितीयः। किञ्च न तावत् प्रातिपदिके जहत्स्वार्थलक्षणा। तथा सति जीवग्रहणाभावेन जीवब्रह्मोभयपरद्वासुपर्णेत्यादिविद्याभेदापातात्। नाप्यजहत्स्वार्थलक्षणा। 'यः सेतुरीजानानामक्षरं ब्रह्म तत् परम्' (कठ.उ. ३.२) इत्यादिवाक्यशेषविरोधात्। नच ब्रह्मणोऽप्यत्र विवक्षितत्वान्न

१. म. ब्रह्मब्रह्मबुद्ध्योः।

विरोध इति वाच्यम्। तत एव ब्रह्मपरत्वस्यैव सम्भवेन जीवपरत्वानङ्गीकारे बाधकाभावात्। नच पातृत्वानुपपत्तिर्बाधिका। ब्रह्मण्यपि तत्सम्भवस्यान्यत्रोक्तत्वात्। न च द्वित्वानुपपत्तिः। गुरावात्मनि बहुवचनवदुपपत्तेः। इन्द्रियादिभेदेन तत्र तदुपपत्तौ 'आत्माऽन्तरात्मेति हरिरेक एव द्विधा स्थितः' (ब्र.सू.भा.उदाहृतबृहत्संहितावचनम् १.२.११) इति रूपभेदेनेहापि द्विवचनोपपत्तेः। 'द्वित्वं चैकस्य युज्यते' इत्यादिनैकत्वद्वित्वयोरविरोधस्यान्यत्र प्रतिपादितत्वाच्च। तस्माद् 'ऋतं पिबन्तौ' (कठ.उ. ३.१) इत्यत्र जीवब्रह्मोभयाङ्गीकारेण सिद्धान्ते प्रवृत्ते 'द्वा सुपर्णा' (मुण्ड.उ. ३.११) इत्यादौ च तदङ्गीकाराद् वेद्यभेदात् कथं विद्यैक्यमिति स्वयमेव विभावय।

एतेन 'द्वा सुपर्णा' (मुण्ड.उ. ३.११) इत्यादिश्रुतौ 'अत्त्यनश्नन्' इति शब्दाभ्यां व्यक्तिभेदप्रतीतिवदिहापि छायातपशब्दाभ्यां तत्प्रतीतेर्विद्यैक्यमिति निरस्तम्। सज्जनदुर्जनभेदेनैकस्यैव छायातपत्वयोरन्यत्रोपपादितत्वात्। 'द्वा सुपर्णा' (मुण्ड.उ. ३.११) इति मन्त्रे जीवगतं कर्तृत्वं बुद्धौ निक्षिप्य निरुपाधिको जीवो ब्रह्मत्वेन निरूप्यते। 'ऋतं पिबन्तौ' (कठ.उ. ३.१) इत्यत्र चौपाधिके जीवे कर्तृत्वमुक्तोपाधिविनिर्मुक्तः स एवाभोक्तृपरमात्मभावेन निरूप्यत इति कल्पतरूक्तेः कथं वेद्यभेद इति चेत्। भवति भवतोऽयं मनोरथः यद्यत्र त्वदभिप्रायाभिलापकः[१] कश्चिच्छब्दः श्रूयते।

किञ्च यदि 'द्वा सुपर्णा' (मुण्ड.उ. ३.११) इत्यत्र जीवे भासमानं कर्तृत्वं बुद्धौ निक्षिप्येत तर्हि 'पिबन्तौ' इत्यत्रापि तदापत्त्या पातृत्वाभावेन जीवसहिते ब्रह्मणि छत्रिन्यायेन पिबत्प्रातिपदिके लक्षणा सम्भवतीति पुनर्वेद्यभेद एव स्यात्। एतेनानयोर्मन्त्रयोः इयत् इयत्तावच्छिन्नं द्वित्वोपेतं वेद्यमेकमेव। 'द्वा

१. म. अभिधायकः।

सुपर्णा', (मुण्ड.उ. ३.११) 'ऋतं पिबन्तौ' (कठ.उ. ३.१) इति च द्वित्वामननात् इति सूत्रार्थकथनं निरस्तम्। द्वित्वामननस्यान्यथोपपादितत्वात्।

इयदामननादिति सूत्रस्य अद्वैतिशैवाभिमतार्थनिरासः

इयत् अस्थूलत्वादिविशेषितमानन्दाद्येव सर्वत्रानुसन्धेयं न तु सर्वकर्मत्वसर्वगन्धत्वादि। आमननात्। ब्रह्मानुसन्धानाद्धेतोर्ब्रह्मस्वरूपानुसन्धानार्थमिति यावत्, इति पूर्वाधिकरणशेषतया 'इयदामननात्' इति सूत्रस्य केषाञ्चिच्छैवस्य च व्याख्यानमयुक्तम्। स्वातन्त्र्ये सम्भवति शेषताश्रयणायोगात्। क्लिष्टकल्पनाच्च। सर्वकामत्वादीनामप्युक्तरीत्या ब्रह्मस्वरूपप्रतिपत्त्युपयोगाच्च।

अन्तरेति सूत्रस्य पृथगधिकरणत्ववादिनाम् अद्वैतिनां मतानुवादः

'भूतग्रामवत् स्वात्मनः' इत्यपपाठेन पठित्वा पृथगधिकरणमारभन्ते। 'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः। तन्मे व्याचक्ष्व' (बृ.उ. ३.४.२) इत्येवं द्विरुषस्तिकहोलप्रश्नयोर्नैरन्तर्येण वाजसनेयिनः समामनन्ति। तत्र संशयः। एका विद्या नाना वेति।

पुनःश्रुत्यर्थवत्त्वाय प्राणादिव्यतिरेकिणः।
एकत्रोपासनाऽन्यत्र बुभुक्षाद्यतिलङ्घिनः॥

उषस्तिप्रश्ने 'यः प्राणेन प्राणिति स आत्मा सर्वान्तरः' (बृ.उ. ३.४.१) इत्यादिना प्राणादिव्यतिरिक्त आत्मोपास्यः। कहोलप्रश्ने तु 'योऽशनाया पिपासेऽत्येति' (बृ.उ. ३.५.१) इत्यादिनाऽशनायाद्यतीतो ध्येय इति वेद्यभेदाद् विद्याभेदः। अन्यथैकस्यामेव शाखायां नैरन्तर्येण द्विराम्नानमनर्थकं स्यात्। नच 'तत्त्वमसि' (छा.उ. ६.८.७) इत्यादाविवोपपत्तिः। तत्र 'भूय एव मा भगवान् विज्ञापयतु' (छा.उ. ६.८.७) इति पूर्वापरसाकाङ्क्षत्वावगमाद् विद्यैक्ये निश्चितेऽभ्यासस्य तात्पर्यद्योतनार्थत्वेन सार्थक्येऽपीह विद्यैक्यावगमकारणा-

भावात्। नच कहोलप्रश्ने 'यदेव साक्षादपरोक्षाद् ब्रह्म' (बृ.उ. ३.४.१) इत्युषस्तिप्रश्नोक्तं 'यत् तदेव मे पुनर्व्याचक्ष्व' इत्यर्थप्रतिपादकैवकारोऽस्तीति चेन्न। यत् साक्षादेव न कदाचित् परोक्षमित्येवं भिन्नक्रमेणान्वयाङ्गीकारात्।

एवं प्राप्तेऽभिधीयते- अत्र हि 'कतमो याज्ञवल्क्य' (बृ.उ. ३.४.१,२) इति प्रश्ने 'एष ते आत्मा सर्वान्तरः' (बृ.उ. ३.४.१) इति प्रतिवचने च सिद्धं वस्तु निरूप्यते। नोपास्तिर्विधीयते। विधेः प्रवर्तकत्वेनाप्राप्तगोचरत्वं, प्राप्तौ स्वत एव प्रवृत्तेः पुनः श्रुतिवैयर्थ्यमिति समिदादौ भेदकत्वम्। वस्तुस्वरूपं तु हितं पुनः पुनरुपदिशन्त्यादरेण प्रतिपत्त्यर्थमाप्ताः। विशेषतस्तु वेदः पितृभ्यामभ्यर्हित इति नाभ्यासवैयर्थ्यमिति विद्यैक्यमेवेति।

तन्निरासः

तन्न। विशेष्यस्य वेद्यस्य भेदाभावात् किमत्र विद्याभेदो निराक्रियते अथ विशेषणस्य। आद्ये विशेष्यस्य ब्रह्मणः प्राणस्य च पर्यङ्कोपकोसलविद्ययोर्वाजिछन्दोगप्राणविद्ययोश्च भेदाभावेन विद्याभेदो न स्यात्। नचेष्टापत्तिः। '[१]अन्यथात्वं च शब्दादिति चेन्नाविशेषात्' (ब्र.सू. ३-३-७) इत्याद्यधिकरणविरोधापातात्। सर्वधर्मसङ्करापत्तेश्च। नान्त्यः। उषस्तिब्राह्मणे प्राणादिभेदस्य कहोलब्राह्मणे अशनायाद्यतीतत्वादेश्च विशेषणस्य भिन्नभिन्नत्वात्। अत एव 'तत्त्वमसि' (छा.उ. ६.८.७) इत्यादिवाक्येष्विवाभ्यासस्तात्पर्यार्थ इति निरस्तम्। विद्यैक्यस्यैवाभावात्। अन्यथा यस्तु ग्रहातिग्राह्यैः ग्रस्तः संसरति सोऽस्ति नास्ति। अस्तित्वे च किंलक्षणः स इत्यात्मनश्च[२] विवेकाधिगमायोषस्तिप्रश्न आरभ्यते। बन्धनं सप्रयोजनमुक्तम्। यस्य बन्धस्तस्याप्यस्तित्वमधिगन्तव्यम्। अव्यतिरिक्तत्वं च तस्येदानीं मोक्षसाधनं ससंन्यासमात्मज्ञानं वक्तव्यमिति कहोलप्रश्न आरभ्यते इत्युषस्तिकहोलब्राह्मणयोरवताराय त्वदीयबृहदारण्यक-

१. म. अन्यथात्वं शब्दात् २. म. एव

भाष्ये प्रतिपाद्यभेदकथनं न स्यात्। तत्र हि जीवस्वरूपमेकत्र प्रतिपाद्यं तत् तदन्यत्र तद्विलक्षणं ब्रह्मस्वरूपमिति स्पष्टं प्रतिभासते। अन्यथा विशेषशङ्कानिरासाय तत्स्वरूपमेव पुनः पुनरभ्यस्यति 'तत्त्वमसि' (छा.उ. ६.८.७) इत्यादाविवेत्यवक्ष्यत्। न तु किन्त्वलक्षणः सः अव्यतिरिक्तत्वं चेत्यादीति।

अन्तरेति सूत्रस्य अद्वैत्यभिमतार्थनिरासः

एतेनोषस्तिकहोलब्राह्मणयोः स्वात्मन एकस्यैवाऽम्नानं नतु द्वयोरात्मनोः। अन्यथाऽन्तरा सर्वान्तरत्वं भूतग्रामवदेकस्याञ्जसं न स्यात्। यथा 'पृथिव्या आपोऽन्तरा अद्भ्यस्तेजोऽन्तरं तेजसो वायुर्वायोश्चाऽकाशः' इति देहे सर्वान्तरत्वमाकाशस्यैव वाय्वादीनां त्वापेक्षिकं तदिति नाञ्जसं सर्वान्तरत्वम्।

अथवा सर्वान्तरत्वं स्वात्मन एकस्यैवानयोर्ब्राह्मणयोराम्नायते भूतग्रामवत्। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' (श्वे.उ. ६.११) इत्यस्मिन् मन्त्रे समस्तेषु भूतग्रामेषु यथा एक एव सर्वान्तर आम्नायते, तस्माद् वेद्यैक्याद् विद्यैक्यमिति सूत्रव्याख्यानं निरस्तम्। बह्वध्याहारप्रसङ्गात्। अन्तरेत्यस्य भावप्रधानत्वेऽप्याकारान्तत्वायोगात्। 'एष ते आत्मा सर्वान्तरः' (बृ.उ. ३.४.१) श्रुत्यनुसाराय 'सर्वान्तरो भूतग्रामवत्' इति निर्देशापातात्। 'एष ते आत्मा' (बृ.उ. ३.४.१) इति श्रुतिसङ्ग्रहाय पूर्वपदान्वयसिद्धये च स्वात्मेति प्रथमान्तपदकल्पनौचित्येऽपि षष्ठ्यन्तपदकल्पनस्य सूत्रकृद्द्रोहाचरणमात्रनिमित्तत्वाच्च। तत्रैकः सर्वभूतेषु गूढः इति साक्षादेवैकत्वस्योक्त्या दृष्टान्तीकरणायोगाच्च।

अन्यथा भेदेत्यादिसूत्रस्य अद्वैत्यभिमतव्याख्यानं तन्निरासश्च

अन्यथा विद्याभेदेऽनभ्युपगम्यमाने आम्नान**भेदानुपपत्तिः**। पुनरुक्तिवैयर्थ्यापत्तिरिति चेन्न। **उपदेशवत्** 'स आत्मा तत्त्वमसि श्वेतकेतो' (छा.उ.

६.८.७) इति नवकृत्वोऽप्युपदेशेऽपि यथा विद्याभेदो न भवति एवमिहापि भविष्यतीति 'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्' (ब्र.सू. ३.३.३७) इत्यनन्तरसूत्रव्याख्यानं चायुक्तम्। 'स आत्मा तत्त्वमसि' (छा.उ. ६.८.७) इत्यादिनवकृत्वोऽभ्यासेषु बहुभिर्दृष्टान्तैरुपमीयमानस्यैक्यस्य भेदाभावेनाभ्यासस्य भेदकत्वाभावेऽपीह भिन्नभिन्नधर्मप्रतिपादनेन भेदकत्वसम्भवात् । अन्यथा समिदादावपि तदभावापातात्। विधावेवाभ्यासो भेदको न सिद्धार्थ इति तु न साम्प्रतम्। नियामकाभावात्। इहापि विध्युन्नयनसम्भवाच्च। 'ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा' (ब्र.सू.भा.) इति वचनाद् उपासनाविध्युन्नयनाभावे वैयर्थ्यप्रसङ्गात्। अन्यथा सर्वास्वपि विद्यासु गुणानामर्चिरादेश्चोपसंहार्यत्वोक्तिर्न स्यात्। पूर्वस्मिन् ब्राह्मणे कार्यकारणव्यतिरिक्तस्याऽत्मनः सद्भावः कथ्यते। इतरस्मिंस्तु तस्यैवाशनायादिसंसारधर्मातीतत्वं कथ्यत इतीहैव त्वद्भाष्ये प्रतिपाद्य-धर्मस्योक्तेरेकप्रकारासकृदुक्तिरूपाभ्यासाभावेन फल्गुशङ्कापरिहारपरत्वेन सूत्रयोजनानुपपत्तेश्च। धर्मिण ऐक्येऽनभ्यासत्ववर्णने तूक्तोऽतिप्रसङ्गः।

शैवमतीयव्याख्यानुवादस्तन्निरासश्च

केचिच्छैवाश्च- 'अन्तरा भूतग्रामवत् स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्' इत्यपपाठेनैकमेव सूत्रं पठित्वा पूर्ववदेव बृहदारण्यकवाक्य-मुदाहृत्याधिकरणान्तरं कृत्वा सूत्राक्षराण्येवं योजयन्ति। **अन्तरा** 'य आत्मा सर्वान्तरः' (बृ.उ. ३.४.१) इति सर्वान्तरशब्दघटित उषस्तिप्रश्नः **भूतग्रामवत्** स्वात्मन प्रत्यगात्मन आपेक्षिक एवं जीवविषयकोऽङ्गीकर्तव्यः। न परमात्मविषयक इति यावत्। अन्यथा प्राणनादिहेतुत्वाशनायाद्यतीतत्वविषयप्रतिवचनभेदानुप-पत्तिरिति चेत्। नात्र प्रत्यगात्मविषयत्वं प्रश्नद्वयं प्रतिवचनद्वयं च परमात्मन्येक-स्मिन्नेवोपास्ये सम्भवति। उपदेशवत्। यथा 'स्तब्धोऽस्युत तमादेशमप्राक्षीः' इति प्रक्रान्तायामेकस्यामेव सद्विद्यायां 'भगवांस्त्वेव मे तद्ब्रवीतु' (छा.उ. ६.१.७), 'भूय एव मा भगवान् विज्ञापयतु' (छा.उ. ६.१.७) इत्यादिका

प्रश्नावृत्तिः प्रतिवचनभेदश्चोपास्यमाहात्म्यविशेषप्रतिपादनपरत्वेन दृश्यते तद्वदिति।

तन्न। अन्तराशब्दस्यान्तरशब्दघटितप्रश्नपरत्वे लक्षणाप्रसङ्गात्। अव्ययोपा-दानायोगात् । सूत्रान्तराणामप्येवमैक्येन योजनासम्भवेन सम्प्रदायपरम्परा-प्राप्तभेदमनादृत्यैकसूत्रत्वाश्रयणायोगाच्च।

अयुक्तश्चायमर्थः । पूर्वत्र प्रत्यगात्मन इतरत्र परमात्मनश्च प्रतिपाद्यत्वे बाधकाभावात् । प्रश्नप्रतिवचनभेद-प्रष्टृभेद-प्रकरणभेदाभ्यासादेः साधकस्य सत्त्वाच्च। सर्वान्तरत्वस्य च जीवे आपेक्षिकत्वोक्तेः[1]। अस्तु वोभयत्र परमात्मैक एव प्रतिपाद्यः। तथाऽपि न प्रतिपाद्यैक्यमात्रं विद्यैक्यसाधकम्। तथा सति कृत्स्नस्य ब्रह्मकाण्डस्यैव साक्षात् परम्परया वा ब्रह्मप्रतिपाद्यतायाः सर्वाङ्गीकृतत्वात् क्वापि विद्याभेदो न स्यात्। किन्तूपास्यगुणैक्यमेव। तत्त्विह नास्तीत्युक्तमेव। एतेन दृष्टान्तः प्रत्युक्तः। तत्र 'ऐतदात्म्यमिदं सर्वम्' (छा.उ. ६.८.६,७) इत्या-द्युपास्यगुणैक्यप्रत्यभिज्ञानाद् विद्यैक्येऽपीह तदयोगादित्यलम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - अधिकरणसङ्गतिं व्यतिरेकमुखेन व्यनक्ति- **निरवधिकत्वे ब्रह्मण एवेति ॥** प्राणस्यैव हिरण्यगर्भत्वादिति भावः। 'सर्वे गुणा ब्रह्मणैव ह्युपास्याः' इत्यतीताधिकरणेषु 'रुद्राद् ब्रह्मणः' इति पूर्वाधिकरणे च ब्रह्मणः प्रकृतत्वादेवमुक्तिरिति ध्येयम्।

दृष्टवैरूप्यन्यायस्य व्याख्यानम्

दृष्टवैरूप्यन्यायं वैरूप्यप्रतियोग्यादिविवरणपूर्वकं विवृण्वत् **'नचैकस्मादेको विशिष्टो दृष्ट एवेति प्राणाद् विशिष्टजीवाभावे दृष्टवैरूप्यमिति दोषः'** (न्या.वि.) इति वाक्यं विवक्षिताध्याहारेण व्याचष्टे- **नाधिकारिणः प्राणावसाना**

---

१. म. आपेक्षिकत्वोपपत्तेः।

इति ॥ एकस्मादेको विशिष्टो दृष्ट इत्यस्यार्थः- **नामादीनां सोत्तरत्वदर्शनादिति** ॥ दर्शनमात्रमधिकारिणां प्राणावसानत्वापसाधकं[1] कथं स्यादित्यत आह- **प्राणादप्युत्तमाधिकारिसाधनसौलभ्यादिति** ॥

नन्वत्र न सौलभ्यम्। अधिकारिणां चेतनत्वेन प्राणावसानत्वाभावे साध्ये उभयसम्प्रतिपन्नदृष्टान्ताभावादित्यतः स्वयं प्रयोगं दर्शयति- **प्राणः स्वोत्तमाधिकारियुक्त इति** ॥ अर्थादधिकारिणां प्राणावसानत्वाभावः सिद्ध्यतीति भावः। अत्र विवरणाभिप्रेते प्रयोगे बाधपरिहाराय भाष्यं प्रवृत्तम्। तदर्थसङ्ग्रहाय विवरणे एवकारः प्रयुक्त इति भावेन बाधकमाशङ्कते- **यद्यपि छन्दोगश्रुताविति** ॥ उत्तमानुक्त्योत्तमाभावोऽनुमीयते। तथाच प्रकृतानुमानस्य, प्राणः स्वोत्तमाधिकारियुक्तः न भवति, तथाऽनाम्नानात्, विष्णुवत्, इत्यनुमानेन बाधः सत्प्रतिपक्षो वा स्यादिति भावः। 'तथाऽपि पूर्ववत् स्यात्' इति भाष्याभिप्रायमाह- **तथाऽप्यनुमानेनेति** ॥ अनुमानं तूक्तमेव। उक्तानुमानाद् प्रबलं समबलं वा तत् कथं न दोष इत्यत आह- **प्रमाणादनुक्तेर्दुर्बलत्वादिति** ॥ यद्यप्यनुक्तिरप्यनुमानम्। तथाऽपि न समम्। नापि प्रबलम्। किन्तु दुर्बलमेव। अनुकूलतर्काभावात्। अत एव चाप्रमाणम्। मदुक्तानुमानं त्वनुकूलतर्कसद्भावात् प्रमाणमेव। प्रमाणादप्रमाणस्य दुर्बलत्वं सिद्धमेव। अतो न बाधप्रतिपक्षयोरवकाश इति भावः। तथात्र यत एकस्मादेको विशिष्टो दृष्ट इति तस्मात् प्राणादप्युत्तमोऽनुमेय इति। तत एव 'नाधिकारिणः प्राणावसानाः' इति विवरणे पूरणेनैव 'इति' इत्यन्तपूर्वार्धयोजना द्रष्टव्या। कथमत्रानुकूलतर्कसद्भाव इत्यतः 'प्राणाद् विशिष्टजीव' इत्युत्तरार्धं व्याख्यातुं द्वितीयसूत्रे पूर्वपक्षांशयोजनां दर्शयन् पूर्वोक्तमनुवदति- **न प्राणस्य सर्वाधिकार्युत्तमत्वमित्यादिना** ॥

ननु 'प्राणो वाव सर्वेभ्यो भूयान्' इति श्रुत्या पूर्वोक्तानुमानेन च बाधितत्वात्

१. म. प्राणावसानत्वाभावसाधकं

कथमनुमानं प्रमाणं स्यादित्येतच्छङ्कानिवर्तकत्वेनोत्तरार्धं व्याचष्टे- **यद्येवमपीति** ॥ प्राणाद् विशिष्टजीवाभाव इत्यस्यार्थः- **नच प्राणादुत्तम इति** ॥ दृष्टवैरूप्यमित्यस्यार्थः- **नामादिभ्योऽप्युत्तमो न स्यादिति** ॥ यस्मात् तदनङ्गीकारे दोषोऽस्ति अतो मदुक्तानुमानं प्रत्यनुमानात् प्रबलम्। श्रुतिस्तु सावकाशेति विवरणाभिप्राय इति भावः। परमात्मानं श्रियं चान्तरेत्यस्य सङ्ग्रहो विवरणे जीवेत्यनेन कृतः। श्रीपरमात्मनोर्जीवकोटौ प्रवेशाभावादिति द्रष्टव्यम्।

सिद्धान्तीयप्रतिक्रियाविरोधन्यायव्याख्यानम्

'प्रतिक्रियाविरोधश्च' इत्यत्र प्रतिक्रियापदं विधानोपलक्षणम्। चश्चाऽद्यर्थ इति भावेन विधानोपदर्शनपूर्वकं प्रतिक्रियाविरोधन्यायं विवृण्वत् ' **''यः सर्वमवजानीयाद् ऋते देवं नारायणं देवीं च परमां श्रियं स प्राणानवरुद्ध्येमं मन्त्रमावर्तयीत - आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः। घोषा इदस्य[1] शृण्विरे न रूपं तस्मै वाताय हविषा विधेमेति। स ह्येतेषां भूतानां वरिष्ठो न ह्येतस्मात्[2] कश्चनोपरि विना देवं नारायणं देवीं च परमां श्रियम्'' इति प्रतिक्रियाविधानादिविरोधात्'** (न्या.वि.) इति वाक्यं 'प्राणादुत्तमाभावे प्रमाणमुक्तम्' इत्यन्तेन भाष्यैणैकार्थतां नयन् भावोक्त्या व्याचष्टे- **नानुमानेन प्राणादुत्तमः साध्य इति** ॥ बाधितविषयत्वादित्यनेन विवरणगतं विरोधपदं बाधपरमित्युक्तं भवति। श्रुतेः सावकाशत्वमनुमानस्यानुकूलतर्कसाहित्यं च निराकरिष्यत इति भावः। ततश्चायं विवरणार्थः। यः मुख्यप्राणः देवं नारायणं परमां श्रियं च विना तद्व्यतिरिक्तं सर्वं जगदवजानीयात् मा मोहमापद्यथेत्यादिना प्रतिकुर्यात् अतस्तदधिको न मन्तव्य इति श्रुतिशेषः। तथा योऽधिकारी नारायणं श्रियं च विना सर्वं पूर्णं मुख्यप्राणमवजानीयाद् अवमन्येत तस्मादप्युत्तमः नामादेरिव किं न स्यादिति जानीयात् सः मुख्य-

१. म. यदस्य २. ह. नह्यस्मात्

प्राणावमन्ता प्राणानायम्य वक्ष्यमाणं मन्त्रं जपेत्। मन्त्र एवोच्यते। यो देवानां स्वामी चेतनाचेतनात्मकप्रपञ्चस्य गर्भवद् धारकः गर्भवदन्तर्गतो वा, एषः श्वासोच्छ्वासादिप्रवर्तकः क्रीडया[२] यथेच्छं सञ्चरति। यस्यास्य देवस्य कर्णयोः पिधानेन घोषा एव श्रूयन्ते। 'तं यदा न शृणुयात् तदप्येवमेव विद्यात्' इति श्रुतेः। न तु तस्य प्रतिमा दृश्यते। तस्मै ज्ञानविस्तृताय मुख्यप्राणाय चरुपुरोडाशादि-रूपोपहारेण पूजां कुर्मः इति मन्त्रमावर्तयीतेति सम्बन्धः। तत्र हेतुमाह- सः मुख्यप्राणः परश्रीव्यतिरिक्तभूतानां वरणीयो भजनीयः। तत् कुतः? यस्मादेत-स्माद् देवं नारायणं देवीं श्रियं च विना कश्चिदप्युपर्युत्तमो नास्ति हि यस्मादेवं सर्वोत्तमो वायुरात्मा देवानाम् इत्यस्मिन् मन्त्रे प्रतिपाद्यते। तस्मात् प्राणावमान-जन्यदोषप्रायश्चित्तार्थमिमं मन्त्रमावर्तयीतेति प्रतिक्रियाविधानं प्रतीकारविधानं प्रायश्चित्तविधानं च श्रूयते। प्राणादप्युत्तमस्वीकारे तद्विरोध इति। 'हयशीर्षो मां पथि देवहेलनात्' (भागवतम्) इत्यादौ हेलनमात्रे श्रवणान्नेदं लिङ्गम्। अत्र आदिशब्देन 'प्राणो वाव सर्वेभ्यो भूयान्' इति भाष्योक्तश्रुतिं गृह्णाति। 'तदुक्तम्' इति सूत्रखण्डमावृत्त्या प्रकारान्तरेण व्याख्यातुं प्रवृत्तम् 'अन्यत्रोत्तमाभावे न प्रमाणम्' इत्यादिभाष्यमनुकूलतर्कप्रतिक्षेपाय व्याख्यातुमवतारयति- **प्राणादुत्त-माभाव इति॥** तथाच तत्र नामादेरुत्तमाभावे **उक्तं**, भावे निष्ठा, वचनं प्रमाणं नास्तीत्यध्याहारेण योजनान्तरं सूचितम्। विनैवाध्याहारेण प्रकारान्तरेण सूत्रखण्डं व्याख्यातुं प्रवृत्तम्। 'दृश्यते चान्यत्रोत्तमत्वम्' इत्यपि भाष्य-मवतारयति- **न केवलमिति॥** तत्रामादेरुत्तमसद्भावे 'वाग् वाव नाम्नो भूयसी' इत्यादिवचन-मस्तीति न नामादेरपि प्राणवदुत्तमाभाव आपादयितुं शक्यत इति भाष्यसूत्रयोजना द्रष्टव्या।

'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्' (ब्र.सू. ३.३.३७) इति

---

२. म. श्रिया

सूत्रमधिकरणान्तरमेव प्रधानसूत्रम्। व्यतिहारादिसूत्राणि त्वस्यैव गुणभूतानि न पुनरिदमियदधिकरणस्य गुणसूत्रम्। भाष्यस्यैवमपि योजयितुं शक्यत्वादिति तथैव केचिद् व्याचख्युः। तदयुक्तम्। अधिकरणान्तरत्वे नियामकाभावात्। व्यतिहाराधिकरणप्रमेयस्य विष्णोः प्राणादप्युत्तमत्वस्याऽऽक्षेपसमाधानाभ्यां साक्षादेवेह साधनावगमाद् भेदादिति चेदित्यादिपदस्वारस्याच्च। व्यतिहारसूत्रे बह्वध्याहारादिना कथञ्चिदवगमेऽपि तस्य गुणसूत्रत्वमेव युक्तमिति चेन्न। 'अन्यथा' इत्यादिपदस्वारस्येनेयदधिकरणशेषत्वस्यैवोचितत्वात्। तच्छेषत्वे हि 'तदुक्तम्' इत्यनेन गृहीतश्रुतेरसङ्कुचितार्थत्वे बाधकमुच्यत इत्याक्षेप-सौकर्यवच्छेषत्वाभावे तदयोगात्। 'नेति चेन्न' इति व्यतिहारसूत्रावतार-भाष्यानुगुण्यमस्तीति चेन्न। अत्रापि पक्षे तदानुगुण्याक्षतेः।

किञ्चास्य प्रधानसूत्रत्वे विष्णुपारम्यानुपपत्तिरिति श्रूयेत। सूत्रभाष्ययोः सम्बन्धदीपिकादिसाम्प्रदायिकग्रन्थविरोधश्चापरिहार्य इति मन्वानोऽ-धिकरणान्तरत्वव्यावृत्तये उत्तरसूत्रभाष्ये अवतारयति- **उक्तमाक्षिप्येति॥ किमयं सर्वशब्द इति॥** 'अन्तरा भूतग्रामवत्' (ब्र.सू. ३.३.३६) इत्युक्त्या सर्व-शब्दसङ्कोचसिद्धेरयं विकल्पो न युज्यत इति चेन्न। शङ्काग्रन्थ एवान्तरेति विशेषणात् सिद्धान्तिनाऽपि तदङ्गीकृतमित्यत्र [१]ज्ञापकाभावादेतदौदासीन्येन भूतग्राम-प्रतिबन्दीदूषण एव तत्र तात्पर्यावगमाच्चात्र विकल्पसम्भवादिति ध्येयम्।

सूत्रक्रमः

अत्र प्रथमे साधकोक्तिः। 'यद्येवमपि प्राणादुत्तमो न स्यात् तर्हि नामादि-भ्योऽप्युत्तमो न स्यात्' इत्यादितर्कानुगृहीतानुमानाख्यबाधकोद्धारो द्वितीये। अनुमानबाधकश्रुतिगतशब्दार्थविकल्पानुपपत्तिरूपबाधकोद्धारस्तृतीय इति क्रमो ज्ञातव्यः।

---

१. म. बाधकाभावात्।

सङ्क्षेपभाष्यस्यैतदधिकरणतात्पर्यसूचकता

ब्रह्मणा तु ब्रह्मणैव अखिलैर्गुणैरुपास्य इत्यनेनान्यस्य प्राणोत्तमत्वं निराकृतमित्येतदधिकरणतात्पर्यमुक्तं वेदितव्यम्। अत्र सर्वगुणोपसंहारो ब्रह्मणा कर्तव्य इति फलितम्।

॥ इति इयदधिकरणम्॥ २१॥

॥ अथ व्यतिहाराधिकरणम्॥ २२॥

सूत्रभाष्यम्

नेति चेन्न -

॥ ॐ व्यतिहारो विशिंषन्ति हीतरवत् ॐ ॥

॥ ३-३-३८ ॥

उक्तं प्राणात् परमात्मन उत्तमत्वं पूर्वोक्ताध्याहारेण 'एष तु वा अतिवदति' (छा.उ.७-१६) इति विशिंषन्ति हि। यथेतरेषु विशेषणम्।

''उत्तमत्वं हि देवानां मुक्तावपि हि मानवात्।
तेभ्यः प्राणस्य तस्माच्च नित्यमुक्तस्य वै हरेः॥''

इति[1] बृहत्तन्त्रे॥ ३८॥

॥ इति व्यतिहाराधिकरणम्॥ २२॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनोपासनाधिकारिणः प्राणात् परमेश्वरस्योत्तमत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोपासनायोगात् समर्थनीयम्। प्रकृतो विष्णुरेवात्र विषयः। प्राणादुत्तमो न वेति सन्देहः। प्राणस्य हिरण्यगर्भत्वाद् विप्रतिपत्तिः सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **नेति** ॥ न विष्णोः प्राणादुत्तमत्वम्। छन्दोगश्रुतौ प्राणस्यैव

१. ह. इति च बृहत्तन्त्रे।

सर्वोत्तमत्वेनोक्तत्वात्। अथोच्येत। प्राणानन्तरमपि 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा.उ. ७.१६) इति सत्यपदेनोदितस्य विष्णो-राधिक्यमुच्यत इति। मैवम्। 'अस्ति भगवः प्राणाद् भूय इति प्राणाद् वाव भूयोऽस्तीति तन्मे भवान् ब्रवीतु' इति 'सत्यं वाव प्राणाद् भूयः' इति प्रकरणान्तरवत् प्रश्नप्रतिवचनाभावात्, कारणविशेषमन्तरेण प्रकरण-भेदकल्पनायोगात् सत्यपदेन प्राण एवोच्यते। अतः प्राणादुत्तमत्वाभावाद् विष्णोर्न तदुपासनं सर्वैः कार्यमिति भावः।

सिद्धान्तः

पूर्वपक्षं प्रतिषेधति- **नेति ॥** कुतो नेत्यतः सूत्रं पठित्वा व्याचष्टे- **व्यतिहार इति ॥** श्रुतौ प्राणस्यैव सर्वोत्तमत्वोक्तेर्न विष्णोस्तदुत्तमत्वमिति न युक्तम्। 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा.उ. ७.१६) इति सत्यपदोदितस्य विष्णोः प्राणादुत्तमत्वस्योक्तत्वात्। प्रश्नाद्यभावात् प्राण-विशेषणमेव तदिति न वाच्यम्। प्रश्नाद्यध्याहारस्य कर्तुं शक्यत्वात्। नचाध्याहारकारणाभावादेकप्रकरणत्वमेव युक्तमिति वाच्यम्। 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति' (छा.उ. १.१५.४) इति प्राणवादिनोऽतिशयितवस्तुवादित्वेनातिवादित्वमुक्तम्। ततश्च 'एष तु वा अतिवदति यः सत्यपदेनातिवदति' (छा.उ. ७.१६) इति सत्याख्यवस्तु वदतोऽप्यतिवादित्वमुच्यते। तत्र प्राणातिवादिनः सत्यातिवादी तुशब्देन विशिष्यते। तेन ज्ञायतेऽन्योऽयमन्योऽसाविति। अतः प्रकरणभेदकसद्भावाद् युक्तं प्रश्नाद्यध्याहारेण सत्यस्य प्राणादुत्तमत्वव्याख्यानमिति भावः।

ननु कथमेतद् विशेषणं प्रकरणभेदकं येन प्रश्नाद्यध्याहारं प्रतिपद्येमहीत्यत आह- **यथेति ॥** यथा खलु 'वाग् वाव नाम्नो भूयसी' (छा.उ. ७.२.१) इत्यादिविशेषणं प्रकरणभेदकं, वाचो नामाधिक्यवाचकत्वात् तथैतदपि भेदकं

भवत्येव। यः सत्यं वदति स तु प्राणातिवादिनोऽपि विशेषेणातिशयितं वस्तु वक्तीति प्राणात् सत्यस्याऽधिक्यवाचकत्वादिति भावः। अत्र स्मृतिं चाऽह- **उत्तमत्वमिति ॥** अतो विष्णोः प्राणादुत्तमत्वाद् युक्तं तदुपासनमिति सिद्धम्॥ ३८॥

॥ इति व्यतिहाराधिकरणम्॥ २२॥

शेषतात्पर्यचन्द्रिका

॥ ॐ व्यतिहारो विशिंषन्ति हीतरवत् ॐ ॥ ३-३-३८ ॥

सङ्गतिः

यद्यपि 'अत्र भगवज्ज्ञानसाधनोपासनाधिकारिणः प्राणस्य परमेश्वरावरत्व-समर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथाऽधिकारित्वाभावात्[1] प्रागुक्तमधि-कार्युत्तमत्वं न सम्भवतीति तत्समर्थनीयम्। ''इयत्'' (ब्र.सू. ३.३.३५) इति सूत्रप्रकृतः प्राण एवात्र विषयः। विष्णोरवरो न वेति सन्देहः' इत्येवमाद्येवाधि-करणरचनं युक्तम्। यतः प्रकृतोपासनाधिकारिणः प्राणस्य त्यागो, व्यवहि-ताधिकरणसङ्गतिः, कथञ्चित् प्रधानतया प्रकृतस्य विष्णोर्विषयतासमर्थनक्लेशः, प्राणविषयोत्तराधिकरणवैषम्यं च मा भूत्। तथाऽपि 'उपदेशवत्' (ब्र.सू. ३.३.३७) इति सूत्रानुसारेण प्रवृत्तेरन्येभ्यः प्राणस्योत्तमत्वं, तस्मात् पर-मात्मनोऽप्युपदिष्टं पदमनुकृष्य 'नेति चेत्' इत्येतदधिकरणावतारभाष्य-प्रवृत्तेस्तदनुसारेण प्रवृत्ते 'उक्तं प्राणात् परमात्मन उत्तमत्वम्' इति सिद्धान्तभाष्ये परमात्मन एव परामर्शात्, ब्रह्ममीमांसान्तर्गतस्याधिकरणस्य सति सम्भवे साक्षाद् ब्रह्मविषयत्वत्यागायोगाच्च। अन्यथाऽधिकरणरचनमप्यनवद्यमेव। अत एव

---

१. म. अधिकारत्वाभावात्।

छन्दोगश्रुतौ प्राणात् परमात्मन उत्तमत्वमुपदिष्टमित्युक्तस्य प्रमेयासिद्धिरेव। यत्रोपदिष्टसर्वाधिकार्युत्तमत्वमेव प्राणस्याङ्गीकर्तव्यम्। न त्वनुपदिष्टं सर्वोत्तमत्वं, तथाऽनुपदिष्टत्वाविशेषात्। विष्णोरपि तदसम्भवादिति वा तारतम्यान्तर्गत-प्रत्यायनाय प्रवृत्ते छन्दोगेऽनुक्तत्वात् प्राणादुत्तमाभावश्चेत् तर्हि तत एवोत्तमस्य विष्णोरप्यभाव इति शङ्कनाद् यथा वागादेर्नामाधिक्यपर 'वाग् वाव नाम्नो भूयसी' (छा.उ. ७.२.१) इत्यादिविशेषणात् तत्प्रकरणभेदमाश्रित्य नामादिभ्यः सर्वेभ्यः प्राणस्योत्तमत्वं, तथा तत्प्राणाद् विष्णोराधिक्यपरतुशब्दरूपविशेषात् प्राणप्रकरणाद् भेदमाश्रित्य विष्णोस्तदुत्तमत्वमङ्गीकार्यमित्यतिदेशनाद् वाऽनन्तरसङ्गतिः।

पूर्वपक्षः

तत्र

न विष्णुः प्राणतः श्रेष्ठो बलवच्छ्रुत्यनुक्तितः।
प्राणाद् यथोत्तमः कश्चिदधिकारी न विद्यते॥

यद्यपि 'आत्मन एष प्राणो जायते' (प्रश्न.उ. ३.३), 'प्राणः परवशे स्थितः', 'अग्निर्वै देवानामवमो विष्णुः परमः', 'मत्तः परतरं नान्यत् किञ्चिदस्ति' (भ.गी. ७.७) इत्यादिवचनमस्ति। तथाऽपि तत् प्रबलेन तारतम्य-प्रकरणाम्नातेन बाधितम्। नच 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा.उ. ७.१६) इत्युत्तरत्र श्रवणादनाम्नानमसिद्धम्। 'प्राणो वाव आशाया भूयान्' इति पूर्ववाक्यशेषत्वात्। अन्यथा वाक्यभेदप्रसङ्गात्। नच 'वाग् वाव नाम्नो भूयसी' (छा.उ. ७.२.१) इत्यादाविव वाक्यभेदो नानिष्टः। 'अस्ति भगवो नाम्नो भूयः' (छा.उ. ७.१) इति। 'वाग् वाव नाम्नो भूयसी' (छा.उ. ७.२.१) इति। तन्मे भगवान् ब्रवीतु' इति च प्रश्नप्रतिवचनाभ्यां पूर्वप्रकरणभेदात् तत्र वाक्यभेदस्यानिष्टत्वाभावेऽपीह तदभावात्। नचात्र प्रश्नप्रतिवचनयोरध्याहारः।

तस्यैव दोषत्वात्। सम्प्रतिपन्नैकवाक्यतास्थलेऽपि तत्सम्भवेनैकवाक्यता-वार्तोच्छेदप्रसङ्गाच्च।

किञ्चापरिपूर्णे खल्वध्याहारः। 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा.उ. ७.१६) इत्यादि प्राणातिवादिनमेवानुवदतीति परिपूर्णं चेदम्। नच प्राणशब्देन प्रकृतस्य सत्यशब्देन परामर्शानुपपत्तिः। 'स वा एष पुरुषः' (तै.उ. २.१.१, महा.ना. १७.१४) इत्यत्राऽत्मशब्देन प्रकृतस्य पुरुषशब्देन परामर्श-दर्शनात्। ततश्चैवं प्राणस्य सर्वोत्तमत्वेऽधिकारित्वाभावेन प्राणव्यतिरिक्तैः कैश्चिदेवोपास्यत्वप्राप्त्या [1]तृणप्रभृतिप्राणान्तसर्वोपास्यत्वं न युक्तमिति पूर्वः पक्षः।

सिद्धान्तः

तुशब्दः प्रक्रियां भिन्द्यात् प्राणस्य निविशे यथा।
वागादिश्च यथा सामधेनीनां नामपूर्विणाम्॥

नात्र प्राणसत्यप्रकरणयोरैक्यं सम्भवति। तुशब्ददर्शनात्। नह्यनयोरैक्ये विशेषार्थकतुशब्दो युज्यते। तथाच निविद्भिः सामधेनीनामिव वागादि-भिर्नामादीनामिव चेह तुशब्देन प्राणस्य विच्छिद्यते। अत एव पूर्वप्रकरण-वैषम्यायाध्याहारोऽपि 'अस्ति भगवः प्राणाद् भूयः', 'सत्यं वाव प्राणाद् भूयः' इत्यन्तस्य युक्तः। तस्यैवमेव च दोषत्वे तद्वार्तोच्छेदप्रसङ्गः। वस्तुतस्तु नायमध्याहारः, किन्तु व्यतिहारो व्यतिषङ्ग एव। पूर्वोक्तानामेवात्र प्रवर्तनात्[2]। भाष्येऽध्याहारोक्तिस्तु सत्यपदस्यापूर्वस्यापि प्रक्षेपणादपूर्वमप्यस्तीत्येव। अन्यथा पूर्वोक्ताध्याहारेणेति न स्यात्। पूर्वोक्तशब्देनानुषङ्गत्वस्यैव ज्ञापनात्। तेन 'परिपूर्णमिदं वाक्यं नानुषङ्गमपेक्षते' इति निरस्तम्। तुशब्देन तदपेक्षाया उक्तरीत्या सम्पादनात्। तारतम्यान्तरङ्गप्रत्यायनार्थप्रवृत्तप्रकरणेऽनुक्तिः सर्वथा

१. म. तृणजीवप्रभृति। २. म. इह वर्तनात्।

बलवतीति चायुक्तम् । 'यः सत्येनातिवदति' (छा.उ. ७.१६) इत्यादि-सत्यपदोदितस्य विष्णोः प्राणादुत्तमत्वस्योक्तत्वात् । अत एव 'आत्मन एष प्राणो जायते' (प्रश्न. ३.३) इत्याद्यपि प्रबलमेवेति 'प्राणो वाव सर्वेभ्यो भूयान्' (ब्र.सू.भा. उदाहृतकौण्ठरव्यश्रुतिः) इति श्रुतिस्तद्बाधादुपचरितार्थं वेति न तद्विरोधोऽपीति सिद्धान्तः ।

मायावाद्यभिमताधिकरणशरीरम्

अत्रान्यैरुक्तम्- 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' (ऐ.उ. २.४.३) इत्यत्र जीव एवेश्वरदृष्टिर्विधीयते, उतेश्वरेऽपि जीवदृष्टिरिति संशये-

ईश्वरस्य निकर्षः स्यात् संसारित्वेन दर्शने ।
अभ्यासस्त्वेकतार्थः सन् दृढयत्येकतां तयोः ॥

किञ्च स्वदेहरविमण्डलयोरन्योन्यव्यतिहारे श्रूयमाणेऽपि जीवब्रह्मैक्यलक्षणस्य वस्तुन एकत्वादेकधैव[1] बुद्धिः कर्तव्या । न च व्यतिहारपाठवैयर्थ्यम् । एकस्यापि वस्तुनो दार्ढ्याय तदुपपत्तेरिति प्राप्तेऽभिधीयते -

ईश्वरस्यापि जीवत्वमुपास्यं वचनादिह ।
दृष्टे रूपाविनाशित्वान्नेश्वरे स्यान्निकृष्टता ॥

यथा हि वस्तुतो देहादिरहितस्यापि निर्गुणब्रह्मण उपासकचित्तस्थैर्यार्थं चतुर्भुजाष्टभुजादिगुणकस्य सगुणस्योपदेशेऽपि नापकर्षः तथा वचनबला-दीशस्य जीवत्वोपासने कथमपकर्षः? न खल्विदं तत्त्वावबोधकप्रकरणं येनैकत्वप्रतीतिदार्ढ्यमपेक्षते । किं तर्हि? सगुणोपास्तिप्रकरणम् । उपास्तिश्च यथावचनमनुष्ठेयम् । ततो व्यतिहारेण द्वेधा बुद्धिः कर्तव्येति ।

१. म. एकदैव ।

तन्निरासः

तन्न । सङ्गत्यभावात् । पूर्वत्र विद्यैक्येऽप्यभ्यास आदरार्थ इत्युक्तम् । तर्हीहाप्यभ्यास आदरार्थः स्वतो न जीवेश्वरदृष्टिः[1] कार्येत्युत्थानात् सङ्गतिरिति कल्पतरूक्तेर्नैवमिति चेन्न । 'योऽसौ सोऽहम्' (ऐ.उ. २.४३) इत्यस्य चैकप्रकारोक्तित्वाभावेनाभ्यासमुखेनाऽक्षेपायोगात् । एवमपि पादसङ्गत्य-दर्शनाच्च । अत एव न पूर्वपक्षो युक्तः । नापि सिद्धान्तः । तथाहि । देहादिशून्यस्य निर्गुणस्य चतुर्भुजाष्टभुजादिगुणोपासनविधानात् सगुणत्वं भवति न वा । आद्ये कथं न निकृष्टताप्राप्तिः । तथाच कथं तद्दृष्टान्तेनेशस्य निकृष्टतापरिहारः । द्वितीये ध्यानार्थेऽपि सत्यकामादिगुणोपदेशे तद्गुणक ईश्वरः प्रसिद्ध्यतीति तद्भाष्य-विरोधः । अपि चेदमपि वाक्यं यदि न तत्त्वावबोधकं किं तर्हि तदवबोधकम् । यत्र नोपासनादिविधिस्तदिति चेन्न । प्रकृतवाक्येऽपि तदभावात् । अध्याहारे तु सर्वत्र तत्सम्भवेन किमपि तत्त्वावबोधकं न स्यात् ।

किञ्चासावित्यस्याऽदित्यमण्डलान्तर्गतेश्वरवाचित्वाज्जीवस्य चैश्वर्यराहित्ये-नानुभवसिद्धतया कथं तयोरन्योन्यत्वदृष्टिविधानम्? नहि प्रकाशेऽन्धकार-दृष्टिमन्धकारे वा प्रकाशत्वदृष्टिमागमोऽपि विधातुमीष्टे । ईशे जीवदृष्टेरादरविघात-कत्वेनोपासनालोपप्रसङ्गश्च । नोपासनार्थं जीवत्वदृष्टिः । किन्तु वचनबलाद् दृष्टार्थं भविष्यतीति च नोपपद्यते । जीवत्वदृष्टेरीश्वरकोपहेतुत्वेनादृष्टानुदयात् । 'ब्रह्म-दृष्टिरुत्कर्षात्' (ब्र.सू.४.१.५) इत्यधिकरणविरोधश्च स्फुट इति सङ्क्षेपः ।

एतत्सूत्रस्याद्वैत्यभिमतार्थनिरासः

एतेन व्यतिहारोऽयमाध्यानाय आम्नायते । इतरवत् । यथेतरे गुणाः सर्वात्मत्वप्रभृतय आध्यानायाऽम्नायन्ते । अत एव जाबालाः 'त्वं वा अहमस्मि

१. 'अतो नेश्वरे जीवदृष्टिः कार्या' इति पाठः समीचीन इति भाति ।

भगवो देवतेऽहं वै त्वमसि' (वराहोपनिषत् २.३४) इत्युभयोच्चारणेन विशिंषन्ति । अन्यथा ह्रीदं विशेषणोभयाम्नानमनर्थकं स्यादिति सूत्रव्याख्यानं निरस्तम्। सर्वात्मत्वादेरपि निकृष्टतापादकतयोपास्यत्वानिश्चयात्। जाबालश्रुतेरपि इह विषयवाक्यादनतिभिन्नतया भाष्यकृतैव विषयतयोदाहृततया च तदुपष्टम्भोक्त्ययोगाच्च।

शैवरामानुजव्याख्यानयोर्निरासः

एतेनैव वेद्यस्य ब्रह्मण ऐक्येऽप्युपास्ययोः प्राणनहेतुत्वाशनायातीतत्वादिगुणयोरुषस्तिकहोलयोः प्रष्ट्रोश्च भेदाद् विद्याभेदोऽवर्जनीय इत्यत्रोच्यते । उषस्तिकहोलयोः प्रतिवचनगतबुद्धिव्यतिहारः कार्यः । यतो याज्ञवल्क्यवचनान्येकमेव सर्वान्तरमुपास्यं जीवव्यावृत्ततया विशिंषन्ति । यथेतरत्र 'तत् सत्यं स आत्मा तत्त्वमसि'(छा.उ. ६.८.७) इति सद्विद्यायां सर्वाणि प्रतिवचनानि परमकारणं परब्रह्म[१] विशिंषन्ति तद्वदिति 'अन्तरा भूतग्रामवत्' (ब्र.सू. ३.३.३६) इत्यधिकरणशेषतया केषाञ्चिच्छैवस्य च व्याख्यानमपि निरस्तम्। उपास्यगुणभेदाद् विद्याभेदः स्यादिति शङ्कायाः परिहारादर्शनात्। ब्रह्मणः सर्वान्तरत्वमेवोपास्यगुणः। प्राणनहेतुत्वादयस्तु तस्योपपादका अतो नोपास्यगुणभेदाद् विद्याभेदशङ्केति परिहारो दृश्यत इति चेत् । न । क्वापि विद्याभेदाभावप्रसङ्गात्। नहि छान्दोग्यबृहदारण्यकोक्तप्राणविद्ययोरसुरपाप्माविद्धत्वमेकमुपास्यं न लभ्यते। तथा सति पूर्वपक्षस्यैवानुदयप्रसङ्गः। उद्गानकर्मत्वकर्तृत्वे च नोपास्यगुणौ। किन्त्वसुरपाप्माविद्धत्वस्योपपादके एव। यतो मुख्यप्राणः मुख्यतः स्वयमेवोद्गानकर्ता तत्कर्म च, ततो नान्यस्मिन्न[२]सुरपापावेध इत्युपपादनसम्भवात्।

किञ्चोषस्तिप्रश्नप्रतिवचने व्यतिहृतस्याशनायाद्यतीतत्वस्य वैयर्थ्यम्।

१. क. परं ब्रह्म २. म. नास्मिन्नसुरपापवेधः

प्राणनादिहेतुत्वेनैव सर्वान्तरात्मत्वोपपादनसम्भवात् । एवं कहोलप्रश्नप्रतिवचनेऽपि व्यतिहृतस्य प्राणनहेतुत्वस्य वैयर्थ्यम्। ननु सर्वप्राणनहेतुत्वेन[१] सर्वान्तरात्मनि जीवाद् व्यावृत्तेर्ब्रह्मण्युषस्तिनाऽवधृते सति कहोलेन जीवस्य सर्वात्मनाऽसम्भावितेन स्वभावविशेषेण सर्वान्तरात्मा व्यावृत्तोऽनुसन्धेय इति कृत्वा पुनः प्रश्नः कृतः। याज्ञवल्क्योऽपि तदभिप्रायमभिज्ञाय प्रत्यगात्मनोऽसम्भावितमशनायादिप्रत्यनीकत्वमुक्तवान् । अतश्चोपास्यव्यावृत्तिप्रतीतिसिद्ध्यर्थमुभाभ्यां परस्परबुद्धिव्यतिहारः कर्तव्य इति चेन्न। सर्वप्राणिप्राणनहेतुत्वस्यापि जीवे सर्वथाऽसम्भावितत्वात्। नह्ययं जीवः सर्वप्राणिषु स्थित्वा तदीयप्राणनहेतुरिति कोपि वादी ब्रूते, यावता स्वकीयप्राणनस्यापि सुषुप्त्यादावयमस्वतन्त्र इत्यनुभूयते । कथं चाशनायाद्यतीतत्वं सर्वात्मना जीवेऽसम्भावितम्? 'अच्छेद्योऽयमदाह्योऽयम्' (भ.गी. २.२४) इत्यादौ निष्कृष्टजीवस्वरूपस्य तत्प्रतिपादनात् । कथं [२]वेदमशनायाद्यतीतत्वं भगवतः स्वभावविशेषः, न प्राणनहेतुत्वमित्यवगतं भवता। प्रष्टृभेदश्च न समाहितः।

श्रुतप्रकाशिकोक्तस्य विद्यैक्ये बाधकपरिहारस्य निरासः

यच्चोक्तमुभयत्रान्तरात्मत्वप्रत्यभिज्ञानादिना विद्यैक्ये सिद्धे वैश्वानरविद्यायामौपमन्यवादिप्रष्टृभेदवदिहापि प्रष्टृभेदोऽप्रयोजक इत्यादि, तन्न। प्राणनहेतुत्वाशनायाद्यतीतत्वरूपभेदाद् विद्यैक्यप्रत्यभिज्ञाया भ्रान्तित्वोपपत्तेः। अन्यथाऽसुरपाप्माविद्धत्वादिप्रत्यभिज्ञानात् प्राणविद्ययोरप्यैक्यापत्तिः । कर्मत्वकर्तृत्वादिना प्रत्यभिज्ञा बाध्यत इति चेत्, सममिहापीत्यलं पल्लवितेन।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु ॥ **उपासनायोगादिति** ॥ प्राणात् परमेश्वरस्योत्तमत्वा-

१. क. सर्वप्राणिप्राणनहेतुत्वेन २. म. चेदम्।

भावेऽनीश्वरवादायोगेन प्राणस्यैव तत्प्राप्योपासनाधिकारित्वायोगात् तृण-जीवादिब्रह्मान्तैः सर्वैः कर्तव्यताया भगवदुपासनाया अयोगादित्यर्थः। अत एव न तदुपासनं सर्वैः कार्यमित्युपसंहरिष्यति। हिरण्यगर्भवादिनः प्रसिद्धत्वेऽपि प्राणवादिनोऽप्रसिद्धत्वात् कथं विप्रतिपत्तिः सन्देहबीजमिति शङ्कां निराह- **प्राणस्य हिरण्यगर्भत्वादिति॥** ततश्च व्यक्तिभेदाभावेन तद्वादिन एव प्राणवादिन इति भावः।

उन्नतिन्यायस्य व्याख्यानम्

'दृष्टवैरूप्यमुन्नतिः' इत्यत्रोक्तोन्नतिन्यायं तत्प्रतीतेरुपलक्षकं मत्वा प्रतीतौ कारणोक्तिपूर्वकं तत्साध्यप्रदर्शनेन विवृण्वत् ' ''अस्ति भगवः प्राणाद् भूयः'' इति प्रश्नाद्यभावात् प्राणस्यैवोन्नतिप्रतीतेर्न विष्णोरपि ततः परत्वमिति न मन्तव्यम्' (न्या.वि.) इति वाक्यं प्रतीतिशब्द उक्तिपर इत्यभिप्रेत्य व्याचष्टे- **न विष्णोः प्राणादुत्तमत्वमित्यादिना॥** प्राणादुत्तमानुक्तेस्तस्यैव सर्वोत्तमत्व-मुक्तप्रायमिति भावः। 'प्रश्नाद्यभावात्' इत्यन्तं वाक्यमवतारयति- **अथोच्येतेति॥** अनेन 'एष तु वा अतिवदति यः सत्येनातिवदति' (छा.उ. ७.१६) इति सत्यपदोदितस्य विष्णोराधिक्यमुच्यत इति न युक्तम्। 'अस्ति भगवः प्राणाद् भूयः' इति प्रश्नप्रतिवचनाद्यभावादिति वाक्याध्याहारेण योज्यमिति सूचयति। यद्यपि प्राणपदं सत्यपदं चेति नामभेदमात्रमस्ति। तत्तु 'स वा एष पुरुषः' (म.ना.उ. १७.१४) इत्यादौ प्रकरणभेदकं न भवति। अतः कारण-विशेषो वाच्यः। स च प्रकृते नास्तीत्याह- **कारणविशेषमन्तरेणेति॥** सत्यपदेन किं विवक्षितमत आह- **प्राण एवोच्यत इति॥** शब्दान्तरेण प्रकृतस्य शब्दान्तरेण व्यवहारस्य 'स वा एषः'(म.ना.उ. १७.१४) इत्यादावेव दर्शनादिति भावः।

प्रतिसन्धिन्यायव्याख्यानम्

अत्र सिद्धान्तभाष्यम् - 'उक्तं प्राणात् परमात्मन उत्तमत्वं पूर्वोक्ताध्याहारेण

'एष तु वा अतिवदति' (छा.उ. ७.१६) इति विशिंषन्ति हि' इति। तदिदं यस्माद् विशिंषन्ति तस्मात् परमात्मन उत्तमत्वमुक्तमित्येवान्वयप्रतीतेरध्याहारे कारणानुक्तेश्चास्पष्टमिव प्रतीयते। तत्स्पष्टनाय 'प्रतिसन्धिरनूनता' इत्युक्त-प्रतिसन्धिन्यायं निमित्तप्रदर्शनेन विवृण्वत्- ' ''एष तु वा अतिवदति'' (छा.उ. ७.१६) इति विशेषणात् प्रश्नप्रतिवचनप्रतिसन्धानोपपत्तेः' (न्या.वि.) इति वाक्यं भाष्योक्तहेत्वसिद्धिपरिहाराय प्रवृत्तमिति क्रमेण व्याख्यातुं भाष्यमादौ व्याख्याति- **प्राणस्यैवेत्यादिना॥** 'न विष्णोस्तदुत्तमत्वमिति न युक्तम्' 'इति चेन्न'[१] इत्यस्यार्थः। 'एष तु वा अतिवदति' इत्युत्तमत्वमुक्तमित्यन्वयमाह- **उत्तमत्वस्योक्तत्वादित्यनेन ॥** अत्रासिद्धिपरिहाराय विवरणगतोत्तरार्धं व्याख्यातुं शङ्कते- **प्रश्नाद्यभावादिति॥** 'एष तु वा अतिवदति' (छा.उ. ७.१६) इति वाक्यं न स्वातन्त्र्येण सत्यस्योत्तमतामावेदयति। तद्गताक्षरपर्यालोचनया सत्यज्ञानिस्तुतिप्रतीतेः। किन्तु तथाविधप्रश्नप्रतिवचनैकवाक्यतयैव। अन्यथा 'स वा एष एवं पश्यन्नेवं मन्वानः' (छा.उ. ७.२५.२) इत्यादिप्राणज्ञानि-स्तुतिमात्रेणैव विनाऽपि तदेकवाक्यतां प्राणोत्तमत्वप्रतीतिसम्भवात् 'अस्ति भगव आशाया भूयान्' (छा.उ. ७.१४.२) 'प्राणो वावाऽशाया भूयान्' (छा.उ. ७.१५.१) इत्यादिप्रश्नप्रतिवचनानर्थक्यप्रसङ्गात्। ततश्चेह प्रश्नप्रतिवचन-योरनुपलम्भादुत्तमत्वमित्युक्तमसिद्धमिति भावः। व्याख्याति- **प्रश्नाद्यध्याहारस्येति ॥** आदिशब्देन प्रतिवचनसङ्ग्रहः। प्रतिसन्धानशब्दार्थः **अध्याहारेति ॥** उपपत्तेरित्यस्य तात्पर्यम्- **कर्तुं शक्यत्वादिति ॥** विवरणे विशेषादिति[२] उक्तमवतारयति- **नचाध्याहारेति॥** तथाच प्रतीतैकवाक्यताभङ्गः। नच कारणाभावेऽप्यध्याहारमुपेत्य[३] वाक्यभेदस्वीकारो युज्यत इति भावः।

---

१. 'नेति चेन्न' इति पाठः समीचीन इति भाति।
२. विशेषणादिति पाठेन भाव्यमिति भाति।
३. म. कारणाभावे व्यर्थाध्याहारमुपेत्य

विशेषणस्य विधिसापेक्षत्वात् तन्निरूपणपूर्वं व्याचष्टे- **स वा एष पश्यन् इत्यादिना ॥** 'यथेतरेषु विशेषणम्' इति भाष्यमनन्वितमुर्वरितमवतारयति- **ननु कथमेतद् विशेषणमिति ॥** उपरञ्जकविशेषणं न प्रकरणभेदकं दृष्टम्। किन्तु व्यावर्तकविशेषणमेव। तत्त्वं तेनाङ्गीक्रियत इति शङ्कितुर्हृदयं भावोक्त्या व्याचष्टे- **यथा खल्विति ॥** वागित्यादिकं व्यावर्तकविशेषणमिति सर्वसम्प्रतिपत्तिः। अन्यथा वागादेर्नामाद्याधिक्यानुपपत्तिः । तद्वत् तुशब्दोऽपि सत्यस्य प्राणाधिक्यपरत्वान्यथानुपपत्त्या व्यावर्तकमेवेदं विशेषणम्। नतूपरञ्जकम्। अन्यथा वागाद्यपि तथैव स्यादिति प्रकरणभेदकं न स्यादिति हृदयम्। अनेन **'उक्तम्'** इत्यारभ्य **'विशिंषन्ति हि'** इत्यन्तमेकं वाक्यम्। भाष्ये हिर्हेतुवचनः। यस्माद् विशिंषन्ति तस्माद्ध्याहारः। अतः प्राणादुत्तमत्वमुक्तम्। अतो न विष्णोस्तदुत्तमत्वमुक्तमप्ययुक्तमिति सर्वत्र सम्बद्ध्यते इत्युक्तं भवति । बृहत्तन्त्रोदाहरणस्य सूत्रस्पर्शं सम्पादयन् हिश्चार्थोऽपीति तदवतारयति- **अत्र स्मृतिं चाऽहेति ॥** यस्मान्मानवानां मुक्तिः देवानामनुग्रहादेव भवति तस्माद् देवानां मानवोत्तमत्वं यथा प्रसिद्धं, यथा च तन्मुक्तिर्मुख्यप्राणानुग्रहादिति तेभ्यः प्राणस्योत्तमत्वं तथा तन्मुक्तिरपि भगवदनुग्रहादिति तस्माद्धरेरुत्तमत्वं स्वीकार्यम्। नच तन्मुक्तिरप्यान्यायत्ता, येन तदुत्तमोऽपि कश्चिच्छङ्क्येत। तन्मुक्तेरागन्तुकत्वाभावादिति स्मृतौ ह्यादिपदानामर्थो बोध्यः।

सूत्रार्थः

सूत्रार्थस्तु - तुशब्दो यस्माद् वागादिवद् व्यावर्तकं विशेषणं यस्माच्छन्दोगास्तुशब्देन सत्यातिवादिनं **विशेषयन्ति** तस्माद् **व्यतिहारो**ऽनुषङ्गः- 'सत्यं वाव प्राणाद् भूयः' इत्यादिः। ततश्च न प्राणाद् विष्णोरुत्तमत्वमुक्तमित्ययुक्तमिति। तथाच हिरण्यगर्भस्योत्तमत्ववादिनो भ्रान्ता इति फलितम्।

सङ्क्षेपभाष्यस्यैतदधिकरणपरतया व्याख्यानम्

यस्मादात्मपदोदितं स्वामित्वमीशस्य प्राणं प्रत्यप्यस्ति ततोऽखिलैर्गुणैः ब्रह्मणाऽप्युपास्य इति 'ब्रह्मणा त्वखिलैर्गुणैः' (अणुभाष्यम् ३.४) इति सङ्क्षेपभाष्यमपि योज्यम्।

॥ इति व्यतिहाराधिकरणम्॥ २२॥

॥ अथ सत्याद्यधिकरणम् ॥ २३ ॥

सूत्रभाष्यम्

कृतिर्निष्ठा विज्ञानमि[१]त्यादीनां भेदाद् बहव उत्तमा इति चेन्न -

॥ ॐ सैव हि सत्यादयः ॐ ॥ ३-३-३९ ॥

सत्यादिगुणास्तस्या एव परदेवतायाः स्वरूपभूताः ।

ब्रह्मतर्के च -

'नामादिप्राणपर्यन्ताद् यो हि[२] सत्यादिरूपवान् ।
तस्मै नमो भगवते विष्णवे सर्वजिष्णवे ॥' (ब्रह्मतर्कम्) इति ।

'सत्याद्या अहमात्मान्ता यद्गुणास्समुदीरिताः ।
तस्मै नमो भगवते यस्मादेव विमुच्यते ॥' इति चाध्यात्मे ॥ ३९॥

॥ इति सत्याद्यधिकरणम् ॥ २३ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवदापरोक्ष्यसाधनोपासनाधिकारिणः प्राणाद् विष्णोरेवोत्तमत्वसाधनादस्ति शास्त्रादिसङ्गतिः। अनेकेषामुत्तमत्वे प्रागुक्तमयुक्तं स्यादित्येकस्यैवोत्तमत्वं समर्थनीयम् । प्रकृतः प्राण एव विषयः । किं तस्मात् सत्यपदोदितविष्णुरेवोत्तमः किमन्योऽप्यस्तीति सन्देहः । विष्णुरुत्तम इत्युक्तेरुभयथा सम्भवः सन्देहबीजम् ।

१. ह. ज्ञानम् २. ह. योऽधि

पूर्वपक्षः

पूर्वपक्षयति- **कृतिरिति** ॥ न केवलं प्राणात् सत्यपदोक्तो विष्णुरेवोत्तमः । अपि तु बहवोऽप्युत्तमाः सन्ति । सत्यादप्युपरि विज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाहङ्कारात्मनामुक्तत्वात् । नच विज्ञानादीनां सत्येनाभेदान्न बहूनामुत्तमत्वं प्राणादिति वाच्यम् । तेषामभेदोक्त्यादिकारणविशेषं विना प्राणं विहायाभेदग्रहणस्यान्याय्यत्वात् । अतः प्राणादपि बहूनामुत्तमत्वात् तस्य विष्णुं विना सर्वोत्तमत्वं विष्णोर्निरुपचरितसर्वोत्तमत्वं च न युक्तमिति भावः ।

सिद्धान्तः

पूर्वपक्षं प्रतिषेधति- **नेति** ॥ तत्र हेत्वाकाङ्क्षायां सूत्रमुपन्यस्य व्याचष्टे- **सैवेति** ॥ न प्राणादधिका बहव इति युक्तम् । यस्मात् सत्यादयोऽहङ्कारात्मान्ताः सा ईश्वराख्या परदेवतैव, न तु ततो भिन्नाः । नच वाच्यमभेदानुक्तेर्भेद एव तेषामिति । 'सत्यं भगवो विजिज्ञासे' इति सत्याख्यस्य भगवतो गुणजिज्ञासायां तद्गुणत्वेन तदविनाभूतज्ञानस्योक्तत्वात् । तथोत्तरत्रापि विज्ञानगुणजिज्ञासायामविनाभूतमत्यादीनामुक्तत्वादभेदसिद्धेः । अन्यथा सत्यादिजिज्ञासायां विज्ञानादिकथनस्याऽसङ्गतत्वादिति भावः । अत्र कृतिनिष्ठाद्यनुसारेण स्त्रीलिङ्गप्रयोगः । अत एव शङ्काभाष्ये विज्ञानस्याऽदित्वेऽपि कृतिर्निष्ठेत्युक्तम् । अत्रैव हिशब्दसूचितां स्मृतिमाह- **ब्रह्मतर्के चेति** ॥

नन्वस्तु भूमान्तानां भगवद्गुणत्वोक्त्याऽभेदो न त्वहङ्कारात्मनोस्तयोरभेदानुक्तेरित्यत आह- **सत्याद्या इति** ॥ पूर्ववदभेदानुक्तावप्यहङ्कारात्मनोरस्त्येव भगवत्स्वरूपत्वमित्यत्र हेतुर्यस्मादिति । 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स्वराड् भवति' (छा.उ. ७.२५.२) इत्यहङ्कारात्मज्ञानान्मोक्षः श्रूयते । मोक्षश्च

भगवज्ज्ञानादेव। अतस्तयोस्तत्स्वरूपत्वमिति भावः। किञ्च 'स एवाधस्तात्' (छा.उ. ७.२५.१) इत्यादिनोदितं यद् भूम्नः पूर्णत्वं तदेवाहङ्कारात्मनोरुच्यते 'अहमेवाधस्तादात्मैवाधस्तात्' (छा.उ. ७.२५.१) इति। तथा श्रुत्यन्तरे सर्वेषामपि पूर्णत्वमुच्यते 'सत्यं पूर्णम्' इत्यादिना। अतः सत्यादीनात्मान्तानां भगवत्स्वरूपत्वेन स एव प्राणादुत्तम इत्युक्तमुपपन्नमिति सिद्धम्॥ ३९॥

॥ इति सत्याद्यधिकरणम्॥ २३॥

शेषतात्पर्यचन्द्रिका

॥ ॐ सैव हि सत्यादयः ॐ ॥ ३-३-३९ ॥

अनन्तरसङ्गतिः

अत्र प्रश्नप्रतिवचनाध्याहारेण भेदमाश्रित्य प्राणात् सत्यपदोक्तस्य विष्णोर्भेदश्चेत् तर्हि इहापि विष्ण्वादीनां सत्येनापि भेदः स्यादिति वा, यदि प्राणादपि सत्यपदोक्तः कश्चिदुत्तमः स्यात् तर्हि सत्यादपि विज्ञानादिरुत्तमः स्यात्। 'विज्ञानं त्वेव विजिज्ञासितव्यं मतिस्त्वेव विजिज्ञासितव्या' इत्यादिना सत्यादप्युपर्युपरि विशेषत एव जिज्ञास्यत्वेनोच्यमानानां विज्ञानमतिश्रद्धानिष्ठासुखभूमाहमात्मनां प्राणादप्युपर्युपदिश्यमानस्य सत्यस्येवान्योन्यं सत्याच्च भेदात्। अन्यथा विशेषणं भेदोपपादकं न स्यात्। विष्णुपारम्यश्रुतिस्तु 'प्राणो वाव सर्वेभ्यो भूयान्' (कौण्ठरव्यश्रुतिः) इत्यादिश्रुतिवद् विज्ञानादिव्यतिरिक्तपारम्यविषयतया सङ्कुचद्वृत्तिः, न तु निरुपचरितोत्तमत्वपरा। एतत्प्रकरणान्तोक्तात्मन एव निरुपचरितोत्तमत्वमिति नानवस्थेति वा, प्राणादुपरि सत्यस्योक्तत्वात् यथा प्राणस्य सोत्तरत्वं तथा सत्यादुपरि विज्ञानादेरुक्तत्वात् सत्यमपि सोत्तरं स्यादिति वा शङ्कनात्, भेदज्ञापकतुशब्दादेर्भावाद् यथा सत्यस्य प्राणाद्

भेद एवमभेदज्ञापकस्य तद्गुणजिज्ञासाप्रवृत्तप्रकरणाधीतत्वादेर्भावाद् विज्ञानादेः सत्येन भेद इत्यतिदेशनाद् वाऽनन्तरसङ्गतिः।

टीकाप्रदर्शितस्याधिकरणशरीरस्य समर्थनम्

अत्र यद्यपि व्यतिहारनये पूर्वस्मिन् सत्यपदप्रकृतो विष्णुर्विषयः। सोत्तरो भवति न वेति सन्देहः। विज्ञानादीनामुपरि पाठात् सोत्तरत्वे[१] विज्ञानादीनां सत्याभेदाद् विष्णुरेवोत्तम इति सिद्धान्त इत्येवाधिकरणशरीरं युक्तम्। अस्य शास्त्रस्योत्सर्गतया ब्रह्मप्रधानकत्वस्य त्यागाभावात्। अव्यवहितपूर्वाधिकरणवैषम्यात् [२]प्राणपरमात्मप्रसङ्गसन्निधापिता श्रीरत्र विषय इत्युत्तराधिकरणोक्तिसौकर्याच्च। अन्यथेह प्राणप्रसङ्गेन परमात्मप्रसङ्गस्य तिरोहितत्वात् पुनर्महता प्रयत्नेन तत्स्मृतिसम्पादनक्लेशः स्यात्। प्रकरणं तु पूर्वाधिकरणविषयेण विष्णुना निविड्भिरिव सामधेनीनां विच्छिन्नमेव। तथाऽपि 'इयदामननात्' (ब्र.सू. ३.३.३५) इत्यारभ्य 'तन्निर्धारणार्थनियमः' (ब्र.सू. ३.३.४३)इत्यतः प्राक् प्राणपेटिकेति ज्ञापनाय प्राणविषयमिदमधिकरणमित्युक्तम्। 'तेभ्यः प्राणस्य तस्माच्च नित्यमुक्तस्य वै हरेः' (बृहत्तन्त्रवचनम्) इति बृहत्तन्त्रवचनानुसारेण व्यतिहारनयस्य विष्णुविषयत्वेऽपि प्राणादुत्तमत्वसाधनान्न प्राणपेटिकान्तर्भावविरोधः। अत एव विज्ञानादयः सत्याद् भिन्ना उताभिन्ना इत्याद्येवाधिकरणशरीरं सूत्राक्षरानुगतमिति परास्तम्। पादपेटिकासङ्गत्यादेरभावात्। विष्णोः प्राणादुत्तमत्वसाधनानन्तरं[३] तद्विशेषश्चिन्त्यत इति प्राणविषयत्वे पादपेटिकानन्तरसङ्गतीनां विज्ञानादिभेदाभावपरत्वे तासामलाभाच्च।

चिन्ताक्रमः पूर्वपक्षश्च

उपासनाधिकारितारतम्यपरम्परा यस्मिन् विश्रान्ता स प्राणो विषयः। स

१. 'सोत्तरत्वेन नोत्तमः इति पूर्वपक्षः' इति पाठोऽत्र युक्त इति भाति।
२. प्राणशब्दोऽत्र नावश्यक इति भाति। ३. म. समर्थनानन्तरम्

किमनेकेभ्यो पर उत विष्णोरेकस्मादेव, तदर्थमुपरि पठितानां विज्ञानादीनां सत्येन भेद उताभेदः, तदर्थं 'विज्ञानं त्वेव विजिज्ञासितव्यं मतिस्त्वेवैव[1] विजिज्ञासितव्या' इत्यादि प्रकरणभेदज्ञापकं भवत्युत न, तदर्थं विज्ञानादिशब्दानां धर्मिपरत्वमुत धर्मपरत्वमित्यादि चिन्तनीयम्।

सत्यस्योपरि पाठेन प्राणाधिक्यं यतः स्थितम्।
ततोऽप्युपरि पाठेन विज्ञानादेरपीष्यते।

नच सत्यस्य परदेवतात्वानुपपत्तिः। यतो वेदोक्तानन्तगुणवत्त्वेन प्राणोपास्या विष्ण्वाख्या परदेवता प्राणादुपरि पठितेभ्यः सत्यादिभ्यो भिन्नैव। तेषामनेकत्वात् सोत्तमत्वाच्च। परदेवतायाश्चानेकेश्वरवादायोगेनैकत्वादनुत्तमत्वाच्च। तदनेकत्वं च 'सत्यं त्वेव विजिज्ञासितव्यम्' (छा.उ. ७.१६.१) इत्यादिविशेषणात् सिद्धम्। अन्यथा प्राणैक्यस्याप्यापत्तेः। नच सत्यमात्रं परदेवता। ततोऽप्युत्तमस्य विज्ञानादेराम्नानात्। नच तस्य सत्याभेदः। तयोर्भेदस्यैव प्रसिद्धेराम्नानवैयर्थ्याच्च। नचानयोर्विशेषणविशेष्यभावः। धर्मधर्मिभावप्रसिद्ध्यभावात्। प्रकरणभेदानुपपत्तेश्च। 'सत्यं त्वेव विजिज्ञासितव्यं विज्ञानं त्वेव विजिज्ञासितव्यम्' (छा.उ. ७.१७.१) इत्यादितज्ज्ञापकसद्भावाच्च। नचैवं परदेवताया असिद्धिः। सर्वान्ते श्रुतात्मन एव तत्त्वसिद्धेः। अत एव सत्यादयोऽनीश्वरत्वादधिकारिण एव। ततश्च 'इयदामननात्' (ब्र.सू. ३.३.३५) इत्युक्तमयुक्तम्। अयुक्तं च सत्यपदोक्तस्य विष्णुत्वमिति पूर्वः पक्षः।

सिद्धान्तः

ब्रह्मतर्कादितः सत्यं विज्ञानादेर्न भिद्यते।
विशिष्टज्ञानपूर्वाश्च विज्ञानाद्यभिधायुजः॥

१. म. मतिस्त्वेवम्

सत्याद्यहमात्मान्तेषु वाक्येषु प्रकरणभेदेन नार्थभेदोऽवगन्तव्यः। 'नामादिप्राणपर्यन्ताद् यो हि सत्यादिरूपवान्' (भा.उ.ब्रह्मतर्कवचनम्), 'सत्याद्या अहमात्मान्ताः' (भा.उ.अध्यात्मवचनम्) इत्यादिब्रह्मतर्काध्यात्मवचनाभ्यामर्थाभेदस्य सिद्धत्वात्। नच सत्यप्राणयोः प्रकरणेऽभेदानङ्गीकारात् 'सत्यं त्वेव विजिज्ञासितव्यम्' (छा.उ. ७.१६.१) इत्यादिभेदोक्तेश्च, सत्यादीनां परस्परं भेद एवेति वाच्यम्। हन्त तर्हि सैवाभेदोक्तिः। सत्यादिजिज्ञासायां विज्ञानादेरुक्तत्वात्। अन्यथाऽसाङ्गत्यापरिहारात्। नच प्रकरणभेदानुपपत्तिः। उपासनायामधिकारिभेदज्ञापनार्थत्वात्। अन्यथा वैश्वानरविद्यामधुविद्यादिसञ्ज्ञाभेदेन प्रकरणभेदादर्थैक्यं न स्यात्। तत्तद्गुणोपास्तियोग्यानां गुणानां यावतां युगपद् बुद्ध्यारोहाय प्रकरणभेदविरचनेनोपकरोति तांस्तानधिकारिणो भगवती श्रुतिरिति चोक्तम्। सत्यादिपदानि च यथार्थवचनादौ रूढानि। अथाप्युक्तवचनात्-

'तत्सत्यो भगवान् विष्णुः यन्निर्दोषनियामकः।
विशिष्टज्ञानरूपश्च सामान्यज्ञानरूपकः॥'

इत्यादिपरमसारवचनाच्च यौगिकानि प्रतिपत्तव्यानीति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु - ये प्रकरणभेदेन प्राणादुपरि समाम्नाताः सत्याद्याऽहमात्मान्तास्ते परदेवतैव, न ततो भिन्नत्वेन शङ्क्याः। एकैव न त्वनेके। विधेयगतत्वेनैकत्वस्य विवक्षितत्वात्। यस्माद् ब्रह्मतर्कवचनमध्यात्मवचनं चास्ति इति। यद्यप्यत्र सत्यस्य विष्णुत्वं प्रागेव सिद्धमिति इह विज्ञानादीनां सत्यादभिन्नत्वमेव साधनीयम्। नतु सत्यादीनां परदेवताऽभिन्नत्वम्। तथाऽपि विज्ञानादीनां सत्यादुपरि पाठेन सोत्तमत्वे भिन्नत्वे च न सत्यपदेन विष्णोरभिधानम्। परदेवतात्वेन सोत्तमत्वविरोधादिति पूर्वाक्षेपेण प्रवृत्तस्योत्तरमनेनोच्यत इत्यदोषः।

अद्वैतिसम्मताधिकरणपरीक्षा

अत्रान्योक्तमधिकरणम् - वाजसनेयके 'स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकान्' (बृ.उ. ५.४.१) इति सत्यविद्यामाम्नायानन्तरं पठ्यते- 'तद्यत् तत्सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषस्तस्योपनिषदहमिति । हन्ति पाप्मानं य एवं वेद यश्चायं दक्षिणेऽक्षन् पुरुषस्तस्योपनिषदहमिति। हन्ति पाप्मानं य एवं वेद' (बृ.उ. ५.५.२) इति। तत्र संशयः। द्वे इमे विद्ये उतैकैवेति।

प्रकृताकर्षणाद्ध्येयभेदाभावे विभिद्यते।
उपास्तिः साध्यभेदेन नित्यकाम्यार्थशास्त्रवत्॥

'तद् यत् तत् सत्यम्' (छा.उ. ८.६.३), 'स यो हवै तद्यक्षम्' (बृ.उ. ५.५.२) इत्युपक्रान्तपूर्वविद्याप्रकृतस्य सत्यस्य ब्रह्मण आकर्षणादुपास्यैक्येऽपि फलभेदादुपासनाभेदः। 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत', 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति शास्त्रयोरिवाधिकाररूपसाध्यभेदाद् भेद इति प्राप्तेऽभिधीयते -

साधिकारे विधावङ्गे फलोक्तेरर्थवादता[१]।
अर्थवादात् फले कल्प्ये सर्वं तत् स्यात् प्रधानगम्॥

प्रकृताकर्षणात् तावदुपास्यरूपानुबन्धैक्याद् विद्यैक्यमवगतम् । नच फलभेदाद् भेदः। यतो 'जयतीमाँल्लोकान्' (बृ.उ. ५.४.१) इत्यादिना 'स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म' (बृ.उ. ५.४.१) इति प्रधाने सत्यविद्याविधौ फलवति जाते सति तस्योपनिषदहरहम् इति वाक्यद्वयमप्यङ्गभूतनामोपासनाप्रशंसार्थोऽर्थवादो न फलविधिः 'हन्ति पाप्मानम्' (बृ.उ. ५.४.१)इत्यादिः। अथैवं कामपदाभावेनाधिकारस्याश्रवणात् सत्रन्यायेनार्थवादात् फलकल्पनमिति

१. म. अर्थवादिता

ततो युक्तं फलं प्रधानस्येत्यगृह्यमाणविशेषत्वाद् वाक्यशेषगतजयपापहननादिसर्वफलकामस्य जातेष्टाविव संवलिताधिकारकल्पना जयादिसर्वफलयुक्तमेकमुपासनमिति।

तन्निरासः

तन्न। 'एष प्रजापतिर्यद् हृदयमेतद् ब्रह्मैतत् सत्यम्' (बृ.उ. ७.७.१) इत्यादिना बृहदारण्यके सप्तमेऽध्याये सत्यमुपक्रम्य हृदयशब्दगताक्षरत्रयत्वोपासनां[१] सफलामाद्यखण्डिकयाऽभिधाय, 'तद् वै तदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद' (बृ.उ. ७.२) इति द्वितीयखण्डिकया तस्यैव सत्यस्य पूज्यत्वप्रथमजत्वादिगुणवत्तया सर्वलोकजयफलकोपासनामभिधाय, 'आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्त सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवांस्ते देवाः सत्यमेवोपासते तदेतत् त्र्यक्षरम्' (बृ.उ. ७.३) इत्यादितृतीयखण्डिकया सत्यशब्दगताक्षरत्वेनोपासनामनृतहननफलां सत्यविषयिणीमेव देवानामभिधाय, 'तद् यत् सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषः' (बृ.उ. ७.४) इत्यादिचतुर्थखण्डिकया सत्यविषयिणीमेव भूरादिशिरस्त्वेनाहंनामधेयत्वेन चाऽदित्यमण्डलेऽधिष्ठाने पापहननादिफलामुपासनामभिधाय, 'योऽयं दक्षिणेऽक्षन् पुरुषस्तस्य भूरिति शिरः' (बृ.उ. ७.५) इत्यादिपञ्चमखण्डिकया पुरुषशरीरस्थदक्षिणाक्ष्याख्याधिष्ठाने भूरादिशिरस्कतयाऽहंनामकतया च पापहननादिफलामुपासनामभिधाय, 'मनोमयः पुरुषः स भाः सत्यः[२] तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा' (बृ.उ. ७.६) इत्यादिषष्ठखण्डिकया तद्विषयिणीमेव मनोमयत्वसर्वेशानत्वसर्वाधिपतित्वव्रीहियवाद्यणुपरिमाणत्वादिगुणकामात् तद्धृदयेऽधिष्ठाने उपासनामभिधाय, 'विद्युद्

१. म. अक्षरत्र्यवयवत्वोपासनाम्

२. उपनिषत्सङ्ग्रहे - 'मनोमयोऽयं पुरुषो भाः सत्यः' इति पाठो दृश्यते।

ब्रह्मेत्याहुः विदानाद् विद्युद् विद्यत्येनं पाप्मनो य एवं वेद विद्युद् ब्रह्म' (बृ.उ. ७.७) इति 'विद्युद्धैव ब्रह्म' इत्यनन्तरखण्डिकया तद्विषयिण्या विदारणादिगुणकायाः पापविदारणादिफलकाया उपासनायाः प्रत्येकमेवाभिधानाद् विद्यैक्यायोगात्।

किञ्च द्वितीयखण्डिकोक्तायाः 'तद्वै तदेतदेव तदास सत्यमेव' (बृ.उ. ७.२) इत्यादिविद्यायाः 'तद् यत् सत्यमसौ योऽयं दक्षिणेऽक्षन् पुरुषः' (बृ.उ. ५.५.४) इति चतुर्थपञ्चमोक्ताभ्यां विद्याभ्यामैक्यमुच्यते, उत चतुर्थपञ्चमोक्तयोर्विद्ययोः परस्परैक्यमुच्यते। नाऽद्यः। 'महद्यक्षं प्रथमजम्' (बृ.उ. ७.८,५) इत्यादिना पूज्यत्वादिगुणकविद्यायाः भूरादिशिरस्कविद्याभ्यामैक्यायोगात्। 'आप एवेदमग्र आसुः' (बृ.उ. ७.३) इत्यादितृतीयखण्डिकोक्तविद्यया व्यवधानाच्च। नच साऽपि विद्या सत्याख्यब्रह्मणो विषयस्यैक्यान्न भिद्यत इति वाच्यम्। सत्यशब्दगताक्षरत्रयवत्त्वरूपगुणभेदात्। नहि गुणभेदेऽपि विशेष्यानुगतिमात्रेण विद्याऽभेदः।

अत एव न द्वितीयः। अधिष्ठानयोरादित्यमण्डलदक्षिणाक्ष्णोरहरहंनाम्नोश्च स्फुटभेदावगमात्। अत एव 'सम्बन्धादेवमन्यत्रापि' (ब्र.सू. ३-३-२१) इत्यस्मिन्नधिकरणे विशिष्टस्य विशिष्टान्तरानुगमान्नोभयत्राहरादिनामचिन्तेति त्वयैव व्यवस्थापितम्। यथोक्तम् -

एकस्थानविशिष्टस्य यो धर्मोऽवगतः समः।
स्थानान्तरविशिष्टस्य तस्मान्नाम्नो व्यवस्थितिः॥

अन्यथा छान्दोग्यबृहदारण्यकगतयोः प्राणविद्ययोरुपास्यैक्येऽप्योङ्कारोद्गीथाख्यस्थानभेदेन हिरण्यश्मश्रुत्वादिधर्मैक्येऽप्यक्ष्यादित्यविद्ययोः स्थानभेदेन विद्याभेदो न स्यात्।

एतेन 'हन्ति पाप्मानं' (बृ.उ. ५.५.२) इत्यादिः पूर्वविद्याङ्गरहस्यनामोपासनाप्रशंसार्थोऽर्थवादः सर्वफलत्वं चेति[1] निरस्तम्। 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यादेरपि सन्निहितपूर्ववाक्यप्राप्तकर्माङ्गभूतसौर्यादियागानुष्ठानप्रशंसार्थत्वम् पूर्वकर्मणः ब्रह्मवर्चसादिसर्वफलवत्त्वं वा स्यादिति कर्मादीनां भेदवार्तोच्छेदापातात्।

सैवेति सूत्रस्य अद्वैत्यभिमतार्थनिरासः

एतेन 'तद् यत् तत् सत्यम्' (बृ.उ. ५.५.२) इत्याद्युत्तरवाक्ये 'स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म' (बृ.उ. ५.४.१) इति पूर्ववाक्योक्ता या सत्यविद्या सैवोच्यत इति सूत्रव्याख्यानं निरस्तम्। बहुवचनास्वारस्यस्य सत्यशब्दस्य विद्यालक्षकत्वस्य च स्वयमेवाङ्गीकारात्। आदिशब्दवैयर्थ्याच्च। हेत्वनुपन्यासाच्च। हिशब्दसूचितं प्रकृतानुकर्षणं हेतुर्भविष्यतीति चेन्न। तस्योपास्यस्थानयोर्भेदे सत्यैक्याप्रयोजकताया उक्तत्वात्।

रामानुजाभिमतसूत्रार्थनिरासः

यच्च 'तत्त्वमसि' (छा.उ. ६.८.७) इत्यादिसद्विद्यायामपि प्रश्नप्रतिवचनावृत्तौ सत्यामैक्यं कथमवगम्येत, येन 'साक्षादपरोक्षाद् ब्रह्म' इत्यादौ विद्यैक्ये दृष्टान्तत्वेनोदाह्रियेतेति। तत्रोच्यते- 'सेयं देवतैक्षत' (छा.उ. ६.३.२) इत्यादिषु सर्वत्र सैव परा देवतैवा[2]नुवर्तते। तस्मात् 'ऐतदात्म्यमिदं सर्वम्' (छा.उ. ६.८.७), 'तत् सत्यम्' (छा.उ. ६.८.७), 'स आत्मा तत्त्वमसि' (छा.उ. ६.८.७) इति सत्यादयः सर्वेषु प्रतिवचनेषु उपसंह्रियन्त इति पूर्वशेषत्वेन केषाञ्चिद् व्याख्यानं तदप्ययुक्तम्। एकैकसूत्रेणाप्यपर्याप्तानन्तप्रमेये सत्यपि 'व्यतिहारो विशिंषन्ति हीतरवत्' (ब्र.सू. ३.३.३८) इति गुणसूत्रोक्तदृष्टान्ताक्षेपसमाधानपरतया व्याख्यानस्य विषयवाक्यज्ञानदारिद्र्यकृतत्वात्।

---

१. म. वेति २. म. देवतैकैव

'ऐतदात्म्यमिदं सर्वम्' (छा.उ. ६.८.७) इत्यादिश्रुत्यनुसारात् 'ऐतदात्म्यादयः' इति सौत्रनिर्देशापत्तेश्चेति दिक्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- सत्यादीनां विष्ण्वभेदसाधनेन पर्यवसेयमर्थं सङ्गतिप्रदर्शनव्याजेन दर्शयति- **प्राणाद् विष्णोरेवोत्तमत्वसाधनादिति**॥ तेन प्राणविषयत्वादधिकरणस्य विष्णोरेवोत्तमत्वसाधनोक्तिरनुपपन्नेति शङ्कानवकाशः॥ **प्रागुक्तमिति**॥ 'इयदामननात्' (ब्र.सू. ३.३.३५) इत्युक्तमधिकारिणां प्राणावधित्वमित्यर्थः।

यद्वा, सत्यपदोक्तो विष्णुरित्युक्तमित्यर्थः। यद्वा, प्राणस्य विष्णुं विना सर्वोत्तमत्वमित्याद्युक्तमित्यर्थः। सत्यादीनपि विना सर्वोत्तमत्वप्राप्तेरिति भावः। 'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्' (ब्र.सू. ३.३.३७) इत्यारभ्य तत्पर्यन्तमेकमधिकरणं व्याख्यायतां केषाञ्चित् 'कृतिः' इत्यादिभाष्यस्य व्याख्यां विवरणसम्बन्धदीपिकादिविरुद्धतयोपेक्ष्य स्वयं व्याख्याति- **पूर्वपक्षयतीति**॥ नत्वेकदेशिरीत्या सूत्रावतारमात्रपरं, किन्तु पूर्वपक्षप्रतिपादनपरमतोऽधिकरणान्तरं न गुणसूत्रमिति भावः।

पूर्वपक्षीयानुक्तिन्यायस्य व्याख्यानम्

अनुक्तिन्यायं सम्बन्धिसाध्यप्रदर्शनेन विवृण्वत् 'नच सत्यादीनामभेदानुक्तेरन्यत्वम्' इति वाक्यं भाष्योक्तहेत्वसिद्धिपरिहाराय प्रवृत्तमित्यभिसन्धिः। भाष्योक्तं साध्यमादौ विवृणोति- **न केवलं प्राणात् सत्यपदोक्त इति**॥ भिद्यतेऽर्थोऽनयेति भेद उक्तिः। तन्मात्रस्य विवक्षितासाधकत्वात् सत्यादप्युपरीति वक्तव्यमिति भावेन हेत्वंशं व्याचष्टे- **सत्यादप्युपरीति**॥ भाष्ये विज्ञानमत्योर्नातीव भेद इति ज्ञानमित्येवार्थतोऽनुवादः। शाखान्तरविवक्षयेति केचित्। विवरणमवतारयति- **नचेति**॥ यो यस्मादुत्तम इति नास्ति प्रतिबन्धः। अन्नमयाद्युपर्याम्नातेषु प्राणमयादिषु तदभावात्। यो यस्मादुपर्याम्नातो भिन्नश्च स तस्मादुत्तम इति त्वस्ति प्रतिबन्धः। परन्तु, सत्येन विज्ञानादीनामभेदाद् व्याप्यगतं विशेषणमसिद्धमिति शङ्कितुर्हृदयम्। शङ्कोत्तरत्वेन विवरणं व्याचष्टे- **तेषामभेदोक्त्यादीति**॥ सत्यविज्ञानयोर्नाभेदः सम्भवति। अभेदानुक्तेः। ययोरभेदानुक्तिस्तयोरभेदाभावः। यथा घटपटयोः। अभेदानुक्तावप्यभेदः किं न स्यादिति चेन्न। प्राणसत्ययोरप्यभेदापत्त्या प्राणात् सत्यपदोक्तस्योत्तमत्वं न सिद्ध्येदित्यभेदोक्तेरेवाभेदकारणत्वावगमादकारणकार्योत्पत्तिप्रसङ्गो विपक्षे बाधकतर्क इति भावः।

एतेन,

'कृत्वा भाष्यानुभाष्येऽहमपि वेदार्थसत्पतेः।
कृष्णस्य सूत्रानुव्याख्यासन्न्यायविवृतिं स्फुटम्।
करोमि मन्दबुद्धीनां विदुषां चोपकारिकाम्॥'

इति स्वप्रतिज्ञानुसारेण भाष्येऽनुक्तिन्यायस्य भेदशब्देन विवरणेऽपि मन्दबुद्धीनां तद् दुरवगाहमित्युपेक्षितमेव विवरणमिति न न्यायविवरणं व्यर्थमिति सूचितम्। एवं सर्वत्र विवरणपार्थक्यं परिहरणीयम्। तदर्थं भाष्यसहितेऽनुभाष्ये सूत्रानुव्याख्यानगतसन्न्यायविवृतिं कृत्वाऽपि स्फुटं करोमीत्यपि योज्यम्। स्फुटीकरणं च क्वचिदाक्षेपसमाधानाभ्यां, क्वचिदक्षरार्थकथनेन, क्वचिदुपलक्षणेन, क्वचित् तात्पर्यकथनेन, क्वचित् सम्बन्धिसाध्याध्याहारेण, क्वचित् प्रमाणोपन्यासपूर्वमसिद्ध्यादिसमाधानेनेत्यनेकविधमेव द्रष्टव्यम्।

पूर्ववाद्युक्तदूषणमनूद्य निराचष्टे- **नच वाच्यमिति**॥ हेतुमाह- **सत्यं भगव इति**॥ मननशास्त्रत्वात् सूत्रभाष्यकृद्भ्यां कुतो नोक्तमित्यत आह- **इति भाव इति**॥ सूत्रभाष्यकृतोरिति शेषः॥

'सत्याद्या अहमात्मान्ता यद्गुणाः समुदीरिताः'

(भाष्योदाहृताध्यात्मवचनम्)

इत्यध्यात्मवचनोदाहरणेन भाष्यकारस्यैतद्ग्राहकतच्छब्दनिबन्धनेन सूत्रकारस्य चाभेदानुक्तावप्यभेदस्तद्गुणजिज्ञासाप्रकरण[१]पठितत्वादिनाऽङ्गीकार्य एव । व्याप्यान्तरेणापि तदनुमानसम्भवादिति भावो ज्ञायत इति भावः । अध्यात्मवचनोदाहरणस्य दूषणोद्धारपरत्वेन सङ्गतत्वेऽपि ब्रह्मतर्कोदाहरणं कुत इत्यत आह- **अत्र**[२] **हिशब्दसूचितां स्मृतिं चाऽहेति**[३] **॥** नेदमुद्देशशास्त्रम् । येन सूत्रकृदुक्तिमात्रेणैतद्धेतोस्सत्त्वं निश्चिनुयात् । अतः सत्यादीनां परदेवताभेदाभाव इत्यत्रासिद्धिपरिहाराय स्मृतिमाहेत्यर्थः । नामादिप्राणपर्यन्तादधिकारिवर्गादधित्वेन[४] पठितसत्यादिस्वरूपवान् भगवानिति ब्रह्मतर्कयोजनायां विवक्षितार्थसिद्धिरिति ध्येयम् **॥ अभेदानुक्तेरिति ॥** आत्माहङ्कारशब्दयोर्विज्ञानादिशब्दवद् गुणवाचित्वाभावादिति भावः । अध्यात्मवचने पादत्रयमेव सङ्गतमिति[५] तद्गुणजिज्ञासाप्रवृत्तप्रकरणपठितत्वरूपाभेदज्ञापकसूचनात् । तथाऽपि चतुर्थः पादः कथं सङ्गमयितव्य इत्यतो व्याचष्टे- **पूर्ववदभेदानुक्तावपीत्यादिना ॥**

यस्मात् कारणादहङ्कारात्मनोर्ज्ञानान्मोक्षः श्रूयते, अधिकारी च यस्माद् ज्ञानाद्भगवत एव विमुच्यत इत्यस्ति नियमः, अतोऽहङ्कारात्मनोरभेद इत्यर्थः । अहङ्कारात्मनोर्ज्ञानान्मोक्षवचनं प्राणज्ञानान्मोक्षवचनमिव भविष्यतीत्यतोऽनूनतेत्युक्तन्यायमनुसृत्य स्वयं युक्त्यन्तरमाह- **किं चेति ॥**

सिद्धान्तीयानूनतान्यायस्य व्याख्यानम्

अहङ्कारात्मनोः पूर्णत्वाद् भूमत्वं भूमत्वाच्च सत्याद्यभेद इति साधनं

---

१. जिज्ञासाप्रवृत्तप्रकरण २. म. अत्रैव ३. म. स्मृतिमाहेति
४. म. अधिकारिवर्गादधिकत्वेन ५. 'इति' शब्दः अधिक इव भाति ।

वक्रमित्यभिप्रेत्यानूनतेत्युक्तन्यायं सम्बन्धिप्रदर्शनेन प्रमाणोक्तिपूर्वं विवृण्वत् ' ''सत्यं पूर्णं विज्ञानं पूर्णं कृतिः पूर्णा निष्ठा पूर्णा श्रद्धा पूर्णा मतिः पूर्णा सुखं पूर्णं भूमा पूर्णोऽहं पूर्ण आत्मा पूर्णः नात्र किञ्चिदूनं पूर्णमेवाधस्तात् पूर्णमुपरिष्टात् पूर्णं मध्यतः पूर्णं सर्वतस्तदेष श्लोको भवति ।''

''पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥'' (शान्तिपाठः)

इति श्रुतेः सर्वेषामनूनत्वात्,

''सत्याद्या अहमात्मान्ता यद्गुणाः समुदीरिताः ।
तस्मै नमो भगवते यस्मादेव विमुच्यते ॥''

(भाष्योदाहृताध्यात्मवचनम्)

इति वचनाच्च' इति वाक्यं प्रकृतं सङ्गमयति- **तथा श्रुत्यन्तरे सर्वेषामपीति ॥** यद्यत्र सत्यादीनां परस्परं परदेवतया च भेदः स्यात् तर्हि परदेवताऽसाधारणधर्मस्य पूर्णत्वस्य सत्यादिषु श्रवणं विरुद्ध्येतेति भावः । अत्र सत्याद्यात्मान्तसमुदाये किञ्चिद् विज्ञानादिकमूनमपूर्णं नेति निगमनम् । तथाच पूर्णत्वरूपधर्म्यैक्यात् सत्यादीनां परस्परं न भेद इति 'नात्र किञ्चिदूनम्' इत्यन्तेनोक्तम् । पूर्णत्वं परब्रह्माख्यदेवताया धर्म इति 'पूर्णमेवाधस्तात्' इत्यादिनोच्यते । अधस्ताद् विद्यमानं परं ब्रह्म पूर्णमेव न तूनम् । एवं ब्रह्मैव पूर्णमिति वा । एवमुपरिष्टान्मध्यतः सर्वतश्च । ततश्च पूर्णत्वमसाधारणधर्मः । परस्य तदेव चेत् सत्यादौ श्रूयते तर्हि कथं ततो भेदः? सत्यादीनां पूर्णत्वे मूलरूप्यभेदादौ च[१] वक्ष्यमाणश्लोकः प्रमाणं भवति । स एव पठ्यते । अदो मूलरूपं ब्रह्म पूर्णं पूर्णत्वरूपासाधारणधर्मवत् । अन्यथा वचनवैयर्थ्यात् । इदं सत्यादिकं च पूर्णम् । अतस्तदुभयमेकम् । विज्ञानादिकं च कदाचिदेव प्रतीयतेऽतोऽभेदः कथम् ? मैवम् । पूर्णमेव सद्विज्ञानादि

---

१. मूलरूपस्य भेदादौ च ।

उदच्यते। 'नित्यव्यक्ता हरेर्गुणाः' इति वचनात्। इत्येष श्लोक इत्यन्वयः। इतिशब्द आवर्तनीयः। इति श्रुतेः सर्वेषां सत्यादीनामनूनत्वादित्यनेन सम्बद्ध्यते। इतिशब्दं विहायैव श्रुतेः प्रतीकग्रहणमिति केचित्। अनूनत्वं नाभेदसाधकं ब्रह्मवाय्वादौ ब्रह्माणीभारत्यादौ च दर्शनादित्यतो नेशतत्त्वानुगृहीतमेवाभेदसाधकमिति मन्वानो भाष्योदाहृताध्यात्मवचनमेव स्मारयति 'सत्याद्याः' (भाष्योदाहृताध्यात्मवचनम्) इति विवरणकृदिति विवरणं व्याख्येयम्।

॥ इति सत्याद्यधिकरणम्॥ २३ ॥

॥ अथ कामाधिकरणम्॥ २४ ॥

सूत्रभाष्यम्

प्रकृतेरपि जन्मादेः संसारप्राप्तेः किमिति नामादिष्वपाठ इत्यत्रोच्यते-

॥ ॐ कामादितरत्र तत्र चाऽयतनादिभ्यः ॐ ॥
॥ ३-३-४० ॥

स्वेच्छयैव मूलस्थाने स्थिताऽन्यत्रावतारान्[१] करोतीश्वरेच्छानुसारेण।

'सर्वायतना सर्वकाला सर्वेच्छा सर्वज्ञा न बद्धा बन्धिका[२] सैषा प्रकृतिरविकृतिः' इति वत्सश्रुतेः।

'नामादयस्तु बद्धत्वान्मोचकत्वात् परोऽपि च।
उभयोरप्यभावेन यथाऽव्यक्तं न तूदितम्॥
श्रुतौ तथा जीवपरावुच्येते किञ्चनेतरत्।
नोच्यते च तदा तत्त्वद्वयं वै समुदाहृतम्॥' इति ब्रह्मतर्के॥ ४०॥

॥ ॐ आदरादलोपः ॐ ॥ ३-३-४१ ॥

अबद्धत्वेऽपि भक्तिविशेषादेवोपासनाद्यलोपस्तस्या भवति।

'यथा श्रीर्नित्यमुक्ताऽपि प्राप्तकामाऽपि सर्वदा।
उपास्ते नित्यशो विष्णुमेवं भक्तो हरेर्भवेत्॥' इति बृहत्तन्त्रे[३] ॥४१॥

---

१. हृ. अन्यत्र चावतारान्। २. हृ. सर्वेच्छा न बद्धा बन्धका।
३. हृ. इति हि बृहत्तन्त्रे।

॥ ॐ उपस्थितेस्तद्वचनात् ॐ ॥ ३-३-४२ ॥

अनादिकाले भगवत्सम्बन्धित्वाद्[१] युज्यते च नित्यमुक्तत्वं तस्याः । 'द्वावेतावनादिनित्यावनादियुक्तौ[२] नित्यमुक्तावनादिकृतौ नित्यकृतौ योऽयं परमो या च प्रकृती रमते ह्यस्यां परमो रमते ह्यस्मिन् प्रकृतिः स्वस्मिन् हि रमते परमो न खल्वस्मिन् प्रकृतिरत एनमाहुः परम इति' इति गौपवन-श्रुतिवचनात् ॥ ४२ ॥

॥ इति कामाधिकरणम् ॥ २४ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनोपासने श्रियोऽनधिकारित्वसमर्थनादस्ति शास्त्रादि-सङ्गतिः । अन्यथाऽधिकारिणां प्राणावसानत्वासिद्धेस्तत् साधनीयम् । प्राणपरमात्मप्रसङ्गसन्निधापिता श्रीरत्र विषयः । अधिकारिणी न वेति सन्देहः । चेतनद्वैविध्यदर्शनं सन्देहबीजम् ।

पूर्वपक्षः

पूर्वपक्षयति- **प्रकृतेरिति ॥** भवत्येव प्रकृतिरधिकारिणी सादित्वे सति संसारित्वात् । नच तस्याः संसारित्वाभावः । सीतारुग्मिण्यादिरूपा-यास्तस्या जन्ममरणादिदर्शनात् संसारप्राप्तेः । किञ्च सा कृतार्था न वा । आद्ये भगवदुपासनं न स्यात् । द्वितीये कथमसंसारित्वं तस्याः? अतः संसारित्वेन प्रकृतेरप्यधिकारोऽस्त्येव । अधिकारित्वे च तस्याः किमिति नामादिष्वपाठः । किन्तु तत्पाठोऽध्याहर्तव्य एव । स च भवन् प्राणादुपर्येव भवेत् । तथाच नाधिकारिणां प्राणावसानत्वमिति भावः ।

१. ह. अनादिकालभगवत्सम्बन्धित्वात् २. ह. नित्ययुक्तौ ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत्रेति ॥** न प्रकृतेरधिकारित्वम् । तस्या बद्धत्वाभावात् । नच जन्मादेः संसारित्वप्राप्तिः । जननादेरवतारादित्वेन संसारहेतुत्वाभावात् । नच जन्माद्येव किं न स्यादिति वाच्यम् । जननेऽपि मूलरूपेण भगवत्समीपे स्थितत्वात् । नापीन्द्रादिवत् । स्वेच्छयैव जनने कर्मनिमित्तत्वाभावात् । नच स्वेच्छानुसारित्वे स्वातन्त्र्यम् । ईश्वरेच्छानु-सारित्वात् । मूलरूपेण भगवत्समीपे स्थिता स्वेच्छयाऽवतारान् करोतीत्येतत् कुतः ? सर्वगतत्वाद्यभिधायकश्रुतेरिति भावः । सर्वमिच्छाधीनं यस्याः सा **सर्वेच्छा । अविकृतिः** इत्यचेतनप्रकृतिं व्यावर्तयति ।

नन्वेवमसंसारित्वेनानधिकारित्वेऽपि प्रकृतेः कुतो नामादिष्वपाठः । भगवद्भक्ततारतम्यकथनावसरे तदुक्तेरावश्यकत्वात् । अन्यथा तदभाव-प्रसङ्गादित्यत आह- **नामादयस्त्विति ॥** यथा बद्धमोचकत्वविवक्षयैव नामादीनां परमात्मनश्चोक्तिस्तदुभयाभावेन प्रकृतेरनुक्तिर्नत्वभावात् तथा बद्धमोचकत्वाभिप्रायेणैव 'द्वा सुपर्णा' (मुण्ड.उ. ३.१.१) इत्यादिश्रुतौ जीवेश्वरावुच्येते नतु जडम् । तदा तत्त्वद्वयमेवोक्तं ज्ञातव्यं, नतु जडाभाव इत्यर्थः ॥ ४० ॥

रमायाः नित्यमुक्तत्वेऽपि आदराद् भगवदुपासनसमर्थनम्

ननु रमाया असंसारित्वे कृतकृत्यत्वेन भगवदुपासनाऽभावः स्यात् । नचासौ युक्तः ।

'यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिश्च सात्त्वतैः ।'

इत्यादिप्रमाणसिद्धत्वादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **आदरा-दिति ॥** प्रकृतेरसंसारित्वेन कृतकृत्यत्वेऽपि भगवदुपासनाऽभावो न प्रस-

ज्यते। निरुपाधिकभक्त्यतिशयेनोपासनोपपत्तेरिति भावः। 'आदरो भजनं भक्तिर्बहुमानं च सेवनम्' इत्यभिधानम्। अत्रैव स्मृतिं चाऽह- यथेति॥ अन्योऽपि हरेर्भक्तः। एवं निरुपाधिकभक्त्युपासको भवेदित्यर्थः॥ ४१॥

'द्वावेतौ' इति श्रुत्या रामायाः नित्यमुक्तत्वोपपादनम्

न रमाया नित्यमुक्तत्वं युक्तं कारणाभावात्। नच स्वत एव। अस्वातन्त्र्यादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- उपस्थितेरिति॥ युज्यते नित्यमुक्तत्वं प्रकृतेः। 'द्वावेतौ' (महोपनिषत् ६.४७) इति श्रुतेः। अनादिकाले भगवत्सम्बन्धित्वेनातिशयिततत्प्रसादाख्यकारणसद्भावादिति भावः। कृतौ पूर्णौ। अतः प्रकृतेरधिकारित्वाभावाद् युक्तं प्राणावसानत्वमधिकारिणामिति सिद्धम्॥ ४२॥

॥ इति कामाधिकरणम्॥ २४॥

शेषतात्पर्यचन्द्रिका

॥ ॐ[१] कामादितरत्र तत्र चाऽयतनादिभ्यःॐ ॥ ३-३-४० ॥

सङ्गतिः

प्रश्नप्रतिवचनव्यतिहारेण सत्यः प्राणादुत्तमश्चेत् श्रीतत्त्वमपि तेनैव प्राणादुत्तममङ्गीकार्यं स्यादित्याक्षेपेणोत्थानात् प्राणपेटिकायां सङ्गतिष्टीकायां[१] स्फुटा। सत्यादीनामात्मान्तानां भेदाभावेन प्राणस्यानेकावरत्वाभावेऽपि प्राणादुपरि श्रीतत्त्वाध्याहारे सत्यादिसुखान्तानां शब्दानां श्रीतत्त्वपरत्वाश्रयणे वा श्रीतत्त्वावरत्वमप्यङ्गीकर्तव्यमिति शङ्काया अनेकावरत्वाभावोक्तावेवोदयादनन्तरसङ्गतिः। यद्यप्युपरि पाठोऽध्याहर्तव्यो न वेत्येतदेव[२] विचारणीयम्। तथाऽप्युपासनायां श्रियोऽधिकारोऽस्ति न वेति विचारणं पादसङ्गतिसिद्ध्यर्थम्।

१. म. टीकायामेव २. म. इत्येतावदेव

अधिकारस्वरूपम्। श्रीतत्त्वे तदभावसमर्थनस्यात्र सङ्गतत्वम्

नन्वधिकारो नाम कः? यदभावः श्रियोऽत्र प्रतिपाद्यते। अर्थित्वस्य एवं सामर्थ्यविद्वत्त्वयोः श्रीतत्त्वे निश्चितत्वादिति चेन्न[१]। अपेक्षात्मकस्यार्थित्वस्य चेतनत्वादेव सिद्धत्वात्। अन्यथा 'नाकामः कस्यचिद् भवेत्' इति वचनविरोधः। मुख्यप्राणस्याप्येकान्तित्वविरोधेनापेक्षाया अभावेन अधिकाराभावप्रसङ्गाच्च। किञ्चैवंविधस्यार्थित्वस्याभावः परतत्त्वेऽप्यस्तीति तत्र तत्समर्थनानन्तरमेतस्यावसरः, तदर्थमधिकरणान्तरारम्भश्च स्यात्। तत्रापि 'दध्यौ प्रसन्नकरणः' इत्यादिनोपासनावगमाद् रामकृष्णादिरूपेण जन्मादिदर्शनाच्चेति चेन्मैवम्। अपेक्षावत्त्वात्मकस्यार्थित्वस्य चेतनत्वव्यापकत्वेऽपि प्रयोजनवत्त्वात्मकस्य तदभावात्। बालमुक्तादिप्रवृत्तौ व्यभिचारेण प्रयोजनस्य प्रवृत्तिव्यापकत्वाभावात्। तदेव हि प्रयोजनं यत् प्रवृत्त्या साध्यते। तत्तु कृतकृत्यत्वाच्छ्रीतत्त्वे नास्तीत्युच्यते। नचैवमपेक्षावत्त्वैकान्तित्वभङ्गः। भगवदिच्छानुसारीच्छात्वस्याऽगमिकत्वेन चिकीर्षारूपेच्छासद्भावेऽपि प्रयोजनाभिसन्ध्यभावमात्रेणैकान्तित्वोपपत्तेः। अत एव 'नाकामः कस्यचिद् भवेत्' इति वचनं न प्रयोजनाभिसन्धिमाह। किन्तु चेतनत्वव्यापकचिकीर्षादिरूपेच्छासद्भावमिति न विरोधः। मुख्यप्राणस्य तु प्रयोजनाभिसन्धिरस्त्येव। भगवत्प्राप्त्यैकाभिसन्धेरपि प्रयोजनाभिसन्धित्वात्। आवरणनिवृत्त्यभिसन्धित्वस्यावर्जनीयत्वाच्च। नहि धान्यैकाभिसन्धिरपि न तृणाभिसन्धिर्भवति। परन्तु लोकैरेव तृणाभिसन्धिरिति न व्यवह्रियते। अत एवोक्तरीत्याऽऽवरणनिवृत्तावुत्साहसद्भावेऽपि मुख्यप्राणस्य परमोत्साहवर्जनमित्युक्तम्। अल्पस्य च 'अनुदरा कन्या' इत्यादौ विवक्षादर्शनात् प्रयोजनाभिसन्धिशून्यत्वगर्भ एकान्तित्वव्यपदेशो युक्त एव।

१. 'अर्थित्वस्य एवं सामर्थ्यविद्वत्त्वयोः श्रीतत्त्वे निश्चितत्वात्। न च श्रीतत्त्वेऽर्थित्वाभावः' इति पाठः सम्भाव्यते।

यद्वा, यत्कृतिजन्यातिशययोगित्वं यस्य तत्र तस्याधिकारः। नत्वभिसन्धिगर्भः। तेन प्राणस्यैकान्तित्वेन प्रयोजनाभिसन्धिसामान्यशून्यत्वेऽप्युपासनाजन्यावरणनिवृत्तिरूपातिशययोगित्वेनाधिकारः। रमायास्तु तथाविधातिशयाभावात् तदभावः। परतत्त्वे त्वयं सिद्ध एव न साधनीयः। 'असम्भवस्तु सतोऽनुपपत्तेः' (ब्र.सू. २-३-९), 'नाऽत्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः' (ब्र.सू. २-३-१७) इति सूत्राभ्यां जन्ममरणाभावस्य साधितत्वेन संसारित्वाभावनिश्चयात्। नच ताभ्यामेव श्रीतत्त्वेऽपि तदभावो निश्चेतुं शक्यते। असत उत्पत्त्यसम्भवेऽपि सतो नारायणादुत्पत्तौ बाधकाभावात्। यद्यपीदं तत्र कर्तव्यम्। तथाऽपि इहोक्तरीत्या सङ्गतत्वेन पाठाध्याहारप्रसङ्गादत्र क्रियते।

चिन्ताक्रमः, पूर्वपक्षश्च

अत एवात्र श्रीतत्त्वविषयः पाठोऽध्याहर्तव्यो न वा, तदर्थं तस्योपासनाधिकारित्वमस्ति न वा, तदर्थं संसारित्वमस्ति न वा। तदर्थं जन्माद्यस्ति न वेत्यादि चिन्तनीयम्। अत्र-

श्रीतत्त्वविषये पाठो व्यतिहार्योऽपि पूर्ववत्।
जन्मादेर्बद्धताप्राप्तेरधिकारो ह्युपासने॥

श्रीतत्त्वस्यात्र प्रकरणे प्राणादुपरि सत्यादेरधस्तात् पाठाभावो द्वेधा भवेत्। असत्त्वेन वाऽविवक्षणेन[1] वा। नाऽद्यः। 'अहं रुद्रेभिः' (ऋ.सं. ८.७.९) इत्यादिश्रुतिसिद्धत्वात्[2]। द्वितीयेऽपि किं विवरणाभावः[3] प्राणादुत्तमत्वाभावेन वाऽधिकाराभावेन वा। नाऽद्यः। 'तं ब्रह्माणम्' (ऋ.सं. ८.७.९) इत्यादिश्रुतिविरोधात्। सति चैवमुत्तमत्वेऽपि प्राणादुपरि न पठ्यते चेद् विष्णुरपि तथा स्यात्। अङ्गीकृतश्च प्रश्नप्रतिवचनाध्याहारेण तत्पाठो व्यतिहारनये। द्वितीयेऽधिकाराभावः किमु सादित्वादुतासंसारित्वात्। नाऽद्यः। चतुर्मुखाद्यशेषजनित्र्याः

१. म. अविवरणेन २. म. श्रुतिविरुद्धत्वात् ३. म. विवक्षणाभावः

परतत्त्वपरिगृहीतायास्तदभावात्। न द्वितीयः। सीतारुग्मिण्यादिरूपेण जन्मदर्शनात्। पुत्रादीच्छया महादेवप्रार्थनपरिचरणादिश्रवणाच्च। नचैतत् परतत्त्वस्येव स्वेच्छयैव नटनं वञ्चनार्थमनुकारमात्रं युक्तम्। स्वातन्त्र्यप्रसङ्गात्। अन्यथाऽन्यत्रापि तथा स्यादिति पूर्वः पक्षः।

सिद्धान्तः

अनुकारमात्रमेतत् स्याद्धरीच्छैकानुसारतः।
स्वातन्त्र्यं नास्ति चान्यत्र तदिच्छैकानुसारिता॥

ततोऽधिकाराभावेन स्वातन्त्र्यस्याप्यभावतः।
संसारिणां मोक्षदातुर्गणनेन विवक्षणम्[1]॥ इति सिद्धान्तः।

अत्र पराभ्युपगतमधिकरणस्वरूपम्

अत्र परैर्व्याख्यातम्- 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः' (छा.उ. ८.१.१) इति प्रक्रम्य छन्दोगा अधीयते- 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' (छा.उ. ८.१.५)इत्यादि। वाजसनेयिनस्तु - 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते सर्वस्य वशी सर्वस्येशानः' (बृ.उ. ४.४.२२) इत्येवमादि। तत्र संशयः। किमितरेतरत्र गुणानामनुपसंहार उतोपसंहार इति। तत्र-

उपास्यं क्वचिदाकाशं ज्ञेयमन्यत्र तद्गतम्।
सगुणं निर्गुणं तुल्यं गुणं[2] चेति पराहतम्॥

छान्दोग्ये दहराकाशस्योपास्यत्वम्। वाजसनेयके त्वाकाशाश्रितस्याऽत्मनो निर्गुणस्य ज्ञेयत्वम्। 'असङ्गो ह्ययम्' (बृ.उ. ४.३.१५) इत्युक्तत्वात्। अतो

१. म. विवक्षितम् २. म. तुल्यगुणम्

न गुणोपसंहार इति प्राप्तेऽभिधीयते-

दहराकाश आत्मैव हृदाकाशेऽपि वर्णितः।
अन्तर्भावस्तुतिभ्यां स्यादुपसंहारवर्णनम्॥

वाजसनेयके निर्गुणोऽप्यात्मा सगुणदशायां छान्दोग्योक्तैरायतनादिसाम्योपस्थापितैः सत्यकामादिभिः स्तूयते। समानं ह्युभयत्र हृदयमायतनं समानश्च वेद्य ईश्वरः समानं च लोकासम्भेदप्रयोजनं सेतुत्वमिति।

तन्निरासः

तन्न। उपासनार्थस्यैवोपसंहारस्येह पादे वर्णयितव्यत्वादिह वर्ण्यमानस्य चोपसंहारस्य 'निर्गुणायां तावद् विद्यायां ब्रह्मस्तुत्यर्थमेव सगुणविद्यासम्बन्धगुणोपसंहारः सम्भवति' इति भामतीवाक्येन, 'स्तुतिर्हि दृष्टद्वारेण कर्तुं शक्येति सगुणविद्यासु ध्येयत्वेनोक्तानामपि गुणानां निर्गुणविद्यायामुपपन्नः स्तुत्यर्थत्वेनोपसंहारः' इति तद्विवरणकल्पतरुवाक्येन ''यस्त्विह साक्षाद् गुणोपसंहारमाह तस्य 'न स्थानतोऽपि' (ब्र.सू. ३.२.११) इत्यधिकरणविरोधः। तत्र स्वतस्तदुपाधितो वा धर्मनिषेधात्'' इत्युत्तरकल्पतरुणा चोपासनार्थत्वाभावोक्तेः पादसङ्गत्यभावात्। विद्याव्यवस्थित्यभावापाताच्च। अतीताधिकरणेषु प्रक्रमभेदाच्छान्दोग्यबृहदारण्योक्तप्राणविद्ययोरक्ष्यादित्यविद्ययोः स्थानभेदात्, प्राणब्रह्मविद्ययोश्चोपास्यभेदादन्योन्यविद्यागतधर्माणामन्योन्यत्रोपसंहाराभावोक्तेः। इह ब्रह्मपुरशब्देनैकत्रोपक्रमः। अजशब्देनैकत्र। एकत्र पुण्डरीकस्थानम्। इतरत्राऽऽकाशः। एकत्र सगुणं ब्रह्म तदितरत्र निर्गुणं ब्रह्मेत्युपक्रमादिभेदत्रयस्य स्वयमेवाङ्गीकारात् सुतरामुपसंहारसमर्थनानुपपत्तेश्च। प्रवर्तनीये हि रुच्युत्पादनाय स्तुतेरपेक्षितत्वेऽपीहानाधेयातिशये निर्गुणे तदयोगान्निर्गुणप्रकरणाम्नातानां 'स वा एष महानज आत्मा' (बृ.उ. ४.४.२२) इत्याद्युक्तमहत्त्वाजत्वसर्ववशित्वादीनामपि स्तावकत्वासम्भवेन परशाखागतानां सत्यसङ्कल्पत्वादीनां

स्तावकत्वस्य सुतरामयोगाच्च। एवमेव सर्वविद्यागतगुणानामपि निर्गुणस्तावकत्वसम्भवेन सर्वत्र निर्गुणमेवोच्यत इत्यापत्तेश्च। सगुणगतसत्यकामत्वादीनां ध्येयत्वेन विहितानां तदन्यत्रानुवर्तमानानां ध्येयत्वस्यैव न्याय्यत्वेन स्तुत्यर्थत्वायोगाच्च। अलौकिकसुखसाधनध्यानविषयत्वरूपध्येयत्वस्य शास्त्रैकसमधिगम्यत्वेन सत्यकामत्वादेर्निर्गुणविद्यायां ध्येयत्वेनान्वयायोगात् स्तावकत्वमिति चेन्न। सगुणविद्यायामपि ध्येयत्वाभावप्रसङ्गात्। विध्यभावस्योभयत्रापि साम्यात्। निर्गुणविद्यायां निराकाङ्क्षायां स्तुत्यर्थत्वकल्पनायोगाच्च। आयतनादिसाम्योपस्थापितगुणैराकाङ्क्षोत्थापनं तूक्तरीत्याऽऽयतनादीनां भेदान्निरस्तम्। उभयत्राप्यात्मशब्दश्रवणेनैक्यप्रत्यभिज्ञानोपस्थापितस्य सत्यकामत्वादेर्ध्येयत्वासम्भवे प्रमाणप्रापितस्य वैयर्थ्यमात्रेण त्यक्तुमशक्यतया स्तावकत्वमङ्गीक्रियत इति चेन्न। ध्येयत्वे बाधकाभावात्। 'योषितमग्निं ध्यायीत' इत्यादाविव स्वतो निर्गुणस्यापि तथा ध्यानमात्रेण निर्गुणत्वाभावापत्त्यभावात्। क्तरीत्यैक्यप्रत्यभिज्ञानस्य भ्रमत्वाच्च।

वशित्वादेः सत्यकामत्वादावन्तर्भाववर्णनं चायुक्तम्। नहि निर्गुणविद्यागतस्य सगुणविद्यागतगुणान्तर्भाववर्णनं शक्यं कर्तुम्। अन्यथा नित्यगुणस्य काम्यगुणान्तर्भाववर्णनमपि स्यात्। नच व्यापकस्य सर्ववशित्वस्य व्याप्ये सत्यकामत्वेऽन्तर्भावो युक्तः। प्रमेयत्वस्य द्रव्यत्वेऽन्तर्भावापत्तेः। नच वशित्वस्य सत्यकामत्वेऽन्तर्भाववर्णनेन किञ्चित् प्रयोजनमुपलभ्यते। नच सगुणविद्यायां वशित्वस्योपसंहार एव प्रयोजनं तवेष्टम्। 'यद्यपि सगुणायामाध्यानाय न वशित्वादिगुणोपसंहारसम्भवः। नहि निर्गुणायामाध्यातव्यत्वेनैते चोदिताः। येनाऽध्यातव्यत्वेन सम्बद्ध्येरन्। अपि तु सत्यकामत्वादिगुणनान्तरीयकत्वेनैतेषां प्राप्तिः' इति भामतीवाक्येन 'अतोऽन्तर्भावमात्रमुपसंहार इत्यर्थः' इति कल्पतरूक्त्या च विरोधापातात्। वशित्वादेर्निर्गुणविद्यायां ध्यातव्यत्वेन

चोदितत्वाभावेऽपि त्वदुक्तविद्यैक्यप्रत्यभिज्ञाप्रमाणप्रापितस्य सगुणविद्यायां ध्यातव्यत्वेन सम्बन्धे बाधकाभावेना[1]न्तर्भावमात्रकथनायोगाच्च। नहि पाठसमये यादृशं प्रतीयते तत्प्रमाणेनान्यत्रापि प्राप्यमाणं तादृशमेवेत्यस्ति नियमः। सगुणविद्यायां ध्यातव्यत्वेन चोदितानां सत्यकामत्वादीनां निर्गुणविद्यायां प्राप्यमाणानां स्तुत्यर्थत्वस्य त्वयैवाङ्गीक्रियमाणत्वात्। 'निवेशनः[2] सङ्गमनो वसूनाम्' (तै.सं. ४.२.५) इत्यादेः पाठसमये इन्द्रप्रकाशकत्वेन प्रतीतस्यापि 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रुतिप्रमाणेनान्यत्र प्रापितस्य गार्हपत्यप्रकाशकत्वदर्शनात्। पाठकालेऽदृष्टार्थमाम्नातानां मन्त्राणां कर्मकाले दृष्टार्थत्वदर्शनाच्च।

किञ्च सत्यकामत्वादीनामेव स्तुत्यर्थमन्तर्भावो किं न स्यात्। सगुणविद्यागतस्योपसंहारे बाधकाभावान्नैवमिति चेन्न। तत्रापि स्वरूपमात्रविवक्षया सत्यकामत्वादेरसम्भवात्। सम्भवे वा वशित्वादेरपि कुतो नासम्भवः। नच निर्गुणविद्यायां चोदितमिदं न ध्यातव्यमिति वाच्यम्। विशेष्यैक्ये तस्याप्रयोजकत्वात्। कथं ज्ञातं निर्गुणविद्यायां वशित्वादि चोदितमिति। 'विमोक्षाय ब्रूहि' इति मोक्षार्थमुपक्रान्तत्वादिति चेत्, छान्दोग्योक्तविद्याया अपि 'अथ यदिदमस्मिन्' (छा.उ. ३.१२.३४) इत्यादिना ब्रह्मशब्दोपक्रमात्[3] 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१.१) इत्यादिविद्याफलब्रह्मप्राप्तिरूपमोक्षफलस्यान्यत्रापि[4] कल्पनात्। अन्यथा 'अपहतपाप्मा विजरो विमृत्युः' इत्यादिकथनानुपपत्तेः। 'तं यथा यथोपासते तथैव भवति' इति श्रुतेः। 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते', 'अभयं ब्रह्म भवति' (छा.उ. ८.३.४) इति ब्रह्मप्राप्तिरूपमोक्षेणोपसंहाराच्च। 'स एष नेति नेत्यात्मा' (बृ.उ.

१. म. बाधकेन
२. म. निदेशनः
३. म. ब्रह्मशब्देनोपक्रमात्
४. म. अत्रापि

३.९.२६) इत्यादिना निर्गुणब्रह्मोपासनदर्शनं तु 'अपहतपाप्मा विजरो विमृत्युः' (छा.उ. ८.१.५) इत्यादिनाऽविशिष्टमेवेति निर्गुणसगुणविद्याविभागो निर्मूल एव।

कामादिति सूत्रस्य अद्वैत्यभिमतार्थनिरासः

एतेन कामादि सत्यकामादि। यथा देवदत्तो दत्तः सत्यभामा भामेति च। तथाच सत्यकामादिगुणजातं सगुणविद्योक्तं सर्वमपि इतरत्र वाजसनेयोक्तनिर्गुणविद्यायां यच्च निर्गुणविद्यायां वशित्वादि तत् सर्वं तत्र च सगुणविद्यायां च सम्बद्ध्यते। आयतनवेद्यसेतुत्वसामान्यादिति सूत्रव्याख्यानं निरस्तम्। एकदेशग्रहणस्यानन्यगतिकत्वात्। आयतनशब्देन तत्सामान्यलक्षणापाताच्च। उक्तरीत्या तत्सामान्यासिद्धेश्च।

कामादिति सूत्रस्य रामानुजाभिमतार्थनिरासः

एतेन, इतरत्र तत्र च वाजसनेयके छान्दोग्ये च सत्यकामाद्येव रूपम्। कुतः? आयतनादिभ्यः हृदयायतनत्वसत्यसङ्कल्पत्वविशेषरूपवशित्वादिभ्यः तत्सहचारिणः सत्यकामत्वादेः प्रत्यभिज्ञानात्। ततश्च विद्यैक्यमिति केषाञ्चिद् व्याख्यानं निरस्तम्। नह्यायतनाद्यैक्यमात्रं तत्प्रत्यभिज्ञापकं भवति। सर्ववशित्वसत्यसङ्कल्पत्वयोर्भेदात्। नच वशित्वं सत्यसङ्कल्पत्वविशेष इति वाच्यम्। विनिगमनाभावात्। प्रियशिरस्त्वादिवत् सत्यसङ्कल्पत्वविशेषस्य वशित्वादेरनुपास्यत्वप्रसङ्गाच्च। अविशेषात् सत्यकामत्वादेरपि सत्यत्ववशित्वविशेषरूपत्वोपपत्त्या तत्सहचारेण सत्यकामत्वादेः प्रत्यभिज्ञानं सम्पाद्य तेन रूपैक्यसाधनायोगाच्च। एवं सर्वविद्यागतधर्माणां कथञ्चिदितरेतरोक्तधर्मविशेषरूपत्वसम्पादनसम्भवेन दहरविद्यावैश्वानरविद्यादीनामपि भेदो न स्यात्। अत्र मतद्वयेऽपि 'कामादीतरत्र' इत्यपपाठकल्पनं दोषः।

एतत्सूत्रस्य शैवसम्मतव्याख्याऽनुवादः

शैवस्तु- 'कामादयस्तत्र तत्र चाऽयतनादिभ्यः' इत्यपपाठ्य छान्दोग्य-तैत्तिरीयवाजसनेयकैवल्योपनिषदादिषु 'अथ यदिदमस्मिन् ब्रह्मपुरे', 'दहं विपाप्मम्' (छा.उ. ८.१.१), 'य एषोऽन्तर्हृदय आकाशः' (बृ.उ. ४.४.२२) 'हृत्पुण्डरीकं विरजम्' (कैवल्योपनिषत्-६) इत्यादिनाऽऽरभ्योक्तासु[1] दहरविद्यासु आयतनादिभ्यः हृदयपुण्डरीकायतनादिभ्यः ऐक्यमेव । अतः सत्यकामत्वादयस्तत्र तत्र सर्वत्रोपसंहार्याः । वाजसनेयगताः वशित्वादयः, तैत्तिरीयगताः प्रणववाच्यत्वात्मत्वादयः, छान्दोग्यगता अपहतपाप्मत्वादयः, कैवल्यगताः 'विभुं चिदानन्दरूपमद्भुतमुमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्' (कैवल्योपनिषत्-७) इति चिदानन्दरूपत्वोमासहायत्व-त्रिलोचनत्वनीलकण्ठत्वादयः सर्वे गुणाः दहरविद्यायां ब्रह्मणोऽनुसन्धेया इति व्याचख्यौ।

तन्निरासः

तन्न। आयतनाद्यैक्यस्यासिद्ध्या विद्यैक्यस्यैवाप्रामाणिकत्वात्। कथञ्चिद्धर्म-रूपैक्येन विद्यैक्येऽप्युपास्यगुणभेदाद् विद्याभेदस्यापि प्राप्त्याऽन्योन्योक्तगुण-साङ्कर्यायोगाच्च।

'आदरादलोपः' इत्यादिसूत्रद्वयं पृथगधिकरणद्वयमिति वादिनामद्वैतिनां मतानुवादः तन्निरासश्च

कामाधिकरणान्तर्गतम् 'आदरादलोपः' (ब्र.सू. ३.३.४१) इत्यादि-सूत्रद्वयमधिकरणान्तरमन्यैरेवं व्याख्यातम्- छान्दोग्ये वैश्वानरविद्यां प्रकृत्य श्रूयते- 'तद् यद् भक्तं प्रथममागच्छेत् तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहा' (छा.उ. ५.१९.२) इत्यादि। तत्र पञ्च प्राणाहुतीः

१. म. आरब्धोक्तासु

श्रावयित्वा तास्वग्निहोत्रशब्दः प्रयुक्तः- 'य एतदेवं विद्वानग्निहोत्रं जुहोति' (छा.उ. ५.२४.२), 'यथेह क्षुधिता बाला मातरं पर्युपासते । एवं सर्वाणि भूतान्यग्निहोत्रमुपासते'' (छा.उ. ५.२४.२) इति च। तत्र संशयः। भोजनलोपे प्राणाग्निहोत्रस्यालोप उत लोप इति। तत्र-

आहुतेरन्यकालत्वान्न भुज्यर्थान्ननिष्ठता।
नाप्येकदेशद्रव्यत्वमत एवानपेक्षणात्॥

'सर्वाणि भूतान्यग्निहोत्रमुपासते' (छा.उ. ५.२४.५) इत्यधीतानां प्राणाग्नि-होत्रमुक्तम्। तत्सन्निधौ 'पूर्वोऽतिथिभ्योऽश्नीयात्। यथा ह वै स्वयमहुत्वाऽग्निहोत्रं परस्य जुहुयादेवं तत्' (वैश्वानरविद्यायां जाबालानां श्रुतिः) इत्यतिथिभोजनस्य प्राथम्यं निन्दित्वा स्वामिभोजनं प्रथममुच्यमानं प्राणाग्निहोत्रमेव। स्वामिभोजनं चातिथिभोजनात् परस्ताद् विहितम् । एवं स्वामिभोजनकालादन्यकालस्य स्वामिप्राणाग्निहोत्रस्य न भोजनप्रयोजनभक्तोपजीवित्वेनाप्रयोजकत्वम्। किन्तु भोजनाभावेऽपि भक्तं प्रति प्रयोजकत्वमेव । 'तद् यद् भक्तम्' (छा.उ. ५.१९.२) इति तु वाक्यं कौण्डपायिनवदग्निहोत्रनाम्नो मुख्याग्निहोत्रधर्मस्य पयआदेः प्राप्तौ भक्तद्रव्यैकताविधानार्थम्। विहिते च भक्ते 'प्रथममागच्छेत्' (छा.उ. ५.१९.२) इति भोजनार्थभक्तकीर्तनात् तावत्यंशेऽनुवादः।

एतेन उत्तरार्धात् स्विष्टकृते समवद्यति इतिवदन्यार्थद्रव्यैकदेशाश्रितत्वा-दप्रयोजकत्वं निरस्तम्। उत्तरार्धं हि प्रयोजकपुरोडाशज्ञानादृते न शक्यं ज्ञातुमिति न स्विष्टकृत्प्रयुक्तम्। प्राणाहुत्यङ्गं तु भक्तं विनाऽपि भोजनज्ञानेन वर्णितेन प्रकारेण शक्यज्ञानमिति प्राप्तेऽभिधीयते-

तच्छब्दः प्रकृतापेक्षो मुख्यार्थान्नं[1] परामृशेत्।
अग्निहोत्रपदं त्वर्थवादस्थं नातिदेशिकम्[2]॥

१. म. भुज्यर्थान्नम् २. म. नातिदेशकम्।

'तद्धोमीयम्' (छा.उ. ५.१९.२) इत्यत्र तच्छब्दस्य 'तद् यद् भक्तम्' (छा.उ. ५.१९.२) इति प्रकृतभोजनार्थभक्तमादायैवाभिधानपर्यवसानात् सापेक्षत्वम्। अतश्चोत्तरार्धवदप्रयोजिका प्राणाहुतिर्न भोजनाभावे भक्तानुगमनं प्रयोक्तुमर्हति।

यत्त्वग्निहोत्रशब्दात् पयआदिप्राप्तौ तद्बाधया भक्तद्रव्यविधायकं 'तद् यद् भक्तम्' (छा.उ. ५.१९.२)इति वाक्यं न भोजनार्थभक्तानुवादकमिति। तन्न। कौण्डपायिने विध्युद्देशगतोऽग्निहोत्रशब्दो गौणः सन् साध्यसादृश्येन धर्मान् प्रापयेत्। अयं त्वर्थवादगतः सिद्धं किञ्चित् सादृश्यमनुवदति स्तुत्यर्थम्। चिन्ताया उपास्तिगोचरत्वाभावेऽपि वैश्वानरविद्यासम्बन्धिप्राणाहुतिविषयत्वादस्ति परम्परया पादसङ्गतिरिति।

तन्निरासः

तन्न। मद्रीत्या, रमाया नित्यमुक्तत्वे उपासनालोपप्रसङ्गः। तस्याः बन्धनिवृत्तित्वाद्[१] इति शङ्कासमाधानाय पूर्वशेषत्वेन साक्षात् सङ्गतिलाभेऽपि परम्परयाऽपि पादसङ्गतिमाश्रित्याधिकरणान्तरत्वकल्पनायोगात्।

किञ्चात्र पञ्चप्राणाहुत्यात्मकमग्निहोत्रं भुजिक्रियातोऽभिन्नमुत भिन्नम्। नाऽद्यः। भोजनलोपे प्राणाग्निहोत्रं लुप्यते न वेति संशयस्यैवायोगात्। नहि घटे लुप्ते घटो लुप्तो न वेति संशयो दृष्टचरः। 'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः' (छा.उ. ५.१८.२) इति पूर्ववाक्ये 'आहवनीयादीनां जुहुयात् प्राणाय स्वाहा' (छा.उ. ५.१९.२) इत्यादीनां मन्त्राणां 'तस्य सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति' (छा.उ. ५.२४.२), 'तद् यथेषीकातूलमग्नौ प्रोतं प्रदूयत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' (छा.उ. ५.२४.३), 'य एतदेवं विद्वानग्निहोत्रं जुहोति' (छा.उ. ५.२४.२) इत्यादिना

१. 'बन्धनिवृत्त्यर्थत्वाद्' इति पाठः साधुरिति भाति।

फलविधानाच्च। नहि भुजिक्रियायामुक्तफलादयः सन्ति। द्वितीयेऽपि किं भोजनाग्निहोत्रयोर्व्याप्यव्यापकभावोऽङ्गीक्रियते न वा। आद्ये पुनःसंशयानुपपत्तिरेव। नहि व्यापकाभावे व्याप्यं शङ्कितुमर्हम्। न द्वितीयः। आस्ये प्रक्षेपात्मकभोजनस्य मन्त्रादिसाहित्येन भक्तप्रक्षेपविशेषात्मकाग्निहोत्रं प्रति सामान्यरूपत्वेन सामान्यविशेषयोश्च द्रव्यत्वपृथिवीत्वयोरिव व्याप्यव्यापकभावस्यावर्जनीयत्वात्। यदा यस्य प्राणाग्निहोत्रं तदा तस्य भोजनमिति प्रतिबन्धे व्यभिचारादर्शनाच्च।

किञ्चैवं सिद्धान्तानुपपत्तिः। भोजनलोपेऽप्यग्निहोत्रलोपे कारणादर्शनात्। नच 'तद्धोमीयम्' (छा.उ. ५.१९.२) इति तच्छब्देन भुज्यर्थान्नस्यैव होमतया श्रवणाद् भुजेरुपचारे स्विष्टकृदादीनामिव लोप एव न्याय इति वाच्यम्। वैषम्यात्। तथाहि। युक्तः स्विष्टकृदादेः शेषद्रव्यप्रतिपत्त्यर्थतया तल्लोपे लोपः। संस्कारकर्मणां द्रव्यलोपे लोपावश्यम्भावात्। नचेदमग्निहोत्रं संस्कारकर्म। भक्तद्रव्यस्योपयुक्तत्वस्योपयोक्ष्यमाणत्वस्य चाभावात्[१]। येन स्विष्टकृदादिवदुपयुक्तहविःशेषसंस्कारः प्रोक्षणसंसर्गादिवदुपयोक्ष्यमाणसंस्कारो वा स्यात्। उक्तरीत्या द्रव्यदेवतामन्त्रफलादिविशिष्टस्याग्निहोत्रस्य स्वातन्त्र्येणैव विधाने गुणकर्मत्वायोगाच्च। अत एव प्रसिद्धाग्निहोत्रादाविव मुख्यार्थभुज्यर्थान्नालोपे प्रसिद्ध्यपादानेन प्रधानानुष्ठानासम्भवाद् गुणलोपे च न मुख्यस्येति न्यायेन नाग्निहोत्रलोपो युक्तः। अत एव 'जाघन्या पत्नीः[२] संयाजयन्ति' (वैश्वानरविद्यायां जाबालश्रुतिः) इत्यादिवाक्यविहितपत्नीसंयाजादेर्जाघन्यादिप्रयोजकत्ववत् प्राणाग्निहोत्रस्य भक्तद्रव्यप्रयोजकत्वं च दुर्वारम्।

आदरादिति सूत्रद्वयस्य अद्वैत्यभिमतार्थनिरासः

अत एव जाबालानां श्रुतिः 'पूर्वोऽतिथिभ्योऽश्नीयात्' (वैश्वानरविद्यायां

१. म. अभावाच्च। २. म. पत्नीः

जाबालश्रुतिः) इत्यादिना प्राणाग्निहोत्रे आदरं करोति । तस्माच्छ्रुतिकृतादादरात् प्राणाग्निहोत्रस्यालोप इति पूर्वपक्षोपपादनान्नेदं[१] 'आदरादलोपः' (ब्र.सू. ३.३.४१) इति सूत्रव्याख्यानं निरस्तम्। उक्तरीत्या लोपाभावस्य पूर्वतन्त्र-प्रसिद्धन्यायतः सिद्धिसम्भवे वक्रेण साधनायोगात्।

एतेनैव उपस्थिते भोजनेऽतस्तस्मादेव भोजनद्रव्यात् प्रथमोपनिपतितात् प्राणाग्निहोत्रं निवर्तयितव्यम्। तद्वचनात् 'तद् यद् भक्तं प्रथममागच्छेत् तद्धोमीयम्' (छा.उ. ५.१९.२) इति वचनादिति 'उपस्थितेऽतस्तद्वचनात्' (ब्र.सू. ३.३.४२) इति द्वितीयमपपाठेन पठित्वा व्याख्यानं निरस्तम्। अत इत्यस्य वैयर्थ्याच्च।

'आदरादलोपः' इत्यस्य रामानुजाभिमतार्थनिरासः

एतेन, ननु 'मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन' (बृ.उ. ४.४.१९) इत्यादेः पूर्ववत् प्रकृतत्वात् 'स एष नेति नेत्यात्मा' (बृ.उ. ३.९.२३) इति च वक्ष्यमाणत्वात् 'सर्वस्य वशी सर्वस्येशानः' (आर्षेयोपनिषत्-९.२) इति विशेषणानां ब्रह्मस्वरूपत्वाभावात् कथं सत्यकामादेर्मोक्षसाधनोपासना-विषयत्वम्? अत्रोच्यते- वशित्वादेः प्रमाणान्तराविदितस्वरूपस्य श्रुत्यैकसमधि-गम्यस्याऽदरेण प्रतिपादनादलोपो प्रतिषेध इति 'आदरादलोपः' इत्यस्य पूर्वशेषत्वमाश्रित्य केषाञ्चिद् व्याख्यानं निरस्तम् । तल्लक्षणाद्यापातात् । उक्तशङ्कानिवर्तकहेतोः सूत्रेऽनुपन्यासाच्च। नच वशित्वादेः ब्रह्मस्वरूपत्वाभाव-मङ्गीकुर्वाणः श्रुतेस्तत्राऽदरमङ्गीकरोति। नचात्राभ्यासादि दृश्यते। येनाऽदर-प्रतीतिः स्यात्।

'उपस्थितेस्तद्वचनात्' इति सूत्रस्य रामानुजाभिमतार्थनिरासः

ननु 'स यदि पितृलोककामो भवति' (छा.उ. ८.२.१) इत्यादिना

१. 'पूर्वपक्षोपपादनान्नेदं' इतीमानि पदानि सम्पातायातानीति भाति।

सत्यकामत्वादिगुणविशिष्टवेदनस्य सांसारिकफलसम्बन्धश्रवणात् सत्यकाम-त्वादयो मुमुक्षोर्नोपसंहार्या इत्यत्रोच्यते। उपस्थितिरुपस्थानं ब्रह्मोपसम्पत्तिः। उपस्थिते ब्रह्मोपसम्पन्नेऽतो ब्रह्मोपसम्पत्तेरेव हेतोः तद्वचनात् पितृलोकादि-प्राप्तिवचनात्, न तत्सांसारिकं फलम् । अपि तु साक्षान्मुक्तस्यैवेति 'उपस्थितेऽतस्तद्वचनात्' इत्यपपठितस्य द्वितीयस्य व्याख्यानं चायुक्तम् । आद्यपदवैयर्थ्यात्। कथञ्चित् सार्थक्येऽपि षष्ठ्यन्तस्यैव युक्ततया सप्तम्यन्त-स्यायोगाच्च । एकस्यैव प्रमेयस्य प्रसक्तानुप्रसक्त्या बहुभिः सूत्रैः साधने सूत्रत्वव्याघाताच्च।

आदरादिति सूत्रद्वयस्य शैवसम्मतव्याख्याऽनुवादः

शैवस्त्विदं सूत्रद्वयमधिकरणद्वयमाह । पूर्वत्र नीलकण्ठत्वोमापतित्व-सत्यसङ्कल्पत्वादिगुणजातं किं कादाचित्कं कदाचिल्लुप्यते कदाचिन्न लुप्यत इति संशये, उपासनार्थं परब्रह्मणि तेषां कल्पितत्वात् कदाचिल्लोप इति प्राप्ते परब्रह्मण उमासहितत्वादीनां सर्वत्र श्रुतिष्वभ्यासाख्यादरादलोप एव । अत एव परब्रह्मालुप्तशक्तिकमुच्यते। 'कृष्णपिङ्गलं विरूपाक्षम्' (कैवल्योपनिषत्) इति शक्तिसाहित्ये त्रिलोचनत्वे च सिद्धेऽपि पुनरादरार्थमुमासहायं परमेश्वरं प्रभुं त्रिलोचनमिति कैवल्योपनिषद्यभ्यस्तम् । सवितृमण्डलविद्यायां च 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतये उमापतये' (म.ना.उ.) इत्युमापतित्व-मभ्यस्तम्। अन्यत्र च 'नीलग्रीवो नीललोहितः', 'नीलग्रीवाय च शितिकण्ठाय च' इत्यादौ नीलकण्ठत्वादिकमभ्यस्तम्। एवं सत्यसङ्कल्पत्वादीनां पुनर्वचन-मादरार्थमेव। धर्मब्रह्मणोः प्रमाणान्तरागम्ययोर्यादृशं स्वरूपमभिधत्ते भगवती श्रुतिस्तादृशमेवाभ्युपेयम्। श्रुतिरेव च 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै.उ. २.१.१) इति सत्यज्ञानाकारमपरिच्छिन्नं ब्रह्मेत्युक्त्वा 'ऋतं सत्यं परं ब्रह्म' (म.ना.उ. १०.१) इत्यादिना त्रिलोचनत्वपरशक्त्युमासहितत्वशबलितत्वरूपं विशिष्ट-

मभिधत्ते। पुनश्च तस्य 'स एको ब्रह्मण आनन्दः' (तै.उ. २.८) इति निरतिशयानन्दवत्त्वमाह। 'तस्यैवाऽकाशशरीरं ब्रह्म' इत्यादिना चित्प्रकाशरूपत्वमात्मारामत्वं बाह्यान्तःकरणनिरपेक्षान्तःकरणैकानुभूयमानपरमानन्दविलासत्वमुपशान्तसकललोकोपद्रवकलङ्कत्वमनादिमुक्तत्वं च प्रकाशयति। अस्य विरूपाक्षत्वादिलक्षणशरीरसम्बन्धेन जीवप्रसक्तान् दोषान् 'अपहतपाप्मा' (छा.उ. ८.१.१) इत्यादिना निराकरोति। 'यः सर्वज्ञः स सर्ववित्' (मुण्ड.उ. १.१.९), 'पराऽस्य शक्तिः' (श्वेता.उ. ६.८), 'पशूनां पतये' इत्यादिरस्य सर्वज्ञत्वसर्वशक्तित्व-स्वतन्त्रत्वादिकं च निरूपयति। एवं श्रुतिरेव सकलप्रमाणशिखामणिरुक्तगुणं ब्रह्म सर्वत्र घोषयन्ती केन निवार्यते ? ततस्तद्धर्माणामलोप एवेति सिद्धान्तः।

इह पूर्वाधिकरणोक्तं ब्रह्मस्वरूपमेव मुक्तप्राप्यमुतान्यदिति संशये 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वेता.उ. ६.१९) इत्यादिभिः ब्रह्म निर्विशेषमेव। 'ब्रह्म वेद ब्रह्मैव भवति' इति मुक्तस्य तत्स्वरूपापत्तिरेव मुक्तिः श्रूयते। अतो निर्विशेषमेव ब्रह्म मुक्तप्राप्यं नान्यदिति प्राप्ते, पूर्वोक्तं सविशेषमेव ब्रह्म। तदेव मुक्तप्राप्यदहरकमलान्तर्भावनीयतया प्रतिपादिते विरूपाक्षे परब्रह्मणि 'परञ्ज्योतिरुपसम्पद्य' (आर्षे.उ. ६.३) इति मुक्तेन प्राप्ये 'स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.३.४) इति स्वरूपेणाभिनिष्पत्तेरेव हेतोः, 'जक्षन् क्रीडन् रममाणः स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा' (छा.उ. ८.१२.३) इत्यादिना स्वच्छन्दतो ज्ञात्यादिप्राप्त्यभिधानात्। 'परमं साम्यमुपैति' (मुण्ड.उ. ३.१.३) इति श्रुत्या 'मुक्तजीवः समो भवेत्' इत्यादिस्मृत्या च मुक्तस्य ब्रह्मसादृश्यप्राप्त्यभिधानात्। अत उक्तगुणं ब्रह्मैव मुक्तप्राप्यम्। अतः सगुणविद्यैव परविद्या। 'निष्कलं निष्क्रियं शान्तम्' इत्यादि तु हेयगुणनिषेधः। तथाहि। 'निष्कलं' (श्वेता.उ. ६.१९) इत्यादिना तु निर्गुणत्वे सामान्येन प्राप्ते 'अपहतपाप्मा' (छा.उ.

८.१.१), 'यः सर्वज्ञः' (मुण्ड.उ. १.१.९) इत्यादिविशेषश्रुतिभिः निर्गुणश्रुतेः हेयगुणराहित्यमित्यर्थः। सगुणश्रुतेः कल्याणगुणसाहित्यमिति विज्ञायते। किञ्च वचनमेव सगुणं मोक्षफलं प्रकाशयति। 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै.उ. २.१.१) इति सिद्धान्त इति।

तद्विमर्शः

तत्रेदं प्रमेयद्वयमस्माकमविरुद्धम्। निर्दोषाशेषसद्गुणं मुक्तामुक्तप्रपञ्चविलक्षणमेकमेव ब्रह्मेत्यङ्गीकुर्वता त्वया मया वाऽन्योन्यविद्यागतानां धर्मिवाचिनां शब्दानामन्योन्यस्मिन् लक्षणया शक्त्या वा तात्पर्यमेष्टव्यम्। अन्यथा शब्दप्रामाण्यानिर्वाहात्। परन्त्विहेदं न वक्तव्यम्। किन्तु पूर्वं पूर्वस्मिन्नध्याये, उत्तरं तु चतुर्थे। सूत्रयोजना च सूत्रपदस्वारस्यमावहतीति सङ्क्षेपः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु - केचिदत्र सूत्रभाष्ययोरधिकारित्वविषयतासूचनाभावात् प्रकृतेः प्राणादुत्तमत्वं विषयमङ्गीकृत्याधिकरणं प्रवृत्तमित्याहुः। प्रकृतेः प्राणात् परत्वस्यापि सत्त्वे सूत्रभाष्यकृद्भ्यामसूचनात्, पादसङ्गत्यभावप्रसङ्गात् 'संसारित्वप्राप्तेः' इति भाष्येऽधिकारित्वसूचनाच्च तदयुक्तमिति भावेन स्वमतेनाधिकरणविषयमाह- **श्रियोऽनधिकारित्वसमर्थनादिति ॥** 'श्रीरत्र विषयः' इत्युत्तरग्रन्थस्तु 'अन्यत्रावतारान् करोति' इति भाष्यानुसारेण। प्रकृतेः प्राणात् परत्वं न सम्भवति वेति चिन्ता 'समना चासृत्युपक्रमादमृतत्वं चानुपोष्य' (ब्र.सू. ४.२.७) इत्यादौ भगवत्साम्यप्रतिपादनेन गर्भस्राविकन्यायेनायुक्तेति भावेन स्वमते चिन्तामाह- **अधिकारिणी न वेति सन्देह इति ॥** 'प्रकृतेरपि जन्मादेः संसारप्राप्तेः' इति भाष्ये प्रकृतिः प्राणात् परा न भवतीति साध्यांशाध्याहारे प्राणात् परत्वाभाववति नामादौ भाष्योक्तसंसारित्वस्याभावेन व्यतिरेकयोर्व्यभिचारदर्शनेन सन्दिग्धानैकान्त्यप्रसङ्गोऽप्रयोजकत्वं चेति स्वमते

साध्यमध्याहरति- **भवत्येव प्रकृतिरधिकारिणीति ॥** तामसादिवारणाय विशेषणं प्रक्षिप्य व्याख्याति- **साधुत्वे सतीति ॥** तर्हि जन्मादेरित्यसङ्गतं चशब्दाभावान्न हेत्वन्तरं चेत्यतोऽसिद्धिपरिहारेण सङ्गमयन्नाह- **नच तस्या इति ॥** 'प्रकृतिः संसारवती। जन्मादिवत्त्वात्।' इति हि भाष्ये प्रयोगोऽभिप्रेतः। तत्र जन्मादिवत्त्व-संसारवत्त्वयोर्भेदाभावात् साध्यसाधनभावानुपपत्तिमाशङ्क्य दर्शनपदाध्याहारेण योजयति- **जन्ममरणेति ॥** यद्वा भाष्यस्थजन्मादिपदं तद्दर्शनस्योपलक्षण-मित्याह- **जन्ममरणेति ॥**

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

ननु जन्मादिदर्शनं संसारित्वाभाववति भगवति गतमिति चेन्न। दर्शनशब्दस्य प्रमितिपरत्वात्। ननु तर्हि पुनरसिद्धिप्रत्यावृत्तिः। अज्ञानासिद्धिश्च स्यादित्याशङ्क्य तत्परिहारायाप्रयत्नत्वन्यायं विवृण्वत् **'नच श्रियोऽप्रयत्नत्वादनुपासनं संसारो वा'** इति वाक्यं प्रवृत्तमित्याशयेन विकल्पमुखेन योजयति- **किञ्चेति ॥** भगवदुपा-सनानुपपत्त्याऽमुक्तत्वं, तदनुपपत्त्या च जन्मादिमत्तया प्रमितत्वं चाङ्गीकृतमिति भावः।

यद्वा, जन्मादिना भाष्यरीत्या संसारित्वं साधनीयमिति भावः। यद्वा 'भवत्येव प्रकृतिरधिकारिणी' इति प्रतिज्ञायां भाष्यरीत्या हेतुमभिधाय विवरणरीत्या हेतुमाह- **किञ्चेति ॥** अकृतार्थत्वादिति हेतुनिर्देशः। तदनङ्गीकारे बाधकप्रदर्शन-मुखेनाकृतार्थत्वमेव स्थिरीक्रियते। तथाचाकृतार्थत्व एवाङ्गीकर्तव्ये कथमसंसारित्वमनधिकारित्वं चेत्यर्थः।

नन्वत्राकृतार्थत्वेन जन्मादिमत्त्वं, जन्मादिमत्त्वेन संसारित्वं, तेन चाधिकार-मात्रार्यः कुतः साधयति ? अकृतार्थत्वेनैव साक्षादधिकारसाधनसम्भवादिति चेत्। क्षित्यादेः सावयवत्वेन सकर्तृकत्वसाधनसम्भवे तत्साधितेन कार्यत्वेन कुतस्तत् साधयति ? सर्वोऽपि तान्त्रिककथाशिक्षणार्थं तथा साधयतीति चेत्,

प्रकृतेऽपि तथेति भावय। नन्वेवमधिकारित्वसाधनं प्राणादुपरि प्रश्नप्रति-वचनाध्याहारप्रसङ्गे कथं सङ्गतमित्यतः प्राप्तं **'किमिति नामादिष्वपाठः'** इत्युर्वरितं भाष्यं व्याचष्टे- **अधिकारित्वे चेति ॥**

अनेन 'इयदामननात्' (ब्र.सू. ३.३.३५) इत्यधिकरणाक्षेपो विफल इति भावेन पूर्वपक्षमाह- **स च भवन्निति ॥** प्रकृतिरधिकारिणी संसारित्वात्, इति प्रयोगमसिद्ध्या दूषयति- **तस्या बद्धत्वाभावादिति ॥** संसारित्वाभावादिति वक्तव्ये बद्धत्वाभावादिति वचनं 'न बद्धा बन्धिका' (भाष्योदाहृतवत्सश्रुतिः) इति वत्सश्रुत्यनुसारेणेति ज्ञातव्यम्।

जन्मादित्वेन संसारित्वं साध्यत इत्यत्र वक्तव्यम्। किं प्रादुर्भावादिमात्रं हेतुरुत देहयोगादिः। नाऽद्य इत्याह- **जननादेरिति**[1] **॥** प्रादुर्भावादिरूपस्य जनन-मरणादेरवतारतिरोधानादिरूपत्वेन तस्य च भगवति विद्यमानत्वेन संसारं प्रति हेतुत्वायोगादित्यर्थः। द्वितीयं निराकर्तुं 'इतरत्र तत्र च' इति सूत्रांशमवतारयति- **नच जन्माद्येवेति ॥** सूत्रं योजयति- **जननेऽपीति ॥** अनेन 'इतरत्र' इत्यस्यार्थ उक्तो भवति। 'तत्र च' इत्यस्यार्थः:- **भगवत्समीप इति ॥** तत्रासम्भव-परिहारायोक्तम्- **मूलरूपेणेति ॥** स्थितेरित्यस्यानुकर्षेण स्थितत्वादिति व्याख्यानम्। कामादिति पदव्यावर्त्याशङ्कां दर्शयति- **नापीन्द्रादिवदिति ॥** 'प्रकृतिः देहयोगादिरहिता। इतरत्र तत्र च स्थितत्वात्।' इति प्रयोगेऽर्जुनादि-रूपेण शचीपत्यादिरूपेण चेतरत्र तत्र च स्थिते इन्द्रादौ देहयोगादेर्दर्शनाद् व्यभिचार इति भावः। कामादित्येतदितरत्रेत्यनेन सम्बद्ध्यत इत्याशयेन व्याख्याति- **स्वेच्छयैव जनन इति ॥** फलितमाह- **कर्मनिमित्तत्वाभावा-दिति ॥** कर्मानिमित्तजननवत्त्वे सति मूलरूपेण तत्र स्थितत्वादिति हेत्वर्थः।

---

१. म. जन्मादेरिति ॥

तथाचेन्द्रादौ विशेषणासिद्धेर्न व्यभिचारः। रमायां तु सिद्धेर्न व्यभिचारः। रमायां स्वेच्छयैव जन्मादियोगित्वात् तत्सिद्धिः।

यद्वा, कर्मानिमित्तकजननादिमत्त्वं स्वेच्छयैव भगवत्स्थाने स्थितत्वं च हेतुद्वयमनेनोच्यत इति न कश्चित् क्षुद्रोपद्रवः। 'ईश्वरेच्छानुसारेण' इति भाष्यवैयर्थ्यं निराह- **नचेति**॥ नन्वायतनादिभ्यः इत्यत्राऽदिपदं व्यर्थम्। आयतनपदघटितश्रुत्यैवाबद्धत्वसिद्धेः। न वा[1] ब्रह्मतर्कवाक्यग्रहणाय तत्। अपर्यवसानप्रसङ्गादित्यतः तत्सङ्गमनाय शङ्कते- **नन्वेवमिति**॥ भगवदुक्तिवत् तारतम्यकथनावसरे तदुक्तेरावश्यकत्वादित्येतदुपलक्षणम्। उपास्यकथनावसरे तदुक्तेरावश्यकत्वात्। अन्यथा तारतम्याभावात् तस्या उपास्यत्वाभावोऽपि स्यात्। नचायमङ्गीकर्तुं शक्यते चतुर्मुखप्रभृतीनां स्वोत्तमान्तामपि[2]। किं पुनरखिलेश्वरस्यातिप्रियतमाया विरिञ्चिमुखनिखिलसुरपुरस्सरसज्जनसेव्याया देव्याः। मुमुक्षुः भगवत्परिवारभूतदेव्युपासकः। प्रधानभूतभगवदुपासकत्वात्। यः प्रधानराजोपासको भूतिकामो लौकिको वा जनः स तत्परिवारभूतामात्याद्युपासको दृष्ट इत्यनुमानविरोधाच्च।

'लक्ष्मीविरिञ्चवाणीशगिरिजेन्द्रा गिरां पतिः।
सूर्यादयश्च क्रमशो भगवत्प्रीतिगोचराः॥
तेषु भक्तिः क्रमेणैव कार्या नित्यं मुमुक्षुभिः।
सर्वेऽपि गुरवश्चैव पुरुषस्य सदैव हि।
तस्मात् पूज्याश्च नम्याश्च ध्येयाश्च परितो हरिम्॥
हरिभक्तिः क्रमेणैव तदीयेषु हरिस्मृतिः।
हरिस्मृतिस्तत्स्तुतिश्च तत्स्मृतिर्हरिपूजनम्॥

१. म. च। २. 'सोत्तमानामपि' इति पाठेन भाव्यमिति भाति।

तत्पूजा विहितात्याग इति मुक्तेः क्रमेण हि।
नियमात् साधनान्येव नित्यसाध्यानि चाखिलैः॥
यो हि भक्तःप्रधाने स्यात् तदीयेष्वपि भक्तिमान्।
दृश्यतेऽसौ नियमतो विपरीते विपर्ययः॥'

इत्यादिवचनाच्चेत्यपि द्रष्टव्यम्।

यथातथाशब्दौ उपमायाम्। तयोश्च स्वस्थान एवान्वयसम्भवे व्युत्क्रमेणान्वयायोगादित्यभिप्रेत्य श्रुतक्रमेणैव व्याचष्टे- **यथा बद्धेति**॥ 'तदा तत्त्वद्वयं वै समुदाहृतम्' इत्येतद् वैयर्थ्यपरिहाराय निगमनपरतया व्याचष्टे- **तदेति**॥ तस्मादित्यर्थः। 'द्वा सुपर्णा' (मुण्ड.उ. ३.१.१) इत्यादिश्रुतौ तत्त्वद्वयस्यैवोक्तौ छन्दोगश्रुतिदृष्टान्तकथनेनानिश्चितस्य दृष्टान्तत्वानुपपत्तेर्विवक्षितविशेष एवात्र निश्चीयत इति भावः। 'द्वा सुपर्णा' (मुण्ड.उ. ३.१.१) इति श्रुतिविवक्षाविशेषसाधनस्य प्रकृतसङ्गतिवैक्लैवेति व्युत्क्रमेण यथा 'द्वा सुपर्णा' (मुण्ड.उ. ३.१.१) इति श्रुतौ जीवपरावेव बन्धकत्वमोचकत्वविवक्षयोच्येते नतु जडस्याभावविवक्षया तथा छन्दोगश्रुतावपि नामादिप्राणपर्यन्तजीवराशिः सत्यादिरूपी हरिश्चानयैव विवक्षयोच्येते। नतु श्रीतत्त्वस्याभावविवक्षयेति व्याख्येयमिति केचित्। श्रीतत्त्वस्य प्राणोच्चत्वं भगवदवरत्वं च मुमुक्षूपास्यत्वं च प्रमाणान्तरावसेयम्। न तदर्थं मध्ये पाठोऽध्याहार्य इति भावः।

उपलक्षणमेतत् व्याख्यानान्तरस्यापीत्यभिप्रेत्य योजनान्तरं दर्शितं तत्त्वप्रदीपे। तथाहि। यथातथाशब्दौ प्रकारवचनौ। एकमेव चेदं वाक्यम्। तदेति श्रवणाद् यदेति ग्राह्यम्। यथा येन प्रकारेण बद्धत्वमोचकत्वप्रकारेण छन्दोगश्रुतौ योजितायामव्यक्तं श्रीतत्त्वं नोदितं भवेत् तथा तेन प्रकारेण छन्दोगश्रुतौ योजितायां

१. 'नास्मिन् पक्षे' इति पदानि अनन्वितानि नावश्यकानीति भान्ति।

नामादिप्राणान्तो जीवराशिस्तत्परो हरिश्चोच्यते। नास्मिन् पक्षे[१] तदैव तस्मिन् पक्ष एवेह छन्दोगश्रुतौ तत्त्वद्वयमेवोक्तम्। नतु श्रीतत्त्वम्। उपास्योपासक-भावादिविवक्षान्तरमवलम्ब्य प्रवृत्ते पक्षान्तरे तु प्रश्नप्रतिवचनाध्याहारेणात्रैव श्रीतत्त्वमुक्तं वेदितव्यम्।

एवं च 'व्यतिहारो विशिंषन्ति' (ब्र.सू. ३.३.३८) इत्यारभ्य 'कामात्' (ब्र.सू. ३.३.४०) इत्यन्तानां सूत्राणां योजनान्तरं च सूचितम्। सत्यादि-सुखान्तस्य श्रीतत्त्वविषयत्वं वक्तव्यम्। 'एष तु वा अतिवदति' इति तुशब्देन विशेषणात्। तदर्थं प्रश्नप्रतिवचनव्यतिहारश्च कर्तव्यः। नचैवं परतत्त्वस्य प्राणोच्चत्वासिद्धिः। तदर्थमेव व्यतिहारसूत्रमावर्तत इत्यङ्गीकारात्। सत्यादि-सुखान्तप्रकरणस्य व्यतिहारेण श्रीतत्त्वविषयत्वे सिद्धे भूमाद्यहङ्कारात्मनां विष्णुत्वसिद्ध्यर्थं 'अस्ति भगवः सुखाद् भूयः। भूमा वै सुखाद् भूयः' इति प्रश्नप्रतिवचनाध्याहारः कर्तव्य इति तस्यार्थः।

नन्वेवं सत्यादिसुखान्तप्रकरणयोजने द्वाभ्यामेवावरत्वं प्राणस्येत्युक्तं स्यात्। अत्र सप्तानां तत्त्वानामुपलम्भादित्यतः प्राप्तं 'सैव हि सत्यादयः' इति यस्याः प्राणोच्चत्वसिद्ध्यर्थं पूर्वसूत्रे व्यतिहार उक्तः सैव श्रीः सत्यादिसुखान्तैः सप्तभिः शब्दैरभिधीयते। एवं भूमादिशब्दैस्त्रिभिरेको विष्णुश्चाभिधीयत इति ग्राह्यम्। ततश्च प्राणस्य द्वाभ्यामेवावरत्वं सिद्ध्यति। एवं श्रीतत्त्वस्य मध्ये निवेशे सिद्धे तत्रोपासककोटौ[१] गणनीयम्। येनाधिकारिणां प्राणावसायित्वमुक्त-मयुक्तं स्यात्। किन्तूपासककोटावेवेत्युच्यते। कामादितरत्र तत्र चेति योजना तु पूर्ववेति। आयतनशब्देनाऽयतनपदवती वत्सश्रुतिर्गृह्यते। वृधन्वती वार्त्रघ्नी इत्यादाविवेत्यवधेयम्।

---

१. 'किन्तूपास्यकोटावेव' इति पाठः सम्भाव्यते।

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

कथाक्रमशिक्षणाय तृतीयसूत्रमादौ व्याकुर्वदेव **'संस्कारपाटवम्'** इत्युक्तन्यायं द्वितीयसूत्रस्थादरशब्दार्थत्वव्यञ्जनेन विवृण्वत् **'नित्यं भगवदुपस्थितेरति-प्रियत्वात् संस्कारपाटवान्नित्योपासोपपत्तेः'** (न्या.वि.) इति वाक्यं व्याचष्टे-**अनादिकाले भगवत्सम्बन्धित्वेनेत्यादिना॥**

सूत्रक्रमौचित्यकथनम्

ननु चाऽद्ये सूत्रे नित्यमुक्तत्वे साधकं वत्सश्रुतिवचनमुक्तम्। तृतीये तत्रैवानादिकाले भगवत्सम्बन्धित्वरूपतदुपसाधकान्तरमुच्यत इति तेन द्वितीयेन भवितव्यम्। न भवितव्यं चान्तरसूत्रेण। द्वितीयेन तस्य नित्यमुक्तत्वे बाधक-परिहारपरत्वात्। कथाक्रमभङ्गश्चैवं स्यात्। अत एव विवरणकृदन्ते व्याचख्यौ।

मैवम्। यत आद्ये जन्माद्यभावे साधकमुक्तम्। द्वितीये नित्यमुक्तत्वे बाधकं परिहृत्य तृतीये साधकमुच्यते। अत एव तत्र चशब्दाभावः। नित्यमुक्तत्वे बाधकपरिहारयुक्तिर्जन्माद्यभावेऽपि बाधकं परिहरिष्यतीति सूचनाय मध्ये बाधकपरिहारः सूत्रकृता कृतो नानुपपन्न इति सूत्रक्रमोऽपि द्रष्टव्यः।

॥ इति कामाधिकरणम्॥ २४॥

॥ अथ निर्धारणाधिकरणम् ॥ २९ ॥

सूत्रभाष्यम्

दर्शनार्थं ह्युपासनम् । तच्च श्रवणादेरेव भवति । अतः किमर्थमित्यत्रोच्यते-

॥ॐ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॐ॥
॥ ३-३-४३ ॥

तत्त्वनिश्चयो वेदार्थनियमश्च ब्रह्मदृष्टेः पृथगेव । हिशब्देन 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ.४-४-५) इति श्रुतिं सूचयति । श्रवणादिफलं चाज्ञानविपर्ययादिदर्शनप्रतिबन्धनिवृत्तिः । ब्रह्मतर्के च -

'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ ।
संशयं च पराणुद्य लभते ब्रह्मदर्शनम् ॥' इति ॥ ४३ ॥

॥ इति निर्धारणाधिकरणम् ॥ २९ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनोपासनस्य समस्तस्यापि कर्तव्यतासाधनादस्ति शास्त्रादिसङ्गतिः । अन्यथा समस्तोपास्तिविधानवैयर्थ्यापत्तेः सा समर्थनीया । प्रकृतोपासनमेव विषयः । किं समस्तं कर्तव्यं व्यस्तं वेति सन्देहः । विधेः पक्षद्वयसाधारण्यं सन्देहबीजम् ।

पूर्वपक्षः

पूर्वपक्षयति- **दर्शनार्थमिति** ॥ व्यस्तमेवोपासनं कर्तव्यम् । तथाहि ।

उपासनं तावद् भगवद्दर्शनार्थं नतु प्रयोजनान्तरं दृष्टमिष्टं वा । तच्च दर्शनं श्रवणमननाभ्यां भविष्यति किं ध्यानेन ? अथोच्येत ज्ञानप्रतिबन्धकस्य दृढत्वाद् ध्यानादेव दर्शनमिति । तथा सति ध्यानेनैव दर्शनसम्भवादलं श्रवणादिना । नचोभयसमुच्चयेनैव दर्शनमिति मानमस्ति । नचोभयोरपि कृत्यं पश्यामः । अतः समस्तोपासनस्याकर्तव्यत्वाद् व्यर्थं तद्विधानमिति भावः ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **अत्रेति** ॥ कर्तव्यमेव समस्तोपासनं न श्रवणमननमात्रम् । श्रवणादिमात्रेण दर्शनाभावात् । तत्त्वज्ञानं हि श्रवणफलम् । अयमेव वेदार्थो नान्य इति निर्णयस्तु मननफलम् । तदुभयं च ब्रह्मदर्शनात् पृथगेव । अतो ध्यानं दर्शनार्थं कर्तव्यमिति भावः । ननु ध्यानादेव चेद् भगवद्दर्शनं किं तर्हि श्रवणमननाभ्यामित्यत आह- **हिशब्देनेति** ॥ ज्ञानार्थं त्रयस्यापि विहितत्वात् सर्वमुपासनं कर्तव्यमिति भावः ।

ननु श्रौतोऽपि समुच्चयः कथमङ्गीकर्तुं शक्यते ? ध्यानादेव दर्शनसम्भवात् । नच ज्ञानोदयोपयोगितया श्रवणादेः कर्तव्यता । श्रवणादेः फलान्तरस्यैवोक्तत्वादित्यत आह- **श्रवणादीति** ॥ कर्तव्यमेव समस्तोपासनं श्रवणादेरपि ध्यानफलदर्शनोपयोगित्वात् । तथाहि । भगवद्दर्शनस्य तावदज्ञानसंशयविपर्ययाः प्रतिबन्धकाः । तत्र श्रवणं तत्त्वज्ञानमुत्पादयदज्ञानं निवर्तयति । मननं च वेदार्थनिर्णयं कुर्वत् संशयविपर्ययौ निवर्तयति । अतः प्रतिबन्धकनिवर्तकतया ज्ञानोपयोगित्वात् समस्तोपासनमपेक्षितमिति भावः । अत्र स्मृतिमाह- **ब्रह्मतर्के चेति** ॥ अतः सर्वोपासनस्य कर्तव्यत्वादुक्तं युक्तमिति सिद्धम् ॥ ४३ ॥

॥ इति निर्धारणाधिकरणम् ॥

शेषतात्पर्यचन्द्रिका

॥ॐ तन्निर्धारणार्थनियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॐ॥

॥ ३-३-४३ ॥

अनन्तरसङ्गतिः पेटिकासङ्गतिश्च

एवं श्रवणमनननिदिध्यासनरूपोपासनादीनां सर्वशाखाविषयतया कर्तव्यत्वमभिधाय, तत उपसंहारपेटिकया निदिध्यासनस्याधिकारिभेदेन सर्वोपसंहारानुपसंहाराभ्यां नित्यशः कर्तव्यत्वं सर्वथा भाव्यत्वं चोपक्षिप्य, तत्प्रसक्तानुप्रसक्त्या मुक्तानामुपासनं कर्म चैच्छिकमुररीकृत्योपासकानां नामादीनां, भगवतः सर्वोच्चयार्थं रमायाश्च नित्यमुक्तत्वज्ञापनार्थं च प्राणपेटिकया प्राणान्तमेव तारतम्यमुक्त्वा, मोचकत्वेन सत्याद्याख्यस्येशस्योच्चत्वमुक्त्वा मोचकत्वस्य बद्धत्वस्य चोभयोरप्यभावेन पाठाध्याहारादिना रमाविवक्षाभाव इत्युक्तम्। अधुना सर्वशाखाविषयत्वेन कर्तव्यतया प्रथमाधिकरणे निष्टङ्कितानां श्रवणमनननिदिध्यासनानां त्रयाणामपि 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.उ. ४.४.५) इति श्रुतौ प्रमितानामप्यन्यतरविवक्षाभावः। यथा कामाधिकरणे प्राणान्तजीवराशिरमाविष्णूनां मध्ये रमायाः प्रमितत्वेऽपि मोचकत्वबद्धत्वयोरभावेन छन्दोगश्रुतौ विवक्षाभाव उक्त इत्याक्षेपस्य सिद्ध एव कामनयप्रवर्तनादनन्तरसङ्गतिः। अत्रेतःपरं 'भूम्नः क्रतुवत्' (ब्र.सू. ३.३.५९) इत्यतः प्राग् द्वादशाधिकरणी समुच्चयपेटिका। तत्र 'प्रदानवत्' (ब्र.सू. ३.३.४४) इत्यारभ्येतिकर्तव्यतापेटिका। तत्रापि 'विद्यैव तु निर्धारणात्' (ब्र.सू. ३.३.४८) इत्यारभ्य 'परेण च' (ब्र.सू. ३.३.५४)इत्यन्तं[१] ज्ञानपेटिकेत्याद्यूह्यम्।

१. म. इत्यतः प्राक्।

संशयपूर्वपक्षौ

तत्रोपासनाशब्दितानि श्रवणादीनि समस्तान्यपि किं मुमुक्षुणाऽवश्यमनुष्ठेयान्युतैकैकमेवेति सन्देहे, एकैकमेवेति पूर्वः पक्षः। तथाहि। यः समस्तानामनुष्ठानं ब्रूयात् स किमेषां श्रवणादीनां समप्राधान्यमङ्गीकरोति उताङ्गाङ्गिभावम्। नाऽद्यः। शाब्दापरोक्षे मनननिदिध्यासनयोः करणत्वाभावेन श्रवणस्य च तद्भावेन तस्यैव तत्र प्राधान्यात्। तथाहि। श्रवणं नाम शक्तितात्पर्ययोरवधारणं वा, तद्विशिष्टशब्दावधारणं वा, तात्पर्यप्रमापकलिङ्गावधारणं वा, आचार्योपदेशजं ज्ञानं वा, गुरुमुखाद् वेदान्तानां ब्रह्मणि संयोजनं वा, तत्त्वनिर्णयार्थन्यायचर्चारूपवाक्यविशेषप्रयोगरूपं वा, न्यायानुसन्धानार्थप्रश्नोत्तरवाक्यविशेषप्रयोगरूपं वा, वादकथा वा, तर्कात्मकविचारो वा, तत्त्वदर्शिन आचार्यान्न्याययुक्तवाक्यार्थग्रहणं वा समन्वयाध्यायोक्ततात्पर्यनिश्चायकोपक्रमाद्युक्त्यनुसन्धानं वा, युक्त्यनपेक्षं श्रद्धामात्रेण प्रतिवाक्यमयमस्य वाक्यस्यार्थ इति गुरुमुखाद् वाक्यार्थग्रहणं वा नान्यत्। तथाच सर्वथा श्रवणस्य शब्दघटितत्वाच्छाब्दबोधकारणत्वम्[१]। दर्शनं च शाब्दापरोक्षम्। 'दशमस्त्वमसि' इत्यादौ शब्दस्य दर्शनहेतुत्वाङ्गीकारात्। नहि शाब्दबोधे करणमकरणाभ्यां मनननिदिध्यासनाभ्यां समप्रधानं भवति।

यद्वा मननमेव प्रधानम्। नान्यत्। दर्शनस्य शब्दजन्यत्वपक्षेऽस्य शब्दस्यायमेवार्थो नान्य इति निर्धारितस्यैव शब्दस्य कारणत्वं नान्यथेति तन्निर्धारणफलकस्य मननस्य करणकोटिप्रवेशौचित्यात्।

यद्वा, ध्यानमेव प्रधानं नान्यत्। सन्ततानुस्मरणस्य कामुकस्य कामिन्यादिसाक्षात्कारे सामर्थ्योपलम्भात्। यद्यपि 'द्रष्टव्यः श्रोतव्यः' (बृ.उ. ४.४.५) इत्यत्र सन्निधानमस्ति श्रवणादिसाक्षात्कारयोः। तथाऽपि लिङ्गं सन्निधानात्

१. अत्र वाक्यं त्रुटितमिव भाति। 'शब्दजन्यं दर्शनं च' इति पाठः सम्भाव्यते।

प्रबलम्। 'यस्य येनार्थसम्बन्धो दूरस्तेनापि तेन सः' इत्युक्तेः। श्रवणमनने तु सन्निहिते अपि न कारणे। अज्ञानसंशयादिनिवर्तकत्वेनान्यथासिद्धत्वात्। तस्मात् पक्षत्रयेऽपि न समप्राधान्यं युक्तम्। अत एव न द्वितीयः। उक्तरीत्या गुणप्रधान-भावनिर्णयायोगात्।

किञ्च, किमेषामन्यतमस्य प्रयाजादिवत् फलोपकार्यङ्गत्वमुत सन्निपत्योप-कार्यङ्गत्वम्। नाऽद्यः। तद्वदेव सकृदनुष्ठितिप्रसक्त्या वक्ष्यमाणावृत्तिविरोधात्। द्वितीयेऽपि पुरोडाशादिवत् साक्षात् करणस्वरूपनिर्वर्तकमुतावघातादिवत् प्रणाड्या । नाऽद्यः । आवृत्तिविरोधादेव। न द्वितीयः। तादृशप्रणाड्या अदर्शनात्। संशयविपर्ययाज्ञाननिवृत्तेस्तज्जन्यतत्त्वज्ञाननिर्धारणयोर्वा तण्डुल-निष्पत्त्यादिवत् प्रणाडीत्वं दृश्यत इति चेन्न। अवघातादीनां प्रकरणाम्नानादि-वदिहाङ्गाङ्गिभावग्राहकप्रमाणाभावात् । नह्युपयोगितामात्रेणाङ्गत्वकल्पनं युक्तम्। तथा सति 'स्वाध्यायोऽध्येतव्यः' (तै.आ. २.१५.१), 'अग्नीनादधीत' (तै.सं. ३.५.१), 'द्रव्यमार्जयन् ब्राह्मणः प्रतिगृह्णीयाद् याजयेदध्यापयेत्' इत्यारभ्याधीतानामध्ययनाधानधनार्जनानामपि यागाङ्गता स्यात्। तत्साध्य-विद्याग्निधनानां यागे उपयोगदर्शनात्।

समप्राधान्यपक्षस्तु प्रत्येकं फलदर्शनात्।
न युज्यते ततोऽङ्गत्वे न समुच्चयसम्भवः॥

तस्मादेकैकस्यैवानुष्ठानं न समस्तस्येति।

सिद्धान्तः

सिद्धान्तस्तु- न तावद् भगवद्दर्शनसाधनशब्दरूपप्रमाणशरीरे शक्तितात्पर्य-विशिष्टशब्दावधारणाद्यन्यतमरूपस्य श्रवणस्य प्रवेशेन प्राधान्यमित्याद्यः पक्षो युक्तः। शब्दस्य साक्षात्कारं प्रत्यसामर्थ्यात्। 'दशमस्त्वमसि' इत्यादौ शब्दस्य

साक्षात्कारहेतुत्वासम्मतेः। 'एषोऽणुरात्मा चेतसा वेदितव्यः' (मुण्ड.उ. ३.१.९), 'दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' (कठ.उ. ३.१२) इत्यादौ मनस एवापरोक्षं प्रति करणत्वाभिधानाच्च। अत एव 'धनुर्गृहीत्वौपनिषदं महास्त्रम्' इत्युपनिषदां सहकारित्वमेवाऽह। अत एव च 'वेदा ह्येवैनं वेदयन्ति' इत्यादिश्रुतयो मानसावलोकनरूपे भगवद्दर्शने करणीभूतस्य मनसः शब्दः सहकारिमात्रमित्येवम्परा योज्याः।

किञ्च शक्तितात्पर्यविशिष्टशब्दावधारणाद्यन्यतमस्य ज्ञानात्मकत्वेन 'श्रोतव्यः' (बृ.उ. ४.४.५) इत्यादिवाक्ये विधानानुपपत्त्या 'श्रवणादिक्रिया तावत् कर्तव्येह प्रयत्नतः' इति सुरेश्वरोक्त्योभयविजातीयचेतोवृत्त्यन्तरात्म-कस्यैतद्वाक्यविधित्सितस्य श्रवणस्य ज्ञानेतरविचाराद्यात्मकत्वावश्यम्भावेन तस्य साक्षात्कारं प्रति प्राधान्यप्रापकविशेषहेत्वभावः। आचार्योपदिष्टस्यार्थस्य स्वात्मन्येव युक्तमिति हेतुतःप्रतिष्ठापनं वा, श्रुतस्यार्थस्य युक्तिभिरनुचिन्तनं वा, श्रवणेन निश्चितस्य तात्पर्यस्य तद्विषयस्य वा स्मरणं प्रत्यभिज्ञा वा, संस्कारदार्ढ्यफलकं श्रवणसमानाकारं ज्ञानं वा मननमित्याद्युत्प्रेक्षितपक्षेषु शब्दघटितत्वावश्यम्भावान्मननस्यापि प्राधान्यापत्तिश्च। उक्तमननस्य ज्ञानात्मकत्वेनाविधेयत्वे त्वदुक्तश्रवणस्यापि कथं तन्न स्यात्? मननस्य दर्शनप्रतिबन्धकसंशयविपर्ययनिवर्तकत्वेनोपयोगमात्रं नतु प्राधान्यमिति चेत् श्रवणेऽपि दर्शनप्रतिबन्धकाज्ञाननिवर्तकत्वेनाप्राधान्यं किं न स्यात्?

नापि मननमेव प्रधानमिति द्वितीयः पक्षो युक्तः। नियामकाभावात्। दर्शनस्य शब्दजन्यत्वपक्षस्य दूषितत्वात्। मननस्य संशयविपर्ययनिवर्तकतयोपयोगि-मात्रत्वाच्च। नापि ध्यानमेव प्रधानं नान्यदिति तृतीयः पक्षो युक्तः। 'अथवा सततं शास्त्रविमर्शेन भविष्यति' इति श्रवणमननयोरपि प्राधान्योक्तेः। यद्येवमप्य-ज्ञानसंशयादिनिवर्तकत्वेनोपयोगित्वमात्रं तर्हि ध्यानस्यापि वक्ष्यमाणरीत्या तदापत्तिः। तस्माद् विनिगमनाभावेन समप्राधान्यपक्षदूषणमयुक्तम्।

प्रामाणिकं चैतत् समप्राधान्यम्। 'श्रोतव्यः' (बृ.उ. ४.४.५) इति वाक्येन त्रयाणामपि तुल्यवद् दर्शनोद्देशेन विधानात्। खलेकपोतन्यायेनाऽरुण्यादीनां युगपत् क्रयसम्बन्ध इव त्रयाणामपि युगपत् फलीभूतदर्शनसम्बन्धे वाक्य-भेदाभावात्। पार्ष्टिकान्वयबोध आरुण्यादीनामेकहायनीं प्रतीव श्रवणादीनां ध्यानं प्रत्यङ्गत्वमेवेति चेन्न। आरुण्यादीनाममूर्तत्वेन करणत्वानर्हाणां परि-च्छेद्याकाङ्क्षायाम् एकहायन्याश्च द्रव्यत्वेन करणत्वे परिच्छेदकाकाङ्क्षाया इव चेह श्रवणादिनिदिध्यासनयोः परस्पराकाङ्क्षाया अभावात्। नच श्रवणस्याज्ञाननिवृत्तौ मननस्य च संशयविपर्ययनिवृत्तौ सामर्थ्यदर्शनेन तद्द्वारा कथञ्चिदुपकुर्वतो श्रवणमननयोर्ध्यानाङ्गत्वमेवेति न शास्त्रस्य तदङ्गत्वे तात्पर्यमिति युक्तम्। यतो ध्यानकालेऽपि संशयविपर्ययकृतो भगवद्दृष्टेः प्रतिबन्धोऽस्ति। यतस्तत्त्वनिश्चय-वतोऽपि पारोक्ष्यात् कश्चित् संशयो भवति। अदृष्टे दर्शने कीदृशो भवेदिति। तथाच ध्यानस्याप्युक्तप्रतिबन्धकनिवृत्तौ व्यावृत्तत्वेन तदङ्गित्वेऽपि तात्पर्या-निश्चयापातात्। यदि चाऽन्तरालिकस्य सर्वस्य स्वाङ्गतया व्यवधायकत्वं तदा श्रवणमननयोरपि तुल्यम्। 'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ। संशयं च पराणुद्य लभते ब्रह्मदर्शनम्' (ब्र.सू.भा. उदाहृतब्रह्मतर्कवचनम्) इति समुच्चा-यकतथाशब्दश्रवणान्न व्रीहियवयोरिव समप्राधान्यविकल्पः शङ्कनीयः। अत एव 'अथवा सततं शास्त्रविमर्शेन भविष्यति' इत्येतदपि न विकल्पाभिप्रायम्। किन्तूक्तरीत्या समप्राधान्याभिप्रायम्। अत एव च फलैक्यादस्य तदनुष्ठानं व्यर्थ-मिति परास्तम्। पञ्चानां प्रयाजादीनां यागापेक्षितोपकारनिवृत्तिरूपफलैक्येऽपि समुच्चयेन पञ्चानामप्यनुष्ठानदर्शनात्। तस्मात् समप्राधान्यपक्षो निरवद्यः। एवमङ्गाङ्गिभावपक्षोऽपि निरवद्यः। तथाहि। न श्रवणादेः फलं भगवद्दृष्टिरेव। किन्तु तत्त्वनिर्धारणम्। अर्थनिश्चयश्च तद्दृष्टेरन्यदेव। तत्रापि श्रवणादेः न साक्षात् साधनत्वम्। अज्ञानसंशयविपर्ययनिवृत्तिरूपद्वारोपलम्भात्। 'संशयं च पराणुद्य लभते ब्रह्मदर्शनम्' (ब्र.सू.भा. उदाहृतब्रह्मतर्कवचनम्) इति वचनाच्च।

नन्वेवं श्रवणादेरज्ञाननिवर्तकत्वेन, प्रतिबन्धकाभावस्य कारणत्वासम्मतेः, स्वाङ्गत्वाभावेन व्यवधायकत्वाच्च श्रवणादिनाऽज्ञानादिनिवृत्तौ स्वत एव तत्त्वनिर्धारणार्थनिर्णययोः शब्देनैव सम्भवेन तस्य तत्त्वनिर्धारणादावपि हेतुत्वं न स्यात्। सुतरां ध्याने सुतमां च दर्शन इति चेन्न। इष्टत्वात्। कथं तर्ह्यङ्गाङ्गिभाव इति चेन्न। अकार्यकारणयोरपि कथञ्चिदुपकारित्वमात्रेणाप्यङ्गाङ्गिभावोपपत्तेः। न खलु कारणत्वादिगर्भोऽङ्गाङ्गिभावः। तथा सत्यनुयाजाद्युदीच्याङ्गकलापस्य यागाङ्गता न स्यात्। नच ध्यानस्याङ्गित्वे श्रवणादेरपि प्रसङ्ग[1] इत्युक्तमिति वाच्यम्। प्रतिबन्धकनिवर्तकत्वेनान्यथासिद्धिसाम्येऽपि 'द्रष्टव्यः' (बृ.उ. ४.४.५) इति वाक्ये तव्यप्रत्ययसाम्येऽपि 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' (मुण्ड.उ. ३.१.८) इति ध्यानमात्रस्य ज्ञानसाधनतावगमाद् विशेषोपपत्तेः। प्रमितमपि साधनत्वमन्यथासिद्धस्य कथमिति चेत् काऽत्र कथन्ता। किं हि वचनं न कुर्यात्। तर्हि मीमांसावैयर्थ्यमापद्यत इति चेत्। सावकाशवचने सार्थक्योप-पत्तिः। अन्यथा 'अणोरणीयान् महतो महीयान्' (कठ.उ. २.२०), 'तद् दूरे तदन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः' (ईशा.उ. ५) इत्यादिना प्रमितमप्यणुत्वमहत्त्वदूरत्वान्तिकत्वादिकं च नाङ्गीकार्यं स्यात्।

अथ मन्येत, महत्त्वाणुत्वादेर्भगवत्यवस्थाने प्रमिते सहानवस्थाननियमात्मा विरोधः कथं स्वात्मानं लभते? महत एवाणुत्वस्य श्रुतत्वादिति तर्हि प्रतिबन्धक-निवर्तकत्वेनान्यथासिद्धस्यापि 'ततस्तु तं पश्यते' (मुण्ड.उ. ३.१.८) इति ध्यानस्य साधनतया श्रुतत्वात् कथं विरोधः स्वात्मानं लभताम्। नचान्यथा-सिद्धस्यापि श्रवणादेर्विशिष्टसाधनत्वे[2] मानमस्ति। 'द्रष्टव्यः' (बृ.उ. ४.४.५) इत्यादिवाक्यं तूक्तरीत्या ध्यानोपकारितामात्राभिप्रायात् सावकाशम्। नच श्रुतमपि

१. 'तत्प्रसङ्गः' इति पाठः सम्भाव्यते।
२. म. विशिष्य साधनत्वे

कथं घटनीयमिति चेदणुत्वमहत्त्वादावपि कथम् ? ईश्वराचिन्त्यशक्तेरिति चेत्, समं ममापि।

एतेन, श्रवणादेरज्ञानादिनिवृत्तितत्त्वनिर्धारणादिरूपकार्यान्तरजनकत्वे ध्यानेन समप्राधान्यं घटते। अङ्गत्वे च न समप्राधान्यं घटते। तदजनकत्वे तूपकारासम्भवेन ध्यानं प्रत्यङ्गत्वं न घटते। समप्राधान्ये च नाऽवृत्तिर्घटत इति चोद्यं परास्तम्। समप्राधान्यं फलभेदोऽङ्गाङ्गिभाव आवृत्तिश्चेत्येतत् सर्वम-चिन्त्याद्भुतशक्त्यत्युक्तत्वात्। अत एव

'श्रवणादित्रयोत्पन्नदृष्टचैव स्वेच्छया हरिः।
प्रसन्नो मुक्तिदो नित्यमन्यथा न कथञ्चन॥'

इतीश्वरेच्छानियतेरित्याहाऽचार्यः।

'श्रवणादेः समत्वेऽपि समस्तस्याप्यनुष्ठितिः।
तत्त्वनिर्धारणाद्यर्थं कार्याऽऽवृत्तिश्च सर्वदा॥' इति।

सूत्रार्थः

सूत्रार्थस्तु- श्रवणादीनां त्रयाणां समप्राधान्येऽपि न ध्यानमात्रेणालम्। यतः **तद्दृष्टेः** ध्यानसाध्याया भगवद्दृष्टेः दर्शनात् **पृथक्** अन्यदेव फलं श्रवणमननयोः। किं तत्? **तन्निर्धारणार्थनियमः** तदिति भावप्रधाननिर्देशः। तत्त्वनिर्धारणार्थ-निश्चयः। एवमेव भवितुं युक्तमिति निश्चयः तत्त्वनिर्धारणसहितोऽर्थनिश्चय इति मध्यमपदलोपीसमासेन। अतस्तदर्थं द्वयमपि कर्तव्यमेव। समुच्चयस्य विहितत्वादिति हेरर्थः। नचैतावता तत्त्वनिर्धारणादिफलकत्वाभावः श्रवण-मननयोः शङ्कनीयः। फलमित्यावर्तते। श्रवणादिफलं तत्त्वनिर्धारणादि, **अप्रतिबन्धः** तत्प्रतिबन्धकीभूताज्ञानादिनिवर्तकत्वमेव। श्रवणादिफलं निर्धारणा-द्यज्ञानप्रतिबन्धकनिवृत्तिरूपत्वाद् ज्ञानार्थिनाऽवश्यमपेक्षितमेव। नचान्येन तत्

सम्भवतीति श्रवणादिफलमेव। नच तावता श्रवणादेर्निर्धारणादिफलमेव[1]। नच तावता श्रवणादेर्निर्धारणद्वारा ज्ञानफलकत्वमेवावगन्तव्यम्। यतः **अप्रतिबन्धः** प्रतिबन्धकाभावस्याकारणत्वेन व्यवधायकत्वात्। अत एवान्यथासिद्धस्य श्रवणादेर्न ज्ञानकारणत्वमित्यर्थः। नचैतावता न कर्तव्यमेव। यतोऽप्रतिबन्धः प्रतिबन्धकाभावस्याकारणत्वेऽपि तत्सम्पादकस्योक्तरीत्याऽङ्गत्वानपायात् तत् कर्तव्यमेवेत्यर्थ इति।

अत्र मतद्वयोपगतमधिकरणम्

यत्तूभाभ्यामुक्तम् - ''ॐ इत्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१) इत्येवमादीनि कर्माङ्गोद्गीथाद्याश्रितान्युपासनानि नित्यानि न वेति संशयः।

अप्रक्रियागतत्वेन ह्यङ्गशिष्टत्वतो गतिः।
नित्योद्गीथादिका पर्णमयतादि यथा तथा॥

उद्गीथाद्युपासनं नित्यं क्रतुप्रकरणानाश्रितत्वे सति क्रत्वङ्गाश्रितत्वात्। गोदोहनादिव्यावृत्त्यर्थं सत्यन्तम्। हिरण्याभरणादिव्यावृत्त्यर्थं विशेष्यम्। नच फलवत्त्वादनित्यत्वम्। 'आपयिता ह वै कामानां भवति' इत्यादेर्वर्तमानाप-देशापरार्थाङ्गतत्वेन सत्रवद् विपरिणामायोगादिति प्राप्तेऽभिधीयते -

पर्णता न फलायालं सिद्धा क्रत्वन्वयं विना।
उपास्तिस्तु क्रिया गानफले वाक्याद् विधीयते॥

सिद्धरूपा पर्णमयता न क्रियामनाश्रित्य फलवती। नचास्ति तस्याः प्रकृता काचित् क्रिया। अनारभ्याधीतत्वात्। तत्र वाक्येनाव्यभिचरितक्रतुसम्बन्धिजुहूद्वारा क्रतुसम्बन्धो ज्ञापनीयः। तथाच तत्र तात्पर्याद् वाक्यं फलसम्बन्धस्यापि[2]

१. इदं वाक्यं सम्पातायातमिति भाति।
२. '.... वाक्यं न फलसम्बद्धमपि' इति पाठः समीचीन इति भाति।

बोधयति। वाक्यभेदप्रसङ्गात्। उपासनायां तु क्रियात्मत्वम्। अतः फलसम्बन्धोपपत्तेरङ्गविशिष्टानां फलविधानमविरुद्धमिति।

तन्निरासः

तन्न। तथाहि। अत्र किं 'ॐ इत्येतदक्षरम्' (छा.उ. १.१.) इत्योङ्कारमुद्दिश्योद्गीथत्वोपासनं कार्यमिति वाक्यवृत्तिरुत, उद्गीथमुद्दिश्य 'ॐ इत्येतदक्षरम्' (छा.उ. १.१.) इत्युपासनं कार्यमिति, उत द्वयमप्युद्दिश्योपासनं कार्यमिति? नाऽद्यः। 'उद्गीथाद्याश्रयाणामुपासनानां फले विधानं न विरुद्ध्यते[१]' इत्यादिभामत्यादिविरोधात्। नह्यनुद्दिश्यमानमुपासनाश्रयो भवति। न द्वितीयः। असम्भवात्। नह्युद्गीथे ओङ्कारत्वादिकमस्ति। मिथ्योपासने चोक्तो दोषः। न तृतीयः। वाक्यभेदापातात्। नच विशेषणविशेष्यभावाश्रयणाददोषः। ओङ्कारोद्गीथयोः परस्परभिन्नयोःसामानाधिकरण्यायोगात्।

नचोद्गीथशब्दस्य तदवयवभूतोङ्कारलक्षकत्वमिति वाच्यम्। उपासनार्थमवश्यवक्तव्यगुणसमर्पकत्वोपपत्तौ लक्षणाश्रयणायोगात्। नच 'एषां भूतानां पृथिवी रसः' (छा.उ. १.१.२) इत्यादिनोत्तरग्रन्थेन गुणसमर्पणं भविष्यतीति वाच्यम्। स्ववाक्य एव तल्लाभे वाक्यान्तरानुसरणायोगात्। तथाच विषयशून्यमिदमधिकरणमिति।

रामानुजाभिमतसूत्रार्थनिरासः

एतेन, निर्धारणं निश्चयेन मनसोऽवस्थापनमुपासनमित्यर्थः। तस्य निर्धारणं तन्निर्धारणमुद्गीथादेरुपासनम्। तस्यानियमः। 'तेनोभौ कुरुतो यश्चैतदेवं वेद, यश्च न वेद' (छा.उ. १.१.१०) इत्यविदुषोऽप्यनुष्ठानवचनात् तद्दृष्टेरनियमदृष्टेः। यतश्च कर्मफलाद् वीर्यवत्तरत्वाख्यं फलं पृथगेव श्रूयते। किमिदं वीर्य

१. म.निरुद्ध्यते

वत्तरत्वम्? अप्रतिबन्धः प्रबलकर्मान्तरफलेनैतत्कर्मफलस्याप्रतिबन्धः अविलम्बितत्वमित्यर्थः- इति 'तन्निर्धारणानियमः' इति सूत्रमपपाठ्य व्याख्यानं निरस्तम्। अप्रसिद्धनिर्धारणपदप्रयोगे प्रयोजनादर्शनाच्च। 'कतरत् कतमत् सामेति तत् सामेति विमृष्टं भवति' इति वाक्ये विमर्शस्योक्तेस्तदनुसारो[१]ऽयमिति चेन्न। निर्धारणशब्दस्य संशयपरत्वापत्त्या निश्चयपरत्वायोगात्।

किञ्च 'स त्रिभिर्विधीयते' इति वेदत्रयसाध्यत्वं कर्मणः। वेदश्च न संहितामात्रम्। किन्त्वारण्यकब्राह्मणादिसमुदायः। अध्ययनविधेश्च न गुरूच्चारणानुच्चारणमात्रपर्यवसितत्वम्। किन्त्वर्थावधारणपर्यन्तत्वम्। अर्थावधारणस्य च कर्मानुष्ठानाद्यर्थत्वेन फलवत्त्वं चेत्यादि तावत् सर्वसम्प्रतिपन्नमेव। अत एव ब्रह्मकाण्डे आम्नातस्यापि 'यज्ञोपवीतं परमं पवित्रम्' (ब्रह्मोपनिषत् ५) इत्यादिमन्त्रस्य कर्माङ्गत्वमङ्गीकृतम्। तथाच सामभक्तिविशेषाश्रितानामप्युपासनानां सर्वोच्चत्वाद्यर्थविषयकविज्ञानरूपत्वात् रुच्युत्पादनसामानुबन्धितया मन्त्रार्थज्ञापनपर्यवसानान्मन्त्रवदेव कर्माङ्गत्वमेष्टव्यम्। अन्यथा उद्गीथ इति पदविभागपूर्वमुद्गीथादिशब्दव्याख्यानभागस्याध्येतव्यत्वाभावप्रसङ्गात्। अत एव 'यो ह वा अविदितार्षच्छन्दोदैवतब्राह्मणेन यजते याजयति वा स स्थाणुमृच्छति गर्तं वाऽऽपद्यते प्रवा मीयते' इति श्रुतिरेवार्थज्ञानादिहीनान्निन्दित्वा ब्राह्मणशब्दोदितार्थदिर्ज्ञानस्याऽवश्यकतां श्रावयति। नच निश्चयेन मनसोऽवस्थानात्मकस्योपासनस्य नार्थज्ञानरूपत्वम्। अपसिद्धान्तात्। सर्ववेदान्ताद्यधिकरणेषु विज्ञानादिशब्देनैव व्यवहृतत्वात्। नच निरन्तरज्ञानसन्ततिरूपप्रयत्नोपासनस्य बहिर्व्यासक्तिसम्पादककर्माङ्गत्वं न मन्त्रार्थज्ञानवदुपपन्नमिति वाच्यम्। गोदोहनादिवन्नित्याङ्गत्वस्य त्वयैव स्वीकारात्। अत एव विद्वत्त्वमर्थित्वादिवदधिकारिविशेषणमुपात्तम्। नच कर्मोपयुक्तमन्त्रार्थादिज्ञानवत्त्वमेव विद्वत्त्वम्, न

१. म. अनुकारः

ब्रह्मविद्यावत्त्वमिति वाच्यम्। 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा.उ. १.१.१०) इति ब्रह्मविद्यायाः सर्वकर्माङ्गत्वश्रवणात्। अन्यथा श्रद्धादेरपि तन्न स्यात्। ब्रह्मविद्यायाः सर्वकर्माङ्गत्वे 'कर्मणा ज्ञानमातनोति' इति श्रुतिविरोधोऽपि नाऽपद्यते। सामान्यतो ब्रह्मज्ञानेन कर्मानुतिष्ठतो विशेषज्ञानोदयाङ्गीकारात्। अन्यथा मन्त्रार्थगोचरविशेषज्ञानस्य[१] कर्मसाध्यत्वेन मन्त्रार्थज्ञानस्य कर्माङ्गताऽपि न स्यात्। उद्गीथाद्युपासनानां पर्णमयीत्वादिवत् कर्माङ्गत्वे तद्विहीनकृतकर्मणो वैगुण्यं स्यादिति चेत्। कस्येदमनिष्टम्? साङ्गस्यैव कर्मणः फलहेतुत्वेन विद्याशून्यानां कर्मणां फलं न स्यादिति चेत्। तर्हि सामर्थ्यवतामेवाधिकारे सामर्थ्यविहीनान्धपङ्ग्वादिकृतकर्मणः फलं न स्यात्। अल्पाल्पतरमहन्महत्तराणि फलान्येकस्यैव कर्मणो देशकालाधिकार्यादिभेदेन विचित्राणि सन्ति। तानि च देशकालादिसम्पत्तिपौष्कल्यानुसारेण भवन्ति। तथाचान्धपङ्ग्वादीनामविकलाङ्गादीनां च सामर्थ्यतारतम्यानुसारेण फलं भवतीति तु समाधानं प्रकृतेऽपि समानम्। विद्वत्त्वतारतम्यानुसारेण फलतारतम्याङ्गीकारात्। सामान्यतो विद्वत्त्वस्य सर्वेषामङ्गीकारात्। अत एव

'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्'

इति सामर्थ्यतारतम्यानुसारेणाध्ययनतारतम्यमुक्तम्। अत एव 'शाखाभेदो ह्यशक्तितः' इत्युक्तम्। काम्ये कर्मणि विकलाङ्गानां नाधिकार इति चेन्न। इहापि महति कर्मणि विद्याविहीनस्याधिकारानङ्गीकारात्। अत एव च

'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥' (भ.गी. ९.२४)

इति तत्त्वज्ञानशून्यानां सर्वथा विद्यारहितानां फलाभावः स्मर्यते।

---

१. म. विशेषज्ञापनस्य

एतेन अत एव च कल्पसूत्रकारा नैवञ्जातीयकान्युपासनानि क्रतुषु कल्पयाञ्चक्रुः इति भाष्योक्तमुपष्टम्भकं निरस्तम्। 'अर्थी समर्थो विद्वानधिक्रियते' इति सामान्यतो विद्यानामङ्गत्वश्रवणात्। विशिष्योद्गीथविद्याया अङ्गत्वानभिधानं तु सर्वेषां महाफलायोग्यत्वात् सर्वसाधारण्येनाङ्गसङ्ग्रहणलोलुपानां कल्पसूत्रकाराणां नायुक्तमिति सङ्क्षेपः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- अधिकरणप्रतिपाद्यमाह- **उपासनस्य समस्तस्यापि कर्तव्यतासमर्थनादिति॥ 'दर्शनार्थं ह्युपासनम्। तच्च श्रवणादेरेव भवत्यतः किमर्थम्'** इति भाष्यानुसाराद् ध्यानाख्योपासनस्य कर्तव्यतेत्याद्येव वक्तव्यं यद्यपि। तथाऽपि 'बन्धदार्ढ्ये[१] श्रवणादीनामफलता' इति विवरणानुसारात् श्रवणादेः सूत्रे फलाभिधानाद्धिशब्दगृहीतश्रुतौ समुच्चयोक्तेश्चैवमुक्तिरिति द्रष्टव्यम्। अत एवात्र विवक्षितं पूर्वपक्षमाह- **व्यस्तमेवोपासनं कर्तव्यमिति॥** श्रवणमनने द्वे एव, न तु ध्यानम्। तत्रापि श्रवणमेव, न मननम्; यद्वा मननमेव, न श्रवणम्; यद्वा ध्यानमेव नान्यत् कर्तव्यमित्यनेकदलात्मके पूर्वपक्षे भाष्यदर्शितं दलं दर्शयति- **उपासनं तावदित्यादिना॥** तेनोपासनं ध्यानं कर्तव्यमिति यो वदति सोऽपि दर्शनार्थमेव। तच्च दर्शनं श्रवणमननाभ्यामेवोक्तरीत्या भवतीत्यतः ध्यानं किमर्थमनुष्ठेयम्? नानुष्ठेयमित्यर्थः। यद्वा, **उपासनं** श्रवणादित्रयं **दर्शनार्थं** समप्राधान्येन विहितम्। न समुच्चयेन। ततो दर्शनं श्रवणेन मननेन वोभाभ्यां वा भवतीति किमर्थं ध्यानमिति विशेष इति भाष्यं व्याख्यातं द्रष्टव्यम्।

दृढबन्धरूपपूर्वपक्षन्यायस्य व्याख्यानम्

दृढबन्धन्यायमेतदधिकरणसङ्गतत्वेन विवृण्वत् **'बन्धदार्ढ्ये श्रवणादी-**

---

१. म. बन्धदार्ढ्यात्

नामफलता। अन्यथोपासनां विनैव श्रवणादिज्ञानमात्रेण मुक्तिरिति दोषः' (न्या.वि.) इति वाक्यम्। तत्रोत्तरार्धं भाष्यविवरणपरम्।

तत्रेयमाशङ्का- श्रवणमननाभ्यामेव दर्शने किं ध्यानेनेत्ययुक्तम्। श्रवणमननाभ्यामनिवर्त्यस्य ध्याननिवर्त्यस्य संशयादप्यदृढबन्धस्य[1] विद्यमानत्वात्। यतस्तत्त्वनिश्चयादिमतोऽपि पारोक्ष्यात् कश्चित् संशयो भवत्यादृष्टेः। दर्शने कीदृशोऽसौ भवेदिति। तदर्थं ध्यानस्याऽवश्यकत्वादिति। तत्र यस्य मते उक्तसंशयो नास्ति तदनुसारेण ध्यानवैयर्थ्यं भाष्योक्तमिति **'अन्यथोपासनं विनैव'** इत्युत्तरार्धं प्रवृत्तम्। तर्ह्युक्तसंशयोऽस्तीति मते किं दूषणमित्यतः पूर्वार्धं प्रवृत्तमिति भावेन व्याख्याति- **उपासनं तावदिति॥** तेन ध्यानैकनिवर्त्यदृढबन्धोऽस्ति न वा। आद्ये ध्यानेनैवालम्। किमर्थं श्रवणमनने। द्वितीये तन्निवर्तकापेक्षाभावाद् ध्यानं विनैव श्रवणादिमात्रजन्यज्ञानेनैव मुक्तिरिति किमर्थं ध्यानमिति दोष इत्यनेकदलात्मकः पूर्वपक्षो भाष्यविवरणव्याजेन विवरणे प्रदर्शितो ज्ञातव्यः। 'बन्धदार्ढ्यात्' इति क्वचिद् विवरणपाठः। **इति दोष** इत्यंशं प्रकारान्तरेण व्याचष्टे- **नचोभयसमुच्चयेनेति॥** 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ४.४.५) इत्यादेः समुच्चयसूचकाभावेन तत्र मानत्वायोगात् प्रमाणाभाव एव दोष इत्यर्थः। प्रकारान्तरेण व्याचष्टे- **नचोभयोरपि॥** उपयोगाभाव एव दोष इत्यर्थः। भाष्योक्तध्यानवैयर्थ्यांशं निराकर्तुं सूत्रभाष्ये युगपदेव व्याचष्टे- **तत्त्वज्ञानं हि तदुभयं चेति॥** ध्यानसाध्याद् ब्रह्मदर्शनात् पृथगेवेत्यर्थः। तर्हि **'श्रवणादीनामफलता'** इति विवरणांशोक्तस्य पूर्वपक्षांशस्य दूषणं किमिति सूत्रेणोपनिबद्धमित्याशङ्क्योपनिबद्धमेव हिशब्देन सूत्रकृतेति मनसि निधाय प्रवृत्तं **'हिशब्देन'** इत्यादिभाष्यमवतारयति- **न ध्यानादेवेति तु श्रवणमननाभ्यामिति॥** विवरणे बहुवचनं तु व्यक्ति-बाहुल्याभिप्रायमिति ज्ञेयम्। 'श्रोतव्यो मन्तव्यः' (बृ.उ. ४.४.५) इति ध्यानतुल्यतया विधानाद् वा शब्दाद्यभावाच्चेति भावः।

१. 'संशयादप्यतिदृढबन्धस्य' इति पाठः सम्भाव्यते।

स्वेच्छानियतिरूपसिद्धान्तन्यायस्य व्याख्यानम्

ननु वाशब्दाद्यभावेऽपि व्रीहियवयोरिव विकल्पः किं न स्यात्। नच तत्त्वनिर्धारणादिदर्शनरूपप्रयोजनभेदान्न व्रीहियवन्याय इति वाच्यम्। तर्हि समुच्चयोऽपि कथं स्यात्। तस्य प्रयोजनैक्य एव दर्शनात्। नच किं हि वचनं न कुर्यादिति वाच्यम्। चशब्दाभावेन वचनस्य सावकाशत्वादित्याशङ्क्य स्वेच्छानियतिन्यायं स्वशब्दार्थव्यञ्जनेच्छाकाराभिनायकश्रुत्युदाहरणेन च विवृण्वत्-

' "श्रवणादित्रयोत्पन्नदृष्ट्यैव स्वेच्छया हरिः।
प्रसन्नो मुक्तिदो नित्यमन्यथा न कथञ्चन॥"

इतीश्वरेच्छानियतेः' (न्या.वि.) इति वाक्यमाद्यर्थकेन भाष्यस्थेतिशब्देन सङ्गृहीतमिति मन्वानो व्याचष्टे- **ज्ञानार्थं त्रयस्यापि विहितत्वादिति॥** प्रयोजनैक्यानवगमेऽपि 'द्रष्टव्यः' (बृ.उ. ४.४.५) इत्यादौ चशब्दाभावेऽपि **'श्रवणादित्रयोत्पन्नदृष्ट्या'** इति प्रयोजनैक्यसमुच्चययोः साक्षादेव श्रवणान्नोक्तदोष इति भावः। **'इच्छानियतिश्रुतेः'** इति क्वचिद् विवरणपाठः। तस्याप्येवमेवार्थः- **ननु श्रौतोऽपीति॥** कामुकस्य कामिनीध्यानादेर्निरपेक्षस्यैव तत्साक्षात्कारहेतुत्वदर्शनाच्छ्रौतोऽपि समुच्चयोऽनुपपन्नः। उपलक्षणमेतत्। तत्त्वनिर्धारणादिप्रयोजनभेदस्य सूत्रकृतैवोक्तत्वात् **'त्रयोत्पन्नदृष्ट्या'** इति चानुपपन्नमिति भावः॥ **संशय-विपर्ययौ निवर्तयतीति॥** ध्यानं च दृढप्रतिबन्धमिति ग्राह्यम्।

यदत्र समप्राधान्ये प्रतिबन्धकाभावसम्पादकत्वोक्त्यनुपपत्तिः प्रयाजादिवदावृत्त्यभावप्रसङ्गोऽङ्गाङ्गिभावानुपपत्तिश्चेत्यादि किञ्चिदनुपपन्नमिव भाति, तत्सर्वमीशाचिन्त्यशक्त्या निर्वहणीयमिति विवरण एव स्पष्टमुक्तेर्नास्त्यत्र वक्तव्यमिति भावेनोपसंहरति- **अत इति॥**

॥ इति निर्धारणाधिकरणम्॥ २५॥

॥ अथ प्रदानाधिकरणम् ॥ २६ ॥

सूत्रभाष्यम्

॥ ॐ प्रदानवदेव हि तदुक्तम्[1] ॐ ॥३-३-४४ ॥

नच श्रवणादिमात्रेण ब्रह्मदृष्टिर्भवति[2]। किन्तु सेतिकर्तव्येन। यथा गुरुदत्तं तथैव भवति। 'आचार्यवान् पुरुषो वेद' (छा.उ.६-१४-२) इति ह्युक्तम् ॥ ४४ ॥

॥ इति प्रदानाधिकरणम् ॥ २६ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवज्ज्ञानसाधनोपासनेतिकर्तव्यतासाधनादस्ति शास्त्रादि-सङ्गतिः। अन्यथा 'इतरे त्वर्थसामान्यात्' इत्युक्तमयुक्तं स्यात्। अतस्तत् समर्थनीयम्। प्रकृतं श्रवणाद्येव विषयः। किं यथाकथञ्चिदनुष्ठितं ज्ञान-साधनमुत गुरुप्रसादपूर्वकप्रदानयुक्तमिति सन्देहः। कर्तव्यताविधेरुभयथाऽपि पर्यवसानं सन्देहबीजम्।

पूर्वपक्षः

यथाकथञ्चिदनुष्ठितं श्रवणादि ज्ञानसाधनमिति पूर्वः पक्षः। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रवणादिमात्रस्यैव ज्ञानहेतुत्वावगमात्। ज्ञानस्य च गुरुप्रसादाधीनत्वे ज्ञानिनोऽपि मोक्षस्य तदधीनत्वप्रसङ्गश्च। नेदमनिष्टमिति चेन्न। कदाचिद् गुरुकोपेन तदभाव-

१. 'प्रदानवदेव तदुक्तम्' इति ह्.पाठः। २. ह्. दृष्टिर्भवति।

प्रसङ्गात्। अन्यथा गुरुकोपवत् तद्वरस्यापि निरर्थकता स्यात्। अभ्युपगमे चानियम इत्युक्तविरोधः स्यात्। अतो ज्ञाने गुर्वपेक्षाभावात् तदुक्त-प्रकारेणोपासनमयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **प्रदानवदिति** ॥ न श्रवणादिमात्रं ज्ञानसाधनं किन्तु प्रसादपूर्वकगुरुप्रदानयुक्तमेव। गुरुप्रदानानुसारित्वात् फलस्य। नचैवमुक्तवचनविरोधः। गुरुप्रदानं ज्ञानसाधनस्य श्रवणादेरिति-कर्तव्यतेत्यभ्युपगमात्। नहि दृढमुष्टिनिपीडनादि पृथक् साधनमुच्यत इति भावः। गुरुप्रदानाधीनत्वं ज्ञानस्य कुत इत्यत आह- **आचार्यवानिति** ॥

नचैवमुक्तरीत्या ज्ञानाद्यभावः। तज्ज्ञानमोक्षयोरीश्वरकल्पितत्वात्। न चैवं गुरुशापो विफलः। ज्ञानादिह्रासहेतुत्वात्। उक्तं च-

'ज्ञानिनो गुरुशापेऽपि नामुक्तिः संसृतेर्भवेत्।
आनन्दह्रासदोषेण सैव मुक्तिर्विदुष्यति' इति।

तथा

'ये ज्ञानविषयाः शापाः मुक्तिगाश्चाधिकारिणाम्।
कादाचित्कास्ते भवन्ति नैव ते सार्वकालिकाः ॥

तेषां ज्ञानस्य मुक्तेश्च तारतम्यस्य चैव हि।
भगवन्नियतत्वात्तु शापादिर्नात्र कारणम् ॥' इति।

अतो गुरुप्रदानस्याऽवश्यकत्वादुक्तं युक्तमिति सिद्धम् ॥ ४४ ॥

॥ अ.२६॥

॥ इति प्रदानाधिकरणम् ॥ २६ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ प्रदानवदेव हि तदुक्तम् ॐ ॥३-३-४४ ॥

अनन्तरसङ्गतिः

'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.९४) इत्यत्र तत्तदुपास्यगुणाभिज्ञगुरूपदेशेन निर्णयोपपत्तेः सर्वगुणचतुर्गुणेभ्योऽप्यन्ये उपास्या इत्यस्य स्थापनाय गुरुप्रदानस्याऽवश्यकताऽत्रोच्यत इति पूर्वसङ्गतिष्टीकायामेवोक्ता। यदि 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ६.५.५) इत्यादौ तुल्यवच्छ्रवणेनाङ्गाङ्गिभावाश्रवणात् समुच्चयस्तर्हि अन्यापेक्षाया अप्यश्रवणाज्ज्ञानोत्पत्तौ नान्यदपेक्ष्यमस्तीत्युत्थानाद् वा, यथा ज्ञानापेक्षितातिशयाधायकतया ध्यानं प्रति श्रवणमननयोः फलोपकार्यङ्गत्वेनाऽवश्यकता तथा प्रदानस्यापि समस्तोपासने ज्ञानापेक्षितातिशयाधायकतयाऽप्यतिदेशनाद् वाऽनन्तरसङ्गतिः।

ध्यानमननयोरपि चिन्ताविषयत्वम्

समुच्चयेन निर्धारितसाधनभावानां श्रवणादीनां त्रयाणामपि गुरुप्रदानाख्येतिकर्तव्यताऽऽवश्यकी न वेति चिन्त्यते। यद्यपि श्रवणमेव गुरुप्रदानसाध्यं दृष्टम्। सम्भवति च। औपदेशिकवाक्यार्थग्रहणस्योपदेशसापेक्षत्वात्। न मननध्याने। न्यायानुसन्धानादेः स्वबुद्ध्यधीनत्वात्। अतः श्रवणस्यैव चिन्ता युक्ता। तथाऽपि मननस्य गुरूपदिष्टन्यायानुसन्धानात्मकत्वाद् ध्यानस्य च गुरूदिष्टगुणचिन्तनात्मकत्वात् समुच्चयपेटिकान्तर्भावाच्च त्रितयविषयिणीयं चिन्ता युक्ता।

पूर्वपक्षः

परोपदेशसमये लीनत्वेन बलादपि।
येन केनाप्युपायेन शृण्वतो दर्शनं भवेत्॥

श्रोतव्य इति वाक्यं तु नान्यसाधनतां वदेत्।
न चान्यदस्ति तेनात्र नेतिकर्तव्यतान्वयः॥ इति पूर्वः पक्षः।

सिद्धान्तः

किमत्र प्रदानमात्रस्य प्रसादपूर्वकगुरुप्रदानस्य वाऽवश्यकत्वे बाधकसद्भावात् तदनपेक्षेत्युच्यत उत साधकप्रमाणाभावात्[१]। नान्त्यः। श्रवणादेरुपदेशघटितमूर्तित्वात् 'आचार्याद्धयेव' (छा.उ. ४.९.३) इति श्रुत्या श्रवणादिफलस्य ज्ञानस्य तथाविधप्रदानानुसारित्वात् तत्साधनश्रवणस्यापि तदनुसरणावश्यम्भावाच्च। 'आत्मा वा अरे द्रष्टव्यः' (बृ.उ. ६.५.५) इति श्रुतौ श्रवणादिमात्रस्य ज्ञानहेतुत्वावगमो वा बाधक इति प्रथमपक्षोऽस्त्विति चेन्न। विवक्षितप्रदानस्येतिकर्तव्यतामात्रत्वेन साधनत्रैविध्यविरोधाभावात्। नहि दृढमुष्टिपीडनोद्यमननिपतनादि पृथक् साधनं भवति। न वा छिदायाः कुठारैककारणत्वव्याघातः। गुरुप्रदानस्याऽवश्यकत्वे कदाचिद् गुरुकोपस्य ज्ञानप्रतिबन्धकताऽप्याश्रयणीयेति ज्ञानाभावोऽत एव मोक्षाभावश्च स्यादिति चेन्न।

'तेषां ज्ञानस्य मुक्तेश्च तारतम्यस्य चैव हि।
भगवन्नियतत्वात्तु शापादिर्नात्र कारणम्॥'

इति तस्य तयोः प्रतिबन्धकत्वनिरासात्। गुरुशापादेश्च ज्ञानविलम्बानन्दह्रासयोरुपयुक्ततया नाकिञ्चित्करत्वम्। तर्हि न्यायसाम्याद् गुरुप्रसादादेरपि ज्ञानशैघ्र्यानन्दवृद्ध्यादावेवोपयोगो न पुनर्ज्ञाने। प्रमाणाभावादिति चेन्न। 'षण्णवत्युङ्गुलो यस्तु न्यग्रोध' (म.भा.ता.नि.उदाहृतप्रमाणवचनम् १.१२१) इत्यादिगुरुलक्षणमुक्त्वा 'सम्यग्लक्षणसम्पन्नो यद् दद्यात् सुप्रसन्नधीः। शिष्याय सत्यं भवति', 'नातिप्रसन्नहृदयो यद् दद्यात् गुरुरप्यसौ। न तत् सत्यं भवेत्' इत्यादिना ज्ञान एवोपयोगश्रवणात्। तस्माद् यथाभूतगुरुदत्तं तथैव भवति।

१. म. साधकप्रमाणात्।

यथा च गुरुदत्तं प्रसादेन वा तदनुरूपमेव ज्ञानादि भवति। अत उत्तमगुरुं प्राप्य शुश्रूषया प्रसाद्य ततः श्रोतव्यं मन्तव्यं ध्यातव्यं चेति सिद्धम्।

इतिकर्तव्यताशून्यं करणं न हि दृश्यते।
ततः प्रदानसहितं श्रवणादीष्टसाधनम्॥ इति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु- श्रवणादिमात्रं न ज्ञानसाधनमित्यध्याहारः। किन्तु **प्रदानवदेव** गुरुप्रसादपूर्वकगुरुप्रदानयुक्तमेव। **हि** यस्मादित्यर्थे। यस्मात् 'आचार्यवान् पुरुषो वेद' (छा.उ. ६.१४.२) इत्युक्तं तत् तस्मादित्यर्थः। ननु त्रयस्यैव विधानं विरुद्ध्यत इति चेत्, नायमस्ति विरोधः। यतः साधनं विधायापि इतिकर्तव्यताविधानं प्रसिद्धमिति वा हेरर्थः।

अद्वैत्यभ्युपगताधिकरणशरीरम्

अन्ये तु वाजसनेयके 'वदिष्याम्येवाहमिति वाग् दध्रे' (बृ.उ. १.५.२१) इत्यत्राध्यात्मं वागादीनां प्राणः श्रेष्ठोऽवधारितोऽधिदैवतमग्न्यादीनां वायुः। तथा छान्दोग्ये 'वायुर्वाव संवर्गः' (छा.उ. ४.३.२) इत्यत्र अधिदैवमग्न्यादीनां वायुः संवर्गोऽवधारितः। अध्यात्मं वागादीनां प्राणः। तत्र वायुप्राणावभेदेनोपास्यौ उत भेदेनेति संशयः।

उत्पन्नशिष्टधर्माणां भेदे धर्मो[1] न भिद्यते।
अग्निहोत्रवदित्यैक्यं प्रयोगस्य प्रतीयते॥

'अन्नवानन्नादो भवति' (छा.उ. १.३.७) इत्युत्पन्ने उपासनेऽध्यात्माधिदैवविभागो नोपासनां भिनत्त्यग्निहोत्रमिव दधितण्डुलादीति प्राप्तेऽभिधीयते -

१. म. धर्मी

अभेदेऽप्यग्निहोत्रस्य प्रयोगत्वायमादितः[1]।
भिन्न एवमुपास्तेरप्यधिदैवादिभेदतः॥

उत्पन्नशिष्टधर्मभेदो विद्यां न भिनत्ति। प्रयोगं तु भिनत्ति। प्राणवाय्वोरध्यात्माधिदैवसंवर्गत्वविशिष्टयोरितरेतरावैशिष्ट्येन प्रयोगभेदेन ध्येयत्वादग्निहोत्रस्यैवेतरेतरानन्तर्भूतसायम्प्रातरवच्छेदेन प्रयोगभेद इति।

तत्परीक्षा

तन्न। वायुप्राणयोर्भेदेनोपास्यत्वानुपास्यत्वसन्देहे उपासनाप्रयोगभेदाभेदसमर्थनस्यासङ्गतत्वात्। भिन्नत्वाभिन्नत्व[2]प्रकारोपासनस्य तत्प्रयोगैक्याद्यनधीनत्वात्।

किञ्च विद्याभेदाङ्गीकारेण प्रयोगभेदः साध्यः, उत तदनङ्गीकारेण प्रयोगभेदः साध्यः। नाऽद्यः। विद्याभेदेनैवेतरेतरत्रोक्तगुणविशिष्टोपासनस्याप्रसक्त्या प्रयोगभेदसाधनवैयर्थ्यात्। अग्निहोत्रदृष्टान्तायोगाच्च। वेद्यस्य वायुतत्त्वस्याभेदेन विद्याभेदानुपपत्तेश्च। न द्वितीयः। विद्याया अभेदो हीतरत्रो[3]क्तोपास्यगुणसाङ्कर्येण वा गुणैक्येन वा भवेत्। आद्ये प्रयोगभेदसमर्थनं व्यर्थमयुक्तं च। नहि परस्परधर्मसाङ्कर्ये प्रयोगभेदः सम्भवति। द्वितीये तु सत्यपि धर्मैक्ये स्थानादिभेदेन विद्याभेदस्यैव 'सम्बन्धादेवमन्यत्रापि' (ब्र.सू. ३.३.२१), 'कामादितरत्र तत्र चाऽयतनादिभ्यः' (ब्र.सू. ३.३.४०) इत्याद्यधिकरणे च समर्थितत्वेन पुनः प्रयोगभेदसमर्थनं व्यर्थम्।

एतत्सूत्रस्याद्वैत्यभिमतार्थनिरासः

एतेन, पृथगेव वायुप्राणावुपासितव्यौ। अध्यात्माधिदैवतविभागोपदेशात्।

१. म. प्रयोगः सायमादितः २. म. भिन्नाभिन्नप्रकार
३. म. इतरेतरत्र

प्रदानवत्। यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालम् इन्द्रायाधिराजायेन्द्राय स्वराज्ञे' इत्यस्यां त्रिपुरोडाशिन्यामिष्टौ 'सर्वेषामभिगमयन्नवद्यत्यछंवट्कारम्' इति। अतो वचनादिन्द्राभेदाच्च सहप्रदानशङ्कायां राजादिगुणभेदाद् याज्यानुवाक्याव्यत्यासविधानाच्च यथान्यासमेव देवतापृथक्त्वात् प्रदानपृथक्त्वं भवति, एवं तत्त्वाभेदेऽप्याध्येयांशपृथक्त्वादाध्यानपृथक्त्वमुक्तम्। तदुक्तं सङ्कर्षे - 'नाना वा देवता पृथग्ज्ञानात्' (सङ्कर्षणसूत्रम्) इति सूत्रे-इति सूत्रार्थकथनं निरस्तम्। हेतूकृतस्याध्यात्माधिदैवतविभागोपदेशस्य दृष्टान्तीकृते प्रदानेऽभावात्। वायुप्राणयोः पक्षीकारे आध्यानपृथक्त्वमित्युक्तोपासनाभेदेन निगमनायोगाच्च। 'नैवमिह विद्याभेदोऽस्ति ; उपक्रमोपसंहाराभ्यामध्यात्माधिदैवोपदेशेष्वेकविद्याविधानप्रतीतेः' इति [१]त्वद्भाष्यादिति शैवोपासनाभेदनिश्चयादुपासनापृथक्त्वसाधने बाधाच्च।

प्रयोगपक्षीकारे तु स्वरूपाभिन्नस्य भिन्नप्रयोगवतस्तथाविधस्याग्निहोत्रादेरेव दृष्टान्तीकर्तुमुचितत्वेन प्रदानस्य तदयोगात्। 'प्रदानवत्' इत्यनेनैव तत्सङ्ग्राहकसूत्रसूचनसम्भवेन 'तदुक्तम्' इति सूत्रशेषानर्थक्यप्रसङ्गाच्च।

शैवाशैवव्याख्याननिरासः

एतेन, दहरविद्यायां 'तद् य इहाऽत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्' (छा.उ. ८.१.६) इति पृथक् चिन्तनीयतया विहितापहतपाप्मत्वादिगुणचिन्तने तत्तद्गुणविशिष्टतया परमात्मचिन्तनमावर्तनीयमेव। यथा 'इन्द्राय राज्ञे' इत्यादिनेन्द्रस्यैकत्वेऽपि राजत्वादिविशिष्टाकारभेदाद् देवताभेद इति प्रदानावृत्तिः तद्वदेवेति शैवाशैवव्याख्यानं प्रत्युक्तम्। प्रतिप्रदानं गुणानुवृत्तेर्न्याय्यत्वेऽपि प्रतिगुणं प्रधानावृत्तेरन्याय्यत्वात्। 'सर्वेषामभिगमयन्नवद्यति' इति वचनेनैव प्रदानावृत्त्यभावप्रतीतेश्च। 'याज्ञिका ह्यस्यामिष्टौ युगपदवदानं कुर्वन्ति'

१. 'त्वद्भाष्यादध्यात्माधिदैवोपासनाऽभेदनिश्चयात्' इति पाठेन भाव्यमिति भाति।

(वेदान्तकल्पतरुः ३.३.४३) इति कल्पतरूक्तेश्च। मनोन्तस्थाग्निशब्दवदिन्द्रशब्दस्येन्द्रादिराजादिवाचकत्वाभावेन देवताभेदात् प्रदानावृत्तावपीह गुण[२]वाचकशब्दभेदाभावादावृत्तौ कारणाभावाच्चेति।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **प्रकृतमिति**॥ तत्त्वनिर्धारणमर्थनियमश्च ध्यानसाध्यदृष्टेः पृथगेव फलमिति श्रुत्यर्थाभ्यां श्रवणादित्रयं प्रकृतमित्यर्थः॥ **यथाकथञ्चिदिति**॥ परोपदेशनिलीनतया वा बलात्कारेणैवेत्यर्थः। साधकान्तरमेव बाधकं वक्तव्यमिति कथाप्रक्रियाशिक्षणाय सूत्रस्थैवकारसूचितपूर्वपक्षसाधकयुक्तिं स्वयमाह- **आत्मा वा अरे द्रष्टव्य इत्यादिना**॥ अत्र प्रतीकग्रहणं विहाय समग्रवाक्यमुदाहरता श्रवणमननयोरेवात्र विचार्यत्वमित्येकदेशिव्याख्यानं निराकृतं वेदितव्यम्।

पराभवरूपपूर्वपक्षन्यायस्य व्याख्यानम्

अत्र पराभवन्यायं प्रतियोगिधर्मिसाध्यप्रदर्शनपूर्वकं विवृण्वत् **'नच गुर्वधीनत्वे ज्ञानमोक्षयोर्ज्ञानिनोऽपि कदाचिद् गुरुकोपाज्ज्ञानपराभवेनामुक्तिप्रसङ्गान्न गुर्वधीनत्वमिति'** (न्या.वि.) इति वाक्यं परपक्षे बाधकपरम्। तत्र श्रवणादेस्त्रयस्य ज्ञानसाधनत्वस्य प्रकृतत्वादितिकर्तव्यतात्वेनोच्यमानं प्रदानं ज्ञानं प्रत्येव प्रयोजकं प्राप्तं न मोक्षं प्रति। तत् कथं 'गुर्वधीनत्वे ज्ञानमोक्षयोः' इत्यनुवाद इत्यतो बुद्ध्या विवेकेनात्र बहवः प्रसङ्गा अभिमता इति भावेन व्याचष्टे- **ज्ञानस्य चेति**॥ परपक्षबाधकसमुचितस्यैव साधकत्वादिति चशब्दः। तेन ज्ञानस्य प्रदानानुसारित्वेन गुर्वधीनत्वे मोक्षस्यापि तदधीनत्वप्रसङ्गः। मोक्षस्य ज्ञानाधीनत्वात्। एवं ज्ञानमोक्षयोर्गुर्वधीनत्वे ज्ञानिनस्तत्त्वनिश्चयवतोऽपि कदाचिद्

२. म. गुणिवाचक

गुरुकोपाज्ज्ञानपराभवप्रसङ्गः । शापादिना ज्ञानानुत्पत्तिप्रसङ्गः। अपरोक्ष-ज्ञानिनोऽपि गुरुकोपशापादेरुत्पन्नस्यापि ज्ञानस्य शक्तिकुण्ठनरूपपराभव-प्रसङ्गः । ततश्चामुक्तिप्रसङ्गान्न गुर्वधीनत्वमिति न च वाच्यमित्यर्थः सूचितम्।

सिद्धान्तानुसारेण स्वयमन्तिमतर्के विपक्षे बाधकमाह- **अन्यथा गुरुकोपवदिति ॥** न्यायसाम्यादिति भावः।

वस्तुवैभवरूपसिद्धान्तन्यायस्य व्याख्यानम्

वस्तुवैभवन्यायं साध्यादिप्रदर्शनेन विवृण्वत् ' "**ज्ञानिनो गुरुशापेऽपि नामुक्तिः संसृतेः कचित्। आनन्दह्रासदोषेण सैव मुक्तिर्विदुष्यति" इति वचनान्मुक्तिदूषणेनैव गुरुशापादेः**[१] **कृतार्थत्वात् ज्ञानिनो ब्रह्मवस्तुवैभवेन मुक्तिः स्यादिति गुरोर्वरेण वा मुक्त्यनुपपत्तेः'** इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे- **नचैवमुक्तरीत्येति ॥** अनेन 'ज्ञानिनो ब्रह्मवस्तुवैभवेन' इत्यादि व्याख्यातं भवति।

'मुक्तिदूषणेनैव गुरुशापादेः कृतार्थत्वात्' (न्या.वि.) इत्यंशं मुक्तिपदं ज्ञानोपलक्षणम्; दूषणं च ह्रास इति मन्वानो व्याचष्टे- **नचैवं गुरुशाप इति ॥** तत्र प्रमाणोपन्यासपरतया तत्पूर्ववाक्यं योजनीयमित्याह- **उक्तं चेति ॥** ज्ञान-पराभवस्य शङ्कितस्योत्तरं नात्र दृश्यत इत्यत उपलक्षणमेतदिति भागवततात्पर्ये आचार्योदाहृतमेव प्रमाणं पठति- **तथा ये ज्ञानविषया इत्यादिना ॥** मुक्तिगाः मुक्तिविषयाः। यद्यप्याचार्येणापि कृत्स्नप्रमेयविषयत्वादिदमेवोदाहर्तुमुचितम्। तथाऽपि मुक्तौ गुरुशापादेर्न केवलं कालविलम्बप्रयोजकत्वम्। किन्तु आनन्दह्रासदोषेण मुक्तिदूषकत्वं चास्तीति सूचनाय वाक्यान्तरमुदाहृतमिति द्रष्टव्यम्।

---

१. म. गुरुकोपादेः।

ननु ज्ञानमुक्त्योर्विघटनाभावे गुर्वधीनत्वं कुत इत्यत आह- **अतो गुरुप्रदानस्येति ॥** तथाऽपि सम्पूर्णज्ञानमुक्त्योर्विघटनमस्त्येवेति भावः। तेन ब्रह्माख्य-वस्तुसामर्थ्येन ज्ञानिनो मुक्तिरज्ञानिनश्च ज्ञानं च स्यादेवेति हेतोर्ज्ञानमोक्षयोर्भग-वदिच्छैव कारणम्। ततश्च गुरोर्वरेण मुक्तिज्ञानयोरनुपपत्तिः। वाशब्दात् तच्छापेन तयोः प्रतिबन्धानुपपत्तिः। अतो वरशापयोरप्रयोजकत्वान्न गुर्वधीनत्वमिति नच भाव्यमिति सम्बन्धः। न तावता वरशापयोरकिञ्चित्करत्वम्। ज्ञानमुक्त्योर्दूषणेन[१] च कृतार्थत्वादिति विवरणयोजना द्रष्टव्या।

॥ इति प्रदानाधिकरणम् ॥ २६ ॥

---

१. 'ज्ञानमुक्त्योः शैघ्र्यादिना दूषणेन' इति पाठः सम्भाव्यते।

॥ अथ लिङ्गभूयस्त्वाधिकरणम् ॥ २७ ॥

सूत्रभाष्यम्

गुरुप्रसादः स्वप्रयत्नो वा बलवानिति निगद्यते -

॥ ॐ लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॐ ॥

॥ ३-३-४५ ॥

ऋषभादिभ्यो विद्यां ज्ञात्वाऽपि सत्यकामेन 'भगवांस्त्वेव मे कामे ब्रूयात्' (छा.उ.४-९-२) 'श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्धयेव[1] विद्या विदिता साधिष्ठं प्रापयति' (छा.उ.४-९-३) इति वचनात् । 'अत्र ह न किञ्चन वीयाय' (छा.उ. ४.९.३) इत्यनुज्ञानादुपकोसलवचनाच्च लिङ्गभूयस्त्वाद् गुरुप्रसाद एव बलवान्[2] तर्हि तावताऽलमिति[3] न मन्तव्यम् । 'श्रोतव्यो मन्तव्यः' (बृ.उ.४-४-५)इत्यादेस्तदपि कर्तव्यम् । वाराहे च -

'गुरुप्रसादो बलवान्न तस्माद् बलवत्तरम् ।
तथाऽपि श्रवणादिश्च कर्तव्यो मोक्षसिद्धये ॥' इति ॥ ४५ ॥

॥ इति लिङ्गभूयस्त्वाधिकरणम् ॥ २७ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनोपासनेतिकर्तव्यतारूपगुरुप्रसादस्य बलीयस्त्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथा क्वचिदनपेक्षितत्वप्रसङ्गेनोक्ता-

१. ह्. आचार्याद्धचैव २. ह्. गुरुप्रदानमेव बलवत्
३. ह्. इति च न मन्तव्यम्

युक्तेस्तत् समर्थनीयम् । प्रकृतं गुरुप्रसादपूर्वकं श्रवणादि विषयः । संशयप्रकारं दर्शयति- **गुर्विति** ॥ किं तन्मध्ये गुरुप्रसादो बलवानुत श्रवणादिरूपः शिष्यप्रयत्नो वा । अथ द्वयं समं वा । साधनेषु त्रैविध्यदर्शनं सन्देहबीजमिति भावः ।

पूर्वपक्षः

शिष्यप्रयत्न एव बलवानिति पूर्वः पक्षः । गुरुप्रसादस्येतिकर्तव्यतामात्रत्वात् । नहि साधनादपीतिकर्तव्यतायाः प्राबल्यं दृष्टम् । माऽस्तु वाऽऽधिक्यं शिष्यप्रयत्नस्य । तथाऽपि साम्यं स्यात्, नतु प्रयत्नस्य दौर्बल्यम् । गुरुशिष्ययोरपि पुरुषत्वसाम्यात् । अतो गुरुप्रसादस्याप्रबलत्वान्नाऽवश्यकत्वमिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमवतार्य व्याचष्टे- **निगद्यत इति** ॥ गुरुप्रसादपूर्वकप्रदानमेव ज्ञानसाधने बलवत् । नत्वधमं नापि समम् । तस्य प्राबल्ये लिङ्गबाहुल्यदर्शनात् । तथाहि । ऋषभादिभ्यो ब्रह्मविद्यां श्रुतवताऽपि सत्यकामेन भगवानिति गुरुः प्रार्थ्यते । यदि श्रवणाद्येव बलवत् तर्हि तेन गुरुप्रसादपूर्वकप्रदानप्रार्थनं न क्रियेत । तथा गुरुणा गोतमेनात्रेत्यनुज्ञा क्रियते । स्वप्रदानस्याप्राबल्येऽनुज्ञावैयर्थ्यात् । तथोपकोसलेनाग्निभ्यः श्रुतविद्येनापि गुरुः प्रार्थ्यते । गुरुणा च सत्यकामेन तं प्रति विद्योच्यते । श्रवणादेरेव प्राबल्ये न तेन गुरुः प्रार्थ्येत गुरुणाऽपि नोच्येत । एवं लिङ्गभूयस्त्वाद् गुरुप्रसादपूर्वकप्रदानमेव बलवदिति ज्ञायत इति भावः । सत्यकामेन वचनादिति तेनोक्तत्वादित्यर्थः । यद्यपि देवेभ्यः श्रुतम् । तथाऽपि भगवानेव मे शुभार्थं ब्रवीतु । कुतः? आचार्यादेव विदिता विद्या साधुत्वं प्राप्नोतीति भगवद्दृशेभ्यः श्रुतत्वात्, तेषां चाऽचार्यतया मयाऽस्वीकृतत्वादित्यर्थः । अत्र देवेभ्यः श्रवणे न किञ्चनापगतम् । न काचिद्धानिरभूदित्यर्थः । नचेतिकर्तव्यत्वेन दौर्बल्यम् । यागीयहिंसायामिति-

कर्तव्यताया एव प्राबल्यदर्शनात् । नच गुरुशिष्ययोः पुरुषत्वसाम्यात् तत्क्रिययोः साम्यम्। गुरुशिष्यवदेवोपपत्तेः। नन्वेवं गुरुप्रसादस्य प्राबल्ये तावताऽलम्। न श्रवणादिना कृत्यमित्याशङ्कां परिहरति- **तर्हीति ॥** अत्र स्मृतिं चाऽह- **वाराहे चेति ॥** अतो गुरुप्रसादपूर्वकप्रदानस्य प्राबल्यात् तदवश्यापेक्षितमिति सिद्धम्॥ ४५ ॥

॥ इति लिङ्गभूयस्त्वाधिकरणम्॥ २७॥

शेषतात्पर्यचन्द्रिका

॥ ॐ लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॐ ॥

॥३-३-४५ ॥

संशयः फलफलिभावश्च

गुरुशुश्रूषया गुरुं प्रसाद्य, प्रसन्नाद् गुरोः श्रवणादि कर्तव्यमित्युक्तमनन्तरातीताधिकरणे। सा चोक्तिः पक्षत्रयसाधारणेति[1] भवति त्रेधा संशयः। पूर्वत्रोपक्षिप्तयोः प्रसादपूर्वकप्रदानश्रवणादिरूपप्रयत्नयोर्गुरुशिष्यनिष्ठयोः, किं गुरुनिष्ठः प्रदानरूपप्रयत्नो बलवानुत श्रवणादिरूपः शिष्यनिष्ठः उतोभयं सममिति। यदि द्वितीयादिः पक्षस्तदा कदाचित् कचित् प्रदानस्यानपेक्षितत्वप्रसङ्गेन 'प्रदानवत्' (ब्र.सू. ३.३.४४) इत्युक्तमयुक्तं स्यात्। यदि त्वाद्यः पक्षस्तदा तदपेक्षानैयत्येन 'प्रदानवत्' (ब्र.सू. ३.३.४४) इत्युक्तं युक्तमेवेति फलफलिभावः।

पूर्वपक्षः

शिष्यप्रयत्न एव बलवानिति पूर्वः पक्षः। स तावद् गुरुप्रयत्नापेक्षयाऽङ्गीति पूर्वाधिकरणे निश्चितम्। गुरुप्रयत्नस्त्वितिकर्तव्यतेत्यपि। अङ्गीतिकर्तव्यतयोरङ्गि

१. म. साधारणीति

प्रबलम्। अशक्याज्यावेक्षणप्रदक्षिणादिक्रमणेतिकर्तव्यताप्रहाणेन[1] शक्योपसंहारेणाप्यङ्गिभूतदर्शपूर्णमासादिनित्यकर्मस्वन्धपङ्ग्वादेरपि षष्ठेऽधिकारव्यवस्थापनात्। अथवा समबलत्वमेवास्तु। अनयोः पुरुषप्रयत्नत्वाविशेषाद् गुरुशिष्ययोः पुरुषत्वाविशेषाच्च।

तस्मात् प्रदानं शिष्यस्य प्रयत्नाद् बलवद् भवेत्।
समं वा तेन नात्यर्थमुपयोगं प्रचक्ष्महे ॥ इति।

सिद्धान्तः

सिद्धान्तस्तु - सत्यं प्रसादस्याङ्गत्वं श्रवणादेरङ्गित्वं च। तथाऽपि न तद्द्वयं प्राबल्याप्राबल्ययोः प्रयोजकम्। किन्तु यद्व्यतिरेकेण यत्सम्भूतमपि न स्वकार्यक्षमं तत्त्वं तदभावश्चेत्येतद्द्वयमेव। तथाच प्रसादपूर्वकप्रदानव्यतिरेकेण सम्भूतादपि श्रवणादेर्ज्ञानमेव न भवति। 'आचार्यवान् पुरुषो वेद' (छा.उ. ६.१४.२) इति श्रुतेः। अतः [2]प्रसादायत्तविशेषकत्वाच्छ्रवणादेः प्रसाद एव बलवान्। नच प्रसादाभावे श्रवणादिकं नोत्पत्तुमर्हतीति वाच्यम्। विनाऽपि प्रसादं लिपिपाठादिना व्युत्पन्नस्य वाक्यार्थग्रहणादिरूपश्रवणादिसम्भवात्। आज्यावेक्षणप्रदक्षिणातिक्रमणादेस्त्वभावेऽपि नित्यकर्मणः स्वकार्यक्षमत्वस्यान्धपङ्ग्वादीन् प्रत्यागमिकत्वेन तस्मिन्नतिशयाधायकत्वाभावाद् दौर्बल्यम्। न त्वितिकर्तव्यताकृतम्। अत एव स्वरवर्णसौष्ठवादियुक्तमन्त्रं विना कृतस्य कर्मणः -

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्'

इति निन्दाश्रवणेन[3] स्वकार्यजननाक्षमत्वावगमान्निरुक्तप्राबल्यहेतुसद्भावेन यागीयहिंसाया अपि मन्त्रस्य प्राबल्यम्। ज्ञानजन्य आनन्दरूपफले

१. म. इतिकर्तव्यताग्रहणेन २. म.प्रदानायत्त ३. म. निन्दाश्रयणेन

प्रसादस्योपयुक्तत्वाच्च प्राबल्यम् । गुरुप्रसादेन लब्धश्रवणादेर्ज्ञानिनोऽपि पुनर्गुरुकोपेन प्रसादव्यावृत्तावानन्दरूपफलवैकल्यस्य -

'ज्ञानिनो गुरुकोपेऽपि नामुक्तिः संसृतेर्भवेत् ।
आनन्दह्रासदोषेण सैव मुक्तिर्विदुष्यति ॥'
(माध्वभाष्योदाहृतवाराहवचनम्)

इत्याद्यागमसिद्धत्वात् ।

स्यादेतदितिकर्तव्यतात्वदौर्बल्येऽतन्त्रीकृत्य प्रयोजकान्तरकल्पनम् । यदि प्रसादपूर्वकप्रदानस्य प्राबल्यं प्रमितं स्यात् । तदेव कुत इति चेन्न । सत्यकामब्राह्मणे उपकोसलब्राह्मणे च बहुलिङ्गश्रवणात् । 'तमुपनीय कृशानामबलानां चतुःशतं गा निराकृत्योवाचैताः[१] सौम्यानुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणाऽवर्तयेयमिति स ह वर्षगणं प्रोवास' (छा.उ. ४.४.५) इत्युपनीतमात्रस्य सत्यकामस्य विनाऽप्यध्ययनेन गुरुप्रसादने प्रवृत्तेः । श्रवणादेः प्राबल्ये अध्ययनादावेव प्रवृत्त्यापत्तेः। 'अथ हैनमृषभोऽभ्युवाद' (छा.उ. ४.४.५) 'ब्रह्मणः सौम्य ते पादं ब्रवाणीति तमग्निरभ्युवाद तं हंस उपनिपत्याभ्युवाद तं मद्गुरुपनिपत्याभ्युवाद' (छा.उ. ४.४.५) इत्यादिना वृषभाविष्टाद् वायोरग्नेश्च प्रत्यक्षाद्धंसरूपाद् ब्रह्मणः मद्गुरूपाद् वरुणाच्च स्वयमेवाभिभाष्य तत्त्वोपदेशेन ज्ञानादिगुणकब्रह्म ज्ञात्वाऽपि सत्यकामेन तेष्वशुश्रूषादिभयाद् 'भगवांस्त्वेव मेऽभीष्टाय ब्रूहि' (छा.उ. ४.९.३) इति वचनादुपनयनादिकर्तुराचार्यादाराधिताल्लब्धा हि विद्या साधकतमत्वं प्राप्नोतीति वचनात् । तं चानुज्ञाभीप्सुं प्रति 'अत्र ह न किञ्चन वीयाय' (छा.उ. ४.९.३) इत्याचार्यानुज्ञानाच्च । अन्यथाऽनुज्ञाप्रार्थनदानयोरनुपपत्तेः । 'तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन् पर्यचारीन्मा त्वाऽग्नयः परि प्रावोचन् प्रब्रूह्यस्मै' (छा.उ. ४.१०.२) इति बहुवर्षं

१. हृ. उवाचेमाः

गुरुप्रसादनार्थमग्नीन् परिचरतः उपकोसलस्यार्थे सत्यकामं प्रति जायावचनाच्च । अन्यथा तन्न स्यात् । अप्रोच्यप्रोषिते च तस्मिन् 'तप्तो ब्रह्मचारी कुशलं नः पर्यचारीद्धन्तास्मै प्रब्रवाम' (छा.उ. ४.१०.२) इत्युक्त्वा 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा.उ. ४.१०.५) इत्युपकोसलायोपदिश्य 'आचार्यस्तु ते गतिं वक्ता' (छा.उ. ४.१४.१) इत्याचार्यानुज्ञानार्थं तेषामेव वचनाच्च । एवं लिङ्गभूयस्त्वाद् गुरुप्रसाद एव बलवान् ।

इतिकर्तव्यतायाः प्राबल्ये मीमांसाविरोध इति शङ्कापरिहारः

एतेनेतिकर्तव्यतायाः प्राबल्ये मीमांसाविरोध इति परास्तम् । नहि वयमितिकर्तव्यतात्वेन प्राबल्यं ब्रूमः । येन विरोधःस्यात् । किन्तु करणातिशयाधायकत्वेनैव । नहीदृशस्य न प्राबल्यं मीमांसकमते, मन्त्रस्य तदभावप्रसङ्गादित्युक्तत्वात् ।

अत एव साम्यपक्षोऽयुक्तः । नहि येन यत्रातिशय आधीयते तयोः साम्यं दृष्टचरम् । गुरुशिष्ययोः पुरुषत्वाविशेषात् तदीयप्रयत्नयोः साम्यं किं न स्यात् इति चेन्न । किमिदं सम्भावनामात्रमुत निश्चयः । नाऽद्यः । तस्येदानीमनुपयोगात् । न द्वितीयः । तयोर्गुरुशिष्यभाववदेव तदीयप्रयत्नयोः साम्याभावस्यापि निश्चितत्वात् ।

नन्विदं शान्ते कर्मणि बेतालोत्थानमिव । यतः श्रवणादेरनावश्यकता प्राप्नोति । नहि प्रबलमिव दुर्बलमप्यावश्यकं भवति । अन्यथा प्रदानस्य प्राबल्यव्युत्पादनमप्यनर्थकं स्यात् । मैवम् । 'तथाऽपि श्रवणादिश्च कर्तव्यो मोक्षसिद्धये' (वाराहपुराणम्) ईशेच्छयैव नियतत्वादिति शेषः,इति वराहपुराणे ईशेच्छानियत्यैव श्रवणादेरावश्यकत्वोक्तेः । नचैवमेव प्रदानस्याप्यावश्यकत्वसिद्धेः प्राबल्यव्युत्पादनमनर्थकमिति वाच्यम् । 'गुरुप्रसादो बलवान् न तस्माद्बलवत्तरम्[१] ।

१. म. बलवत्तरः

तथाऽपि श्रवणादिश्च कर्तव्यो मोक्षसिद्धये' (ब्र.सू.भा.उदाहृतवाराहवचनम् ३.३.४५) इति वचनाच्छ्रवणाद्यप्यावश्यकमित्येवेशेच्छाकल्पनात् तस्याः प्रमितैकोन्नेयत्वेन विपरीतेच्छाकल्पनानवकाशात्। यथोक्तं विवरणे 'श्रवणादित्रयोत्पन्नेत्यादि, ईश्वरेच्छानियतेः' इति।

प्रदानं लिङ्गबाहुल्यात् प्रबलं नेतरं तथा।
वचनादीश्वरेच्छातः श्रवणाद्यपि नो वृथा॥ इति।

नन्वेवमपि गुरुशिष्यप्रयत्नयोर्व्यधिकरणत्वेन कथमङ्गाङ्गिभावः। नहि सम्भवति यज्ञदत्तनिष्ठं [1]'दृढमुष्टिनिपीडनादि प्रयाजादिवत् देवदत्तनिष्ठकुठारयागादेरितिकर्तव्यतारूपम्। मैवम्। परिचारकनिष्ठचुल्लीसम्मार्जनादेः पाचकनिष्ठक्रियाविशेषं प्रति इतिकर्तव्यतात्वदर्शनात्। आव्रश्चनस्थाणुनिष्ठस्थाण्वाहुतेर्यूपनिष्ठसंस्कारं प्रतीतिकर्तव्यतात्वदर्शनाच्च।

अत एव 'स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत' इत्यस्मिन्नधिकरणे आव्रश्चनस्थाणोः सन्निधानात् तद्द्वारेण च संस्कारत्वे सम्भवति आरादुपकारकत्वानुपपत्तेर्यूपसंस्कारार्थेयं वियोजितेऽपि स्थाणौ यूपीयोऽसावित्येवं क्रियमाणा शक्नोत्येव यूपस्योपकर्तुं देवदत्तधारिताया इव स्रजः शुचिदेशनिधानं देवदत्तस्य। यद्यपि चादृष्ट एव संस्कारस्तथाऽपि संस्कारत्वमेव सम्बद्धोपकारित्वलाभादसम्बद्धोपकारिण आरादुपकारकाज्ज्यायः। तस्मात् स्थाण्वाहुतिं जुहोतीति विहिता स्थाण्वाहुतिः साद्यस्क्रविहितखलेवाल्यां न कर्तव्येत्युक्तम्।

एतेन ज्ञानप्रसादयोर्व्यधिकरणयोरप्यङ्गाङ्गिभावः। तत्रापि प्रसादस्याऽवश्यकत्वमितिकर्तव्यतात्वं प्राबल्यं चेत्याद्युपपन्नम्। चरमप्रसादस्य ज्ञानाजन्यत्वेऽपि अनन्तकालीनत्वेऽपि चानुयाजाद्युदीच्याङ्गकलापवत् तदितिकर्तव्यतात्वस्याप्युपपत्तेः। अत एव 'यस्य प्रसादात् परमार्तिरूपादस्मात् संसारान्मुच्यते

१. 'दृढमुष्टिनिपीडनप्रयाजादि देवदत्तनिष्ठ....' इति पाठः सम्भाव्यते।

नापरेण' इति श्रुतेः 'नान्यः पन्था अयनाय' (तै.आ. ३.१२) इति श्रुत्या न विरोधः, इतिकर्तव्यतान्यनिषेधपरत्वादिति सर्वं समञ्जसम्।

सूत्रार्थः

'प्रदावत्' इति पूर्वसूत्रोक्तं **तत्** प्रदानमेव श्रवणादितो **बलीयः**। नत्वधमं नापि समम्। **लिङ्गभूयस्त्वात्** लिङ्गबाहुल्यदर्शनात् हिशब्देन सत्यकामब्राह्मणे उपकोसलब्राह्मणे च लिङ्गबाहुल्यं प्रसिद्धमित्याह। श्रवणाद्यप्यवश्यकर्तव्यमेव, न प्रदानमात्रेणालमिति सूत्रार्थः।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- पेटिकासङ्गतिं सूचयन्नधिकरणप्रतिपाद्यमाह- **अत्र भगवद्दर्शनेति**॥ श्रवणेतिकर्तव्यतारूपस्य बलीयस्त्वसमर्थनादित्युक्त्याऽपि प्रकृतसङ्गतिसिद्धौ यदुपासनेतिकर्तव्यतारूपेत्याह सामान्येन तेन समस्तोपासनापेटिकायामिदं सङ्गतमिति सूचयति॥ **गुरुप्रसादस्येति**॥ तत्पूर्वकप्रदानस्येत्यर्थः। साक्षादनुक्तिस्त्वेतत्सूत्रव्याख्यानवाराहवचनानुसारिभाष्यानुसारेणेति ज्ञातव्यम्।

अत्र यद्यपि गुरुप्रसादः श्रवणादितो बलीयानिति चिन्तनया तस्यैव विषयत्वं सम्भवति। तथाऽपि न तथा प्रतिपत्तव्यम्। समस्तोपासनपेटिकाऽसङ्गतेः। नाप्युपासनामात्रं सूत्रानानुगुण्यादिति मन्वानो विवक्षितं विषयं निर्वक्ति- **प्रकृतं गुरुप्रसादेति**॥

टीकायां पूर्वपक्षन्यायविवरणव्याख्यानम्

'पुंसाम्यम्' इत्युक्तन्यायं धर्मिप्रदर्शनेन विवृण्वत् **'शिष्यस्यापि पुरुषत्वसाम्याद् धारणादेस्तत्प्रयत्नस्य न दौर्बल्यमिति न मन्तव्यम्'** (न्या.वि.) इति वाक्यं व्युत्क्रमेण व्याचष्टे- **शिष्यप्रयत्न एवेति**॥ तेन **धारणादेस्तत्प्रयत्नस्य**

श्रवणादिरूपशिष्यप्रयत्नस्य न दौर्बल्यं प्राबल्यमेव, गुरुप्रसादस्येतिकर्तव्यतामात्रत्वादित्यध्याहारेण योजना सूचिता। प्रकारान्तरेण सामस्त्येन व्याचष्टे-**माऽस्तु वेति**॥ योजना तु स्फुटैव।

टीकायां सिद्धान्तन्यायविवरणव्याख्यानम्

विशेषोक्तिन्यायं तदाकारप्रदर्शनेन विवृण्वत् ' "गुरुप्रसादो बलवान्" इत्यादिविशेषोक्तेः' (न्या.वि.) इति वाक्यमैकार्थ्याद् भाष्येण समं व्याचष्टे-**अत्र स्मृतिं चाऽहेति**॥

॥ इति लिङ्गभूयस्त्वाधिकरणम्॥ २७॥

॥ अथ पूर्वविकल्पाधिकरणम्॥ २८॥

सूत्रभाष्यम्

॥ ॐ पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॐ ॥
॥ ३-३-४६ ॥

नच पूर्वप्राप्त एव गुरुरिति नियमः । समग्रानुग्रहं चेत् पश्चात्तनः करोति[१] स्वयमेव तदा विकल्पः स्यात्। मानसक्रियावत्, यथोभयोर्ध्यानयोः समयोः।

'पूर्वस्मादुत्तमो लब्धः स्वयमेव गुरुर्यदि।
गृह्णीयादविचारेण विकल्पः समयोर्भवेत्॥
समग्रानुग्रहाभावात् सत्यकामः स्वकं गुरुम्।
ऋषभाद्यनुज्ञया चैव प्राप तस्माद्धि युज्यते॥'

इति बृहत्तन्त्रे[२]॥

'समग्रानुग्रहं कश्चित् स्वयमेव समो यदि।
कुर्यात् पुनश्च गृह्णीयादविरोधेन कामतः॥
ध्यानयोः समयोर्यद्वद् विकल्पः कामतो भवेत्।
एवं गुरोर्द्वितीयस्य विकल्पो ग्रहणेऽपि च॥'

इति महासंहितायाम्॥ ४६॥

॥ ॐ अतिदेशाच्च ॐ ॥ ३-३-४७ ॥

'ब्रह्मोपास्व ब्रह्मोपचरस्व तच्छृणुहि तत् त्वामवतु। यथा ब्रह्मोपचरेर्यथा

१. ह. प्रकरोति २. ह. इति हि बृहत्तन्त्रे

मामुपचरेर्ये चान्येऽस्मद्विधाः श्रेयसश्च तानुपास्व तानुपचरस्व तेभ्यः शृणुहि ते त्वामवन्तु' (पौष्यायणश्रुतिः) इति पौष्यायणश्रुतावतिदेशाच्च॥ ४७॥

॥ इति पूर्वविकल्पाधिकरणम्॥२८॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासनेतिकर्तव्यता यत्प्रसादस्तद्विचारादस्ति शास्त्रादिसङ्गतिः। उत्तमगुरोरस्वीकारे सार्वज्ञ्याभावेन भाविफलानुसारेणोपासनानुपपत्तिप्रसङ्गाद् विचारणीयमेव तत्। प्रकृतो गुरुरेव विषयः। किं पूर्वप्राप्त एवेति नियम उत पूर्वतनं त्यक्त्वाऽन्योऽपि ग्राह्य इति सन्देहः। उभयथा दर्शनं सन्देहबीजम्।

पूर्वपक्षः

प्रथमप्राप्त एवेति पूर्वः पक्षः। प्रथमप्राप्तत्यागे कारणाभावात्। गुरुपरिग्रहमात्रेण शुभलाभोपपत्तेः। विनैव कारणं प्रथमप्राप्तसन्त्यागे दोषप्राप्तेश्च। 'गुरुमन्त्रपरित्यागी रौरवं नरकं व्रजेत्' इत्यादिवचनात्। अतः पूर्वप्राप्त एव गुरुरिति नियमात् कचित् सर्वज्ञगुरोः प्रथमप्राप्तत्वाभावे प्रागुक्तं न युज्यत इति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **पूर्वेति** ॥ न पूर्वप्राप्त एव गुरुरिति नियमः। पश्चात्तनोऽपि स्वीकार्यो भवति। नच वैयर्थ्यम्। गुरुपरिग्रहस्य समग्रानुग्रहार्थत्वात्। स च पूर्वतनेन समोऽधिको वा समग्रानुग्रहं करोति चेत् स्वीकार्यो नाधमः। समग्रानुग्रहस्याकर्तोत्तमोऽपि न स्वीकार्यः। समस्य

च समग्रानुग्रहकर्तुः स्वीकारे विकल्पः स्यात्। पूर्वानुज्ञया स्वीकार्यो न वा। नतु स्वीकार्य एवेति विधिः। विकल्पश्च यदृच्छया प्राप्तौ, नतु तदर्थं प्रयतितव्यम्। समग्रानुग्रहकर्तोत्तमश्चेत् तदा न विकल्पः स्यात्। पूर्वानुज्ञां विनैवासंशयं स्वीकार्यः स्यादिति भावः। साम्ये विकल्प इत्यत्रोक्तं दृष्टान्तं व्याचष्टे- **मानसेति** ॥ तदेव व्यनक्ति- **यथेति** ॥ विकल्पः स्यादिति सम्बन्धः। अत्र स्मृतिमाह- **पूर्वस्मादिति** ॥ यदि पूर्वस्मादुत्तमोऽविचारेण स्वीकार्यस्तर्हि कथमृषभादयः सत्यकामेन न गृहीताः। पूर्वतन एव प्राप्तोऽतो नैतद् युक्तमित्यत आह- **समग्रेति** ॥ नास्माभिरुत्तममात्रपरिग्रह उच्यते किन्तु समग्रानुग्रहकर्तुरुत्तमस्य। सत्यकामः समग्रानुग्रहाभावान्नोत्तमान् जग्राहेत्यतः पूर्वपरित्यागेनोत्तमः समो वा स्वीकार्य इति युज्यत इति भावः। साम्ये पूर्वानुज्ञाऽपेक्षितेति भावेन तत्र स्मृतिं चाऽह- **समग्रेति** ॥ अविरोधेन गुर्वनुज्ञया। अनेन दोषवचनस्य विषयो दर्शितो भवति। अधमस्वीकारविषयं वा व्यर्थस्वीकारविषयं वाऽनुज्ञाभावविषयं वेति॥ ४६ ॥

हेत्वन्तरेण समोत्तमगुरुस्वीकारसमर्थनम्

हेत्वन्तरेण समोत्तमगुरुस्वीकारं समर्थयत् सूत्रं पठित्वा व्याचष्टे- **अतिदेशाच्चेति** ॥ पूर्वगुरुणैव समोत्तमगुरुस्वीकारायातिदिश्यमानत्वाद् युक्तमेतदिति भावः। श्रेयसः श्रेयांसः। अतः सर्वज्ञगुरुस्वीकारस्योपपन्नत्वात् तदुक्तप्रकारेणोपासनं कर्तव्यमिति सिद्धम्॥ ४७॥

॥ इति पूर्वविकल्पाधिकरणम्॥२८॥

शेषतात्पर्यचन्द्रिका

॥ ॐ पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॐ ॥

॥ ३-३-४६ ॥

पेटिकासङ्गतिः

अत्र समस्तोपासनातिशयाधायकप्रसादधर्मी गुरुस्त्यक्तुं योग्यो न वेति विचार्यत इति पेटिकासङ्गतिः ।

पूर्वपक्षः सङ्गतिश्च

ननु प्रसादश्चेद् बलीयांस्तर्हि गुरुस्त्यक्तुमनर्ह एव । त्यागे कोपोदयेन प्रसादाभावेन च ज्ञानाद्यभावप्रसङ्गात् । नच समग्रभगवद्गुणोपदेशाशक्तस्य त्यागेन तत्समर्थस्यान्यस्य ग्रहणाभावे [१]स्वयोग्यगुणोपासनानुपपत्तेः तस्य त्याग उचित इति वाच्यम् । गुरुपरिग्रहमात्रेण मोक्षादिशुभलाभोपपत्तेर्यावद्गुणोपासनेनापि कृत्याभावात् । अन्यथा श्रवणादेः शिष्यप्रयत्नस्य प्राबल्यापत्तेः । 'गुरु-मन्त्रपरित्यागी' इति गुरुत्यागिनोऽनर्थोक्तेश्च । गुरुकोपादेरानन्दह्रासहेतु-तोक्तेश्च । ततश्च स्वयोग्ययावद्गुणोपदेशालाभेऽपि प्रबलप्रसादमहिम्नैवाभीष्ट-सिद्धेः । पूर्वगृहीत एव गुरुरिति नियम एवानवद्यः स्यात् । ततश्च 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्युक्तिर्नैव युज्यते । ततः पूर्वोक्तमपि न प्रदानं बलवद् भवेद् इत्युत्थानादनन्तरसङ्गतिः ।

सिद्धान्तः

सिद्धान्तस्तु, नैवं नियमपक्षो युज्यते । सम्पूर्णोपदेशाभावप्रसङ्गात् । प्रसाद-स्याप्युपदेशे विशेषाधायकत्वेनैव प्राबल्यस्योक्तत्वेन केवलप्रसादस्याकि-ञ्चित्करत्वात् । ततः पूर्वगृहीतेन गुरुणा तत्समोत्तमयोर्गुर्वोर्ग्रहणे विकल्पः । पूर्वगुरुत्यागः गुर्वन्तरस्वीकारश्च पाक्षिक इति यावत् । यदा पूर्वगृहीत एव गुरुः सम्पूर्णमुपदिशति तदा न त्यागः । तत्परित्यागे दोषोक्तेः । यदा तु न, तदैव तत्परित्यागेनान्यग्रहणमिति विकल्पः, उदितानुदितहोमयोरिव व्यवस्थित एव । यथा च रूपद्वयध्यानयोर्विकल्पः । यद्रूपं यस्य स्फुरति नान्यत् तस्य तद्विषयमेव

१. म. स्वयोग्ययावद्गुण ।

ध्यानम् इति, यस्य तु तद्विपरीतं तस्य तद्विषयमेव ध्यानमिति व्यवस्थाश्रयणात् । तस्मादिहापि पूर्वः समग्रानुग्रहकर्ता न चेत् त्याज्यः । तत्कर्ता चेन्नैव त्याज्य इति व्यवस्थितविकल्पाश्रयणाद् गुरुप्रदानस्य बलवत्वे न किञ्चिद् बाधकमिति । दृष्टं चैतत् सत्यकामस्य गुर्वन्तराश्रयणम् । प्रकरणादेव ऋषभादिभ्यः समग्रोप-देशाभावात् समग्रोपदेशार्थं तदिति निश्चीयते । पौष्यायणश्रुतिः स्वकीयोपास्य-त्वोपचर्यत्वादिधर्मानितरेष्वपि स्वसदृशेषु ब्रह्मवित्स्वतिदिशति इत्यतो गुर्वन्तरा-श्रयणमवशिष्टज्ञानार्थं पूर्वानुज्ञया श्रुत्यनुमितमिति निश्चितत्वाच्च ।

सूत्रार्थः

पूर्वपरिगृहीतगुरोः **विकल्पः** समग्रानुग्रहाभावे त्यागस्तद्भावे तु न त्यागः । उभयत्रापि समग्रानुग्रहसाम्ये विकल्पः । पूर्वत्र व्यवस्थितो विकल्पः, अत्र त्वव्यवस्थितो विकल्प इति । विकल्पः कुतः ? **प्रकरणात्** ऋषभादिप्रकरण-पर्यालोचनया तथैवावगमात् । **मानसक्रियावद्** युक्तं च **स्यात्** इति । द्वितीयस्य तु स्पष्टोऽर्थः । प्रबलप्रकरणोपदेशानन्तरमतिदेशोऽयमिति सूत्रक्रमो विज्ञातव्यः ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- गुरुविचारः कथमुपासनापादे? समस्तोपासनापेटिकायां चासङ्गत इत्यत आह- **अत्र ब्रह्मज्ञानेति** ॥ गुरोर्विकल्पकथनस्य का पूर्वेण सङ्गतिरित्यतो व्यतिरेकमुखेन तामुपपादयति- **उत्तमगुरोरिति** ॥ पूर्वगृहीतस्य विकल्पावचने उत्तमगुरोः पक्षेऽपि प्राप्त्यभावेन विहितोपासनासिद्धेः 'इतरे त्वर्थसामान्यात्' (ब्र.सू. ३.३.१४) इत्यधिकरणेनाऽऽक्षेपिकी सङ्गतिरिति भावः । **किं पूर्वप्राप्त एवेति नियम इति** ॥ यद्यपि सूत्रानुसारात् पूर्वविकल्पो युक्त [१]एवेत्यादिरेव संशयो युक्तः । तथाऽपि नाव्यवस्थितो विकल्पः । विवक्षित-गुरुलाभेऽपि पूर्वगृहीतस्य पाक्षिकग्रहणप्रसङ्गेन मोक्षाभावप्रसङ्गात् । किन्तु

१. म. वेत्यादिरेव ।

व्यवस्थित एव विकल्प इति ज्ञापनायान्यथा संशयो दर्शित इति ध्येयम्॥ **प्रथमप्राप्त एवेति पूर्वपक्ष इति**॥ समग्रानुग्रहकर्तुः समस्योत्तमस्य वा लाभेऽपीति योज्यम्।

प्राप्तसन्त्यागरूपपूर्वपक्षन्यायव्याख्यानम्

प्राप्तसन्त्यागन्यायमेतत्सङ्गतत्वेन सम्बन्धादिप्रदर्शनेन विवृण्वत् **'नचोत्तमगुरुस्वीकारार्थत्वेन प्राप्तसन्त्यागनिमित्तदोषः'** (न्या.वि.) इति वाक्यं व्याचष्टे- **प्रथमप्राप्तेति**॥ प्रकारान्तरेण व्याचष्टे- **विनैव कारणमिति**॥ तथाच पूर्वगुरुसन्त्यागः किमुत्तमगुरुस्वीकारार्थं कर्तव्य उत त्यागे बाधकाभावात्। नाऽद्यः। त्यागस्योत्तमगुरुस्वीकारार्थत्वेऽङ्गीक्रियमाणे प्राप्तसन्त्यागनिमित्तदोषः। अत्र निमित्तशब्दस्तदभावोपलक्षकः। पूर्वप्राप्तसन्त्यागे कारणाभावाख्यो दोषः प्राप्नोति। प्रयोजनाभाव इति यावत्। उत्तमगुरुस्वीकारस्य च स्वतः पुरुषार्थत्वाभावादिति भावः। नचोत्तमगुरुस्वीकारस्य सम्पूर्णोपदेशद्वारा सम्पूर्णमोक्षाख्यशुभलाभोपयोगितया पुरुषार्थत्वसम्भवः। पूर्वगुरोरत्यागेन तत्प्रसादे समुपजनिते सम्पूर्णोपदेशरूपवाक्यार्थश्रवणात्मकशिष्यप्रयत्नस्य दुर्बलस्याभावेऽपि प्रबलेन पूर्वगुरुप्रसादेनैव विवक्षितमोक्षलाभोपपत्तेः। न द्वितीयः। उत्तमगुरुस्वीकारार्थत्वपक्षोक्तरीत्या विनैव कारणं पूर्वप्राप्तगुरुसन्त्यागोऽङ्गीकर्तव्य इति तन्निमित्तकः 'गुरुमन्त्रपरित्यागी' इत्यादिवचनावेदितो नरकप्राप्त्यादिरूपो दोषः स्यादिति विवरणं द्वेधा व्याख्यातं द्रष्टव्यम्।

अमानत्वरूपसिद्धान्तन्यायव्याख्यानम्

अमानत्वमित्युक्तमानराहित्यन्यायं विषयदर्शनेन विवृण्वत् **'तत्र दोषे मानाभावात्'** (न्या.वि.) इति वाक्यं तात्पर्यतो व्याचष्टे- **अधमस्वीकारविषयं वेति**॥ अनेन तत्रोत्तमगुरुस्वीकारार्थत्वेऽपि दोष इत्यत्र नेदं मानम्। किन्तु समग्रानुग्रहादि-प्रयोजनाभावे तत्त्याग एवेत्यर्थ उक्तो भवति।

॥ इति पूर्वविकल्पाधिकरणम्॥ २८॥

॥ अथ विद्याधिकरणम्॥ २९॥

सूत्रभाष्यम्

नच 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' (भ.गी.३-२०) इत्यादिनाऽन्यन्मोक्षसाधनम्।

॥ॐ विद्यैव तु निर्धारणात् ॐ॥ ३-३-४८॥

'तमेवं[1] विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय[2]' (श्वे.उ.३-८.) इति निर्धारणाद् विद्ययैव मोक्षः॥ ४८॥

॥ ॐ दर्शनाच्च ॐ॥ ३-३-४९॥

न केवलविद्यया किन्त्वपरोक्षज्ञानेनैव च। 'सर्वान् परो माययाऽयं सिनीते दृष्ट्वैव तं मुच्यते नापरेण' इति कौशिकश्रुतेः॥४९॥

॥ इति विद्याधिकरणम्॥ २९॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्रेश्वरदर्शनसाधनोपासनस्य कर्तव्यतासमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथोक्तं व्यर्थं स्यादिति समर्थनीयमेतत्। प्रकृतं भगवदुपासनं विषयः। कर्तव्यं न वेति सन्देहः। द्विविधक्रियादर्शनं सन्देहबीजम्।

पूर्वपक्षः

न भगवदुपासनं कर्तव्यमिति पूर्वः पक्षः। व्यर्थत्वात्। नच ज्ञानार्थमुपासनं,

१. ह. तमेव २. ह. विद्यतेऽयनाय

तस्यापि वैयर्थ्यात् । नच मोक्षार्थं, तदनिश्चयात् । यथा खलु 'तरति शोकमात्मवित्' (छा.उ. ७.१३) इति ज्ञानस्य मोक्षसाधनत्वं प्रतीयते तथा 'कर्मणैव हि' (भ.गी. ३.२०) इत्यादिना कर्मापि मोक्षसाधनं प्रतीयते। नच 'भाक्तं वाऽनात्मवित्त्वात्' (ब्र.सू. ३.१.७) इत्युक्तमिति वाच्यम्। तृतीयायाः साक्षात्करणार्थत्वात्। संसिद्धिपदेन च साक्षान्मोक्षाभिधानाच्च। अतो ज्ञानस्य मोक्षसाधनत्वानिश्चयान्न तदर्थोपासना कर्तव्येत्युक्तं व्यर्थमिति।

सिद्धान्तः

पूर्वपक्षं प्रतिषेधति- **नचेति ॥** तदुपपादनाय सूत्रमुपन्यस्य व्याचष्टे- **विद्येति ॥** 'कर्मणैव' (भ.गी. ३.२०) इत्यादिनाऽन्यन्मोक्षसाधनं प्रतीयत इति मोक्षसाधनानिर्णयादनुपासनमिति न वाच्यम्। 'नान्यः पन्थाः' (श्वे.उ. ३.८, चित्त्युप. १३.११) इति सावधारण-विद्यावचनस्य कर्मवचनादपि प्राबल्येन तद्बलाद् विद्यैव मोक्षसाधनमिति निर्णयोपपत्तेरिति भावः ॥४८॥

विद्यायाः मोक्षसाधनत्वे माऽस्तु तर्हि ध्यानमित्याशङ्कापरिहारः

नन्वेवं विद्या चेन्मोक्षसाधनं तथाऽपि न ध्यानोपासनं कार्यम्। विद्यायाः श्रवणादेव सम्भवादित्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे-**दर्शनाच्चेति ॥** नास्माभिरत्र केवलविद्यया मोक्ष उच्यते। येन ध्यानाभाव आपद्येत। किन्तु भगवत्साक्षात्कारादपि। अतस्तदर्थं ध्यानं कार्यमेवेति भावः। ननु 'एवं विद्वान्' (तै.आ. ३.१२) इति परोक्षविद्यया मोक्षश्रवणात् कथमुच्यते दर्शनान्मोक्ष इति तत्राऽह- **सर्वानिति ॥** विशेषश्रुतिबलात् साऽपि श्रुतिस्तदर्थेति भावः। अनेन 'दर्शनात्' इत्येतद्भगवत्साक्षात्काराच्छ्रुतेरिति द्वेधा व्याख्यातं ज्ञातव्यम्। **मायया प्रकृत्या।** अतो ज्ञानस्य मुक्तिसाधनत्वनिश्चयात् तदर्थोपासनस्य कर्तव्यत्वादुक्तं सार्थकमिति सिद्धम्॥ ४९ ॥

॥ इति विद्याधिकरणम्॥ २९ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ विद्यैव तु निर्धारणात् ॐ ॥ ३-३-४८ ॥

एतदधिकरणप्रतिपाद्यवर्णनम्

पूर्वेष्वधिकरणेषु मोक्षसाधनप्रसादसाधनापरोक्षज्ञानाय यथाशक्त्यखिलवेदानधीत्य विष्णुभक्तिशमदमादिगुणशाली विषयसंसर्गादिदोषवर्जितः गुरुं शुश्रूषयाऽऽराध्य प्रसाद्य समग्रानुग्रहकर्तुर्गुरोरेवापरित्यागेन[1] श्रुतस्वोपास्यरूपगुणनिष्कर्षाख्यपरोक्षज्ञानाख्यया विद्यया निदिध्यासनमारभेदिति सेतिकर्तव्यं समस्तमुपासनं कर्तव्यमित्युक्तम्। तत्र स्रक्चन्दनवनितादिभोग एव पुमर्थो नान्यस्तदतिरिक्तोऽस्तीति प्रत्यक्षैकमाना लोकायतिकाः। पारलौकिकं पुमर्थं मन्यमाना अपि [2]पुष्कलज्ञानाहिंसाद्याकाराभ्यां सम्यग्ज्ञानसच्चरित्राभ्यामेव मोक्षो नान्येनेति जैनाः। विज्ञानमेकमेव तत्त्वं न ततोऽन्यदस्तीति वेदनाद् विज्ञानाद्वैतध्यानाच्चेति विज्ञानवादिनः। प्रकृतेरन्तःकरणादिरूपायाः पुरुषस्य स्वात्मनः विवेकः स्वरूपतोऽर्थतश्च भेददर्शनं प्रकृतिपुरुषविवेको नाम तत एवेति साङ्ख्याः। स्वतन्त्रादेव शिवानुग्रहादिति पाशुपताः। स्वतन्त्रात् स्कन्दानुग्रहादिति स्कान्दाः। स्वतन्त्रादेव सूर्यानुग्रहादिति सौराः। यदकरणे प्रत्यवायो यच्च ब्राह्मण्याद्यनागन्तुकमुपादाय विहितं कर्म तन्नित्यम्। यदकरणे प्रत्यवायो यच्च पितृमरणाद्यागन्तुकमेव निमित्तमुपादाय विहितं तन्नैमित्तकम्। यत्करणे फलमकरणे न प्रत्यवायः कामनानिमित्तकं तत् काम्यम्। यद्रागनिमित्तकं यस्य च करणे प्रत्यवायः तन्निषिद्धम्। तत्र केवलं निषिद्धकाम्ययोर्वर्जनात् करणाच्च नित्यनैमित्तिकयोरिति भाट्टाः। न केवलेन ज्ञानेन कर्म विना कृतेन, किन्तु कर्मसहितेनैवेति ज्ञानकर्मसमुच्चयवादिनः। मायावादिनस्तु विविधोपासनं वैकुण्ठादिप्राप्तिरूपापरमोक्षसाधनमपि नाविद्यास्तमयसमनन्तरकालीनाद्वैत-

---
१. म. गुरोरपरित्यागेन २. 'पुद्गलज्ञान....' इति पाठः सम्भाव्यते।

ब्रह्मावस्थानरूपमोक्षसाधनम्। किन्तु ब्रह्मैकत्वज्ञानमेवेति वदन्ति। ततो गुरुप्रसादादीतिकर्तव्यता विद्याशब्दितपरोक्षनिष्कर्षाख्यकारणं चानपेक्षितमेव कारणानिर्णयादिति शङ्कने नास्त्येव मोक्षः, अतो व्यर्थं ज्ञानं सुतरां तदर्थमुपासनं च। सत्त्वे वा साधनान्तरसाध्यत्वश्रवणादनिर्णयः। निर्णये वा न ध्यानमावश्यकमित्यनुपपन्नम्। 'नान्यः पन्थाः' (श्वे.उ. ३.८) इत्यादिश्रुतिविरोधात्। किं नाम? निष्कामभगवदर्थश्रुत्या विहितकर्मानुष्ठानेन शुद्धान्तःकरणस्य रागादिदोषक्षये जातभगवद्भक्तेः अनुग्रहपूर्वकप्रदानयुक्तश्रवणमननाभ्यासवतः परोक्षनिश्चयाख्यविद्योदये, ततः पुनरप्यादरनैरन्तर्याभ्यां ध्यायतोऽपरोक्षदर्शने सति अस्य परमभागवतस्य प्रसन्नो भगवाननारब्धानि कर्माणि विनाश्य भागवतधर्मप्रवृत्तये ज्ञानिनं कमपि कालमवस्थापयंस्तदर्थं प्रारब्धकर्माण्यवशेष्य तत्फलोपभोगे सति तान्यपि विनाश्य प्रतिबन्धान्मोचयतीत्यत्र प्रतिपाद्यते।

एतदधिकरणस्य अनुबन्धाद्यधिकरणानन्तर्यशङ्का

नन्वेतदधिकरणं 'अनुबन्धादिभ्यः' (ब्र.सू. ३.३.५१) इत्येतदधिकरणानन्तरं भवितुं युक्तम्। प्रदानाद्यधिकरणेष्विवोपासनेतिकर्तव्यतानामशब्दाभिधेयविषयसंसर्गप्रमुखदोषवर्जनविष्णुभक्त्यादिरूपगुणनियमासनप्राणायामानां तत्र विचारणात्। अन्यथेह सेतिकर्तव्यस्याऽऽक्षेपायोगात्। अत एवानुव्याख्याने व्युत्क्रमेण व्याख्यातम्। सुधायां चोपास्यस्वरूपावगमे सत्येव तत्सार्थक्यसमर्थनस्यावसरो नान्यथेति व्युत्क्रमेण व्याख्यातमित्युक्तम्।

किञ्चोत्तराधिकरणे प्रतिबिम्बविषयो[१]पासनमावश्यकमित्यभिधानात् बिम्बविषयताऽप्युपासनस्येतिकर्तव्यतैवेति तदनन्तरमेवास्य सार्थक्यसमर्थनस्य सङ्गतिः। स्वरूपावगत्यनन्तरमेव तदवसरात्। यदि च सार्थक्यसिद्ध्यनन्तरमेव तस्येतिकर्तव्यताविचार इत्याश्रीयते तदा सर्वादावेवेदं कर्तव्यं सर्वशाखाविषयत्वादिसमर्थनस्य फलत्वसिद्ध्युत्तरकालीनत्वात्।

१. म. बिम्बविषयोपासनम्।

तन्निरासः

मैवम्। 'मानसक्रियावत्' इत्युक्तदृष्टान्तोऽनुपपन्नः। फलाभावेन ध्यानस्यैवाकार्यत्वाद्, विकल्पस्य दूरोत्सारितत्वादिति वा, प्रकरणात् प्रकर्षेण समग्रानुग्रहकरणात् पूर्वविकल्पसम्भवेऽपि प्रकर्षेण करणं ज्ञानं विना कर्मणाऽप्युपपन्नमिति वा, पूर्वत्र यथा गुर्वोर्विकल्प आश्रितस्तथा ज्ञानकर्मणोरपि विकल्प आश्रयणीयः, नतु ज्ञानेनैव मोक्ष इति निर्धारणमिति वा शङ्कनेनात्रापि सङ्गतत्वात्। अत एवोक्तवक्ष्यमाणाशेषप्रमेयाक्षेपकतया मध्ये निवेशोऽपि नायुक्तः। वक्ष्यमाणरीत्योत्तराधिकरणेनापि सङ्गतिलाभात्। सुधानुव्याख्याने तु तेनापि सङ्गतिरस्तीत्येवम्परे, नत्वत्र सङ्गत्यभावपर इति न किञ्चिदनुपपन्नम्।

सूत्रार्थः

सूत्रार्थस्तु- **विद्यैव** मोक्षसाधनमिति निर्णय उपपद्यते। न वाद्यन्तरोक्तसाधनजातं, न वा नैष्फल्यमित्येवार्थः। **निर्धारणात्** निर्धारणार्थशब्दघटितात् 'नान्यः पन्थाः' (श्वे.उ. ३.८) इति वचनात्। अत एव कर्मवचनादपि प्रबलात् तथैव निर्धारणादित्यावृत्तिरिति।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **अन्यथोक्तं व्यर्थं स्यादिति ॥** गुरुप्रसादादेरुपासनेतिकर्तव्यतासमूहस्य पूर्वाधिकरणेषु प्रतिपादितस्य तत्प्राबल्यव्युत्पादनादेश्चोपासनावैयर्थ्ये वैयर्थ्यस्यानिवार्यत्वादिति भावः। उपलक्षणमेतत्। अनुबन्धाद्यधिकरणेषु वक्ष्यमाणनियमस्य यमनियमप्राणायामाद्युपासनेतिकर्तव्यताकलापस्य वैयर्थ्यं स्यादिति ध्येयम्। [१]प्रकृतमपि यद्यप्यनन्तरातीताधिकरणे गुरुरेव प्रकृतस्तथाऽपि महाप्रकरणे भगवदुपासनमपि प्रकृतमिति भावः।

१. इदं पदं सम्पातायातमिति भाति।

पूर्वपक्षीयकारणानिर्णयन्यायस्य व्याख्यानम्

कारणानिर्णयन्यायं तदाकारप्रदर्शनेन विवृण्वत् **'नच विद्या कर्म वा संसारनिवृत्तिकारणमिति कारणानिर्णयः'** (न्या.वि.) इति वाक्यं विवक्षितप्रमेयाध्याहारेण व्याचष्टे- **न भगवदुपासनं कर्तव्यमिति** ॥ यद्यपि पाक्षिकी प्राप्तिरस्ति। तथाऽपि न सा सिद्धान्त्यभिमतेति भावः ॥ **तदनिश्चयादिति** ॥ चार्वाकाद्युक्तरीत्या मोक्षानिश्चयादित्यर्थः। यद्वा ज्ञानस्य मोक्षसाधनत्वानिश्चयादित्यर्थः। संशयबीजं दर्शयति- **यथा खल्विति** ॥ तेन 'तरति शोकमात्मवित्' (छा.उ. ७.१.३) इति श्रुत्या ज्ञानस्य मोक्षसाधनत्वं प्रतीयते। 'कर्मणैव हि' (भ.गी. ३.२०) इति स्मृत्या कर्मणो मोक्षसाधनत्वं च यतः प्रतीयते, अतो विद्या कर्म वा संसारनिवृत्तिरूपमोक्षकारणमिति कारणसंशयो भवतीति विवरणयोजना द्रष्टव्या। अत्र मोक्षकारणमिति वक्तव्ये यद्विवरणकृत् संसारनिवृत्तीत्याह तेन कर्मण आनन्दाभिवृद्धिहेतुत्वं सिद्धान्तेऽनुमतमिति सूचयति।

श्रुतिस्मृत्योः संशयबीजत्वसमर्थनम्

नन्विदं वचनद्वयं न संशयबीजम्। कर्मवचनस्य भाक्तत्वस्य प्रागेव वर्णितत्वेन स्मृतित्वेन च दुर्बलत्वात्। प्रबलयोरेव संशयबीजत्वादिति शङ्कां निराह- **नचेति** ॥ 'तरति शोकमात्मवित्' (छा.उ. ७.१.३) इति श्रुत्या न साक्षाज्ज्ञानस्य मोक्षहेतुत्वं प्रतिपाद्यते। तृतीयाद्यभावात्। मोक्षवाचकपदाभावाच्च। किन्तु समभिव्याहारादर्थाच्चेति श्रुतित्वप्रयुक्तं प्राबल्यं कुण्ठितम्। 'कर्मणैव हि' (भ.गी. ३.२०) इति स्मृतेस्तु तृतीयया संसिद्धिपदेन च साक्षान्मोक्षसाधनत्वप्रतीत्या स्मृतित्वप्रयुक्तदौर्बल्योपमर्देन प्राबल्यमुज्जृम्भितम्। तथाच निरवकाशत्वप्रयुक्तप्राबल्यज्यायस्त्वाविवेकेन संशयबीजत्वं युक्तमिति भावः।

सिद्धान्तीयप्राधान्यन्यायस्य व्याख्यानम्

प्राधान्यन्यायं सम्बन्धिप्रदर्शनपूर्वकं विवृण्वत् **' ''नान्यः पन्था विद्यते अयनाय''** (श्वे.उ. ३.८) **इत्यवधारणाद् विद्यावचनस्य प्राधान्यात्'** इति वाक्यं सूत्रभाष्याभ्यां सहैव व्याचष्टे- **नान्यः पन्था इति** ॥ यद्यपि 'तरति शोकमात्मवित्' (छा.उ. ७.१.३) इति विद्यावचनं सावकाशम्। तथाऽपि सावधारणमिदं न सावकाशम्। अतस्तस्य तत्प्रयुक्तमपि प्राबल्यं निराबाधम्। कर्मवचनं तु भाक्तनये सावकाशं, स्मृतेश्चेति भावः। अत्र भाष्ये तृतीयान्तं विद्यापदं दृष्ट्वा केचित् सूत्रमपि तृतीयान्तमामनन्ति।

॥ इति विद्याधिकरणम् ॥ २९ ॥

॥ अथ अबाधाधिकरणम् (श्रुत्यधिकरणम्) ॥ अ. ३०॥

सूत्रभाष्यम्

॥ ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ ॥

॥ ३-३-५० ॥

सावधारणा बलवती श्रुतिः।

'इन्द्रोऽश्वमेधाञ्छतमिष्ट्वाऽपि राजा ब्रह्माणमीड्यं समुवाचोपसन्नः।
न कर्मभिर्न धनैर्नैव चान्यैः [१]पश्येत् सुखं तेन तत्त्वं ब्रवीहि॥' (श्रुतिः)
इति बलवल्लिङ्गम्।

'नास्त्यकृतः कृतेन' (मु.उ.१-२-१२) इत्युपपत्तिश्च।

'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते।
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥' (स्मृतिः)
इति युक्तिमद् भगवद्वचनम्।

अतो न प्रमाणान्तरबाधः। 'कर्मणैव' (भ.गी.३-२०) इत्ययोगव्यवच्छेदः ॥ ५० ॥

॥ इत्यबाधाधिकरणम् (श्रुत्यधिकरणम्) ॥ ३० ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र यत्साधनं भगवदुपास्तिस्तस्य ज्ञानस्य मोक्षसाधनत्वसमर्थनादस्ति

१. ह. पश्ये

शास्त्रादिसङ्गतिः। अन्यथोपासनवैयर्थ्यापातादेतत् समर्थनीयम्। प्रकृतो मोक्ष एव विषयः। किं ज्ञानसाध्य उत कर्मसाध्य इति सन्देहः। विप्रतिपत्तिः सन्देहबीजम्।

पूर्वपक्षः

कर्मसाध्य एव मोक्ष इति पूर्वः पक्षः। 'कर्मणैव' (भ.गी. ३.२०) इति वचनात्। नच वाच्यं विद्यावचनस्य सावधारणत्वेन प्राबल्यात् तद्विरोधः स्मृतेरिति। स्मृतेरपि सावधारणत्वात्। नचैतावता साम्यम्। भगवद्वाक्यत्वेन प्राबल्यात्। एतेन श्रुतिस्मृत्योः श्रुतिर्बलवती तदपेक्षत्वात् स्मृतेरिति चापहसितं भवति। अतो ज्ञानस्य मोक्षसाधनत्वाभावान्न तदर्थोपासना कर्तव्येति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **श्रुतीति॥** मोक्षो ज्ञानसाध्य एव। न चैवं प्रमाणान्तरबाधः। ज्ञानस्य मोक्षसाधनत्वोपपादकबलवच्छ्रुत्यादिसद्भावात्। तथाहि। मोक्षस्य ज्ञानसाध्यत्वे 'तमेवम्' (तै.आ. ३.१२) इत्यादिश्रुतिः स्मृतेर्बलवती। निरवकाशावधारणयुक्तत्वात्। तथा बहुकर्मकृतोऽपीन्द्रस्य दुःखासम्भिन्नसुखरूपमोक्षार्थं तत्त्वज्ञानप्रार्थनलिङ्गं च बलवत्। निरवकाशत्वात्। उत्पत्तिनाशवत्फलत्वेनावधृतकर्मणा नित्यपुरुषार्थो न भवतीत्युपपत्तिश्च बलवती। दूषणशून्यत्वात् श्रौतत्वाच्च। तथा 'कर्मणा बध्यते जन्तुः' (स्मृतिः) इति वचनं च बलवत्। भगवद्वाक्यत्वेन साम्याद् युक्तिमत्त्वेनाऽधिक्यात्। यत एवं मोक्षस्य ज्ञानसाधनत्वे प्रत्येकं बलवच्छ्रुत्यादिभावोऽतो विद्यैव मोक्षसाधनमित्यस्य न स्मृतिबाध इति भावः। नन्वेवं चेत् सा स्मृतिरप्रमाणमेवेति प्राप्तमित्यतश्चशब्दसूचितार्थमाह- **कर्मणेति॥** क्रियत इति शेषः। कर्मयोगश्च मोक्षातिशयार्थ इति ज्ञातव्यम्। अतो ज्ञानस्यैव मोक्षसाधनत्वात् कर्तव्योपासनेति सिद्धम्॥ ५० ॥

॥ इत्यबाधाधिकरणम् (श्रुत्यधिकरणम्) ॥ अ. ३० ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॐ ॥ ३-३-५० ॥

पूर्वाधिकरणत एतदधिकरणीयपूर्वपक्षे सिद्धान्ते च विशेषः

अत्र मोक्षस्य कर्मसाध्यत्वं निराक्रियते। अत्र पूर्वाधिकरणसम्बन्धी पूर्वपक्षः सिद्धान्तश्च सकलोऽप्यावर्तनीयः। विशेषस्त्वेतावान्। विद्यावचनस्य 'नान्यः पन्थाः' (श्वे.उ. ३.८) इत्यस्य यच्छ्रुतित्वेन सावधारणत्वादिना च प्राधान्यमुपपादितं तद्भ्रम एव भ्रान्तिप्रतीतमेव न तु सत्। 'कर्मणैव' (भ.गी. ३.२०) इत्यस्यापि सावधारणत्वात्, तृतीयादिश्रुत्या निरवकाशत्वाद् भगवद्वाक्यत्वाच्च प्राबल्ये तद्बाधात् 'नान्यः पन्थाः' (श्वे.उ. ३.८) इत्यस्य प्राबल्यमिति प्रतीतेर्भ्रान्तित्वान्निराबाधेन कर्मवचनेन मोक्षस्य तत्साध्यत्वनिर्णयोपपत्तेः कारणनिर्णयेन पूर्वः पक्षः। नतु पूर्वाधिकरण इव प्राबल्याविवेकापादितकारणानिर्णयेन। उक्तरीत्या निर्णयोपपत्तेरिति।

सिद्धान्ते विशेषस्तु, श्रुतिस्तावत् स्मृतेः स्वभावत एव बलवती। सावधारणत्वं त्वविशिष्टम्। इन्द्रस्य कर्मनिन्दापूर्वकं तत्त्वज्ञानप्रार्थनलिङ्गं च बलवत्। कृतो न भवतीति अकृतो नित्यपुरुषार्थः। कृतमुत्पत्तिः। भावे क्तः। तदस्यास्तीति कृत अर्शआद्यजन्तः[1]। पुनः[2] स एव प्रत्ययः। उत्पत्तिविनाशवत्फलवता कर्मणा न भवतीति। नहि नश्वरफलस्वभावं नित्यपुरुषार्थप्रदं भवतीत्युपपत्तिश्च बलवती। किं च मोक्षो हि कस्यचिच्चेतनस्य प्रसादायत्तो बन्धनिवृत्तिरूपत्वात्, निगडमोक्षवत्। 'यमेवैषः' (कठ.उ. २.२२, मुण्ड.उ. ३.२.३) इति वचनाच्च। तत्प्रसादश्च तत्पुरुषीयोत्कर्षज्ञानसाध्यः प्रीतित्वाद् देवराजप्रीतिवत्। 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' (भ.गी. ७.१७) इति ज्ञानिन्येवाधिकप्रीतिवचनाच्च। 'कर्मणा बध्यते जन्तुः' (स्मृतिः) इति निन्दनाच्च। नच 'कर्मणैव हि' (भ.गी.

१. म. कृतम्, अर्शआद्यजन्तम्। २. म. ततः पुनः।

३.२०) इति भगवद्वाक्येन बाधः। 'प्रियो हि' (भ.गी. ७.१७) इत्यादेरपि भगवद्वचनत्वात्। श्रुत्यादिप्रमितोपपत्तिमत्त्वाच्च प्राबल्यादिति।

एतदधिकरणस्य साधधनाध्यायासङ्गतिः गतार्थता चेति शङ्का

ननु मोक्षस्य कर्मसाध्यत्वप्रतिषेधश्च[1] चतुर्थे सङ्गतः, फलविचारत्वात्। नच 'यत्साधनं भगवदुपास्तिस्तस्य ज्ञानस्य मोक्षसाधनत्वसमर्थनात्' इत्युक्तदिशा टीकायामेवैतत् परिहृतमिति वाच्यम्। एवं पारम्पर्येण सङ्गतेः सर्वत्र सुलभत्वेनासङ्गतिवार्तोच्छेदप्रसङ्गात्। यत्साधनं भगवदुपास्तिर्ज्ञानद्वारा तस्य कर्मक्षयादेः कर्मसाध्यत्वप्रतिक्षेपादिना सङ्गत्यूहसम्भवेन तस्यापि इह प्रतिपादनसम्भवेनातिप्रसङ्गाच्च। ज्ञानस्य मोक्षसाधनत्वं पूर्वस्मिन्नेव विद्यानये भाक्तनये च प्रतिपादितमिति गतार्थता च। नच मोक्षस्य ज्ञानसाध्यत्वं कर्मसाध्यत्वाभावो वाऽत्रोच्यते। पूर्वत्र तु ज्ञानस्य मोक्षसाधनत्वं कर्मणस्तदभाव उक्त इति वाच्यम्। प्रमेयसाम्ये वचनव्यक्तिभेदमात्रेण गतार्थताऽनिस्तारात्। 'ज्ञानस्य मोक्षसाधनत्वसमर्थनात्' इति टीकाविरोधाच्च।

तत्परिहारः

अत्रोच्यते। किं न्यायभेदाभावाद् गतार्थता शङ्क्यत उत विषयभेदाभावात्। नाऽद्यः। आकाशान्तराद्यधिकरणेषु न्यायभेदाभावेन गतार्थतापातात्। आकाशाधिकरणोक्तं लिङ्गमेव ह्यन्तराधिकरणे तद्धर्मपदेनोच्यते।

किञ्चौदुम्बराधिकरणोक्तेन विधानात् सामर्थ्यन्यायेन पर्णमय्यधिकरणे 'यस्य पर्णमयी जुहूर्भवति' (तै.सं. ३.५.७) इत्यादेरर्थवादत्वसाधनन्यायभेदाभावाद्गतार्थतापत्तेः[2] 'तथा निर्मन्थ्ये' इति प्राथमिकाधिकरणे प्रोक्षणाधिकरणोक्तप्रसिद्धावयवार्थत्वन्यायेनैव यौगिकत्वव्यवस्थापनात्, तथा 'तथोत्थानविसर्जने'

१. म. 'च' इति नास्ति। २. म. गतार्थतापातः।

इति तृतीयद्वितीयाधिकरणे 'तथोत्थानमपीति चेत्' इति पूर्वाधिकरणोक्तेन श्रुतिविनियोगाभावमन्त्रलिङ्गविरोधादिन्यायेन [1]कालविरोधानङ्गीकारान्न्याय-भेदाभावेन गतार्थतापातः । अत एव प्रसिद्धावयवार्थत्वात् पूर्ववद् यौगिकत्वं साधनीयमिति, अत्रापि पूर्ववत् संशयोत्तरपूर्वपक्षाविति[2] चोक्तम् । नच न्याय-भेदाभावेऽपि अधिकाशङ्कया पुनःप्रवृत्तिः । अत एव 'विशेषस्त्वेतावान्' इति निर्मन्थ्यनये 'वाक्यभेदस्त्विहाङ्गाङ्गित्वपक्षेऽपि नास्तीति तदेव युक्तमिति विशेषाशङ्का' इत्युत्थानाधिकरणे चोक्तमिति वाच्यम् । इहापि भगवद्वाक्य-त्वादेर्विशेषाशङ्काया दर्शितत्वात् ।

न द्वितीयः । आकाशादिशब्दविषयस्या[3]धिकरणत्रयस्य प्राणशब्दविषय-स्याधिकरणद्वयस्य च दर्शनात् । औदुम्बराधिकरणविषयस्यैव विधिविभक्ति-रहितवाक्यगतार्थवादस्यैव पर्णमय्यधिकरणेऽपि विषयतया भेदादर्शनाच्च । 'औदुम्बरो यूपो भवति' (तै.सं. २.१.१) इति वाक्यमेकत्र विषयः, 'यस्य पर्णमयी जुहूर्भवति' (तै.सं. ३.५.७) इति चान्यत्र विषय इति विषयवाक्य-भेदोऽस्तीति चेत् । किं तावता? वाक्यव्यक्तिभेदमात्रेण विषयभेदायोगात् । 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ' (भ.गी. ५.२) इति वाक्यं विद्यानये, 'कर्मणैव हि संसिद्धिम्' (भ.गी. ३.२०) इति वाक्यमिह नये विषय इति वक्तुं शक्यत्वाच्च । नचार्थवादत्वेन प्रामाण्यमेकत्र फलं, क्रत्वर्थत्वं पर्णमयस्येतरत्र फलमिति फलभेदोऽस्तीति वाच्यम् । प्रमाणाध्यायोक्तानां समस्तानामप्यधि-करणानां प्रामाण्यसिद्धिफलकत्वेन प्रामाण्यभेदाभावेऽपि[4] अधिकरणभेदस्यौ-दुम्बराधिकरणादौ चौदुम्बरत्वक्रत्वर्थत्वसिद्धिर्वाक्यप्रामाण्यसिद्धिश्चेत्याद्यनेक-फलत्वेऽप्यधिकरणैक्यस्य च दर्शनेन फलभेदस्याप्रयोजकत्वात् । इहापि ज्ञानस्य मोक्षसाधनत्वं मोक्षस्य कर्मसाध्यत्वाभावश्चानयोः फलमिति वक्तुं शक्यत्वाच्च ।

१. म. कालविधानाङ्गीकारात् । २. म. संशयोत्तरपूर्वपक्ष इति ।
३. म. आकाशशब्दविषयस्य । ४. म. फलभेदाभावेऽपि ।

एतेनैव साधनांशविचारः पूर्वत्र, साध्यांशविचार उत्तरत्र । ततोऽर्थवादत्वस्य व्यवस्थाप्यस्यैक्येऽपि न पुनरुक्तिरंशभेदादिति वैषम्यं निरस्तम् । इहापि ज्ञानमोक्षयोः कार्यकारणभावाख्यस्य व्यवस्थाप्यस्यैक्येऽप्युक्तरीत्यांऽशं-भेदसम्भवात् ।

एतेन फलविचारत्वाच्चतुर्थे सङ्गतमिदमिति निरस्तम् । तावताऽपीह निरूपणप्रतिक्षेपायोगात् । अत्र सङ्गतिर्न दृश्यत इति चेन्न । 'यत्साधनं भगवदुपास्तिः' इत्यादिना टीकायामेवोक्तत्वात् । नच पारम्पर्येण सर्वत्र सङ्गतिसौलभ्यादसङ्गतिवार्तोच्छेद इति चेत्, साक्षात्सङ्गतिगवेषणेऽपि कुतो न सङ्गतिवार्तोच्छेदः । सर्वत्र साक्षात्सङ्गत्यभावात् । प्रामाण्ये सिद्धे सङ्गत्यभाव-स्याकिञ्चित्करत्वान्नानिष्टमिति चेत् । प्रामाण्याभावे सिद्धे सङ्गतेरकिञ्चित्कर-त्वान्नानिष्टमिति समम् । कर्मक्षयादेरिह निरूपणं प्रसज्येतेति चेदारोपे सति निमित्तानुसरणं, नतु निमित्तमस्तीत्यारोप इति हि न्यायः । नहि सङ्गतिसद्भावमात्रं निरूपणसामग्री । येन सत्यां सामग्र्यां निरूपणाख्यं कार्यं स्यात् । किन्तु विवक्षादिकम् ।

ननु विवक्षाभावः कुतोऽवगत इति चेत्, निरूपणाभावादेवेति ब्रूमः । तथाऽ-न्यत्रापि[1] सङ्गतस्य ज्ञानसाध्यत्वस्येह निरूपणे सूत्रकृतः कोऽभिप्राय इति चेत्, किमनया व्यर्थचिन्तया । न वयमगाधाभिसन्धेराशयमुत्प्रेक्षितुं प्रभवामः । तथाऽपीह निरूपणे प्रयोजनेन भवितव्यमिति चेत्, कथं न भवितव्यम् । सूत्रप्रामाण्यस्य साधितत्वात् । वयं तु न प्रतिवक्तुं शक्नुमः । नचैतावता प्रयोजनमसिद्धं भवति । विज्ञास्यते च मोक्षस्य कर्मसाध्यत्वाभावज्ञानं ज्ञानस्य मोक्षसाधनत्वज्ञानं चोपासनाया इतिकर्तव्यतान्तरं प्रदानादिवदेवेति ज्ञापनं प्रयोजनम् । अन्यत्र निरूपणे त्वितिकर्तव्यताप्रकरणेऽनिरूपणादेतन्न ज्ञायेत ।

१. म.तथाऽपि ।

पेटिकासङ्गतिः

एतेन, विद्यानये ज्ञानस्य मोक्षसाधनत्वज्ञानाख्यमुपासनेतिकर्तव्यतामभिधाय मोक्षस्य कर्मसाध्यत्वाभावाभावज्ञानाख्यमितिकर्तव्यतान्तरमस्मिन्नये प्रतिपाद्यत इति पेटिकासङ्गतिरप्यूह्या। यथोक्तम्- 'सर्वमेतत् प्रविज्ञाय निदिध्यासनमारभेत्' इति।

अत्राधिकरणे श्रुतेः स्मृत्या बाधनिरासो न विषयः

एतेन 'श्रुत्यादिबलीयस्त्वाच्च न बाधः' (ब्र.सू. ३.३.५०) इति सूत्रानुसारात् 'नान्यः पन्थाः' (श्वे.उ. ३.८) इति श्रुतेः 'कर्मणैव' (भ.गी. ३.२०) इति स्मृत्या बाधोऽस्ति न वेत्याद्येव चिन्तनं युक्तमिति निरस्तम्। पादसङ्गतिप्रसङ्गात्। अत एव पूर्वतन्त्रे 'द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात्' इति सूत्रानुसारात् 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' (तै.सं. ३.५.७) इत्ययं सर्वोऽप्यर्थवादः उत पापश्लोकश्रवणाभावरूपविधिरित्येव चिन्तयितव्येऽप्यध्यायादिसङ्गत्यर्थं किं पर्णमयीत्वं क्रत्वर्थमुत पुरुषार्थमुतोभयार्थमित्येव चिन्तितम्। चतुर्थे प्रयुक्ति[1]लक्षणे एवमुक्तेषु वक्ष्यमाणेषु च द्रष्टव्यम्। 'भाक्तं वा' (ब्र.सू. ३.१.७) इत्यादौ कर्मणा मोक्षप्रतिषेधो गत्यादिनिरूपणप्रसङ्गप्राप्तोऽयं स्वतन्त्रविचार इति न गतार्थता।

सूत्रार्थः

सूत्रार्थस्तु - **श्रुति**लिङ्गोपपत्तीनां स्मृत्यपेक्षया **बलीयस्त्वान्न** स्मृत्या **बाधः**। अवधारणस्यायोगव्यवच्छेदार्थकत्वोपपत्तेर्न स्मृतेर्निरवकाशत्वमिति चार्थ इति।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- अधिकरणप्रतिपाद्यमाह- **ज्ञानस्य मोक्षसाधनत्वेति**॥

---
१. म. प्रयुक्त

'प्रकृतो मोक्ष एव विषयः' इत्युत्तरग्रन्थानुसाराद् यद्यपि मोक्षस्य ज्ञानसाध्यत्वेति वक्तव्यम्। तथाच विषयभेदात् पुनरुक्तिश्च परिहृता भवति। तथाऽप्येतत्पादप्रतिपाद्योपास्त्या ज्ञानस्य सन्निकर्षान्मोक्षस्य च विप्रकर्षान्मोक्षविचारस्यापि ज्ञाने पर्यवसानावश्यम्भावाच्च पर्यवसितोक्तिरियमिति ध्येयम्। 'दर्शनाच्च' (ब्र.सू. ३.३.६८) इति सूत्रे विशेष्यत्वेनाध्याहृतो मोक्षः प्रकृत इति तस्यैव विषयत्वं युक्तमिति चेतसि कृत्वा विषयं दर्शयति- **प्रकृतो मोक्ष एवेति**॥

टीकायां पूर्वपक्षीयभ्रमन्यायस्य व्याख्यानम्

भ्रमन्यायं विषयप्रदर्शनेन विवृण्वत् **'नच विद्यावचनस्य प्राधान्यं[1] भ्रमः'** (न्या.वि.) इति वाक्यमवतारयितुं पीठिकामारचयति- **कर्मसाध्य एवेति**॥ वाक्यमवतारयति- **नच वाच्यमिति**॥ शङ्कापरिहारकत्वेन वाक्यं योजयति- **स्मृतेरपि सावधारणत्वादिति**॥ एतेन 'नान्यः पन्थाः' (श्वे.उ. ३.८) इति विद्यावचनस्य प्राधान्यं प्राबल्यं भ्रमः भ्रमविषयः, असदिति यावत्, 'कर्मणैव हि संसिद्धिम्' (भ.गी. ३.२०) इत्यादिस्मृतेरपि सावधारणत्वात्- इति विवरणयोजना सूचिता भवति।

ननु श्रुतिस्मृत्योः समबलत्वमेव प्राप्तम्। तथाच 'श्रुत्यादिबलीयस्त्वाच्च न बाधः' (ब्र.सू. ३.३.५०) इति सूत्रे बाधप्रतिषेधानुपपत्तिः। समबलयोर्बाध्यबाधकभावादर्शनादित्यतः सिद्धान्तभाष्यसूचितं प्राबल्यमाह- **भगवद्वाक्यत्वेनेति**॥

सिद्धान्तीयप्रीतिन्यायस्य व्याख्यानम्

प्रीतिन्यायं स्वविषय्युपलक्षणमिति भावेन प्रीतिवचनोपन्यासेन विवृण्वत् **' "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः"** (भ.गी. ७.१७) **इति भगवतस्तस्मिन्नेवाभ्यधिकप्रीतिवचनात्[2]। "यमेवैष वृणुते तेन लभ्यः"**

---
१. हृ. विद्यावचनप्राधान्यम् २. म. तस्मिन्नेवाधिकप्रीतिवचनात्।

(कठ.उ. २.२२) **इति तत्प्रीतेरेव मोक्षवचनाच्च'** (न्या.वि.) इति वाक्यं भाष्येण सह सूचनया व्याचष्टे- **तथा कर्मणेति** ॥ इतिशब्दः प्रभृतिवचनः । तेन 'प्रियो हि' (भ.गी. ७.१७) इत्यादिविवरणोदाहृतवाक्यं गृह्णन्ति[१] ।

ननु बलवत्त्वमाधिक्ये सति भवति । आधिक्यं च साम्ये सत्येव । नहि साम्याभावेऽप्याधिक्यं युक्तमित्यतो **'युक्तिमद्भगवद्वचनम्'** इति भाष्यं व्याचष्टे- **भगवद्वाक्यत्वेनेति** ॥ अनेन ज्ञानं कर्म वा न साक्षान्मोक्षसाधनं जडत्वात् । किन्तु प्रसाद एव । तथाच मोक्षजनकीभूतप्रसादः यस्य द्वारं तदेव मोक्षसाधनमिति निर्णयः । तथाच प्रसादो ज्ञानस्यैव द्वारं न कर्मण इति मोक्षस्य ज्ञानसाध्यत्वमेव । नचैतत्कल्पनं निर्मूलम् । 'प्रियो हि' (भ.गी. ७.१७), 'यमेवैषः' (कठ.उ. २.२२) इति प्रमाणसद्भावादिति विवरणार्थः सूचितो[२] भवति ।

श्रुत्यादिसूत्रस्य न पूर्वाधिकरणशेषत्वम्

अत्र श्रुत्यादीत्यस्य सूत्रस्य पूर्वाधिकरणशेषतामभ्युपेत्य त्रिसूत्रीमेकमधिकरणं केचिद् व्याचक्षते । युक्तं चैतत् । भाष्येऽधिकरणभेदज्ञापकाभावात् । सूत्रे चशब्दाच्च । अन्यथा तदनुपपत्तेरिति चेत्, अत्रोच्यते । भाष्येऽधिकरणभेदज्ञापकाभावेऽपि न्यायमालायां तद्विवरणे सम्बन्धदीपिकायां च तद्दर्शनात् । तर्हि सूत्रे चशब्दानुपपत्तिरित्यतद्व्यावर्त्याशङ्कां दर्शयति- **नन्वेवं चेदिति** ॥ स्मृतेर्निरवकाशत्वेन निरवकाशत्वकृतप्राबल्यमधिकमेवेति श्रुतिलिङ्गादीनां तया बाध एवेति शङ्कापरिहाराय चशब्दोऽन्यथासिद्ध इति भावेन व्याचष्टे- **चशब्दसूचितेति** ॥ अनेन स्मृतेर्निरवकाशकर्मायोगव्यवच्छेदार्थकत्वोपपत्तिरिति भावः । 'ज्ञातव्यम्' इत्यतः परं मोक्षस्य ज्ञानसाध्यत्वमेव न कर्मसाध्यत्वमित्यध्याहार्यम् । तेन न विषयटीकाविरोधः । पर्यवसितमर्थमुपसंहरति- **अतो ज्ञानस्यैवेति** ।

॥ इति अबाधाधिकरणम् (श्रुत्यधिकरणम्.पा) ॥ अ. ३० ॥

१. म. गृह्णाति । २. म. सूत्रितः ।

॥ अथ अनुबन्धाद्यधिकरणम् ॥ अ. ३१ ॥

सूत्रभाष्यम्

॥ ॐ अनुबन्धादिभ्यः ॐ ॥ ३-३-५१ ॥

न केवलं श्रवणादिभिर्गुरुप्रसादेन च ब्रह्मदर्शनम् । किन्तु भक्त्यादिभिश्च ।

'सर्वलक्षणसम्पन्नः सर्वज्ञो विष्णुतत्परः ।
यद् गुरुः सुप्रसन्नः सन् दद्यात् तन्नान्यथा भवेत् ॥
तथाऽप्यनादिसंसिद्धभक्त्यादि[१]गुणपूगतः ।
लभेद् गुरुप्रसादं च तस्मादेव च तद् भवेत् ॥' (स्मृतिः) इति ।

'भक्तिर्विष्णौ गुरौ चैव गुरोर्नित्यप्रसन्नताम् ।
दद्याच्छमदमादींश्च[२] तेन चैते गुणाः पुनः ।
तैस्सर्वैर्दर्शनं विष्णोः श्रवणादिकृतं भवेत् ॥'
इति च नारायणतन्त्रे ॥ ५१ ॥

॥ इत्यनुबन्धाद्यधिकरणम् ॥ ३१ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासनस्य भक्तिपूर्वकत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथोक्तवैयर्थ्यप्रसङ्गात् समर्थनीयम् । प्रकृतं ज्ञानमेव विषयः ।

१. ह. अनादिसंसिद्धो भक्त्यादि
२. ह. शमदमादिं च

किं भगवद्भक्त्यादिसापेक्षं न वेति सन्देहः । ज्ञानसाधनेष्वनुक्तिरुभयथा सम्भवतीति सन्देहबीजम् ।

पूर्वपक्षः

न भक्त्यादिकं ज्ञानार्थमपेक्षितमिति पूर्वः पक्षः । गुरुप्रसादासाध्यस्यैवाभावात् ।

'सम्यग्लक्षणसम्पन्नो यद्द्यात् सुप्रसन्नधीः ।
शिष्याय सत्यं भवति तत्सर्वं नात्र संशयः ॥'

इति वचनात् ।

नचैवमुपासनाभावः । ज्ञानस्य तदन्वयव्यतिरेकदर्शनात् । नचोपासनं भक्तिमन्तरेण न भवतीति वाच्यम् । द्वेषेणापि ध्यानसम्भवात् । स्मर्यते खलु द्वेषेण ध्यायतामपि मुक्तिः 'द्वेषाच्चैद्यादयो नृपाः' (भाग.७.१.३)इत्यादि। मुक्तिश्च न ज्ञानं विनेत्युक्तम् । अतो गुरुप्रसादसहितोपासनेन यथाकथञ्चिज्ज्ञानोपपत्तेर्व्यर्थं भक्त्यादीत्यतीतपादानुपपत्तिरिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **अनुबन्धेति** ॥ न केवलं श्रवणादिना प्रबलेनापि **गुरुप्रसादेन** भगवद्दर्शनं, किन्तु हरिगुरुभक्तिशमदमादिभिश्च । प्राबल्येऽपि गुरुप्रसादस्य भक्त्यादिकं विनाऽसिद्धेः । तद्विना ध्यानासिद्धेश्च । द्वेषयुतध्यानस्यानर्थहेतुत्वेन श्रुतिस्मृत्यादिसिद्धत्वात् । वचनान्तराणां स्वभावभक्तविषयत्वादिति भावः । 'अनुबन्धस्तु भक्तिः स्याद् बन्धः स्नेह उदाहृतः' (अभिधानम्) इत्यभिधानम् । अत्रार्थे नियामिकां स्मृतिमाह- **सर्वेति** ॥ तथाऽपि भक्त्याद्यपेक्षितमिति शेषः । तर्हि भक्त्यादिकं न ज्ञानार्थमित्यत आह- **तस्मादिति** ॥ यदनादिसिद्धमव्यक्तं भक्त्यादि तेन

गुरुप्रसादस्तेन भक्त्याद्यभिव्यक्तिरभिव्यक्तभक्त्यादिना च ज्ञानमित्यर्थः । एतदेव स्पष्टयति- भक्तिरिति ॥ अतो भक्त्यादेर्ज्ञानार्थमपेक्षितत्वादुक्तं युक्तमिति सिद्धम् ॥५१॥

॥ इत्यनुबन्धाद्यधिकरणम् ॥ ३१ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अनुबन्धादिभ्यः ॐ ॥ ३-३-५१ ॥

पेटिकासङ्गतिः

अत्र न केवलं गुरुप्रदानमात्र[१]मुपासनेतिकर्तव्यता, किन्तु यमनियमप्राणायामासनादीन्यपि ।

'अष्टाङ्गं हि परं योगं ब्रुवते योगवित्तमाः ।
यमश्च नियमश्चैव तृतीयं त्वासनं मतम् ।
प्राणायामस्तथा तत्र प्रत्याहारश्च पञ्चमः ।
धारणा च तथा ध्यानं समाधिश्चेति सङ्ग्रहः ॥'

इत्यादिगारुडवचनात् ।

तत्रापि

'आनृशंस्यमनालस्यं वैराग्यं चाऽर्जवं परम् ।
अचापलं धृतिः सत्यं ज्ञानं चेति यमं विदुः ॥'

इत्यत्राऽर्जवशब्दोदितं हरिगुरुभक्तिशमदमाद्यपि तावदावश्यकमिति प्रतिपाद्यत इति इतिकर्तव्यतापेटिकासङ्गतिः ।

अस्याधिकरणस्य श्रुत्यधिकरणानन्तर्यसमर्थनम्

यद्यपि प्रदाननयाव्यवधानं युक्तम् । तथाऽपि न केवलं मोक्षस्य कर्मासाध्यत्व-

---

१. म. गुरुप्रसादमात्रम्

ज्ञानाद्येवेतिकर्तव्यता, किन्तु यमाद्यपि इति प्रतिपादनेन, यदि श्रुतिलिङ्गोपपत्तीनां प्राबल्यान्न प्रमाणान्तरबाधस्तर्हि,

'सर्वलक्षणसम्पन्नः सर्वज्ञो विष्णुतत्परः ।
यद्गुरुः सुप्रसन्नः सन् दद्यात् तन्नान्यथा भवेत् ॥'

(भाष्योदाहृतनारायणतन्त्रम्)

इत्यादिश्रुतीनामनुज्ञाप्रार्थनादिलिङ्गानामुपपत्तीनां गुरुप्रसादविषयाणां[1] प्रमाणान्तरेण यमवाक्ये बाधायोगेन यमादीनामितिकर्तव्यतात्वं न स्यादिति शङ्कनेन वेहापि तन्निरूपणम् ।

यद्वा, हरिगुरुभक्त्यादिसाधनत्वेनात्र साक्षादेव सङ्गतिः । वैराग्यपादे भक्त्युपासनानां भक्तिपादे च वैराग्यादित्रयाणामेवमुपासनापादे तथा ज्ञानपादे च सर्वेषां साधनानां तथा साधनाध्यायेऽध्यायान्तरार्थानां च प्रतिपाद्यताङ्गीकारात् । अध्यायादिव्यवस्था तु बहुलं योऽर्थो यत्र प्रतिपाद्यते स तदध्याय इति व्यवह्रियत इत्यङ्गीकारेणोपपन्ना । तथाचायमध्यायादिर्बहुलं साधनमुपासनादि च प्रतिपादयन्नपि तदनुबद्धतयाऽन्यदपि प्रतिपादयन्न दुष्यतीति युक्तमुत्पश्यामः । यथोक्तम्- 'प्रत्येकं चतुरात्मकाः । पादाः सर्वे तदंशाश्च' इति । अत एव वैराग्यपादे भाक्तनयादेर्भक्तिपादे फलनयादेर्ज्ञानपादे योग्यतानयादेः कर्मक्षयपादे चाऽवृत्तिनयादेश्च निवेशो न विरुद्धः । सर्वस्य प्रमेयस्य सर्वत्रापि वक्तुं शक्यत्वे सूत्रकारीयानुपूर्वीविशेषो नाऽदरणीयः स्यादिति चेन्न । सङ्गतिविशेषस्याप्यूहनीयत्वात् । अत एव प्रत्यधिकरणमनन्तरातीताधिकरणसङ्गतिगवेषणप्रयासोऽपि न व्यर्थः ।

विषयः चिन्ताक्रमश्च

अत्र पादार्थत्वेन प्रकृतमुपासनं विषयः यमनियमप्राणायामादीतिकर्तव्यता-

१. प. अत्र 'स्मृतीनाम्' इति अधिकं दृश्यते ।

मपेक्षते न वा । तदर्थं ज्ञानं भक्त्यादिशून्यात् केवलादेवोपासनाज्जायत उत तत्सापेक्षात् । तदर्थं भक्त्यादीनामितिकर्तव्यतात्वावेदकं स्पष्टं प्रमाणं नास्त्युतास्तीति चिन्तनीयम् । 'ब्रह्मज्ञानसाधनोपासनस्य भक्तिपूर्वकत्वसमर्थनात्' इति प्रकृतं ज्ञानमेव विषयः इति च टीकायां विचित्रोक्तिस्तु उपासनं ज्ञानं वा यत्किञ्चिद् विषयीकृत्य चिन्तनेऽपि यमादीनामुपासनेतिकर्तव्यतात्वसिद्धिरविकला । तत्रास्माकं किन्निबन्धनो विषयनियम इति सूचयति ।

यद्यप्यत्र पूर्वस्मिन् श्रुत्यादिनये प्रकृतो मोक्षः ज्ञानद्वारा भक्तिपूर्वकोपासनसाध्यो न वेत्याद्येवावैरूप्याय चिन्तनं युक्तम् । तथाऽपि विद्यानयमारभ्य 'एक आत्मनः शरीरे भावात्' इत्यन्तं ज्ञानपेटिकेति पूर्वमेवोक्तम् । तदन्तर्भावसिद्ध्यै चिन्तान्तरमुपदर्शितमित्यदोषः । अत एव प्रदाननयाव्यवधानमपि न दोषः । 'अम्बुवदग्रहणात्' इत्युक्तेरपि भक्तेः प्रधानसाधनज्ञापनार्थं साधनान्तरोपसङ्ग्रहार्थश्च[1] पुनरारम्भः । यद्वा, तत्र मोक्षोपायत्वमत्र दर्शनसाधनोपासनेतिकर्तव्यतात्वमुच्यत इति भेदः ।

पूर्वपक्षः

गुरुप्रसादो बलवान् तस्मान्नान्यदपेक्षितम् ।
यमादि तेन तच्छून्याऽप्युपास्तिर्ज्ञानसाधनम् ॥

यदि ज्ञानोत्पत्तावुपासनमन्यदपेक्षते तर्हि प्रदाननयोक्तानां वचनादीनां बाधः स्यात् । तत्र गुरुप्रसादपूर्वकप्रदानस्यैवेतिकर्तव्यतात्वोक्तेः । नच यमवाक्यविरोधः । भक्त्यादेर्गुरुप्रसादाङ्गत्वोपपत्तेः । उपास्तिं प्रत्यङ्गत्वे प्रमाणाभावाच्चेति पूर्वः पक्षः ।

१. म. साधनान्तरोपन्यासार्थश्च ।

सिद्धान्तः

तथाऽप्यनादिसंसिद्धेत्यादिभाष्योक्तमानतः ।
यमाद्यपेक्षयोपास्तिर्ज्ञानसाधनमिष्यते ।। इति सिद्धान्तः ।

न केवलं गुरुप्रसादेन ब्रह्मदर्शनं भवति, अनुबन्धादिभ्यश्चेति भाष्य एवाध्याहारेण सूत्रयोजना स्फुटैव । आदिशब्दार्थो-

'भक्त्या ज्ञानान्निषिद्धानां त्यागान्नित्यं हरिस्मृतेः ।
अरागाद् विहितात्यागादित्येतैरेव संयुतैः ।
अपरोक्षदर्शनं विष्णोर्जायते नान्यथा क्वचित् ।।'

इति सत्तत्त्वेऽवगन्तव्यः ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **भक्तिपूर्वकत्वेति** ।। हरिगुरुभक्तिशमदमादियमशब्दाभिधेयानां मध्ये भक्तेरावश्यकत्वज्ञापनाय तन्मात्रोक्तिरुपलक्षणत्वेन च । तेन भक्त्यादिकं ज्ञानार्थमित्युत्तरटीकया न विरोधः । 'तथाऽप्यनादिसंसिद्धः' इत्याद्यग्रिमभाष्यसूचितहेतुमाह- **गुरुप्रसादसाध्यस्येति** ।।

पूर्वपक्षीयविशेषदर्शितान्यायस्य व्याख्यानम्

'विशेषदर्शिता' इत्युक्तन्यायं सम्बन्धिप्रदर्शनेन विवृण्वत् - 'नच कस्यचिद् **द्वेषाज्ज्ञानोपपत्तेः**[१] **भक्त्यादिकं विना मुक्तिः'** (न्या.वि.) इति वाक्यं व्याचष्टे- **नचेति** ।। उपासनं ध्यानं भक्तिं विना यथा तथा ज्ञानं विना मुक्तिः किं न स्यादित्यत आह- **मुक्तिश्चेति** ।। विद्यानय इति शेषः ।

सिद्धान्तीयागमन्यायस्य व्याख्यानम्

आगमन्यायं तदाकारप्रदर्शनेन विवृण्वत् ' "**भक्त्यैवैनं जानाति भक्त्यैवैनं**

१. म. ज्ञानोत्पत्तेः ।

पश्यति भक्त्यैव बन्धाद् विमुच्यते भक्त्यैवाऽनन्दीभवति", "**यमेवैष वृणुते तेन लभ्यः**[१]" (कठ.उ. २.२२) "**भिनत्ति कर्मसङ्घातं प्रसन्नो भगवान् हरिः इत्यागमात्**[२]" ' इति वाक्यं तदुदाहृतश्रुत्याद्यर्थसूचनपूर्वकं तात्पर्यतो व्याचष्टे- **प्राबल्येऽपि गुरुप्रसादस्येत्यादिना श्रुतिस्मृतिसिद्धत्वादित्यन्तेन** ।।

।। इत्यनुबन्धाद्यधिकरणम् ।। ३१ ।।

१. एतदनन्तरं 'तस्यैष आत्मा विवृणुते तनुं स्वाम्' इत्यधिकं ह.पाठे दृश्यते ।
२. 'इत्याद्यागमात्' इति ह.पाठे ।

॥ अथ दर्शनभेदाधिकरणम् (प्रज्ञान्तराधिकरणम्) ॥ अ. ३२ ॥

सूत्रभाष्यम्

॥ ॐ प्रज्ञान्तरपृथक्त्ववद् दृष्टिश्च तदुक्तम् ॐ ॥

॥ ३-३-५२ ॥

उपासनाभेदवद् दर्शनभेदः। तच्चोक्तं कमठश्रुतौ - 'अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टय इति देवा वाव सर्वदृष्टयस्तेषु चोत्तरोत्तरमाब्रह्मणोऽन्येषु यथायोगं[१] यथा ह्याचार्या आचक्षते' इति। अध्यात्मे च-

'दृष्ट्यैव ह्यवताराणां मुच्यन्ते केचिदञ्जसा।
दर्शनेनाऽन्तरेणान्ये देवास्सर्वत्र दर्शनात्।
तेषां विशेषमाचार्यो वेत्ति सर्वज्ञतां गतः ॥'

(अध्यात्मवचनम्) इति ॥ ५२ ॥

॥ इति दर्शनभेदाधिकरणम् (प्रज्ञान्तराधिकरणम्) ॥ अ. ३२ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र यत्साधनं भगवदुपासनमुक्तं तस्मिन् ज्ञाने विशेषसमर्थनादस्ति शास्त्रादिसङ्गतिः। अविशेषे मोक्षविशेषाभावप्रसङ्गात् समर्थनीयमेतत्। प्रकृतं भगवद्दर्शनमेव विषयः। किं सर्वेषामेकप्रकारमुतानेकप्रकारमिति सन्देहः। धर्मद्वैविध्यदर्शनं सन्देहबीजम्।

१. हृ. अन्येषु तु यथायोगम्।

पूर्वपक्षः

एकप्रकारमेवेति पूर्वः पक्षः। 'दृष्ट्वैव तं मुच्यते नापरेण' इति सर्वेषामविशेषितज्ञानेन मोक्षश्रवणात्। तथा

'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥' (भ.गी. १८.५५)

इति सर्वेषां भक्त्यादिना पूर्णज्ञानोत्पत्तेः सम्पूर्णज्ञानेनैव मोक्षस्मरणात्। सामान्यवचनत्वादेव सर्वविषयत्वं ज्ञायते। अतः सर्वेषां दर्शनसाम्यादुक्तं मुक्ततारतम्यमयुक्तमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **प्रज्ञेति** ॥ अनेकप्रकारमेवाधिकारिणां भगवद्दर्शनम्। तत्साधनोपासनस्याऽनेकप्रकारत्वात्, फलस्य च साधनानुसारित्वादिति भावः। प्रज्ञान्तरं प्रज्ञाविशेषः। अविच्छिन्नपरोक्षज्ञानसन्ततिर्हि ध्यानम्। नन्वनेकविधसाधनवतामपि कदाचित् कर्षकाणामिव साध्यसाम्यं किं न स्यादित्यत आह- **तच्चेति** ॥ **सर्वदृष्टयो** व्याप्तिदर्शिनः। **अन्येष्ववतारादिदर्शिषु**। योग्यतैव कथं ज्ञायते। यथा ह्याचार्या आचक्षते। यद्यस्ति दर्शनभेदस्तर्हि न सर्वेषां मोक्षः स्यात्, सम्पूर्णज्ञानेनैव मोक्षस्य श्रुत्यादिसिद्धत्वादित्यत आह- **अध्यात्मे चेति** ॥ एवं विशेषबलाच्छ्रुतिर्यथायोग्यं दृष्ट्वेत्युपपन्ना। 'यावान् यश्चास्मि' (भ.गी. १८.५५) इति हिरण्यगर्भविषयतयोपपन्नम्। सामान्यतः सर्वज्ञानमिति सर्वविषयं वा। अतो ज्ञाने विशेषसद्भावाद् युक्तं मोक्षतारतम्यमिति सिद्धम् ॥ ५२ ॥

॥ इति दर्शनभेदाधिकरणम् ॥३२ ॥

शेषतात्पर्यचन्द्रिका

।। ॐ प्रज्ञान्तरपृथक्त्ववद् दृष्टिश्च तदुक्तम् ॐ ।। ३-३-५२ ।।

सङ्गतिः

न केवलमुपासनया दर्शने जनयितव्ये गुरुप्रसादो भक्तिश्चेतिकर्तव्यता; किन्तु स्वस्वयोग्योपासनं स्वस्वयोग्यदर्शनमेव जनयति, नत्वेकरूपमिति निश्चयोऽपीति प्रतिपादनात् पेटिकासङ्गतिः।

अस्त्वेवं गुरुप्रसादवद्धरिगुरुभक्तिशमदमादेरपि श्रवणादिना दर्शने जनयितव्ये सहकारित्वं, तदेव दर्शनं स्वसाधनोपासनहरिगुरुभक्त्यादिवदधिकारिभेदेन भिद्यत उत न भिद्यत इति चिन्त्यत इत्यनन्तरसङ्गतिश्चोह्या। यद्यपि भक्तितारतम्यववद् दर्शनतारतम्ये उपास्तितारतम्यमपि प्रतिपत्तव्यमिति प्रतिपादनसौकर्याद् वृद्धिह्रासनयानन्तर्यमम्बुनयानन्तर्यं वाऽस्य युक्तम्। तथाऽपि ज्ञानसमकक्ष्याया एव भक्तेस्तत्र प्रस्तुतत्वेन तस्याश्च ज्ञानसाध्यत्वाभावेन साधनफलयोरैकरूप्ययुक्तेस्तत्रावसरदर्शने[१] तारतम्यसाधनमशक्यमेव। अनुबन्धनये दर्शनसाधनोपासनेतिकर्तव्यताभूतभक्तेः प्रस्तुतत्वे तु भक्तित्वादेव तारतम्ये सिद्धे साधनफलयोरैकरूप्ययुक्त्या दर्शनतारतम्यसाधनमत्र युक्तम्।

एतेन 'तन्निर्धारणार्थनियमः' (ब्र.सू. ३-३-४३) इति समस्तोपास्तिनये फलत्वेन प्रस्तुते दर्शने तारतम्यचिन्तनात् तदनन्तरमेव युक्तमिति निरस्तम्। एवं हि दर्शनतारतम्ये उपास्तितारतम्यमेव प्रयोजकं विज्ञायेत। तदितिकर्तव्यताभूतभक्तितारतम्यमपि प्रयोजकमिति विज्ञानं यथा स्यादित्येवमर्थत्वात्। अत एव सूत्रे लाघवाय 'उपास्तिपृथक्त्ववत्' इति वक्तव्येऽनुबन्धनयानन्तर-

१. 'तत्रावसराभावाद्' इति पाठः सम्भाव्यते।

सङ्गतिसूचनाय 'प्रज्ञान्तर' इत्युक्तम्। भक्तेरपि ज्ञानविशेषत्वात् तच्छब्देन ग्रहणसम्भवात्।

पूर्वपक्षः

तत्र दर्शनं न भिद्यत इति पूर्वः पक्षः। 'दृष्ट्वैव तं मुच्यते नापरेण' इति सर्वेषामविशेषितदर्शनेन मुक्तिश्रवणात्। 'भक्त्या मामभिजानाति' (भ.गी. १८.५५) इत्यादिना भक्त्या पूर्णज्ञानेनैवाविशेषमुक्तिश्रवणाच्च[१]।

नचाऽनन्दतारतम्योक्तिविरोधः। तस्यैवेहाऽक्षेपात्। दर्शनावैरूप्येऽपि निदिध्यासनवैरूप्येणाऽनन्दवैरूप्योपपत्तेश्च। दर्शनस्य मनोवृत्तिरूपत्वेन मनोवृत्तीनां च नानारूपत्वेन[२] कथमैकरूप्यमिति चेत्। वस्तुनः एकरूपत्वात्। [३]नच दर्शनेनाप्येकरूपेण भवितव्यम्। नहि सम्भवति घट एकरूपे मृदात्मक एव तज्ज्ञानं तु जलात्मकत्वाद्यनेकरूपावगाहीति। तथा सति भ्रमत्वप्रसङ्गात्।

व्याप्तः प्रादेशरूपो वा हरिरित्युररीकृतेः।
तज्ज्ञानमैकरूप्येण भवेत् तद्भ्रान्तिरन्यथा।। इति।

सिद्धान्तः

उपासनाभेदवत्त्वाद् भक्तिभेदवदेव वा।
दर्शनं भिद्यते युक्तेः श्रुतेश्चैतन्न चान्यथा।।

नहि भक्तितारतम्यादुपास्तितारतम्याच्च जायमानं दर्शनमेकरूपं भवितुमर्हति। साध्यसाधनयोरैकविध्यस्य प्रायिकत्वात्। मुक्तौ प्रधानं साधनं दर्शनमेव। तच्चेदेकरूपं मुक्तौ सुखतारतम्यं कथमसम्भवि च न स्यात्। तस्य च पूर्वं साधितत्वात्, साधयिष्यमाणत्वाच्च। नच निदिध्यासनवैरूप्येण तदुपपत्तिः।

१. म. ज्ञानेनैवाविशेषेण २. प. नानात्वेन।
३. 'तथा च दर्शनेन' इति पाठः सम्भाव्यते।

साक्षात्साधनावैरूप्ये तदनुपगत्तेः । तथाचोपास्तिसाधनयोग्यतानानात्वेन तदधीनोपास्तौ नानात्ववदुपास्त्यधीने दर्शने नानात्वमवर्जनीयम्।

एतेन दर्शनविषयो हरिरेकरूप एवेति कथं नानात्वमिति परास्तम्। अनन्तगुणत्वेन हरेरेकविधत्वेऽप्यधिकारिभेदेन गुणचतुष्टयाद्यवगाहितयोपास्तेर्भेदवद् ब्रह्मसाक्षात्कारस्याप्यन्तरुपासकबहिरुपासकावतारोपासकव्याप्तोपासकाधिकारिभेदेन ऋषीणामन्तः, क्षत्रियवराणामश्वमेधाद्युत्तरवेद्याहवनीयादिप्रदेशविशेषे यथायोगं तत्त्वविशेषप्राप्तिदेशो[1] केषाञ्चिदिति भेदोपपत्तेः। अत एवाविशेषितवचनमपि विशेषनिष्ठं व्याख्येयम्।

सूत्रार्थः

सूत्रार्थस्तु - अन्तरशब्दो विशेषपरः । प्रज्ञाविशेषो भक्तिर्ध्यानं चेति योग्यतयाऽन्वेति[2] । ज्ञानैकदेशत्वाद् भक्तेरविच्छिन्नपरोक्षज्ञानसन्ततित्वाद् ध्यानस्य। यद्वाऽन्तरशब्दोऽन्यपर्यायः। **प्रज्ञा** ध्यानं, तदन्यच्च भजनम्। तयोः **पृथक्त्ववत्** अनेकविधत्ववत् तज्जन्याया दृष्टेः पृथक्त्वमिति[3]। यद्वा दृष्टिरिति षष्ठ्यर्थे प्रथमा। योजना तु पूर्ववदिति।

ननु ध्यानं कथं प्रज्ञाविशेषः? क्रियामानसवदिति क्रियात्वोक्तेः। मैवम्। क्रियाशब्देन धात्वर्थस्य विवक्षणेन ज्ञानमपि जानातेरर्थ इति विरोधाभावात्। 'श्रवणजज्ञानजनितमानसवासनामयस्य वस्तुनो मनसाऽवलोकनं ध्यानम्' इति सुधोक्तेश्च। 'नैरन्तर्यं मनोवृत्तेर्ध्यानमित्यभिधीयते' (सू.भा.उदाहृतनारायणतन्त्रम् १.३.८) इति स्मृतेश्च। तर्ह्यविच्छिन्नपरोक्षज्ञानसन्ततित्वोक्तिरिह टीकायां कथम्? [4]मनोरधीतवासनामयपदार्थविषयकमानसज्ञानवद् ध्यानस्या-

१. म. तद्विशेषव्याप्तिदेशे २. प. पर्यवस्यति

३. म. तज्जन्या या दृष्टिः तस्याः पृथक्त्वमिति।

४. 'मनोरथवद् वासनामयपदार्थविषयकमानसज्ञानस्य ध्यानस्या....' इति पाठ ऊह्यते।

प्यपरोक्षज्ञानसन्ततिरूपत्वस्यैव युक्तत्वादिति चेन्न। वासनाजनकज्ञानस्य परोक्षत्वेन तन्मयपदार्थदर्शनस्य परोक्षत्वव्यवहारोपपत्तेः। मनोरथस्थले तु अपरोक्षज्ञानजवासनेति तत्रोपरोक्षत्वव्यवहार इत्युक्तं युक्तम्।

टीकायां पूर्वपक्षीयालापन्यायस्य विवरणम्

टीकाक्षरार्थस्तु- आलापन्यायं तदाकारादिप्रदर्शनेन विवृण्वत् 'नच **''दृष्ट्वैव तं मुच्यते नापरेण'', ''यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा''** (भ.गी.१८.५५)**इत्यादिसामान्यालापमात्रेण दर्शनस्याविशेषः।'** (न्या.वि.) इति वाक्यमनेकप्रमाणोपन्यासावैयर्थ्याय हेतुद्वयकथनपरतया व्याचष्टे- **दृष्ट्वैवेति॥ अविशेषितज्ञानेनेति॥** क्त्वाप्रत्ययान्ते पदे विशेषणान्तराभावादिति भावः। 'यावान् यश्च' (भ.गी. १८.५५) इति गीतोदाहरणस्य प्रयोजनमाह- **तथेति॥ 'दर्शनस्याविशेषः'** (न्या.वि.) इत्येतदन्यथा व्याचष्टे- **सर्वेषां भक्त्यादिनेति॥** एतदेव प्रकारान्तरेणापि व्याचष्टे- **सम्पूर्णज्ञानेनैवेति॥** उदाहृतवचनमधिकारिविशेषनिष्ठं किं न स्यात्? तत्राऽह- **सामान्यवचनत्वादेवेति॥** व्यावर्तकविशेषणादर्शनात्[1]। कल्पने च गौरवमिति भावः। तथाच दर्शनस्य मोक्षसाधनत्वे बहिर्दर्शनं केषाञ्चिदन्तर्दर्शनं केषाञ्चिन्मोक्षसाधनमित्यादिविशेषो नास्ति। 'दृष्ट्वैव तम्' इति चाविशेषेणैव श्रवणात्। अन्यथा 'ऋषिस्तमन्तर्दृष्ट्वा मुच्यते तदन्यो बहिः' इत्याद्यश्रोष्यत। अतो 'दृष्ट्वैव' इत्यादिसामान्यालापमात्रेण दर्शनस्य विशेषाभावो न तु तत्र प्रमाणान्तरं मृग्यम्।

ननु सम्पूर्णज्ञानेन मोक्षः श्रूयते। तच्च केषाञ्चिदेव। तत्राऽह- **यावान् यश्चेति॥** यावानित्यादिसामान्यालापेन केषाञ्चित् पूर्णं दर्शनं, केषाञ्चिदपूर्णमित्यादिविशेषो दर्शने न मन्तव्यः। सर्वेषां सम्पूर्णज्ञानसद्भावेऽपि न मुक्तिः। रूपविशेषज्ञानस्यैव तत्साधनत्वादित्यत्रापीदमेवोत्तरम्। 'यावान् यश्च' (भ.गी.

१. म. व्यावर्तकविशेषादर्शनात्।

१८.५५) इत्यादिसामान्यालापेन कस्यचिद् दर्शनस्य मोक्षसाधनत्वं, कस्यचिन्नेत्ययं विशेषो नास्ति। मां तत्त्वतो ज्ञात्वा मां विशत इति सम्पूर्णज्ञानेनैव मोक्षस्य स्मरणात्। अन्यथा कश्चिदेव मां तत्त्वतो जानाति। तत्रापि कश्चिदेव मां विशतीत्यस्मार्षीदित्यर्थ इति विवरणयोजना सूचिता भवति। सौत्रदृष्टान्तबललब्धयुक्तिमाह- **तत्साधनेति**॥

सिद्धान्तीयसुस्थिरत्वन्यायस्य व्याख्यानम्

सुस्थिरत्वन्यायं विषय्युपलक्षणतया सम्बन्धिप्रदर्शनेन विवृण्वत् ' **''यथायोग्यमेवैष आत्मानं दर्शयति यथाधिकारं देवेभ्योऽतो ब्रह्मैवैनमभिपश्यत्यन्यथाऽत्मैवाऽऽत्मानमभिपश्यति सुस्थिरो ह्येष नियमः''** (न्या.वि.) इति दर्शनविशेषनियमस्य सुस्थिरत्ववचनात्। ''यावान् यश्चास्मि'' (भ.गी. १८.५५) इति ब्रह्मण एव ज्ञानोपपत्तेः। **''यावान्'' इत्यत्रापि सामान्यविशेषज्ञानोपपत्तेश्च'** (न्या.वि.) इति वाक्यं तात्पर्यतो व्याचष्टे- **एवं विशेषबलादिति**॥ **'यथायोग्यमेवैष आत्मानं दर्शयति'** (न्या.वि. उदाहृतविशेषवचनम्) इत्यादिविवरणोदाहृतस्य, 'दृष्ट्वैव ह्यवताराणां मुच्यन्ते केचिदञ्जसा' (भाष्योदाहृताध्यात्मवचनम् ३.३.५२) इति भाष्योदाहृतस्य विशेषवचनस्य बलादित्यर्थः। 'यावान्' (भ.गी. १८.५५) इत्याद्युत्तरांशं व्याचष्टे- **यावानिति**॥ अनेन, सत्यं 'दृष्ट्वैव तम्' इत्यादौ व्यावर्तकं विशेषणान्तरं नास्ति; तथाऽपि 'यथायोग्यं दृष्ट्वा मुच्यते' इति व्याख्यायते। यथा 'स्वर्गकामो यजेत' (मानवश्रौतसूत्रम् ९.३.१.११) इत्यादौ सामान्यालापेऽपि त्रैवर्णिकः स्वर्गकाम इति व्याख्यायते। तत्र यद्यध्ययने जिह्वाच्छेदः, अर्थावधारणे हृदयविदारणमिति विशेषवाक्यात् तद् युज्यते। तर्हीहापि सुतरां यथायोग्यमित्यादेर्दर्शनविशेषनियमस्य सुस्थिरत्ववचनात् सामान्यालापमात्रेण दर्शनस्याविशेषो न मन्तव्यः।

नन्वस्तु 'दृष्ट्वैव' इति व्याख्यानमध्याहारेण। 'यावान्' (भ.गी. १८.५५) इत्यादिवाक्ये तु कथम्? तत्र यावन्तो मयि गुणाः यावती वा कृतिस्तत्सर्वं ज्ञात्वा

विशत इति सम्पूर्णज्ञानस्य सर्वसाधारण्यप्रतीतेः। नचात्रापि यथायोग्यमित्याध्याहर्तुं शक्यते। साकल्यवादि[1]यावदादिपदविरोधादित्यत आह- **यावानिति**॥ चतुर्मुखस्याधिकारिषु सम्पूर्णवेदनस्य प्रमितत्वादिति शेषः।

ननु चतुर्मुखस्यापि न यावद्गुणज्ञानं सम्भवति। भगवति भगवतो मितत्वापत्तेः। योग्यतानुसारेण सम्पूर्णत्वे यावदादिपदविरोधः। सर्वसाधारण्यापत्तेश्च। मैवम्। अधिकारिवर्गे ध्येयत्वेन यावन्तो गुणाः सङ्ख्यानिर्देशाभ्यां क्लृप्तास्तावन्त एव यावच्छब्देनोच्यन्ते। नत्वधिकार्ययोग्यानन्ता अपि गुणाः। नचेदमन्यसाधारणम्। उक्तेष्वेव गुणेषु शिवादीनां यावद्ध्यानायोगात्। साधारण्येनापि व्याचष्टे-**यावानिति**॥ अत्रापि योग्यवर्गे केवलं ब्रह्मण एवेत्यपेरर्थः। सामान्यतः सर्वज्ञानस्य सर्वेषामपि सम्भवात्। पश्चम्यन्तद्वयस्य 'दृष्ट्वैव' इत्यादिवचनं विवक्षितार्थसाधकमध्याहृतेनान्वयः। स्वतन्त्रो भगवान् यथायोग्यमेव स्वात्मानं दर्शयति। नतु यावन्तम्। अयं च नियमो न केवलं मनुष्येषु, देवेभ्योऽपि यथाधिकारमेव दर्शयति। सम्पूर्णोपासकत्वाच्चतुर्मुखस्य नैवं नियम इत्याह। यस्मात् परमेश्वरो यथायोग्यमेवाऽत्मानं दर्शयति, नतु योग्यतामतिक्रम्य। अतो ब्रह्मापि भगवदीयानन्तगुणेषु यथाधिकारमेव पश्यति। नतु साकल्येन।

ननु तर्हि यावतो गुणादीनुपासकशिखामणिः पश्यति तावन्त एवाङ्गीकार्याः। न ततोऽतिरिक्ताः। कस्याप्यनुपास्यानामङ्गीकारे प्रयोजनाभावात्, प्रमाणाभावाच्च। श्रुतिरेव प्रमाणमस्तीति चेन्न। श्रुत्युक्तानां च साकल्येन चतुर्मुखोपास्यत्वनियमात्। तत्राऽह- परमात्मा स्वयमेवाऽत्मानमनन्तगुणादिमन्तं पश्यति। अतः तस्माच्चतुर्मुखोपास्यातिरिक्तगुणाद्यसत्त्वशङ्का न कार्या। ईशप्रत्यक्षस्य प्रमाणत्वाङ्गीकारात्। प्रयोजनसद्भावस्य वस्तुसिद्धावनुपयोगादिति श्रुत्यर्थ इति सूचितम्।

॥ इति प्रज्ञान्तराधिकरणम्॥ ३२॥

---

१. म. साकल्यवाचि।

॥ अथ नसामान्याधिकरणम् ॥ ३३ ॥

सूत्रभाष्यम्

॥ ॐ न सामान्यादप्युपलब्धेर्मृत्युवन्नहि लोकापत्तिः ॐ ॥
॥ ३-३-५३ ॥

न सामान्यदर्शनमात्रेण मुक्तिः । यथा मृत्युमात्रात् । नहि लोकापत्तिमात्रं मुक्तिः ।

'सामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मदर्शनात्' इति नारायणतन्त्रे[१] । 'मुच्यते नात्र सन्देहो दृष्ट्या तु स्वात्मयोग्यया' (अध्यात्मम्) इति च[२] ॥

'दर्शनेनाऽत्मयोग्येन मुक्तिर्नान्येन केनचित्' इति चाध्यात्मे ॥ ५३ ॥

॥ इति नसामान्याधिकरणम् ॥ ३३ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र यत्साधनमुपासनं तज्ज्ञानस्य बिम्बविषयस्य मोक्षसाधनत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथा न बिम्बोपासनमावश्यकमिति सिद्ध्यतीत्येतत् समर्थनीयम् । भगवद्दर्शनमेव विषयः । किं बिम्बरूपविषयं मुक्तिसाधनमुत यत्किञ्चिद्रूपविषयमिति सन्देहः । 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१.१) इत्याद्युक्तेः साधारण्यं सन्देहबीजम् ।

१. ह्. इति हि नारायणतन्त्रे २. ह्. इति

पूर्वपक्षः

यत्किञ्चिद्रूपविषयं मोक्षसाधनमिति पूर्वः पक्षः । भगवतः सर्वरूपेष्वपि साम्यात् । नहि कस्यचिद् रूपस्य मोक्षदातृत्वशक्तिः कस्यचिन्नेति विशेषोऽस्ति । तथात्वे चोक्तविरोधः स्यात् । अतो यत्किञ्चिद्रूपविषयज्ञानस्य मोक्षसाधनत्वान्न बिम्बोपासनानियतिरपेक्षिता सिद्ध्यतीति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **नेति** ॥ न भगवद्रूपाणां साम्येन सामान्यतो दर्शनेन सर्वेषां मुक्तिः । किं नाम? स्वबिम्बदर्शनादेव । यथा खलु मृत्युत्वसाम्येऽपि न मृत्युमात्रानन्तरं मुक्तिः, किन्तु मृत्युविशेषादनन्तरमेवं भगवद्रूपाणां साम्येऽपि रूपविशेषज्ञानमेव मोक्षसाधनं न सामान्यदर्शनमिति भावः । तथाच श्रुतिः- 'समोऽपि भगवान् स्वबिम्बदर्शन एवैनं मोक्षयति' (श्रुतिः) इति । यदि न सामान्यदर्शनेन मुक्तिस्तर्हि तस्य वैयर्थ्यं स्यात् । नच तद्युक्तम् । अतो यत्फलं स मोक्ष इति मुक्तये सामान्यदर्शनं भवतीत्यत आह- **नहीति** ॥ न भगवद्दर्शनस्यैवं सति वैफल्यम् । नापि तेन मोक्षः । तस्य महरादिलोकप्राप्तिसाधनत्वात् । नहि लोकप्राप्तिर्मुक्तिरिति भावः । सामान्यदर्शनेन लोकप्राप्तिरेव, न मुक्तिरिति कुत इत्यत आह- **सामान्येति** ॥ दर्शनेऽपि विकल्पाद् बिम्बदर्शनेऽपि सा स्यादित्यत आह- **मुच्यत इति** ॥ दर्शनेन लोकापत्तिः कचिन्मुक्तिश्च किं न स्यादित्यत आह- **दर्शनेनेति** ॥ अतो बिम्बदर्शनस्यैव मुक्तिहेतुत्वाद् बिम्बमेवावश्यमुपास्यमिति सिद्धम् ॥ ५३ ॥

॥ इति नसामान्याधिकरणम् ॥ ३३ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॐ ॥

॥ ३-३-५३ ॥

प्रतिपाद्यम् अनन्तरसङ्गतिश्च

न केवलं पूर्वोक्तमेवेतिकर्तव्यतोपासनस्य, अपि तु बिम्बत्वप्रकारकत्वनियतिरपि इत्यत्र प्रतिपाद्यते। अत एव 'न बिम्बोपासनमावश्यकमिति सिद्ध्यति' इत्युपक्रमे, 'न बिम्बोपासननियतिरपेक्षितेति सिद्ध्यति' इति पूर्वपक्षोपसंहारे च टीकायां फलोक्तिः। 'तस्य ज्ञानस्य बिम्बविषयस्य' इत्यादिटीका तु ज्ञानपेटिकान्तर्भावसिद्ध्यर्थमवान्तरचिन्तामभिप्रेत्यैव। सौत्रोपलब्धिपदानुरोधाच्च।

ननु साधनफलयोरैकरूप्यनियमादुपासनस्यानेकप्रकारत्वाद् यदि ज्ञानं तत्फलमनेकरूपमङ्गीक्रियते तर्हि सामान्याकारज्ञानस्य मुक्तिसाधनत्वात् तत्साधनमुपासनमपि सामान्याकारमेव कर्तव्यं प्रसज्यत इति बिम्बत्वप्रकारकमुपासनं नाऽवश्यकमित्युत्थानादनन्तरसङ्गतिः।

विषयसंशयौ

उपासनशब्दं ध्यानं विषयः। यत्किञ्चिद्रूपविषयं कृष्णरामत्वादिसामान्यधर्मप्रकारकं कर्तव्यमुत बिम्बत्वप्रकारकम्? तदर्थं च तत्फलं दर्शनं स्वस्वबिम्बतयाऽनिर्धारितभगवन्मूर्त्यवगाहि मुक्तिसाधनमुत तत्तज्जीवबिम्बभूतमूर्तित्वप्रकारकमेवेति सन्देहः।

पूर्वपक्षः

रामकृष्णादिरूपाणां साम्यात् स्थाननयोक्तितः।
बिम्बत्वेनाप्यबिम्बत्वेनापि स्याद् दर्शनात् फलम्॥
इति पूर्वः पक्षः।

सिद्धान्तः

समोऽपीत्यादिवाक्येन बिम्बदर्शनमेव यत्।
फलं[१] नियम्यते तेन तदुपासा विशिष्यते॥ इति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु- समानानां भावः **सामान्यं** साम्यम्। भगवद्रूपाणां साम्यान्मोक्षदातृत्वादि[२] शक्तिसाम्यात्। **सामान्यात्** सामान्याकारेण **उपलब्धेः** दर्शनात्। लिङ्गव्यत्ययेन सामान्याया उपलब्धेरिति सामानाधिकरण्यं वा। दर्शनादित्यध्याहृतेन वाऽस्य सम्बन्धः। सामान्यदर्शनमात्रान्न मुक्तिः। किन्तु बिम्बदर्शनेनैवेत्यपेर्थः। 'समोऽपि भगवान् स्वबिम्बदर्शनेनैवैनं[३] मोचयति' (न्या.वि. उदाहृतश्रुतिः ३.३.अ.३२) इत्याद्युपलब्धेः। श्रुतेर्दर्शनाद्वा। नानारूपेषु भगवत्त्वस्य तज्ज्ञानेषु च ब्रह्मज्ञानत्वस्य च साम्येऽपि रूपविशेषज्ञानविशेषादेव मुक्तिर्नान्येनेत्यत्र दृष्टान्त उच्यते- **मृत्युवदिति**॥ पञ्चम्यन्ताद् वतिः। देहत्यागलक्षणमृत्योर्मृत्युत्वसाम्येऽपि चरमदेहत्यागलक्षणान्मृत्युविशेषादेव मुक्तिर्नान्येनेति यथा, यथा च मृत्युसामान्यान्न मुक्तिः, किन्तु लोकान्तरापत्तिस्तथा दर्शनसामान्यान्न मुक्तिः। किन्तु महरादिलोकान्तरापत्तिर्भवति।

ननु सैव मुक्तिरिति चेत्, उच्यते। नहि लोकापत्तिः। मृत्युवदित्यत्रापि सम्बद्ध्यते। मुक्तिरित्यध्याहारश्च। मृत्युर्यथा मुक्तिर्न भवति एवं लोकापत्तिरपि मुक्तिर्न भवतीत्येतत् प्रसिद्धमेव।

न च

'दृष्ट्वैव ह्यवताराणां मुच्यन्ते केचिदञ्जसा।
दर्शनेनान्तरेणान्ये देवाः सर्वत्र दर्शनात्॥'
(ब्र.सू.भा.उदाहृताध्यात्मवचनम्) इत्यध्यात्मवचने,

---

१. म. फले २. म. मोक्षदत्वादि। ३. म. दर्शन एवैनम्

'अन्तर्दृष्टयोबहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टयः' इति कमठश्रुतौ,

'केषाञ्चित् सर्वगत्वेन केषाञ्चिद्धृदये हरिः।
केषाञ्चिद्बहिरेवासावुपास्यः पुरुषोत्तमः॥' (ब्राह्मपुराणम्)

इति ब्राह्मे वा[१] केषाञ्चिदेव बिम्बोपासनप्रतीतेः केषाञ्चित् सामान्यदर्शनेनापि मुक्तिप्रतीतेः कथमयं नियम इति वाच्यम्। बिम्बोपासनसाधनानामेवोपासनानामधिकारिभेदेनात्र कथनेऽपि बिम्बोपासनस्य ज्ञापकाभावेन प्रसक्त्यभावात्।

नच

'हृदिस्था या[२] हरेर्मूर्तिर्जीवो यत्प्रतिबिम्बकः।
यद्वशे वर्तते जीवः'

इत्यादिवचनेन बिम्बस्य हृत्स्थत्वे सिद्धे 'दर्शनेनान्तरेणान्ये', 'केषाञ्चिद्धृदये हरिः' इति हृत्स्थदर्शनं केषाञ्चिदेवेति ज्ञायत इति वाच्यम्। बिम्बातिरिक्तस्य हृत्स्थमूर्त्यन्तरस्य विवक्षया तदुपपत्तेः। नहि बिम्बातिरिक्तं रूपं हृदि नास्ति। प्राज्ञस्यैवोपलम्भात्। अत एव बिम्बत्वे हृत्स्थत्वमपि न प्रयोजकम्। अधिकारिविशेषान् प्रति बिम्बभूतरामादेर्बहिष्ठत्वात्।

अत एव 'जीवो यत्प्रतिबिम्बकः' इत्येव लक्षणम्। 'हृदयस्था' इति तु 'यद्वशे वर्तते जीवः' इतिवत् स्वरूपकथनमेव। जीवप्रतिफलननिमित्तविशेषत्वस्य बिम्बलक्षणस्यानतिव्याप्तत्वात्।

अत एवान्तरुपासनस्यैव बिम्बोपासनत्वान्नानयोः साध्यसाधनाभाव इति निरस्तम्। अत एव येषां बहिरुपासनया मुक्तिस्तेषां हृदि किञ्चिदुपास्यमेवेति बृहदारण्यकभाष्ये स्पष्टं बहिरुपासनादीनां बिम्बोपासनाङ्गत्वमुक्तम्। अन्तर्मूर्त्यन्तरोपासनमपि बिम्बोपासनाङ्गमेव। किं बहुना? वस्तुगत्या इत्यादि[३]-

१. म. ब्राह्मे च। २. म. हृदयस्था। ३. 'इत्यादि' पदं नावश्यकमिति भाति।

सामान्यप्रकारकमपि बिम्बविषयमुपासनं बिम्बप्रकारकोपासनां प्रत्यङ्गमेव। 'तेषां विशेषमाचार्यो वेत्ति सर्वज्ञतां गतः' (ब्र.सू.भा. उदाहृताध्यात्मवचनम् ३.३.५२) इति नियतगुरूपदेशमात्रसाध्यत्वावगमात्। तथाच बिम्बत्वप्रकारकोपासनं सर्वेषामावश्यकमेव। न तत्राधिकारिभेदोऽस्ति। किन्तु तत्साधनोपासनेषु देवादिभेदेनाधिकारिभेदः। तथाचानेकविधा अप्यधिकारिणः बहिरन्तरित्यादिस्वस्वयोग्योपासनजदर्शनेन नियतगुरुकटाक्षभाजो बिम्बत्वप्रकारकोपासनजदर्शनजविशेषेण पूर्वदृष्टविशेषरूपस्य बिम्बैक्यदर्शनेनेति यावत्। स्वस्वयोग्यां मुक्तिं लभन्त इति न कश्चिद् विरोधः।

केचित्तु बिम्बशब्दो न हृत्स्थमूर्तिविशेषपरः। किन्तु 'मुक्तिर्योग्यात्मदर्शनात्' (सू.भा.उदाहृतनारायणतन्त्रवचनम् ३.३.५३) इत्युक्तेः स्वस्वयोग्यात्मपरः। तेन 'दृष्ट्वैव ह्यवताराणाम्' (सू.भा. उदाहृताध्यात्मवचनम् ३.३.५२) इत्यनेन न विरोध इत्याहुः। अन्ये तु बिम्बदर्शनादेव मोक्ष इत्ययं नियमस्तु न सर्वेषां, किन्तु ये बिम्बदर्शनयोग्या ऋष्यादयस्तेषामेव; सर्वेषां बिम्बदर्शनायोग्यत्वादित्याहुः।

टीकायां पूर्वपक्षीयगुणसामान्यन्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- गुणसामान्यन्यायं सम्बन्धिप्रदर्शनेन विवृण्वत् **'नच भगवतः सर्वत्र गुणसाम्याद् यस्य कस्यापि रूपस्य दर्शनात् सर्वेषां मुक्तिः'** इति वाक्यं व्याचष्टे- **भगवत इति**॥ सर्वरूपेष्विति सर्वत्रेत्यस्यार्थः। मोक्षदातृत्वशक्तिरिति गुणशब्दार्थः।

टीकायां सिद्धान्तीयकृतप्राप्तिन्यायस्य व्याख्यानम्

कृतप्राप्तिन्यायं तत्प्रतिपादकश्रुतिपाठेन विवृण्वत् ' **''समोऽपि भगवान् स्वबिम्बदर्शन एवैनं मोचयति। यथा समेष्वपि कर्मसु स्वकृतमेवैनं भोजयति''**

इति श्रुत्युक्तस्वकृतप्राप्तिदृष्टान्तात्' (न्या.वि.) इति वाक्यं व्याचष्टे- **तथाच श्रुतिरिति** ॥ अनेन विवरणोदाहृतश्रुतिपर्यालोचनेन सौत्रं मृत्युपदं मृत्युरूप-संसारापादकत्वात्[१] कर्मलक्षकम्; मृत्युं यातयतीति योगेन कर्मणि शक्तं वेति ज्ञातव्यम्।

॥ इति नसामान्याधिकरणम्॥ ३३ ॥

१. म. मृत्युरूपसंहारापादकत्वात्।

॥ अथ ताद्विध्याधिकरणम्॥ ३४॥

सूत्रभाष्यम्

'भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी' इति माठरश्रुतेर्न परमात्मना दर्शनमिति चेन्न। 'तस्यैष आत्मा विशते ब्रह्मधाम' (मुं.उ.३-२-४) इति श्रुतेः। कथं तर्ह्येषा श्रुतिः-

॥ ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः ॐ ॥
॥ ३-३-५४ ॥

परमात्मैवं[१] भक्त्या प्राप्य मुक्तिं ददातीति प्रधानसाधनत्वाद्[२] भक्तिः करणत्वेनोच्यते। मायावैभवे च -

'भक्तिस्थः परमो विष्णुस्तयैवैनं वशं नयेत्।
तयैव दर्शनं यातः प्रदद्यान्मुक्तिमेतया॥
स्नेहानुबन्धो यस्तस्मिन् बहुमानपुरस्सरः।
भक्तिरित्युच्यते सैव करणं परमेशितुः[३]॥'
(मायावैभवम्)इति।

सर्वशब्दानां ब्रह्मणि प्रवृत्तेश्च॥ ५४॥

॥ इति ताद्विध्याधिकरणम्॥ ३४॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनोपासनसाहित्येनोक्तभक्तेः स्वातन्त्र्यनिरासादस्ति

१. ह. परमात्मैव २. ह. मुक्तिं ददाति। प्रधानसाधनत्वात्।
३. ह. परमीशतुः

शास्त्रादिसङ्गतिः। अन्यथाऽव्यक्तत्वाभावप्रसङ्गात् तन्निरसनीयमेव। प्रकृतं ज्ञानमेव विषयः। किं भक्तिसामर्थ्येन भवत्युत परमात्मनेति सन्देहः। कृष्यादौ राजसेवादौ च तथा दर्शनं सन्देहबीजम्।

पूर्वपक्षः

पूर्वपक्षयति- **भक्तिरिति**॥ भक्तिसामर्थ्येनैवापरोक्षज्ञानं न परमात्मप्रसादेन। 'भक्तिरेवैनम्' (माठरश्रुतिः) इति श्रुतौ भक्तेरेव स्वातन्त्र्येण दर्शनादिसाधनत्वदर्शनात्। एवं साधनसामर्थ्यादेव तद्दर्शनान्न तस्याव्यक्तत्वमिति भावः।

सिद्धान्तः

सिद्धान्तयति- **नेति**॥ न भक्तेरेव स्वातन्त्र्येण दर्शनादिसाधनत्वं वाच्यम्। किन्तु तया प्रसन्नस्य परमात्मन एव। 'एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम' (मुण्ड.उ. ३.२.४) इति श्रुतेरित्यर्थः। एतैः प्रवचनाद्युपायैर्यो दर्शनार्थं यतते तस्यार्थे तैः प्रसन्नः परमात्मा ब्रह्मधाम वायुं विशति। तस्य तत्राऽविर्भवतीत्यर्थः। परमात्मनैव चेद् दर्शनं कथं तर्हि भक्तेरेव तत्साधनत्वाभिधायकश्रुतिरुपपद्यत इति शङ्कते- **कथमिति**॥ परिहाराय सूत्रं पठित्वा व्याचष्टे- **परेण चेति**॥ परमात्मनैव दर्शनादिकं नतु भक्त्या। तथाऽपि भक्तिश्रुतिरुपपद्यते। कथम्? दर्शनमोक्षयोः कर्ता परमात्मा भक्त्यैव करोतीत्यतोऽत्र भक्तेर्दर्शनादौ करणत्वेनोच्यमानत्वात्। नच वाच्यं साधनान्तराण्यनुक्त्वा किं विशिष्याभिधीयते भक्तिरिति। तस्याः साधनेषु प्रधानत्वात्। कर्तृत्वाङ्गीकारे तूक्तविशेषश्रुतिविरोध इति भावः। अत्रैव स्मृतिमाह- **मायेति**॥ 'सैव' इत्यस्यापि पूर्ववत् सङ्गतिः। एवं 'हन्ता रामशरः' इति करणे कर्तृत्वव्यपदेशदर्शनात् करणार्थत्वेन श्रुतिमुपपाद्य प्रकारान्तरेणाप्युपपादयति- **सर्वेति**॥ भक्त्यादिसर्वशब्दानां परब्रह्मणि

वृत्तेर्ब्रह्मैवैनं नयतीत्याद्यर्थोपपत्तेश्चोपपन्ना श्रुतिरिति भावः। अनेन परेणैव वाच्येन निमित्तेन शब्दस्य ताद्विध्यं युक्तमिति सूत्रांशस्यार्थान्तरमुक्तं भवति। अतो दर्शनादेः पुरुषशक्तिसाध्यत्वाभावाद् युक्तमव्यक्तत्वं ब्रह्मण इति सिद्धम्॥ ५४॥

॥ इति ताद्विध्याधिकरणम्॥ ३४॥

शेषतात्पर्यचन्द्रिका

॥ ॐ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः ॐ ॥
॥ ३-३-५४ ॥

पेटिकासङ्गतिः, अनन्तरसङ्गतिश्च

उपासनस्य न भक्तिरेवाङ्गं केवलम्। किन्तु भगवत्प्रसादोऽपीत्यत्र प्रतिपादनादितिकर्तव्यतापेटिकासङ्गतिः। "भक्तेः स्वातन्त्र्यनिरासात्' इति टीकाऽपि भगवत्प्रसादनैरपेक्ष्यनिरासादिति योजनीया। अन्यथा 'न परमात्मप्रसादेन' इति पूर्वपक्षटीकाविरोधप्रसङ्गात्।

ननु 'स्वबिम्बदर्शन एवैनं मोचयति' (न्या.वि. उदाहृतश्रुतिः ३.३.५३) इति विशेषवाक्याद् यथा सामान्यदर्शनस्य मुक्तिसाधनत्वाभावस्तथा 'भक्तिरेवैनं नयति' (माठरश्रुतिः) इति विशेषवाक्यान्न परमात्मप्रसादस्यापरोक्षज्ञानसाधनत्वं, तद्द्वारा मुक्तिसाधनत्वं वा स्यादिति पूर्वन्यायोपजीवनेन प्रवर्तनादनन्तरसङ्गतिः।

चिन्ताक्रमः, अधिकरणारम्भस्य सार्थक्यं च

उपासना तदङ्गभक्तिर्वा भगवत्प्रसादनैरपेक्ष्येणापरोक्षज्ञानादि जनयत्युत तदपेक्षयेति। तदर्थं तद्दर्शनादिस्वातन्त्र्यं भक्तेरेवोत भक्तिस्थभगवत इति

चिन्तनीयम्। नन्वनयोः पक्षयोः को विशेषः। यतो भक्तेरेव स्वातन्त्र्ये भगवतः कैमुत्येन स्वातन्त्र्यसिद्धिरिति। मैवं वोचः। यतो भक्तेरेव स्वातन्त्र्ये भगवत उपसर्जनतया प्रधानविद्यानुगुण्येन ब्रह्मपरनिखिलवाक्यानां भजनीयविषयमात्र-समर्पकत्वापत्त्या भगवद्वस्तुतत्त्वे तात्पर्याभावापत्तिः। यथा गुरुनये यागविधेरेव प्राधान्येन सिद्धार्थदेवतापरवाक्यानां यागार्थत्वेन न कर्माराध्यदेवतापरत्वम्, अपि तु कर्मप्राधान्याविरोधेनैव तदुपसर्जनकयागसिद्धिमात्रोपयुक्तोद्देश्यमात्र-शरीरकदेवतापरत्वम्, अत एव नातीन्द्रियदेवताङ्गीकारः, एवं भक्तिभजनीयस्य जन्मादिकर्तृतया भावनामात्रोपयुक्तब्रह्मपरता श्रुतीनां स्यादिति नेशाङ्गीकारेण कृत्यमिति न पुरुषवदेवेश्वरसिद्धिः स्यादित्यर्थवानेवायमारम्भः।

पूर्वपक्षः

भक्तेरेव दर्शनादिस्वातन्त्र्यमिति पूर्वः पक्षः। 'भक्तिरेवैनं नयति' इत्यादि-माठरश्रुतेः[१]। यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेत' (मानवश्रौतसूत्रम् ९.३.१.११) इत्यादेर्यागस्यैव स्वर्गे स्वातन्त्र्यं, नतु सवनत्रयेज्येन्द्रादि-देवतायाः। शेषतया यागे उपक्षीणत्वात्। तथाच भक्त्यैव दर्शनादिसिद्धिः, न भक्तितुष्टाद् भगवत इति प्रसादो नाऽवश्यकः[२]।

भक्तिरेवेत्यादिवाक्यादवश्यापेक्षितो न च।
सामान्यदर्शनं यद्वत् प्रसादो दर्शने तथा॥ इति पूर्वपक्षः।

सिद्धान्तः

सिद्धान्तस्तु[३] - भक्तेरेव वा यागस्यैव वा दर्शनादौ स्वर्गे च न स्वातन्त्र्यम्। अचेतनत्वात्। येन ब्रह्मदेवतयोश्चोपसर्जनतया न स्वातन्त्र्यं स्यात्। किन्तु भक्ति-कर्मप्रसन्नात् परमात्मन एव। 'एतैरुपायैर्यतते यस्तु विद्वान्' (मुण्ड.उ. ३.२.४)

१. म. कमठश्रुतेः। २. म. प्रसादोऽनावश्यकः। ३. म. राद्धान्तस्तु

एतैः 'नायमात्मा प्रवचनेन लभ्यः' (मुण्ड.उ. ३.२.३), 'यमेवैष वृणुते तेन लभ्यः' (मुण्ड.उ. ३.२.३) इति पूर्ववाक्ये प्रकृतैः प्रवचनभक्त्याद्युपायैः यो दर्शनाद्यर्थं यतते तस्यार्थे तैः प्रसन्नः, गुरोः स्वतः उपदेशनेऽसामर्थ्यात् गुरुस्थं ब्रह्मधाम वायुं परब्रह्मणो धाम गुरोः शिष्यस्य वा हृदयाख्यं पुरं विशत इति भगवत एव स्वदर्शनादौ स्वातन्त्र्यश्रुतेः। भक्तेः स्वातन्त्र्ये भगवत्प्रवेशवैयर्थ्या-पत्तेः। एवं यागादेरपि 'वायव्यं श्वेतमालभेत' (तै.सं. २.१.१) इति यागे[१] च वायोरेव स्वेन भागधेयेनोपधावता[२] इति तत्त्वकथनेन तत्फलभूतगमकत्व-श्रुतेर्यागानामेव तत्तद्देवतायजनत्वेन 'योऽग्नौ तिष्ठन्' (बृ.उ. ३.७.५) 'यो वायौ तिष्ठन्' (बृ.उ. ३.७.७) इत्यादिश्रुतेस्तत्तद्देवतापदप्रतिपाद्यभगवत एव तत्तच्छेषत्वेन तत्तत्फलदानस्वातन्त्र्याच्च।

ननु भक्तियागाभ्यां प्रसन्नेन परेण चेद् दर्शनस्वर्गौ दीयेते कथं तर्हि 'भक्तिरेवैनं दर्शयति' (माठरश्रुतिः), 'यजेत स्वर्गकामः' (मा.श्रौ.सू.) इत्यादौ तयोः स्वातन्त्र्यप्रतीतिः? करणे कर्तृप्रत्ययायोगादिति चेन्न। 'हन्ता रामशरः', 'काष्ठानि पतन्ति' इत्यादौ करणेऽपि कर्तृप्रत्ययदर्शनात्। किं तस्य प्रयोजनमिति चेन्न। 'अङ्गानि हरिसेवायां भक्तिस्त्वेका विमुक्तये' (स्मृतिः) इति साधनेषु प्राधान्यज्ञापनार्थत्वात्। यागादेः करणत्वेऽपि तत्सन्निकृष्टदेवताभिलापकश-ब्दाभिलाप्यपुरुषवरस्यैव[३] प्रसन्नतया यागसाध्यतया प्राधान्यम्।

एतैरुपायैरित्यादिवाक्याद् विष्णोर्दर्शिभवेत्।
भक्त्या प्रसन्नात् तेनेयं भक्तिर्भक्तिश्रुतिर्भवेत्॥ इति।

सूत्रार्थः

सूत्रार्थस्तु- भक्त्या दर्शनं प्राप्तेन यागेन प्रसन्नेन च **परेण** मुक्तिः स्वर्गश्च

१. म. यागेन २. म. उपधावति ३. म. पुरुषपरस्यैव

दीयत इति। ततश्च[1] **अनुबन्धः** भक्तिर्यागश्च **भूयस्त्वात्** स्वतन्त्रसाधनत्वात् प्रधानतया दृश्यते। तत एव 'भक्तिरेवैनं' (माठरश्रुतिः), 'यजेत स्वर्गकामः' (मा.श्रौ.सू.) इति **शब्दस्य, ताद्विध्यं** भक्तियागयोस्तत्फलदानस्वातन्त्र्याभिधायित्वं[2], चशब्दाद् भक्तियागादिशब्दत्वादपि, दर्शनादिदाने भगवतः प्राधान्यं, नतु तदङ्गेन भक्त्यादेः प्राधान्यापत्तिरिति। एतन्न्यायेनाध्ययनमारभ्य भगवद्दर्शनान्तसाधनेषु सर्वत्रापि भगवत्प्रसादोऽङ्गम्। स चाधममध्यमोत्तमभेदेन त्रिविधः। पूर्वः पूर्वः साधनं, उत्तरोत्तरश्च साध्यमिति साधनमात्रस्येतिकर्तव्यतारूपोऽपीहोक्तसङ्गतिविशेषादत्र निरूपित इति ज्ञातव्यम्।

लिङ्गभूयस्त्वादित्यारभ्य परेण चेत्यन्तं नवसूत्री एकमधिकरणमिति मतानुवादः

अन्येतु, 'लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि' (ब्र.सू. ३-३-४५) इत्यारभ्य 'परेण च' (ब्र.सू. ३.३.५४) इत्यन्तमेकमधिकरणं व्याचक्षते। वाजसनेयिनोऽग्निरहस्ये- 'नैव वा इदमग्रे सदासीत्' (अग्निरहस्यम् १०.५.३) इत्यस्मिन् ब्राह्मणे 'तद्धैतन्मन आसीत्' (अग्निरहस्यम् २.५.३.३) इति मनः प्रकृत्याधीयते- 'षट्त्रिंशत्सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्मनोमयान्मनश्चितः' (अग्निरहस्यम् ५.३.३.३) इत्यादि। तथा 'वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचितः' (अग्निरहस्यम् ५.३.४) इत्यादि पृथगग्नीनामनन्ति। कर्मेति शरीरमुच्यते। अग्निरिति जाठरः। तत्र पुरुषायुषस्य शतसंवत्सरस्य षट्त्रिंशत्सहस्राण्यहोरात्राणि भवन्तीति। तत्रैकैकाहोरात्रावच्छिन्नमनोवृत्तीः षट्त्रिंशत्सहस्रेष्टकात्वेन सम्पाद्य ताभिस्तावदिष्टकात्वेन सम्पादितेष्टकाभिश्चीयमानाग्निः सम्पाद्यते। एवं वाग्वृत्त्यादिष्वप्येकैकाहोरात्रावच्छिन्नवागादिवृत्तिभिस्तावदिष्टकात्वेन सम्पादिताभिश्चीयमानः वागग्निः प्राणाग्निः श्रोत्राग्निः शरीराग्निः जाठरानलाग्निश्च सम्पाद्यत इति योज्यम्। आत्मनः

१. म. तत एव २. म. अभिप्राप्तित्वम्

स्वसम्बन्धिनो मनोमयान् साङ्कल्पिकान् अर्कान् पूज्यान् 'मनश्चितो वाक्चितो प्राणचितः' (अग्निरहस्यम् ८.३.३,४) इत्यादिना वक्ष्यमाणाग्नीनुक्तरीत्या षट्त्रिंशत्सहस्रसङ्ख्याकान् मनः स्वयमपश्यत्। व्यजानादित्यर्थः। एतेऽग्नयः कल्प्यमानाः[1] क्रत्वर्था उत पुरुषार्था इति संशयः।

अतत्परोऽर्थवादोऽन्यमानप्राप्तिमपेक्षते।
एवकारश्रुतिर्बाह्यसाधनत्वनिवारिणी॥

प्रकरणं तावन्मनश्चिदादीनां कर्माङ्गत्वं गमयति। नच 'तद्यत्किञ्चेमानि भूतानि मनसा सङ्कल्पयन्ति तेषामेव सा कृतिः' (अ.र. १०.५.३.१२) इति। 'तान् हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते' इति कर्मप्रयोगादन्यत्रापि मनश्चिदादीनां सद्भावलिङ्गाद् 'विद्यया हैवैत एवंविदश्चिता भवन्ति' (अ.र. १०.५.३.१२) इति पुरुषसम्बन्धेन तच्छेषत्वप्रतिपादकवाक्यात्, 'ते हैते विद्याचित एव' (अ.र. १०.५.३.१२) इति क्रियाङ्गत्वव्यावर्तकैवकारश्रुत्याऽपि च प्रकरणबाध इति वाच्यम्। यतो द्विविधं लिङ्गं सामर्थ्यरूपमन्यार्थदर्शनं च। सामर्थ्यमपि द्विविधम्। शब्दगतं यथा पूषानुमन्त्रणमन्त्राणाम्। अर्थगतं यथा- 'पशुना यजेत' इत्यत्रैकत्वसङ्ख्याया अर्थगतायाऽवच्छेदसामर्थ्यम्। नचात्र द्विविधमप्यस्ति। अन्यार्थदर्शनं तु विधिस्तुत्यर्थतया विधिपरत्वान्न स्वातन्त्र्यमग्न्यादीनां गमयति।

एतेन वाक्यमपि प्रत्युक्तम्। अस्याप्यन्यार्थत्वदर्शनात्। एवकारश्रुतिस्तु बाह्यसाधनव्यवच्छेदनार्था। तस्मादप्रत्यूहं प्रकरणं मनश्चिदादीनां क्रियाविशेषत्वं गमयतीति प्राप्तेऽभिधीयते।

स्वातन्त्र्यगोचरादर्थवादात् कल्प्यो विधिर्वदेत्।
स्वातन्त्र्यं बाह्यसाध्यत्वं विद्यात्वादेव वारितम्॥

१. म. कथ्यमानाः

यत्र श्रुतिविधिनैकवाक्यत्वं गतोऽर्थवादः न तत्रान्यार्थदर्शनानां प्रापकत्वम्। यत्र तु न श्रुतिविधिनैकवाक्यता तत्र त्वपूर्वार्थगोचरार्थवादेभ्यो विधिः कल्पनीयः । तथाचैतेभ्यो यादृशोऽर्थः प्रतीयते तस्यैव वर्णितेन प्रकारेण स्वातन्त्र्यम्। नचैवकारो बाह्यसाधनव्यावृत्त्यर्थः। विद्याशब्दादेव तत्सिद्धेः। तस्माद्विद्यात्मत्वेऽपि मानसग्रहवद् क्रियाङ्गत्वप्राप्तौ तन्निवृत्त्यर्थमवधारणमिति।

तन्निरासः

तन्न। 'वेधाद्यर्थभेदात्' (ब्र.सू. ३.३.२६) इत्यधिकरणन्यायेनार्थवादाद् विधिकल्पनस्य विलम्बित्वात् तावत्प्रकरणेन क्रियाङ्गत्वावगतौ मनश्चिदादीनां स्वातन्त्र्यायोगात्। अन्यथा वेधादीनां विद्यासन्निधानाद् विद्याङ्गत्वमेवेति ज्योतिष्टोमाभिचाराद्यङ्गत्वं न स्यात्। मानसानामप्यमीषां मानसग्रहवत् क्रियाङ्गत्वेनैतद्वाक्यानामेकत्वसम्भवे क्लेशेनार्थवादिकविधिकल्पनेन वाक्यभेदाश्रयणस्यान्याय्यत्वाच्च।

लिङ्गभूयस्त्वादिति सूत्रस्य अद्वैत्यभिमतार्थनिरासः

एतेन, मनश्चिदादीनां मानसानामप्यग्नीनां स्वातन्त्र्यमेव, न क्रियानुप्रवेशः। 'तद्यत्किञ्चेमानि भूतानि मनसा सङ्कल्पयन्ति' (अ.र. १०.५.३) इत्येवञ्जातीयकानां स्वातन्त्र्यलिङ्गानां भूयस्त्वात्। तद्धि लिङ्गं प्रकरणाद् बलीयः। तदेतत्प्रमेयमपि प्रकरणाल्लिङ्गस्य बलीयस्त्वमपि पूर्वस्मिन् काण्डे 'श्रुतिलिङ्गवाक्यप्रकरणस्थान' (जै.सू. ३.३.१३) इत्यादिनोक्तमिति सिद्धान्तोपक्रममिदमधिकरणं कृत्वाऽऽद्यसूत्रव्याख्यानं निरस्तम्। बह्वध्याहारप्रसङ्गात्। 'तद्यत्किञ्चेमानि भूतानि' (अ.र. १०.५.३) इत्येवञ्जातीयकानां लिङ्गानामित्यस्य शब्दगतार्थगतान्यतरसामर्थ्यदर्शनरूपाणामित्यर्थत्वासिद्धेः। नह्येषां वाक्यानां पूषानुमन्त्रणमन्त्रवत् स्वातन्त्र्ये सामर्थ्यं दृश्यते। न चैतद्वाक्यप्रति-

पाद्यार्थस्य लौकिककृतिनैरपेक्ष्यस्यार्थस्य स्वातन्त्र्याक्षेपकत्वम्। मानसग्रहादिवत् सङ्कल्पमात्रजन्मनः क्रत्वर्थत्वोपपत्तेः। अन्यार्थदर्शनाख्यलिङ्गभूतस्य स्वातन्त्र्यविघातकम्। 'तद्धि बलीयस्तदपि' (ब्र.सू. ३.३.४५) इत्यंशस्यावश्यवक्तव्यार्थत्वाभावेन वैयर्थ्याच्च । सिद्धान्तोपक्रमत्वेऽधिकरणत्वव्याघाताच्च। अस्योत्तरपक्षत्वव्याघाताच्च।

अस्यैव सूत्रस्य विशिष्टाद्वैतमतरीत्या शैवमतीत्या च व्याख्या, तन्निरासश्च

अत एवास्वरसात्, 'सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्। विश्वं नारायणं देवमक्षरं परमं प्रभुम्' (तै.ना.उ. ३.९.१) इत्यारभ्य 'सोऽक्षरः परमः स्वराट्' (तै.ना.उ. ११.१३) इत्यन्तमाम्नातं तैत्तिरीयकं वाक्यं दहरविद्याप्रकरणे आम्नातमपि दहरविद्ययैकविद्यात्वेन तदुपास्यविशेषमात्रनिर्धारणार्थं न, किन्तु निखिलपरविद्योपास्यान् देवपरब्रह्मपरतत्त्वपरञ्ज्योतिःपरमात्माक्षरशिवशम्भुशब्दैरनूद्य वाक्येनैव तेषां नारायणत्वनिर्धारणार्थमिति केचित्।

शैवास्तु 'सर्वो वै रुद्रः' (महा.ना.उ. १०.११), 'रुद्राय नमोऽस्तु' (महा.ना.उ. १०.११), 'पुरुषो वै रुद्रः' (महा.ना.उ. १०.१२), 'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ज्येष्ठो [१]रुद्रस्तस्मै रुद्राय नमोऽस्तु' (महा.ना.उ. १०.११), 'नमो हिरण्यबाहवे' (महा.ना.उ. १०.१९) इत्यादितैत्तिरीयश्रुतसर्वात्मत्वादिभिरुमापतित्वेन च श्रूयमाणं परं ब्रह्म प्रकरणबलात् पूर्ववाक्यप्रकृतसवितृमण्डलविद्यामात्रे नोपास्यम्। किन्तु सर्वास्वपि परविद्यासु। शेषं पूर्ववदेवेति व्याचख्युः।

तदुभयमप्यसत्। 'सर्ववेदान्तप्रत्ययम्' (ब्र.सू. ३.३.१) इत्यादावेव सिद्धत्वात्। लिङ्गभूयस्त्वाद् इत्यस्य चिह्नभूतवाक्यभूयस्त्वादिति व्याचक्षता स्वयमेवास्वारस्याङ्गीकाराच्च।

---

१. प. ह्येष

पूर्वविकल्पेति सूत्रस्य पराभिमतार्थनिरासः

यच्चानन्तरसूत्रस्य पूर्वपक्षपरत्वमभिप्रेत्य, स्वतन्त्रा एते अग्नयो नान्यशेषभूता इत्येतन्न युक्तम्। किन्तु, पूर्वविकल्पः पूर्वस्य क्रियामयस्याग्नेः प्रकरणात् तद्विषय एवायं विकल्पविशेषोपदेशः स्यात्। तस्मात् साम्पादिका अप्येते अग्नयः प्रकरणक्रियानुप्रवेशिन एव मानसवत्। यथा दशरात्रस्य दशमेऽहन्यविवाक्ये पृथिव्या पात्रेण समुच्चयस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादन-हवनाहरणोपह्वानभक्षणानि मानसान्येवाऽम्नायन्ते। स च मानसोऽपि ग्रहकल्पः क्रियाप्रकरणात् क्रियाशेष एव भवत्येवमयमप्यग्निकल्पः' इति व्याख्यानं तदप्ययुक्तम्। अधिकरणान्तरत्वे सिद्धान्तपरत्वे च सम्भवति पूर्वशेषतया पूर्वपक्षपरतया च व्याख्यानायोगात्। विकल्पशब्दस्य विशेषोपदेशे व्युत्पत्त्य-भावात्। समस्यमानपूर्वशब्देन सामर्थ्याभावात्। पूर्वस्य विषये विकल्प इति मध्यमपदलोपिसमासाश्रयणेऽपि 'प्रकरणात्' इत्यस्य तत्रान्वयायोगात्। 'क्रियामयस्याग्नेः' (रामानुजभाष्यम्) इत्यस्य सूत्राक्षरानारोहात्। क्रियेत्य-विभक्तिकनिर्देशाश्रयणेऽपि विकल्पपदेन समस्तस्य पूर्वपदस्य तदन्वया-योगात्। क्रियापदस्य क्रियामये व्युत्पत्त्यभावात्। 'पूर्वस्य' इति विशेषणबलादेव प्रकरणस्य प्राप्तेः पुनस्तद्ग्रहणायोगात्। पूर्वविकल्पो मानसवदित्यनेनैव विवक्षि-तार्थसिद्धेः शेषवैयर्थ्यात्। तस्मात् क्रिया स्यादिति निगमनतया व्याख्यानेऽश्रुत-कल्पनादसङ्गतत्वाच्च। क्रियानुप्रवेशिन इति व्याख्याने लक्षणाद्यापाताच्च।

किञ्च 'दशरात्रस्य दशमेऽहन्यविवाक्ये' (रामानुजभाष्यम् ३.३.४४) इत्यादिदृष्टान्तव्याख्यानभाष्ये दशरात्रशब्देन द्वादशाहविकृतिभूतं दशाहसाध्यं दशरात्रं नाम यागान्तरमुच्यत उत द्वादशाहान्तर्गतद्वादशस्वहस्सु प्रथमोत्त-माह्नोर्मध्यगतमहर्दशकं दशरात्रशब्देनोच्यते। नाऽद्यः। 'एष वै दशमस्याह्नो विसर्गो यन्मानसम्' इति 'दशमेऽहनि मानसाय प्रसर्पन्ति' इति च द्वादशाह-

प्रकरणस्थब्राह्मणेन मानसग्रहस्य द्वादशाङ्गत्वेऽपि तद्विकृतिभूतदशरात्रगत-दशमस्याह्नोऽङ्गत्वायोगात्। दशरात्रस्य द्वादशाहविकृतित्वाच्चोदकतो मानस-ग्रहस्य प्राप्तिरस्तीति चेन्न। साक्षादुपदिष्टधर्मेति[1] द्वादशाहदशमस्याह्न एवोदा-हरणत्वसम्भवेऽतिदेशतः प्राप्तिं सम्पाद्य दशरात्रगतदशमस्याह्न उदाहरणे कारणाभावात्। द्वादशाहान्तर्गतस्यैकादशस्याह्न एवाविवाक्यनामकत्वेन प्रसिद्धेर्यागान्तरगतस्य दशमस्याह्नस्तदयोगाच्च। स च मानसोऽपि ग्रहकल्पः 'क्रियाप्रकरणक्रियाशेष एव' इत्युत्तरभाष्यविरोधाच्च। नहि विकृतौ[2] प्रकरणात् प्राप्तिः। न द्वितीयः। 'द्वादशाहसम्बन्धिनो दशमस्याह्नोऽङ्गं मानसमिति धर्म[3]मीमांसासूत्रकृतोक्तम्। दशरात्रगतस्यापि दशमस्याह्नोऽङ्गमिति भगवान् भाष्यकारः। 'श्रुत्यन्तरबलेनाऽह' इति भामतीग्रन्थविरोधाच्च[4]। नहि द्वादशा-हान्तर्गतदशरात्राङ्गत्वे श्रुत्यन्तरमपेक्षितम्। अतिदेशपक्षे 'श्रुत्यन्तरबलेन' इति भामतीविरोधश्च। किञ्च मानसग्रहे 'एष वै दशमस्याह्नो विसर्गः' इत्यादि-वाक्यबलात् क्रियानुप्रवेशाङ्गीकारेऽपीह मानसाग्नौ वाक्याभावेन वैषम्यम्।

पूर्वविकल्पेति सूत्रस्य रामानुजाभिमतार्थनिरासः

एतेन, मनश्चिदादिः क्रिया स्यात् क्रियामयक्रत्वङ्गभूतः स्यात्। प्रकरणात्। पूर्वकृतेनेष्टकचितेनाव्यभिचरितक्रतुसम्बन्धिनोपस्थितक्रतुगृहीतत्वात्। ततः पूर्वेणेष्टकचितेनाग्निनाम्नश्चिदादेरग्नेर्विकल्पः। द्वादशाहाङ्गभूतमानसग्रहवद् विद्यामयक्रत्वङ्गभूतोऽपि मनश्चिदादि क्रियामयक्रत्वङ्गमपि भवतीति केषाञ्चिदप-व्याख्यानं निरस्तम्। इष्टकचितस्याग्नेर्लिङ्गवाक्यप्रकरणसन्निधानादिना क्रत्वङ्गस्य परम्परया प्रकरणमात्रप्रापितेन मनश्चिदादिना विकल्पायोगाच्च।

---

१. 'धर्मतया' इति पाठः सम्भाव्यते। २. क. वैकृतात्।
३. क. कर्म। ४. क. भामतीविरोधश्च।

‘अतिदेशाच्च’ इति सूत्रस्य पराभिमतार्थनिरासः

‘षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान् यावानसौ पूर्वः’ (अ.र. १०.५.३) इति प्रकृतः[1] क्रियामयोऽग्निः यावान् माहात्म्यवान् षट्त्रिंशत्सहस्रसङ्ख्याकविद्यामयाग्नीनां मध्ये एकैकोऽग्निस्तावान् माहात्म्यवान् इति श्रुत्येष्टकाचितेनाग्निनां साम्पादिकाग्नीनामतिदेशाच्च क्रियानुप्रवेश इति पूर्वपक्षशेषतयाऽतिदेशाच्चेति सूत्रमुभाभ्यां व्याख्यातम्।

तन्न। प्रशंसावाक्येऽतिदेशशब्दप्रयोगाभावात्। प्रयोगेऽपि क्रियानुप्रवेशासाधकत्वात्। अतिफल्गुपरतया सूत्रव्याख्यानायोगाच्च। पूर्वसूत्रोक्तलिङ्गभूयस्त्वेनैवास्यातिदेशस्य सङ्ग्रहसम्भवेन सूत्रान्तरप्रणयनवैयर्थ्याच्च।

‘विद्यैव तु निर्धारणात्’ ‘दर्शनाच्च’ इति सूत्रयोः परोक्तार्थः

यच्च[2] तुशब्दः पूर्वपक्षं निषेधति मनश्चिदादयोऽग्नयः विद्यैव विद्यात्मका एव। ‘ते हैते विद्याचित एव’ (अ.र. १०.५.३.१२) इति, ‘विद्यया हैवैत एवंविदश्चिता भवन्ति’ (अ.र. १०.५.३.१२) इति च श्रुतौ निर्धारणार्थकैवकारश्रवणात्। ‘तद्यत्किञ्चेमानि भूतानि’ (अ.र. १०.५.३), ‘तान् हैतानेवंविदे’ (अ.र. १०.५.३.१२) इत्यादिश्रुतिप्रदर्शितानां मनःसङ्कल्पजत्वमात्रत्वेन कर्मकालीनत्वादीनां क्रियाशेषत्वाभावे लिङ्गानां ‘दर्शनाच्च’ (ब्र.सू. ३.३.४९) इति तदनन्तरसूत्रेण तत्रैव युक्त्यन्तरमुच्यते।

‘श्रुत्यादिबलीयस्त्वाच्च न बाधः’ इति सूत्रस्य परोक्तार्थः

ननु प्रकरणात् क्रियाशेषत्वं स्यादिति स्वातन्त्र्यबाध इति शङ्कने ‘ते हैते विद्याचित एव’ (अ.र. १०.५.३.१२) इत्येवकारश्रुतेः ‘तान् हैतानेवंविदे सर्वाणि भूतानि विचिन्वन्त्यपि स्वतः स्वपते जाग्रते च सर्वाणि भूतान्येतानि

१. म. पूर्वप्रकृतः २. म. यश्च

मनश्चिदादीनग्नीन् चिन्वन्ति’ (अ.र. १०.५.३.१२) इति श्रुतिप्रदर्शितसातत्यलिङ्गस्य ‘एवंविदे’ इति विद्यापुरुषयोः समभिव्याहाररूपवाक्यस्य च प्रकरणाद् बलीयस्त्वान्न स्वातन्त्र्यपक्षबाध इति ‘श्रुत्यादिबलीयस्त्वाच्च न बाधः’ (ब्र.सू. ३.३.४५) इति सूत्रेणोत्तरमुच्यते।

‘अनुबन्धादिभ्यः’ इति सूत्रस्य परोक्तार्थः

‘मनसैवाधीयन्त मनसाऽचीयन्त मनसैव ग्रहा अगृह्यन्त मनसाऽस्तुवन् मनसाऽशंसन् यत्किञ्च यज्ञे कर्म क्रियते यत्किञ्च यज्ञियं[1] कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयं क्रियते’ (अ.र. १०.५.३.३)। ते अग्नयो मनश्चिदादयः मनसैवाधीयन्त[2] अभिहिता चिताश्च। तेष्वग्निषु ग्रहा अगृह्यन्त गृहीताः। अस्तुवन् स्तोत्रं कृतवन्त उद्गातारः। आशंसन् शंसनं कृतवन्तो होतारः। किं बहुना यज्ञे यत्किञ्च आरादुपकारकं कर्म क्रियते, यच्च याज्ञियं यज्ञनिष्पत्त्यर्थत्वेन यज्ञाङ्गसन्निपत्योपकारकं कर्म क्रियते तन्मनसैव। तदेवं मनोमयेषु मनश्चिदादिष्वग्निषु अध्ययनचयनग्रहणस्तवनशंसनादिक्रियाङ्गजातं मनोमयं क्रियत इत्यादिश्रुत्या क्रियावयवानामध्ययनादीनां मनोव्यापारेष्वनुबन्धात् सम्बन्धात्[3]। आदिशब्दात् पूर्वोक्तादतिदेशाद्वाक्याच्च नाग्नीनां कर्मशेषत्वम्। यथा प्रज्ञान्तराणां शाण्डिल्यविद्याप्रभृतीनां स्वेन स्वेनानुबन्धेनानुबध्यमानानां कर्मभ्यः प्रज्ञान्तरेभ्यश्च पृथक्त्वम्। तच्छेषताभावादित्यर्थः। दृष्टश्चावेष्टे राजसूयप्रकरणपठिताया वर्णत्रयानुबन्धाया राजकर्तृकस्य राजसूयस्य प्रकरणादुत्कर्षः। ‘क्रत्वर्थायामिति चेन्न वर्णत्रयसंयोगात्’ (जै.सू. ११.४.७) इति जैमिनिना तदुक्तमिति कर्मशेषत्वाभावे ‘अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टिश्च तदुक्तम्’ (शाङ्करभाष्ये ब्र.सू. ३.३.५०) इत्यनेन हेत्वन्तरमुच्यते।

१. म. याज्ञिकं २. क. अभिधीयन्ते
३. म. सम्बन्धनात्

न सामान्यादिति सूत्रस्य परोक्तार्थः

मानसशब्दवाच्यत्वेन मानसग्रहसादृश्यात् न क्रियाशेषत्वं मनश्चिदादीनाम्। श्रुत्यादिभ्यः केवलपुरुषार्थत्वोपलब्धेः। 'स वा एष एव मृत्युर्य एष एतस्मिन् मण्डले[1] पुरुषः' (बृ.उ. ३.२.१०) इति 'अग्निर्वै मृत्युः' (बृ.उ. ३.२.१०) इति चाग्न्यादित्यपुरुषयोः मृत्युशब्दवाच्यत्वसाम्येऽपि यथा नात्यन्तसामान्यापत्तिः[2]; यथा च 'असौ वाव लोको गौतमाग्निस्तस्याऽदित्य एव समित्' (छा.उ. ५.४.१०) इत्यादिना समिदादिमत्त्वेन लोकाग्न्योः साम्येऽपि न लोकस्याग्निभावापत्तिरिति 'न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः' इति मानसग्रहप्रतिबन्दी परिह्रियते।

परेण च शब्दस्येति सूत्रस्य परोक्तार्थः

तत्र हि 'विद्यया तदारोहन्ति यत्र कामाः परागताः। न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः ॥' इति परेण पूर्वेण वाक्येन, तथा 'सोऽमृतो भवति मृत्युर्ह्यस्याऽत्मा भवति' इति विद्याफलेनैव मनश्चिदादीनुपसंहारतोत्तरेण वाक्येन च मनश्चिदादिविधायकशब्दस्य ताद्विध्यं केवलविद्याविधित्वेन कर्मविधानता। अग्निनानुबन्धस्तु सम्पाद्याग्न्यवयवभूयस्त्वात्। भूयांसस्त्वग्न्यवयवा विद्यायां सम्पादितव्या इत्येतस्मादेवाग्निना सम्बद्ध्यते विद्या न कर्माङ्गत्वादिति 'विद्यैव तु निर्धारणात्' (ब्र.सू. ३.३.४८) इत्यारभ्य 'परेण च शब्दस्य ताद्विध्यम्' (ब्र.सू. ३.३.५४) इत्येतदन्तां सप्तसूत्रीं 'अनुबन्धादिभ्यः' (ब्र.सू. ३.३.५१) इत्यस्य पृथक्सूत्रत्वानाश्रयणेन षट्सूत्रीं विधाय पूर्वसूत्रद्वयप्राप्तपूर्वपक्षनिरासायैकाधिकरणतयोभयेऽपि व्याचख्युः।

१. म. एतस्मिन्नन्तरे। २. 'साम्यापत्तिः' इति शाङ्करभाष्ये।

तन्निरासः

अत्र यद्यपि [1]व्याक्रियामात्रमाकर्णयतो निराक्रियाबुद्धिः स्फुटैव। मादृशानां पुनस्तत्र प्रवृत्तिरनुचितैव प्रतिभाति। तथाऽप्यनादिकालादागतिमालोच्य पूर्वाचार्यैः निराकृतत्वान्निराक्रिया प्रारभ्यते।

तत्र किमेतेषां सूत्राणां स्थितस्य गतिश्चिन्तनीयेति न्यायमनुसृत्यैवं वृत्तिरारभ्यते उत तद्गतस्वारस्यपर्यालोचनया। नाऽद्यः। सूत्रत्वव्याघातात्। मद्रीत्याऽवश्यबहुप्रमेयप्रतिपिपादयिषया पृथक्पृथगधिकरणत्वेन बहुशाखानिर्णायकत्वसम्भवे कूपमण्डूकवत् स्वल्पज्ञेन यथाकथञ्चिद् योजितानां सूत्राणामनादरणीयत्वप्रसङ्गाच्च। शाण्डिल्यविद्यादेः प्राणाग्निहोत्रादेरिव चेह विशिष्योक्तिमन्तरेणाऽपि स्वातन्त्र्यस्य मनश्चिदादेरेकस्यैव विषये बहून्यपि सूत्राणि प्रवर्तयतस्तव वृत्तिकारत्वव्याघाताच्च। 'लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि' (ब्र.सू. ३.३.४५) इति पूर्वसूत्रे लिङ्गभूयस्त्वोपपादनायोदाहृतानामेव 'तद्यत्किञ्चेमानि भूतानि' (अ.र. १०.५.३), 'तान् हैतानेवंविदे' (अ.र. १०.५.३.१२) इत्यादीनां वाक्यानां 'विद्यैव तु निर्धारणात्' (ब्र.सू. ३.३.४८) इत्यनेनाप्युदाहरणाद् विद्यासूत्रवैयर्थ्याच्च। तत्पुरस्तादृर्शितं लिङ्गभूयस्त्वादित्यत्रेति दर्शनसूत्रभाष्ये स्वयमेव वैयर्थ्याङ्गीकारेण तदनन्तरसूत्रोपयोगादर्शनाच्च। एवं 'तद्धि बलीयः' इत्यनेनैव प्रकरणदौर्बल्यस्य स्थितत्वात् पुनरिह बाधकशङ्काया अनुदयात् श्रुत्यादिसूत्रं व्यर्थमेव। नह्यव्यवहितोक्तस्य स्मरणमपेक्षितम्। बाधकोद्धारस्येदम्प्रथमत्वाच्चशब्दायोगश्च। श्रुत्यादिशब्देनापि लिङ्गशब्देन गृहीतस्यैव ग्रहणादवैरूप्याय लिङ्गबलीयस्त्वाच्चेति विन्यासापत्तिश्च। साधकोक्तिसमाप्त्यनन्तरमेव बाधकोद्धारावसर इत्यस्यात्र निवेशायोगश्च[2]।

१. प. व्याक्रियाक्रियाम्। २. प. निवेशायोगाच्च।

'मनसैवाधीयन्ते तेषामेकैक एव' (अ.र. १०.५.३.११) इत्यादेरनुबन्धादिशब्दगृहीतस्य श्रुत्यादिबलीयस्त्वादित्यनेनैव ग्रहसम्भवेन अनुबन्धसूत्रं च व्यर्थम् । शाण्डिल्यविद्यादीनां कर्मप्रकरणानधीतत्वेन तत्र पृथक्त्वेऽपीह वैषम्याद् दृष्टान्तवचनमसङ्गतम् । दृष्टश्चोत्कर्ष इति सङ्गतम् । स्वातन्त्र्यस्य क्रियाशेषत्वाभावस्य प्रकृतत्वात् । 'दृष्टश्चावेष्टे तदुत्कर्षः' इत्यनेनैव तत्सङ्ग्राहकसूत्रस्यापि ग्रहणात् तदुक्तमित्यस्य वैयर्थ्याच्च । उत्तरसूत्रे पूर्वसूत्रे च बाधकपरिहारान्मध्ये साधकान्तरोक्त्यनुपपत्तिश्च । प्रकरणदौर्बल्येनैव मानसग्रहप्रतिबन्दीनिरासादनन्तरसूत्रं च व्यर्थम् । अग्न्यादित्यपुरुषवदिति निर्देष्टव्ये मृत्युवदिति निर्देशासङ्गतिः । लोकस्य ह्यग्निभावापत्तिश्चेति । नहि 'लोकापत्तिः' इत्यस्य व्याख्यानं च लोकोत्तरप्रज्ञाविजृम्भितम् । दृष्टान्तान्तरग्रहणेऽपर्यवसानप्रसङ्गश्च[1] । निदर्शनान्तरवत्त्वज्ञापकवत्त्वादेरभावाच्च[2] । बाधकपरिहारार्थत्वेन श्रुत्यादिबलीयस्त्वादित्यनन्तरमेव सङ्गतमिति क्रमविरोधः स्फुट एव । परस्तात् पुरस्ताद् वचनमपि लिङ्गभूयस्त्वादित्यनेनैव गृहीतत्वात् तदनन्तरसूत्रमपि व्यर्थमेव । शब्दपदवैयर्थ्यं च । तस्मान्नैवं सूत्राणामर्थः ।

टीकायां पूर्वपक्षीयपृथग्दृष्टिन्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- पृथग्दृष्टिन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्- '"**भक्तिरेवैनम्" इति भक्तेरेव पृथङ्मोचकत्वदर्शनान्नेशकृत्य[3]मिति न मन्तव्यम्**' (न्या.वि.) इति वाक्यमैकार्थ्याद् भाष्येण सह व्याचष्टे- **भक्तिसामर्थ्येनैवेति** ॥ फलमाह- **एवं साधनेति** ॥ न तस्याव्यक्तत्वमुपलक्षणम् । कृत्याभावादसत्त्वमित्यपि द्रष्टव्यम् । विवरणं चोपन्यासनिगदव्याख्यानम् ।

१. क. 'प्रसङ्गाच्च' । ४. म. अभावश्च ।
३. म. नेशस्य कृत्यम् ।

टीकायां सिद्धान्तीयानादिगुणविस्तरन्यायस्य व्याख्यानम्

अनादिगुणविस्तरन्यायं सप्रमाणं विवृण्वत्-

'"**अनादितो गुणाः सन्तो भक्त्याद्या नह्यमूमुचन् ।**
जीवं तद्गुणसुव्यक्तिं कृत्वैनं मोचयेद्धरिः ॥
कश्चिन्न मोचयेद्वाऽसौ स्वातन्त्र्यं तस्य तेन हि ।
भक्तिवाक् करणत्वेन सावकाशेशवागथ ।
भक्त्यैनं मोचयेद् विष्णुरिति मानत्वमेष्यति ॥"

इति ब्रह्मतर्कवचनादनादिगुणविस्तरे सत्यप्यव्यक्त्यादिना तदिच्छां विना मोक्षाप्राप्तेः' (न्या.वि.) इति वाक्यं व्याकुर्वन्नधिकरणार्थमुपसंहरति- **अत इति** ॥ 'कश्चिन्न मोचयेद् वाऽसौ' (न्या.वि.उदाहृतब्रह्मतर्कवचनम्) इत्युक्तदिशा पुरुषशक्तिसाध्यत्वाभावादित्यर्थः । 'नह्यमूमुचन्' इत्यन्तर्णीतणिजन्तम् । अथशब्दः समुच्चये । यत ईशवाक् सर्वोऽपि शब्दराशिरीशवाचकः अतश्च भक्तिवाक् सावकाशेत्यन्वयः । 'भक्त्यैनं मोचयेद् विष्णुः' (न्या.वि. उदाहृतब्रह्मतर्कवचनम्) इत्येतत् 'भक्तिरेवैनं नयति' (माठरश्रुतिः) इति श्रुतेरुक्तपक्षद्वयानुसारेण निर्गलितार्थकथनम् । 'करणत्वेन सावकाशा' इत्यस्य विवरणम्- **भक्त्यैनं मोचयेदिति** ॥ विष्णुरिति चेशवागित्यस्येति ध्येयम् । निगदव्याख्यानमन्यद्विवरणम् ।

॥ इति ताद्विध्याधिकरणम् ॥ ३४ ॥

॥ अथ एकाधिकरणम् ॥ ३९ ॥

सूत्रभाष्यम्

जीवांशानां पृथगुत्पत्तेर्नानादियोग्यतापेक्षेति न मन्तव्यम् । कुतः ?

॥ ॐ एक आत्मनश्शरीरे भावात् ॐ ॥
॥ ३- ३- ५५ ॥

अंशांशिनोरेकत्वमेव । अंशिकर्मविनिर्मितशरीर[१] एवांशस्य भावात् । ॥ ५५ ॥

॥ ॐ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॐ ॥
॥ ३-३-५६॥

ज्ञानादिभावे[२] विद्यमानेऽपि नांशांशिनोः पृथग्भाव एव । तदुपासनादि-भोगादंशस्य । परमसंहितायां च -

'अंशिनस्तु पृथग्जाता अंशास्तस्यैव कर्मणा ।
पुनरैक्यं प्रपद्यन्ते नात्र कार्या विचारणा' इति ॥ ५६ ॥

॥ इत्येकाधिकरणम् ॥ ३९ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवद्दर्शनसाधनोपासनस्य योग्यतासापेक्षत्वसाधनादस्ति शास्त्रादि-सङ्गतिः । अन्यथोपास्त्यव्यवस्थाप्रसङ्गात् तत् समर्थनीयम् । प्रकृतोपासनादि

१. ह. अंशिकर्मनिर्मितशरीरे । २. ह. ज्ञानादिभेदे ।

विषयः । योग्यतापेक्षं न वेति सन्देहः । योग्यायोग्यक्रियादर्शनं सन्देह-बीजम् ।

पूर्वपक्षः

पूर्वपक्षयति- **जीवेति** ॥ नोपासनाद्यर्थं योग्यतापेक्षाऽस्ति । योग्यता हि भवन्ती अनादिर्भवेत् । अन्यथा तदुपासनादेरप्यागन्तुकत्वसम्भवात् । नचा-नादित्वं योग्यताया युज्यते । इन्द्रादिजीवांशानामर्जुनादीनां योग्यतायास्तद-भावात् । तेषामेवोत्पत्तिमत्त्वेन तद्धर्मस्यानादित्वायोगात् । नचांशिनोऽनादि-त्वादंशस्योत्पत्त्यभावः । अंशांशिनोः पृथक्त्वात् । कुतः? अंशिनि ज्ञानिनि सुखिनि दुःखिनि चांशे ज्ञानाद्यभावेनांशस्यांशिवर्त्मनाऽगन्तृत्वात्[१] । अन्यथा ज्ञानादिभेदो न स्यात् । अतोऽशांशिनोः पृथक्त्वादंशस्योत्पत्तेरनादि-योग्यताभावादुपासनादेर्योग्यतापेक्षा नास्तीति तदव्यवस्थितमिति भावः ।

सिद्धान्तः

पूर्वपक्षं प्रतिषेधति- **नेति** ॥ कुतो न मन्तव्यमित्याक्षिपति- **कुत इति** ॥ तत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे- **एक इति** ॥ अस्त्येव सर्वेषामुपासनादौ योग्यतापेक्षा । नचांशस्योत्पत्तिमत्त्वेऽनादियोग्यताभावः । अंशोंऽशीत्येक एवेत्यंशस्योत्पत्त्यभावात् । तदैक्यमेव कुतः? आत्मनोंऽशिनः कर्मनिर्मित-शरीरेंऽशस्य वर्तमानत्वात् । नच भेदे तद् युक्तम् । अकृताभ्यागमकृत-विप्रणाशप्रसङ्गात् । नचांशस्य पृथक्कर्मास्ति । नचाकर्मनिमित्तः शरीरसंसर्गो युक्तः । अपवर्गाभावप्रसङ्गादिति भावः ॥ ५५ ॥

ज्ञानादिभेदादंशांशिनोर्भेद एव । अतो नांशस्योत्पत्तिमतोऽनादियोग्यता युक्तेत्याशङ्कां परिहरत् सूत्रं पठित्वा व्याचष्टे- **व्यतिरेक इति** ॥ यथोपलब्ध्यादौ

१. क. वर्त्मागन्तृत्वात् ।

व्यतिरेकस्तथांऽशांशिनोरपि भेद एवेति न वाच्यम् । अल्पे ज्ञानादावनुसन्धानाभावेऽपि प्रधानसाधनोपासनादिफलानुसन्धानात् । अंशगतज्ञानादेरंशिनाऽनुसन्धीयमानत्वात् । अंशिगतस्य चांऽशेन सर्वस्याननुसन्धानमीश्वराचिन्त्यशक्त्यायत्तमिति भावः । अत्र स्मृतिं प्रमाणयति- परमेति ॥ अतोऽस्त्येव सर्वेषामुपासनादावनादियोग्यतापेक्षेति युक्ता तद्व्यवस्थेति सिद्धम् ॥ ५६ ॥

॥ इत्येकाधिकरणम् ॥ ३५ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ एक आत्मनश्शरीरे भावात् ॐ ॥ ३-३-५५ ॥

सङ्गतिश्चिन्ताक्रमश्च

अनुबन्धाधिकरणे

'तथाऽप्यनादिसंसिद्धभक्त्यादिगुणपूगतः ।
लभेद् गुरुप्रसादं च तस्मादेव च तद्भवेत् ॥'

(सू.भा.उदाहृतप्रमाणवचम् ३.३.५१)

इति हरिगुरुभक्तिशमदमाद्यात्मकानादियोग्यतानुसारेण गुरुप्रसादद्वारा तत्तद्योग्यबिम्बोपासनया दर्शनं भवतीत्युक्तं योग्यतानादित्वमत्र समर्थ्यते। अर्थादुपासनस्यानादियोग्यतासापेक्षत्वसमर्थनमपि प्रकरणाद् भवतीति टीकायामितिकर्तव्यतापेटिकादिसङ्गतिसूचनयोपासनयोग्यतासापेक्षत्वसमर्थनादित्युक्तम् । अत एव 'नचानादित्वं योग्यतया युक्तम्' इति तदाक्षेपेण पूर्वपक्षप्रवृत्तिष्टीकायामेव दृश्यते । 'अनादितो गुणाः सन्तो भक्त्याद्या नह्यमूमुचन्' इत्यव्यवहिते ताद्विध्यनये भक्त्यादीनामेव पुनः प्रत्यभिज्ञानात् तत्र श्रुतमनादित्वं युक्तमयुक्तं वेति मुखतश्चिन्त्यते । उपासनं भक्तिर्वैराग्यं चानादियोग्यतासापेक्षं

न वेति तात्पर्यतश्चिन्त्यत इति पादसङ्गतिरनन्तरसङ्गतिश्चोह्या ।

तथाचोपासनादि योग्यतासापेक्षं[1] न वा । तदर्थं योग्यताशब्दितभक्त्यादेरनादित्वं युक्तं न वा । तदर्थमिन्द्रादिजीवांशानामर्जुनादीनामुत्पत्तिरुत न । तदर्थमंशांशिनोर्भेद उताभेद इति सन्देहः ।

पूर्वपक्षः

अंशिस्थज्ञानसुखयोरंशेनाज्ञेयता यतः ।
भेदस्ततो जनिरपि योग्यता सादिरिष्यते ॥ इति पूर्वः पक्षः ।

सिद्धान्तः

अंश्यदृष्टोत्थदेहे यदंशो भुङ्क्तेऽभिमानतः ।
अतोऽभिन्ना योग्यताऽपि न सादिरिति सिद्ध्यति ॥

सूत्रार्थः

सूत्रार्थस्तु- अंशिन इन्द्रादेः कर्मनिर्मिते **शरीरे आत्मनः** अंशस्यार्जुनादेः **भावात्** वर्तनादिति । **उपलब्धिवत्** सप्तम्यन्ताद् वतिः । सुखस्याप्युपलक्षणम् । ज्ञानसुखयोरंशांशिगतयोरिव **व्यतिरेकः** भेदः अंशांशिनोः **न तु** नास्त्येव । किन्त्वभेद एव । अंशिनो **भावः** स्वकृतविहितनिषिद्धक्रियाफलभोक्तृत्वाख्यः स्वभावः स्वरूपं तेन धर्मवत्त्वात् अंशस्य तत्कृतोपासनादिफलभोक्तृत्वादित्यर्थः । आद्ये साधकं द्वितीये बाधकबाधनं क्रियत इति तयोः क्रमः ।

परमतीयाधिकरणानुवादः

अत्रान्यैर्व्याख्यातम् । देह आत्मा न वेति संशये[2]

---

१. क. अनादियोग्यतासापेक्षम् ।

२. 'देह एवेति पूर्वपक्षः' इति पाठः सम्भाव्यते ।

तनुरात्मा मनुष्योऽहमिति प्रत्यक्षदर्शनात्।
देहधर्मैरहङ्कारसामानाधिकरण्यतः॥

इति प्राप्तेऽभिधीयते-

अयावद्देहभावित्वात् तद्विशेषगुणस्थितः।
न भवेदीक्षितृत्वाच्च पुरुषान्तरविद्यया॥ इति।

तन्निरासः

तन्न। देहातिरिक्तात्मसाधनस्य प्रासङ्गिकत्वव्युत्पादनेन पादसङ्गत्यभावस्य तेनैव व्युत्पादितत्वात्। प्रासङ्गिकार्थव्युत्पादनाय सूत्रद्वयोपयोगवर्णनायोगाच्च। समयपादे चार्वाकमतस्य निरस्तत्वाच्च।

यच्चाऽन्यस्यैकदेहमात्रात्मवादिनो लोकायतिका आत्मनो देहातिरिक्तस्याभावं मन्यन्ते। कुतः? शरीरे भावात्। शरीरे सति चैतन्यस्य भावात्। यद्धि यस्मिन् सति भवति तत् तद्धर्मत्वेनावसीयते। यथाऽग्निधर्मावौष्ण्यप्रकाशौ। प्राणचेष्टादिश्चैतन्यस्मृत्यादयश्च देहे सत्युपलभ्यमाना देहस्यैव धर्माः स्युः। अतस्तद्धर्मी देहातिरिक्त आत्मा नाङ्गीकरणीय इति हेतुमाचक्षते इति लोकायतिकमतानुवादपरतया व्याख्यानं, तच्चायुक्तम्। अक्षरानुगुण्याभावात्। बह्वध्याहारप्रसङ्गाच्च। नच प्रत्यक्षप्रमाणवादी अनुमानमङ्गीकरोति। हेतुश्चायं व्यधिकरणः। नहि प्राणचेष्टादीनां शरीरे सति सत्त्वरूपहेतुः शरीरमेवाऽत्मेति प्रतिज्ञाविषये पक्षेऽस्ति। अयुक्तश्च। नहि तत्सत्त्वे सत्त्वमात्रं तद्धर्मत्वज्ञापकम्। किन्तु तदभावे तदभावाद्यपि। नचैवंविधो हेतुः सूत्रकृताऽनुवादार्हः। मद्रीत्या सिद्धान्तसूत्रत्वसम्भवे तद्वैपरीत्यायोगाच्च[१]।

अत एव न त्वव्यतिरेकः। किन्तु देहादात्मनो व्यतिरेक एव। तद्भावभावित्वाद्

१. म. तद्वैपरीत्यायोगश्च, क. तस्य परित्यागायोगश्च।

भूतविशेषगुणानां यावद्भूतभावित्वादित्यनन्तरसूत्रयोजनं च निरस्तम्। वैयधिकरण्यात्। नहि यावद्भूतभावित्वं पक्षीकृते आत्मनि शरीरे तद्धर्मेऽतिरेके वाऽस्ति। देहातिरिक्तत्वरूपसाध्येन तद्भावभावित्वरूपहेतोः सहचारादर्शनेन व्याप्यत्वासिद्धेश्च। यावच्छरीरभावित्वं शरीररूपादौ साध्यसचरितं दृष्टमिति चेन्न। तद्रूपादौ साध्यासम्मतेः। अयावच्छरीरभाविन्यपि सङ्ख्यापरिमाणादिसामान्यगुण आत्मातिरिक्तत्वसद्भावेन व्यतिरेकव्यभिचाराच्च। 'ज्ञानादिः शरीरविशेषगुणः यावच्छरीरभावित्वाद् रूपादिवत्' इति प्रयुज्यत इति चेन्न। व्यतिरेक इत्यस्योपलब्धिवदित्यस्य चानानुगुण्याद्वैयर्थ्याच्च। प्रकृतात्मभेदसाधनोपयोगाभावाच्च। यस्य ज्ञानादिधर्मः। स तावदात्मा। देहस्य च न ज्ञानादिधर्मः। देहसद्भावेऽपि मृत्यवस्थायां ज्ञानाभावादितीह सूत्रकारेणेदमुक्तमिति निरस्तम्। सङ्गत्यभावात्। नह्यत्र पूर्ववादिनोक्तं देहात्मैक्यं तदुपयुक्तं वा किञ्चिन्निरस्यते। विमतं शरीरमात्मा ज्ञानवत्त्वादिति पूर्वसूत्राभिप्रेते प्रयोगेऽसिद्ध्युद्भावनाय ज्ञानं न शरीरधर्म इति साध्यत इति कथमसङ्गतिरिति चेन्न। तद्भावभावित्वादिति सूत्राक्षरविरोधात्। नहि ज्ञानं न शरीरधर्मः यावच्छरीरभावित्वादिति प्रयोक्तुं शक्यते। विरोधात्। तदर्थमेव सौत्रस्य हेतोस्तदभावलक्षकत्वमिति चेन्न। सति गत्यन्तरे तस्यान्याय्यत्वात्। अयावच्छरीरभाविनि सङ्ख्यादौ शरीरधर्मत्वाभावाभावेन व्यभिचाराच्च। सर्वथोपलब्धिवदित्यस्य वैयर्थ्याच्च।

ननु चात्यन्तं देहस्योपलब्धावुपयोगो दृश्यते। निश्चेष्टेऽपि तस्मिन् देहे स्वप्ने नानाविधोपलब्धिदर्शनात्। तस्माच्छरीरे सति ज्ञानं [१]भवतीत्येतावता तन्न शरीरधर्मः। तथा सति सत्सु प्रदीपादिषूपकरणेषूपलब्धिर्भवत्यसत्सु च न भवतीति तद्धर्मोऽपि स्यात्। तथाच ज्ञानधर्मी शरीरादन्योऽङ्गीकर्तव्य इति शरीरे भावादिति

१. म. भविष्यति।

पूर्ववाद्युक्तहेतोरसिद्धिरनेनोच्यत इति चेन्न । शरीरे सति ज्ञानमस्तीति सौत्र-हेतोर्दोषानुक्तेः । शरीरे सत्येव भवतीति व्याख्यानेन व्यतिरेकव्यभिचारोऽनेनोच्यत इति चेद् वतिस्वारस्यायोगः । नञोऽन्वयाभावाच्च । अव्यतिरेक इत्यनेना-ध्याहृतेनान्वये व्यतिरेकपदवैयर्थ्यम् ।

शैवमतानुवादः

केचिच्छैवाश्चेदं सूत्रद्वयं पूर्ववदेवाऽद्येन पूर्वपक्षमुत्तरेण सिद्धान्तं च वदन्तः प्रत्यगात्मनः आत्मतया परमात्मोपास्य इति वक्ष्यते- आत्मेति तूपगच्छन्तीति । तत्र किं प्रत्यगात्मनः शरीरे वर्तमानस्य कर्तृत्वभोक्तृत्वादिविशिष्टरूपमनु-सन्धेयमुत प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणकं यथावस्थितं रूपमिति संशये वर्तमानस्य यादृशं रूपं तदेवानुसन्धेयमिति पूर्वः पक्षः ।

'तत्त्वमसि' (छा.उ. ६.८.७, ६.९.४), 'स त आत्माऽन्तर्याम्यमृतः' (बृ.उ. ५.८.२३) इति प्रत्यगात्मन आत्मतया परमात्मोपास्य इति प्रत्यगात्म-स्वरूपमुपासनान्तर्गतं 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा.उ. ८.३.४) इति । अतः प्रजापतिवाक्योदितं यथावस्थितं स्वरूपमेवानुसन्धेयमिति सिद्धान्त इति व्याचख्युः ।

तन्निरासः

तन्न । कर्तृत्वभोक्तृत्वादेरपि जीवस्य निजधर्मत्वेन 'कर्ता शास्त्रार्थवत्त्वात्' (ब्र.सू. ३-३-३३) इत्यादौ व्यवस्थापितत्वात् ।

किञ्च कर्तृत्वभोक्तृत्वादीनां स्वातन्त्र्येणोपास्यत्वं निषिध्यत उत सर्वथाऽ-प्युपासनम् । नाऽद्यः । अपहतपाप्मत्वादीनामपि भगवदायत्ततयैवोपास्यत्वेऽपि स्वातन्त्र्येण तदभावात् । न द्वितीयः । भगवदायत्ततया कर्तृत्वादीनामप्य-वश्योपासनीयत्वात् । अन्यथा स्वस्वामिभाव एवानुपासितः स्यात् । शरीरे

वर्तमानस्याऽत्मनः भावात् कर्तृत्वादिविशिष्टतया सत्त्वात् कर्तृत्वादिकमेवोपा-स्यमित्येके मन्यन्त इत्याद्यस्य व्याख्यानमप्ययुक्तम् । मिथ्योपासनस्याप्यङ्गी-कृतत्वेन कर्तृत्वादेः सत्त्ववर्णनस्योपयोगादर्शनात् । शरीर इत्यस्य वैयर्थ्याच्च ।

न कर्तृत्वादिविशिष्टमनुसन्धेयम् । किन्तु सांसारिकस्वरूपान्मुक्त-स्वरूपान्मुक्तस्वरूपस्य यो व्यतिरेकोऽपहतपाप्मत्वादिः स एवानुसन्धेयः । स्वरूपप्राप्तेरपहतपाप्मत्वाद्युपासनान्तर्भावित्वात् । यथा ब्रह्मस्वरूपोप-लब्धेर्यथावस्थितब्रह्मोपासनभावित्वमिति द्वितीयस्य च व्याख्यानमयुक्तम् । अपहतपाप्मत्वादेः व्यतिरेकशब्देन ग्रहणायोगात् । त्वन्मते 'ओमित्येतदक्षर-मुद्गीथमुपासीत' (छा.उ. १.१.१) इत्यादौ ओङ्कारे उद्गीतदृष्टिः कार्येत्येवमुपा-सनावाक्यानामर्थं वदतो यथास्थितोपासनानिर्बन्धाभावेन यथास्थितब्रह्मोपासन-यैव ब्रह्मोपलब्धिरित्यस्यायुक्तत्वेन दृष्टान्तासिद्धेश्च ।

टीकायां पूर्वपक्षीयागम्यवर्त्मन्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- अगम्यवर्त्मन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत्- **'नचांशिमार्गस्यांशेनागम्यत्वात् तयोर्भेदः'** (न्या.वि.) इति वाक्यं व्याचष्टे- **अंशिनीति** ॥ **'अंशिमार्गस्यांशेनागम्यत्वात्'** इत्यस्यार्थो- **अंशस्यांशिवर्त्मागन्तृत्वादिति** ॥

सिद्धान्तीयसाधनोत्तमतान्यायस्य व्याख्यानम्

साधनोत्तमतेत्युक्तन्यायं विवक्षितांशन्यायेन विवृण्वत् '[1]**साधनोत्तमस्यांशिकृतस्यांशेन भुज्यमानत्वाददृष्टं[2] विना शरीराद्यनुपपत्तेः**' (न्या.वि.) इति वाक्यं व्याचष्टे- **प्रधानसाधनेति** ॥

॥ इत्येकाधिकरणम् ॥ ३९ ॥

---

१. साधनोत्तमस्यादृष्टस्य इति ह.पाठे । २. ह. अन्यथाऽदृष्टं विना

॥ अथाङ्गावबद्धाधिकरणम् ॥ ३६ ॥

सूत्रभाष्यम्

॥ ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ ॥

॥ ३-३-५७ ॥

ब्रह्माद्यङ्गदेवतावबद्धोपासनादि प्रतिशाखं प्रतिवेदं च नोपसंह्रियते । हिशब्दात् -

'समत्वाद् वोत्तमत्वाद् वा नाङ्गदेवाद्युपासनम् ।
उपसंहार्यमित्याहुर्वेदसिद्धान्तवेदिनः ॥'

इति ब्रह्मतर्कवचनात् ॥ ५७ ॥

॥ ॐ मन्त्रादिवद् वाऽविरोधः ॐ ॥ ३-३-५८ ॥

सर्वदेवतामन्त्रा यथाऽधीयन्त एवमविरोधो वा ।

'उपासनाऽङ्गदेवानां परमाङ्गतया भवेत् ।
उपसंहृतिर्विशेषे तु फलानामन्यथा न तु ।
पुरुषाणां विशेषाद् वा यथायोगं भविष्यति ॥'

इति बृहत्तन्त्रे[१] ॥ ५८ ॥

॥ इत्यङ्गावबद्धाधिकरणम् ॥ ३६ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनोपासनस्य यथायोग्याङ्गदेवतोपासनयुक्तत्वेन

१. ह. इति च बृहत्तन्त्रे

कर्तव्यताप्रतिपादनादस्ति शास्त्रादिसङ्गतिः । अन्यथा तत्प्रतिपादकवेद-वैयर्थ्यस्योक्ततारतम्याभावस्य च प्रसङ्गात् प्रतिपादनीयमेतत् । प्रकृतं भगवदुपासनमेव विषयः । अन्यदेवतोपासनयुक्तं वा कर्तव्यं केवलं वेति सन्देहः । ब्रह्मोपासनविधेः साधारण्यं सन्देहबीजम् । अन्यदेवतोपासने च तस्य गुणोपसंहारपूर्वकत्वात् किमेकस्य श्रुतिप्रतीतगुणाः सर्वेषूपसंहर्तव्या न वेति सन्देहः । लौकिकपुरुषपूजादौ द्वैविध्यदर्शनं सन्देहबीजम् ।

पूर्वपक्षः

केवलमेव ब्रह्मोपासनं कर्तव्यमिति पूर्वः पक्षः । 'तमेवैकं जानथाऽत्मान-मन्या वाचो विमुञ्चथ' (मुण्ड.उ. २.२.५), 'पूजयेन्नान्यदेवताः' इत्यादेरन्यदेवतोपासने चैकस्य प्रतीतगुणाः सर्वेषूपसंहर्तव्याः । देवत्वादि-गुणानां सर्वेषूपसंहारदर्शनात् । अतोऽन्यदेवानामनुपास्यत्वात् तदभि-धायकवेदवैयर्थ्यम् । उपास्यत्वे वा साम्येनोपास्यत्वान्नोक्ततारतम्योप-पत्तिरिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **अङ्गेति** ॥ ब्रह्मादिदेवतोपासनपरि-चर्यादि कार्यमेव । नच श्रुत्यादिविरोधः । तत्र प्राधान्येनोपासनस्यैव निषिद्धत्वात् । अङ्गत्वेनोपासनस्याभ्युपगतत्वात् । उपसंहारे तु विशेषोऽ-स्ति । सर्ववेदानां सर्वशाखासूक्तं यद् ब्रह्माद्यङ्गदेवतासम्बन्धिगुणजातं तत्सर्वं रुद्रादिषु नोपसंहार्यम् । किन्तु योग्यमेवोपास्यम् । यथा खलु भगवद्वाचक-वाक्यानां न सर्वेषामन्यत्रान्वयः, अपि तु योग्यानामेवेति भावः । कुत एतदित्यत आह- **हिशब्दादिति** ॥ सूचितादिति शेषः । अङ्गदेवताद्युपासनं कार्यम् । यावद् ब्रह्मादीनां गुणजातं तत्सर्वं रुद्रादिषु नोपसंहार्यम् । कुतः? भवेत् साम्येनोपासनं युक्तं यदि तेषां साम्यमेव स्यात् । नैतदस्ति । केषाञ्चित्

समत्वात् केषाञ्चिदुत्तमत्वात् । तत्कुतः? वेदसिद्धान्ते नानागुणत्वेन तेषां दृष्टेरिति भावः ॥ ५७॥

एकत्र प्रतीतानां गुणानामन्यत्रोपसंहारेऽविरोधसमर्पणम्

एवमेकत्र प्रतीतानां सर्वगुणानामन्यत्रोपसंहाराभावमुक्त्वोपसंहारं चाभ्युपगच्छत् सूत्रं पठित्वा व्याचष्टे- **मन्त्रेति** ॥ यथाऽग्न्याद्यधमदेवताविषयं मन्त्रविद्यादिकं ब्रह्माद्युत्तमदेवताविषयत्वेनाधीयतेऽध्येतृभिरुत्तमानां तत्प्रतिपाद्यत्वात् । एवमधमगुणानामुत्तमेषूपसंहारे न कश्चिद् विरोधः । तेषु तद्गुणित्वादिति भावः । उक्तं चैतत्-

'देवता सर्वविद्यानां स्वयं नारायणः प्रभुः ।
ऋते तत्र प्रसिद्धश्च देवता श्रीस्तथाऽत्र च ॥
ऋते प्रसिद्धा ब्रह्मैव ततस्तेन क्रमेण च ।
पूर्वप्रसिद्धवर्जं तु शक्रान्ता देवता मताः ।
इन्द्रावरा विशेषेण लिङ्गेनैव पृथक् पृथक् ॥'

(ऋग्भाष्यम्)इति ।

यदुक्तं देवतोपासनं कार्यं यथायोग्यं गुणोपसंहारश्च कर्तव्यः इति तत् किं सर्वैः कार्यं न वेत्यपेक्षायामाह- **उपासनेति** ॥ भवेत् सर्वैः कार्येति शेषः । फलविशेषेऽतिशयितफलार्थम् । पुरुषविशेष उत्तमाधिकारित्वम् । फलविशेषस्तेषामेव । उपासकप्रतिपत्तौ साधन एवायं विकल्पः । यथायोग्यमेव च सा भवति । अतो यथायोग्यमङ्गदेवतानामुपास्यत्वात् सर्वं युक्तमिति सिद्धम् ॥ ५८॥

॥ इत्यङ्गावबद्धाधिकरणम् ॥ ३६ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॐ ॥

॥३-३-५७ ॥

एतदधिकरणविषयः सङ्गतिश्च

यथा गुणपूर्तिसिद्ध्यर्थं समन्वयसूत्रे प्रतिज्ञातस्य संशब्दार्थस्य वाच्यत्वस्य कार्त्स्न्यर्थस्य चेत्यनेकप्रमेयस्य प्रतिपादकस्येक्षत्यधिकरणस्य द्विपर्वत्वम्, अन्यथा गतिसूत्रस्य 'अनन्ता वै वेदाः' (श्रुतिः) इति सूत्रे वेदानामनन्तत्वेन[१] शाखान्तरेऽन्यथात्वे शङ्किते 'सर्वे वेदा युक्तयः' (ब्र.सू.भा. उदाहृतपैङ्गिश्रुतिः १.१.१०)इति श्रुत्या[२] प्रसिद्धशाखादृष्टान्तेनान्यत्रापि तदनुमानाच्छाखान्तरस्यापि प्रमाणत्वाच्च नैतच्छाखाविरोध इत्येवम्परत्वात् । सूत्रान्तराणां तु वाच्यत्वसाधकत्वाद् अधिकरणभेदः स्यात्, तथाऽत्रापि 'उपासनाऽङ्गदेवानां परमाङ्गतया भवेत्' (ब्र.सू.भा. उदाहृतबृहत्तन्त्रवचनम्) इति 'अङ्गावबद्धाः' (ब्र.सू. ३.३.५७) इति सूत्रांशव्याख्यानपरबृहत्तन्त्रवचनोदाहरणाद् वक्ष्यमाणरीत्या प्रमेयद्वयस्य सूत्राक्षरारूढत्वाच्च द्विपर्वत्वम् । अत एवात्राङ्गदेवतोपासनं यथायोग्यगुणोपसंहारश्च प्रतिपाद्यते ।

न केवलं भक्त्यादिगुणात्मकयोग्यताया अनादित्वं, किन्तु यथायोग्याङ्गदेवतोपासनाऽपीत्यत्र प्रतिपादनात् पेटिकासङ्गतिः । अभेदप्रतिकूलज्ञानानुसन्धानाभावादेः साधनोत्तमोपासनाद्यनुसन्धानेन विरोधात् यथा भेदसाधकत्वाभाव[३]स्तथा 'पूजयेन्नान्यदेवताः' इत्यादेरपि 'उपासनाऽङ्गदेवानां परमाङ्गतया भवेत्' (ब्र.सू.भा. उदाहृतबृहत्तन्त्रवचनम्) इत्यनेन विरोधान्नोपासनाभावसाधकत्वमित्यतिदेशनादनन्तरसङ्गतिः ।

---

१. क. वेदानामानन्त्येन । २. क. श्रुतौ । ३. क. भेदसाधनत्वाभावः

पूर्वपक्षः

ब्रह्मोपासनमेवैकं ज्ञानं संसाधयेद् यतः।
निन्दनादन्यपूजाया न कार्या सा कथञ्चन॥ इति पूर्वः पक्षः।

सिद्धान्तः

यस्माद्[1] द्वेष्टीत्यादिरूपान्निन्दनादनुपास्यता[2]।
प्राधान्यविषया निन्दा न सामान्यविरोधिनी॥

देवतान्तरगुणाम्नानावैफल्याय निषेधस्य प्राधान्याभिप्रायकत्वावधारणात्। तस्मात् परिवारतयाऽन्योपासनं कार्यमेव। ततश्च तत्प्रतिपादकवेदावैयर्थ्यम्। तत्तन्मन्त्रस्य तत्तत्कर्मणि विनियोगश्चेति सिद्धान्तः।

एतदधिकरणाभिमतावपरौ पूर्वपक्षसिद्धान्तौ

इदमधिकरणमसमाप्यैव पुनश्चिन्त्यते। प्रतिशाखं प्रतिवेदं च सर्वदेवतागुणोपसंहारेणैव सर्वदेवतोपासनं कार्यमुत यथायोग्यमिति। तत्र -

देवत्वचेतनत्वादिगुणजातं यथेष्यते।
वाणीपतित्वाद्यखिलमुपसंहार्यमिष्यते॥

वेदान्तरे शाखान्तरे च देवतान्तरनिष्ठतयाऽऽम्नातं देवत्वचेतनत्वपुंस्त्वशत्रुघ्नत्ववैष्णवत्वादिगुणजातं देवतान्तर उपसंह्रियत इत्यविवादम्। 'प्रदेवं देव वीतये' (तै.सं. ३.४.११.१६, मैत्रायणी.सं. ४.१०.६७) इत्युक्तस्य 'देवो वः सविता' (तै.सं. १.१.१.४) इत्यादिना देवतान्तरेऽप्याम्नानात्। तद्वदेव वाणीपतित्वाद्युपसंहरणीयं सर्वत्र। अन्यथा शाखान्तरोक्तगुणानां भगवत्युपसंहारो न स्यात्। तथाचोपसंहारनयविरोधः। नच देवतान्तरे तेषामभावः शङ्कनीयः। न्यायप्राप्तस्योपसंहारस्य हातुमशक्यतया मिथ्योपासनस्य चानर्थहेतुत्वेन तत्र

१. म. यस्तान्। २. म. अनुपासताम्

तत्सत्त्वस्याप्यङ्गीकार्यत्वात्। नच सर्वसामान्यापत्तिः। कथं हि न स्यादिति पूर्वः पक्षः।

अविरुद्धगुणोपास्तेः सम्भवेऽपि कुतो भवेत्।
विरुद्धानामुपास्तिश्चेत् स्याद् दोषाणामपीश्वरे॥

अङ्गदेवतानां श्रुता गुणाः देवदूतत्वहव्यवाट्त्वस्वाहापतित्वादयोऽग्न्याद्युत्तमदेवतासूपसंहर्तव्या इत्युच्यते, उत तन्निकृष्टास्वपि इति। नाऽद्यः। इष्टत्वात्। नान्त्यः। निकृष्टाग्न्यादिदेवताव्यापारे तदुत्तमानामिन्द्रादीनां स्वातन्त्र्यसम्भवेन तद्व्यापारघटितनिकृष्टदेवतागुणानामुत्कृष्टेषूपसंहारसम्भवेऽपि समाधिकदेवतागुणानां निकृष्टदेवतास्वसम्भवेन कथं सर्वाङ्गदेवतोपासनमपि सर्वोपसंहारेण। नह्येवं भगवति क्वचिद्व्यापारेऽस्वातन्त्र्यं, येन किञ्चिद्गुणायोग्यतया सर्वानुपसंहारः स्यादिति महान् विशेषः। अत एव सर्वाङ्गदेवतोपासनं सर्वोपसंहारेणेत्यत्र विकल्प आश्रीयते। यथाऽग्न्याद्यधमदेवताविषयमन्त्रविद्यादिकं ब्रह्माद्युत्तमदेवताविषयत्वेनाधीयतेऽध्येतृभिः, उत्तमानां तत्प्रतिपाद्यत्वात् एवमधमगुणानामुत्तमेषूपसंहारे न कश्चिद् विरोधः। नच मिथ्योपासनं, तेषु तद्गुणसम्भवात्। न वा सर्वगुणोपसंहारः कार्यः। उत्तमगुणानां निकृष्टेष्वसम्भवात्। यथोक्तम् -

'उपासनाऽङ्गदेवानां परमाङ्गतया भवेत्।
उपसंहृतिर्विशेषे तु फलानामन्यथा न तु।
पुरुषाणां विशेषाद्वा' (ब्र.सू.भा. उदाहृतबृहत्तन्त्रवचनम्) इति।

फलानां विशेषेऽतिशयितफलार्थं पुरुषाणां विशेषात् पुरुषविशेषैरुत्तमाधिकारिभिरुपसंहृतिः कार्या। नतु देवताव्यतिरिक्तैरतिशयितफलायोग्यैर्निकृष्टगुणानामप्युत्तमेषूपसंहृतिरित्यर्थः।

ननु देवानामेवातिशयितफलयोग्यत्वात् पुरुषाणां विशेषाद्वेति कथं विकल्प आश्रीयते। मैवम्। उत्तमाधिकारिणामुपसंहर्तृत्वप्रतिपत्तौ सत्यां तेषामेवोत्कृष्टासु

देवतासु उपसंहारः न निकृष्टास्वित्युक्तविधया ध्यानसाधनोपसंहार एवायं विकल्पो नतु उपासकपुरुषविकल्प इत्याश्रयणात्।

सूत्रार्थः

सूत्रार्थस्तु- अङ्गजत्वादङ्गत्वेन व्यपदेश्यासु ब्रह्मपरिवारदेवतासु **अवबद्धाः** तद्विषया उपासनाः सर्वैः कार्या इति शेषः। तु तत्रापि विशेषोऽस्ति। भगवदुपासनावत् **शाखासु** प्रतिशाखं **प्रतिवेदं** च न गुणानुपसंहृत्य कर्तव्या अङ्गावबद्धा उपासनाः। किन्तु तत्तद्देवतापरवाक्याभिहितगुणानेवोपसंहृत्य।

'समत्वाद्वोत्तमत्वाद्वा नाङ्गदेवाद्युपासनम्।
उपसंहार्यमित्याहुर्वेदसिद्धान्तवेदिनः॥'

(ब्र.सू.भा.उदाहृतब्रह्मतर्कवचनम्)

इति प्रमाणप्रसिद्धं हिशब्देनाऽहेति। द्वितीयसूत्रं निगदव्याख्यानम्। सामान्यपरमाद्यम्। द्वितीयं तु सूत्रं विशेषपरमिति तयोः क्रमोऽपि टीकायामेव स्फुटः।

अद्वैत्यभ्युपगतमङ्गावबद्धाधिकरणशरीरम्

अत्र परमतम्- 'ॐइत्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१), 'लोकेषु पञ्चविधं सामोपासीत' (छा.उ. २.२.१), 'उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थम्[1]' (ऐत.आ. २.१.२), 'इयमेव पृथिवी' (ऐत.आ.२.१.२), 'अयं वाव लोकः एषोऽग्निश्चितः' (अग्नि.र. १०.५.४.१) इत्येवमाद्या उद्गीथसामोक्थाग्निषु कर्माङ्गेषु प्रमाणादिदृष्टयः प्रतिशाखं विहिताः। तथा 'आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मथनाभ्यासात् पापं दहति पण्डितः॥' (कैवल्योपनिषत्-१५) इति कैवल्योपनिषदि दहरविद्याङ्गतया प्रणवाभ्यासः श्रूयते। 'अग्नीत्यादिना भस्म गृहीत्वाऽपिमृज्याङ्गानि[2] संस्पृशेत्। तस्माद्

१. म. तदिदमुक्थम् २. क. विमृज्याङ्गानि

व्रतमेतत् पाशुपतं पाशविमोक्षाय[1]' (अथर्वशिरसि) इत्यथर्वशिरसि पाशुपतविद्याङ्गतया भस्मोद्धूलनं श्रूयते। अन्यत्र च 'तिस्रो रेखाः प्रकुर्वीत' इति परविद्याङ्गतया त्रिपुण्ड्रधारणं श्रूयते। किमिमानि कर्माङ्गावबद्धानि विद्याङ्गावबद्धानि[2] च प्राणाद्युपासनादीनि[3] प्रणवाभ्यासादीनि च तत्तच्छाखागतष्वेवोद्गीथासु[4] दहरविद्यासु च भवेयुरथवा सर्वशाखागतेष्विति संशये उद्गीथादिसामान्यश्रुतेः प्रकरणोपनीतविशेषाकाङ्क्षत्वेन तदबाधकत्वादुपास्त्यादीनां व्यक्तिविशेषाकाङ्क्षायां स्वशाखागतस्य विशेषस्य सन्निधानात् तेनैवाऽकाङ्क्षानिवृत्तेर्न शाखान्तरगतोद्गीथाद्यपेक्षा। न च सन्निधानाच्छ्रुतेर्बाधः।

जातिव्यक्ती गृहीत्वेह वयं तु श्रुतलक्षिते।
कृष्णादि यदि मुञ्चामः का श्रुतिस्तत्र पीड्यते॥

इति न्यायेन श्रुत्यभिहितलक्षितजातिव्यक्त्योरबाधात् तत्तत्स्वरविशिष्टोद्गीथादिव्यक्तिविशिष्ट[5]निष्ठान्येव शाखान्तरगृहीतोद्गीथादिषु[6] कर्माङ्गादिषु कर्तव्यानीति प्राप्तेऽभिधीयते।

जातिक्रियान्वयायोगात् व्यक्तिर्लक्ष्या मतिः पुनः।
जातिमात्रेऽपि शक्येति न व्यक्तिरिह लक्ष्यते॥

युक्तं 'पटमानय' इत्यत्र पटत्वस्याऽनयनायोगात् पटश्रुतेरविशेषप्रवृत्ताया अपि व्यक्त्याक्षेपकत्वम्। आक्षिप्यमाणा व्यक्तिः 'शुक्लं पटमानय' इत्यादिप्रयोगेषु सन्निहितैः शुक्लादिशब्दैः समर्प्यते। केवलप्रयोगेऽपि या काचिदर्थादानीयत इति। इह तूद्गीथादिशब्दोपात्तसामान्याश्रयाः प्राणादिमतयः कर्तुं शक्यन्ते इति

१. 'पशुपाशविमोक्षाय' इति श्रीक॰भाष्ये। २. क. विद्याबद्धानि
३. क. प्राणाद्युपासनानि। ४. क. उद्गीथादिषु।
५. क. विशेष। ६. क. शाखान्तरगतोद्गीतादिषु।

सन्निधानाच्छ्रुतिसङ्कोचो युक्तः। सामान्यद्वारेण सर्वविशेषगामिन्याः श्रुतेरेकस्मिन्नवस्थानं पीडैव। तस्मात् प्राणादिदृष्टयः सर्वोद्गीथादिविषयाः। तथा प्रणवाभ्यासादयः। नच सन्निहितदहरविद्यादिमात्राङ्गम्। किन्तु सर्वविद्याङ्गमेवेति।

तन्निरासः

तत्र। सर्ववेदान्तप्रत्ययाधिकरणे शाखान्तराधिकरणे इह च पूर्वतन्त्रे च शाखान्तरोक्तानां विद्यानां कर्मणां च रूपैक्यप्रत्यभिज्ञानादिनैक्यस्य स्थितत्वात्। स्वरादिभेदादभेदः आक्षिप्य समाधीयत इति चेन्न। बहुभिर्धर्मैरभेदेऽल्पधर्मवैषम्यस्य न भेदकत्वमित्यस्यापि पूर्वेषु स्थितत्वात्। नचात्र स्वरभेदस्य भेदकत्वनिवर्तकश्रुतिरुपन्यस्ता।

किञ्चात्र सन्निधिमप्रयोजकीकृत्य सर्वव्यक्तिविषयत्वं व्याकुर्वतः कथं न पूर्वतन्त्रविरोधः। नहि 'दध्ना जुहोति' इत्यत्र जुहोतिना होमसामान्यमभिप्रेतम्। किन्तु प्रकरणसन्निधापितोऽग्निहोत्रहोमः। तथा सति दध्नः सर्वहोमाङ्गता स्यात्। तत्रापि शाखान्तरस्थस्याग्निहोत्र[१]परत्वाभावेन तत्र गुणाम्नानाभावान्निर्गुणमेवाग्निहोत्रं स्यादिति चेन्न। सन्निधानात् प्रथमतस्तच्छाखास्थाग्निहोत्रव्यक्तिविशेषमात्रोपस्थितौ शाखान्तरस्थस्याग्निहोत्रस्य गुणाम्नानाभावानुसन्धानेन चोदनाद्यैक्यनिमित्तैक्यप्रत्यभिज्ञानेन च पश्चाच्छाखान्तरस्थाग्निहोत्रविषयबुद्ध्युपपत्तेः। अत एव च शक्तिग्रहकाले सन्निहिते व्यक्तिविशेषे गोशब्दवाच्यतां गृहीत्वा यद्येतज्जातीयः देशान्तरे दृष्टः स्यात् सोऽपि गोशब्दवाच्यः प्रत्येतव्य इति पश्चादसन्निहितव्यक्तिष्वपि शक्तिं गृह्णाति।

अङ्गावबद्धास्त्विति सूत्रस्य पराभिमतार्थनिरासः

नाङ्गावबद्धा उपासनाः स्वशाखासु व्यवस्थिताः। अपि तु प्रतिवेदं सर्वासु

१. क. शाखान्तरस्थाग्निहोत्र।

शाखासु सम्बद्ध्यन्ते। हिर्हेतौ। यस्मादुद्गीथजातीयत्वाविशेषेण सर्वसम्बन्धस्तस्मादित्यर्थ इत्याद्यस्य व्याख्यानमयुक्तम्। तुशब्दस्य पक्षव्यावर्तकताङ्गीकारेण न शाखास्वित्यस्य पुनरनपेक्षितत्वात्। शाखाशब्दस्य सङ्कोचायोगाच्च। अवैरूप्याय प्रतिशाखमिति वक्तव्ये प्रतिवेदमिति निर्देशानुपपत्तेश्च।

'मन्त्रादिवद् वाऽविरोधः' इति द्वितीयसूत्रस्य पराभिमतार्थनिरासः

यथा मन्त्रादीनां क्रत्वङ्गभूतानामेकैकशाखागतानां सर्वशाखासु क्रतोरेकत्वेन सर्वत्र सम्बन्धो न विरुद्ध्यते तद्वदविरोध इति द्वितीयस्य व्याख्यानमप्ययुक्तम्। वाशब्दवैयर्थ्यात्। वाशब्दश्चार्थ इत्यपूर्वं व्याख्यानकौशलम्। सर्वशाखासु क्रतोरेकत्वेन शाखान्तरगतानां मन्त्रादीनां तत्सम्बन्धेऽपि शाखान्तरगतोद्गीथादीनां स्वरादिभेदेनैक्यायोगात्। प्राणाद्युपासनानां न तदङ्गत्वमित्याक्षेपपरिहाराय स्वरादिभेदस्याप्रयोजकत्वव्युत्पादनस्यैवाऽवश्यकत्वेन तद्विहायाविरोधप्रतिपादनस्यायोगाच्च।

टीकायां पूर्वपक्षीयसन्धानन्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- 'उपासनाऽङ्गदेवानां परमाङ्गतया भवेत्' (ब्र.सू.भा.उ. बृहत्तन्त्रवचनम्) इति भाष्योदाहृतबृहत्तन्त्रवचननिवर्तनीयपूर्वपक्षमाद्यवर्णके सप्रमाणकं दर्शयति- **केवलमेवेति**॥ सन्धानन्यायं दर्शनोपलक्षणमपीति सम्बन्ध्यादिप्रदर्शनपूर्वकं विवृण्वत् **'नच गुणान्तरानुसन्धानस्य क्वचिद् दर्शनमात्रेण समाधिकाङ्गदेवतान्तरगुणा अप्यङ्गदेवतान्तर उपसंहर्तव्याः'** (न्या.वि.) इति वाक्यं आकाङ्क्षाक्रमेण द्वितीयवर्णकपूर्वपक्षपरतया व्याचष्टे- **अन्यदेवतोपासनेति**॥ 'एकस्य प्रतीतगुणाः सर्वेषूपसंहर्तव्याः' इति 'समाधिकाङ्ग' इत्यादेरुत्तरार्धस्यार्थः। 'देवत्वादिगुणानां सर्वेषूपसंहारदर्शनात्' इति 'गुणान्तरानुसन्धानस्य क्वचिद् दर्शनमात्रेण' इत्यस्यार्थ इति ध्येयम्।

सिद्धान्तीयश्रुतिदृष्टिन्यायस्य व्याख्यानम्

श्रुतिदृष्टिन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत् **'नानागुणत्वेन तेषां श्रुतिषु दृष्टेः । अनिषिद्धगुणानां वाक्यान्वयन्यायेनोपसंहारात् ''न शाखासु'' इत्यादिविशेषः । उत्तमेष्वधमगुणापेक्षया ''मन्त्रादिवद् वा'' इति'** (न्या.वि.) इति वाक्यं भाष्यविवरणपरमिति मन्वानः सहैव द्वितीयवर्णकसिद्धान्तपरतया व्याचष्टे- **उपसंहारे तु विशेषोऽस्तीत्यादिना ॥** अनेन सर्वेषामङ्गदेवानां साम्येनोपासनमभिलषता किं तेषां नीचोच्चभाव आश्रीयत उत साम्यमेव । आद्ये साम्योपासनस्य मिथ्योपासनत्वप्राप्तिः । द्वितीये त्विदमुपतिष्ठते- 'नानागुणत्वेन तेषां श्रुतिषु दृष्टेः' इति । वाणीपतित्वपार्वतीपतित्वादिनानाविरुद्धगुणत्वेन श्रुतिषु ब्रह्मरुद्रादीनां दर्शनादित्यर्थः ।

यद्वा एकस्य प्रतीतगुणाः सर्वेषूपसंहर्तव्या उतानिषिद्धा एवेति । तत्र नाऽद्य इत्याह- **नानागुणत्वेनेति ॥** विरुद्धगुणानामेकस्मिन्नुपासने मिथ्योपासनत्व-प्राप्तेरिति भावः । द्वितीयं निराचष्टे- **अनिषिद्धगुणानामिति ॥** अविरुद्धे-त्यर्थः । अनेन देवतात्वादिसाधन[1]स्यान्यथासिद्धिरुपपादिता भवति ॥ **वाक्या-न्वयादिति ॥** प्राथमिकन्यायेन भगवतैवोपसंहाराङ्गीकारान्नानिष्टमिति भावः ।

यद्वाऽऽद्यसूत्रे[2] सर्वगुणोपसंहारो निषिद्धयते । द्वितीये त्वङ्गीक्रियते । वस्तुनि विकल्पासम्भवात् कथमेतन्न विरुद्धमित्यतः तयोर्व्यवस्थोक्त्या परिहरति- **नानागुणत्वेनेति ॥** विरुद्धगुणत्वेन तेषां ब्रह्मादीनां श्रुतिषु दर्शनात् प्रतिशाखं प्रतिवेदं प्रतीतगुणाः सर्वे उपसंहर्तव्या इत्ययं पक्षो न युज्यते इति 'न शाखासु' इत्यादिविशेषः । विशिष्यतेऽनेनेति विशेषः सूत्रम् । विरुद्धायोग्यगुणोपसंहार-निषेधपरमाद्यं सूत्रमिति भावः । 'अङ्गावबद्धास्तु' इति प्रतीके गृहीतव्येऽपि

१. म. सन्धान   २. म. आद्ये सूत्रे

यद्विवरणकृत् 'न शाखासु' इति प्रतीकं गृह्णाति तेन टीकोक्तरीत्या वर्णकान्तरं व्याख्येयमिति ज्ञापयति । तेनार्थवादाद्यधिकरणेषु सूत्र एव प्रमेयद्वयस्य विचार्यत्वे प्रतीते द्विपर्वत्वेऽपीह सूत्रतः तदप्रतीतेर्न द्विपर्वत्वमिति निरस्तम् । द्वितीयसूत्रस्य विषयं दर्शयति- **अनिषिद्धगुणानामिति ॥** वाक्यान्वयन्यायेनोपसंहारादुत्तमेष्व-धमगुणापेक्षया 'मन्त्रादिवद् वा' इति सूत्रं प्रवृत्तमिति सम्बन्धः ।

ननूत्तमेषु ब्रह्मादिषु पार्वतीपतित्वत्रिनेत्रत्वभस्मधरत्वोग्रत्वाद्यधमगुणाना-मसम्भवात् कथमुपसंहारोऽनुज्ञायत इत्यतस्तत्रोपपत्तिः- **वाक्यान्वयन्याये-नेति ॥** वाक्यान्वयो नाम पृथक्पृथगर्थेषु वाचकतया स्थितस्यान्ततस्तन्नि-यामकोत्तमदेवतापरत्वमेव । अतस्तद्गुणसमन्वयाभावेऽपि तत्स्वामित्वं सम्भवतीति भावः ।

॥ इत्यङ्गावबद्धाधिकरणम् ॥ ३६ ॥

॥ अथ भूमाधिकरणम् ॥ ३७ ॥

सूत्रभाष्यम्

॥ ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॐ ॥

॥ ३-३-५९॥

सर्वगुणेषु भूमगुणस्य ज्यायस्त्वं क्रतुवत् सर्वत्र सहभावात्। दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकः क्रतुः[१]।

'भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते।
तस्माद् भूमा गुणतो वै विशिष्टो यथा क्रतुः कर्ममध्ये विशिष्टः ॥'

इति गौपवनश्रुतिः[२] ॥ ५९ ॥

॥ इति भूमाधिकरणम् ॥ ३७ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्रेश्वरदर्शनसाधनस्य भूमगुणोपासनस्य सर्वोपासकसाधारण्यसमर्थनादस्ति शास्त्रादिसङ्गतिः। अन्यथा लौकिकतयोपासनप्रसङ्गात् समर्थनीयम्। प्रकृतभगवद्गुणान्तर्गतो 'यो वै भूमा' (छा.उ. ७.२३.१) इत्यादौ श्रुतो भूमगुण एव विषयः। सर्वोपास्यो न वेति सन्देहः। गुणद्वैविध्यदर्शनं सन्देहबीजम्। तत्रोपासकं प्रति भूमगुणस्य सम्भृत्यादिगुणेभ्यो न विशेषः।

पूर्वपक्षः

सर्वोपास्यो न भवतीति पूर्वः पक्षः। वैयर्थ्यात्। आनन्दादिकं हि

१. ह. इदं वाक्यं नास्ति। २. ह. इति च गौपवनश्रुतिः।

सर्वाधिकारिणामिष्टम्। तच्च तद्गुणोपासनेनोपपद्यते। नहि निरतिशयत्वापरपर्यायं भूमत्वं कस्यापीष्टम्। येन तदुपासनं सार्थकं स्यात्। नच भूमत्वस्याऽनन्दादिविशेषणत्वात् सर्वोपास्यत्वम्। विशेषणत्वेऽपि प्रियशिरस्त्वादीनामिव फलानुपयोगित्वेनानुपास्यत्वात्। अतो भूमत्वस्य सर्वोपास्यत्वाभावान्नालौकिकतयोपासनमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- **भूम्न इति** ॥ सर्वैरुपास्यो भूमगुणः। सर्वगुणेषु तस्य ज्यायस्त्वात्। कस्मात्? यथा खलु दीक्षाप्रायणी- यानीति योदयनीयसवनत्रयावभृथात्मकस्य क्रतोः सर्वयागेष्वनुवर्तन एव साफल्यादन्यथा वैफल्याज्ज्यायस्त्वं, ततश्च सर्वैः कर्तव्यत्वं, तथा भूमत्वस्य सर्वत्राऽनन्दादिषु सहभावेनोपासन एवेष्टफलसिद्धेः। एतदपि कुतः? 'भूमैव देवः' (ब्र.सू.भा. उदाहृतगौपवनश्रुतिः) इति श्रुतेरिति भावः। देवः सर्वैर्भूमत्वेनोपास्यः। कस्मात्? भूमा गुणो गुणराशितो यतः क्रतुवद् विशिष्टः। कथम्? यस्माद् भूमैवोपासितः फलं विधत्ते नैवाभूमा तस्मादित्यर्थः। अतः सर्वैरानन्दाद्याः पूर्णत्वेनोपास्या इति न लौकिकतयोपासनमिति सिद्धम् ॥५९॥

॥ इति भूमाधिकरणम् ॥ ३७ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॐ ॥

॥ ३-३-५९ ॥ अ० ३७ ॥

प्रतिपाद्यविषयः सङ्गतिश्च

न केवलं यथायोग्याङ्गदेवतोपासनाद्येव भगवदुपासनस्येतिकर्तव्यता, किन्तु

तत्तद्योग्या भगवदीया आनन्दाद्या गुणाः पूर्णत्वविशेषणका एवोपास्या इतीतिकर्तव्यतान्तरमधिकरणद्वयात्मकभूमपेटिकया प्रतिपाद्यत इतीतिकर्तव्यतापेटिकासङ्गतिः। अत एव 'सर्वैरानन्दाद्याः पूर्णत्वेनोपास्याः' इति टीकोक्तिः। अत एव भूमगुणः 'सर्वोपास्यो न वा' इति सन्देहटीकाऽपि सर्वगुणविशेषणतयोपास्यो न वेति सन्देहपरतया व्याख्येया। यथाश्रुतव्याख्याने 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्युक्तसर्वमुमुक्षूपास्यगुणचतुष्ट्वनियमभङ्गापत्तेः। यथायोग्याङ्गदेवतोपासनमेव फलदं नान्यथेति यथा तत्तद्योग्यगुणोपसंहार एव सर्वैः कर्तव्यस्तथा तत्तद्योग्यपूर्णत्वोपसंहारोऽपि तत्तद्योग्यानन्दादिगुणेषु कर्तव्यो नान्यथेत्यत्रातिदेशनादनन्तरसङ्गतिः।

संशयः

तत्र 'यो वै भूमा तत् सुखम्' (छा.उ. ७.२३.१) इत्यादौ श्रुतो भूमशब्दः 'बहोर्लोपो भू च बहोः' (पाणि. सू. ६.४.१५८) इत्यनुशिष्टो बह्वर्थवाची। अत एव [1]बहुत्वापरपर्यायः पूर्णत्ववाची। ततोऽत्र श्रुतं पूर्णत्वं सर्वमुमुक्षुसाधारण्येनोपास्यं न वा। तदर्थं तस्य सर्वसाधारण्ये 'आनन्दादयः प्रधानस्य' (ब्र.सू. ३.३.१२) इत्युक्तनियमो भज्यते न वा। तदर्थं पूर्णत्वस्य सर्वत्र सम्बध्योपासनीयत्वरूपं प्राधान्यापरपर्यायं ज्यायस्त्वं न युक्तमुत युक्तमिति।

पूर्वपक्षः

न तावत् प्राधान्यं पूर्णत्वस्य सम्भवति। गुणत्वसाम्यात्। सम्भृत्यादिभ्यो विशेषादर्शनात्। नचाऽनन्दादेरिव पूर्णत्वस्योपासनाद् ऋते मोक्षासिद्धिः। ज्ञानादिचतुष्कोपासनादेव मोक्षसिद्धेरुक्तत्वात्। 'आत्मेत्येवोपासीत' (बृ.उ. १.४.७) इत्यनुपसंहारप्रमाणे चाऽत्मत्वस्यैव ज्यायस्त्वोक्तेश्चतुर्गुणोपासकानां भगवति पूर्णत्वस्य दुरवगाहत्वाच्च।

---

१. क. महत्त्व

अस्तु वा पूर्णत्वस्य ज्यायस्त्वम्। तथाऽपि न तत् सर्वोपास्यम्। तथाहि। किं पूर्णत्वमानन्दादिवत् पृथगुपास्यमुत तद्विशेषणत्वेन। नाऽद्यः। सर्वसाधारणानां गुणानां सङ्ख्यानिर्देशाभ्यां क्लृप्तत्वात्। नहि सर्वाधिकारिणामानन्दादिकमिव निरतिशयत्वापरपर्यायं भूमत्वं कस्यापीष्टम्। अन्यथा प्रियशिरस्त्वादीनामपि सर्वोपास्यत्वप्रसङ्गात्।

अत एव न द्वितीयः। गुणान्तरं तु ज्यायस्त्वं तु नाद्यापि सिद्धम्। सिद्धौ वा सर्वत्र तदनुस्यूतोपासनं व्यर्थं प्रमाणशून्यं च। तथाच-

पूर्णत्वं सकलोपास्यं नैव कृत्वोक्तितत्त्वतः।
ततः परनयोक्तिस्तु नैव युक्ता कथञ्चन॥ इति।

सिद्धान्तः

सिद्धान्तस्तु- सर्वगुणेषु भूमगुणस्य प्राधान्यं तावदङ्गीकार्यम्। सर्वत्र सम्बध्योपासनीयत्वात्। तमृते एकस्य गुणस्याप्यनुपासनीयत्वाच्च। दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकः क्रतुरहर्गणेषु प्रत्यहं सम्बध्यमानो विशिष्टो यथा, दीक्षादिव्यतिरेकेणैकस्याप्यन्येनाननुष्ठेयत्वात्। नच पूर्णत्वे उक्तहेतुद्वयमसिद्धम्। 'भूमैव देवः' (ब्र.सू.भा. उदाहृतगौपवनश्रुतिः) इति श्रुतेः। अत एव प्रयोजनाभावात् तदुपासनं व्यर्थमिति निरस्तम्। दीक्षादेः सर्वयागेष्वनुवर्तन एव फलसिद्धिवद्भूमत्वस्य सर्वत्राऽनन्दादिषु सहभावेनोपासन एव इष्टफलसिद्धेः प्रमितत्वात्। अत एव न सङ्ख्यानिर्देशक्लृप्तिविरोधः। पृथगुपास्यत्वाभावात्। नच तदुपासनस्याऽवश्यकत्वम्। प्रत्यधिकारिनानात्वस्य वक्ष्यमाणत्वात्।

पूर्णानन्दः पूर्णचितिः पूर्णस्वामीति सर्वशः।
पूर्णत्वसहभावेन गुणोपासा प्रसिद्ध्यति॥ इति।

सूत्रार्थः

सूत्रार्थस्तु - यद्यपि क्रतुशब्दः पूर्वतन्त्रे पशुबन्धादियुक्तप्रधानकर्मणि प्रसिद्धः, नतु तदितिकर्तव्यतारूपे दीक्षाप्रायणीयोदयनीयादावङ्गे। तथाऽपीह योग्यतया तदङ्गपरः। सर्वयागेष्वभ्यस्यमानत्वाद् दीक्षाद्यात्मकस्य क्रतोर्ज्यायस्त्वं यथा तथा **भूम्नः** सर्वगुणेष्वभ्यस्यमानत्वा**ज्ज्यायस्त्व**मिति। यथा ज्योतिष्टोमस्य द्वादशाहस्य च क्रतोः स्वविकृतिष्वेकाहानेकाहसाध्योत्तरक्रतुष्वतिदिष्टदीक्षा-प्रायणीयोदयनीयादिष्वितिकर्तव्यतांशावच्छेदेन सहभावात् प्रकृतितया ज्यायस्त्वं तथा भूम्नस्तद्विशेष्यसत्यज्ञानानन्दादिष्वनुस्यूतत्वाज्ज्यायस्त्वमित्यर्थ इति केचित्। **तथा दर्शयति च** 'भूमैव देवः परमो ह्युपास्यः' इत्यादिर्गौपवनश्रुतिः। येन येन गुणेनोपास्यः परमः तत्र तत्र भूमैवोपास्यः। सर्वगुणगर्भत्वाद् भूम-पदार्थपूर्णतायाः। अतः सर्वगुणानामप्युपासितानां फलदानं पूर्णत्वाघटने न भवतीति भूमगुण एवैषां फलं विधत्त इति सूत्रोदाहृतश्रुत्यर्थ इति।

परमतरीत्या एतदधिकरणशरीरम्

अत्र परमतम्। छान्दोग्ये वैश्वानरस्य व्यस्तस्य समस्तस्य चोपासनं श्रूयते। व्यस्तोपासनं तावत् - 'औपमन्यव कं त्वमात्मानमुपास्से इति दिवमेव भगवो राजन्निति होवाच एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से.... अस्त्यन्नं पश्यसि प्रियम्' (छा.उ. ५.१२.१) इत्यादिना स्वर्गलोकादित्य-वाय्वाकाशपृथिव्यः वैश्वानरस्य चक्षुष्प्राणमध्यशरीरमूर्धस्थानपादरूपा ध्यातव्या इत्युक्तम्। तथा समस्तोपासनमपि 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' (छा.उ. ५.१८.१) इत्यादि। तत्र संशयः। किं व्यस्तस्य समस्तस्य चोपासनं विधेयमुत समस्तस्यैवेति।

प्रत्युपासनमाम्नानादाख्यातस्य च फलस्य च।
विधिक्लृप्तविशेषाच्च[१] व्यस्तोपास्तिश्च शिष्यते॥

ननु समस्ते व्यस्तानामन्तर्भावादाख्यातानामेकदेशानुवादकत्वं, फलानां चैकदेशप्रशंसाद्वारा जातेष्ट्यादाविवावयविस्तुत्यर्थत्वमिति चेन्न। भवेदेतदेवं, यदि समस्तोपास्तौ विधिः श्रूयेत। अत्र पुनरुभयत्रापि वर्तमानापदेशस्य विधि-कल्पनायाश्चाविशेषात् कामशब्दाभावेन फलकल्पनायाः तुल्यत्वात्[२] सर्वत्र विधिरित्येवं प्राप्तेऽभिधीयते -

उपक्रमोपसंहारौ समस्तोपास्तिगोचरौ।
प्रधानस्तुतये तस्मादङ्गेषु फलकीर्तनम्॥ इति।

व्यस्तोपासनाधिगमवतामौपमन्यवादीनां समस्तोपास्त्यधिजिगमिषया कैकयराजाभ्यागम उपक्रमे अवगम्यते। मध्ये च कैकयस्तदुपासननिन्दया समस्तोपास्तिमुपसंहरति। 'तस्य हवा एतस्याऽत्मनो वैश्वानरस्य मूर्धैव सुतेजाः' (छा.उ. ५.२५.२) इत्यादिना। तथाचैकवाक्यत्वाय भेदपरिहाराय च वाक्यस्य समस्तोपास्तिविधिपरत्वं, तस्मादङ्गेषु फलकीर्तनं, प्रधानसवनायेति[३]।

तन्निरासः

तन्न। 'सैव हि सत्यादयः' (ब्र.सू. ३-३-३९) इत्यधिकरणन्यायेनैवेहापि विध्यैक्यसिद्धेः पुनरारम्भायोगात्।

तत्र '"तद् यत् सत्यम्"' (बृ.उ. ४.४.२) इति तच्छब्देन प्रकृतपरामर्शाद् विद्यैक्यं युक्तम्। इह तु तदभावान्न युक्तम्' इति कल्पतरूक्तिरप्ययुक्ता। वैश्वानरविद्यासमाख्याततत्प्रकरणपाठादेर्विद्यैक्यज्ञापकस्य सम्भवात्।

---

१. विधिक्लृप्यविशेषाच्च २. म. फलकल्पनायाश्च तुल्यत्वात्
३. म. प्रधानस्तवनाय

किञ्चेह समस्तोपास्तिरनिन्दितत्वात् कर्तव्येति सिद्धान्त उत व्यस्तोपास्तेर्निन्दनात् सैव कर्तव्येति । नाऽद्यः । समस्तोपास्तेरपि पूर्वपक्षिणा कर्तव्यत्वाङ्गीकारात् । अवधारणे तु न तत्रानिन्दितत्वं हेतुर्भवितुमर्हति । शाण्डिल्यविद्यादीनामपि तत्प्रसङ्गात् । न द्वितीयः । 'श्यामः श्वा आहुतिमभ्यवहरति तस्य योऽनुदिते जुहोति, शबलः श्वा आहुतिमभ्यवहरति य उदिते जुहोति' इत्यादिनाऽनुदितहोमस्य निन्दनादुदितादिहोमस्याकर्तव्यत्वं वा उदितादिहोमस्यैव कर्तव्यत्वं वा स्यादित्यप्रामाण्यापत्तेः ।

ननु यस्तु 'अनुदितहोमं यावज्जीवं करिष्यामि' इति सङ्कल्प्य मध्येऽनादरात् त्यक्त्वोदितहोमं करोति तस्येयं निन्दा- 'शबलः श्वा आहुतिमभ्यवहरति' इत्यादि । तदाहाक्षपादः- 'अभ्युपेत्य कालभेदे दोषवचनात्' इति । 'अनुदितहोमं यावज्जीवं करिष्यामि' इति सङ्कल्पमभ्युपेत्य कालभेदे कालान्यत्वकरणे उदितकालस्वीकारे सङ्कल्पभ्रंशप्रयुक्तदोषवचनान्निन्दा युक्तेत्यर्थः । एवं 'यावज्जीवमुदितहोमं करिष्यामि' इति सङ्कल्प्य तद्भ्रंश[१] एवेतरेण निन्दा क्रियत इति न तत्राप्रामाण्यापत्तिरिति चेन्न । प्रकृतेऽपि 'यावज्जीवं समस्तोपास्तिं करिष्यामि' इति सङ्कल्प्य तद्भ्रंशवतो वा, समस्तोपासने शक्तस्यापि तदकुर्वतो वा, सूर्यजनकशीर्षत्वाद्येकैकावयवमात्रवत्त्वेनोपासकस्य वा निन्दा, नतु व्यस्तोपास्तिमात्रस्येति साम्यात् । नच प्रतीतैकवाक्यत्वाभङ्गाय जातेष्टिप्रकरणे 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति' (तै.सं. २.२.५) इत्यादिवाक्यस्यावयवस्तुतिद्वाराऽवयविस्तुतिपरत्वम् । 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' (तै.सं. २.२.५) इत्युपक्रमे 'यस्मिन् जात एतामिष्टिं निर्वपति' (तै.सं. २.२.५) इत्युपसंहारे च पुत्रजननस्य निमित्तत्वश्रवणात् तावदेकं वाक्यमिति निश्चयात् तत्र प्रतीतैकवाक्यतारक्षणाय तन्मध्यगतानामष्टाकपालादिवाक्यानां स्तावकत्वेऽपीहैकवाक्यताप्रत्यायकोपक्रमाद्यभावात् । 'प्राचीनशाल औपमन्यवः' (छा.उ. ५.११.१) इत्याद्याख्यायिकयोपक्रमाद् वैश्वानरविद्यापरत्वावगमेऽपि समस्तोपासनापरत्वानवगमात् । नच 'फलवत्सन्निधावफलं तदङ्गम्' इति न्यायः । 'अस्त्यन्नं पश्यसि प्रियम्' इत्यादिना व्यस्तोपासनानामपि फलावगमात् । नचायं वर्तमानापदेशो न फलविधिः । 'सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' (छा.उ. ५.१८.१) इति समस्तोपासनवाक्येऽपि साम्यादर्थवादाद् विध्युन्नयनस्यापि साम्यात् ।

१. म. तद्भ्रंशवतः

एतत्सूत्रस्य परोक्तार्थनिरासः

भूम्नः समस्तोपासनस्य ज्यायस्त्वं श्रैष्ठ्यं प्रामाणिकत्वम् एकवाक्यत्वावगतेः । व्यस्तवादः 'वैश्वानरं द्वादशकपालं निर्वपेत् यदष्टाकपालः' (तै.सं. २.२.५) इत्यादिश्रुताविव द्रष्टव्यः ।

'मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः' (छाँ.उ. ५.१२.२) इत्यादिना व्यस्तोपासनेऽनर्थं ब्रुवन्ती समस्तोपासनस्य ज्यायस्त्वं दर्शयतीति सूत्रव्याख्यानं निरस्तम् । भूमशब्दस्य ज्यायस्त्वशब्दस्य च समस्ते प्रामाणिकत्वे चार्थे व्युत्पत्त्यभावात् । उभयत्रापि वर्तमानापदेशसाम्येन जातेष्ट्यधिकरणवैषम्यस्योक्तत्वाच्च । व्यस्तोपासननिन्दायाश्चोदितहोमादिनिन्दावदुपपत्तेश्च ।

टीकायां पूर्वपक्षीयेष्टफलन्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- 'इष्टं फलम्' इत्युक्तन्यायमिष्टगुणानुसारिफलोपपत्तिरिति न्यायोपलक्षणं मत्वा सम्बन्ध्यादिप्रदर्शनेन विवृण्वत् **'नच भूमगुणस्योपासकं प्रति विशेषाभावेऽपि तत्तदिष्टगुणानुसारेण फलोपपत्तिरित्यविशेषः'** (न्या. वि.) इति वाक्यं सम्भृत्यादिगुणेभ्य इत्यध्याहृत्य व्याचष्टे- **उपासकं प्रतीति** ॥ 'भूमगुणस्योपासकं प्रत्यविशेषः' इति पदानां सम्बन्धमभिप्रेत्याविशेषपदमध्याहृतेन सङ्गमयन् व्याचष्टे- **सम्भृत्यादिगुणेभ्य न विशेष इति** ॥ तस्य

तात्पर्यमाह- **सर्वोपास्यो न भवतीति**॥ भूमगुण एव विषय इत्यतः पूर्ववाक्याद् 'भूमगुणः' इत्यत्रापि अनुवर्तते। तत्र हेतुं स्वयमध्याहरति- **वैयर्थ्यादिति**॥ प्रयोजनाभावादित्यर्थः। पूर्णत्वोपासनस्येष्टप्राप्तिरेव फलमस्तीति चेत्। तत्किमिष्टमानन्दादिकमुत पूर्णत्वमिति विकल्प्य आद्यनिरासकत्वेन **'तत्तदिष्टगुणानुसारेण फलोपपत्तिः'** इत्यंशं व्याचष्टे- **आनन्दादिकं हीति**॥ तेनाऽनन्दादितत्तदिष्टजनकानन्दादिगुणानुसारेणाऽनन्दादिगुणोपासनेनाऽनन्दादीनां फलानामुपपत्तिः इत्यतो हेतोरन्यथासिद्धेर्न तदर्थं पूर्णत्वोपासनं कार्यमिति योजनं सूचितम्। इतिशब्दं प्रभृतिवचनं मत्वा द्वितीयपक्षनिरासकतया प्रकारान्तरेण व्याचष्टे- **नहीति**॥ **कस्यापि** चेतनविशेषस्यापीत्यर्थः। ब्रह्मणोऽपीति वा तस्यार्थः। सुतरां सर्वेषां नेष्टमित्यर्थः। **'भूमगुणस्योपासकं प्रत्यविशेषः'** इत्यंशं प्रकारान्तरेण योजयितुमवतारयति- **नच भूमत्वस्येति**॥ आनन्दादिविशेषणत्वात् आनन्दादिगर्भत्वादित्यर्थः। 'आनन्दपूर्णः ज्ञानपूर्णः' इत्यादिव्यपदेशदर्शनादिति भावः। तत्र हेतुत्वेन प्रकृतवाक्यं व्याचष्टे- **विशेषणत्वेऽपीति**॥ तेन प्रियशिरस्त्वादिभ्यः फलानुपयोगरूपो विशेषाभावः सादृश्यं यतोऽस्ति ततः सम्भृत्यादिभ्यो विशेषोऽनुपास्यत्वमिति प्रतिज्ञाहेतुभावेन योजनीयमिति सूचितम्।

यद्वा, **'विशेषाभावेऽपि'** इति वाक्यमवतारयति- **नच भूमत्वस्येति**॥ विशेषाभाव इत्यर्थः॥ **सर्वोपास्यत्वमिति**॥ तेनाऽनन्दादिगुणेभ्यः सर्वोपास्यत्वेनाभिमतेभ्यो विशेषाभावः सादृश्यं यतोऽस्ति ततः सम्भृत्यादिभ्यो अविशेषोऽनुपास्यत्वमिति यावत्। तदुत्तरत्वेनोत्तरवाक्यं योजनीयमिति सूचितम्।

टीकायां सिद्धान्तीयशिष्टिन्यायस्य व्याख्यानम्

शिष्टिन्यायमाकारप्रदर्शनेन विवृण्वत्- **' "भूमैव देवः परमो ह्युपास्यो नैवाभूमा फलमेषां विधत्ते" इत्यादिशिष्टेः'** (न्या.वि.) इति वाक्यं भाष्येण सहैव व्याख्यातुमवतारयति- **एतदपि कुत इति**॥ सर्वत्र पूर्णत्वानुस्यूत्यैव फलमित्येतदपि

कुतः प्रमाणात् प्रतिपत्तव्यमित्यर्थः। शिष्टेरित्यस्यार्थो- **श्रुतेरिति**॥ अनेन भाष्यं शिष्टिन्यायविवरणपरमिति व्याख्येयमिति विवरणकृद् भाष्यमपि विवृणोतीति ध्येयम्।

॥ इति भूमाधिकरणम्॥ ३७॥

॥ अथ नानाधिकरणम् ॥ ३८ ॥

सूत्रभाष्यम्

॥ ॐ नाना शब्दादिभेदात् ॐ ॥ ३-३-६० ॥

'शब्दोऽनुमा तथैवाक्षो योग्यताभेदतस्सदा।
ब्रह्मादीनामेकमर्थं बहुधा दर्शयन्ति हि॥
अतः पूर्णत्वमीशस्य नानैवैषां प्रदृश्यते।
अतः फलस्य नानात्वं नानैवोपासना[1] यतः॥'
इति ब्रह्मतर्के[2]।

अतो भूमत्वमपि नानैवोपास्यते॥ ६०॥

॥ इति नानाधिकरणम्॥ ३८॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मसाक्षात्कारसाधनभूमोपासनेऽधिकारिणां विशेषसमर्थनादस्ति शास्त्रादिसङ्गतिः। अविशेषे तूक्तानुपपत्तेरसौ समर्थनीयः। प्रकृतभूमगुण एव विषयः। किमधिकारिणामुपासने तारतम्येन प्रतीयते एकप्रकारेण वेति सन्देहः। उभयविधवस्तुप्रतीतिः सन्देहबीजम्।

पूर्वपक्षः

सर्वेषां भूमत्वमेकप्रकारेण प्रतीयत इति पूर्वः पक्षः। भूमत्वे विशेषकल्पनायोगात्। नहि केषाञ्चित् सम्यक् पूर्णानन्द इति, केषाञ्चित् किञ्चित्

१. ह्. उपासनम् २. ह्. इति हि ब्रह्मतर्के

पूर्णानन्द इत्युपासनं युक्तम्। तथात्वे मिथ्योपासनप्रसङ्गात्। मिथ्योपासनस्यानर्थहेतुत्वात्। अतः सर्वेषामेकप्रकारेण भूमत्वोपासकत्वान्नोक्ततारतम्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा स्मृत्युदाहरणपूर्वकं व्याचष्टे- **नानेति॥** भूमत्वमुपासनेऽधिकारिणां नानाप्रकारेणैव प्रतीयते। शब्दादिभिः प्रमाणैस्तत्प्रतीतेरेष्टव्यत्वात्। शब्दादीनां च प्रमाणानामधिकारिभेदेनानेकधैकैकार्थप्रतीतिजनकत्वान्नानोपासनाच्च फलतारतम्यमुपपद्यत इति भावः। तत्त्वनिर्णयो वेदार्थनियमोऽपरोक्षज्ञानं चेति क्रमभावीनि शब्दादिजन्यानीति शब्दादिक्रमः। नच भूमत्वे विशेषानुपपत्तिः। अतीतवत्सराणां मासानामानन्त्येऽपि विशेषवदत्राप्युपपत्तेः। अन्यानिषेधान्नान्यथोपासनम्। अतो भूमत्वदृष्टावधिकारिणां विशेषसद्भावाद् युक्तं तारतम्यमिति सिद्धम्॥६०॥

॥ इति नानाधिकरणम्॥ ३८॥

शेषतात्पर्यचन्द्रिका

॥ ॐ नाना शब्दादिभेदात् ॐ ॥ ३-३-६० ॥

सङ्गतिः चिन्ताक्रमश्च

दीक्षाद्यात्मकक्रतुवद् भूम्नः ज्यायस्त्वं चेत् तर्हि तद्वदेवाधिकारिभेदेन भेदोऽपि न स्यादित्युत्थानादनन्तरसङ्गतिः। भूमगुणः सर्वाधिकारिणामेकप्रकारेणोपास्य उत तारतम्येन, तदर्थं भूमत्वं सर्वाधिकारिणामेकप्रकारेण प्रतीतमुत तारतम्येन। तदर्थं भूम्न ऐकविध्यमुत नानात्वमिति चिन्तनीयम्।

पूर्वपक्षः

तत्र भूम्नः नानात्वकल्पने प्रमाणाभावेनैकविध्यमेव। तथाच सर्वानप्यधि-

कारिणः प्रति भूम्न एकरूपत्वादेकप्रकारेणैव प्रतीतिरिति न तस्य तारतम्येनोपासनम्। अथापि पूर्णत्वे तारतम्यस्वीकारे च चतुष्ट्वसङ्ख्याऽभङ्गायाऽनन्दादिविशेषणत्वेनैवोपास्यत्वे पूर्णानन्दः पूर्णज्ञान इत्युपासनाप्राप्तौ तत्र तारतम्याङ्गीकारे केषाञ्चिदपूर्णानन्दत्वादिनोपासनप्राप्त्या मिथ्योपासनप्रसङ्गात्। किञ्च भूमपदस्याऽनन्दपूर्णत्वज्ञानपूर्णत्वाद्यर्थाभिधायितया सर्वगुणगर्भपूर्णत्ववाचितया तत्पदेन सर्वगुणोपस्थित्या सर्वगुणोपासनं सर्वेषां स्यादिति पूर्वः पक्षः।

सिद्धान्तः

पूर्णत्वं नैकधोपास्यं वत्सरादेरनन्तता।
यथा नाना तथा ज्ञेया योग्यताभेदतो यतः॥

नैकप्रकारेण सर्वेषामुपासनप्राप्तिः। पूर्णत्वस्य नानात्वात्। वत्सरानन्त्यमासानन्त्यदिवसानन्त्यादिभेदेनाऽनन्त्यस्यानेकविधत्वात्। नच तत्र प्रमाणाभावः। अधिकारिणां फलतारतम्यं हि प्रमितम्। तच्चोपासनातारतम्यमपेक्षते। अन्तरङ्गत्वात्। नच भक्त्यादितारतम्येन तदुपपत्तिः। अनुबन्धाधिकरणे उपासनेतिकर्तव्यतात्वस्य स्थितत्वात्। तच्चोपास्यगुणतारतम्यमपेक्षत इत्यवश्यं पूर्णत्वे तारतम्यमङ्गीकरणीयम्।

किञ्च पूर्णत्वस्य प्रतीतिः शब्देनानुमानेन प्रत्यक्षेण वा भवेत्। तानि शब्दादीन्यधिकारिभेदेनैकस्यैवार्थस्यानेकधा प्रत्यायकानि। 'स्पष्टातिस्पष्टविशद' इत्यादिप्रमाणात्। नचार्थस्यानेकविधत्वाभावे प्रामाण्यं निर्वहति। एवं सर्वगुणगर्भपूर्णत्वप्रतीतिरपि समाहिता भवति। तत्तद्योग्यतानुसारेण प्रतीतयावद्गुणत्वस्यैव सर्वगुणशब्दार्थत्वेन विवक्षितत्वात्। यथा जलधेरुद्धृतशरावोदञ्चनादिपात्रपरिमितजले पूर्णत्वव्यपदेशः। अन्यथा 'जलधिजलपरिपूर्णं पात्रम्' इति व्यपदेशो न स्यात्। जलधावेतावदेव जलमिति व्यपदेशाभावान्न दोष इति चेत्, इहापि मत्प्रतीतानन्दपूर्णमात्रो भगवानित्यप्रतीतेः। नच क्रतुवदेकरूपत्वम्। सर्वसाम्याभावाद् विवक्षितसाम्येन दृष्टान्तत्वोपपत्तेरिति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु- भूम्न इत्यनुवर्तते। पूर्णत्वस्याधिकारिभेदेन **नानात्व**मस्ति। कुतः? **शब्दादीनां** त्रयाणां प्रमाणानां **भेदात्** भिन्नभिन्नार्थग्राहित्वात्। एकदाऽनेकपदार्थप्रतीतिजनकत्वादिति यावत्। शब्देन तत्त्वनिर्णयानन्तरमेव वेदार्थो नान्य इति अनुमानसाध्यवेदार्थनिर्णयः। ततः प्रत्यक्षकार्यं भगवद्दर्शनमिति कार्यानुसारेण कारणक्रमो निर्दिष्टः।

पराभ्युपगतमधिकरणम्

अत्र परमतम्- सिद्धं कृत्वा विद्याभेदं गुणोपसंहारादि चिन्तितम्। इदानीं गतासु विद्यासु सद्विद्यादहरविद्याशाण्डिल्यविद्याभूमविद्येत्यादिकासु ब्रह्मप्राप्तिफलासु ब्रह्मोपासनासु तथा तदितरफलकासु प्राणविद्यापञ्चाग्निविद्येत्यादिकास्वब्रह्मविद्यासु च भेदश्चिन्त्यते। तत्र दहरादिब्रह्मविद्याऽब्रह्मविद्याश्च न भिद्यन्ते, उत भिद्यन्त इति संशयः। तत्र

गुणभेदेऽप्यभेदेन ब्रह्मणस्तदुपासना।
अनुबन्धाविभागेन सर्वत्रैकैव गम्यते॥

युक्तः कार्यरूपाणामपूर्वोत्पादकभावनानामनुबन्धभूतसाध्यस्वभावधात्वर्थभेदाद् भेदः। तदनुरक्तानामेव तासां प्रतीतेः। इह तु ब्रह्मणस्तद्गुणानां च सिद्धरूपत्वादभेदः। नहि विशालवक्षाश्चकोरेक्षणः क्षत्रिययुवा एकत्रोपदिष्टः स एवान्यत्र सिंहास्यो वृषस्कन्ध उपदिश्यमानश्चकोरेक्षणत्वादि परित्यजति। अनुष्ठानं हि पुरुषाधीनात्मलाभमनुबन्धभेदे भेत्तुमर्हति। नच सिद्धम्। तस्य पुम्प्रयत्नात् पूर्वमेव सिद्धेः। साध्याऽप्युपास्तिर्मनोवृत्त्यावृत्तिरूपत्वादेकैव। सा च गुणभेदेऽप्यग्निहोत्रमिव दध्यादिभेदेऽप्यभिन्नैव। एवं प्राप्तेऽभिधीयते-

सिद्धेऽपि वस्तुनि श्रुत्या तदुपासा विधीयते।
तस्याः पुरुषतन्त्रत्वाद् गुणभेदेन भिन्नता॥

भवेदेतदेवम्। यदि वस्तुनिष्ठान्युपासनावाक्यानि, किन्तु तद्विषयामुपासनां विदधति। सा च कार्यरूपेति।

तन्निरासः

तन्न। उपासनावाक्यानामवस्तुनिष्ठत्वेऽप्रामाण्यप्रसङ्गात्। उपासनायाः ज्ञानात्मकत्वाद् ज्ञानेच्छादेरविधेयत्वे उपासनाया अपि विधानासम्भवाच्च। तद्भावनानां विधेयत्वेऽपि तद्वाचकानाम् आख्यातपदानां भेदाभावाच्च। नहि वाचकपदभेदाभावे वाच्यभेदो युक्तः।

किञ्च स्वतो भावनाया घटादेरिव भेदो न भावयितुं शक्यः। किन्तूपासनाभेदेनैव। तद्भेदोऽपि स्वतो नेत्युपास्यभेदेनैव। उपास्यं चेश्वराद्येकमेवेति भावनाभेदो दुर्ज्ञेयः। सत्यमुपास्यमेकविधं, तथाऽपि उपासनाविषयभावोऽस्य कदाचित् कस्यचित् केनचिद्रूपेणेति बहुविधमेव। यथैकस्त्रीकायः केनचिदुपगन्तव्यतया केनचिदपत्यतया केनचिन्मातृतया केनचिदुपेक्षणीयतया विषयीक्रियमाणः पुरुषेच्छातन्त्रः, एवमिहाप्युपासनानि पुरुषेच्छातन्त्रतया न विधेयतामतिक्रामन्तीति भामत्युक्तं निरस्तम्। उपासकभेदसिद्धौ उपासनाभावनयोर्भेदसिद्धिः। तद्भेदसिद्धौ उपासकभेदसिद्धिरिति परस्पराश्रयप्रसङ्गात्। नच शब्दान्तरादिभिरुपासनाभेदाधिगमेऽधिगतभेदेन च गुणव्यवस्थायां तद्व्यवस्थया पूर्वाधिगतोपासनाभेदस्य निर्वाहः। अन्यथा प्रयाजादीनां भेदे सिद्धे समिदादिनामभेदः। तत्सिद्धौ तत्सिद्धिरिति परस्पराश्रयप्रसङ्गेन सञ्ज्ञान्तरस्य कर्मभेदकत्वं न स्यात्। तत्र यद्यभ्यासावगतस्यैव प्रयाजभेदस्य समिदादिनामभिर्निर्वाह इति न परस्पराश्रयता। तथा प्रकृतेऽपि तथाऽस्त्विति कल्पतरूक्तं युक्तम्। स्त्रीकायनिदर्शनेनोपासकभेदाधीनतायाः भामत्युक्ताया निर्वाहाभावात्। नच शब्दान्तरादि[१]भिरुपासनाभेदसिद्धिः। असिद्धेः। नहि 'आत्मानमेव लोकमुपासीत', 'वाचं धेनुमुपासीत', 'लोकेषु पञ्चविधं सामोपासीत' (बृ.उ.

१. म. शब्दादिभिः

१.४.१५), 'ॐइत्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१) इत्यादौ उपासनाभावनाभिधायकाख्यातभेदोऽस्ति। यद्यप्यस्ति लोकत्वधेनुत्वादिगुणभेदस्तथाऽपि स नोपासनाभेदे प्रयोजकः। अन्यथा दध्यादिगुणभेदेनाग्निहोत्रादिगुणभेदः स्यात्।

ननु 'अग्निहोत्रं जुहोति' (तै.सं. १.५.९) इति निर्गुणकर्मोत्पत्तौ तत्सन्निधाने आम्नातानामुत्पन्नशिष्टगुणानां भेदकत्वाभावेन नाग्निहोत्रभेदकत्वम्। इह तूत्पत्तावेवोपासनानां तत्तद्गुणविशिष्टानामवगतेः गृह्यमाणविशेषतया सर्वासां भेदस्तुल्य इति चेन्न।

'ब्रह्मोपास्व', 'ब्रह्मविदाप्नोति परम्' (तै.उ. २.१.१) इत्यादौ केवलोपासनाविधिश्रवणात्। तदनन्तरं श्रूयमाणानां सत्यकामत्वादीनां विशिष्टत्वविरोधात्[१]। नच समस्तशाखानामेकशास्त्रत्वे सर्वगुणोपसंहारप्राप्त्या तस्य चाशक्यानुष्ठानत्वं बाधकमिति वाच्यम्। दध्यादिवद् विकल्पोपपत्तेः। प्रयोगभेदाश्रयणं तु अविशिष्टम्।

किञ्च सर्वगुणोपसंहारः कस्याप्यशक्यानुष्ठानमुत यस्य कस्यचित्। नाऽद्यः। पुरुषमतीनां विचित्रत्वेन निर्णेतुमशक्यत्वात्। नहि केषाञ्चिदशक्तिमात्रेण सर्वेषां तदापादनं युक्तम्। तथा सति सत्यकामादिवाक्यपठितानां पञ्चषाणामपि गुणानां तत्प्रसङ्गात्। सर्वशाखोक्तगुणोपसंहारधुरीणस्य चतुर्मुखस्य 'उपसंहारोऽर्थाभेदात्' (ब्र.सू. ३-३-६) इत्यादौ दर्शितत्वाच्च। न द्वितीयः। विद्यैक्यादिघातकत्वात्। नचैवं प्रकरणभेदो[२] न स्यादिति वाच्यम्। दर्शपूर्णमासादिशास्त्रे प्रयाजादिप्रकरणभेदादर्शनात्। सत्यं दृश्यते। सर्वगुणोपसंहारेऽङ्गीक्रियमाणे प्रकरणभेदः किन्निबन्धन इति चेन्न। शाखाभेदादिवत् पुरुषशक्तिनिबन्धन-

१. म. उत्पन्नविशिष्टत्वाविशेषणात्। २. क. कारणभेदो

त्वोपपत्तेः । 'शाखाभेदो ह्यशक्तिजः' (ब्र.सू.भाष्योदाहृतस्मृतिः ३.३.३) इति ह्युक्तम् ।

एतत्सूत्रस्य परोक्तार्थनिरासः

एतेन उपासना नानैव । शब्दगुणादिभेदात्, इति व्याख्यानं चायुक्तम् । तदभेदाभावस्य गुणस्य[१] भेदकत्वाभावस्य चोपपादितत्वादात् । आद्याधिकरणेन गतार्थताया अपरिहार्यत्वाच्च ।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **उभयविधेति** ॥ किञ्चिद्वस्तु घटादि सर्वेषामस्मदादीनामेकप्रकारेण प्रतीयते । किञ्चिद्वर्णादि[२] न तथा प्रतीयत इत्यर्थः ॥ **भूमत्वमिति** ॥ यद्यपि बहुशब्दाद् भावे निष्पन्नो भूमशब्दो धर्मवाच्येवेति त्वप्रत्ययो न युक्तः । तथाऽप्यव्युत्पन्नो धर्मिवाचिभूमशब्दोऽप्यस्ति इति कृत्वा तथोक्तमिति ध्येयम् ।

पूर्वपक्षीयाकल्पनान्यायस्य व्याख्यानम्

अकल्पनेत्युक्तन्यायं साध्यादिप्रदर्शनेन विवृण्वत् '**नच भूमगुण उपासकानामेकप्रकारेण प्रतीयत इत्यङ्गीकार्यम् । विशेषस्याकल्पनोपपत्तेरिति न मन्तव्यम्**' इति वाक्यं व्याचष्टे- **भूमत्वमेकप्रकारेणैवेति** ॥ 'विशेषस्याकल्पनोपपत्तेः' इत्येतन्नञ्व्यत्यासेन योज्यमित्युपपत्तिशब्दार्थव्यञ्जनपूर्वं व्याचष्टे- **भूमत्वे विशेषकल्पनायोगादिति** ॥ अयोगे स्वयं हेतुमाह- **नहीति** ॥

सिद्धान्तीयानूनतान्यायस्य व्याख्यानम्

अनूनतेत्युक्तन्यायं वचनोपलक्षणतया तत्प्रदर्शनपूर्वं विवृण्वत्- ' "**यावानेवाधिकारेषु विशेषोऽनून एव हि । ततो**[३] **भूमत्वदृष्ट्यै**[४] **च ब्रह्मादीनां पृथक्**

१. क. दध्यादिगुणस्य २. म. स्वर्णादि ।
३. 'अतः' इति हृ. पाठे । ४. क. दृष्ट्यैव, 'भूमत्वदृष्टौ' इति हृ.पाठः ।

पृथक् ॥" इति **विशेषस्यानूनत्ववचनात्**' इति वाक्यं तात्पर्यतो व्याकुर्वन् उपसंहरति- **अतो भूमत्वदृष्टाविति** ॥ ब्रह्मादीनां योग्यतासु यावाननूनः पूर्णत्वरूपो विशेषोऽस्ति । **ततः** तावता । भूमत्वेत्यविभक्तिकं पदम् । भूमत्वस्य पृथक् पृथक् सामस्त्येन दृष्ट्यैवानूनः सम्पूर्णः फलविशेषो भवतीति विशिष्य योग्यताया[१] अनूनत्ववचनात् पूर्णत्ववचनान्न पूर्वोक्तं मन्तव्यमिति विवरणार्थो द्रष्टव्यः ।

॥ इति नानाधिकरणम् ॥ ३८ ॥

१. म. विशेषस्वयोग्यतायाः

॥ अथ विकल्पाधिकरणम् ॥ ३९ ॥

सूत्रभाष्यम्

॥ ॐ विकल्पो विशिष्टफलत्वात् ॐ ॥

॥ ३-३-६१ ॥

स्वयोग्योपासनानन्तरं सामान्यस्यापि कस्यचिदुपासनं विकल्पेन भवति विशिष्टफलापेक्षया।

'मुक्त्यर्थमात्मयोग्यं हि कार्यमेव ह्युपासनम्।
नृसिंहादिकमन्यच्च दुरितादिनिवृत्तये।
उपासते[1] यथायोगं न वा फलविभेदतः ॥'

इति ब्रह्मतर्के[2] ॥६१॥

॥ इति विकल्पाधिकरणम् ॥ ३९ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र हरिदर्शनोपयोगिबिम्बोपासनस्याकर्तव्यतानिरासादस्ति शास्त्रादि-सङ्गतिः। अन्यथा तापनीयादिश्रुतिवैयर्थ्यप्रसङ्गात् समर्थनीयमेतत्। तत् प्रकृतोपासनं विषयः। मुमुक्षुणा स्वबिम्बातिरिक्तरूपविषयं कर्तव्यं न वेति सन्देहः। बिम्बोपासनोक्तेरनवधारणाया उभयथाऽप्युपपत्तिः सन्देहबीजम्।

पूर्वपक्षः

न कर्तव्यमिति पूर्वः पक्षः। तथाहि। किमेतदुपासनं मोक्षार्थं कर्तव्यं

१. ह्. उपास्यते २. ह्. इति च ब्रह्मतर्के

फलान्तरार्थं वा। नाऽद्यः। तदभावात्। अन्यथोक्तं व्याहन्येत। न द्वितीयः। तस्य मोक्षार्थत्वाभावात्। अधिकारिणो मुमुक्षुत्वात् प्रत्युत बिम्बोपासन-विघ्नाय चेति। अतो मुमुक्षुणा न तदुपासनं कार्यमिति तद्विद्यावैयर्थ्यमिति।

सिद्धान्तः

सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- विकल्प इति॥ स्वमोक्षसाधनाति-रिक्तं च नरसिंहाद्युपासनं कर्तव्यं न वा। नतु न कर्तव्यमेव। तस्य मोक्षार्थोपासनानन्तरभावित्वेन दुरितादिनिवृत्तिलक्षणमोक्षोपयोगिफल-साधनत्वेन चोक्तदोषाभावात्। किन्तु विकल्पस्तु यस्य विशिष्टफलापेक्षाऽस्ति तेन कर्तव्यम्। यस्य तु नास्ति तेन नेति। स्वयोग्योपासनयैव तीव्रया दुरितादि-निवृत्त्युपपत्तेरिति भावः। अत्रैव स्मृतिमाह- मुक्त्यर्थमिति॥ 'नृसिंहादिक-मन्यच्च' (ब्र.सू.भा.उ.ब्रह्मतर्कवचनम् ३.३.६१) इति सामानाधिकरण्यम्। अतोऽन्योपासनस्यापि कर्तव्यत्वान्न विद्यावैयर्थ्यमिति सिद्धम् ॥ ६१ ॥

॥ इति विकल्पाधिकरणम् ॥ ३९ ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ विकल्पो विशिष्टफलत्वात् ॐ ॥ ३-३-६१ ॥

एतदधिकरणप्रतिपाद्यविषयः सङ्गतिश्च

मोक्षैकफला उपासना विचारिताः। अथ तदितरफला विचारणीयाः। ताश्च द्विविधाः। मोक्षोपयोगिदुरितादिनिवृत्तिफलास्तदनुपयोग्यैश्वर्यादिफलाश्च। द्विविधाश्च रामतापनीयाद्युपनिषत्सु श्रूयन्ते।

'सम्यगाराधितो रामः प्रसीदत्येव सत्वरम्' इत्युपक्रम्य,

'कृतं दिनेन दुरितं पक्षमासर्तुवर्षजम्।
सर्वं दहति निश्शेषमूर्णाचलमिवानलः ॥

ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च।
स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च॥

कोटिकोटिसहस्राणि उपपातकजान्यपि।
सर्वाण्यपि प्रणश्यन्ति राममन्त्रानुकीर्तनात्॥

भूतप्रेतपिशाचाद्याः कूष्माण्डग्रहराक्षसाः।
दूरादेव प्रधावन्ति राममन्त्रप्रभावतः॥

ग्राम्यारण्यपशुघ्नत्वं सञ्चितं दुरितं च यत्।
निःशेषं नाशयत्येव रामात्मा द्व्यक्षरो मनुः॥

मनोवाक्कायजनितं सञ्चितं दुरितं च यत्।
मद्यपानेन यत् पापं तदप्याशु विनाशयेत्॥

अभक्ष्यभक्षणात् पापं मिथ्याज्ञानसमुद्भवम्।
सर्वं विलीयते राममन्त्रस्यास्यानुकीर्तनात्॥

गत्वाऽपि मातरं मोहादगम्याश्चैव योषितः।
उपास्योऽनेन मन्त्रेण रामस्तदपि नाशयेत्॥'

इति रामोपनिषदि ज्ञानप्रतिबन्धकदुरितनिवृत्तिफला[1] रामोपासनाः। तथा

'एहि[2] लौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम्।
कैवल्यं भगवत्त्वं च मन्त्रोऽयं साधयिष्यति॥

अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते।
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम्।
ददात्यायुष्यमैश्वर्यम् अन्ते विष्णुपदं च यत्॥'

इति मोक्षानुपयोग्यर्थादिफलाः[3] रामोपासनाश्च।

१. क. फलदाः २. 'यद्धि' इति पाठः सम्भाव्यते। ३. क. अर्थादिपराः

एवं तापनीयोपनिषद्युभयविधा नृसिंहोपासनाः- 'देवा ह वै मृत्योः पाप्मभ्यः संसाराच्चाबिभयु[1]स्ते प्रजापतिमुपधावंस्तेभ्यः एतं मन्त्रराजं नारसिंहमनुष्टुभं प्रायच्छत्। तेन वै सर्वे मृत्युमजयन्। पाप्मानमतरन्। संसाराच्चातरन्। तस्माद् यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात्[2] स एवं मन्त्रराजं नारसिंहमनुष्टुभं प्रतिगृह्णीयात् । स मृत्युं जयति। स पाप्मानं तरति। स ब्रह्महत्यां तरति' (नृसिंहपूर्वतापिन्युपनिषत् २.१) इत्यादि। तथा 'सोऽग्निं स्तम्भयति। स वायुं स्तम्भयति। स आदित्यं स्तम्भयति। स विषं स्तम्भयति' (नृ.पू.तापन्युपनिषत्) इत्यादि। 'स देवानाकर्षयति। स गन्धर्वयक्षानाकर्षयति । स नागानाकर्षयति। स ग्रहानाकर्षयति। स मनुष्यसर्पानाकर्षयति' (नृ.पू.तापन्युपनिषत्) इत्यादि।

एवं नारायणोपनिषदि 'नारायणः सर्वं यद् भूतं यच्च भव्यं प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। मध्यन्दिन आदित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात् प्रमुच्यते' (नार.उ. .५) इत्यादिना नारायणोपासनाः दुरितनिवृत्त्यर्थाः।

एवं तैत्तिरीयेऽपि 'आवहन्ति' इत्यादिकाः। 'तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति । तन्मह इत्युपासीत। महान् भवति। तन्मन इत्युपासीत। मानवान् भवति। तन्नम इत्युपासीत। नम्यन्तेऽस्मै कामाः। तद् ब्रह्मेत्युपासीत। ब्रह्मवान् भवति। तद्ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियन्ते द्विषन्तः सपत्नाः। परि ये प्रिया भ्रातृव्याः' (तै.उ. ३.१०.३) इत्यादिकाश्च तत्तद्गुणविशेषविशिष्टा उभयफलाश्च। 'पर्येण म्रियन्ते द्विषन्तः सपत्नाः' (तै.उ. ३.१०.३) इत्यनेन ब्रह्महत्यादिदुरितनिवृत्त्युक्तेः। बाह्यशत्रुनिवृत्तेः 'परि ये प्रिया भ्रातृव्याः' इति वक्ष्यमाणत्वात्।

१. म. अबिभ्यन् २. म. बिभियात्

तथाचैवं द्विविधासु काम्योपासनासु मोक्षोपयोगिदुरितनिवृत्त्यर्थाः उपासनास्तावदत्र विचार्यन्ते। यथा निरवधिकं पूर्णत्वमयोग्यत्वात् सर्वेषां नोपास्यं तथा बिम्बातिरिक्तमपि नृसिंहादिकमयोग्यत्वादनुपास्यमेवेति शङ्कनादनन्तरसङ्गतिः। मोक्षानुपयोगिफलान्तराभिसन्धित्यागाख्येतिकर्तव्यतान्तरमत्रोच्यत इति पेटिकासङ्गतिरप्यूह्या।

चिन्ताक्रमः पूर्वपक्षश्च

ताः किं मुमुक्षुणा कर्तव्याः उत न। तदर्थं किं तासां मोक्षोपयोगिफलमेव नास्त्युतास्तीति, तदर्थं किं मुमुक्षोः स्वबिम्बोपासनानन्तरं फलान्तरमेव नास्त्युतास्तीति चिन्तनीयम्। तत्र बिम्बोपासनानन्तरं न फलान्तरमस्ति। मुमुक्षुत्वादेव। मोक्षस्य च बिम्बोपासनैकसाध्यत्वस्य नसामान्यनयसिद्धत्वात्। मुमुक्षूणां फलेच्छाया अभावाद् बिम्बदर्शिनां नान्यद् रूपमुपास्यम्। मुक्तिस्तेनैव सेत्स्यतीति पूर्वः पक्षः।

सिद्धान्तः

मुमुक्षुणा न बिम्बातिरिक्तरूपाण्यनुपास्यान्येव। तस्यापि वैष्णवत्वात्। मुमुक्षोः मुक्त्यनुपयोगिफलान्तरानपेक्षत्वेऽपि तदुपयोगिफलापेक्षावश्यम्भावात्। तथाहि- शुचित्वं तावत् -

'शुचयस्तं भावयन्तो यज्ञेन तपसा धिया।
प्राप्नुवन्ति पदं तस्य यद्वै पश्यन्ति सूरयः ॥'

इत्यादेरुपासनाङ्गत्वं श्रूयते। अशुचित्वं च-

'देहिनामल्पबुद्धित्वात् करणायत्तचेतसाम्।
निर्मलज्ञानभूयिष्ठं न शक्यं ब्रह्म लक्षितुम् ॥

अशक्तो भास्करं द्रष्टुं यथा बालो वियद्गतम्।
बलीयो ब्रह्म सर्वेषां चेतसां च तथा द्विज ॥

अनादिवासनादुष्टं मानसं मलिनं यतः।
अतो योगः सुदुष्प्रापः'

'अतिप्ररूढं बाह्येष्वर्थेष्विन्द्रियानुगतं मनः।
तेभ्यो विलीय सहसा नान्यत्र चलनक्षमम् ॥

बाह्यवृत्तेरनादित्वान्मनसो वदतां वरः।
प्रदेशो ह्यसतस्तस्य परस्मिन्न हि शक्यते ॥'

इत्यादेरुपासनाप्रतिबन्धकम्। तच्च ब्रह्महत्यादिदुरितजातम्। 'पापेन कर्मणा तात मानसं मलिनं भवेत्' इत्यादेः। अतस्तन्निवृत्तिरपि मुमुक्षुणाऽपेक्षितैव।

'प्रयतस्व महाबुद्धे त्वमप्येतदुपक्षये।
अतोऽस्य मनसः शुद्धिः कार्याऽऽदौ तु विचक्षणैः।
कर्मणां विलयेनैकस्याऽत्मनः शुद्धिरिष्यते ॥' इत्यादेः।

सा च भगवदुपासनादेव। नतु कर्मादिना।

'अतो योगः सुदुष्प्रापः सहसा कर्मणा द्विज।
मनःप्ररूढं तिमिरं गोविन्दस्मरणं विना।
नापगच्छति धातूनां विना नाग्निं यथा मलम्[१] ॥'

यद्यपि,

'पापक्षयश्च भवति सर्वेषामपि सुव्रत।
तीर्थस्नानात् सदा दानात् पुण्यक्षेत्रनिषेवणात् ॥',

---

१. क. विना नाग्निं यथाऽतुलम्।

'तपसा नियमेनैव तीर्थस्नानादिकैर्नरः।
पापानि क्षपयन्नेव योगसिद्धिं लभेत हि[१] ॥
बहवः क्षीणकर्माणो मुनयः शंसितव्रताः।
कर्मणां विलयं कृत्वा परां सिद्धिमितो गताः॥'

इत्यादेस्तीर्थस्नानादिनाऽपि दुरितनिवृत्तिः श्रूयते। तथाऽपि सद्यः सम्यक्त्व न भवति।

'पापानां कर्मणां चाऽशु नाशः सम्पद्यते नृषु[२]।
वैकुण्ठस्मरणात् सद्यः पवित्रं भगवान् यतः॥
कामकर्दमसम्मर्दशश्वन्मलिनमानसम्।
क्षालयेत् सम्यगात्मानं तेन ज्ञानाम्भसा बुधः॥'

इत्यादिना गोविन्दस्मरणरूपोपासनेनैव सद्यः सम्यक् तन्निवृत्त्युक्तेः। तथाचानाद्यविद्याकामकर्मादिरुपासनाप्रतिबन्धकस्य निवृत्तिर्मुमुक्षुणाऽप्यपेक्षणीयैव। अत एव रामतापनीयाद्युपनिषत्सु ब्रह्महत्यादिदुरितनिवृत्तिरप्युपासनाफलत्वेनोच्यते।

नन्वेवं स्वबिम्बोपासनया तीव्रया संसिद्धदुरितादिनिवृत्तेः कृष्णलीलादाववघातस्येव द्वारलोपादन्योपासनं न कार्यं स्यादिति चेत् कः कार्यमित्याह? अत एव विकल्प इत्याह।

स्वयूथ्यानामेव केषाञ्चित् प्रकारान्तरेणाधिकरणरचनम् तत्र पूर्वपक्षः

केचित्तु, एवं भूमाख्यपूर्णताकसत्यज्ञानानन्दाद्यात्मकतया स्वमुक्त्यर्थोपासनयोग्यस्वनिखिलचेष्टाप्रेरकबिम्बस्यैवोपास्यत्वमुक्तम्। अधुना फलान्तरार्थं तापनीयादिविहितनृसिंहत्वाद्युपासनमपि विकल्पेन समुच्चिनोति इति सङ्गतिः।

२. म. ह २. क. नृप।

किं मुमुक्षुभिः सत्यत्वादिनैव स्वबिम्बमुपास्यम्? अथ नृसिंहत्वाद्युपास्यमित्येव नेति संशये सत्यत्वादिनैव बिम्बमुपास्यमिति पूर्वः पक्षः। गुणान्तराणां मुक्तावनुषङ्गायोगादिति।

सिद्धान्तः

सिद्धान्तस्तु[१] - विकल्पनेनान्वयः तापनीयोक्तनृसिंहत्वादिना सत्यत्वादेः। 'क्षुधितानां दुर्बलानां कुतो योगसमाधयः' इति दुरितनिवृत्त्यादेरपि मुमुक्ष्वपेक्षितत्वात्। आनुकूल्येन तद्विशिष्टफलत्वात्। स्वजनकपापाभावेन दुरिताप्रसक्तौ तु न वा नृसिंहत्वाद्युपास्यं मुक्तिविरोधिस्वर्गादेरनपेक्षितत्वात्- इति व्याचक्षते।

सूत्रार्थः

सूत्रार्थस्तु- विष्णुरूपविषयत्वेन बिम्बोपासनसमानतया वर्तमानस्य नृसिंहाद्युपासनसमानसामान्यस्य बिम्बोपासनेन **विकल्पो** भवति। द्वारभूतदुरिताज्ञानान्यथाज्ञानकामादिनिवृत्तिरूपोत्तमफलवत्त्वादिति।

परमतानुवादः

अत्रान्येषामधिकरणम्। द्विविधान्युपासनानि। अहङ्ग्रहाणीति प्रतीकानि चेति। आत्मनः सगुणत्वेनोपासनेष्वहङ्ग्रहस्य चतुर्थाध्याये वक्ष्यमाणत्वादात्मनः सगुणत्वेनोपासनान्यहङ्ग्रहाणि। अनात्मवस्तुनि देवतादृष्ट्या संस्मृत्योपास्यमानानि प्रतीकानीति विवेकः। तत्राहङ्ग्रहेषु शाण्डिल्यविद्यादहरविद्याद्युपासनेषु चिन्त्यते। किमासामिच्छया समुच्चयो विकल्पो वा स्यादथवा विकल्प एव नियमेनेति।

तत्र पूर्वाधिकरणे विद्याभेदस्य स्थितत्वात् पृथगधिकाराणामासां न समुच्चयः। कारीरिपुत्रकामेष्ट्योरिव। यद्यप्यग्निहोत्रदर्शपूर्णमासादिष्वेकस्मिन्ने-

१. म. राद्धान्तस्तु

वाधिकारिणि समुच्चयो दृष्टस्तथाऽपि तेषां नित्यत्वेन समुच्चयोपपत्तावप्युपासनानां काम्यतया तदनुपपत्तिः। नापि विकल्प एवेति नियमः। समानफलानां दर्शपूर्णमासज्योतिष्टोमादीनामिव तत्साध्यस्वर्गे सुखबाहुल्यार्थमुपासनानामपि फलभूमार्थं समुच्चयस्य सम्भवादिति प्राप्ते उपासनानाममूषामुपास्यसाक्षात्कारसाध्यत्वात् फलभेदस्य एकेनोपास्यसाक्षात्करणे तत एव फलप्रतिलाभात् कृतमुपासनान्तरेण। नच साक्षात्करणस्यातिशयसम्भवः तस्योपायसहस्रैरपि एकात्मतातादवस्थ्यात्, तन्मात्रसाध्यत्वाच्च फलावाप्तेः। उपासनान्तराभ्यासे चित्तैकाग्रताव्याघातेन कस्यचिदुपासनाऽनिष्पत्तेर्विकल्प एव न समुच्चय इति राद्धान्त इति।

तन्निरासः

तन्न। ब्रह्मप्राप्तिफलानामुपासनानां विकल्पनियम उच्यते उत वस्वादिपदप्राप्तिफलानाम्। नाऽद्यः। यतस्त्वन्मत इव मन्मते न साक्षादेवोपासनाजनितसाक्षात्काराद् ब्रह्मप्राप्तिः। किन्त्वेकैकरूपोपासनया तत्तद्रूपसाक्षात्कारे तत्तद्योग्यस्थलेषु स्थित्वा रूपान्तरोपासनया तीव्रया तद्रूपे च साक्षात्कृते ततोऽप्युत्कृष्टमहरादिलोकप्राप्तौ तत्र नियतगुरूपदेशेन स्वबिम्बोपासनया तत्साक्षात्कारे च लिङ्गशरीरत्यागादिप्रक्रियया ब्रह्मणा सह स्वस्वयोग्यानन्दादेः सम्यगनुभवरूपमुक्तिर्भवतीति हि मद्रीतिः। अत एव 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार' (तै.उ. ३.१) इत्याख्यायिकायां सम्पादितान्नमयादिसाक्षात्कारस्यापि भृगोः प्राणमयादिरूपान्तरोपासनानुज्ञाप्रार्थनं दृश्यते। तथाच कथं न समुच्चयापेक्षा?

एतेन, किमुपासनान्तराणां साक्षात्करणे उपयोगः? किं वा साक्षात्कारगतेऽतिशये? अथवा साक्षात्कारेण फले जनयितव्ये तत्रातिशयाधायकतया? नाऽद्यः। एकेनैवोपासनेन साक्षात्कारलाभात्। न द्वितीयः। साक्षात्कारेऽतिशयायोगात्। न तृतीयः। ब्रह्मप्राप्तिरूपफलस्याविशिष्टत्वादिति निरस्तम्। उपासनान्तरस्य पूर्वोपासनाविषयब्रह्मस्वरूपसाक्षात्कारप्रतिबन्धकदुरितादिनिवर्तकत्वेनैवोपासनेन साक्षात्कारसिद्धेः साक्षात्कारजनन एवोपयोगाङ्गीकारात्। यथोक्तम्- 'नृसिंहादिकमन्यच्च दुरितादिनिवृत्तये' (भाष्योदाहृतब्रह्मतर्कवचनम्) इति। केषाञ्चिदुपासनान्तराणां पूर्वोत्पन्नसाक्षात्कारे विशिष्टफलाभिमुख्यलक्षणमतिशयाधायकत्वं चाङ्गीकर्तव्यम्। कथमन्यथाऽन्नमयादिब्रह्मसाक्षात्कुर्वतोऽपि प्राणमयादिब्रह्मोपासना दृश्येत। अत एव तृतीयः पक्षोऽपि युक्ततरः। 'आनन्दह्रासदोषेण सैव मुक्तिर्विदुष्यति' इत्युपासनान्तरमकुर्वतो निन्दाश्रवणादानन्दाभिवृद्धिलक्षणातिशयस्य फलेऽङ्गीकारात्।

यच्चोक्तं चित्तैकाग्रताव्याघात इति तत्र किमेकस्मिन्नेव क्षणे उपासनान्तरस्वीकारे स्यादुत कालान्तर एव[1]। नाऽद्यः। एकयोपासनया साक्षात्कारे तत्र फलाभिमुख्याद्यतिशयसिद्ध्यर्थं कालान्तरे जाते उपासनस्याङ्गीकारात्। न द्वितीयः। समुच्चयवार्तोच्छेदप्रसङ्गात्। नहि दर्शपूर्णमासाद्यपि चित्तैकाग्रतां विना कर्तुं शक्यते। न द्वितीयः। वस्वादिपदप्राप्तिफलानां मध्वादिविद्यानां प्राप्तपदैरपि देवैः फलज्ञानाद्यतिशयार्थं पुनरनुष्ठानस्य देवताधिकरणे सूत्रकृता कण्ठत एवोक्तत्वात्। तस्मान्नैवमधिकरणम्। एतेनाविशिष्टफलत्वात् फले विशेषाभावाद् विकल्प एव, न समुच्चय इति सूत्रव्याख्यानं निरस्तम्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- नन्वत्र बिम्बोपासनस्य कर्तव्यता प्रतिपाद्यत उताकर्तव्यता निरस्यते। नाऽद्यः। वक्ष्यमाणविकल्पविरोधात्। बिम्बोपासनेनैव मोक्षसिद्धेश्च। न द्वितीयः। स्वतस्सिद्धदुरितादिनिवृत्तेरकर्तव्यताङ्गीकारात्। हरिदर्शनानुपयोगिनः स्वर्गादिफलकस्याकर्तव्यताङ्गीकाराच्चेत्यतः प्रतिपाद्यं निष्कृष्याऽह- **हरिदर्शनोपयोगीति**॥

१. म. कालान्तरेऽपीति

पूर्वपक्षीयशुद्धवैरूप्यन्यायस्य व्याख्यानम्

शुद्धवैरूप्यमित्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत् **'नच शुद्धमोक्षसाधनवैरूप्यान्मोक्षसाधनत्वेनोपदिष्टं विना 'विष्णावेवोपासनान्तरस्याकर्तव्यता'** इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे-**न कर्तव्यमिति पूर्वः पक्ष इति**॥ मुमुक्षुणा स्वबिम्बातिरिक्तरूपविषयमुपासनं न कर्तव्यमित्यर्थः। अनेन 'विष्णावेवोपासनस्याकर्तव्यता' इत्येतद् विवृतं भवति। आद्यनिरासकत्वेन पूर्वार्धं व्याचष्टे- **तदभावादिति**॥ मोक्षार्थत्वाभावात्। शुद्धमोक्षसाधनवैधर्म्यादिति यावत्। द्वितीयनिरासकत्वेनापि व्याचष्टे- **तस्येति**॥ अनेन केवलमोक्षसाधनबिम्बोपासनवैलक्षण्यं तावदस्ति, रूपान्तरोपासनस्य फलान्तरश्रवणात्। अतो मोक्ष एव न फलम्।

किञ्च शुद्धं मोक्षसाधनं यस्मिन् स मुमुक्षुः शुद्धमोक्षसाधनम्। तद्वैरूप्यं रूपान्तरोपासकस्यास्ति। तस्य मुमुक्षुत्वात्। अन्यस्य फलान्तरापेक्षित्वेनामुमुक्षुत्वात्। अतो रूपान्तरोपासनेऽमुमुक्षोरधिकारेऽपि न मुमुक्षोः सम्भवति। अतो मुमुक्षुः मोक्षसाधनत्वेनोपदिष्टं बिम्बोपासनमेव करोति। ननु तद्विना विष्णोरेव[1] रूपान्तरविषयमप्युपासनान्तरं[2] करोतीत्युपासनान्तरस्याकर्तव्यतैवेति विवरणार्थः सूचितः।

अविघ्नत्वाख्यसिद्धान्तन्यायस्य व्याख्यानम्

अविघ्नत्वमित्युक्तन्यायमुपलक्षणतया विवृण्वत् **'अविघ्नतासाधनत्वात्'** इति वाक्यं व्याख्यातुं भाष्यसूचितसूत्रयोजनाप्रकारं दर्शयति- **स्वमोक्षेति**॥ सामान्यस्यापि कस्यचिदुपासनमिति भाष्यस्यार्थः। स्वमोक्षसाधनातिरिक्तं नारसिंहाद्युपासनमिति। 'सामान्यदर्शनाल्लोकः' इति स्मृत्यनुसारेण भाष्ये सामान्यपद-

१. 'विष्णोरेव' इति ह.पाठे। २. क. रूपान्तरविषयमुपासनान्तरम्

प्रयोगः। विकल्प इत्यस्यार्थः:- **कर्तव्यं न वेति**॥ 'न वेति विभाषा' (पा.सू. १.१.४४) इति स्मरणादिति भावः।

ननु पक्षद्वयाश्रयणं कुत इत्यतः द्वितीयपक्षानाश्रयणे दोषं वक्तुं प्रतिजानीते- **नतु न कर्तव्यमेवेति**॥ तत्र हेतुपरतया विवरणं व्याचष्टे- **तस्य मोक्षार्थोपासनानन्तरभावित्वेनेति**॥ मोक्षार्थोपासनानन्तरं मोक्षप्रतिबन्धकदुरितादिनिवृत्तिफलकत्वेन प्रमितत्वात्। स्वतस्सिद्धदुरितादिनिवृत्तेर्मुमुक्षोरविघ्नतासाधनत्वेन प्रमितोपासनान्तरस्यावश्यकर्तव्यतानुपपत्तेः द्वितीयः पक्षोऽप्याश्रित इति भावः। आद्यपक्षानाश्रयणे दोषोक्तिपरतया प्रकारान्तरेण व्याचष्टे- **दुरितादिनिवृत्तीति**॥ यस्य बिम्बोपासनेन न दुरितादिनिवृत्तिस्तस्य मुमुक्षोर्दुरितादिनिवृत्तिरपि मोक्षोपयोगितयाऽपेक्षितत्वेनाविघ्नतासाधनत्वादन्योपासनस्य कर्तव्यत्वं चाङ्गीकर्तव्यमिति भावः।

ननु 'नृसिंहादिकमन्यच्च' (सू.भा. उदाहृतब्रह्मतर्कवचनम्) इति स्मृतावङ्गदेवतानामुपास्तिरपि श्रूयत इति तत्रापि विकल्पाश्रयणे पूर्वोक्तकर्तव्यतात्वभङ्ग इत्यत आह- **सामानाधिकरण्यमिति**॥ बिम्बोपासनापेक्षयाऽन्यत्वं नृसिंहोपासनस्यैव, न तु तस्मात् किञ्चिदन्यदेवतोपासनमुच्यत इति भावः।

॥ इति विकल्पाधिकरणम्॥ ३९॥

॥ अथ काम्याधिकरणम् ॥ ४० ॥

सूत्रभाष्यम्

॥ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॐ॥
॥ ३-३-६२ ॥

'यस्य यस्य हि यः कामस्तस्य तस्य ह्युपासनम् ।
तादृशानां गुणानां च समाहारं प्रकल्पयेत् ॥
अकामत्वान्मुमुक्षूणां न वा तेषामुपासनम् ।
तुष्ट्यर्थमीश्वरस्यैव नैवोपासा[1] विदुष्यति ॥'

इति बृहत्तन्त्रे[2] ॥ ६२ ॥

॥ इति काम्याधिकरणम् ॥ ४० ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनस्यैवोपासनस्याऽवश्यकत्वसमर्थनादस्ति शास्त्रादिसङ्गतिः । काम्योपासनस्याऽवश्यकत्वे प्रथमपादानुपपत्तिप्रसङ्गात् समर्थनीयम् । प्रकृतोपासनमेव विषयः । कामसाधनभगवद्रूपगुणविषयं तावत् कर्तव्यमेव । अन्यथा तद्विद्यावैयर्थ्यात् । तत् किमावश्यकं वैकल्पिकं वेति सन्देहः । द्विविधोपासनप्रतीतिः सन्देहबीजम् ।

पूर्वपक्षः

आवश्यकमिति पूर्वः पक्षः । मोक्षोपयोगिफलत्वात् । अर्थादिकं हि

१. हृ. नवोपासा २. हृ. इति हि बृहत्तन्त्रे

तत्फलम् । तेन च ज्ञानसिद्धेः । अतः काम्योपासनस्याऽवश्यकत्वेन वैराग्यस्यानपेक्षितत्वाद् व्यर्थः प्रथमपाद इति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठति- **काम्यास्त्विति** ॥ कामसाधनरूपे कामसाधनगुणाः स्वस्वकामानुसारेणोपसंहर्तव्या न वेति विकल्प एव नतु नियतिः । विकल्पश्चामुमुक्षुभिः कार्यो मुमुक्षुभिर्नेति । मुमुक्षूणां कामाख्यहेत्वभावात् । मुमुक्षुष्वेव वा विकल्पः । फलार्थं न कार्यमीश्वरप्रसादार्थं कार्यमिति । कुतः? कामाख्यहेत्वभावात् । प्रबलहेत्वभावाच्च । नह्यर्थादिकं विना ज्ञानाभावो नापि तेन नियत्या भवतीति सूत्रार्थः । अत्रैव स्मृतिमाह- **यस्येति** ॥ यस्य यस्य पुंसो यो यो वित्तादिकामोऽसावसौ तस्य तस्य तत्कामप्रदरूपस्योपासनं प्रकल्पयेत् । तादृशानां तत्तत्कामप्रदानां गुणानां तत्रोपसंहारं च प्रकल्पयेत् कुर्यादमुमुक्षुरित्यर्थः । अत उक्तरीत्या काम्योपासनस्य वैकल्पिकत्वात् सार्थक्यं वैराग्यपादस्येति सिद्धम् ॥ ६२ ॥

॥ इति विकल्पाधिकरणम् ॥ ४० ॥

शेषतात्पर्यचन्द्रिका

॥ॐ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॐ॥
॥ ३-३-६२ ॥

अनन्तरसङ्गतिः

अथ काम्याद्युपासनासु दुरितनिवृत्तिफलानामन्तरङ्गत्वात् तद्विचारानन्तरं तदितरफला उपासना विचार्यन्ते । यद्येवं दुरितादिनिवृत्त्यादिकाम्यफला नृसिंहत्वादिगुणा रूपविशेषाश्च मुमुक्षूणामकामनादशायामनुपास्यास्तर्ह्यनुपास्या एव

स्युरिति शङ्कायां तत्तत्कामनाव्यावृत्त्या तत्तत्काम्यार्थमनुपास्या अपि[१] भगवत्प्रीति-कामनानुवृत्त्या काममुपास्या एवेतीह समर्थ्यत इत्यनन्तरसङ्गतिः। यथा दुरितादिसदसद्भावाभ्यामन्यान्योपासने विकल्पस्तथा काम्यास्वप्यत्यन्ता-पत्सदसद्भावाभ्यां विकल्पः इत्यतिदेशनाद्वाऽनन्तरसङ्गतिः।

चिन्ताक्रमः पूर्वपक्षश्च

ताश्च मुमुक्षुभिरवश्यं कर्तव्या उत विकल्पेनेति, तदर्थं तत्फलानामर्थादीनां मोक्षे उपयोगोऽस्त्युत नेति चिन्तनीयम्। अवश्यं कर्तव्या इति पूर्वः पक्षः। काम्योपासनासाध्यार्थादीनां गुरुतुष्टिसत्सङ्गत्यादिसम्पादनमुखेन ज्ञानसिद्धौ मोक्षसिद्धौ चाङ्गत्वेन तेषामप्युपसंहारस्या[२]वश्यकर्तव्यत्वात्। नच स्वतस्सिद्धा-र्थादिमतः पूर्वन्यायेनानावश्यकत्वाद् विकल्प इति वाच्यम्। काम्योपासना-विद्याऽवैयर्थ्याय काम्योपासनाया एवार्थादिप्राप्तिहेतुत्वावगमात्। तद्विना तत्प्राप्तेरेवायोगात्। तीव्रोपासनायाः दुरितादिनिवृत्तिहेतुत्वेऽप्यर्थादिप्राप्तिहेतुत्वे प्रमाणाभावादिति पूर्वः पक्षः।

सिद्धान्तः

काम्यगुणाः[३] काम्येषु रूपेषु स्वस्वकामानुसारेणोपसंहर्तव्या न वेत्येव विकल्पः पूर्वनय इव युक्तः। इयानेव विशेषोऽमुमुक्षुभिः कार्या न मुमुक्षुभिरिति। कामाख्य-हेत्वभावाद् व्यवस्थितो विकल्पः। दुरितनिवृत्तिकामना मुमुक्षूणामप्यस्तीति तत्राव्यवस्थितो विकल्पः। यद्वाऽत्राप्यव्यवस्थित एव विकल्पः। मुमुक्षूणां दुरितनिवृत्तिकामनावदीश्वरप्रसादकामनायाः सद्भावात्। यद्यपीश्वरप्रसादकामना सर्वेषां मुमुक्षूणामस्ति। नतु दुरितनिवृत्तिकामनेव केषाञ्चिदेव। तथाऽप्यर्थादि-कामनया न कार्यम्। महापदि तु तत्कामनयाऽपि कार्यम्। तत्रापि नार्थैकदृष्ट्या,

१. म. इति   २. म. तेषामुपसंहारस्य   ३. म. काम्या गुणाः

किन्तु ईश्वरप्रसादापेक्षयैव कार्यमित्यर्थादिप्रापकेश्वरप्रसादस्य सर्वमुमुक्षुकाम्य-त्वाभावाद् विकल्पो युज्यत एवेति सिद्धान्तः।

सूत्रार्थः

सूत्रार्थस्तु- कामसाधनरूपविशेषा गुणविशेषाश्च **यथाकामं** स्वस्व-कामनानुसारेण **समुच्चीयेरन्न वा** उपसंहर्तव्या न वा। विकल्प एव नतु नियतिरिति यावत्। **पूर्वहेत्वभावात्** कामाख्यप्रथमहेत्वभावादिति।

अद्वैतमतरीत्या एतदधिकरणशरीरम्

अत्रान्यैरुक्तम्। प्रतीकाश्रितान्युपासनान्यपि लौकिककर्माङ्गभेदेन प्रतीक-द्वैविध्याद् द्विविधानि। तत्र लौकिकप्रतीकाश्रयाणि 'स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदं रोदिति' (छा.उ. ३.१५.२), 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति' (छा.उ. ७.१.५) इत्यादीन्य-दृष्टद्वारा फलसाधनान्यत्र विचार्यन्ते। किमिमान्यनात्मवायुनामवागाद्याश्रितानि नियमेन विकल्प्यन्ते न वेति सन्देहः। तत्र पूर्वाधिकरणन्यायेन विकल्प एवात्र युक्तः। तथाहि प्रयोगः। प्रतीकोपास्तयो नियमेन विकल्पमर्हन्ति उपास्ति-त्वादहङ्ग्रहोपास्तिवत्- इति प्राप्तेऽभिधीयते। काम्यास्तूपासनाः प्रतीकाश्रि-तास्तत्कामसिद्ध्यर्थम् अग्निहोत्रदर्शपूर्णमासादिवत् समुच्चीयेरन्न वा समुच्ची-येरन्। पूर्वस्याविशिष्टफलत्वादित्यस्य विकल्पहेतोरभावादस्त्यत्र महद्वैषम्यम्। 'देवो भूत्वा देवानप्येति' (बृ.उ. ४.१.२) इति जीवन्नेव[१] देवत्वभावनाप्रकर्ष-वशाद् देवभावसाक्षात्कारं प्राप्य ततो[२] देवमुपैतीति यथाऽहङ्ग्रहेष्ववगम्यते न तथा प्रतीकेषु साक्षात्कारफलत्वे किञ्चिन्मानमस्ति। तथाच तत्र पूर्वोक्त-भोग्यवस्तुप्राप्तयः फलत्वेनाभ्युपगन्तव्याः। तथा भिन्नफलत्वान्नाऽनर्थक्यम्। अनुमानं च साक्षात्कारफलकत्वादिनोपाधिना ग्रस्तमिति।

१. म. जपन्नेव   २. म. मृतो

तन्निरासः

तन्न। तत्रैव ह्याक्षेपिकी सङ्गतिः यत्र पूर्वोक्तन्यायः प्रवर्तते। नासावत्रास्ति। फलैक्यन्यायस्याभावात्। भावे वा सिद्धान्तानुपपत्तिः। यच्चाहङ्गहवैषम्यमुक्तं 'देवो भूत्वा देवानप्येति' (बृ.उ. ४.१.२) इत्येतावन्मात्रश्रवणेऽप्यहङ्गहस्य साक्षात्कारफलकत्वे प्रमाणाभावाद् वाक्याभिप्रायवर्णनं तत्तूभयत्राप्यविशिष्टम्।

किञ्च यदि प्रतीकोपास्तीनां साक्षात् परम्परया वा न साक्षात्कारफलं तर्हि ब्रह्मकाण्डे तदुपदेशो व्यर्थः स्यात्। उपभोग्यवस्तुप्राप्तिसाधनानां कर्मकाण्डनिवेशस्यैव युक्तत्वात्।

टीकाक्षरार्थः

टीकाक्षरार्थस्तु- **अत्र ब्रह्मज्ञानेति**॥ यद्यपीदं पूर्वाधिकरणेऽप्यविशिष्टम्। तत्रापि हरिदर्शनोपयोगिबिम्बोपासनस्यैवाऽवश्यकत्वस्य तद्विपरीतोपासनविकल्पसमर्थनेन फलतः प्राप्तत्वात्। मुखतोऽत्राप्यलाभात्। तथाऽपीदं नैतदधिकरणप्रतिपाद्यपरम्। हरिदर्शनानुपयोग्यबिम्बोपासनस्याप्यकर्तव्यतानिरासस्यैवात्र प्रतिपाद्यत्वावगतेः। अन्यथा पूर्वाधिकरणे हरिदर्शनेति व्यर्थं स्यात्। अत एवात्र प्रकृतोपासनमेव विषय इति वक्ष्यति। द्विविधासु काम्योपासनासु निर्दिष्टासु दुरितनिवृत्तिफलासु विचारितासु तदनन्तरविचार्यत्वेन प्रकृता दुरितनिवृत्तीतरफला उपासना विषय इति तस्यार्थः। किन्त्वधिकरणद्वयतात्पर्यकथनपरमेव। पूर्वाधिकरणेऽपि ब्रह्मज्ञानसाधनोपासनस्यैवाऽवश्यकत्वे तात्पर्यावगतेः।

यद्वा, पूर्वाधिकरण एव दुरितनिवृत्तीतरफला अप्युपासना विषयः। अर्थादिफलानामुपासनानाम् उक्तरीत्या भगवत्प्रीतिकामनया कर्तव्यत्वाद्धरि-

दर्शनोपयोग्यबिम्बोपासनशब्देनोभयविधानामपि काम्यानामुपासनानां ग्रहणसम्भवात्। तथाच काम्योपासनमात्रस्य पूर्वस्मिन् कर्तव्यत्वे सिद्धे इह तस्य वैकल्पिकत्वसमर्थनद्वारा ब्रह्ममानसाधनबिम्बोपासनस्याऽवश्यकत्वं समर्थ्यत इत्यर्थः।

यद्यप्यस्मिन् पक्षे बिम्बोपासनस्य पूर्वस्मिन्नेव वैकल्पिकत्वसमर्थनेन बिम्बोपासनस्यैवाऽवश्यकत्वसिद्धेरेतदधिकरणारम्भो व्यर्थः। तथाऽपि न पूर्वाधिकरणस्य विकल्पे तात्पर्यम्। अत एव तत्र 'कर्तव्यं न वा' इत्याद्येव टीकावाक्यं दृश्यते। अत्र तु तत् किमावश्यकं वैकल्पिकं वेति सन्देह इत्यादि। किन्तु विशिष्टफलत्वादिति सौत्रहेतुबलात् कर्तव्यतामात्रे तात्पर्यम्। अन्यथा विशिष्टफलत्वस्य विकल्पप्रयोजकत्वाद्धेतुराभासः स्यात्। सौत्रं विकल्पपदं तूत्तराधिकरणसिद्धप्रमेयानुवादपरम्। तथाच 'प्रकृतोपासनमेव विषयः' इति इह टीकावाक्यं न क्लेशेन योजनीयमिति ध्येयम्। काम्योपासनस्य कर्तव्यतायां सिद्धायामेवाऽवश्यकत्ववैकल्पिकत्वचिन्तावसरः। अत आह- **कामसाधनेति**॥ नचात्र मुमुक्षुं प्रति काम्यविद्या भविष्यतीति वाच्यम्। मुमुक्षुं प्रत्यप्यत्यन्तापदि तद्विधानात्। अन्यथा ब्रह्मप्रकरणे 'आवहन्ति' इत्यादिविद्याम्नानायोगादिति भावः। तेन तदर्थमधिकरणान्तरारम्भः स्यादिति निरस्तम्।

यद्वा, आवश्यकत्ववैकल्पिकत्वचिन्तोपयोगितया पूर्वाधिकरणसिद्धमनुवदति- **कामसाधनेति ॥ द्विविधोपासनेति** ॥ दुरितादिनिवर्तकनृसिंहाद्युपासनस्य बिम्बोपासनस्याऽवश्यकस्य च प्रतीतेरित्यर्थः।

पूर्वपक्षीयाङ्गत्वन्यायव्याख्यानम्

'अङ्गत्वम्' इत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत् **'नच काम्यसाधनानामपि गुणानामङ्गत्वादेवोपसंहर्तव्यतानियमः।'** (न्या.वि.) इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे- **आवश्यकमिति पूर्वः पक्ष इति**॥ अनेन 'उप-

संहर्तव्यतानियमः' इत्येतद् व्याख्यातम् । पूर्वार्धं व्याख्याति- **मोक्षोपयोगिफलत्वादिति** ॥ काम्यसाधनानामपि गुणानामङ्गत्वान्मोक्षोपयोगिफलवत्त्वादिति व्याख्यातं भवति ।

सिद्धान्तीयाविरोधन्यायस्य व्याख्यानम्

अविरोध इत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत् '**अनुपसंहारे विरोधाभावात् । काम्यानामनियताङ्गत्वात्**[1] । ''**अर्थादि धर्मसिद्धौ हि न नियत्याऽङ्गमिष्यते**'' **इति ब्रह्मतर्के**' (न्या.वि.) इति वाक्यं व्याचष्टे- **प्रबलहेत्वभावाच्चेति** ॥ उपसंहारस्य नियतत्वाभावे प्रमाणान्तरविरोधात् प्रबलहेत्वभावादित्यर्थः ।

ननु कथं विरोधाभावः । काम्यसाधनगुणानुपसंहारे काम्यरूपार्थाद्यलाभस्य विरोधस्य सत्त्वादित्यतः न्यायमालागतचशब्दव्याख्यानाय प्रवृत्तं '**काम्यानामनियताङ्गत्वात्**' इति वाक्यं व्याख्याति - **नह्यर्थादिकं विना ज्ञानाभाव इति** ॥ अर्थानामन्वयतो व्यतिरेकतश्च व्यभिचारात् । ज्ञानाभावनियताङ्गत्वमिति[2] भावः । आगमं च प्रमाणमाह- **अर्थादीति** ॥ धर्मसिद्धौ ज्ञानसिद्धौ नियमेनार्थादि नाङ्गमिष्यत इत्यर्थ इति विवरणशेषस्य योजना द्रष्टव्या ।

प्रकारान्तरेणाधिकरणव्याख्यानस्य निरासः

एतेन किं सत्त्वादिगुणभिन्नकाम्यगुणा मुमुक्षुभिरनुपास्या उतोपास्या इति चिन्तायां नेति प्राप्तं तावत् । न तावन्मुक्त्यर्थं तेषामुपासनम् । 'आत्मेत्येवोपासीत' (बृ.उ. १.४.७) इति सत्त्वादेरेव मुक्त्यर्थमुपास्यत्वविधानात् । नापि तत्तत्प्रतिपदोक्तफलार्थम् । तत्तत्फलानां संसारविशेषतया संसृतिमुमुक्ष्वकाम्यत्वात् । नच पूर्वनयविरोधः । पूर्वनये ह्युपासनानुकूलशरीरादि-

---

१. 'अनियताङ्गत्वाच्च' इति हृ.पाठः । २. म. ज्ञानादावनियताङ्गत्वमिति ।

विघातकदुरितादिप्रसक्तावेवोपासनकथनेनान्यथा तदभावस्यैवोक्तत्वात् । इह तु नये मुमुक्षूणां नियमेन तेषामप्युपासनासमर्थनादिति ।

राद्धान्तस्तु- उपास्या एव नृसिंहत्वादयोऽपि मुमुक्षूणां नियमेन तत्तत्कामनायां हि । यथाकामं गुणोपासनासमुच्चयः कार्यः । यदि स्वाभिलषितमुक्तिसाधनप्रतिबन्धकदुरितानापत्त्या तदन्यकाम्यस्येव स्वर्गादेर्विरोधित्वादकामना, तदा न वा समुच्चीयेरन् । पूर्वोक्तकामनालक्षणप्रवृत्तिहेतोरभावात् । मुमुक्षूणां च मुक्तिविरोधिस्वर्गादिकामनाभावेऽपि भगवत्प्रसादस्याशक्यस्य सत्त्वात् । तदर्थमुपास्या अन्ये गुणा इति केषाञ्चिदधिकरणव्याख्यानं निरस्तम् । चतुर्गुणातिरिक्तगुणानां 'प्राप्तेश्च समञ्जसम्' (ब्र.सू. ३-३-१०) 'सर्वाभेदादन्यत्रेमे' (ब्र.सू. ३-३-११) इत्याद्यधिकरणेषूपास्यत्वस्य समर्थितत्वेन पूर्वपक्षानुत्थानात् । न्यायविवरणविरोधस्यापरिहार्यत्वाच्च । प्रस्थानान्तरत्वाददोष इति चेन्न । उक्तपूर्वपक्षस्य निर्मूलत्वप्रसङ्गात् । उक्तरीत्या सूत्रपदानुसारित्वाच्चेत्यलं पल्लवेन ।

॥ इति काम्याधिकरणम् ॥ ४० ॥

॥ अथाङ्गाधिकरणम् ॥ ४१ ॥

सूत्रभाष्यम्

॥ ॐ अङ्गेषु यथाऽऽश्रयभावः ॐ ॥३-३-६३ ॥

अङ्गदेवतानां यथा यथा परमेश्वराङ्गाश्रयत्वम्- 'चक्षोः सूर्यो अजायत' (ऋ.सं.१०-९०-१३.) इत्यादि तथा भावना कर्तव्या ॥ ६३ ॥

॥ ॐ शिष्टेश्च ॐ ॥ ३-३-६४ ॥

'यस्मिन् यस्मिन् यो हि चाङ्गे निविष्टः परस्य चिन्त्यः स तथा तथैव' इति पौत्रायणश्रुतेः ॥ ६४ ॥

॥ ॐ समाहारात् ॐ ॥ ३-३-६५ ॥

'अङ्गैः पराद् ये हि देवा विसृष्टास्तत्तद्गुणान् परमे संहरेत।
तांश्चापि तत्रैव विचिन्त्य देवान् स्थानं मुमुक्षुः परमं व्रजेत ॥'
इति काषायणश्रुतौ[१] समाहारवचनाच्च ॥ ६५ ॥

॥ ॐ गुणसाधारण्यश्रुतेश्च ॐ ॥ ३-३-६६ ॥

'साधारण्यात् सर्वगुणाः परस्य समाहार्यास्तत्त्वदृशो मुमुक्षोः' इति माण्डव्यश्रुतेश्च ॥ ६६ ॥

॥ इत्यङ्गाधिकरणम् (यथाश्रयभावाधिकरणम्) ॥ ४१ ॥

---
१. ह. इति च काषायणश्रुतौ ।

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र भगवत्साक्षात्कारसाधनाङ्गदेवतोपासनस्य कर्तव्यतासमर्थनादस्ति शास्त्रादिसङ्गतिः । अन्यथा तद्विद्यावैयर्थ्यात् तत् समर्थनीयम् । प्रकृतं ब्रह्मादिदेवतोपासनं विषयः । भगवदङ्गाश्रितत्वेन मुमुक्षुणा कर्तव्यं न वेति सन्देहः । आश्रितत्वेन श्रुत्युक्तेरुभयथा सम्भवः सन्देहबीजम् ।

पूर्वपक्षः

न तथोपासनं मुमुक्षुणा कर्तव्यमिति पूर्वः पक्षः । तथाहि । किं तत् सर्वैः कर्तव्यं देवैर्वा । नाऽद्यः । उक्तव्याघातात् । न द्वितीयः । 'ब्रह्मा शिरसि ललाटे रुद्रः' इत्यादितत्तत्प्रकरणेषु देवानामेव तदित्यनुक्तेः । नचानुक्तावप्यधिकारिविशेषः कल्पयितुं शक्यते । कल्पकाभावात् । अन्यथा 'चोदनाद्यविशेषात्' इत्युक्तव्याघातात् । अतो निरधिकारित्वादङ्गाश्रितत्वेन देवतोपासनं न कार्यमिति तद्विद्यावैयर्थ्यमिति ।

सिद्धान्तः

सिद्धान्तयत् सूत्रं पठित्वा व्याचष्टे- **अङ्गेष्विति** ॥ सूर्यादिदेवानां 'चक्षोः सूर्यो अजायत' (ऋ.सं. १०.९०.१३) इत्यादिना यथा भगवदङ्गाश्रयत्वमुक्तं तथोपासनं कार्यमेव । अन्यथा तदुक्तिवैयर्थ्यप्रसङ्गादिति भावः । यत्र जन्म तत्रैव स्थितिरित्य-दोषः । 'तदाश्रिताश्च ते सर्वे' इति वचनात् ॥ ६३ ॥

भगवदङ्गाश्रितत्वेन देवतोपासनस्य कर्तव्यतायाः श्रुत्या समर्थनम्

न केवलमङ्गाश्रितत्वेनोक्त्यन्यथानुपपत्त्या तथोपासनस्य कर्तव्यता, किन्तु श्रुतौ तथा विधानाच्चेत्यर्थप्रतिपादकं सूत्रं पठित्वा तां श्रुतिमुदाहरति- **शिष्टेश्चेति** ॥ शिष्टिः शिक्षाविधिरिति यावत् ॥ ६४ ॥

उक्तोपासनस्य निरधिकारिकत्वशङ्कानिरासः

नाङ्गाश्रितत्वेन देवतोपासनं युक्तं, निरधिकारित्वात्। तद्विधानादेर्वैयर्थ्य-स्यैवौचित्यादित्याशङ्कां परिहरत् सूत्रमुपन्यस्य व्याचष्टे- समाहारादिति ॥ युक्तमेवाङ्गाश्रितत्वेन देवतोपासनं, तत्र देवानामधिकारित्वात्। नच तदनुक्तिदोषः। तथोपासनस्य हि परमस्थानप्राप्तिः फलं श्रूयते। तच्च देवताना-मेव योग्यमिति फलपर्यालोचनया मधुविद्यायामिव देवानामधिकारित्व-कल्पनोपपत्तेरिति भावः। तथाच श्रुतिः- 'ध्यायेदङ्गेष्वङ्गदेवताः परस्य विशिष्टा हि गुणा मुक्तौ देवानां भवन्ति' इति। अत्र सूत्रभाष्ययोः समाहारपदं श्रुतिसूचकमूष्मेतिवत्॥ ६५॥

भगवद्गुणानां सर्वोपास्यत्वश्रुतेरुक्तोपासनसमर्थनम्

हेत्वन्तरेणैतदुपासनस्य कर्तव्यतां प्रतिपादयत् सूत्रं पठित्वा तदुपात्त-श्रुतिमेवोदाहरति- गुणेति॥ कर्तव्यमेवैतदुपासनं सूर्याद्याश्रयचक्षुष्ट्वादीनां भगवद्गुणत्वात्। उपास्यत्वे च भगवद्गुणानां साधारण्यस्य सर्वेषामुपास्यत्वस्य श्रुतत्वादिति भावः। अतो देवानामङ्गाश्रितत्वेनोपास्यत्वात् सार्थक्यमेव तद्विधानामिति सिद्धम्॥ ६६॥

॥ इत्यङ्गाधिकरणम्॥ ४१॥

शेषतात्पर्यचन्द्रिका

॥ ॐ अङ्गेषु यथाऽऽश्रयभावः ॐ ॥ ३-३-६३ ॥

सङ्गतिः

अत्र परिवारदेवतोपासनस्येतिकर्तव्यताप्रतिपादनात् पेटिकासङ्गतिः। 'अङ्गा-वबद्धास्तु' (ब्र.सू. ३.३.५७) इत्यनन्तरमेवेदं[1] कर्तव्यमिति चेन्न। भगवदुपा-सनायाः प्रधानत्वेन[2] तदितिकर्तव्यताङ्गकलापोक्त्यनन्तरमेव तदङ्गान्यदेवतोपा-

१. म. इत्येतदनन्तरमेवेदम्   २. क. प्रधानत्वात्

सनेतिकर्तव्यताविचारावसरात्। अङ्गावबद्धनयस्योक्तरीत्या तत्रैव सङ्गतत्वात्। यद्यपि यथायोग्यमेवाङ्गदेवतासु गुणोपसंहारद्वितीयवर्णकेन तत्रैव देवतान्तरोपा-सनस्येतिकर्तव्यता विचारिता। तथाऽपीतिकर्तव्यतान्तरं स्वातन्त्र्येण प्राधान्येन चात्र[1] विचार्यते। नतु तत्रेव वर्णकान्तराद्याश्रयणेनेत्यदोषः। अत एव 'भगवदाश्रितत्वेन मुमुक्षुणा कर्तव्यं न वा' इति सन्देहप्रकारः। 'न तथोपासनं मुमुक्षुणा कर्तव्यम्' इति पूर्वपक्षोक्तिः। 'अतो निरधिकारिकत्वादङ्गाश्रितत्वेन देवतोपासनं न कर्तव्यम्' इति तदुपसंहारः। 'तथोपासनं कार्यमेव' इति सिद्धान्तोक्तिः। 'अतो देवानामङ्गाश्रितत्वेनोपास्यत्वात्' इति तदुपसंहारश्चेह टीकायामेव दृश्यते। अन्यथाऽङ्गदेवतोपासनमित्याद्येवावक्ष्यत्। 'अङ्ग-देवतोपासनस्य कर्तव्यतासमर्थनात्' इति क्वचित् पाठः। सोऽपि तदुपासनस्य प्रधानत्वात् तदितिकर्तव्यतोक्तिरपि तत्रैव पर्यवसितेत्यभिप्रेत्य। अन्यथा अङ्गावबद्धनयेन गतार्थताऽपरिहारात्। यथा काम्योपासनमीश्वरप्रसादार्थं मुमुक्षुणा कार्यं तथा भगवदाश्रितत्वेन अन्यदेवतोपासनमपि इत्यतिदेशेन प्रवर्तनादनन्तर-सङ्गतिः। श्रूयते हि तत्र तत्र 'चक्षोः सूर्यो अजायत, मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत' (ऋ.सं. १०.९०.१३), 'तस्य वाचा सृष्टौ पृथिवी चाग्निश्च प्राणेन सृष्टावन्तरिक्षं च वायुश्च चक्षुषा सृष्टौ द्यौश्चाऽदित्यश्च श्रोत्रेण सृष्टा दिशश्चन्द्रमाश्च मनसा सृष्टा आपश्च वरुणश्च' इत्यादिनाऽन्यदेवतानां भगवदङ्गाश्रितत्वम्। नचात्र तज्जातत्वमेवोच्यते, नतु तदाश्रितत्वमिति शङ्कनीयम्। यत्र येषां जन्म तत्रैव तेषां स्थितिरिति नियमात्। 'तदाश्रिताश्च ते सर्वे' इति वचनात्। स्पष्टं च 'ब्रह्मा शिरसि ललाटे रुद्रः' इत्यादि श्रूयते। तत् तथोपासनीयं न वा। तदर्थमधिकारी लभ्यते न वा इत्यादि चिन्तनीयम्।

पूर्वपक्षः

न तथोपास्यमिति पूर्वः पक्षः। सर्वेषां तथोपासनाधिकारे तत्तद्देवतागुणानां

१. क. वाऽत्र

भगवति उपसंहरणीयत्वस्य [1]अधमदेवतागुणानामुत्तमदेवतास्विव प्राप्त्या चतुरादिगुणोपासकानामुक्तयोग्यताभेदो न स्यात्। देवैस्तथोपास्यत्वे सूर्यादिनिष्ठचक्षुराद्याश्रितत्वस्योत्तमदेवताभिरनुपसंहरणीयत्वात्। अधमदेवताभिरुपसंहरणीयत्वे च[2] कल्पकाभावः। सामान्यतः श्रुतस्य 'ब्रह्मा शिरसि' इत्यादेर्विना कारणेन विशेषपर्यवसाने आद्यनयविरोधापातात्। प्रयोजनाभावाच्च न तथोपासनं कार्यम्। नहि 'ब्रह्मा शिरसि' इत्युपासनेन ब्रह्मादेः किञ्चित् प्रयोजनमुपलभ्यते । यथायोग्यगुणलाभस्य स्वयोग्यभगवदीयगुणोपासनेनैवोपपत्तेरिति पूर्वः पक्षः।

सिद्धान्तः

भगवतस्तदितरस्य वा वेदे गुणकीर्तनस्य नान्यत् तथोपासनात् प्रयोजनं दृष्टमिष्टं वा। 'ज्ञानार्थमथ ध्यानार्थं गुणानां समुदीरणा' इत्युक्तेः। अन्यदेवतापरवेदभागस्य वैयर्थ्यापत्त्या तत्र दुर्घटमप्यधिकार्यादि कथञ्चित् कल्पयित्वा तत्तद्गुणोपासनतात्पर्यमङ्गीकर्तव्यमेव। अत एव देवा एवाधिकारिणः कल्प्यन्ते। 'असौ वा आदित्यो देवमधु' (छा.उ. ३.१.१) इत्यादौ फलवाक्यपर्यालोचनया अधिकारिविशेषकल्पनावत् तथोपासनस्य परमस्थानप्राप्तिलक्षणफलवाक्यपर्यालोचनया देवानामेवाधिकारित्वकल्पनात्। अन्यथा 'यजेत स्वर्गकामः' (तै.सं. २.३.५) इत्यादावपि शूद्रादीनामप्यधिकारप्रसङ्गस्यानिवारणात्। सूर्यादिजनकचक्षुरादिमत्त्वरूपभगवद्गुणोपासनपर्यवसानेन तथाऽन्यदेवतोपासनस्य मुमुक्षोरवश्यकर्तव्यत्वाच्चेति सिद्धान्तः।

सूत्राक्षरार्थः

सूत्राक्षरार्थस्तु- भगवदङ्गजत्वाद् अङ्गशब्दवाच्येषु सूर्यादिदेवेषु **यथाऽऽश्रय-**

१. क. अङ्गदेवतागुणानाम् २. क. वा

भावः यथा परमेश्वराश्रयत्वं भावो भावना, उपासनेति यावत्, तत्तदङ्गनिष्ठतया कार्या नतु स्वस्वलोकस्थतया। अन्यथा तदुक्तिवैयर्थ्यप्रसङ्गादिति शेषः। स्पष्टं च प्रमाणमुच्यते- **शिष्टेः** शिक्षाविधिः। 'यस्मिन् यस्मिन् यो हि चाङ्गे निविष्टः परस्य चिन्त्यः स तथा तथैव' इति पौत्रायणश्रुतौ स्वस्वजनकभगवदङ्गनिष्ठतयैव तत्तद्देवतोपासनशिक्षणात्।

बाधकं परिहीयते- समाहारशब्दः समाहारपदघटितश्रुतिपरः। 'ऊष्मावदनूष्मावच्च' इति। यथा च 'वार्त्रघ्नी पौर्णमास्यामनूच्यते। वृधन्वत्याममावास्यायाम्' इत्यादौ वार्त्रघ्न्यादिशब्दः। 'अङ्गैः परादू ये हि देवा विसृष्टाः' इति संहारपर्यायसंहरणवाचकपदघटितकाषायणश्रुतिरूपफलवाक्यपर्यालोचनया देवानामधिकारित्वकल्पनादित्यर्थः। 'अङ्गैः परादू ये' इत्यादिकाषायणश्रुतौ भगवति तदङ्गजदेवतानां तत्तद्गुणानां चोपसंहारविधानादपि तत्तदङ्गजसूर्यादिदेवतोपासना भगवच्चक्षुराद्यङ्गाश्रिततयैव[1]। न स्वस्वलोकस्थतया। नहि भगवद्भिन्नदेवतागुणास्तद्व्यापारघटिताः[2] भगवति शक्यशङ्काः। विधीयन्ते च तेषामप्युपसंहारेण भगवति काषायणश्रुतौ। मिथ्योपासना चानर्थहेतुः। अतोऽवगम्यते[3] भगवदङ्गेषु भासितानां[4] देवतानां व्यापारा भगवदीया एवेति। अतस्तद्व्यापारघटितदेवतागुणाश्च भगवति समाहर्तुं शक्यन्ते। नहि चरणाद्यङ्गव्यापारा अङ्गिनो न भवन्तीत्यतः सर्वगुणसमाहारादपि भगवदङ्गेष्वेव देवतानामुपासनम्। अस्मिंश्च पक्षे युक्त्यन्तरसूचकापिचादिशब्दाभावेऽपि सूत्रस्थसमाहारशब्दस्य लक्षणानाश्रयणादयमेव सूत्रार्थ इति केचित्।

हेत्वन्तरमुच्यते- **गुणानां** सूर्याद्याश्रयचक्षुष्ट्वादीनां सर्वेषां **साधारण्यस्यो-**पास्यत्वस्य 'साधारण्यात् सर्वगुणाः परस्य समाहार्यास्तत्त्वदृशो मुमुक्षोः' इति

१. म. भगवतश्चक्षुराद्यङ्गाश्रिततयैव २. म. तत्तद्व्यापारघटिताः
३. क. निगद्यते ४. म. भावितानाम्

श्रुतत्वात्। सूर्यादिश्चक्षुरादिस्थत्वेनोपास्यत्वाभावे सूर्याद्याश्रयचक्षुष्ट्वादीना-मुपास्यत्वासम्भवात्। तथाच प्रयोगः। विमताः सूर्यादयः चक्षुराद्याश्रितत्वेन मुमुक्षूपास्याः, मुमुक्षूपास्यसूर्याद्याश्रयचक्षुष्ट्वादिगुणघटकत्वादित्यर्थः।

सूत्रक्रमः

प्रथमेऽर्थापत्तिः। द्वितीये शब्दरूपप्रमाणोक्तिः। तृतीये बाधकोद्धारः। चतुर्थेऽनुमानोक्तिरिति। यद्यपि [१]शब्दैकगम्ये शब्द एव प्रथमतो वक्तव्यः। तथाऽपि सावकाशप्रमाणमादावुपन्यस्यानन्तरं निरवकाशप्रमाणमुपन्यसनीयमिति कथाप्रक्रियाशिक्षणाय व्यत्ययेनोक्तिः। यद्यपि बाधकोद्धारः सर्वान्ते कर्तव्यः। तथाऽपि श्रुतिप्रमाणोपन्यासेनाधिकारिकल्पकश्रुतिस्मरणान्मध्ये तदुक्तिरिति ध्येयम्।

टीकायामविशेषदृष्टिन्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- 'अविशेषदृष्टिः[२]' इत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शनेन विवृण्वत् **'नच देवानामिति तत्रैव विशेषवचनाभावात् ''ब्रह्मा शिरसि ललाटे रुद्रः'' इत्यादीनां नावश्योपास्यता'** इति वाक्यमाकाङ्क्षाक्रमेण व्याचष्टे- **न तथोपासनं मुमुक्षुणा कर्तव्यमिति पूर्वः पक्ष इति**॥ अनेन 'ब्रह्मा शिरसि' इत्यारभ्यान्तं व्याख्यातं हेत्वंशं व्याख्यातुं पृच्छति- **किं तदिति**॥ प्रथमं स्वयं निराह- **नाऽद्य इति**॥ द्वितीयं निराह- **न द्वितीय इति**॥ तत्र हेतुतया विवरणं योजयति- **ब्रह्मेति**॥ तेन **'तत्रैव'** इत्येतदुक्तार्थं भवति। टीकायां **'देवानाम्'** इत्युपलक्षणम्। विवरणे आदिशब्दश्रवणाद् ऋषीणामिति ग्राह्यम्। अनेन न्यायमालोक्ताविशेषदृष्टि[३]रित्येतद् विशेषदृष्टि[४]र्विशेषवचनमिति भावः। तेन सम्बद्ध्यत इति व्याख्यातं भवति।

१. क. शास्त्रैकगम्ये
२. 'अविशेषदृशिः' इति हृ.पाठे।
३. म. अविशेषदृशिः।
४. म. विशेषदृशिः।

टीकायां गुणवैशेष्यन्यायस्य व्याख्यानम्

'गुणवैशेष्यम्' इत्युक्तन्यायं सम्बन्धिप्रदर्शनेन तत्प्रतिपादकप्रमाणोपन्यासपूर्वं विवृण्वत्- **''देवादीनामेव ध्यायेदङ्गेष्वङ्गदेवताः। परस्य विशिष्टा हि गुणा मुक्तौ देवानां भवन्ति। ते हि तादृशास्ते हि हरेरनुरूपाः''** इति **श्रुतेर्गुण-वैशेष्यात्'** इति वाक्यं व्याचष्टे- **तच्च देवतानामेव योग्यमिति**॥ तेन 'ध्यायेदङ्गेषु' इति श्रुतेर्देवादीनामेव परमस्थानप्राप्तिलक्षणगुणवैशेष्यात् तदनुरोधेन तेषामेवाधिकारकल्पनान्नावश्योपास्यतेति नच इति पूर्वविवरणेन सम्बन्ध इति सूचयति। 'देवादीनामेवेत्यंशः पूर्वपक्षशेष एव' इति केचित्। अत्र सर्वत्र 'देवानाम्' इत्येव क्वचित् पाठः।

॥ इत्यङ्गाधिकरणम्॥ ४१॥

॥ अथ नवाधिकरणम् ॥ ४२॥

सूत्रभाष्यम्

॥ ॐ न वाऽतत्सहभावश्रुतेः ॐ ॥ ३-३-६७ ॥

न वाऽङ्गदेवतोपसंहारः कार्यः । उपसंहारस्य सहाश्रवणात् ॥ ६७ ॥

॥ ॐ दर्शनाच्च ॐ ॥ ३-३-६८ ॥

'सत्यो ज्ञानः परमानन्दरूप
आत्मेत्येवं नित्यदोपासनं स्यात् ।
नान्यत् किञ्चित् समुपासीत धीरः
सर्वैर्गुणैर्देवगणा उपासते ॥' इति कमठश्रुतौ ॥ ६८ ॥

॥ इति नवाधिकरणम् ॥ ४२ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रभाष्ये तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥

तत्त्वप्रकाशिका

सङ्गत्यादि

अत्र ब्रह्मज्ञानसाधनस्याङ्गाश्रितत्वेन देवतोपासनस्य कर्तव्यतासमर्थनादस्ति शास्त्रार्थसङ्गतिः । अन्यथोक्तस्यानुपपत्तेस्तत् समर्थनीयम् । प्रकृतं देवानां भगवदङ्गाश्रयत्वेनोपासनं विषयः । कर्तव्यं न वेति सन्देहः । उभयविधोपासनप्रतीतिः सन्देहबीजम् ।

पूर्वपक्षः

न कर्तव्यमिति पूर्वः पक्षः । तथोपासनस्य सर्वशाखास्वनुक्तत्वात् । कर्तव्यत्वे क्रियात्वादग्निष्टोमादिवत् सर्वशाखागतोपासनेन सहभावप्रसङ्गात् । अतोऽस्योपासनस्याकर्तव्यत्वादुक्तमयुक्तमिति ।

सिद्धान्तः

गूढाभिसन्धिना सूत्रमुपन्यस्य व्याचष्टे- **न वेति** ॥ भगवदङ्गेष्वङ्गदेवतोपसंहार उपसंहृत्योपासनं न कर्तव्यमिति यदुक्तं तत्सत्यमेव । तथोपासनस्य सर्वशाखागतोपासनेन सहाश्रवणादित्यर्थः । अयमभिसन्धिः । सर्वशाखासु तथोपासनस्याश्रवणादकर्तव्यत्वं भवत्येव । सर्वैः कर्तव्यतानभ्युपगमात् । नच केनाप्यकर्तव्यता । क्वचिदुक्तत्वात् । अन्यथोक्तिवैयर्थ्यप्रसङ्गात् । अतः क्वचिदुक्तत्वात् सर्वत्रानुक्तत्वाद् देवैः कर्तव्यमेतन्नान्यैरिति ॥ ६७ ॥

एतमेवार्थं श्रुत्या समर्थयत् सूत्रं पठित्वा तां श्रुतिमुदाहरति- **दर्शनाच्चेति** ॥ अतो देवानां भगवदङ्गाश्रितत्वेनोपासनं युक्तमित्युक्तमुपपन्नमिति सिद्धम् ॥ ६८ ॥ अ० ४२ ॥

॥ इति नवाधिकरणम् ॥ ४२ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां श्रीमज्जयतीर्थमुनिविरचितायां तत्त्वप्रकाशिकायां तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥

शेषतात्पर्यचन्द्रिका

॥ ॐ न वाऽतत्सहभावश्रुतेः ॐ ॥ ३-३-६७ ॥

अनन्तरसङ्गतिः

जन्माधिकरणोक्तकारणत्वं तदुत्तरैरधिकरणैराक्षिप्य यथा समाधीयते तथाऽङ्गाश्रितत्वेन देवतोपासनमिहाऽक्षिप्य समाधीयत इत्यनन्तरसङ्गतिः । यद्वा,

फलवाक्यपर्यालोचनया चेदधिकारिकल्पनं तर्हि सङ्कोचे कारणाभावान्मुमुक्षवः सर्वेऽप्यधिकारिणः कल्पनीयाः स्युरित्युत्थानादनन्तरसङ्गतिः।

पूर्वपक्षः

पूर्वाधिकरणे प्रकृतं देवानां भगवदङ्गाश्रितत्वेनोपासनं मुमुक्षुभिः कर्तव्यं न वेति सन्देहे नेति तावत् प्राप्तम्। नच सूर्याद्याश्रयचक्षुष्ट्वादीनामुपास्यत्वस्य श्रुतत्वात् तद्घटकं देवानां भगवदङ्गाश्रितत्वमप्युपास्यमेवेति वाच्यम्। तथा सति जगत्कारणत्वकंसारित्वादिभगवद्गुणानामुपास्यत्वात् तद्घटकं कंसादित्वाद्युपास्यं स्यात्। अत एव तत्राधिकारिकल्पनमप्युक्तम्। अत एव शिक्षाविधिरर्थवाद एव। तदुक्तिवैयर्थ्यं तु नानिष्टम्। अन्यथाऽग्निष्टोमादिक्रियाणां कर्तव्यतया सम्प्रतिपन्नाग्निहोत्रादिभिः सह सर्वशाखाम्नानमिव तथोपासनस्य सर्वशाखावगतोपासनेन सहाऽम्नानं स्यात्।

अङ्गाश्रितानां देवानां न तथोपासनं भवेत्।
अग्निष्टोमवदेवात्र त्वाम्नानं नहि विद्यते॥ इति पूर्वः पक्षः।

सिद्धान्तः

तत् किं सर्वैः कर्तव्यता नाभ्युपगम्यते। उत येन केनापि। नाऽद्यः। इष्टत्वात्। क्रियावत् सर्वशाखासु तथोपासनस्य कर्तव्यताश्रयणाभावात्। न द्वितीयः। कचिदुक्तत्वात्। अन्यथोक्तिवैयर्थ्यप्रसङ्गात्। द्वितीये वेदप्रामाण्यादिसाधनाद् वैयर्थ्यं न नानिष्टम्।

सर्वत्रानुक्तितः सर्वैर्न कार्यं तदुपासनम्।
कचिदुक्तिबलादेव केनचित् कार्यमेव तत्॥

एतेन तत्तदङ्गाश्रितत्वेन देवानामुपासनमेवात्र प्रतिपाद्यत इति प्रतिपाद्यभेदाभावान्नेदं सार्थकम्। शास्त्रयोनित्वाद्यधिकरणेषु कारणत्वस्यैकस्यैव

प्रतिपाद्यत्वेऽप्यतिव्याप्त्यादिनिरासादिफलभेददर्शनात्, इति निरस्तम्। अत्रापि सर्वाधिकारनिरासादिफलभेददर्शनात्।

सूत्राक्षरार्थः

सूत्राक्षरार्थस्तु- भगवदङ्गेष्वङ्गदेवतोपासनं **न वा** कर्तव्यम्। तथोपासनस्य तत्सहभावाश्रवणात् कर्तव्यत्वेन सम्प्रतिपन्नानन्दादिचतुर्गुणसहभावाभावात्।

ननु पूर्वपक्षिणोक्तं प्रमेयं कथमङ्गीकरणीयमित्यतः[1] स्वाभिप्रायमुद्घाटयति- 'सत्यो ज्ञानः परमानन्दरूपः' (ब्र.सू.भा. उदाहृतकमठश्रुतिः ३.३.६७) इत्यादिकमठश्रुतौ सत्यत्वादीनां चतुर्णां[2] सर्वोपास्यत्वस्य वेदोक्तानां च सूर्यादिजनकचक्षुष्ट्वादीनां च सर्वोपास्यत्वाभावस्य देवोपास्यत्वाभावस्य वा दर्शनादिति। अभिसन्ध्युद्घाटनसमुचितस्यैव साधकत्वाद् युक्तश्चशब्दः।

'अङ्गेषु यथाऽऽश्रयभावः' इत्यारभ्य 'दर्शनाच्च' इत्यन्तं षट्सूत्री एकमधिकरणमिति मतानुवादः

अत्रान्ये षट्सूत्रीं चतुर्भिः पूर्वपक्षयित्वा द्वाभ्यां सिद्धान्तयन्त एकमधिकरणमाहुः। तथाहि- तत्र लौकिकप्रतीकोपासनाः पूर्वत्र निर्णीताः। अत्र कर्माङ्गप्रतीकोपासनासु समुच्चयः यथाकाम्येन[3] विचार्यते। 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा.उ. १.१.१) इत्यादिकर्माङ्गभूतप्रतीकाश्रितान्युपासनानि किं नियमेन समुच्चेयानि किं वा यथाकाममनुष्ठेयानीति संशये -

उपास्तीनां स्वतन्त्रत्वे बहिर्भावः क्रतोर्भवेत्।
समुच्चयाद् विना न स्यात् नियमेनाङ्गसङ्गतिः॥

नेमा उपासनाः स्वतन्त्रा भवितुमर्हन्ति। तथा सति क्रत्वनाश्रिततया क्रतुप्रयोगाद् बहिरप्यमूषां प्रयोगः स्यात्। न चैवमस्ति। तस्मादङ्गग्राहिणा

---

१. म. अङ्गीक्रियत इत्यतः २. म. चतुर्गुणानाम् ३. म. यथाकाम्ये

प्रयोगवचनेनाङ्गनियतोपासना अपि प्रयुज्यन्ते। अप्रयोगे[१] तासामङ्गाश्रितत्व-नियमायोगात् तत्समुच्चयनियमः। अत एव फलकामनानामप्यवश्यम्भावः [२]प्रयोगवचनेनाऽक्षिप्यते। तदभावे तासां समुच्चयाभावादिति प्राप्तेऽभिधीयते-

पारतन्त्र्यमुपास्तीनां सत्स्वेवाङ्गेषु वर्तनम्।
फलानामविधेयत्वान्न प्रयोगविधिग्रहः॥

इदमेव ह्युपास्तीनामाश्रयतन्त्रत्वं, यदाश्रये सत्येव वृत्तिर्नासतीति। नतु तत्र वृत्तिरेव नावृत्तिरिति। अतश्च यावदाश्रयभावित्वाभावेऽपि[३] अङ्गोपास्तीनां तत्तन्त्रत्वमविरुद्धमिति न तत्सिद्ध्यर्थं क्रतुवचनेन तासां परिग्रहः।

किञ्च फलकामनानामवश्यम्भावेन समुच्चयायोगात् प्रयोगवचनेन फल-कामनानामपि अपरिग्रहः प्रसज्येत। नचासौ युक्तः। तस्याविहितग्राहित्वात्। नच फलकामना विधातुं शक्यन्ते। उद्देश्यत्वात्। उद्देश्यं हि मानान्तरसिद्धम्। तस्य च विधेयत्वं व्याहतम्। तस्मात् फलकामनानामनित्यत्वात् तदनुबद्धोपा-स्तीनामप्यनित्यत्वं, तासां च समुच्चयनियमे आश्रयनित्यत्वेन नित्यानित्य-संयोगविरोध इति।

तन्मतविमर्शश्च

तन्न। 'तन्निर्धारणार्थनियमः' (ब्र.सू. ३.३.४३) इत्यस्मिन्नधिकरणेऽ-ङ्गावबद्धानामुपास्तीनां स्वातन्त्र्यं पुरुषार्थत्वं च साधितमेवेति पुनरिह पूर्व-पक्षानुदयात्। यद्यपि क्रतुफलात् पृथक् फलं पुरुषार्थत्वं चोपास्तीनां तन्निर्धारणाधिकरणसिद्धमङ्गीकृतम्। तथाऽपि पुरुषार्थत्वमात्रेण न स्वातन्त्र्यं, क्रतुबहिर्भावाभावादिति तदधिकरणोपमर्देनैवोत्थानान्न दोष इति चेन्न। पूर्वतन्त्रे

१. क. अन्यथा २. म. प्रयोगवचनेनैव
३. म. अयावदाश्रयभावित्वेऽपि

गोदोहनादीनां पुरुषार्थत्वेन क्रतुबहिर्भावाभावेऽपि स्वातन्त्र्यस्य प्रयोगवचन-परिग्रहाभावस्य चाङ्गीकृतत्वेन तन्न्यायेनाऽक्षेपानुपपत्तेः। गोदोहनादावप्याक्षेपे तत्समाधानार्थस्याधिकरणस्य पूर्वतन्त्र एव निर्देशप्रसङ्गात्[१]। प्रतीकोपास्तयः यथाकाममनुष्ठीयेरन्, भिन्नफलत्वादित्यस्मिन् प्रयोगे पूर्वाधिकरणाभिमते उद्गीथाद्युपास्तिषु व्यभिचारचोदनादिह सङ्गतिरिति चेन्न। गोदोहनादावनौपाधिक-सम्बन्धदर्शनेन व्यभिचारशङ्काया एवानुदयस्योक्तत्वाच्च।

'अङ्गेषु यथाऽऽश्रयभावः' इति सूत्रस्य पराभिमतार्थनिरासः

एतेन, यथैषामाश्रयाः स्तोत्रादयः सम्भूय भवन्ति एवमङ्गेषु प्रत्यया अपि सम्भूय कार्यकारिणः, कर्माङ्गोद्गीथादिनिष्ठा उपासना स्वाश्रयोद्गीथादिवदेव समुच्चयेनानुष्ठातव्या[२] इति यावदित्याद्यन्यस्य व्याख्यानं निरस्तम्। आश्रया-श्रयिणोः क्रत्वर्थपुरुषार्थत्वाभ्यां वैषम्यस्योक्तत्वात्।

'शिष्टेश्च' इति सूत्रस्य पराभिमतार्थनिरासः

त्रिषु वेदेष्वाश्रयवदेवोपासनानामपि शिष्टिर्नोपदेशकृतोऽपि कश्चिद् विशेषः। यद्वा, 'उद्गीथमुपासीत' (छा.उ. १.१.१) इति शिष्टेर्विधानाच्च वर्तमानाप-देशावगतफलसम्बन्धात् प्रागेवोद्गीथसम्बन्धोऽवगतः इति क्रत्वर्थत्वमिति 'शिष्टेश्च' (ब्र.सू. ३.३.६४) इति सूत्रस्य व्याख्यानं निरस्तम्। उपदेशकृत-विशेषस्यानाशङ्कितत्वात्। क्रतुसम्बन्धस्यापि क्रत्वव्यभिचरितोद्गीथसम्बन्ध-कल्पनायामवरत्वसाम्येऽपि[३] सम्बन्धावगमात् प्रागेवोद्गीथसम्बन्धद्वारा क्रतु-सम्बन्धावगमायोगात्। प्रत्युत फलस्यातिबुभुत्सितत्वेन वैपरीत्यस्यैवोचित-त्वात्। अन्यथा 'यजेत स्वर्गकामः' (तै.सं. २.५.५) इत्यादावपि सन्निहितत्वाद् याग एव भाव्यतया प्रागन्वेतीति स्यात्।

१. म. निवेशप्रसङ्गात् २. क. अनुष्ठेया ३. अधरत्वसाम्येऽपि

‘समाहारात्’ इति सूत्रस्य परोक्तार्थनिरासः

‘होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरति’ (छा.उ. १.५.५) इति प्रणवोद्गीथैकत्वविज्ञानमाहात्म्यादुद्गातुः स्वकर्मण्युद्गीथे उत्पन्नक्षतस्य समाहारात् समाधानात्समुच्चय इति ‘समाहारात्’ (ब्र.सू. ३.३.६५) इत्यस्य व्याख्यानं चायुक्तम् । असङ्गतत्वात् । नहि होतृषदनस्थोपासनेनोद्गीथे दोषपरिहारो भवतीत्युक्तिमात्रेण समुच्चयो ज्ञायते । वेदान्तरोदितस्य प्रत्ययस्य वेदान्तरोदितपदार्थसम्बन्धसामान्यात् सर्ववेदोदितप्रत्ययोपसंहारः सूच्यत इति चेन्न। ‘यदेव विद्यया करोति श्रद्धयोपनिषदा’ (छा.उ. १.१.१०) इति वेदान्तरोदितप्रत्ययस्य वेदान्तरोदितकर्मसम्बन्धसामान्यात् सर्ववेदोदितकर्मसु सर्वप्रत्ययोपसंहारापातात्।

‘गुणसाधारण्यश्रुतेश्च’ इति सूत्रस्य परोक्तार्थनिरासः

विद्यागुणस्य विद्याश्रयस्योङ्कारस्य ‘तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति’ (छा.उ. १.१.९) इत्यादिना वेदत्रयसाधारण्यश्रुतेरोङ्कारादिनिष्ठोपासनानामपि साधारण्यं ज्ञायत इति ‘गुणसाधारण्यश्रुतेश्च’ (ब्र.सू. ३.३.६६) इत्यन्यस्य[1] व्याख्यानं चायुक्तम्। आश्रयस्य व्यापकत्वेऽप्याश्रितस्य व्यापकत्वादर्शनात्। नहि प्रणयनं व्यापकमित्येतावता तदाश्रितगोदोहनमपि व्यापकं दृष्टम्। आश्रये गुणशब्दव्युत्पत्त्यभावाच्च।

‘न वाऽतत्सहभावश्रुतेः’ इत्यस्य परोक्तार्थः

एवं चतुस्सूत्र्या प्राप्तसमुच्चयपक्षो ‘न वा’ इत्यनेन व्यावर्त्यते। ‘ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति [2]स्तुतमनुशंसति प्रस्तोतः साम गाय होतरेतद्यज’ इत्यादिना स्तोत्रादीनां सहभावः क्रमविशेषादिश्च यथा श्रूयते तथोपासनानां

---

१. म. अस्य

२. ‘स्तोत्रम्’ इति शाङ्करभाष्ये।

सहभावाश्रुतेः न क्रत्वर्थत्वमिति ‘न वाऽतत्सहभावश्रुतेः’ (ब्र.सू. ३.३.६७) इत्येतत्सिद्धान्तसूत्रतया व्याख्यातम्।

तद्विमर्शः

तदपि न । नेत्यनेन पक्षव्यावृत्तिसम्भवेन वाशब्दवैयर्थ्यात् । निपातसमुदायाश्रयणेऽपि सूत्रत्वव्याघातात्। पूर्वपक्षिणोपासनानामपि प्रयोगवचनग्रहणाङ्गीकारात् सहभावश्रुतेः प्रसिद्धत्वाच्च। पुरुषार्थत्वादुपासनानां प्रयोगवचनेन ग्रहणं नास्तीति चेन्न। पुरुषार्थत्वेऽपि क्रतुपारतन्त्र्यं किं न स्यादित्याक्षिपता प्रयोगवचनेन ग्रहणाङ्गीकारात्। अन्यथाऽधिकरणानारम्भस्यैवोक्तत्वात्।

‘दर्शनाच्च’ इति सूत्रस्य पराभिमतार्थालोचनम्

‘एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति’ (छा.उ. ४.१७.१०) इत्यसहभावदर्शनाच्च। यथाकाममुपासनानां समुच्चयो विकल्पो वेत्यन्तिमव्याख्यानं चायुक्तम् । अत्रासहभावस्य साक्षादनुक्तत्वात् । सर्वोपासनोपसंहारे कर्मण्यङ्गीक्रियमाणे यजमानर्त्विजां सर्वेषां सर्ववित्त्वप्राप्त्या ऋत्विग्विशेषेण ब्रह्मणोऽविशेषाद् विज्ञानवतां तेषां ब्रह्मणा परिपाल्यत्वानुपपत्तेरर्थादेतत् गम्यत इति चेन्न। यत्र ब्रह्मोपासकस्तदितरे ऋत्विजो नोपासकास्तद्विषयत्वोपपत्तेः । त्वन्मते तत्तत्कर्म कुर्वतामृत्विजामेव तत्तदुपासनास्वधिकारस्य ‘आर्त्विज्यमित्यौडुलोमिः’ (ब्र.सू. ३.३.४५) इत्यादौ वक्ष्यमाणत्वेन ब्रह्मण ऋत्विज उद्गानेऽधिकाराभावात् तदितरेषां तत्परिपाल्यत्वलिङ्गेनासहभावप्रत्ययायोगाच्च।

किञ्चानेन ब्रह्माख्यर्त्विजः सर्वप्रत्ययोपसंहार एव प्राप्नोति । अन्यथा सर्वप्रत्ययहीनर्त्विगन्तरपालकत्वानुपपत्तेः । नहि सर्वेषामप्यृत्विजां सर्व-

प्रत्ययोपसंहार एव साधनीयः । येन ऋत्विगन्तरकर्तृकोपास्तीनामवृत्तिःस्यादिति दिक् ।

अत्र केषाञ्चिच्छैवानां चाधिकरणानि पूर्वस्मान्नातीव भिद्यन्त इति न पृथगारम्भः ।

आचार्यकृतैतत्पादव्याख्यानस्य सामञ्जस्यकथनेनोपसंहारः

एवं चेह पादे सूत्राणां चतुर्मुखस्य सर्ववेदोक्तगुणोपसंहारेऽधिकारस्तदितरेषां स्वस्वयोग्यगुणोपसंहारे, सर्वेषां मुमुक्षूणां च चतुर्गुणोपासने, तत्रापि चतुर्मुखादीनाम् अधिकारिणां स्वस्वयोग्यतानुसारेण साधनानुष्ठानमधिकारिणां च प्राणावसानत्वं, रमाया अप्युपासनायामधिकारः, अङ्गदेवतानां चोपासनं तत्रापि सर्वाङ्गाश्रितत्वेन चतुर्मुखस्य तदितरेषां देवानां तत्तज्जनकाङ्गाश्रितत्वेनेत्याद्यनेकप्रमेयेषु [१]तद्गताक्षरस्वारस्येनावश्यनिरूपणीयेषु तात्पर्यं भजमानानां पूर्वतन्त्रसिद्धानुपयुक्तासङ्गताप्रामाणिकप्रकरणविरुद्धाल्पप्रमेयपरतया न कुकविकृतिवद् व्याख्यानं युक्तमित्याचार्योक्तव्याख्यानपक्षः[२] सुपथ इति स्थितम् ।

टीकायां पूर्वपक्षीयक्रियान्यायस्य व्याख्यानम्

टीकाक्षरार्थस्तु- क्रियेत्युक्तन्यायं सम्बन्ध्यादिप्रदर्शननेन विवृण्वत् **'न च क्रियात्वादुपासनाया अग्निष्टोमादिवत् प्रतिशाखं वक्तव्यता'** (न्या.वि.) इति वाक्यं तर्कपरतया व्याख्यातुं तदनुग्राह्यमनुमानं दर्शयति- **तथोपासनस्येति** ॥ अप्रयोजकताशङ्कानिरासाय विवरणं व्याचष्टे- **कर्तव्यत्व इति** ॥ प्रतिशाखं वक्तव्यतेत्यस्यार्थः- **सर्वशाखागतोपासनेन सहभावप्रसङ्गादिति** ॥ वक्तव्यताप्रसङ्गादिति वक्तव्ये यत् सहभावप्रसङ्गादित्याह तेन 'अतत्सहभावश्रुतेः' इति सूत्रमनेन व्याख्यातमिति सूचयति ।

१. क. तत्तद्गताक्षरस्वारस्येन २. म. आचार्योक्तः व्याख्यानपथः

टीकायां सिद्धान्तीयागमन्यायस्य व्याख्यानम्

आगम इत्युक्तन्यायं तत्स्वरूपादिप्रदर्शनेन विवृण्वत्- **' "उपासना यजनं चेति साम्यं तत्तद्विशेषान् संहरेत् सर्वतश्च । तथा कर्तॄणां तत्फलानां विशेषाद् व्यर्था हि शाखा अन्यथैवं च सार्थाः"** इत्युपासनाविशेषाणामधिकारिविशेषाणां **चाऽगमेऽवगमात्'** (न्या.वि.) इति वाक्यं सूचनया व्याचष्टे- **अन्यथोक्तिवैयर्थ्यप्रसङ्गादिति** ॥ अनेन 'दर्शनाच्च' (ब्र.सू. ३.३.६८) इति सूत्रगृहीतं न केवलं कमठवाक्यं, किन्तु 'उपासना यजनं च' इति विवरणोदाहृतमपि । अत एव 'एतमेवार्थं श्रुत्या' इत्याह । **उपासना** यजनं ज्योतिष्टोमादिकर्म चेत्येतद् **द्वयं साम्यात्** फलस्य, तत्तद्योग्यफलानुसारेणेति यावत्, **सर्वतस्तद्विशेषान्** शाखान्तरोक्तान् गुणविशेषान् अङ्गविशेषांश्च **प्रतिसंहरेत्** । शाखान्तरोक्तगुणानुपसंहृत्योपासीत । शाखान्तरोक्ताङ्गविशेषानुपसंहृत्य यजेत च । अन्यथा तत्तद्योग्यफलानुपपत्तेः । यजनग्रहणं गुणोपसंहाराभावे अङ्गान्तरोपसंहाराभावप्रसङ्गेन शाखान्तराधिकरणविरोधं सूचयति । तर्हि सर्वेषामप्युपसंहारप्रसङ्ग इत्यतिप्रसङ्गं निराकरोति- **तथा कर्तॄणां** शाखान्तरोक्तगुणादीनुपसंहृत्योपासतां यजतां च **तत्तत्फलानाम्** उपासनादिजन्यफलानां **विशेषाद्** विशिष्टत्वान्नातिप्रसङ्गः । किमेवम् अधिकारिविशेषकल्पनया । अनुपास्या एव ते गुणाः किं न स्युः? अत्रोच्यते- **अन्यथा शाखा व्यर्थाः** स्युः । क्वचिच्छाखासु तदुक्तिर्न स्यादिति यावत् । एवं च अधिकारिविशेषकल्पने **सार्थाः** सार्थकाः शाखा इति श्रुत्यर्थः ।

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीलक्ष्मीनारायणतीर्थपूज्यपादानां शिष्येण श्रीमद्रघुनाथयतिना कृतायां शिष्टतात्पर्यचन्द्रिकायां तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥

परिशिष्टम् - १

ब्रह्मसूत्रानुक्रमणिका

सूत्राणि	अध्यायसं.	पादसं.	सूत्रसं.	पृ.सं.
अ				
अक्षरधियां	३	३	३४	३६६
अङ्गावबद्धास्तु	३	३	५७	५६४
अङ्गेषु यथा	३	३	६३	६१४
अतिदेशाच्च	३	३	४७	४९५
अतोऽनन्तेन	३	२	२७	९
अनियमः सर्वेषां	३	३	३२	३५६
अनुबन्धादिभ्यः	३	३	५१	५१७
अनेन सर्वगतत्व	३	२	३८	७९
अन्यथात्वं च	३	३	७	१५६
अन्यथा भेदानुपपत्तिः	३	३	३७	३८८
अन्वयादिति	३	३	१८	२४९
अन्तरा भूतग्राम	३	३	३६	३८८
अपि संराधने	३	२	२४	८
आ				
आत्मगृहीतिः	३	३	१७	२४२
आत्मशब्दाच्च	३	३	१६	२३०
आदरादलोपः	३	३	४१	४३५
आध्यानाय	३	३	१५	२३०
आनन्दादयः	३	३	१२	१९७

सूत्राणि	अध्यायसं.	पादसं.	सूत्रसं.	पृ.सं.
इ				
इतरे त्वर्थसामान्यात्	३	३	१४	२१४
इयदामननात्	३	३	३५	३८८
उपपत्तेश्च	३	२	३६	६५
उपपन्नस्तल्लक्षण	३	३	३१	३४०
उपस्थितेस्तद्वचनात्	३	३	४२	४३६
उपसंहारोऽर्थाभेदाद्	३	३	६	१५५
उभयव्यपदेशात्	३	२	२८	२३
ए				
एक आत्मनः	३	३	५५	५५६
क				
कामादितरत्र	३	३	४०	४३५
काम्यास्तु यथाकामम्	३	३	६२	६०६
कार्याख्यानादपूर्वं	३	३	१९	२६४
ग				
गतेरर्थवत्त्वम्	३	३	३०	३४०
गुणसाधारण्य	३	३	६६	६१४
छ				
छन्दत उभयाविरोधात्	३	३	२९	३४०
त				
तथाऽन्यत्प्रतिषेधात्	३	३	३७	७३

सूत्राणि	अध्यायसं.	पादसं.	सूत्रसं.	पृ.सं.
तदव्यक्तमाह हि	३	२	२३	८
तन्निर्धारणार्थनियमः	३	३	४३	४६०
द				
दर्शनाच्च	३	३	४९	५०१
दर्शनाच्च	३	३	६८	६२२
दर्शनात्	३	२	३३	५४
दर्शयति च	३	३	५	११९
दर्शयति च	३	३	२३	२८७
ध				
धर्मं जैमिनिः	३	२	४१	९३
न				
न वाऽतत्सहभाव	३	३	६७	६२२
न वा प्रकरणभेदात्	३	३	८	१५६
न वा विशेषात्	३	३	२२	२८७
न सामान्यादपि	३	३	५३	५३२
नाना शब्दादिभेदात्	३	३	६०	५८६
प				
परमतः सेतून्मान	३	२	३२	५४
परेण च शब्दस्य	३	३	५४	५३९
पुरुषविद्यायामपि	३	३	२५	३०५
पूर्वं तु बादरायणो	३	२	४२	९३
पूर्ववद् वा	३	२	३०	२३

सूत्राणि	अध्यायसं.	पादसं.	सूत्रसं.	पृ.सं.
पूर्वविकल्पः	३	३	४६	४९५
प्रकाशवच्चावैशेष्यम्	३	२	२५	८
प्रकाशश्च कर्मणि	३	२	२६	९
प्रकाशाश्रयवद्वा	३	२	२९	२३
प्रकृतैतावत्त्वं	३	२	२२	१
प्रज्ञान्तरपृथक्त्ववत्	३	३	५२	५२४
प्रतिषेधाच्च	३	२	३१	२४
प्रदानवदेव	३	३	४४	४७६
प्राप्तेश्च समञ्जसम्	३	३	१०	१७८
प्रियशिरस्त्वाद्यप्राप्तिः	३	३	१३	२०८
फ				
फलमत उपपत्तेः	३	२	३९	९३
ब				
बुद्ध्यर्थः पादवत्	३	२	३४	५४
भ				
भूम्नः क्रतुवत्	३	३	५९	५७६
भेदान्नेति चेत्	३	३	२	११८
म				
मन्त्रादिवद् वा	३	३	५८	५६४
य				
यावदधिकारं	३	३	३३	३६६

सूत्राणि	अध्यायसं.	पादसं.	सूत्रसं.	पृ.सं.
ल				
लिङ्गभूयस्त्वात्	३	३	४५	४८६
व				
विकल्पो विशिष्ट	३	३	६१	५९४
विद्यैव तु निर्धारणात्	३	३	४८	५०१
वेधाद्यर्थभेदात्	३	३	२६	३१५
व्यतिरेकस्तद्भाव	३	३	५६	५५६
व्यतिहारो विशिंषन्ति	३	३	३८	४०७
श				
शिष्टेश्च	३	३	६४	६१४
श्रुतत्वाच्च	३	२	४०	९३
श्रुत्यादिबलीयस्त्वाच्च	३	३	५०	५०८
स				
सञ्ज्ञातश्चेत्	३	३	९	१५६
समान एवं	३	३	२०	२७२
समाहारात्	३	३	६५	६१४
सम्बन्धादेवमन्यत्रापि	३	३	२१	२७२
सम्भृतिद्युव्याप्त्यपि	३	३	२४	२९६
सर्ववेदान्तप्रत्ययं	३	३	१	११८
सर्वाभेदादन्यत्रेमे	३	३	११	१८९
सलिलवच्च	३	३	४	११९
साम्पराये तर्तव्याभावात्	३	३	२८	३२४

सूत्राणि	अध्यायसं.	पादसं.	सूत्रसं.	पृ.सं.
सैव हि सत्यादयः	३	३	३९	४२०
स्थानविशेषात्	३	२	३५	६५
स्वाध्यायस्य तथात्वेन	३	३	३	११८
ह				
हानौ तूपायन	३	३	२७	३२४

परिशिष्टम् - २

ब्रह्मसूत्रभाष्योदाहृतप्रमाणवचनानां वर्णानुक्रमसूचिका

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
अ		
अंशिनस्तु पृथग् जाताः	परमसंहिता	५५६
अङ्गैः परार्धे हि देवा	काशायणश्रुतिः	६१४
अत्र ह न किञ्चन वीर्याय	छा.उ. ४.९.३	४८६
अत्र ह्येते सर्वे	बृ.उ. ३.४.७	२४२
अथैष एव परमः	बृ.उ. ६.३.३३	२३
अदृष्टमव्यवहार्यम्	कौण्डिन्यश्रुतिः	५४
अन्तर्दृष्ट्यो	कमठश्रुतिः	५२४
अन्यज्ज्ञानं तु देवानां		५४
अरूपमक्षरं ब्रह्म	कौण्ठरव्यश्रुतिः	८
अलौकिकास्तस्य गुणाः		२६४
अलौकिकोऽपि ज्ञानादिः	पाद्मवचनम्	५५
अव्यक्तव्यक्तभावौ च	कौर्मवचनम्	९
आ		
आचार्यवान् पुरुषो वेद	छा.उ.६.१४.२	४७६
आत्मा वाऽरे दृष्टव्यः	बृ.उ. ४.४.५	९
आत्मेत्येवोपासीत	बृ.उ. ३.४.७	११८, १५६, २३०, २४९
आनन्दादयः प्रधानस्य	ब्र.सू. ३.३.१२	२४२

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
आनन्दं ब्रह्मणो विद्वान्	तै.उ.२.४	२३
आनन्दानुभवत्वाच्च	बृहत्तन्त्रवचनम्	२४२
आनन्देन त्वभिन्नेन	पाद्मवचनम्	२३
आप्तव्याप्तेरात्मशब्दः		२४९
इ		
इन्द्रोऽश्वमेधान्	श्रुतिः	५०८
उ		
उत्तमत्वं हि देवानां	बृहत्तन्त्रवचनम्	४०७
उपासनाङ्गदेवानां	बृहत्तन्त्रवचनम्	५६४
उपास्य एकः परतः	भाल्लवेयश्रुतिः	१५५
उभयोरपि दृष्टोऽन्तः	भगवद्गीता २.१६	११८
ए		
एकमेवाद्वितीयं	छा.उ. ६.२.१	२४
एतत् साम गायन्नास्ते	तै.उ. ३.१०	३२४
एष तु वाऽतिवदति	छा.उ. ७.१६	४०७
एष नित्यो महिमा ब्राह्मणस्य	बृ.उ. ६.४.२३	५४
एष सर्व एष सर्वगतः	भाल्लवेयश्रुतिः	७९
एष सेतुर्विधृतिः	छा.उ. ८.४.१	५४
एष ह्येव साधु	कौषीतक्युपनिषत् ३.८	९३
ऐ		
ऐश्वर्यात् परमाद् विष्णोः	पाद्मम्	६५

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
क		
कं ब्रह्म खं ब्रह्म	छा.उ. ४.१०.५	११८
कदाचित् कर्म कुर्वन्ति	ब्रह्माण्डे	३४०
कर्मणा बध्यते जन्तुः	स्मृतिः	५०८
कर्मणैव हि संसिद्धिं	भ.गी. ३.२०	५०१,५०८
कृष्णो मुक्तैरिज्यते वीतमोहैः	म.भा.	३२४
ग		
गुणाः सर्वेऽपि वेत्तव्याः	बृहत्तन्त्रम्	२३०
गुणास्त्रैविक्रमाद्यास्तु	,,	२७२
गुणैः सर्वैरुपास्योऽसौ	भविष्यत्पर्ववचनम्	१७८
गुणैरेव स तूपास्यः	बृहत्तन्त्रम्	१५५
गुरुप्रसादो बलवान्	वाराहम्	४८६
च		
चक्षोः सूर्योऽजायत	ऋ.सं. १०.९०.१३	६१४
ज		
ज्ञानं चोपासनं चैव	अध्यात्मम्	३६६
ज्ञानार्थमथ ध्यानार्थम्	परमसंहिता	२३०
त		
तमेवं विदित्वा	श्वेताश्वतरोपनिषत् ३.८	५०१
तस्याभिध्यानात्	श्वेताश्वतरोपनिषत् १.१०	९
तस्यैष आत्मा विशते	मुण्ड.उ.३.२.४	५३९
तीर्णो हि तदा सर्वान्	बृ.उ. ६.३.२२	३२४

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
द		
दर्शनेनाऽत्मयोग्येन	अध्यात्मम्	५३२
दृष्ट्वैव ह्यवताराणां	अध्यात्मम्	५२४
देवादीनामुपास्यास्तु	ब्रह्मतर्कः	२९६
द्रव्यं कर्म च कालश्च	स्मृतिः	९३
द्वावेतावनादिनित्यौ	गौपवनश्रुतिः	४३६
न		
न कश्चिद् ब्रह्मवित् सृतिं	कौण्डिन्यश्रुतिः	३५६
न तमाराधयित्वाऽपि	ब्रह्मवैवर्तम्	८
नानाविधा जीवसङ्घा	तुरश्रुतिः	३६६
नामत्वात् सर्वविद्यानां	ब्रह्मतर्कः	१५६
नाम वा एता ब्रह्मणः	कौण्डिन्यश्रुतिः	१५६
नामादयस्तु बद्धत्वात्	ब्रह्मतर्कः	४३५
नामादिप्राणपर्यन्तात्	,,	४२०
नासौ सूक्ष्मो न स्थूलः	माण्डव्यश्रुतिः	९
नास्त्यकृतः कृतेन	मुण्ड.उ.१.२.१२	५०८
नित्याव्यक्तोऽपि भगवान्	नारायणाध्यात्मम्	९
नेह नानाऽस्ति किञ्चन	कठ.उ.२.४.११	२४
नैतावदेना	ऋ.सं. १०.३१.८	१,२
नैव सर्वगुणाः सर्वे	वाराहम्	२०८
प		
पश्यन्ति परमं ब्रह्म	ब्रह्मतर्कः	७३

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
पादोऽस्य विश्वा भूतानि	ऋ.सं. १०.९०.३	५५
पुण्येन पुण्यं लोकं	प्रश्नोपनिषत् ३.२	९३
पूर्वस्मादुत्तमो लब्धः	बृहत्तन्त्रम्	४९५
प्रकाशवत् कालवद् वा	नारायणाध्यात्मम्	२३
प्राणो वाव सर्वेभ्यः	कौण्ठरव्यश्रुतिः	३८८
ब		
ब्रह्मविदाप्नोति परम्	तै.उ. ३.१०	३२४
ब्रह्मादिगुणवैशेष्याद्	वाराहम्	६५
ब्रह्मोपास्व	पौष्यायणश्रुतिः	४९५
भ		
भक्तिरेवैनं नयति	माठरश्रुतिः	५३९
भक्तिर्विष्णौ गुरौ चैव	नारायणतन्त्रम्	५१७
भक्तिस्थः परमो विष्णुः	मायावैभवम्	५३९
भगवांस्त्वेव मे कामे	छा.उ. ४.९.२	४८६
भिन्धि विद्धि शृणीहीति	बृहत्तन्त्रम्	३१५
भूमैव देवः परमः	गौपवनश्रुतिः	५७६
म		
मनुष्येभ्यो गन्धर्वाणां	चतुर्वेदशिखाश्रुतिः	३६६
मुक्ता अपि हि कुर्वन्ति	ब्रह्मतर्कः	३२४
मुक्त्यर्थमात्मयोग्यं हि	ब्रह्मतर्कः	५९४
मुच्यते नात्र सन्देहो	नारायणतन्त्रम्, अध्यात्मं च	५३२
य		
य एष आनन्दः परस्य	श्रुतिः	५४

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
यतो वाचो निवर्तन्ते	तै.उ. २.४	५४
यथा नदीनां सलिलं	आग्नेयम्	११९
यथा श्रीर्नित्यमुक्ता	बृहत्तन्त्रम्	४३५
यन्मनसा न मनुते	केनोपनिषत्१.६	७३
यस्मिन् यस्मिन् यो हि	पौत्रायणश्रुतिः	६१४
यस्य यस्य हि यः कामः	बृहत्तन्त्रम्	६०६
व		
विज्ञानमानन्दं ब्रह्म	बृ.उ.५.९.२८	११८,२४२
विज्ञानमानन्दं ब्रह्म रातिः	बृ.उ. ५.९.२८	९३
विधिशेषाणि कर्माणि	आग्नेयम्	१५५
वेदः कृत्स्नोऽधिगन्तव्यः	स्मृतिः	११८
श		
शब्दोऽनुमा तथैवाक्षो	ब्रह्मतर्कः	५८६
श्रुतं ह्येव मे	छा.उ. ४.९.३	४८६
श्रुत्वा मत्वा तथा ध्यात्वा	ब्रह्मतर्कः	४६०
श्रोतव्यो मन्तव्यः	बृ.उ. ४.४.५	४८६
स		
सच्चिदानन्द आत्मेति	ब्रह्मतर्कः	१९७
सत्यं ज्ञानमनन्तं ब्रह्म	तै.उ. २.१	११८, २४२
सत्याद्या अहमात्मान्ता	अध्यात्मम्	४२०
सत्यो ज्ञानः परमानन्दरूपः	कमठश्रुतिः	६२२
समग्रानुग्रहं कश्चित्	महासंहिता	४९५

प्रमाणवचनानि	आकरग्रन्थाः	पृ.सं.
समत्वाद् वोत्तत्वाद्वा	ब्रह्मतर्कः	५६४
सम्पूर्णोपासनाद् ब्रह्म	पाद्मम्	१८९
सर्वतः पौरुषे सूक्ते	ब्रह्मतर्कः	३०५
सर्वत्र सर्वमेतस्मात्	चतुर्वेदशिखाश्रुतिः	७९
सर्वलक्षणसम्पन्नः	स्मृतिः	५१७
सर्ववेदोक्तमार्गेण	समाचारः	११८
सर्वान् गुणानात्मशब्दः	भाल्लवेयश्रुतिः	२८७
सर्वान् परो मायया	कौशिकश्रुतिः	५०१
सर्वान् वेदान् सेतिहासान्	ब्रह्मतर्कः	११९
सर्वायतना सर्वकाला	वत्सश्रुतिः	४३५
सर्वे गुणाः ब्रह्मणैव		३५६
सर्वैर्गुणैरेक एव	श्रुतिः	१५६
सर्वैश्च वेदैः परमो	चतुर्वेदशिखाश्रुतिः	११९
साधारण्यात् सर्वगुणाः	माण्डव्यश्रुतिः	६१४
सामान्यदर्शनाल्लोका	नारायणतन्त्रम्	५३२
सृष्टिं च पालनं चैव	ब्रह्माण्डम्	१
सोऽरोदीत्	तै.सं. १.५.१	१५५
सोऽहं नामविदेवास्मि	छा.उ. ७.१.३	१५६
स्थितप्रज्ञत्वमाप्ता ये	वायुप्रोक्तम्	३२४
स्थूलसूक्ष्मविशेषोऽत्र	गारुडम्	९
स्वाध्यायोऽध्येतव्यः	तै.आ. २.१५	११८

०-०-०

परिशिष्टम् - ३

तत्वप्रकाशिका-शेषतात्पर्यचन्द्रिकोदाहृतप्रमाणवचनसङ्ग्रहः

प्रमाणवचनानि	पृष्ठसङ्ख्या
ॐ इत्येतदक्षरमुद्गीथमुपासीत(छा.उ.१.१.१)	१७१,१८२,१८६,३२१, ४६९,४७०,५६३,५७०,५९०,६२५
ॐइत्येतदक्षरमुद्गीथमुपासीत। ॐइत्युद्गायति। तस्योपव्याख्यानम् (छा.उ. १.१.१)	१८६
अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके (ब्र.सू २.३.४२)	४८
अक्षरधियां त्वविरोधः(ब्र.सू. ३.३.३४)	३७४,३८५
अक्षरमम्बरान्तधृतेः(ब्र.सू. १.३.१०)	८५
अग्निर्मूर्धा(ऋ.सं.)	३२१
अग्निर्वै देवानामवमो विष्णुः परमः	४१०
अग्निर्वै मृत्युः(बृ.उ. ३.२.१०)	५५२
अग्निलोकमागच्छति(कौ.उ. १.३.)	३४९
अग्निहोत्रं जुहोति(तै.सं. १.५.९)	५९१
अग्नीत्यादिना भस्म गृहीत्वाऽपिमृज्याङ्गानि संस्पृशेत्। तस्माद् व्रतमेतत् पाशुपतं पाशविमोक्षाय(अथर्वशिरसि)	५७०
अग्नीनादधीत(तै.सं. ३.५.१)	४६४
अग्ने त्वचं यातुधानस्य भिन्धि। तं प्रत्यञ्चमर्चिषा विध्य मर्मन्। पराशृणीहि तमसा यातुधानान्	३१५,३१७
अग्रेर्वे होत्रं वेरध्वरम्	३७८,३८२

प्रमाणवचनानि	पृष्ठसङ्ख्या
अङ्गानि हरिसेवायां भक्तिस्त्वेका विमुक्तये(स्मृतिः)	५४३
अङ्गावबद्धास्तु(ब्र.सू. ३.३.५७)	५६७,६१६
अङ्गैः पराद् ये हि देवा विसृष्टाः	६१९
अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्याम् (साङ्कर्षणसूत्रम्)	१५८
अच्छिद्रेण पवित्रेण	३७९
अच्छेद्योऽयमदाह्योऽयम्(भ.गी. २.२४)	४१५
अजरोऽमृतो ब्रह्म(बृ.उ. ४.४.२५)	२५९
अणोरणीयान्महतो महीयान् (म.ना.उ. ८.१) (कठ.उ.२२०)	४७,४६७
अत एव प्राणः(ब्र.सू. १.१.२३)	३८,१४२
अतिप्ररूढं बाह्येष्वर्थेष्विन्द्रियानुगतं मनः। प्रदेशो ह्यसतस्तस्य परस्मिन्न हि शक्यते ॥	५९९
अतो योगः सुदुष्प्रापः सहसा कर्मणा द्विज।	५९९
अतोऽनन्तेन तथा हि लिङ्गम्(ब्र.सू. ३.२.२७)	१५,१०,८५,४५
अत्र ह न किञ्चन वीयाय(छा.उ. ४.९.३)	४९०
अत्र ह्येते सर्व एकीभवन्ति(बृ.उ. ३.४.७)	१२१,१३३,२४५, २४७,२५१,२८९
अथ नामधेयं सत्यस्य सत्यम्(बृ.उ. २.३.६)	४०,४२
अथ परा यया तदक्षरमधिगम्यते। यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णम्(मुण्ड.उ. १.१.५)	३७४
अथ य आत्मा स सेतुर्विधृतिः(छा.उ. ८.४.१)	८२
अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते(छा.उ. १.७.५)	८२

प्रमाणवचनानि	पृष्ठसङ्ख्या
अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषः(छा.उ. ४.१५.१)	८२
अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः(छा.उ. ८.१.१)	४४१
अथ यदिदमस्मिन्(छा.उ. ३.१२.३४)	४४४,४४६
अथ ह य एतान् पञ्चाग्नीन् वेद	१४५
अथ ह य एवायं मुख्यप्राणस्तमुद्गीथमुपासाञ्चक्रिरे(छा.उ. १.२.७)	१७०
अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति। (बृ.उ. १.३.७)	१७०
अथ हैनमृषभोऽभ्युवाद(छा.उ. ४.४.५)	४९०
अथात आदेशो नेति नेति नह्येतस्मादिति नेत्यन्यत् परमस्ति (बृ.उ. १.३.७)	३०,३२
अथात आनन्दस्य मीमांसा भवति(तै.उ.२.८)	३७
अथातो ब्रह्मजिज्ञासा(ब्र.सू. १.१.१)	३२
अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः(ऐ.उ. १.३.१)	३८,२५६
अथैष एव परम आनन्दः(बृ.उ. ६.३.३३)	२६,२८
अधिकाराधिको यत्नः प्रायशो नोपपद्यते। कथञ्चिदधिके यत्ने दोषः कश्चित् समापतेत्॥	३६८
अनन्ता वै वेदाः(श्रुतिः)	५६७
अनादितो गुणाः सन्तो भक्त्याद्या नह्यमूमुचन्	५५८
अनारब्धकार्ये एव तु पूर्वे तदवधेः(ब्र.सू. ४.४.१५)	३७२
अनियमः सर्वेषाम्(ब्र.सू. ३.३.३२)	३६३,३६४,३७४,३७५
अनुप्रविश्य नामरूपे व्याकरोद् (छा.उ. ६.३.३)	८०
अनुबन्धस्तु भक्तिः स्याद् बन्धः स्नेह उदाहृतः(अभिधानम्)	५१८

प्रमाणवचनानि	पृष्ठसङ्ख्या
अनुबन्धादिभ्यः(३-३-५१)	७५,२७५,५०४,५५१,५५२
अनेन जीवेनाऽत्मनाऽनुप्रविश्य(छा.उ. ६.३.२)	४७
अनेन सर्वगतत्वमायामयशब्दादिभ्यः(ब्र.सू. ३.२.३८)	८१,८५
अन्तरा भूतग्रामवत्(ब्र.सू. ३.३.३६)	४०५,४१४
अन्तर्दृष्टयोबहिर्दृष्टयोऽवतारदृष्टयः सर्वदृष्टयः(कमठश्रुतिः)	५३६
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः(तै.ना.उ. ११.११)	८८
अन्तस्तद्धर्मोपदेशात्(ब्र.सू. १.१.२०)	१०७
अन्नमयमात्मानमुपसङ्क्रम्य(तै.उ. ३.१०.५)	२३८,२६१
अन्नवानन्नादो भवति(छा.उ. १.३.७)	४८०
अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्(ब्र.सू. ३.३.३७)	४००,४०४,४३०
अन्यथात्वं च शब्दादिति चेन्नाविशेषात्(ब्र.सू. ३.३.७)	१९२,२५८२३४, ३८२,३५०,३९८,
अन्यदेव तद् विदितादथो अविदितादधि(के.उ. १.४)	३२
अन्योऽन्तर आत्माऽऽनन्दमयः(तै.उ. २.५)	२६०,२३९
अन्वयादिति चेत् (ब्र.सू. ३.३.१८)	२६१,२६३,२८९,२९०
अपहतपात्मा विजरो विमृत्युः विशोकः योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति (छा.उ. ८.७.१३)	२०१,४४४,४४५,४५२
अपि संराधने प्रत्यक्षानुमानाभ्याम्(ब्र.सू. ३.२.२४)	१६
अभयं ब्रह्म भवति(छा.उ. ८.३.४)	४४४
अमृतस्यैष सेतुः(मुण्ड.उ. २.२.५)	८६,८७
अम्बुवदग्रहणात्(ब्र.सू. ३२१९)	७५
अयं वाव लोकः एषोऽग्निश्चितः(अग्नि.र. १०.५.४.१)	५७०

प्रमाणवचनानि	पृष्ठसङ्ख्या
अयं सत्यवतीसूनुः कृष्णद्वैपायनो मुनिः	३७४
अयोग्यमिच्छन् पुरुषः पतत्येव न संशयः	२११
अयोग्योपासनादीयुरनर्थं वाऽर्थनाशनम् (ब्र.सू.भा. उदा.बृहत्तन्त्रवचनम् ३.३.२६)	३२७
अरूपमक्षरं ब्रह्म सदाऽव्यक्तं च निष्कलम्। यज्ज्ञात्वा (भाष्य.उदा. कौण्ठरव्यश्रुतिः)	२६
अरूपमव्ययम्(भाष्योदा.कौण्ठरव्यश्रुतिः)	१७
अरूपवदेव हि तत्प्रधानत्वात्(ब्र.सू.३२१४)	३२,३४,३८
अर्थसामान्यात्(ब्र.सू. ३.३.१४)	२७४
अलौकिको ह्येष विष्णुः परस्तात्(न्या.वि.उदाहृता श्रुतिः)	६३
अलौकिकोऽपि ज्ञानादिस्तच्छब्दैरेव भण्यते(पाद्मवचनम्)	२७
अवचनेनैव प्रोवाच	१३६
अव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥ (कठ.उ. ३.१०)	२३५
अशब्दमस्पर्शम्(कठ.उ. ३.१५)	३२
अशरीरं वाव सन्तं न प्रियाप्रिये उपस्पृशतः(छा.उ. ८.१२.१)	३४७
अशित्वाऽऽचामेत्(बृ.उ.६-१-४)	२६८
अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि(छा.उ. ८.१३.१)	३२९
अश्व इव रोमाणि विधूय पापं धूत्वा शरीरम् (छा.उ. ८.१३.१)	३२९,३३४,३३५,३४४,३४७,३४८
अष्टवर्षं ब्राह्मणमुपनयीत(आ.श्रौ.सू.)	१३०

प्रमाणवचनानि	पृष्ठसङ्ख्या
अष्टाङ्गं हि परं योगं ब्रुवते योगवित्तमाः। धारणा च तथा ध्यानं समाधिश्चेति सङ्ग्रहः॥ (गारुडवचनम्)	५१९
असङ्गो ह्ययम् (बृ.उ. ४.३.१५)	४४१
असद् वा इदमग्र आसीत्(तै.उ. २.७)	२५८
असन्नेव स भवति(तै.उ. २.६)	३१,३३
असम्भवस्तु सतोऽनुपपत्तेः(ब्र.सू. २३९)	४४०
असावादित्यो न व्यरोचत	१७३
असौ वा आदित्यो देवमधु(छा.उ. ३.१.१)	६१८
असौ वाव लोको गौतमाग्निस्तस्याऽदित्य एव समित्(छा.उ.५.४.१०)	५५२
अस्ति भगव आशाया भूयान्(छा.उ. ७.१४.२)	४१७
अस्ति भगवः प्राणाद् भूय इति प्राणाद् वाव भूयोऽस्तीति तन्मे भवान् ब्रवीतु	४०८
अस्ति भगवः प्राणाद् भूयः	४११
अस्ति भगवो नाम्नो भूयः(छा.उ. ७.१)	४१०
अस्तीत्येवोपलब्धव्यः(कठ. ६.१३)	३१,३३
अस्त्यन्नं पश्यसि प्रियम्	५८३
